BHAVAN'S LIBRARY

This book is valuable and
NOT to be ISSUED
out of the Library
without Special Permission

SAHITYA DARPANA

OF

KAVIRĀJA VIŚVANĀTHA MAHĀPATRA

With

TWO OLD COMMENTARIES

viz:

(1) Locana by the Author's Son Ananta Dāsa

&

(2) Vijñapriyā by Bhaṭṭācārya Maheśvara Tarkālaṅkāra

EDITED WITH NOTES

BY

Pt. KARUṆĀKAR KAR, M A.,

Kāvya-Vyākaraṇa Tīrtha.,

Principal, Government Sanskrit College,

PURI (ORISSA)

Sa H
6196

PUBLISHED BY

MOTILAL BANARSIDASS

Booksellers & Publishers,

Saidmitha, LAHORE.

1938.

श्रीमदालङ्कारिकचक्रवर्तित्रिकलिङ्गगजपतिसाम्राज्यसान्धि-
विग्राहिकमहापात्रविश्वनाथकविराजविरचितः

साहित्यदर्पणः

ग्रन्थकृदात्मभुवा साहित्यार्णवसुधाकरेण श्रीमदनन्तदासेन
विरचितया लोचनाख्यया भट्टाचार्यश्रीमहेश्वरतर्कालङ्कार-
प्रणीतया प्राचीनया विज्ञप्रियासमाख्यया च
व्याख्यया समलङ्कृतः

राजकीयसंस्कृतमहाविद्यालयप्रधानाध्यापकेन काव्यव्याकरणतीर्थो-
पाधिकेन "एम्, ए" इत्युपाधिधारिणा श्रीकरुणाकरकरशर्मणा
सङ्कलितः
तेनैव निर्मितैरुद्द्योतटिप्पण्यनुक्रमणिकादिभिः
समुद्भासितश्च ।

स चायं
लवपुरीयपञ्जाबसंस्कृतपुस्तकालयाध्यक्षैः
मोतीलाल बनारसीदास
इत्येतैः स्वीये 'मुम्बई संस्कृत' इत्याख्ये मुद्रणालये
सम्मुद्राप्य प्रकाशितः


[थमावृत्तिः] १९३८ मूल्यम् { आवरणबद्धस्य ४॥) साधारणस्य ४)

प्रकाशक:—
सुन्दरलाल जैन
अध्यक्ष—पंजाब संस्कृत पुस्तकालय
सैदमिट्ठा बाज़ार, लाहौर।

सर्व प्रकार की पुस्तकें हमारी शाखा से भी मिल सकती हैं:—
मोतीलाल बनारसीदास
संस्कृत-हिन्दी-पुस्तक-विक्रेता, बांकीपुर-पटना

मुद्रक:—
शान्तिलाल जैन
मैनेजर—मुंबई संस्कृत प्रेस,
सैदमिट्ठा बाज़ार, लाहौर।

LIBR



Pt. KARUṆĀKAR KAR, M A.,
Kāvya-Vyākaraṇa Tīrtha.,

निवेदनम् ।

अन्तरायतिमिरप्रभाकर शङ्कराय ददतं मुदा करम् ।
त शयामृतविचुम्बिपुष्करं संश्रयामि सतत गणेश्वरम् ॥ १ ॥
येनोपदेशाञ्जनसम्प्रदानात् प्रकाशित ज्ञानमयं महो मे ।
ख्यातः क्षितौ यो व्रजबन्धुनामा पितामहं त गुरुमानतोऽस्मि ॥
विस्मृत्यात्मसमग्रसौख्यमनिश साऽऽरिक सर्वथा—
पत्यस्नेहगुणावरुद्धहृदयो योऽपालयत् कृच्छ्रतः ।
आबाल्याज्जननीवियोगवशतः सद्धर्मकर्मव्रती
देयादेष गयाधरः स जनक: श्रःश्रेयसायाशिषः ॥ ३ ॥

नीलाद्रिकन्दरचर च चराचरेश
भद्रारिमद्रपरिभासितपार्श्वदेशम् ।
सारस्वतीकरसरोरुहसेवितार्ङ्घ्रि
निर्वाणपण्यविपणीं प्रणमामि देवम् ॥ ४ ॥

भूविख्यातसमस्ततीर्थमहितश्रीक्षेत्रधामाश्रयन्
निर्विघ्नेन समाप्तिमस्य हि फल सम्प्राप्तुरीशेच्छया ।
कष्टाल्लब्धदुरूढणाद्धरमथीर्दंड्माथिनीर्मातृका
दर्शं दर्शमह व्यधामवसितिं यास्कान्ववायप्रधी. ॥ ५ ॥
विनायास विबोधाय बालाना प्राणतोषणीम् ।
विवेकमनतिक्रम्य विदधेऽमुष्य टिप्पणीम् ॥ ६ ॥

सुविदितमेव सर्वेष्वलङ्कारग्रन्थेषु साहित्यदर्पणस्यैव सर्वविषयोपपादनपरतया सर्वेन प्रथमतया पठनपाठनादरः समुपलभ्यत इति । एव लब्धप्रतिष्ठस्याप्यस्य ग्रन्थस्य काठिन्यमध्येतृणां चेतो यथा न समावर्जयति तथैवाध्यापकानामपि पण्डितवर्याणा बहुषु स्थलेषु सम्मोहमापादयति । प्राचीनव्याख्यानां तथा विशुद्धपाठानामभाव एव तस्य दुरवगाहतायां हेतुरिति प्रतिभाति ।

परं प्रकाशितेऽस्मिन् साहित्यदर्पणे प्राचीनप्रधानटीकाद्वय समावेशितमास्ते । एका लोचनाख्या ग्रन्थकृत्तनुजउपानन्तदासविरचिता, अपरा च तर्कालङ्कारमहेश्वरभट्टाचार्यप्रणीता विजयिया नाम ।

तत्र प्रथमायां ग्रन्थकृत्-स्वपितृमुखश्रवणादनन्तदासेन यथायोग्यग्रन्थार्थसंयोजनं समुचितप्रमेयार्थप्रदर्शनञ्च सम्यगकारि। पूर्वापरसङ्गतिप्रदर्शनपुरःसरं समपेक्षितार्थविवरणकरणात् संदिग्धोक्त्या प्रकृतार्थप्रतिबोधनाच्च ग्रन्थमुमधिजिगमिषूणामन्तेवासिनामनया महोपकार आपत्स्यत इत्यत्र यत्नो मया व्यधायि।

द्वितीयायाञ्च भट्टाचार्येण कारिकाभागस्तथा वृत्तिभागश्च सविशदपदार्थसमुन्मेषणाय समन्वयशैल्या विवृत्य परिष्कृतः। न्यायरीतिमनुसृत्य तत्तद्भागयोर्विशेषणांशाना व्यावृत्त्या सार्थकताविधानादेतदध्येतृणां सविशेषव्युत्पत्त्याधायकगुणयोगाच्च नितरामियमुत्कृष्टा प्रतिभाति। अस्यामध्यवसायिना पाठकाना प्रायेणान्यालङ्कारग्रन्थेष्वनायासप्रवेशः सम्भविष्यतीति धिया बहुश्रममूरीकृत्य लोकोपकृतये मूलग्रन्थेन साकमियं समयोजि।

व्यवहारसौकर्यार्थं पाठान्तरसूचीपत्रादीनां सन्निवेशोऽपि न विस्मृतः।

आशास्यते च समुचितटीकाद्वयोपेतेन प्रकाशमानेनानेन साहित्यदर्पणग्रन्थेनालङ्कारसारसंजिघृक्षूणा मनीषिणा महोपकारः सम्भविष्यतीति।

सुदूरे चैतद्ग्रन्थस्य मुद्रणात्तदवसरे बहुश्रमं स्वीकृत्य संशोधनकार्ये निर्वहद्भ्यः "एम्. ए.एम्.ओ. एल्" इत्युपाधिधारिभ्यः श्रीजगदीशशास्त्रिभ्यो बहवो धन्यवादाः समर्प्यन्त इति

निवेदकस्य
श्रीकरुणाकरकरशर्मणः।

विषयानुक्रमणिका

प्रकरणम्	पृ०
अ	
अङ्कलक्षणम्	२६५–६७
अतद्गुणः	६८६
अतिशयोक्तिलक्षणं तद्भेदाश्च	५८८–९४
अधिकम्	६६३
अधीरालक्षणम्	१११
अनुकूलम्	६५०
अनुकूलनायकः	९६
अनुप्रासः	४८१
अनुभावाः	१३७
अनुमानम्	६४८
अन्तःपुरसहायाः	१००
अन्त्यानुप्रासः	४८५
अन्योन्यम्	६६४
अपह्नुतिः	५६६–६८
अप्रस्तुतप्रशंसाभेदाः	६२८
अभिधामूला व्यञ्जना	५५
अभिधावृत्तिकथनम्	२६
अभिनयलक्षणविभागौ	२६३
अभिसारस्थानकथनम्	११८
अभिसारिकालक्षणम्	११६
अर्थचिन्तनसहायाः	६६
अर्थगतदोषाः	४०६
अर्थशैथिल्यकथनम्	२८
अर्थप्रकृतिलक्षणतद्भेदाः	२८६–२८६
अर्थान्तरन्यासतद्भेदाः	६४१
अर्थापत्तिः	६७६
अर्थोपक्षेपकभेदप्रकरणलक्षणानि	२८१–२८६
अलङ्कारस्वरूपकथनम्	४७७
अवस्थाभिः सन्धिनामक्रम इति-वृत्तस्य पञ्च भागाः	२८८–२९०
असङ्गतिः	६५६
आ	
आक्षेपस्तद्भेदौ च	६५०
आधिकारिकप्रासङ्गिकौ नाट्यवस्तु-भेदौ	२७८
आमुखलक्षणतद्भेदतत्त-ल्लक्षणानि	२७४–२७७
आरभटीभेदास्तल्लक्षणा-नि च	३२२–३२४
आर्या व्यञ्जना तद्भेदकथनञ्च	६१
आलम्बनविभावाः	९३
ई	
ईहामृगलक्षणम्	३५२–५३
उ	
उत्तरम्	६७५
उत्प्रेक्षास्वरूपं तद्भेदाश्च	५७१–५८७
उदात्तम्	६६२
उद्दीपनविभावाः	१३७
उपमा तद्भेदाश्च	५१८–५३६
उपरूपकभेदाः	३६४
उपादानलक्षणा	३६
उल्लाप्यलक्षणम्	३६०–६१
उल्लेखः	५६१
ऊर्जस्वी	६६२
ए	
एकस्मिन्नङ्कान्तरपरिभाषाया रसान्तरे सञ्चारित्वकथनम्	१३४

प्रकरणम्	पृ०
एकावली	६६७–६६८
ओ	
ओजोगुणः	४६२
औ	
औदार्य्यम्	१२६
क	
कन्यकालक्षणम्	११४
करुणादीनां रसत्वसंस्थापनम्	७५
कलहान्तरितालक्षणम्	११८–११९
कान्तिः	१२५
कारणमाला	६६७
काव्यलक्षणम्, उपरूपकभेद·	३६१
काव्यनिष्टगुणादिस्वरूपम्	२२
काव्यनिष्टदोषस्वरूपम्	२२
काव्यफलानि	३
काव्यभेदौ तत्प्रकारभेदाश्च	१९१
काव्यलिङ्गम्	६४४
काव्यस्वरूपम्	१९
किलकिञ्चितम्	१२९
कुट्टमितम्	१२९
कुतूहलम्	१३२
कुलजावेश्याप्रेष्याणाम-भिसारावस्थाकथनम्	११७–११८
केलिः	१३३
कौशिकीवृत्तिस्तदङ्गानि च	३१८–३२०
ख	
खण्डितालक्षणम्	११६
ग	
गद्यस्वरूपतद्भेदतल्लक्षणानि	३६७–६९
गर्भाङ्क	२६७
गर्भाङ्कभेदास्तत्तल्लक्षणानि च	३०१–३०५
गाम्भीर्यलक्षणम्	१०३
गुणभेदाः	४६०
गुणलक्षणम्	४५९
गोष्ठीस्वरूपम्	३९०
च	
चकितम्	१३३
चित्रम्	५१४
छ	
छेकानुप्रास·	४८१
ड	
डिमलक्षणम्	३५२
त	
तद्गुणः	६८६
तपनम्	१३१
तुल्ययोगिता	५९४–९५
तेजोललितौदार्य्यलक्षणानि	१०४
त्रोटकस्वरूपम्	३६०
द	
दक्षिणनायक·	१९५
दण्डसहायाः	१०१
देशभेदै.सामान्यस्त्रीभेदाः (१६)	११५
दीपकम्	५९६
दीप्ति·	१२५
दुर्मल्लिकालक्षणम्	३६३
दूतदूतीलक्षणविभागौ	१०२
दूतीगुणाः	१३६
दूतीनिरूपणम्	१३५
दृष्टान्तः	५९९
दोषस्वरूपतद्भेदा·	३७०–७१
द्विप्रकारीभूतकाव्यस्य दृश्यश्रव्यभेदेन पुन प्रकारद्वयकथनम्	२६३

विषयानुक्रमणिका

प्रकरणम्	पृ०
ध	
धर्मसहायाः	१०१
धीरप्रशान्तलक्षणम्	६५
धीरललितलक्षणम्	,,
धीरोधीरलक्षणम्	११२
धीरोदात्तलक्षणम्	६४
धीरोद्धतलक्षणम्	६५
धृष्टनायकः	६६
धैर्य्यलक्षणम्	१०४, १२७
न	
नाटकवार्य्यपूर्वरङ्गनान्दीपाठ-लक्षणादिः	२६८
नाटकस्वरूपप्रकारनिर्वचनम्	२६४–२६५
नाटिकास्वरूपकथनम्	३५६
नाट्यभाषाविभागः	१२७
नाट्यरसकलक्षणम्	३६०
नाट्यालङ्कारभेदा-स्तल्लक्षणानि च	३३६–३४६
नाट्ये लक्षणानि	३२६
नाट्योक्तीनां निरूपणम्	३२४–२७
नायकगुणाः (८)	१०२
नायकप्रथमभेदाः	६४
नायकभेदा. (४८)	६७–६८
नायकलक्षणम्	६४
नायिकाप्रवित्र्यकथनम्	१०५
नायिकाभेदाः (३८४)	१२१
नायिकानामलङ्कार.	१२३–२४
निदर्शना	६०१
निर्वहणाङ्गभेदास्तल्लक्षणानि च	२११–१४
निश्चयः	५६६
निष्टार्थदूतलक्षणम्	१०२
प	
पताकास्थानलक्षणतद्भेदाः	२७६–२८२
पदलक्षणम्	२७
पद्यमयकाव्यनियमा.	३६४–३६७
परस्त्रीभेदौ	११३
परिकरः	६२६
परिणामलक्षणं तद्भेदौ च	५५४
परिवृत्तिः	६७२
परिसङ्ख्या	६७३
परोढा	११४
पर्य्यायः	६७०
पर्य्यायोक्तम्	६३८
पीठमर्दनामा नायकसहायः	६८
पीठमर्दादीनामुत्तमत्वकथनम्	१०१
पुनरुक्तवदाभासलक्षणम्	४७६
प्रकरणनामकदृश्यलक्षणभेदा	३४६
प्रकरणिकालक्षणम्	३६३
प्रगल्भाधीरलक्षणम्	११२
प्रगल्भालक्षणम्	१०८
प्रतिनायकः	१२६
प्रतिमुखाङ्गानि, तद्भेदास्तल्लक्षणानि च	२६७—३००
प्रतिवस्तूपमा	५६७
प्रतीपम्	६८३—८४
प्रत्यनीकम्	६८३
प्रमादगुणः	४६३—६४
प्रहसनं, तन्नियमाश्च	३५६
प्रहेलिकया अलङ्कारान्तरनिरूपणम्	५१७
प्रस्थानम् उपरूपकस्यदृश्यकाव्यम्	३६०
प्रागल्भ्यम्	१२६
प्रेङ्खणम् उपरूपकभेद	३६१
प्रेयोऽलङ्कार·	६६३

प्रकरणम्	पृ०
प्रोषितभर्तृकालक्षणम्	११६
फ	
फलार्थ्यारब्धकार्य्यावस्था-भेदतद्गतलक्षणानि च	२८८–२८६
भ	
भाणलक्षणकथनम्	३५०
भाणिकालक्षणम्	३६३
भारती वृत्तिः	२७३
भावसन्धिः	६६५
भावशबलः	,,
भावः	१२४
भावोदयः	६६५
भाविकम्	६६०
भाषासमः	४६१
भ्रान्तिमान्	५५६
म	
मदः	१३०
मध्याधीरादीनां लक्षणम्	१११
मध्याप्रगल्भाभेदान्तराणि	,,
मध्यालक्षणम्	१०७
महानाटकलक्षणम्	३४६
मालादीपकम्	६६७
महावाक्यम्	२६
माधुर्यलक्षणम्	१०३,१२६
माधुर्यगुणलक्षणं भेदाश्च	४६०–६१
मितार्थसंदेशहारकौ दूतौ	१०२
मीलितम्	६८५
मुग्धालक्षणम्	१०६
मुग्धाकन्यकयोरनुरागोक्तितानि	१३३
मोट्टायितम्	१२६
मौग्ध्यम्	१३१

प्रकरणम्	पृ०
य	
यथासङ्ख्यम्	६६६
यमकलक्षणम्	४८८
र	
रसगतदोषाः	४२१
रसनिर्वचनम्	६६
रसभावाभासौ	१८४
रसभेदतल्लक्षणतदवान्तरभेदाः सोदाहरणाः	१५४–१७७
रसवदलङ्कारः	६६३
रसस्य स्वप्रकाशत्वाखण्डत्वासिद्धिः	६१
रसस्यानुकर्तृगतत्वनिरासः	८४
रसस्यालौकिकत्वसहृदयसंवेदकत्वकथनम्	८६
रसस्वरूपतदास्वादप्रकारौ	६६–७०
रसाना परस्परविरोधः	१८०–१८१
रसास्वादे विभावादीनामेकाकारता	८२
रसोद्बोधे विभावादीनां कारणत्वकथनम्	८१
रासकलक्षणम्	३६१
रूपकनामकदृश्यकाव्यभेदा	२६४
रूपकालङ्कारस्वरूपभेदलक्षणानि	२३४
ल	
लक्षणाभेदाः	४५,५०,५१,५३,
लक्षणलक्षणा	४०
लक्षणाश्रया व्यञ्जना	६०–६१
लक्षणावृत्तिकथनम्	३५
लक्षणा सारोपाध्यवसाना	४२
ललितम्	१३०
लाटानुप्रासः	४८६
लास्याङ्गभेदास्तत्तल्लक्षणानि च	३४७
लीला	१२७

प्रकरणम्	पृ०
व	
वक्रोक्तिः,	४६०
वत्सलरसः	१८०
वाक्यस्वरूपम्	२४
वासकसज्जालक्षणम्	१२०
विकल्पः	६७७
विकृतम्	१३१
विक्षेपः	१३२
विचित्रम्	६६३
विच्छित्तिः	१२८
विटलक्षणम्	६८
विटविदूषकयोर्मैत्र्यता	१०२
विदूषकलक्षणम्	६६
विध्याभासः	६५३
विनोक्तिः	६१०
विप्रलब्धालक्षणम्	११६
विभावकथनं तद्भेदौ च	६२–६३
विभावना तद्भेदौ च	६५४
विभ्रमः	१३०
विमर्शाङ्गभेदास्तल्लक्षणानि च	१०५–१११
विरहोत्कण्ठितालक्षणम्	१२०
विरोधस्तद्भेदाश्च	६५६—५७
विलासलक्षणम्	१०३–१२७
विलासिकालक्षणम्	३६२—६३
विव्वोकः	१२८
विशेषस्तद्भेदाश्च	६६४–६६५
विशेषोक्तिः	६५५
विषमः	६६०
वीथीलक्षणम्	३५४
वीथ्यङ्गभेदास्तल्लक्षणानि च	३५४–३५८
वृत्त्यनुप्रासः	४८२
वृत्तस्तद्विनियोगश्च	११७

प्रकरणम्	पृ०
व्यञ्जनाद्वैविध्यकथनम्	५५
व्यञ्जनावृत्तिः	५४
व्यञ्जनस्थानीया तात्पर्याख्या वृत्तिः	६६
व्यञ्जनास्वीकारः	२४०
व्यतिरेकस्तद्भेदाश्च	६०५–६
व्यभिचारिभावलक्षणभेदनामानि	१३६—१४०
व्याघातः	६६५—६६६
व्याजोक्तिः	६८८
व्याजस्तुतिलक्षणभेदौ	६३७
व्यायोगलक्षणम्	३५०
श	
शठनायकः	६५
शब्दार्थव्यञ्जनयोः परस्परं सहकार्यसहकारकभावकथनम्	६५
शिल्पकलक्षणम्	३६२
शृङ्गारसहायाः	६८
शोभालक्षणम्	१०२, १२५
श्रव्यकाव्यभेदौ	३६४
श्रीगदितम्	३६२
श्रुत्यनुप्रासः	४८४
श्लेषः (आर्थः)	६२७
,, (शाब्दः)	४६२
श्लेषभेदाः	४६३
स	
सन्देशहारकः	१०२
सन्देहः	५५७
संलापकम्	३६१–३६२
संसृष्टिः	६६८
सकलनायिकानामनुरागेङ्गितानि	१३४
सङ्करस्वरूपम्	१६०
समम्	६६२

प्रकरणम्	पृ०
समवकारलक्षणम्	३५१
समाधिः	६८२
समासोक्तिः	६१२
समाहितम्	६६३
समुच्चयः	६७६
सहोक्तिः	६०८
सन्ध्यङ्गानि मुखगतानि तल्लक्षणानि च	२६२—६६
सात्त्वतीवृत्तिस्तद्दोषास्तल्लक्षणानि च	३२१—२२
सात्त्विकभावास्तल्लक्षणानि च	१३८—३६
सङ्करः	६६८
सङ्केतगृहस्थलकथनम्	११८
सामान्या वा साधारणस्त्रीलः तद्भेदौ च	११३
सामान्यम्	६८५
सारः	६६६
सूक्ष्मम्	६८७
स्थायिभावलक्षणभेदतत्तन्नामानि	१५४
स्मरणम्	५४०
स्वभावोक्तिः	६८६
स्वस्त्रियस्त्रैविध्यकथनम्	१०५
स्वस्त्रीलक्षणम्	,,
स्वस्त्रीभेदाः (१३)	११३
स्वाधीनभर्तृकालक्षणम्	११६
ह	
हल्लीशलक्षणम्	३६३
हसितम्	१३२
हावः	१२४
हेतुः	६४६
हेला	१२५

प्रकरणम्	पृ०
प्रथमपरिच्छेदे	
मङ्गलम्	२
काव्यफलानि	३—६
काव्यलक्षणदूषणानि	७—१६
•काव्यस्वरूपम्	१६
•दोषस्वरूपम्	२२
•गुणस्वरूपम्	,,
द्वितीयपरिच्छेदे	
•वाक्यस्वरूपम्	२४
•महावाक्यम्	२६
•पदलक्षणम्	२७
अर्थत्रैविध्यम्	२८
•अभिधा	२६
•सङ्केतः	३२
•लक्षणा	३५
•लक्षणाभेदाः	३५—५३
व्यञ्जना	५४
तात्पर्यनिर्णायकाः	६१
•तात्पर्यवृत्तिः	६६
तृतीयपरिच्छेदे	
•रसस्वरूपम्	६७
रसास्वादनप्रकारः	६६—७०
करुणादीना रसत्वस्थापनम्	७५
रसस्यानुकार्यगतत्वखण्डनम्	८३
रसस्यानुकर्तृगतत्वखण्डनम्	८४
रसस्य ज्ञानान्तरग्राह्यत्वखण्डनम्	८५—८८
रसस्य स्वप्रकाशत्वकथनम्	६१
विभावः	६२
विभावभेदौ	६३
नायकः	६४

प्रकरणम्	पृ०
धीरोदात्तः	९४
धीरोद्धतः	९५
धीरललितः	,,
धीरशान्तः	,,
नायकस्य षोडशभेदाख्यानम्	,,
दक्षिणनायकः	,,
धृष्टनायकः	९६
अनुकूलनायकः	,,
शठनायकः	९७
नायकस्याष्टाचत्वारिंशद्भेदाख्यानम्	९८
पीठमर्दः	,,
नटसहायाः	,,
विटः	,,
विदूषकः	९९
मन्त्री	,,
अन्तःपुरसहायाः (वामन-षण्ढ-किरात-म्लेच्छ-आभीर-शबर-कुब्ज-मूका)	१००
दण्डसहायाः	१०१
धर्मसहायाः	,,
दूतभेदाः	१०२
निसृष्टार्थः	,,
मितार्थः	,,
सन्देशहारकः	,,
सात्त्विकनायकगुणाः	,,
शोभा	,,
विलासः	१०३
माधुर्यम्	,,
गाम्भीर्यम्	,,
धैर्यम्	१०४
तेजः	,,
ललितम्	,,
औदार्यम्	,,

प्रकरणम्	पृ०
नायिकाभेदाः	१०५
स्वकीया	,,
मुग्धा	१०६
मध्या	१०७
प्रगल्भा	१०८
मध्याधीरा	१११
मध्या धीराधीरा	,,
मध्याधीरा	,,
प्रगल्भाधीरा	११२
प्रगल्भाधीराधीरा	,,
प्रगल्भाधीरा	,,
भेदाख्यानम्	११३
कुलटा	११४
कन्या	,,
वेश्या	,,
नायिकाभेदाख्यानम्	११५
स्वाधीनभर्तृका	११६
खण्डिता	,,
अभिसारिका	,,
अभिसारिकाभेदाः	११७
अभिसारस्थानानि	११८
कलहान्तरिता	११९
प्रोषितभर्तृका	,,
वासकसज्जा	१२०
विरहोत्कण्ठिता	,,
नायिकाभेदाख्यानम्	१२१
नायिकालङ्काराः	१२१–२४
भावः	१२४
हावः	,,
हेला	१२५
शोभा	,,
कान्तिः	,,

प्रकरणम्	पृ०
दीप्तिः	१२५
माधुर्यम्	१२६
प्रगल्भता	,,
औदार्यम्	,,
धैर्यम्	१२७
लीला	,,
विलासः	,,
विच्छित्तिः	१२८
विब्बोकः	,,
किलकिञ्चितम्	१२९
मोट्टायितम्	,,
कुट्टमितम्	,,
विभ्रमः	१३०
ललितम्	,,
मदः	,,
विहृतम्	१३१
तपनम्	,,
मौग्ध्यम्	१३१–३२
विक्षेपः	१३२
कुतूहलम्	,,
हसितम्	,,
चकितम्	१३३
केलिः	,,
मुग्धाकन्ययोरनुरागोद्गिताभिनि	,,
सर्वासामनुरागोद्गितानि	१३४
दूत्यः	१३५–३६
•दूतीगुणाः	१३६
प्रतिनायकः	,,
•उद्दीपनविभावाः	१३७
•अनुभावाः	,,
•सात्त्विकाः	१३८
•स्तम्भादयः	,,

प्रकरणम्	पृ०
•स्तम्भादीनां लक्षणानि	१३८–३९
•व्यभिचारिणः	१३९–४०
निर्वेदः	१४०
आवेगः	१४१
दैन्यम्	,,
श्रमः	१४२
मदः	,,
जडता	१४३
उग्रता	,,
मोहः	१४४
विबोधः	,,
स्वप्नः	,,
अपस्मारः	१४५
गर्वः	,,
मरणम्	१४६
आलस्यम्	,,
अमर्षः	,,
निद्रा	,,
अवहित्था	१४७
औत्सुक्यम्	,,
उन्मादः	१४८
शङ्का	,,
स्मृतिः	१४९
मतिः	,,
व्याधिः	१५०
त्रासः	,,
व्रीडा	,,
हर्षः	,,
असूया	,,
विषादः	१५१
धृतिः	,,
चपलता	१५२

प्रकरणम्	पृ०
ग्लानिः	१५२
चिन्ता	१५३
वितर्कः	,,
• सञ्चारिभावः	१५४
• स्थायिभावः	,,
• स्थायिभावभेदाः	,,
स्थायिभावभेदलक्षणानि	१५५
भावपदनिरुक्तिः	,,
• रसभेदाः	१५६
शृङ्गारः	,,
विप्रलम्भः	१५७
सम्भोगः	,,
• विप्रलम्भस्वरूपम्	,,
• विप्रलम्भभेदाः	,,
पूर्वरागः	,,
कामदशाः	१५९
तत्र मरणे विशेष·	१६०
कामदशासु विशेष·	१६१
• पूर्वरागभेदाः	,,
मानः	,,
कोपः	१६३
ईर्ष्यामानः	१६४
• मानभङ्गोपायाः	१६५
प्रवासः	,,
• दश कामदशाः	१६५–६६
• प्रवासभेदाः	१६७
करुणविप्रलम्भ	१६८
सम्भोग	,,
• सम्भोगभेदाः	१७०
हास्यः	,,
• हास्यभेदाः	,,
करुणः	

प्रकरणम्	पृ०
करुणविप्रलम्भात्करुणस्य भेदाख्यानम्	१७२
रौद्रः	,,
युद्धवीरात्करुणस्य भेदाख्यानम्	१७३
वीर·	,,
दानवीरः	१७४
धर्मवीरः	,,
युद्धवीरः	,,
दयावीरः	,,
भयानकः	१७५
बीभत्सः	,,
अद्भुतः	१७६
शान्तः	१७७
दयावीराच्छान्तस्य भेदाख्यानम्	१७८
शान्तस्य रसत्वस्थापनम्	१७९
वत्सलः	१८०
रसानां मिथो विरोधाख्यानम्	,,
भावः	१८१
रसाभासभावाभासौ	१८४
अनौचित्यदर्शनम्	१८४–८५
भावशान्त्यादिः	१८८

चतुर्थपरिच्छेदे

• काव्यभेदौ	१९१
• अभिधामूलध्वनिः	,,
• लक्षणामूलध्वनि	,,
• लक्षणामूलध्वनेर्भेदौ	१९२
• संलक्ष्यक्रमव्यङ्ग्यस्य ध्वनेस्त्रैविध्यम्	१९७
शब्दशक्त्युद्भवव्यङ्ग्यस्य द्वैविध्यम्	१९८
अर्थशक्त्युद्भवव्यङ्ग्यस्य द्वादश भेदाः	२००
शब्दार्थशक्त्युद्भवव्यङ्ग्यस्यैकविधत्वाख्यानम्	२०७

प्रकरणम्	पृ०
•ध्वनेरष्टादशविधत्वनिरूपणम्	२०८
अर्थशक्त्युद्भवध्वनेःप्रबन्धेऽतिदेशः	२१४
पदांशादिष्वसंलक्ष्यक्रमव्यङ्ग्यस्याख्यानम्	२१७
•ध्वनिभेदाख्यानम्	२२०
•गुणीभूतव्यङ्ग्यम्	२२३
गुणीभूतव्यङ्ग्यस्य भेदनिरूपणम्	,,
पञ्चमपरिच्छेदे—	
•व्यञ्जनास्वरूपम्	२४०
अभिधातो व्यञ्जनायाः पार्थक्ये हेतवः	२४६
अभिधालक्षणयो रसादिप्रतिपादनेऽक्षमत्वनिरूपणम्	२४८—४९
रसादिव्यङ्ग्याख्यानेऽनुमानस्याक्षमत्वप्रतिपादनम्	२५२
व्यञ्जनोपसंहारः	२६२
षष्ठपरिच्छेदे—	
काव्यस्य दृश्यश्रव्यभेदौ	२६३
रूपकसंज्ञाकारणम्	,,
अभिनयः	,,
•रूपकभेदाः	२६४
उपरूपकभेदाः	,,
•नाटकलक्षणम्	२६४—६५
•अङ्कलक्षणम्	२६५—६६
गर्भाङ्कलक्षणम्	२६७
नाटकरचनापरिपाटी	२६७—६८
पूर्वरङ्गः	२६८
नान्द्या आवश्यकत्वम्	,,
•नान्दीस्वरूपम्	,,
नान्द्यनन्तरेतिकर्तव्यता	२७१
भारतीवृत्तिः	२७३
भारतीवृत्तेरङ्गानि	,,

प्रकरणम्	पृ०
आमुखम् (प्रस्तावना)	२७४
•प्रस्तावनाभेदाः	,,
उद्घात्य (त) कः	२७४—७५
कथोद्घातः	२७५
प्रयोगातिशयः	२७६
प्रवर्तकम्	२७७
अवलगितम्	,,
नखमुद्दृमतनिरूपणम्	२७८
वस्तुनो द्वैविध्याख्यानम्	,,
प्रासङ्गिकवस्तुकीर्तनम्	,,
पताकास्थानम्	२७९
प्रथमं पताकास्थानम्	,,
द्वितीयं पताकास्थानम्	२७९—८०
तृतीयं पताकास्थानम्	२८०
चतुर्थं पताकास्थानम्	२८१
कविशिक्षा	२८२
अर्थोपक्षेपकाः	२८३
•विष्कम्भकः	,,
•प्रवेशकः	२८४
चूलिका	,,
•अङ्कावतारः	,,
•अङ्कमुखम्	,,
अङ्कमुखे मतभेदः	२८५
कविशिक्षा	२८५—२८६
अर्थप्रकृतयः	२८६
बीजम्	,,
बिन्दुः	,,
पताका (वृत्तम्)	२८७
प्रकरी	२८८
कार्यावस्था	,,
आरम्भः	,,
प्रयत्नः	,,

प्रकरणम्	पृ०
प्राप्त्याशा	२८६
नियताप्तिः	”
फलयोगः (फलागमः)	”
सन्धिः	२९०
सन्धिभेदाः	”
मुखम्	”
प्रतिमुखम्	”
गर्भः	२९१
विमर्शः	२९२
निर्वहणम् (उपसंहृतिः)	”
मुखसन्धिभेदाः	”
उपक्षेपः	२९३
परिकरः	”
परिन्यासः	”
विलोभनम्	२९४
युक्तिः	”
प्राप्तिः	२९५
समाधानम्	”
विधानम्	”
परिभावना	२९६
उद्भेदः	”
करणम्	””
भेदः	”
प्रतिमुखसन्धिभेदा.	२९७
विलास.	”
परिसर्पः	”
विधुतम्	२९८
तापनम्	”
नर्म	”
नर्मद्युतिः	२९९
प्रशंसनम्	”
विरोधः	”

प्रकरणम्	पृ०
पर्युपासनम्	”
पुष्पम्	”
वज्रम्	३००
उपन्यास.	”
वर्णसंहारः	”
गर्भसन्धिभेदाः	३०१
अभूताहरणम्	”
मार्गः	३०२
रूपम्	”
उदाहरणम्	”
क्रमः	३०३
सङ्ग्रहः	”
अनुमानम्	”
प्रार्थना	”
क्षितिः	३०४
श्रो (तो) टकम्	”
अधिबलम्	”
उद्वेगः	३०५
विद्रवः	”
विमर्शसन्धिभेदाः	”
अपवादः	”
सम्फेट.	३०६
व्यवसायः	”
द्रवः	”
द्युतिः	३०७
शक्ति.	”
प्रसङ्ग.	३०८
खेदः	”
प्रतिषेधः	३०९
विरोधनम्	”
प्ररोचना	३१०
आदानम्	”

प्रकरणम्	पृ०
ग्रथनम्	३११
निर्वहणसन्धिभेदाः	,,
सन्धिः	,,
विबोधः	,,
प्रयत्नम्	३१२
निर्णयः	,,
परिभाषणम्	,,
कृतिः	,,
प्रसादः	३१३
आनन्दः	,,
समयः	,,
उपगूहनम्	,,
भाषणम्	३१४
पूर्वभाषणम्	,,
आत्मसंहरः	,,
प्रशस्तिः	,,
चतुरश्रोपसंहरः	३१५
परिनिर्वहणम्	,,
आनन्दः	३१६
रसवत्प्रधानैकाङ्का सप्तदेश-	
लक्षणम्	३१६–१७
वृत्तम्	३१७
वीथी	३१८
वीथ्यङ्गानि	,,
उद्घात्यकः	३१८–१९
अवलगितम्	३१९
प्रपञ्चः	३२०
त्रिगतम्	,,
छलनम्	३२१
वाक्केलिः	,,
भावितम्	,,
भावितस्य अङ्गानि	,,
उदात्तम्	३२२

प्रकरणम्	पृ०
संलापः	३२२
परिवर्तकः	,,
आरभटी	,,
आरभट्या अङ्गानि	,,
वस्तूत्थापनम्	३२३
संघट्टः	,,
संहतिः	,,
अवपातनम्	३२४
नाट्येष्टयः	,,
नालक्षणम्	३२५
नाट्यरासकम्	३२५–२७
नयविभागः	३२७–२८
पञ्चनिरूपणचतुरनाट्यलक्षणम्	३२९
लक्षणनिर्देशः	,,
मुखम्	,,
अङ्कसंधयः	३३०
शोभा	,,
उदाहरणम्	,,
हेतुः	३३१
संशयः	,,
छद्मः	,,
युक्तयः	,,
पताकः	३३२
निर्णयम्	,,
अभिप्रायः	,,
प्रगीतिः	३३३
विद्रवः	
विद्रव	
उत्थापितम्	
युक्तिः	३३
विद्रवः	

प्रकरणम्	पृ०
निरुक्तिः	३३५
सिद्धिः	,,
भ्रंशः	,,
विपर्ययः	३३६
दाक्षिण्यम्	,,
अनुनयः	,,
माला	,,
अर्थापत्तिः	३३७
गर्हणम्	,,
पृच्छा	,,
प्रसिद्धिः	,,
सारूप्यम्	३३८
संक्षेपः	,,
गुणकीर्तनम्	,,
लेशः	,,
मनोरथः	,,
अनुक्तसिद्धिः	३३९
प्रियोक्तिः	,,
नाट्यालङ्काराः	३३९–३४०
आशीः	३४०
आक्रन्दः	,,
कपटम्	,,
अक्षमा	,,
गर्वः	,,
उद्यमः	३४१
आश्रयः	,,
उत्प्रासनम्	,,
स्पृहा	,,
क्षोभः	,,
पश्चात्तापः	,,
उपपत्तिः	३४२
आशंसा	,,

प्रकरणम्	पृ०
व्यवसायः	३४२
विसर्पः	,,
उल्लेखः	,,
उत्तेजनम्	३४३
परीवादः	,,
नीतिः	,,
अर्थविशेषणम्	,,
प्रोत्साहनम्	३४४
साहाय्यम्	,,
अभिमानः	,,
अनुवर्तनम्	,,
उत्कीर्तनम्	,,
याच्ञा	३४५
परिहारः	,,
निवेदनम्	,,
प्रवर्त्तनम्	,,
आख्यानम्	,,
युक्तिः	३४६
प्रहर्षः	,,
उपदेशनम्	,,
मुनिनिरूपितं नाटकस्वरूपम्	३४७
लास्याङ्गानि	,,
गेयपदम्	,,
स्थितपाठ्यम्	३४८
आसीनम्	,,
पुष्पगण्डिका	,,
प्रच्छेदकः	,,
त्रिगूढकम्	,,
सैन्धवम्	,,
द्विगूढकम्	,,
उत्तमोत्तमकम्	३४९
उक्तप्रत्युक्तम्	

प्रकरणम्	पृ०
महानाटकम्	,,
प्रकरणम्	,,
भाण.	३५०
व्यायोगः	,,
समवकारः	३५१
डिम	३५२
ईहामृग.	,,
अङ्क	३५३
वीथी	३५४
वीथ्यङ्गानि	,,
प्रहसन	,,
शिगतम्	,,
छलम्	३५५
वाक्केलिः	,,
अधिबलम्	३५६
गण्डम्	,,
अवस्यन्दितम	३५७
नालिका	,,
अवतारः	,,
व्याहार	३५८
मर्दवम्	,,
प्रहसनम्	३५९
प्रहसनभेदा-	,,
नटिका	३५९–३६०
त्रोटकम्	३६०
गोष्ठी	,,
सट्टकम्	,,
नाट्यरासकम्	,,
प्रस्थानकम्	,,
उल्लाप्यम्	३६०–६१
काव्यम्	३६१
गेयपदम्	,,

प्रकरणम्	पृ०
रासकम्	३६१
संलापकम्	६६१–६२
श्रीगदितम्	३६२
शिल्पकम्	,,
विलासिका	३६२–६३
दुर्मल्लिका	३६३
प्रकरणिका	,,
हल्लीशा	,,
भाणिका	३६३–३६४
•भव्यकाव्यम्	३६४
•पद्यलक्षणम्	,,
मुक्तकादिलक्षणम्	,,
•महाकाव्यम्	३६५–६६
•खण्डकाव्यम्	३६७
कोश	,,
•गद्यलक्षणम्	,,
कथा	३६८
आख्यायिका	,,
चम्पू	,,
विरुदम्	,,
करम्भकम्	३६९
सप्तमपरिच्छेदे-	
दोषलक्षणम्	३७०
दोषाणां विभाग	,,
दु श्रवत्वादिदोषाणां क्रमेण	३७१
दु श्रवत्वम्	,,
अश्लीलत्वम्	३७२
अनुचितार्थत्वम्	,,
अप्रयुक्तत्वम्	३७३
असमर्थत्वम्	,,
अप्रतीतत्वम्	,,
निर्हेतुत्वम्	,,

प्रकरणम्	पृ०
नेयार्थत्वम्	३७४
निहतार्थत्वम्	,,
अवाचकत्वम्	,,
क्लिष्टत्वम्	३७५
विरुद्धमतिकृत्वम्	,,
अविमृष्टविधेयांशत्वम्	,,
वाक्ये दुःश्रवत्वादीनां कीर्तनम्	३८२–९२
वाक्यदोषाः	३९२
प्रतिकूलत्वम्	,,
लुप्तविसर्गत्वम्	३९३
आहतविसर्गत्वम्	,,
अधिकपदत्वम्	,,
न्यूनपदत्वम्	३९४
पुनरुक्तत्वम्	३९५
हतवृत्तत्वम्	,,
पतत्प्रकर्षत्वम्	३९६
सन्धिविश्लेषत्वम्	३९७
सन्ध्यश्लीलत्वम्	,,
सन्धिकष्टत्वम्	,,
अर्थान्तरैकपदत्वम्	,,
समासपुनरुक्तत्वम्	३९८
असमवन्मतसम्बन्धत्वम्	३९८–४०१
अक्रमत्वम्	४०१
असमतपरार्थत्वम्	४०२
वाच्यस्यानभिधानम्	४०२–४०४
भग्नप्रक्रमत्वम्	४०४
प्रसिद्धित्यागः	४०६
अस्थानस्थपदता	४०७
अस्थानस्थसमासता	४०८
सङ्कीर्णत्वम्	४०९
गर्भितता	,,
अर्थदोषा-	,,

प्रकरणम्	पृ०
अपुष्टत्वम्	४०९
दुष्क्रमत्वम्	४१०
ग्राम्यत्वम्	,,
व्याहतत्वम्	४१०–११
अश्लीलत्वम्	४११
कष्टार्थत्वम्	४११–४१२
अनवीकृतत्वम्	४१३
निर्हेतुत्वम्	,,
प्रक्रमोक्तविरुद्धत्वम्	४१४
सन्दिग्धत्वम्	,,
पुनरुक्तता	,,
प्रसिद्धिविरुद्धता	४१५
विद्याविरुद्धता	,,
आकाङ्क्षता	,,
सहचरभिन्नत्वम्	४१६
अस्थानयुक्तता	४१६–१७
अविशेषे विशेषः	४१७
अनियमे नियमः	४१७–१८
विशेषेऽविशेषः	४१८
नियमेऽनियमः	,,
विध्ययुक्तता	४१९–४२०
अनुवादायुक्तता	४२०
निर्मुक्तपुनरुक्तत्वम्	४२०–२१
रसदोषाः	४२१–२७
काव्यदोषेभ्यः पृथगलङ्कारदोषाणाम्- सम्भवत्वप्रतिपादनम्	४२७
दुःश्रवत्वस्य गुणत्वप्रतिपादनम्	४२५
अश्लीलत्वस्य गुणत्वप्रतिपादनम्	४२६
श्लेषादौ निहतार्थाप्रयुक्तयोरदोषत्व- प्रतिपादनम्	४२७
अप्रतीतत्वस्य गुणत्वाख्यानम्	४२८–२९
कथितपदस्य गुणत्वाख्यानम्	४२९

प्रकरणम्	वाक्यन्यायाश्रित पृ०
यथासंख्यम्	६६९
पर्यायः	६७०
परिवृत्तिः	६७२
परिसंख्या	६७३
उत्तरम्	६७५
अर्थापत्तिः	६७६
विकल्पः	६७७
समुच्चयः	६७९
समाधिः	६८२
प्रत्यनीकम्	६८३
प्रतीपम्	६८३–८४
मीलितम्	६८५

प्रकरणम्	तर्कन्यायाश्रित पृ०
सामान्यम्	,,
तद्गुणः	६८६
अतद्गुणः	,,
सूक्ष्मम्	६८७
व्याजोक्तिः	६८८
स्वभावोक्तिः	६८९
भाविकम्	६८९–९०
उदात्तम्	६९२
रसवदाद्यलङ्काराः	६९३
भावोदयाद्यलङ्काराः	६९५
संसृष्टिसङ्करालङ्कारौ	६९७–९८
अन्यालङ्कारश्लोकौ	७०५

भूमिका

साहित्यदर्पणेत्यभिधानभूषितोऽयमलङ्कारग्रन्थो मुख्यतमेष्वलङ्कृतीनिबन्धेष्वेतत्तन सहृदयहृदयावर्जकतया काव्यरसास्वादविदामत्यादरास्पदम् । सत्स्वपि बहुषु निबन्धेषु पीयूषपरिस्पर्धिहृद्यरससम्मितपदावलीभिर्दुरूहविषयाणामपि सुखसवेद्याकारतापादनमत्र कथनातिशय । प्राक्तनैरुच्चरणकतिपयविषयाणामप्याविष्करण काव्यकलाकौशलोपलम्भक हि शास्त्रमलङ्करणम् । पदज्ञानव्युत्पित्सूना व्याकरणमिव निरवद्यकाव्यनिर्म्माणशक्तिसमुन्मेषकृतादिदमलङ्कारशास्त्र विविधभावारसविन्यासविशेषाध्यायक चेति नातिवेदनीय तद्विदाम् । प्राचीनैरलङ्कारिकै शास्त्रस्यास्य काव्यालङ्कारनाम्नो व्यपदेश कृत इति भामहवामनादिकृताना ग्रन्थाना नाम्नैव प्रतीयते । परमस्मिन् शास्त्रे यमकोपमादीना भूयोविषयतया तेषा प्रधानतया च तत्प्रतिपादनादिदं शास्त्रमलङ्कारशास्त्रमिति व्यपदिश्यते ।

ये तावद् भामहरुद्रटवामनप्रभृतय प्राचीना अलङ्कारशास्त्रप्रणेतार आसन्, तैर्ध्वन्यमानमर्थं वाच्योपस्कारकतयाऽलङ्कारपक्षनिक्षिप्त मन्यमानैरलङ्कारस्य काव्ये प्राधान्य स्वीकृतम् । तत "प्राधान्येन व्यपदेशा भवन्ति" इति न्यायादस्य शास्त्रस्यालङ्कारशास्त्रमिति व्यपदेश कृत । परमर्वाचीनैरानन्दवर्द्धनाचार्य्यप्रभृतिभिर्ध्वन्यमानस्यार्थस्य प्राधान्ये तथाऽलङ्काराणामप्राधान्ये सस्थापितेऽपि प्राचीनव्यपदेशगौरवनियन्त्रणाच्छास्त्रस्यास्यालङ्कारनाम्नैव व्यपदेश स्वीकृत ।

दण्डिप्रभृतिप्राचीनालङ्कारिकप्रणीताना ग्रन्थाना काव्यादर्शप्रभृतीनामलङ्कारशास्त्रत्वव्यपदेशाभावेऽपि तत्रालङ्काराणा बहुलतया विचारात्तेषामप्यलङ्कारशास्त्रेऽन्तर्भाव स्वत समायतति ।

अलङ्कारशब्दस्याऽर्थो द्विविध इति वामनेन प्रतिपादितम् । अलङ्क्रियते अनेन इति करणव्युत्पन्नोऽलङ्कारशब्दो रूपकोपमादिबोधक, परमलङ्कृतिरलङ्कार इति भावव्युत्पन्नोऽलङ्कारशब्दस्तु सौन्दर्य्यपर ।

द्वितीयार्थ एवालङ्कारशब्दस्य शास्त्रे व्यपदेश कृत इति वामनेनोक्तम् । यथा—"काव्य ग्राह्यमलङ्कारात् ।" सौन्दर्य्यमलङ्कार (का सू) अलङ्कृतिरलङ्कार । करणव्युत्पत्त्या पुनरलङ्कारशब्दोयमुपमादिषु वर्त्तते । (वृत्ति) । योऽयमलङ्कार काव्यग्रहणहेतुत्वेनोपन्यस्यते तद्व्युत्पादकतया शास्त्रमपि अलङ्कारनाम्ना व्यपदिश्यत इति । शास्त्रस्यालङ्कारत्वेन प्रसिद्धि प्रतिष्ठिता स्यादिति सूचयितुमय विन्यास कृत । "काव्य ग्राह्यमलङ्कारादि"ति कामधेनु ।

प्रकरणम्	पृ०
सन्दिग्धत्वस्य गुणत्वाख्यानम्	४४०
कष्टत्वदुःश्रवत्वयोर्गुणत्वाख्यानम्	४४१
ग्राम्यत्वस्य गुणत्वाख्यानम्	४४१
निर्हेतुताया दोषाभावत्वनिरूपणम्	४४२
ख्यातविरुद्धताया गुणत्वनिरूपणम्	,,
कविसमयख्यातानि	४४२–४३
पुनरुक्तस्य गुणत्वाख्यानम्	४४३
न्यूनपदताया गुणत्वाख्यानम्	४४४
न्यूनपदताया गुणदोषत्वाभावनिरूपणम्	४४५
अधिकपदस्य गुणत्वाख्यानम्	४४६
क्वचित्समाप्तपुनरात्तत्वस्य गुणदोषाभाव-निरूपणम्	,,
गर्भितत्वस्य गुणत्वाख्यानम्	४४७
पतत्प्रकर्षताया गुणत्वनिरूपणम्	,,
व्यभिचारिणः स्वशब्देनोक्तौ दोषत्वा-भावकीर्तनम्	,,
विरुद्धरसविभावादिसंग्रहस्य गुणत्व-निरूपणम्	४४६
विरुद्धरसयोः समावेशविचारः	४४६–५७
अनुकरणे दोषाणामदोषत्वाख्यानम्	४५८

अष्टमपरिच्छेदे

गुणाः	४५६
गुणानां त्रैविध्यम्	४६०
माधुर्यम्	४६१
माधुर्यव्यञ्जकवर्णादि	,,
ओजः	४६२
ओजोव्यञ्जकवर्णादि	४६३
प्रसादः	४६४
प्रसादव्यञ्जकान्तरः	,,
केषांचिन्मतेऽस्यान्तर्भावाख्यानम्	४६५
माधुर्यस्य माधुर्यव्यञ्जके वर्णेषु	४६७

प्रकरणम्	पृ०
अर्थव्यक्तेःप्रसादगुणेऽन्तर्भावः	४६७
ग्राम्यदुःश्रवत्वत्यागेन कान्तिसमतयोः सङ्ग्रहः	,,
समताया गुणदोषयोरन्तःपातः	,,
ओजआदीना दोषाभावत्वेनाङ्गीकारः	४६८
अर्थव्यक्तिकान्त्योः स्वभावोक्त्यादिना सङ्ग्रहः	,,
श्लेषसमतयोर्वैचित्र्यादोषतयोरन्तःपातः	४६९
समाधेर्गुणत्वाभावः	४७०
उपसंहारः	४७१

नवमपरिच्छेदे

रीतिः	४७२
रीतीना चातुर्विध्यम्	,,
वैदर्भी	,,
गौडी	४७३
पाञ्चाली	,,
लाटी	४७४
वक्त्रादौचित्येन रचनावस्थानम्	४७५

दशमपरिच्छेदे

अलङ्काराः	४७६
पुनरुक्तवदाभासः	४७९
अनुप्रासः	४८१
छेकानुप्रासः	,,
वृत्त्यनुप्रासः	४८२
श्रुत्यनुप्रासः	४८४
अन्त्यानुप्रासः	४८५
लाटानुप्रासः	४८६
यमकम्	४८८
वक्रोक्तिः	४९०
श्लेषः	४९१
भाषासमः	४९१
श्लेषः	४९२

प्रकरणम्	पृ०
समङ्गश्लेषः	४६६
अभङ्गश्लेषः	,,
समङ्गाभङ्गश्लेषः	,,
चित्रम्	५१४
प्रहेलिकाया अलङ्कारत्वखण्डनम्	५१७
च्युताक्षरादिः	,,
उपमा	५१८
पूर्णोपमा	५२०
श्रौती उपमा	५२१
आर्थी उपमा	,,
तद्धिते समासे वाक्ये च	५२३
श्रौत्यार्थ्युपमाख्यानम्	५२४
लुप्तोपमा	५२८–५३२
एकदेशविवर्तिन्युपमा	५३५
रसनोपमा	५३६
मालोपमा	,,
अनन्वयः	५३७
उपमेयोपमा	५३९
स्मरणम्	५४०
रूपकम्	५४१
रूपकभेदाख्यानम्	५४२–५३
परिणामः	५५४
सन्देहः	५५७
भ्रान्तिमान्	५५९
उल्लेखः	५६१
अपह्नुतिः	५६६–६७
निश्चयः	५६९
उत्प्रेक्षा	५७१
उत्प्रेक्षाभेदाख्यानम्	५७२–८७
अतिशयोक्तिः	५८८–५९३
तुल्ययोगिता	५९४
दीपकम्	५९६

प्रकरणम्	पृ०
प्रतिवस्तूपमा	५९७
दृष्टान्तः	५९९
निदर्शना	६०१
व्यतिरेकः	६०५
सहोक्तिः	६०८
समासोक्तिः	६१२
परिकरः	६२६
श्लेषः	६२७
अप्रस्तुतप्रशंसा	६२८
व्याजस्तुतिः	६३७
पर्यायोक्तम्	६३८
अर्थान्तरन्यासः	६४१
काव्यलिङ्गम्	६४३
अनुमानम्	६४४
हेतुः	६४४
अनुकूलम्	६५
आक्षेपः	,,
विभावना	६५
विशेषोक्तिः	६५
विरोधः	६५६–५
असङ्गतिः	६
विषमम्	६
समम्	६
विचित्रता	६
अधिकम्	६
अन्योन्यम्	६
विशेषः	६६४–
व्याघातः	६६५–
कारणमाला	६
मालादीपकम्	
एकावली	६६७–
सार	६

एतदलङ्कारशास्त्रं साहित्यशास्त्रत्वेनापि व्यवहियते । साहित्यशब्दस्य काव्यार्थ एव प्राचीनाः प्रयोगाः परिदृश्यन्ते । यथा—

सङ्गीतसाहित्यरसानभिज्ञः साक्षात्पशुः पुच्छविषाणहीनः ।

अलङ्कारशास्त्रार्थे साहित्यशब्दस्य प्रयोगस्त्ववाचीन एव ।

"पदवाक्यप्रमाणेषु तदेतत्प्रतिविम्बितम् ।
यो योजयति साहित्ये तस्य वाणी प्रसीदति ॥ ("अभिधावृत्तिः")

"व्याकरणमीमांसातर्कसाहित्यात्मकेषु चतुर्षु शास्त्रेषूपयोगात्" (मुकुलः) पञ्चमी साहित्यविद्येति यायावरीयः । सा च चतसृणामपि विद्याना निष्यन्द (काव्यमीमांसाया राजशेखरः) इत्यादिप्रयोगदर्शनात् साहित्यपदस्यालङ्कारशास्त्रार्थे प्रयोगो नवमशताब्द्याः पूर्वतो जातः । कदा पुनस्तस्य तादृशार्थे प्रयोगः समजनीत्येतन्निश्चेतुं नैव शक्यते ।

हितेन सह वर्त्तते इति सहितं तस्य भावः कर्म वा साहित्यमिति केचित्साहित्यशब्दस्य निरुक्तिमामनन्ति । पर यौगपद्यार्थात्सहितशब्दादेव साहित्यस्य भवति निष्पत्तिः । यदा "शब्दार्थौ सहितौ काव्यमि"ति काव्यस्य लक्षणं जातं तदा साहित्यशब्दस्यालङ्कारशास्त्रार्थे प्रयोगो जातः । शब्दार्थयोर्यथावत्सहभावेन विद्या साहित्यविद्या इति काव्यमीमांसायामेव साहित्यपदस्य व्युत्पत्तिर्दर्शिता ।

काव्ये तु प्रभुसम्मितवेदादिशास्त्रवन्न शब्दस्य प्राधान्यं नापि सुहृत्सम्मितपुराणादिवदर्थस्य प्राधान्यम् । पर शब्दार्थयोरुभयोरेव प्राधान्यम् । तथा चोक्तम् ।

"रूपकादिरलङ्कारस्तस्यान्यैर्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनितामनम् ॥
रूपकादिमलङ्कारं वाच्यमाचक्षते परम् ।
सुपां तिङां च व्युत्पत्तिं वाचां वाच्छन्त्यलङ्कृतिम् ॥"
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः ॥

अतः सहितयो शब्दार्थयोस्तत्र प्रयोगात्साहित्यपदं शब्दार्थयोः सहभावमेव द्योतयति 'साहित्य तुल्यकक्षतयान्यूनातिरिक्तत्वम् ।' (व्यक्तिविवेकटीका) ॥

'शब्दार्थौ सहितौ काव्यम् ।' (भामहः)

"शब्दार्थौ सत्कवेरेव द्वयं विद्वानपेक्षते ॥" (शिशुपालवधम्)

इत्यादिप्रयोगदर्शनात्सहितशब्दादेव साहित्यस्य निरुक्तिरिति पूर्वोक्तं सिद्ध्यति ।

अलङ्कारशास्त्रमिदं कदा केन प्रथममाविष्कृतमिति निर्णेतुं नैव शक्यम् । परं बहूनां निबन्धग्रन्थानां नामान्युपलभ्यन्ते तेषां कृतिस्तु नैवोपलभ्यते । काव्यमीमांसायां राजशेखरेणोक्तम्—'तत्र कविरहस्यं सहस्राक्षः समाम्नासीत् । औक्तिकमुक्ति-

गर्भः, रीतिनिर्णयं सुवर्णनाभः, आनुप्रासिकं प्राचेतायनः, यमकानि चित्रं चित्राङ्गदः, शब्दश्लेषं शेषः, वास्तव्यं पुलस्त्यः, औपम्यमौपकायनः, अतिशयं पाराशरः, अर्थश्लेषमुतथ्यः, उभयालङ्कारिकं कुबेरः वैनोदिकं कामदेवः, रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः, दोषाधिकारिकं धिषणः, गुणोपादानिकमुपमन्युः, इत्यादि ।

निरुक्ते ग्रन्थे उपमाया द्वादशभेदाः प्रदर्शिताः—

भूतोपमा, कर्मोपमा, रूपोपमा, सिद्धोपमा, लुप्तोपमाऽर्थोपमादयो यास्केन वर्णिताः। श्रुतौ वैदिककालेऽपि अलङ्कारशास्त्रस्य चर्चा समजनि ।

उपलब्धेषु साहित्यनिबन्धेषु वस्तावदादिम इत्यपि निर्णेतुमशक्यम् । अग्निपुराणे सर्वस्यापि काव्यप्रपञ्चस्य प्रायशः कथनात्केचिदग्निपुराणमतिप्राचीनमिति कथयन्ति ।

परं तत्तु न विचारसहम् । साहित्यदर्पणकारात्प्राचीनैर्निबन्धकारैरग्निपुराणनामोल्लेखोऽपि न कृतः। दण्डिभामहादिभिः सर्वैरेव निबन्धकारैर्नाट्यशास्त्रमेव प्रमाणत्वेनोपन्यस्तम् । किञ्च काव्यादर्शस्य नाट्यशास्त्रस्य च श्लोका बहवोऽग्निपुराणेऽप्युपलभ्यन्ते। ध्वन्यालोके प्रथमतो विस्तरेण निर्दिष्टो ध्वनिरपि तत्र वर्णितोऽस्ति । अग्निपुराणं पुराणनाम्ना यथातिप्राचीनं प्रतीयते न तथा तदिति निर्णीयते । किञ्च 'भरतेन प्रणीतत्वाद् भारती रीतिरुच्यते' इति तत्रत्या पङ्क्तिरेव तस्य नाट्यशास्त्रप्रणेतुर्भरतादर्वाचीनत्वं स्फुटमवगमयति । अतः सर्वेषु साहित्यनिबन्धेषु भरतस्य नाट्यशास्त्रमेव प्राचीनतमम् । तस्य कालनिर्णयस्तु बहुभिर्बहुधोदितः । महामहोपाध्यायेन हरप्रसादशास्त्रिणा खी० पू० द्वितीयशताब्द्यां नाट्यशास्त्रं रचितमिति निर्णीतम् । सर्वैरालङ्कारिकैः कालिदासेनाऽपि नाट्यशास्त्रस्य नामोल्लेखः कृतः । अतः खीष्टजन्मनः प्रागेवायं ग्रन्थो रचित इति निर्विवादम् ।

बहवो हि अलङ्कारनिबन्धकर्त्तारः । अधुनोपलब्धेषु निबन्धेषु यथाक्रमं दण्डिभामहभट्टोद्भटरुद्रटभट्टनायकवामनमुकुलप्रतीहारेन्दुराजानन्दवर्द्धनमहिमभट्टकुन्तकक्षेमेन्द्रदयदर्पणकाराभिनवगुप्तशौद्धोदनिवाग्भटरुय्यकभोजराजमम्मटहेमचन्द्रवाग्भटविद्यानाथविश्वनाथकेशवमिश्राप्पय्यदीक्षितजगन्नाथप्रभृतीनां नामान्युपलभ्यन्ते ।

तेषु दण्डिनः काव्यादर्शस्तु अतीव प्राचीनः ।

अयं तु रीतिमार्गव्यवस्थापकः । स नर्म्मदोपकूलवास्तव्यो दाक्षिणात्य आसीदिति तस्य वर्णनादनुमीयते—

"त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः ।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः ॥"

इति शार्ङ्गधरपद्धत्यां राजशेखरस्योक्तेरेव दशकुमारचरितस्य छन्दोविचितेः कलापरिच्छेदस्य च ग्रन्थकर्त्तायमिति प्रतीयते ।

शूद्रकविरचिते मृच्छकटिके विद्यमानस्य 'लिम्पतीव तमोऽङ्गानि' इत्यादिपदस्य काव्यादर्शे दर्शनात् शूद्रकबेरर्वाचीनोऽयम्।

"नीलोत्पलदलश्यामां विज्जकां मामजानता।
वृथैव दण्डिना प्रोक्तं सर्वशुक्ला सरस्वती॥"

इति शार्ङ्गधरपद्धतौ विज्जकायाः पद्यादयं विज्जकायाः प्राचीन एव। "दृष्टिं हे प्रतिवेशिनि" "धन्यासि या कथयसि" इत्यादिपद्यानां रचयित्री विज्जका नारी कविरासीत्॥

"सरस्वतीव कार्णाटी विजयाङ्का जयत्यसौ।
या विदर्भगिरां वासः कालिदासादनन्तरम्॥"

(राजशेखरः)

विज्जकाया विजयभट्टारिकेति नामान्तरम्। सा तु द्वितीयपुलकेशिनो राज्ञोऽपत्यस्य चन्द्रादित्यस्य राज्ञी आसीत्। स ६६० खीष्टाब्दे सप्तमशताब्द्या मध्यभागे आसीदिति दानपत्राद् बहुभिरनुमीयते। अतोऽयं दण्डिकविः षष्ठशताब्द्याः प्रागेव जातः।

भामहस्य काव्यालङ्कारस्तु षड्भिरेव परिच्छेदैः समाप्तिं गतः। स तु अलङ्कारमार्गप्रवर्त्तक आसीत्। प्रथमपद्येऽप्युक्तम्

"अवलोक्य मतानि सत्कवीनामवगम्य स्वधिया च काव्यलक्ष्म।
सुजनावगमाय भामहेन ग्रथितं रक्किलगोमिसूनुनेदम्॥"

रक्किलगोमी तु भामहस्य जनक आसीत्। अयं भामह आलङ्कारिकेषु प्राचीनतमः। अतः प्रतापरुद्रयशोभूषणे विद्यानाथेन "पूर्वेभ्यो भामहादिभ्यः सादरं विहिताञ्जलिः" रित्युक्तम्। उक्तञ्च रुय्यकेणालङ्कारसर्वस्वे "भामहोद्भटप्रभृतयश्चिरन्तनालङ्कारकाराः" इति।

"तया विवक्षितान्यपरवाच्यस्यैव शब्दशक्त्युद्भवानुरणनरूपव्यङ्ग्यप्रकारसमाश्रयेण नवत्वम्। यथा "धरणीधारणायाधुना त्वं शेष.।" (हर्षचरितम्) इत्यादौ॥

"शेषो हिमगिरिस्त्वं च महान्तो गुरवः स्थिराः।
यदि लङ्घितमर्य्यादाश्चलन्तीं बिभ्रते भुवम्॥" (भामहः)

इत्यादिषु सत्स्वपि तस्यैवार्थशक्त्युद्भवानुरणनरूपव्यङ्ग्यप्रकाशसमाश्रयेण नवत्वम्। (ध्वन्यालोकः)। एतेन बाणकवेर्भामहादर्वाचीनत्वं स्फुटमेव। अतो भामहः षष्ठशताब्द्याः परत आसीदित्यनुमीयते।

दण्डिभामहयोरर्वाचीनत्वनिर्णयेऽपि मतभेदो दृश्यते॥

उद्भटस्तु षड्भिर्वर्गैर्विभक्तस्यालङ्कारसारसंग्रहस्य निबन्धस्य कर्त्ता। तस्य वृत्तिस्तु प्रतीहारेन्दुराजेन रचिता। उद्भटेन कुमारसम्भवाख्यं काव्यमपि रचितम्। तदुक्तं वृत्तौ प्रतीहारेन्दुराजेन—"अनेन ग्रन्थकृता स्वोपरचितकुमारसम्भवैकदेशोऽत्र उदाहरणत्वेनोपन्यस्तः" इति।

"विद्वान् दीनारलक्षेण प्रत्यहं कृतवेतनः।
भट्टोभूदुद्भटस्तस्य भूमिभर्त्तुः सभापतिः॥"

इति राजतरङ्गिण्यां कल्हणोक्तेः काश्मीरदेशीयोऽयमुद्भटस्तावद् जयापीडस्य राज्ञः पण्डितसभायां सभापतिरासीदिति ज्ञायते॥

राज्ञो जयापीडस्य राज्यकालोऽष्टमशताब्द्यामेवासीत्। अतो भट्टोद्भटस्तु अष्टमशताब्द्याः प्रान्तभाग आविरासीत्। ध्वन्यालोके तु बहुशस्तन्मतमुद्धृतम्।

"विद्वद्ग्रयान् मुकुलकादधिगम्य विचिच्यते।
प्रतीहारेन्दुराजेन काव्यालङ्कारसंग्रहः॥"

इति श्लोकः प्रतीहारेन्दुराजोक्तः स्वस्य मुकुलशिष्यत्वं प्रतिपादयति। मुकुलस्तु पञ्चविंशत्युत्तरनवमशताब्द्याम् (९२५) आसीत्। अतस्तस्य शिष्यो दशमशताब्द्याः प्रथमार्धे बभूवेति सम्भाव्यते।

वामनस्तु काव्यालङ्कारसूत्रस्य तद्वृत्तेश्च कर्त्ता। तत्र तेनैवोक्तम्।

"प्रणम्य परमं ज्योतिर्वामनेन कविप्रिया।
काव्यालङ्कारसूत्राणां स्वेषां वृत्तिर्विधीयते॥"

इति। अनेनैव प्रथमतोऽलङ्कारशास्त्रं सूत्राकारेण लिखितम्। तत्सूत्राण्यधिकरणत्रयेण विभक्तानि। अयं तावद् रीतिमार्गव्यवस्थापकः। अस्य निबन्धस्तु लुप्तप्राय एवासीत्। भट्टमुकुलेनायमेकस्मादादर्शादुद्धृत इति।

"वेदिता सर्वशास्त्राणां भट्टोऽभून्मुकुलाभिधः।
लब्ध्वा कुतश्चिदादर्शं अष्टात्रायं समुद्धृतम्।
काव्यालङ्कारशास्त्रं यत् तेनैतद् वामनोदितम्॥"

इति काव्यालङ्कारसूत्रवृत्तिकृत्सहदेवोक्तेः सुस्पष्टं प्रतीयते॥

राजतरङ्गिण्याम्—

"मनोरथः शङ्खदत्तश्चटकः सन्धिमांस्तथा।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः॥"

लभ्यमानात् श्लोकादस्माद् वामनस्य जयापीडराजमन्त्रित्वं सिध्यति। अतोऽसौ उद्भटस्य समकालीन एवासीत्। अतो वामनोऽपि अष्टमशताब्द्याः प्रान्तभाग एवासीत्।

रुद्रटस्तु काव्यालङ्कारस्य रचयिता। अन्योऽयं रुद्रटालङ्कारनाम्नाऽपि व्यपदिश्यते। आर्य्यावृन्दसा रचितोऽयं निबन्धः षोडशभिरध्यायैर्विभक्तेऽलङ्कारमार्गस्य व्यवस्थापकः। तस्य विवरणादिकं किमपि सम्यक् न ज्ञायते। परं तदग्रन्थटिप्पनिकया निमिसाधुनोक्तम्॥

"शतानन्दापराख्येन भट्टवामुकसूनुना।
साधितं रुद्रटेनेदम् ॥"

अतो ज्ञायते रुद्रटस्य शतानन्द इति नामान्तरम्, वामुकभट्टस्तु तस्य पिता। काव्यमीमांसायां राजशेखरेण "काकुवक्रोक्तिर्नाम शब्दालङ्कारोऽयमिति रुद्रटः" इत्यादिना रुद्रटस्योल्लेखः कृतः। प्रतीहारेन्दुराजेन ध्वन्यालोकेऽप्युद्भटस्योल्लेखः कृतः। अतोऽयं नवमशताब्द्याः परं न जात इति प्रतीयते। अस्य ग्रन्थस्य व्याख्याकारो निमिसाधुस्तु श्वेताम्बरजैनः शालिभद्रशिष्य आसीत् (११२५) विक्रमाब्दे (१०६८-६९ ख्रीष्टाब्दे) व्याख्यानं रचितमिति तेनान्ते वर्णितम्। यथा—

"पञ्चविंशतिसंयुक्तैरेकादशसमाशतैः।
विक्रमात्समतिक्रान्तैः प्रावृषीदं समर्थितम् ॥"

रुद्रभट्टेन शृङ्गारतिलकमपि विरचितम्।

रुद्रटरुद्रभट्टयोरेकव्यक्तित्वं नामसाम्यादनुमीयते कैश्चित्। रुद्रटेनालङ्कारपक्षपातिनाऽलङ्कारनिर्णयः कृतः। रुद्रभट्टेन तु रसस्य काव्ये निरूपणं कृतम्। उक्तं तेनैव।

"प्रायो नाट्यं प्रति प्रोक्ता भरताद्यै रसास्थितिः।
यथामति मयाप्येषा काव्यं प्रति निगद्यते ॥"

तयोर्विषयनिर्णय एव भेदो दृश्यते। उभयोः साम्यमपि कुत्राऽपि न दृश्यते॥

ध्वन्यालोकः—ध्वन्यालोकस्य ध्वनिस्थापनार्थं प्रवृत्तत्वान्नेह तदतिरिक्तालङ्कारादिप्रपञ्चनं वर्त्तते। अत एव ध्वनिस्थापनमलङ्कारनिबन्धेषु सङ्कलितमभूत्।

व्याकरणे पाणिनेः सूत्रमिव वेदान्ते वेदान्तसूत्रमिवालङ्कारनिबन्धेषु ध्वन्यालोकस्य मतमविराम्नादि प्रमाणं च "ध्वनिकृतामालङ्कारिकसरणिव्यवस्थापकत्वात्!" ध्वन्यालोकस्य भागद्वयं वर्त्तते। कारिका तद्वृत्तिश्चेति। कारिकाकारो वृत्तिकृत्तो भिन्न इति लोचनाभिधनटीकाप्रणेतुरभिनवगुप्तस्य मतम्। अतएव मूलकारिका साक्षात्तन्निराकरणार्था न श्रूयते।

वृत्तिकृत्तु निरङ्कुशमिति प्रमेयसंख्यापूरणाय करटेन तत्पक्षमनूद्य निराकरोति येषांचादिना।

तेनाद्य प्रथमोद्योते ध्वनेः सामान्यलक्षणमेव कारिकाकारेण कृतम्। तृतीयोद्योते कारिकाकारोऽवान्तरविभागं विशेषलक्षणं च विदधदनुवादमुखेन मूलभागं द्विविधं सूचितवान्। तदाशयानुसारेण वृत्तिकृद्भेदोद्योते मूलविभागमवोचत्। तस्मादेव सन्दर्भाद् 'आनन्दवर्द्धनः वृत्तिकारः कारिकाकारस्तु तत्तोऽन्यः' इति लोचनकृदभिप्रायो व्यज्यते।

वस्तावत्कारिकाकार इति यथार्थतो निश्चेतुं नैव शक्यते। ध्वन्यालोकस्य सहृदयालोक इति नामान्तरमस्ति। तत एव कारिकाकारः सहृदयनामेति [illegible]।

सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते ।

इति लोचनकारस्य उक्तिरेव । तथाहि–तत्र विवक्षितान्यपरता सहृदयैः काव्यवर्त्मनि निरूपिता इत्यभिधामातृकाकृदुक्तेः । कैश्चित् सहृदयैर्ध्वनिर्नाम व्यञ्जकभेदात्मा काव्यधर्म्मोऽभिहितः इति मुकुलोक्तिश्च तत्र प्रमाणम् । सहृदयस्तु कारिकाकारस्य नामासीदित्यनुमीयते । कारिकाकारेण कारिकासु बहुशः सहृदयपदप्रयोगात्तस्य तन्नामत्वमवसीयते । यथा निचुलकवेः । परं वृत्तिकारस्यानन्दवर्द्धनस्य यशसा कारिकाकारस्य नामापि निगूहितम् । अतो ध्वनिकारनाम्ना आनन्दवर्द्धन एव व्यपदिश्यतेऽर्वाचीनैरालङ्कारिकैः । अत एवोक्तं राजशेखरेण–

ध्वनिनातिगभीरेण काव्यतत्त्वनिवेशिना ।
आनन्दवर्द्धनः कस्य नासीदानन्दवर्द्धनः ॥

इति सूक्तिमुक्तावल्याम् ।

मुक्ताकणः शिवस्वामी कविरानन्दवर्द्धनः ।
प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्म्मणः ॥

इति राजतरङ्गिण्याः पद्यादानन्दवर्द्धनः काश्मीरराजस्याऽवन्तिवर्म्मणः (८५५–८८३)ख्रीष्टाब्दे वर्त्तमानस्य सभापण्डितो रत्नाकरस्य समकालीनश्चासीदिति ज्ञायते । रत्नाकरेण तदा हरविजयाख्यं महाकाव्यं रचितम् । आनन्दवर्द्धनेनापि अर्जुनचरितम्, विषमबाणलीला, देवीशतकमेति निबन्धत्रयं निबद्धम् । ध्वन्यालोकस्य प्राचीना बहवो व्याख्यातार आसन् । परमधुनाऽभिनवगुप्तस्यैव व्याख्योपलभ्यते । सा तु सहृदयालोकलोचननाम्ना ध्वन्यालोकलोचननाम्ना च परिचीयते ।

तेनैवोक्तम्–

किं लोचनं विना लोको भाति चन्द्रिकयाऽपि हि ।
तेनाभिनवगुप्तेन लोचनोन्मीलनं व्यधात् ॥

इति चन्द्रिकानाम्न्यपरा व्याख्याभिनवगुप्तस्य पूर्वपुरुषैः कृता । लोचने चन्द्रिकाव्याख्याया मतं खण्डितं वर्त्तते । उद्धृतात् श्लोकादपि तदवबुद्ध्यते । अभिनवगुप्तेन विंशतेः परे निबन्धा रचिताः । उद्भटालङ्कारस्य व्याख्याता प्रतीहारेन्दुराजस्तस्य गुरुरासीदिति तेनैवोक्तम् ।

'यथा वास्मदुपाध्यायस्य विद्वत्कविसहृदयचक्रवर्त्तिनो भट्टेन्दुराजस्य ।' इति ।

अभिनवगुप्तस्तु दशमशताब्याः प्रान्तभागे एकादशशताब्याः प्रथमभागे ९९०–१०२० ख्रीष्टाब्दे च जीवित आसीत् । तेन १०१५ ख्रीष्टाब्दे बृहती वृत्तिर्लिखितेति "नवतितमेऽस्मिन् वत्सरेऽन्त्ये युगाशे । तिथिशशिजलधिस्थे मार्गशीर्षावसाने ४११५ गतकलिकाले" इत्यस्मात्पद्यात्प्रतीयते ।

अथ च दशमशताब्याः प्रथमभाग एव आविरासीत् । अनेन काव्यमीमांसा विरचिता । तत्र ज्ञातव्यविषया बहवो वर्त्तन्ते । अनेन च यायावरवंशोद्भवेन कवि-

राजेन बालरामायणप्रचण्डपाण्डवकर्पूरमञ्जरीप्रभृतीनि नाटकानि विरचितानि । अयं च महाराष्ट्रीयः (९१७) खीष्टाब्दे कान्यकुब्जराजस्य महेन्द्रपालस्य गुरुरासीत् । राजशेखरस्येदृशी प्रशस्तिः ।

समधिकगुणशालिन्यः प्रसन्नपरिपक्वित्रमाः ।
यायावरकवेर्वाचो मुनीनामिव वृत्तयः ॥ (तिलकमञ्जरी)

हृदयदर्पणः—अयञ्च ग्रन्थो भट्टनायकेन विरचितः । अयं च हृदयदर्पणः ध्वनिवादनिराकरणपरो ग्रन्थः । लोचने एतन्मतस्य खण्डनादभिनवगुप्तात्प्राचीनोऽयं कविर्दशमशताब्द्यामासीदिति ज्ञायते । रसनिरूपणे भट्टनायकस्य मतमभिनवमेव, तथथा—

अभिधा भावना चान्या तद्भोगीकृतिरेव च ।
अभिधाधामतां याते शब्दार्थालङ्कृती ततः ॥
भावनाभाव्य एषोऽपि गुङ्कारादिगणो मतः ।
तद्भोगीकृतिरूपेण व्याप्यते सिद्धिमाश्रयः ॥

अभिधामातृका । इयं हि मुकुटभट्टेन विरचिता ।

अनुग्रहाय लोकानां भट्टाः श्रीकल्लटादयः ।
अवन्तिवर्म्मणः काले सिद्धा भुवमवातरन् ॥ (राजतरङ्गिणी)

मुकुलभट्टो भट्टकल्लटस्य सुतः । मुकुलभट्टस्तु प्रतीहारेन्दुराजस्य गुरुरासीदिति प्रागेव कथितम् । अतः स दशमशताब्द्याः प्रथमभाग एव आसीत् । परं ग्रन्थेस्मिन् ग्रन्थकारकृतया वृत्त्या युक्ताः पद्यदशैव कारिका वर्त्तन्ते ।

वक्रोक्तिर्जीवितम् । कुन्तलनाम्नापि परिचितेन कुन्तकेन कृतमिदमलङ्कारसर्वस्वसाहित्यदर्पणादिषु बहुश उद्धृतम् ।

'काव्यकाञ्चनकषाश्मसमानिना कुन्तकेन निजकाव्यलक्ष्मणि ।
यस्य सर्वनिरवद्यतोदिता श्लोक एष स निदर्शितो मया ॥'

एतया महिमभट्टोक्त्या कुन्तकेन स्वेनैव रचितं लक्षणमुदाहरणं च तत्र प्रदत्तम् । ग्रन्थकारोऽयं ध्वनिवादं निरस्य वक्रोक्तौ तस्यान्तर्भावं प्रदर्शितवान् । तन्मतं तु वक्रोक्तिः काव्यजीवितमिति ।

यद्यपि वक्रोक्तिजीवितहृदयदर्पणकारावपि ध्वनिकारानन्तरभाविनावेव, तथापि तौ चिरन्तनमतानुयायिनावेवेति तन्मतम् ।

इत्यलङ्कारसर्वस्वविवरणोक्तेः कुन्तक आनन्दवर्द्धनादर्वाचीन एव । व्यक्तिविवेककारेण महिमभट्टेनैतन्मतालोचनादयं महिमभट्टात् प्राचीनः । अतोऽयं दशमशताब्द्याः प्रान्तभाग एवासीत् ।

दशरूपकम्—अयं च ग्रन्थो धनञ्जयस्य । भरतमन्तरा प्राचीनै. आलङ्कारिकैर्नाटक-

सेव रसस्यापि चर्चा न कृता धनञ्जयेन तु नाटकस्य रसस्यात्र विचार कृत । धनञ्जयस्तु कारिकाकार विष्णो पुत्र । स च ९७४–९९४ खीष्टाब्दे वर्तमानस्य मुञ्जनगरपते सभामलङ्कृतवान् । रसनिर्णये तस्य मतम्–

"न रसादीना काव्येन सह व्यङ्ग्यव्यञ्जकभाव । किं तर्हि भाव्यभावकसम्बन्ध, काव्य भावकम् । भाव्या रसादय ।" धनिकेन दशरूपकस्य अवलोकाख्य व्याख्यान रचितम् । तेनापि काव्यनिर्णयो नाम्ना ग्रन्थो विरचित । तस्यापि पिता विष्णुरेव। अत स ग्रन्थकारस्य धनञ्जयस्य भ्राता इत्यनुमीयते ।

व्यक्तिविवेकः—

अयं च राजानकमहिमभट्टस्य । स्वेनैव ग्रन्थस्योद्देश्यमित्थमुक्तम् ।

अनुमानान्तर्भावं स्वस्यैव ध्वने. प्रकाशयितुम् ।
व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम् ॥

एतस्य मत तु साहित्यदर्पणे खण्डितम् ।

अलङ्कारसर्वस्व एतन्मतस्य सार प्रदत्त । अत साहित्यदर्पणकारादलङ्कार-सर्वस्वकाराचार्यं प्राचीन । वक्रोक्तिकारस्य लोचनकारस्य च मतमनेन समालोचितम् । अतस्तयोरयमर्वाचीन । अतोऽय एकादशशताब्द्या प्रथमभाग एवासीत् ।

स तु काश्मीरवास्तव्य आसीदिति राजानकोपाधिनानुमीयते । तेनापि तत्त्वोक्ति-कोषाख्योऽपरोऽलङ्कारनिबन्धो विरचित ।

इत्यादिप्रतिभातत्त्वमस्माभिरुपपादितम् ।
शास्त्रे तत्त्वोक्तिकोषाख्ये इति नेह प्रपञ्चितम् ॥

इति श्लोकादवसीयते । उक्त चानेन

"स्वकृतिष्वयन्त्रित कथमनुशिष्यादन्यमयमिति न वाच्यम्। वारयति भिषगपथ्या दितरान्स्वयमाचरन्नपि ।"

सरस्वतीकण्ठाभरणम् ।

इद च भोजस्य । अग्निपुराणमतमेवानुसृतमनेन । रामायणचम्पू'शृङ्गारप्रकाशा दीनां बहूनां निबन्धानां रचयिताऽय मालवदेशस्य राजासीत् ।

"शब्दानामनुशासनं विदधता पातञ्जले कुर्वता
वृत्तिं राजमृगाङ्कसंज्ञकमपि व्यातन्वता वैद्यके ।
वाक्चेतोवपुषां मलं फणभृतां भर्त्रैव येनोद्धृतं
तस्य श्रीरणरङ्गमल्लनृपतेर्वाचो जयन्त्युज्ज्वला ॥"

(राजमार्तण्ड)

अय धारानगरीनाथो महाविचक्षण कवि कविवन्दभधासीत्। करणग्रन्थो राज मृगाङ्क १९४ शकाब्दे १०४२ खीष्टाब्दे प्रणीतस्तेन । अतो भोजराज एकादश-

शताब्द्या प्रथमार्द्ध एवासीत् । एतदपि भोजराजस्य उत्तराधिकारिणो जयसिंहस्य लिपेर्ज्ञायते ।

औचित्यविचारचर्चा, कविकण्ठाभरणञ्च ।

क्षेमेन्द्रस्य । काश्मीरवास्तव्येन व्यासदासापराह्वेन क्षेमेन्द्रेण भारतमञ्जरी-बृहत्कथामञ्जरीप्रभृतयो बहवो ग्रन्थाः प्रणीताः । बृहत्कथामञ्जर्याम् "श्रुत्वाभिनवगुप्ताख्यात्साहित्यं बोधवारिधेः ॥" लभ्यमानादस्मात् पद्याद् अभिनवगुप्तस्य साहित्ये शिष्योऽयमिति ज्ञायते । तेन समयमातृका पञ्चविंशतितमे लौकिककाले (१०५०) विरचिता ।

"राज्ये श्रीमदनन्तराजनृपतेः काव्योदयोऽयं कृतः । औचित्यविचारचर्चा" इत्यत्र वर्णितो हि अनन्तराजनृपतिः । १०२८ खीष्टाब्दादारभ्य १०६३ खीष्टाब्दं यावत् काश्मीरस्य नरपतिरासीत् । तस्य राजत्वकाले च प्रणीतोऽयं ग्रन्थः । औचित्यमेव रसस्य जीवितमिति तस्य गतम् ।

"औचित्यस्य चमत्कारकारिणश्चारुचर्वणे ।
रसजीवितभूतस्य विचारं कुरुतेऽधुना ॥"

काव्यप्रकाशो मम्मटस्य । मम्मटेन काव्यप्रकाश परिकरालङ्कारावधिरेव रचित । अवशिष्टांशस्तु अल्लटसूरिणा पूरितः । तदुक्तं निदर्शनाख्याया काव्यप्रकाश-व्याख्यायामानन्दकविना ।

कृतः श्रीमम्मटाचार्य्यवर्य्यैः परिकरावधिः ।
प्रबन्धः पूरितः शेषो विधायाल्लटसूरिणा ॥ इति ।
इत्येष मार्गो विदुषां विभिन्नोऽप्यभिन्नरूपः प्रतिभासते यत् ।
न तद् विचित्रं यदमुत्र सम्यग् विनिर्मिता संघटनैव हेतुः ॥

इत्यस्य काव्यप्रकाशान्तिमश्लोकस्य व्याख्यानावसरे माणिक्यचन्द्रेणोक्तम्—"अथ चार्यं ग्रन्थोऽन्येनारब्धः, परेण च समर्थित इति द्विखण्डोऽपि संघटनावशादखण्डायते" इति ।

अयं महिमभट्टोऽनुपमः पण्डित । तत्प्रणीतः काव्यप्रकाश 'आकर' इति व्यवहियते टीकाकारैरालङ्कारिकैश्च । अनेन शब्दव्यापारपरिचर्य्याऽपि रचिता । अवगतसर्वशास्त्रोऽपि मुख्यतयाऽयं वैयाकरणः । अतश्चायं भीमसेनेन सुधासागरे वाग्देवतावतारत्वेन वर्णितः । वेदान्ते शारीरिक-भाष्यमिव व्याकरणे महाभाष्यमिव साहित्येऽस्य काव्यप्रकाशोऽतीव प्रमाणम् । दृश्य-काव्यमन्तरा सर्वं साहित्यशास्त्रस्य विषया अत्रान्तर्भाविता । अस्येतिवृत्तं नैव किञ्चिद् यथायथमाख्यायते । सुधासागरे भीमसेनेन 'अयं मम्मट काश्मीरदेशीयो वाराणस्या-

अधीतसर्वशास्त्रः जय्यटपुत्रः पातञ्जलमहाभाष्यटीकाकृत् वैयटस्य वेदभाष्यकारौ वटस्य च ज्येष्ठभ्राता" इति वर्णितम्।

इदं भीमसेनोक्तं प्रमाणत्वेन ग्रहीतुं नैव शक्यते। औवटेन स्वभाष्ये वज्रटपुत्रत्वेन स्वस्योल्लेखात्।

अयं च मम्मटः श्रीहर्षस्य नैषधकारस्य मातुल आसीदिति काश्मीरपण्डिताना किंवदन्त्यपि श्रूयते।

अनेन अभिनवगुप्तस्य भोजराजस्य च पाठाश उद्धृतः। अतोऽयं तयोरर्वाचीनः। भोजस्तु एकादशशताब्द्याः मध्यभागे आसीत्। माणिक्यचन्द्रेण तु १२१६ शकाब्दे (११५६-) ६० खीष्टाब्देऽस्य व्याख्या सङ्केताख्या विरचिता। अतो द्वादशशताब्द्याः मध्यभागात् प्राग् एकादशशताब्द्याः अन्तिमभागे रचितोऽयं ग्रन्थः। ग्रन्थोऽयं सर्वांशे उत्कर्षमावहतितराम्। परं त्वत्रायमेको महान् दोषो यदयं विद्वद्भिरपि दुरधिगमः। किं पुनरधिकम्। एकेन यदशस्य योऽर्थः प्रतिपादितोऽपरेण विदुषा तदंशस्यैव तद् विपरीतार्थो विधीयते।

अत एवास्य ग्रन्थस्य बहवो व्याख्यातारो जाताः। उक्तं च महेश्वरभट्टाचार्य्येण "काव्यप्रकाशस्य कृता गृहे गृहे टीकास्तथाप्येष तथैव दुर्गम" इति। साहित्यदीपिकायामपि—"टीकाः काव्यप्रकाशस्य कामं सन्तु परशतः।" अलङ्कारसर्वस्वकारेण रुय्यकेण सङ्केताख्या व्याख्या कृता। साहित्यदर्पणकारेण विश्वनाथेनापि काव्यप्रकाशदर्पणाख्या काप्यपूर्वा व्याख्यास्यापिष्कृता।

काव्यप्रकाशस्य शेषांशपूरयितारमल्लटं केचिदलकनाम्नाऽपि व्यपदिशन्ति। अनेनैवालङ्कारसूरिणा हरविजयकाव्यस्य विषमपदोद्योताख्या व्याख्या रचिता। स तु काश्मीरदेशीय एवासीदिति नात्रैव परिचीयते।

अलङ्कारसर्वस्वम्

रुय्यकस्य। ध्वनिवाद स्थापयतानेन अलङ्कारप्रकरणमेवात्र ग्रन्थे प्रतिपादितम्। ग्रन्थकारोऽयं राजानकरुय्यकनाम्नापि परिचीयते।

"निजालङ्कारसूत्राणा वृत्त्या तात्पर्य्यमुच्यते" इति व्याहरन् कविः स्वस्य सूत्रकृत्त्वं वृत्तिकृत्त्व च व्यवस्थापयति। परं त्रिवाङ्मप्रकाशितग्रन्थशेषे श्लोकोऽयं वर्त्तते—

इति मङ्खुको वितेने काश्मीराधीतिपत्तनविप्रवरः।
सुकविमुखालङ्करणं तदिदमलङ्कारसर्वस्वम्॥

लभ्यमानादस्मात् पद्यात्सूचकारो रुय्यको मङ्खुकस्तु वृत्तिकार इत्यनुमीयते वैधर्म्यात्। मङ्खुकप्रणीतात् श्रीकण्ठचरिताद् रुय्यके मङ्खुकस्य गुरुरिति ज्ञायते। शिष्यसाहचर्य्येण रुय्यको विरचितवानिमं निबन्धमिति दाक्षिणात्यपाठादवगम्यते।

परं तु "निजालङ्कारसूत्राणां वृत्त्या तात्पर्य्यमुच्यते" अनया स्वोक्तया रुय्यक एव सूत्राणां वृत्तेश्च रचयितेति ज्ञायते। अयं च अलङ्कारानुसरणी काव्यप्रकाशसङ्केत-नाटकमीमांसाव्यक्तिविवेकविचारश्रीकण्ठस्तवसहृदयलीलासाहित्यमीमांसाहर्षचरितव्या-ख्याप्रभृतिग्रन्थानां विरचयिताऽसीत्। मङ्खुकः काश्मीरराजजयसिंहस्य सान्धि-विग्रहिक आसीत्। रुय्यकस्तु तस्य गुरुः।

जयसिंहस्तु ११२८–११४९ खीष्टब्दे काश्मीरस्य नरपतिरासीत्। ११६० खीष्टब्दे रचितायां काव्यप्रकाशव्याख्यायां माणिक्यचन्द्रेण अलङ्कारसर्वस्वस्य मतमुत्थापितम्। अतोऽलङ्कारसर्वस्वं द्वादशशताब्द्याः प्रथमभाग एव विरचितमासीत्। साहित्यदर्पणकारेण दशमपरिच्छेदे रुय्यकस्य मतं गृहीतं समालोचितं च।

वाग्भटालङ्कारस्य कर्ता वाग्भटस्तु जैनो द्वादशशताब्द्या मध्यभागे जयसिंहस्य राज्ञः सभायामासीत्।

काव्यानुशासनम्।

हेमचन्द्रस्य। तस्य टीकाऽपि निबन्धकारेणैव कृता अत्र प्राचीनानां मतमेव संगृहीतं विद्यते। नैव किञ्चिन्नूतनत्वमस्ति। हेमचन्द्रोऽपि जैन आसीत्। तेन शब्दानुशासनप्रभृतयो बहवो ग्रन्था रचिताः। जयसिंहः कुमारपालश्च चालुक्यवं-शीयौ राजानौ तस्य शिष्यौ बभूवतुः।

तस्य कार्य्यजातं मेरुतुङ्गकृतप्रबन्धचिन्तामणौ वर्णितमस्ति। अयं १०८८ खीष्टब्दे धण्डुकायां संजातः। ११७२ खीष्टब्दे चोपरतः।

चन्द्रालोकः।

पीयूषवर्षापरनाम्ना जयदेवेन ग्रन्थोऽयमनुष्टुप्छन्दसा रचितः। तस्य पिता महादेवो माता तु सुमित्रा। प्रसन्नराघवनाटककर्तुर्जयदेवस्य पिता महा-देवो माता तु सुमित्रा। अतोऽयं जयदेवो गीतगोविन्दकाराज्जयदेवाद्भिन्न एव। कविरयं महान् नैयायिकः।

पक्षधर इत्यस्यापरं नाम च। काव्यप्रकाशटीकायाः शिरोमणिग्रन्थटीका-याश्च कर्त्ताऽयं कविः। "कदली कदली" इत्यादि प्रसन्नराघवीयश्लोकस्य साहित्यद-र्पणकारेणोदाहृतत्वादयं जयदेवः साहित्यदर्पणकारात्प्राचीन इति निश्चीयते। अतो-ऽयं त्रयोदशशताब्द्यामासीत्।

एकावली।

इयं विद्याधरस्य कृतिर्मल्लिनाथस्य तरलाख्यया व्याख्यया सहिता प्रकाशितास्ति। उत्कलराजस्य नरसिंहस्य प्रशस्तिः कविनैतेनारचिता उदाहरण-त्वेनोपन्यस्ता च। तत्र तावन्नरसिंहस्तु "यवनावनिवल्लभम" इम्मीर (अमीर) मद-र्दकः। इत्येवं वर्णितः। वङ्गसागरसीमनि गङ्गातरङ्गधवलः इत्यादिना राज्ञो नरसिंहस्य

वङ्गप्रदेशे यवनविजयो वर्णितः। परं लाङ्गुलानरसिंहस्तु यवनानामुच्छेदक आसीत्। अतस्तस्य समये १२३८ खीष्टाब्दात् परत एवायमासीत्।

प्रतापरुद्रयशोभूषणम्।

विद्यानाथस्य काकतीयराजस्य प्रतापरुद्रस्य प्रशस्तिरत्नोदाहरणत्वेनोपन्यस्ता। मल्लिनाथस्य पुत्रेण कुमारस्वामिनास्य व्याख्या कृता। प्रतापरुद्रस्तु त्रयोदशशताब्दयाः प्रान्तभागे चतुर्दशशताब्दयाः प्रथमभागे राजासीदिति लेखतो ज्ञायते। अतो ग्रन्थोऽयं चतुर्दशशताब्दयाः प्रथमे पादे रचितः।

साहित्यदर्पणः।

विश्वनाथस्य। जम्बुराजधान्यां १४४०शकाब्दे १३८४खीष्टाब्दे लिखितः साहित्यदर्पणः समुपलभ्यते। अतोऽयं ग्रन्थस्ततः प्रागेव रचित इत्यत्र नास्ति विचिकित्सालेशोपि।

"सन्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः।
आल्लावद्दीननृपतौ न सन्धिर्नच विग्रहः॥"

एतस्मिन् साहित्यदर्पणीयश्लोके यवनराजस्य आल्लावद्दीनस्य नामोल्लेखो वर्त्तते। "सुलतान् आल्लाउद्दीन् खिल्जि" (Sultan Allauddin Khilji) इति नाम्ना प्रसिद्धिं गतो यवनराज एव। अयं च यवनराजो विषप्रयोगेण १३१६ खीष्टाब्दे एव व्यापादितः। "सुलतान्" शब्दस्तावत् सुरत्राणरूपेण संस्कृतभाषायामत्र व्यवहृतः। गङ्गाम्भसि सुरत्राण" इत्यस्मिन् श्लोकव्याख्याने तदेव प्रदर्शितं टीकाकारेण महेश्वरभट्टाचार्य्येण। "सन्धौ सर्वस्वहरणम्" इत्यादिसाहित्यदर्पणश्लोके आल्लावद्दीननृपस्य नामोल्लेखनाद् विश्वनाथस्य तत्समकालीनत्वं त्रयोदशशततम (१३००) खीष्टाब्दोद्भवत्वं तत्परवर्त्तित्वं वा समापतति।

१३८४ खीष्टाब्दे लिखितस्य ग्रन्थस्य समुपलम्भाद् विश्वनाथ आल्लावद्दीनसमकालीन इत्यनुमीयते। साहित्यदर्पणकरणादनन्तरमनेन नरसिंहविजयाख्यं खण्डकाव्यं व्यरचि।

तत्रत्याः कतिपये श्लोका लोचनटीकायां विश्वनाथकृतायां काव्यप्रकाशस्य दर्पणाख्यायां व्याख्यायां चोद्धृता दृश्यन्ते।

उत्कृष्टकलाजालसमुद्भासितत्वादुत्कल इत्यन्वर्थं नाम भजमाने कलिङ्ग इत्यपरेण नाम्नापि सर्वत्र प्रसिद्धिमासादिते देशे नरसिंहनामानो बहवो राजानो जनानं भेजिरे। तेषु कस्यचिन्नरसिंहस्य सभायामेतस्य वेदः पितामहो नारायणः पदं प्रतिष्ठां सम्प्राप्यासीदिति।

"श्रीकलिङ्गभूमण्डलाखण्डलमहाराजाधिराजश्रीनरसिंहदेवसभायां धर्म्मदत्तं स्वगयन्तः सकलसहृदयगोष्ठीगरिष्ठकविपण्डितास्मत्पितामहश्रीमन्नारायणपादाः" इति पाठादवगम्यते काव्यप्रकाशटीकायां दर्पणाभिधायां स्वकृतायां तादृशोऽपि पाठः समुल्लसति।

पर तु मुद्रिताना साहित्यदर्पणाना तृतीये परिच्छेदे "तत्प्राणश्च चासद्वृद्ध प्रपितामहसहृदयगोष्ठीगरिष्ठकविपरिण्डतमुख्यश्रीमन्नारायणपादैरुक्तम्" इत्यविध पाठो दृश्यते। अत्र वृद्धप्रपितामह इति पाठस्तु भ्रममूलक एव। यदि नारायणस्तस्य पञ्चमपुरुष वृद्धप्रपितामह स्यात्तर्हि विश्वनाथ कस्यापि नरसिंहनृपते सभायां नैव सम्भवत्। तस्य जनिस्तु पञ्चदशशताब्द्या समापतेत्।

साहित्यदर्पणशेषे 'श्रीमन्नारायणचरणारविन्दमधुव्रत" इत्युक्त्या चन्द्रकलाया प्रारम्भे 'नारायणचरणारविन्दमधुकरीभूत इत्युक्त्या च पितामह एव स्मृत कविनेत्यप्यायाति। विश्वनाथेन विजयनरसिंहाख्य काव्यमेक विरचितम्। तदुक्त तस्य पुत्रेणानन्तदासेन लोचन्याम्। यथा मम तातपादाना विजयनरसिंह।

नि श्वासोद्धातवातप्रसरधुतकुलाहार्य्यमुद्धातदप्ट्रा
जातज्योति स्फुलिङ्गप्रकरविरचितोल्कानिकायाभिशङ्का।
अर्धे पारीन्द्रमर्धे नरमहह महालोकमालोक्य लोका
स्तोकास्तोकावशेषा शरणमुपययुर्वारिधिं वारिधिं वा॥ इति।
आहवे जगदुद्दण्डराजमण्डलराहवे।
श्रीनृसिंहमहीपाल स्वस्त्यस्तु तव बाहवे॥ इति च।

अतो विश्वनाथेन कस्यापि नरसिंहनृपते प्रशस्ती रचिता। अतएव ज्ञायते विश्वनाथ कस्यापि नरसिंहाख्यस्य राज्ञ साधिविग्रहिक आसीत्। तत्पितामहस्तु नारायण दासोऽपि कस्यचिन्नरसिंहाह्वस्य राज्ञ समायामासीदिति।

पर विश्वनाथस्य पिता चन्द्रशेखरो भानुदेवनृपते साधिविग्रहिक आसीदिति। यथा तातपादाना चतुर्दशभाषाविलासिनीभुजङ्ग महाकवीश्वरश्रीचन्द्रशेखरसाधिविग्रहिकाणाम्—

दुर्गालङ्कितविग्रहो राजत्युमावल्लभ इत्यत्र प्रकरणेनाभिधेये उमावल्लभशब्दस्य उमानाम्नी महादेवी तद् वल्लभे भानुदेवनृपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभ रूपोऽर्थो बोद्धव्यत। भानुदेवनृपते प्राकरणिकत्वात्तस्यैव राज्ञ प्रशस्तिपरोऽय श्लोक।

पर भानुदेवनामानो बहवो नृपतय उत्कलस्य सिंहासनमलञ्चक्रु। अतस्ते ष्वन्यतमस्य भानुदेवस्य साधिविग्रहिकोऽयम्। तत एवानेन महापात्रोपाधिर्लब्ध। चन्द्रशेखरश्चतुर्दशसु भाषासु परिडत महाकविश्चासीत्। अनेन भाषार्णवो नाम भाषाप्रतिपादको ग्रन्थ कृत। पुष्पमालाभिधाना नाटिका चास्यैव कृति। तत्कृत ग्रन्थोक्ता बहव श्लोका साहित्यदर्पणे उदाहरणत्वेनोपन्यस्ता समुपलभ्यन्ते। विश्वनाथेन पितुरेवाष्टादशसु भाषासु पाण्डित्य समासादितमिति 'निजजनकसमधिगत साहित्यतत्वस्य' इति चन्द्रकलानाटिकान्त पातिनी स्वकीयैवोक्ति प्रतिपादयति। महापात्रोपाधिस्तु न तत्कुलपारम्पर्य्यक्रमागत किन्तु लोकोत्तरपाण्डित्यबललब्ध

स एव उपाधिविश्वनाथस्य तदायजनकस्य च। तस्य पितामहादयो दाससञ्ज्ञका एवासन्। ते च नारायणदासचण्डीदासानन्तदासादयः। अतो विश्वनाथेनैव पिता महापात्रोपाधिकत्वेन पितामहस्तद् भ्राता च नारायणचण्डयाभधानौ दासोपाधिकत्वेन सकीर्त्तिता. । अधुनाप्युत्कलप्रदेशे महापात्र इति राजप्रदत्तोपाधिभूषिता ब्राह्मणा दृश्यन्ते, परं तदुपाधिस्तु एतेषामिदानीं कौलिक सजात । साम्प्रत सामन्तापरनामानो महापात्रोपाधिभूषिताः कौशिकदासा उत्कलप्रदेशे वर्त्तन्ते । परमयन्तु कपिञ्जलदास आसीत्। तदुक्तं तत्पुत्रेणानन्तदासेन

"आसीत्कपिञ्जलकुलर्क्षराकूपारचन्द्रमाः।
त्रिकलिङ्गाधिपधराधामधीसचिवः कृती ॥ इति।

अधुनाप्येतस्मिन्प्रदेशे कपिञ्जलसगोत्रा दाससञ्ज्ञका ब्राह्मणा वर्त्तन्ते।

विश्वनाथो निश्शङ्कभानुदेवनरपते सान्धिविग्रहिक आसीदिति तदीयचन्द्रकलानाटिकातः सुस्पष्ट विज्ञायते। तद्यथा

"आर्य्ये ! पश्य पश्य—अयमिदानीं यवनपुरन्ध्रीवर्गनिर्गलदविरलनयनजलधारानिर्धौतगिरिकन्दरो निजभुजप्रतापतपनसमुत्सादितारातितिमिरनिकरश्चोलकोशललवङ्गट्टावङ्गकोचकाञ्चीगौडकालमच्छम्लेच्छनटकर्णाटप्रमुखराजराजीवराजिरजनीकर सकलगुणरत्नरत्नाकरो निखिलानवद्यविद्यानिधिरर्थिकुलकल्पद्रुम सभामध्यास्ते गजपतिर्महाराजाधिराजस्त्रिकलिङ्गभूमण्डलाखण्डल श्रीमान् निश्शङ्कभानुदेव.

आच्छन्ने धर्मधाम्नि प्रसरहयखुरच्छुण्णपृथ्वीरजोभि.।
क्षिप्ते नक्षत्रलक्षे नभसि करिवरोद्धूतगङ्गापयोभि.।
ज्योत्स्नाभिः कीर्त्तिचन्द्रे धवलयति जगत्त्रैत्रयात्रावकाशे
गौडक्ष्मापाललक्ष्मीर्व्यरचयदचिरादेव यस्याभिसारम् ॥

तस्मादस्माकमिदानीं चतुर्दशभाषाविलासिनीभुजङ्गमहाकविनिखिलानवद्यविद्यामहोदधिराजहंसमहापात्रश्रीचन्द्रशेखरतनूजन्मन श्रीमन्नारायणचरणारविन्दमधुकरीभूतचेतसो निजजनकसमधिगतनिखिलसाहित्यतत्त्वस्य नाट्यवेददीक्षागुरो सहृदयैकबान्धवस्य गजपतिमहाराजसान्धिविग्रहिकमहापात्रश्रीविश्वनाथकविराजस्य कृतिमभिनवा चन्द्रकलानामनाटिकामभिनेतुमुचितोऽय समय.।" इति।

निश्शङ्कोपाधिको भानुदेवनृपतिर्विश्वनाथस्य परिपोषक आसीत्। तत्पुत्रेणानन्तदासेनापि निश्शङ्कभानुदेवनृपते प्रशस्तिवर्णन कृतम्। तदुक्त सप्तमपरिच्छेदे लोचने—यथा मम—

प्रौढामादाय भीतिं मनसि सरभसं प्राप्य लोकापकीर्त्तिं
नैव स्तोकाऽप्यपेक्षाऽक्रियत पथि पथि प्राक्तनासु प्रियासु।
श्रीमन्निश्शङ्कभानोः समरपरिसरारब्धीमानिस्सीमसेना-
निश्शाणस्वानशङ्काकुलमपसरता पञ्चगौडेश्वरेण ॥

इति दशमपरिच्छेदे रूपकालङ्कारव्याख्यानेऽपि—

अस्ति स्वस्त्ययनं श्रियः सुचरितं द्राघीयसः श्रेयसः
सौन्दर्यस्य रसायनं निरवधेः शीलस्य लीलायितम्।
विद्यानामधिदैवतं निरुपधेः शौर्यस्य विस्फूर्जितं
श्रीभानुस्त्रिकलिङ्गमङ्गलपदं गङ्गान्वये भूपतिः॥

इति च विश्वनाथेन तत्पुत्रेणानन्तदासेन च नृपतिनिश्शङ्कभानुदेवस्य प्रतापो वर्णितः। तस्य गौडराजपराजयस्तूभाभ्यामेव प्रदर्शितः। कलिङ्गनृपतेर्निश्शङ्कभानुदेवस्य गौडेन्द्रविजयं विषयीकृत्य राजा करटकं शोधयति इत्ययमेव प्रवादस्तदानीं प्रादुरभूत्। अतस्तेन राज्ञः कीदृशी प्रसिद्धिरभूदितीत्यत एवावगम्यते। किञ्च रूढौ सारोपगौण्या लक्षणलक्षणाया उदाहरणत्वेन तदेव वाक्यमुपन्यस्तं विश्वनाथेन।

कलिङ्गाः साहसिकाः इत्यपि प्रवादो यवनराजविजयमूलक एव। एतदपि वाक्यं रूढौ लक्षणाया उदाहरणत्वेन तेनैवोपन्यस्तम्। तदानीं गौडदेशो यवननृपतिभिः शासितोऽभूत्। यवनाना कलिङ्गे प्रवेशो नासीत्। कलिङ्गस्तदा स्वाधीनाना हिन्दुनृपतीना छत्रच्छायाश्रित एवावर्त्तत। अतः कलिङ्गस्य स्वाधीनताहरणे यवननृपतीना यत्नस्तु गरीयानासीत्। कलिङ्गनृपतिभिरपि बाहुबलेनैव स्वाधीनता रक्षिता। परं यवननृपतिभिः साकं कलिङ्गाना सर्वदैव विग्रहोऽभूत्, अतो गौडदेशशासितारो नृपतयः करटकत्वेनैव व्यपदिष्टाः कलिङ्गनृपतिभिः।

अतएव तद्विजेतुः कलिङ्गनृपतेर्निश्शङ्कभानुदेवस्य गौडेन्द्रविजयं विषयीकृत्य, 'राजा करटकं शोधयति' इत्ययमेव प्रवादस्तदानीं प्रादुरभूत्। इत्यत एव भानुदेवस्य यवनराजजयेन कीदृशी प्रतिष्ठाभूदिति सुस्पष्टं ज्ञायते।

किञ्च रूढौ सारोपगौण्या उदाहरणत्वेन तदेव वाक्यमुपन्यस्तं विश्वनाथेन। 'कलिङ्गाः साहसिका.' इत्यपि प्रवादो यवनराजजयमूलक एव। एतदपि वाक्यं रूढौ लक्षणाया उदाहरणत्वेन तेनैवोपन्यस्तम्।

विश्वनाथेन नरसिंहस्य निश्शङ्कभानुदेवस्य चोभयो राज्ञोर्वर्णनात्स तयोः सान्धिविग्रहिको महापात्र आसीत्।

द्वितीयनरसिंहस्य नृपतेः पुत्रो द्वितीयो भानुदेवः निश्शङ्कभानुनाम्नाऽपदिश्यते। द्वितीयनरसिंहस्तु १३०६ खृष्टाब्दं यावद् राजाभूत्। ततः पर तस्य पुत्रो द्वितीयो भानुदेवो राजाऽभूत्। उभयो राज्ञोर्बहूनि दानपत्रादीन्युपलभ्यन्ते। तदानीं सुलतान् अल्लाउदीन् महम्मदसाखिल्जि" यवननरपतिरासीत्। तदानीं नरसिंहेन नरपतिना गौडेन्द्रो यवनराजः पराजितः। चतुर्थनरसिंहनृपतेर्दानपत्राज् ज्ञायते यद् द्वितीयभानुदेवेन गियासुद्दीन्यवनराजः पराजितः। यवनराजोऽयं 'गियासउद्दीन्नामा तदानीं गौडेन्द्र आसीत्। अतो विश्वनाथेन तत्पुत्रेणाऽपि

निरशङ्कभानुदेवस्य गौडविजयो यवनराजजयश्च दर्शित । अयं द्वितीयो भानुदेव पराक्रमेण निरशङ्क आसीदिति तस्य निरशङ्क इति सार्थक उपाधिरासीत् ।

अतो विश्वनाथस्त्रयोदशशताब्द्या अन्तिमे भागे द्वितीयनरसिंहनृपते चतुर्दश-शताब्द्याः प्रथमे भागे द्वितीयभानुदेवस्य नि.शङ्कोपाधिकस्य च सान्धिविग्रहिकमहामात्र आसीदिति नास्ति शङ्कावकाश ।

तस्य पित्रा चन्द्रशेखरेणापि भानुदेवस्य वर्णनं कृतम् ।

स तु प्रथमो भानुदेवः १२६४ शताब्द्याः परं बभूव । विश्वनाथस्य पितामहो नारायणदासः प्रथमनरसिंहस्य सभायामासीत् ।

स च १२६४ खीष्टाब्दं यावदुत्कलप्रदेशस्य नृपतिरासीत् ।

तेन सुप्रसिद्धं कारुकलोद्भासित कोणार्के सूर्य्यमन्दिरं निर्मितम् । स तु लोके साङ्गलानरसिंह इति ख्यातः । तेनापि बहवो यवननृपतयः पराजिताः ।

एतेषा चतुर्णामुत्कलनरपतीना प्रशस्तिर्वर्णिता वासुदेवरथसोमयाजिना गङ्ग-वंशानुचरितचम्पूकाव्ये यथा—

तस्मादार्सीन्नरसिंहो नृपतिरतिकृती कोपनो यत्र दुष्टे
स्पष्टं लांगूलमाविर्भवति स च ततो नाम तत्पूर्वमाप ।
यस्यारीणां चरोरुक्रमहमभि सरुषो गाढमापीड्यमानं
मुष्टिद्वन्द्वं न्यमज्जात्किल भुजवलिनोट्टङ्कितं राजपट्टे ॥
श्रीशप्रासादबन्धाद्भुतकृतिकृतिनाऽनङ्गभीमेन राज्ञा
यद्धस्पर्द्धोऽतिमात्रोऽपरमवनितले कीर्त्तिसम्पत्तिलिप्सुः ।
कोणार्कक्षेत्रपृष्ठे विपुलतमपृथूच्छायमुत्साहशाली
सौरं प्रासादमेकं व्यरचयदचिराद्भारसिंहोऽवतारः ॥
दृप्यद्दुर्जनसंघसंहृतिपटुः प्रत्यर्थिनिर्ग्रन्थने
दक्षो दक्षिणसत्तमो गुणिगणे सम्भूतसम्भावनः ।
पुत्रान् प्राणपणं पितेव परमप्रेम्णा प्रजाः पालयन्
क्षमापृष्ठेभसमाः समाः समतनोत्साम्राज्यमत्यूर्जितम् ॥
पादं कुर्वन् क्षमाभृत्कुलशिरसि वहन् मण्डलं रज्यमानं
दोःशुष्मोष्मातिरेकी दिशि दिशि जनयन् यः करोदञ्चनानि ।
सोऽसौ भुक्त्वैव भोगानृतुनयनमितान् वत्सरान् साङ्गमासान्
चण्डिम्ना स्वेन पङ्कानिव रिपुकुभुजोऽशोषयद् वीरभानुः ॥
तस्मादुद्दामबाहुद्रविणविदलितानन्तसामन्तनारी-
शुम्भद्वक्षोजकुम्भप्रसृमरमकरीप्रोञ्छनप्रौढलीलः ।
लिम्पन् दिक्चक्रवालं धवलतरयशश्चन्दनाम्भश्छटाभि-
र्भूपृष्ठं तातपादैः समसमयमशाद् भीमपूर्वो नृसिंहः ॥

पद्मं कञ्चन नेक्षते रणमुखे चापं च नापेक्षते
नैवाशंसति दंशनं वितनुते सेनारसे नादरम् ।
उद्यद्दुर्दमदोर्द्वयीस्फुटतरास्फोटावधूतद्विषो
यस्यासीदुपयोगशून्यमखिलं साङ्ग्रामिकं वस्तु यत् ॥
तस्मान्निःशङ्कभानुः परमुदयमधाद् दानशौण्डाधिकारे
यश्चासीदग्रगण्यो गुणिगणगणने यं पुरो भावयन्ति ।
यद्दोर्दण्डप्रतापादवनितलमभूत्सर्वथा निष्प्रकम्पं
गायत्रीवर्णसंख्याः स जगति शरदश्चक्रवर्त्तित्वमाच्छेत् ॥

श्रीहर्षस्य नैषधचरितादुद्धवः श्लोकाः, प्रसन्नराघवरचयितुर्जयदेवस्य 'कदली कदली' इत्यादिश्लोकः, गीतगोविन्दकारस्य जयदेवस्यापि 'हृदि विसलताहारो नायं भुजङ्गमनायकः' इति श्लोकोऽप्येतेनोदाहरणत्वेन प्रदर्शिताः । एते सर्वेऽपि कवयो द्वादशशताब्यामेवासन् । षष्ठदशशताब्याः प्रारम्भकाले सम्भूतेन कुमारस्वामिना नामोल्लेखनपूर्वकं साहित्यदर्पणात्पाठ उद्धृतः । अतो विश्वनाथकविराजश्चतुर्दशशताब्यामासीदिति नास्त्यत्र शङ्कालेशोऽपि । 'यावत्प्रमेन्दुनिभानना' इत्यन्तिमश्लोकस्य 'श्रीमन्नारायणचरणारविन्दमधुव्रत' इत्यस्य च दर्शनाद् विश्वनाथकविराजं वैष्णव इति केचिन् सम्भावयन्ति । परमसौ यथार्थतो न सम्प्रदायभुक्तो वैष्णवः । उत्कले ब्राह्मणाः प्रायशः पञ्चानां देवानामुपासकाः । विश्वनाथकविराजोऽपि तथैवासीत् ।

अतस्तेन 'मूर्ध्ना धार्यमान' इति श्लोके शिवस्य स्तुतिः कृता । चन्द्रकलारम्भेऽपि—

जीयासुः शफरायमाणशशभृल्लेखास्पलत्कैरव-
मातोद्भ्रान्तमधुव्रतव्रजमिषादुत्क्षिप्तनीलांशुकाः ।
विभ्रत्यो गिरिजाकटाक्षपतनादादित्यजासङ्गमं
नृत्यद्भर्गकिरीटकोटिचपलाः स्वर्गापगावीचयः ॥

इत्यस्मिन् श्लोके शिवस्य वर्णनं कृतम् ।

विश्वनाथकविराजादर्वाचीना बहवोऽलङ्कारनिबन्धकारास्तद् व्याख्यातारश्च दृश्यन्ते । तेषु तावत्केशवमिश्रः अप्पय्यदीक्षितः जगन्नाथश्च प्रधानाः ।

केशवमिश्रस्तु माणिक्यचन्द्रनृपतेरनुरोधेनैव अलङ्कारशेखराख्यं ग्रन्थं प्रणीतवान् । अयं केशवमिश्रः शौद्धोदनिकृतानि कारिकारूपाणि सूत्राणि मूलत्वेनोपसंगृह्य तदुपरि वृत्तिं निबध्नन्थ । तदुक्तमलङ्कारशेखरे तेनैव—'अलङ्कारविद्यासूत्रकारो भगवान् शौद्धोदनिः परमकारुणिकः स्वशास्त्रे प्रवर्तयिष्यन् प्रथमं काव्यस्वरूपमाह' इति ।

माणिक्यचन्द्रस्तावत् १५६३ खीष्टाब्दे चलिङ्गदेशे नृपतिरासीत् । अतः षोडशशताब्या अन्तिमभागे रचितोऽयं ग्रन्थः केशवमिश्रेण । अप्पय्यदीक्षितेन संस्कृतभाषायां पञ्चशता ग्रन्था विरचिताः । तेन वृत्तिवार्तिकं, कुवलयानन्दः,

चित्रमीमांसा चेति निबन्धत्रयमलङ्कारे कृतम्, तेन कुवलयानन्दे वेङ्कटपतिर्वर्णितः। विजयनगरस्य प्रथमवेङ्कटपतिना १६०१ खीष्टाब्दे प्रदत्त दानपत्रमुपलभ्यते। अतोऽयं दाक्षिणात्यः षोडशशताब्याः प्रान्तभागे सप्तदशशताब्याः प्रथमभागे चासीत्। अप्पय्यदीक्षितस्य कनीयान् भ्राता अच्चादीक्षितस्य नप्ता नीलकण्ठदीक्षितः ४७३८ गतकलिवाले १६३७—१६३८ खीष्टाब्दे नीलकण्ठविजयकाव्यमरचयत्। एतेनापि अप्पय्यदीक्षितः सप्तदशशताब्याः प्रथमार्द्धे आसीदिति प्रतीयते। अप्पय्यदीक्षितेन सिद्धान्तलेशाख्यग्रन्थसमाप्तावेदं लिखितम्।

विद्वद्गुरोर्विश्वजिदध्वरस्य श्रीसर्वतोमुखमहाजितयाजिसूनोः।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलिरप्पय्यदीक्षित इति प्रथितस्तनूजः॥

तन्त्राण्याधीत्य सकलानि सदावदात-
व्याख्यानकौशलकलाविशदीकृतानि।
आस्थाय मूलमनुरुध्य च सम्प्रदायं
सिद्धान्तभेदलवसंग्रहमित्यकार्षीत्॥

सर्वतन्त्रस्वतन्त्रैरेव केषाञ्चित्स्वकृतानां ग्रन्थानां नामानि प्रदत्तानि।

श्रीवीरवेङ्कटपतिक्षोणीपालस्य साह्यतः।
कृतः कुवलयानन्दश्चित्रमीमांसया सह॥
अभिधालक्षणावृत्तिर्विवृत्तिर्वृत्तिवार्त्तिकम्।
यावदाभ्युदयाख्याया व्याख्यानं च कृतं कृतेः॥
नामसंग्रहमाला च व्याख्या तस्याश्च विस्तृता।
काञ्चीवरदराजस्य दिव्यविग्रहवर्णनम्॥
व्याख्या तस्य च संकल्पा नातिसंक्षेपविस्तरा।
सर्वपापप्रशमनी श्रीकृष्णध्यानपद्धतिः॥
सर्वदुर्गतितरणी दुर्गाचन्द्रकलास्तुतिः।
आदित्यस्तोत्ररत्नं च तद् व्याख्यानं च विस्तृतम्॥
नानापद्यात्मकचतुर्मतसारार्थसंग्रहः।
न्यायमुक्तावली तद्वन्माध्वाचार्य्यमतानुगा॥
मयूखमालिका हृद्या लक्ष्मणाचार्य्यवर्त्मना।
श्रीकण्ठाचार्य्यपद्धत्या निर्मिता मणिमालिका॥
शङ्कराचार्य्यदृष्ट्या च प्रकल्पा नयमञ्जरी।
न्यायमुक्तावलीव्याख्या नातिविस्तरसंग्रहा॥
अद्वैतशास्त्रसिद्धान्तलेशसंग्रहनामकः।
न्यायरत्नामणिः सर्वसूत्रतात्पर्य्यवर्णकः॥
तथा परिमलः कल्पतरुगूढार्थवर्णकः।

श्रीकण्ठभाष्यव्याख्या च शिवार्कमणिदीपिका ॥
श्रीशिवानन्दलहरी शिवाद्वैतविनिर्णयः ।
रत्नत्रयपरीक्षा च पञ्चरत्नस्तवस्तथा ॥
तथा शिवरिरंसामाला ब्रह्मतर्कस्तवादयः ।
शिवतत्त्वविवेकश्च शिवकर्णामृतं तथा ॥
शिवार्चनप्रकाशार्थचन्द्रिका बालचन्द्रिका ।
मीमांसायाश्चित्रपुटस्तथा विधिरसायनम् ॥
मीमांसान्यायनिगूढ उपक्रमपराक्रमः ।
एते चान्ये च बहवः प्रबन्धाः प्राग्विनिर्मिताः ॥

प्राणप्रयाणकालेऽपि—

चिदम्बरमिदं पुरं प्रथितमेव पुण्यस्थलं
सुताश्च विनयोज्ज्वलाः सुकृतयश्च काश्चित् कृताः ।
वयांसि मम सप्ततेरुपरि नैव भोगस्पृहा
न किञ्चिदहमर्थये शिवपदं दिदृक्षे परम् ॥

आभाति हाटकसभानटपादपद्म-
ज्योतिर्मयो मनसि मे तरुणारुणोऽयम् ।

शिवरूपमेवं चिन्तयन् स्वर्गं प्रयातः । अपरिसमाप्तस्य श्लोकस्य पूरणं स्वपुत्रेणैवं कृतम् ।

नूनं जरामरणघोरपिशाचकीर्णा ।
संसारमोहरजनी विरतिं प्रयाता ॥

रसगङ्गाधरो जगन्नाथस्य । नागेशभट्टप्रणीतया व्याख्यया समेतोऽयं ग्रन्थः प्रकाशं प्रापितः । तेनात्र स्वीयान्युदाहरणानि उपन्यस्तानि । तदुक्तं तेनैव

निर्माय नूतनमुदाहरणानुरूपं
काव्यं मयात्र विहितं न परस्य किञ्चित् ।
किं सेव्यते सुमनसां मनसापि गन्धः
कस्तूरिकाजननकक्लिभूता मृगेण ॥

उत्तरालङ्करणं यावद् ग्रन्थोऽयं रचितः । स तु तैलङ्गीय आसीत् ।

रसगङ्गाधरप्रारम्भे—

पाषाणादपि पीयूषं स्पन्दते यस्य लीलया ।
तं वन्दे पेरभट्टाख्यं लक्ष्मीकान्तं महागुरुम् ॥

इत्यस्मिन् श्लोके पितरं लक्ष्मीकान्तं स्वैतत् निर्दिष्टम् ।

श्रीमज् ज्ञानेन्द्रभिक्षोरधिगतसकलब्रह्मविद्याप्रपञ्चः
काणादीरात्तपादीरपि गहनगिरो यो महेन्द्रादवेदीत् ।

देवादेवाध्यगीष्ट स्मरहरनगरे शासनं जैमिनीयं
शेषश्चासीत्शेषामलमणितिरभूत्सर्वविद्याधरो यः ॥

अयं हि जगन्नाथः रसगङ्गाधरमनोरमाकुचमर्दनगङ्गालहरीसुधालहर्यमृतलहरीकरुणालहरीलक्ष्मीलहरीयमुनावर्णनचम्पूरतिमन्मथनाटकवसुमतीपरिणयनाटकारवधादीकाव्यप्राणाभरणकाव्यचित्रमीमांसाखण्डनजगदाभरणकाव्यासफ्विलासभामिनीविलासादीनां कर्ता। भामिनीविलासे तेनोक्तम्—

दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः।

तत एव दिल्लीसम्राजः साजाहानाभिधानात्तेन पण्डितराजोपाधिर्लब्धः। तेन जगदाभरणे साजाहानपुत्रस्य दाराभिधानस्य प्रशस्तिर्वर्णिता। तस्य सभासदः "नवाब आसफखा" इत्याख्यस्य प्रशस्तिः "आसफ् विलासे" वर्णिता। १६२८ खीष्टाब्दतः १६५७ खीष्टाब्दं यावत्साजाहानेन सिंहासनमधिष्ठितम्। जगन्नाथस्तु तदानीन्तन एव। अतोऽयं सप्तदशमध्यभाग आसीत्।

अप्पय्यदीक्षितस्यान्तेवासिना सिद्धान्तकौमुदीकारेण भट्टोजीदीक्षितेन सार्कं शास्त्रविचारकाले म्लेच्छ इति सम्बोधितः क्रुद्धो जगन्नाथो म्लेच्छवत्तव मनोरमायाः (सिद्धान्तकौमुदीव्याख्यायाः) कुचमर्दनमहं करोमीति प्रतिश्रुतवान्। तदर्थमेव तेन मनोरमाकुचमर्दनं विरचितम्। यथा—

दृप्यद्द्राविडदुष्टदुर्ग्रहवशान् म्लिष्टं गुरुद्रोहिणा
यन्म्लेच्छेति वचोऽविचिन्त्य सदसि प्रौढेऽपि भट्टोजिना।
तत् सत्यापितमेव धैर्यनिधिना यत् सोऽप्यमुष्मात्कुचं
निर्ध्यास्य मनोरमामवशयन्नप्यालपयाघान्स्थितान् ॥

ततः प्रभृति भट्टोजिदीक्षितस्य गुरोरप्पय्यदीक्षितस्योपरि क्रुद्धेन जगन्नाथेन तन्मतखण्डनाय चित्रमीमांसाखण्डनादिकं व्यरचि। तदुक्तम्

अप्पय्यदीक्षितदवानलदग्धशेषं
साहित्यमङ्कुरयते सरसैर्निबन्धैः।
सूक्ष्मं विभाव्य मयका समुदीरितानाम्
अप्पय्यदीक्षिताकृतावेह दूषणानाम् ॥
निर्मत्सरो यदि समुद्धरणं विदध्यात्
तस्याहमुज्ज्वलमतेश्चरणौ वहामि।

दिल्लीनरेन्द्रकृपापात्रता प्राप्तस्य तारुण्यातिमिरतिरस्कृतविवेकालोकस्य जगन्नाथपण्डितस्य बभूव कस्याञ्चन यवनयुवत्यामासक्तिः। सा च कियत्कालानन्तरं पञ्चत्वं

गता । ततस्तद्विरहातुरः पण्डितो दिल्लीं परित्यज्य पण्डितैरनादृतो गङ्गाप्रवाहे झम्पमदाद् इत्याद्या नानाविधा जनश्रुतयः श्रूयन्ते । परं तत्र तादृशं सुदृढं प्रमाणं नास्तीति ता उपेक्ष्यन्ते एवास्माभिः ।

अतः परतो न कोऽप्युल्लेखयोग्यो निबन्धकार आसीदित्यत्रैव परिसमाप्यते प्राचीनाना विवृतिः ।

सर्वेष्वलङ्कारनिबन्धेषु ध्वन्यालोककाव्यप्रकाशसाहित्यदर्पणरसगङ्गाधरा एव नायकायन्ते । तत्रापि ध्वन्यालोकस्य ध्वनिस्थापनार्थमेव प्रवृत्तत्वान्न तत्र दोषगुणालङ्काराः प्रपञ्चिता. । काव्यप्रकाशोऽतीव दुरूहो विदुषामपि दुर्बोधता गतः । नैयायिकमणिमनुसरन् रसगङ्गाधरोऽतिसूक्ष्मविचारणचर्चाया प्रवृत्तत्वाद् दुरधिगमो भीषयते सर्वान् । परं साहित्यदर्पणोऽतीव सुगमः । ध्वन्यालोककाव्यप्रकाशादिषु प्रतिपादितानामर्थाना प्रतिपादकेष्वस्मिन् साहित्यदर्पणे बहुषु स्थलेषु नवीनत्वमनुभूयते । अत्रैव साहित्यराज्यसम्राजो मम्मटस्य मतखण्डनेन रसस्य काव्यात्मत्वं प्रतिपादितम् । इतः प्राचीनेषु भरतशाङ्गदशरूपकभिन्नेष्वलङ्कारशास्त्रेषु दृश्यकाव्यस्य चर्चापि नासीत् । परमत्र दृश्यकाव्यं तथा नायकनायकादिकमपि विस्तरेणैव प्रपञ्चितम् । काव्यप्रकाशवत् साहित्यदर्पणेऽपि कारिकावृत्त्युदाहृतिभिस्त्रिधा विभक्तो निरूपितः । तत्र कारिकावृत्तयश्च स्वीया एव । उदाहृतयस्तु स्वीयाः परकीयाश्च । अत्र प्रमेयाणामुपपादनं प्रायेण प्राञ्जलमेव । यत्तु क्वचिद् गहनं तद्विषयनिबन्धमूलकं । नतु लेखकाठिन्यमूलकम् । साहित्यशास्त्रस्य दुरधिगमा दुर्बोधाश्चापि विषया अत्र तथा प्राञ्जलं प्रकटीकृता यथा सुकुमारमतीनामपि विद्यार्थिनां सुबोधाः सुगमाश्च भवेयु. । अतोऽलङ्कारशास्त्रे व्युत्पित्सूनामेकमेवालम्बनमेतच्छास्त्रम् । ग्रन्थावसाने कविनापि तथोक्तम्—

साहित्यदर्पणममुं सुधियो विलोक्य ।
साहित्यतत्त्वमखिलं सुखमेव वित्त ॥

तस्य पुत्रेणानन्तदासेन लोचनारम्भे एतदेवोक्तम्—

आसीत् कपिञ्जलकुलक्षीराकूपारचन्द्रमाः
त्रिकलिङ्गाधिपधराधामधीसचिवः कृती ।
अशेषमहापात्रमणीभुजङ्गः साहित्यविद्यार्णवकर्णधारः ।
ध्वन्यध्वनिप्रौढधियां पुरोगः श्रीविश्वनाथः कविचक्रवर्ती ॥
स्वल्पाक्षरः सुबोधार्थः प्रध्वस्ताशेषदूषणः ।
साहित्यदर्पणो नाम ग्रन्थस्तेन विनिर्मितः ॥
पारं साहित्यविद्याब्धेर्गन्तुं वाञ्छन्ति ये क्षितौ ।
कृतिरेषा तरिस्तेषां विश्वनाथमहाकवेः ॥
श्रव्याभिनेयालङ्कारतत्त्वं सत्काव्यसम्मतम् ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥

सकलप्रयोजनमौलिभूतः समनन्तरमेव रसास्वादसमुद्भूत आनन्द एव काव्यस्य प्रयोजनम्। तत्र प्रयोजनं नाट्यशास्त्रे भरतेन सम्यक् प्रतिपादितम्। तथाहि—

वेदविद्येतिहासानामर्थानां परिकल्पनम्।
विनोदकरणं लोके नाट्यमेतद् भविष्यति॥ (नाट्यशास्त्रे)

"तथापि प्रीतिरेव प्रधानम्। प्राधान्येन आनन्द एवोक्तः, प्रीत्यात्मा च रसस्तदेव नाट्यम्। नाट्यमेव च वेद इत्यस्मदुपाध्यायः" (ध्वन्यालोकलोचने) अत एवानन्दः काव्यस्य मुख्यं फलम्। अवान्तरप्रयोजनानि तु ग्रन्थकारैस्तत्तत्स्थलेषु प्रतिपादितानि। साहित्यदर्पणेऽपि चतुर्वर्गफलावाप्त्यादिकं तत्फलमिति सम्यक् सिद्धान्तितम्। काव्यप्रयोजने कस्यापि निबन्धकारस्य विमतिर्नैव दृश्यते। सर्वेषामेवालङ्कारशास्त्राणां काव्यप्रतिपाद्यमिति तदुपयोगितया सर्वत्रैव दोषगुणालङ्काराः निरूपिताः। रसादयस्तु क्वचिन्निरूपिताः क्वचिच्च न। तथाहि वाग्भटालङ्कारादौ रसो निरूपितः वामनवृत्त्यादौ तु न। वामनवृत्तौ शब्दशुद्धिर्निरूपिता परं नान्यत्रालङ्कारशास्त्रे। वाग्भटालङ्कारे काव्यप्रकरणप्रणाली लिखिता, नान्यत्र। चन्द्रालोके काव्यधर्मो न्यरूपि, नान्यत्र। काव्यप्रकाशादौ अभिधालक्षणाव्यञ्जनावृत्तयो निरूपिताः, नतु वाग्भटालङ्कारादौ। साहित्यदर्पणे दृश्यकाव्यादिकं न्यरूपि, नान्यत्र कुत्रचित्। दोषगुणालङ्काराश्च सर्व एव न सर्वत्र समानाः। वामनभोजादिमते अलङ्कारदोषा नैव स्वतन्त्राः वर्त्तन्ते। मम्मटादिमते तद्वैपरीत्यमेव। दण्डिमते दोषा दशैव। भोजमते पदवाक्यवाक्यार्थगता दोषाः प्रत्येकं षोडश।

वामनमते गुणाः शब्दगता अर्थगताश्च प्रत्येकं दश। भोजमते चतुर्विंशतिः। एवं दोषा भावरूपा वैशेषिकनामानो बहवः।

मम्मटविश्वनाथादिमते न शब्दार्थगता गुणाः किन्तु रसगतास्त्रय एव। दण्डिभोजादिमते प्रहेलिकादयोऽलङ्काराः। न वक्रोक्त्यादयः। मम्मटविश्वनाथादिमते तु तद्वैपरीत्यमेव।

काव्यलक्षणे निबन्धकाराणां विप्रतिपत्तिर्दृश्यते। यथैव येन काव्यस्यात्मा निरूपितस्तथैव तेन काव्यस्य लक्षणं कृतम्। तेषु कानिचिल्लक्षणानि केवलं काव्यस्य स्वरूपवर्णनपराण्येव। केषाञ्चिदालङ्कारिकाणां काव्यलक्षणानि प्रदर्श्यन्तेऽत्र।

(१) **शब्दार्थौ सहितौ काव्यम्।** (भामहः)
(२) **ननु शब्दार्थौ काव्यम्।** (रुद्रटः)
(३) **तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।** (मम्मटः)
(४) **शब्दार्थौ निर्दोषौ प्रायः सालङ्कारौ काव्यम्।** (वाग्भटः)
(५) **अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम्।** (हेमचन्द्रः)

(६) शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली । (दण्डी)
(७) इष्टार्थव्यवच्छिन्ना पदावली काव्यम् । (अग्निपुराणम्)
(८) वाक्यं रसात्मकं काव्यम् । (विश्वनाथकविराजः)
(९) निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम् ।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिञ्च विन्दति ॥
(१०) काव्यं रसादिमद्वाक्यं श्रुतम् । (भोजः)
(११) सुखविशेषकृत्तत् । (शौद्धोदनिः)
रमणीयार्थप्रतिपादकः शब्दः काव्यम् ॥ (जगन्नाथः)

इत एव काव्यलक्षणे आलङ्कारिकाणां मतानि विभिन्नानीति स्फुटं प्रतीयते । अलङ्कारशास्त्रेऽपि विभिन्नानि मतानि वर्त्तन्ते । तेषु पञ्चमतानि समुदवन्धे प्रदत्तानि ।

यथा—

इह विशिष्टौ शब्दार्थौ काव्यम् । तयोश्च वैशिष्ट्यं धर्ममुखेन व्यापारमुखेन व्यङ्ग्यमुखेन चेति त्रयः पक्षाः । आद्येष्वलङ्कारतो गुणतो वेति द्वैविध्यम् । इह पञ्चसु पक्षेषु आद्य उद्भटादिभिः, द्वितीयो वामनेन, तृतीयो वक्रोक्तिजीवितकारेण, चतुर्थो भट्टनायकेन, पञ्चमश्चानन्दवर्द्धनेन स्वीकृतः ।

अत्र रसस्योल्लेखो नास्ति ध्वनेरन्तर्भूतत्वात्तस्य पञ्चमान्तःपातित्वमेव स्वतः समापतति । जयरथेन विमर्शिन्यां द्वादशध्वनेः प्रतिपक्षा दर्शिताः । यथा—

"तात्पर्यशक्तिरभिधालक्षणानुमिती द्विधा ।
अर्थापत्तिः क्वचित्तन्त्रं समासोक्त्याद्यलङ्कृतिः ॥
रसस्य कार्यता योगो व्यापारान्तरबोधनम् ।
द्वादशेत्थं ध्वनेरस्य स्थिता विप्रतिपत्तयः ॥"

तदेतत्सर्वमालङ्कारिकाणां मतमलङ्कारसर्वस्वे प्रदर्शितम् । यथा—

'इह हि तावद् भामहोद्भटप्रभृतयश्चिरन्तनालङ्कारिकाः प्रतीयमानमर्थं वाच्योपस्कारतयाऽलङ्कारपक्षनिक्षिप्तं मन्यन्ते । तथाहि पर्य्यायोक्तप्रस्तुतप्रशंसासमासोक्त्याक्षेपव्याजस्तुत्युपमेयोपमानन्वयादौ वस्तुमात्रं वाच्योपस्कारकत्वेन 'स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्' इति यथायोगं द्विविधया भङ्ग्या प्रतिपादितं तैः । रुद्रटेन तु भावालङ्कारो द्विधैवोक्तः । रूपकदीपकापह्नुतितुल्ययोगितानामुपमाद्यलङ्कारे वाच्योपस्कारत्वेनोक्तेः । उत्प्रेक्षा तु स्वयमेव प्रतीयमाना कथिता । रसवत्प्रेयःप्रभृतौ रसवदादिर्वाच्यशोभाहेतुत्वेनोक्तेः । तदित्थं त्रिविधमपि प्रतीयमानमलङ्कारतया ख्यापितमेव । वामनेन तु सादृश्यनिबन्धनाया लक्षणाया वक्रोक्त्यलङ्कारं ब्रुवता कश्चिद्

ध्वनिभेदोऽलङ्कारतयैवोक्तः। केवलं गुणविशिष्टपदरचनात्मिका रीतिः काव्यात्मत्वेनोक्ता। उद्भटादिभिस्तु गुणालङ्काराणां प्रायशः साम्यमेव सूचितम्। विषयभानेन भेदप्रतिपादनात्संघटनाधर्मत्वेन चेष्टः। तदेवमलङ्कारा एव काव्ये प्रधानमिति प्राच्याना मतम्।

वक्रोक्तिजीवितकारः पुनर्वैदग्ध्यभङ्गिभणितिस्वभावा बहुविधा वक्रोक्तिमेव प्राधान्यात्काव्यजीवितमुक्तवान्, व्यापारस्य प्राधान्यञ्च काव्यस्य प्रतिपेदे। केवलमुक्तिवैचित्र्यजीवितं काव्य न व्यङ्ग्यजीवितमिति तदीयं दर्शनं व्यवस्थितम्। भट्टनायकेन तु व्यङ्ग्यव्यापारस्य प्रौढोक्त्याऽभ्युपगतस्य काव्यांशत्वं ब्रुवता न्यग्भावितशब्दार्थस्वरूपस्य व्यापारस्यैव प्राधान्यमुक्तम्। तत्राप्यभिधाभावकत्वलक्षणव्यापारद्वयोत्तीर्णो रसचर्वणात्मा भोगापरपर्यायो व्यापारः प्राधान्येन विश्रान्तिधामतयाऽङ्गीकृतः। ध्वनिकारः पुनरभिधातात्पर्यलक्षणाख्यव्यापारत्रयोत्तीर्णस्य ध्वननद्योतनादिशब्दाभिधेयस्य व्यञ्जनव्यापारस्यावश्याभ्युपगमत्वाद् व्यापारस्य च वाक्यार्थत्वाभावाद् वाक्यार्थस्यैव च व्यङ्ग्यरूपस्य गुणालङ्कारोपस्कर्त्तव्यत्वेन प्राधान्याद् विश्रान्तिधामत्वाद् आत्मत्वं सिद्धान्तितवान्। व्यापारस्य विषयमुखेन स्वरूपप्रतिलम्भात्तत्प्राधान्येन प्राधान्यात् स्वरूपेण विदितत्वाभावाद् विषयस्यैव समग्रभरसहिष्णुत्वम्। तस्माद् विषय एव व्यङ्ग्यनामा जीवितत्वेन वक्तव्यः, यस्य गुणालङ्कारचारुत्वप्रतिग्रहसाम्राज्यम्। रसादयस्तु जीवितभूता नालङ्कारत्वेन वाच्याः।

अलङ्काराणामुपस्कारकत्वाद् रसानां च प्राधान्येनोपस्कार्यत्वाद् व्यङ्ग्य एव वाक्यार्थीभूतः काव्यजीवितम् इत्येष पक्षो वाक्यविदां सहृदयानामावर्जकः। व्यञ्जनव्यापारस्य सर्वैरनपह्नुतत्वात्तदाश्रयेण च पक्षान्तरस्याप्रतिष्ठानात्। यत्तु व्यक्तिविवेककारो वाच्यस्य व्यङ्ग्यं प्रति लिङ्गतया व्यञ्जनस्यानुमानान्तर्भावमाख्यत्तद्वाच्यस्य प्रतीयमानेन सह तादात्म्यतदुत्पत्त्यभावादविचारिताभिधानम्। तदेतत्कुशाग्रधिषणैः क्षोदनीयमतिगहनमिति नेह प्रतन्यते। इत्येव विभिन्नानि प्राचीनाना मतानि निरस्य काव्यस्यात्मा ध्वनिरिति व्यवस्थापितं ध्वनिकारेण। परं कविराजेन विश्वनाथेन ध्वनिवादमवालम्ब्य ध्वने प्रकारविशेषस्य रसस्यात्मत्व प्राधान्यं च काव्ये निर्णीतम्।

प्रथममेव भरतेन नाट्यशास्त्रे रसस्य प्राधान्यमात्मत्वं च प्रतिपादितम्। "वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्" इत्यनेनाग्निपुराणेऽपि काव्ये रसस्यात्मत्वमङ्गीकृतम्। "रस आत्मा" इत्यनेन काव्यमीमासाया राजशेखरेण स्वीकृतम्।

"अलङ्कारस्तु शोभायै रस आत्मा परं मनः।" इत्यादिना शब्दोदानीनामपि रसस्यात्मत्वमङ्गीकृतम्। प्राचीनैरलङ्कारमार्गप्रवर्तकैरपि काव्ये रसस्य प्राधान्यमुपवर्णितम्। यथा—

"युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक् ।" इति महाकाव्यलक्षणे भामहः ।

"कामं सर्वोऽप्यलङ्कारो रसमर्थे निषिञ्चति ।' इति दण्डी । "तस्मात्कर्त्तव्यं यत्नेन महीयसा रसैर्युतमि"ति रुद्रटः । तेन रस एव वस्तुत आत्मा । वस्त्वलङ्कारध्वनी तु सर्वथा रसं प्रति पर्य्यवस्येत इति वाच्यादुत्कृष्टौ तौ इत्यभिप्रायेण ध्वनिः काव्यस्यात्मा इति सामान्येनोक्तम् ।

'प्राथमिकानामभ्यासार्थिना यदि चित्रेण व्यवहारः । प्राप्तपरिणतीनां तु ध्वनिरेव काव्यमिति स्थितमेतत् ।' (ध्वन्यालोकलोचने)

अतो बहुभिरलङ्कारिकैः काव्ये रसस्य प्राधान्यमङ्गीकृतं, परं न केनापि प्राचीनालङ्कारिकेण काव्ये रसस्य प्राधान्यं प्रतिपादितम् । विश्वनाथकविराजेन साहित्यदर्पणे प्रथममेव ध्वनेः प्रकारविशेषस्य रसस्य काव्ये प्राधान्यमात्मत्वं च व्यवस्थापितम् ।

"एतच्च चित्रं कवीनां विशृङ्खलगिरा रसादितात्पर्य्यमपेक्ष्यैव काव्यप्रवृत्तिदर्शनादस्माभिः परिकल्पितम् । इदानीन्तनानां तु न्याय्ये काव्यनयव्यवस्थापने क्रियमाणे नास्त्येव ध्वनिव्यतिरिक्तः काव्यप्रकारः । यतः परिपाकवतां कवीनां रसादितात्पर्य्यविरहे व्यापार एव न शोभते ।" (ध्वन्यालोकः)

अतो विश्वनाथेन कविराजेन रसादितात्पर्यविरहात्काव्यस्य भेदोऽपि चित्राख्यो नैव परिकल्पितः । इयांस्तु विशेषो ग्रन्थस्यास्य ।

यद्यपि विश्वनाथकविराजस्य नाखिलाः प्रबन्धा अस्माभिरवलोकितास्तथापि विद्यते एतदेव प्रबन्धरत्नं यदतिभीषणेन समयपरिवर्त्तनकर्कचेन विदारितप्रायायामपि संस्कृतभाषाकल्पलतिकायामेकमात्रमप्यवशिष्टं समुद्भासयत्यशेषान् साहित्यानुशासनप्रबन्धान्, प्रत्याययति बुद्धिवैशद्यं सान्धिविग्रहिकमहापात्रस्य श्रीविश्वनाथकविराजस्यानुबोधयति च सौभाग्यं संस्कृतभाषायाः, प्रकाममानन्दयति च तदेकतानमनसः सुविमलयशसः कविप्रवरान् । यच्चैकमप्यनवरतं हृदयसन्निहितं संस्कृतभाषाया सम्यक् प्रवेशयेच्छात्रं प्रापयेत्प्रावीण्यं प्रकृतकठिनाया साहित्यचर्चायाम् ।

ततः किलास्य पूर्वजानामप्रतिहता पाण्डित्यशक्तिरप्रतिमा प्रतिभा निरुपमा च काव्यसम्पदनुमातुं शक्या । अयं किलात्मनः "कविराजः सान्धिविग्रहिकमहापात्र"श्चेत्युपाधिद्वयं प्रयुङ्क्ते । स चोपाधिरस्य काव्यमवलोक्य सुप्रीतमनसा त्रिकलिङ्गेश्वरेण प्रदायीति निश्चीयते । न किल कोऽप्यात्मन· स्वयमुपाधिं प्रयोक्तुं वाञ्छति । विशिष्टतरप्रदत्तस्यैव तस्य प्रयोगः प्रशंसास्पदत्वमवगमयति । अस्य पितुरपि सान्धिविग्रहिकमहापात्रोपाधि. परिदृश्यते ।

लब्धकविराजोपाधिस्त्वयं विश्वनाथो नूनमसामान्यः कविः । अस्मादेकस्मादेव ग्रन्थादस्य कविराजस्य व्याकरणे तथा न्यायशास्त्रे च समधिकः परिचय आसीदित्यनुमीयते ।

कविशिरोमणिना ह्येतेन साहित्यदर्पणस्य पञ्चमपरिच्छेदेऽनुमान एव व्यञ्जना-

ष्टतेमन्तर्भावयतां नैयायिकानां मतमनूद्य सम्यक् खण्डितम्। परिनिष्णाता मतिरस्य वेदान्तशास्त्रेऽपीति साहित्यदर्पणे तत्र तत्रोपन्यस्तैर्वेदान्तप्रबन्धवचनैरवगम्यते। यथा वेदान्तादिदर्शनेषु कविराजस्यास्य प्रवेशस्ततोऽपि समधिको नाट्यादिषु कलाशास्त्रेषु। तत्र साहित्यदर्पणमेव प्रमाणम्। तत्र च षष्ठपरिच्छेदे दृश्यकाव्यस्य लक्षणानि तदुपयोगीनि नाट्यालङ्कारादीनि सम्यक् निरूपितानि। यत्तु कैश्चित् साहित्यदर्पणे षष्ठ परिच्छेद श्रीधनञ्जयप्रणीतस्य दशरूपकस्य सङ्क्षिप्तोऽनुवाद इत्यभिधीयते, तदसत्। दशरूपकेऽप्रतिपादितानामपि विषयाणां तत्र स्फुट परिदृश्यमानत्वात्। तथाहि उपरूपकलक्षणानि दशरूपकेऽवर्त्तमानानि तत्र सप्रपञ्च निरूपितानि वर्त्तन्ते। किञ्च तत्रापि धनञ्जयस्य मत बहुश खण्डितम्। नान्दीलक्षणे चैतिह्यासिकरीत्या भरतमुनेराधुनिकाना च मत सम्यक् परिदर्शितम्।

अतोऽनेन "नाट्यशास्त्रदीक्षागुरु" इति पदवी समासादितेति चन्द्रकलाया उपलभ्यते। अलङ्कारशास्त्रे त्वस्य मति परामेव काष्ठामापन्ना। अलङ्कारग्रन्थाध्ययनेन चेह्य समालोकिता समालोचिताश्च। अलङ्कारशास्त्रपर्य्यालोचन चास्य पितृपितामहादिभि परम्परया कृतम्।

एवमनेकशास्त्रपरिनिष्णातपरिणतप्रतिभावत श्रीविश्वनाथस्यासामान्य भूषण कवि भाव। अय जयदेवकृष्णानन्दादिवत्सरसकोमलपदावलीविन्यासचतुर प्रसन्नवाग्वैभव श्रथितपाण्डित्यश्चासीदिति साहित्यदर्पणोदाहृतस्वकीयाशेषपद्यैरवबोद्धु शक्यम्।

भवन्ति किल भूयास पण्डिता ये तु एकामेव सस्कृतभाषा साकल्येनावबुध्यन्ते। विरलास्तु सस्कृतभाषापारङ्गमा ये च द्विना अपि अन्या भाषा समवगच्छन्ति। विशालमतिवैभवस्तु श्रीविश्वनाथकविराजो न केवला सस्कृतभाषा नापि वा द्विना अन्या भाषा परन्तु अष्टादशापि भाषास्तथा बुबोध यथा तासु तास्वपि भाषासु मनोहरान् भाषापाटवपरिचायकान् प्रबन्धान् निर्मातु प्रबभूव। अतएवासौ "अष्टादशभाषावारविलासिनीभुजङ्ग" इति जेगीयते विपश्चिद्भि।

"मञ्जुलमणिमञ्जीरे" एव च श्लोक सस्कृतप्राकृतसौरसेनीप्राच्यावन्तीनागरापभ्रशेषु एकविध एव। एवमप्येतत्पद्य प्रख्याययेत् कवेरस्य विविधासु भाषासु प्रावीण्यम्। प्रथम तावदनेकभाषावगम एव दुष्करस्तत्र पद्यप्रणयन, तत्र च सरसतापादनम्, तत्रापि एकस्यैव पद्यस्यानेकास्वपि भाषासु समानत्वम्। कविराजेनानेन प्रणीता प्रशस्तिरत्नावली षोडशभिर्भाषाभिरुपनिबद्धा।

एतेन प्रथमत काव्यनाटकादय संगृहीता। ततश्च साहित्यदर्पणो नाम शास्त्रीय प्रबन्ध। ततश्च काव्यप्रकाशस्य व्याख्यानम्। बहूनामेतत्प्रणीतानां काव्यप्रबन्धाना नामानि साहित्यदर्पणे उपलभ्यन्ते। एतत्प्रणीतेषु ग्रन्थेषु कतम कदा विरचित इति निश्चित्यावबोद्धु नास्ति किल कोऽप्युपाय तत्केवल नामत एव ते प्रबन्धा ऋषिकेभ्य समर्प्यन्ते।

१. प्रभावतीपरिणयम् (नाटकम्)
२. चन्द्रकला (नाटिका)
३. कुवलयाश्वचरितम् (प्राकृतकाव्यम्)
४. प्रशस्तिरत्नावली (षोडशाभिर्भाषाभिरुपनिबद्धं करम्भकम्)
५. राघवविलासः (महाकाव्यम्)
६. नरसिंहविजयः (खण्डकाव्यम्)
७. काव्यप्रकाशदर्पणः (काव्यप्रकाशटीका)
८. कंसवधम् (काव्यम्)

एतद्भिन्ना अपि ग्रन्थाः कविराजेन रचिता इति प्रतीयते। साहित्यदर्पणे बहुषु पद्येषु नोपलभ्यते नाम ग्रन्थस्य। केवलमिदं ममेत्यादिना स्वीयत्वेन निर्दिश्यन्ते पद्यानि। किन्तु महदिदं दौर्भाग्यं भारतवर्षस्य यदेतत्प्रणीता ग्रन्थाः कस्यापि देशहितबद्धादरस्य नयनसरणिमद्यापि नारूढाः।

कविराजस्यास्य पद्येषु रसानुगुणा शय्या, ललितानि प्रसन्नानि च पदानि, समुदारतरं कल्पनाजालम्, अतिपरिप्लुतो मनोहरो रसश्च सर्वत्र गोचरीभवति। किमधिकं, वर्शंवदैव समभूदेतस्य भगवती देवगवीत्युक्तिरपि नात्युक्तिदोषायेति दिक्। तदानीन्तनैरपि कविभिरसौ तथात्वेनैव प्रतिपन्नः। तदुक्तमनन्तदासेन लोचने—"यस्येमा प्रशस्तिमाचक्षते विचक्षणाः।

आः! किं कम्पमुरीकरोषि वसुधे घूरर्दितेवाऽभवत्
गोविन्देन तु नन्दमन्दिरकृतक्रीडावतारेण ते।
विख्यातः कविराजराज इति यः श्रीविश्वनाथः कृती
तस्याकर्ण्य गिरः शिरांसि भुजगाधीशो धुनीतेऽधुना॥"

साहित्यदर्पणस्य पञ्च प्राचीना व्याख्या दृश्यन्ते। अनन्तदासस्य लोचनम्, महेश्वरभट्टाचार्यस्य विज्ञप्रिया, रामचरणतर्कवागीशस्य टीका, गोपीनाथस्य प्रभा, तच्छिष्यस्य प्रभास्फूर्तिश्च। तासु तावद् रामचरणतर्कवागीशस्य व्याख्या प्रकाशिता वर्त्तते। अनन्तदासस्तु विश्वनाथकविराजस्य पुत्रो लोचनाख्यं व्याख्यानमकरोत्। तस्य लोचने बहुशो "यथा मम पितुः" इत्यादिना विश्वनाथकविराजस्य श्लोकानामुद्धारः कृतः। ग्रन्थावसाने च—

आस्तामनन्तकृतिना कृत एष धीरै-
रासाद्य तातचरणाम्बुरुहप्रसादम्।
आचन्द्रमातरणिकोविदवृन्दवन्द्यः
साहित्यदर्पणविवेकवचःप्रपञ्चः॥

श्रीविश्वनाथकविराजात्मजश्रीमदनन्तदासकृतौ इति कथनाद् विश्वनाथकविराजस्य पुत्रोऽनन्तदास इति ज्ञायते। एतद्व्यतिरिक्तं तु नातीव विस्तृताऽपि ग्रन्थावशेषविचारे

प्रौढिं प्रकटयति ग्रन्थं च सम्यग् योजयति। कवेरभिप्रायस्तु यथार्थतो ज्ञायतेऽस्माद् व्याख्यानात्। एतद् व्याख्यानमतीव सुबोधम्। अतस्तु "लोचनेन विहीनस्य दर्पणः किं करिष्यति" इति प्रवादस्यार्थं लोचनाख्यव्याख्यानपरतया योजयन्ति प्राचीना विद्वांसः। अनन्तदासेन ध्वन्यालोके लोचनव्याख्यानवत् साहित्यदर्पणस्य लोचनाभिधं व्याख्यानं रचितम्। अनन्तदासस्य भानुदेवप्रशस्त्या स चतुर्दशशताब्द्या मध्यभागे आसीदिति प्रागेव प्रतिपादितम्। पञ्चानां तालीपत्रपुस्तकानां साहचर्य्येण मया व्याख्यानस्यैतस्य मूलशुद्धिर्विहिता।

तर्कालङ्कारमहेश्वरभट्टाचार्यस्य विज्ञप्रिया टिप्पणी तु अतीव विस्तृता। काव्यप्रकाशपक्षपातिनानेन सम्यग् ग्रन्थार्थं प्रकटय्य बहुषु स्थलेषु काव्यप्रकाशस्य मतं समर्थितम्। परं ग्रन्थस्यालोचनं सम्यक् कृतम्। अस्य भाषा तु सुबोध्या। अनेन काव्यप्रकाशस्यापि व्याख्यानं कृतम्। षष्ठपरिच्छेदे स्वस्य ग्रन्थस्य नामोल्लेखादयमपि तारावतीचन्द्रशेखरनाटकस्य कर्त्ता। साहित्यदर्पणस्यापि बह्वोऽशा दुर्बोधाः संवृत्ताः। अतोऽत्र मया प्राचीनं व्याख्यानद्वयं समावेशितम्। तयोः साहचर्य्येण सर्वं तावत् छात्राणामपि सुबोध्यं भविष्यति। विज्ञप्रियाव्याख्यानस्य प्रयोजनं ग्रन्थावसाने सम्यक् प्रतिपादितं महेश्वरभट्टाचार्य्येण यथा—

सुश्लिष्टसंस्कृतवशेन सुखाधिरोहा
वैषम्यदुस्तरतरङ्गविभेददक्षा।
साहित्यदर्पणमहार्णवमुत्तरीतुं
टीकेयमस्ति तरणिर्न बिभीत धीराः॥
दर्पणे प्रतिबिम्बन्ते पदार्था इति नाद्भुतम्।
चित्रं ममैतद् व्याख्याने दर्पणः प्रतिबिम्बते॥

व्याख्यानकारेण व्याख्यानस्य यादृशी प्रौढिर्दर्शिता व्याख्याने तादृशी प्रौढिर्यथार्थतो वर्त्तते। तत्सर्वं पाठात् परतः सुधीभिरवधारणीयम्। एतस्य व्याख्यानकर्त्तुः कालनिर्णयः कर्त्तुं नैव शक्यते। परमसौ रामचरणात्प्राचीन एव। रामचरणेन प्रथमपरिच्छेदे केचित्तु (१२ पृ) इत्यादिना महेश्वरस्य व्याख्यानमुद्धृत्य दूषितम्। रामचरणेन १७०१ खीष्टाब्दे व्याख्या कृतेति ग्रन्थान्तिमश्लोके लिखितम्। उदाहरणचन्द्रिकाकारेण वैद्यनाथेन नाम्ना महेश्वरमुल्लिख्य तत्कृतात् काव्यप्रकाशदर्पणाद् बहुशस्तस्य मतमुद्धृत्य निराकृतम्। वैद्यनाथेन "वियद्वेदमुनिक्ष्माभिर्मिते' १७४० विक्रमाब्दे १६८४ खीष्टाब्दे उदाहरणचन्द्रिका रचिता। अतस्तर्कालङ्कारो महेश्वरभट्टाचार्यः सप्तदशशताब्द्या मध्यभागे आसीदिति प्रतीयते। माहेश्वरस्य व्याख्यानस्य चतुर्णां पुस्तकानां साहचर्य्येण संशुद्धिर्विहिता।

मयाप्यत्र दुर्बोधेषु स्थलेषु बोधोदयाय संक्षेपेणैव टिप्पणी दत्ता। साहित्यदर्पणस्य मुद्रितपुस्तकेषु बह्वोऽपपाठा आसन्। यथा—दशमपरिच्छेदे अस्वरसोत्थापिता भ्रान्तिर्नायमलङ्कार इति पाठो दृश्यते।

परं स्वरसोत्थापिता इति भवितुमुचितम्। रामचरणेनापि स्वाभाविकीति तस्य व्याख्यानात्। "न स्वरसोत्थापिता शुक्तिकारजतवत्' अलङ्कारसूत्राद्।

"अनेन लोकगुरुणा सतां धर्मोपदेशिना।
अहं मतवती स्वैरमुक्तेन किमतः परम्॥"

अत्र प्रतीयमानोऽपि शाक्यमुनेस्तिर्यग्योपिति बलात्कारोपभोग इति पाठे मुद्रितपुस्तकेषु, परं तैर्थिकयोपीति इति भवितुमुचितम्। उत्प्रेक्षायामपि—

'पर्य्यवसाने तु जलधितीरे शैवलस्थितेः। सम्भावनानुपपत्तेः सम्भावनोत्थानमित्युत्प्रेक्षा॥'

अत्र सम्भवोपपत्तेरिति भवितुं युक्तम्। कारणं विज्ञप्रियायां द्रष्टव्यम्। 'तथाप्युपमानस्य प्रकृते उत्प्रेक्षायां पर्य्यवसानम्' इत्यलङ्कारसर्वस्वेऽपि दर्शनात्।

षष्ठपरिच्छेदे—'यः सामान्यगुणोद्रेकः स गुणातिशयो मतः' एवं पाठो दृश्यते—परं 'योऽसामान्यगुणोद्रेकः स गुणातिशयो मतः', इति भवितुमर्हति।

'दृशादीनां भवेद् भ्रंशो वाच्यादन्यतरद् वचः'एवं मुद्रितपुस्तकपाठस्तु व्याकरणविरुद्धः। अतो 'वाच्यादन्यच्च यद् वचः' इति भवितुं युक्तम्। निश्चयालङ्कारे—

'एककोव्यनधिके ज्ञाने तथा समीपगमनासम्भवाद्'इत्यत्र 'एककोव्यनधिके ज्ञाने तथा समीपगमनसम्भवादि'ति भवितुं युक्तम्।

अभेदे भेदाध्यवसायमूलातिशयोक्तौ—'तत्रापि ह्यन्यदेवाङ्गलावण्यमन्यत्वेनाध्यवसीयते' एवं पाठः सर्वत्र दृश्यते। अत्रापपाठस्तु पठनादेवावगम्यते—'तत्रापि ह्यनन्यदेवाङ्गलावण्यमन्यत्वेनाध्यवसीयते' इत्येव भवितुमुचितम्।

ततोऽयमतीव दुर्बोधः सञ्जातः। टीकाकारयोः पाठसाहचर्येण प्राचीनानां दशानां पुस्तकानामपि साहचर्येण मूलपाठस्तु यथार्थत उद्धृतोऽत्र मया। परिशेषे च विज्ञाप्यते, शास्त्रान्तरापेक्षया प्रतिभाप्रतिभातसाहित्यशास्त्रविच्छित्तिरनेकरूपत्वात् स्वरूपतो ह्यनिर्वचनीया। तत्र एव प्रतिविषयं विप्रतिपद्यन्ते स्म प्रतिभानवन्तोऽपि सूरिशिरोमणयः किमुत पुनरधुनातनानां पूर्वाचार्यपरिशीलितपथपथिकजनानामस्मादृशाम्। सम्प्रति तु यथास्थितविषयाणां केवलसङ्गतिपुरःसरलक्ष्यसमन्वयाय विज्ञमनीषाऽत्र भ्राम्यति भ्राम्यति च। का कथा पुनरत्र स्वमतिगवेषणयाऽदृष्टाज्ञाताथपरिस्फुटेन।

अतोऽहं यथाशक्ति स्वविवेकेन पुरातनीं प्रकृतार्थसंयोजिनीं टीकाद्वयीं लक्ष्यसङ्गतिदृष्ट्या संशोध्य दुर्बोधस्थलेषु व्यक्तार्थेषु पाठकानां सुबोधायैव स्वकृतटिप्पणीं संयोज्य सहृदयकाव्यविदा पुरत उपस्थापयामि। चिरत्नरत्नद्वयसमुद्धरणाय मत्कृतोऽयं श्रमस्तदेषिणामन्तरात्मानमानन्दयिष्यतीति जागर्त्ति मे परमाऽऽशा न पुनरात्मन आलङ्कारिकत्वाभिमानधिया नवतया ग्रन्थस्यास्य प्रकाशनपराग्रहः। यदीतः सहृदयाः पाठकसूरयः पूर्वप्रकाशितग्रन्थान्तरापेक्षया कियतीमप्युपकृतिमुपलप्स्यन्ते तदात्मश्रमं सफलं संमंस्य इति शम्।

श्रीः

श्रीमद्विश्वनाथकविराजप्रणीतः

साहित्यदर्पणः ।

प्रथमः परिच्छेदः ।

ग्रन्थारम्भे निर्विघ्नेन प्रारिप्सितपरिसमाप्तिकामो वाङ्मयाधिकृततया[1] वाग्देवतायाः साम्मुख्यमाधत्ते—(क, अ) * ।

अविघ्नमस्तु ।

(वि, क) वीक्ष्य कौस्तुभगतं निजबिम्बं ह्रद्गतान्यवनिताजनबुद्ध्या ।
मानमाश्रितवतीं निजकान्तां चिन्तयाम्यनुनयन्तमनन्तम् ॥ १ ॥
दृष्ट्वा भूरितरध्वनिप्रभृतिकालङ्कारशास्त्रं मुहु-
स्तन्मूलन्च विसृष्टमर्थमखिलं काव्यप्रकाशस्य च ।
साहित्योत्तरदर्पणं विशदयञ्जानन्दयन् सज्जनान्
भट्टाचार्य्यमहेश्वरो वितनुते विज्ञप्रियां टिप्पणीम् ॥ २ ॥

शरदिन्दित्यादि स्वीयश्लोकं व्याख्यातुत्थापयति—**ग्रन्थारम्भ** इति । ग्रन्थस्य प्रकृत-ग्रन्थस्य साहित्यदर्पणाख्यस्य, आरम्भे आरम्भकाले, वाग्देवताया. साम्मुख्यमानु-

---

विघ्नेश्वराय नमः ।

(ख, अ) प्रणमामि परां देवीं मूलाधारकृतोदयाम् ।
यद्विवर्त्तमिदं कृत्स्नं प्रपञ्चं परिचक्षते ॥ १ ॥
आसीत् वणिजकुलक्षीराब्धिपारचन्द्रमाः
त्रिकलिङ्गाधिपधराधामधीसचिवः कृती ॥ २ ॥

---

* अङ्गसक्तविचित्रभूषणततिस्त्रैलोक्यरक्षातति-
र्वेदीवेश्मविनोदविस्तृततातिर्देवेन्द्रदत्तानतिः ।
इन्द्रद्युम्नकृपाविभाविनमतिर्भक्तौघगीतस्तुति-
र्भूयाद् भासुरनन्दिघोषवसतिर्लक्ष्मीपतिर्वो गतिः ॥

1 वाग्मयाधिकृतायाः (क) ।

शरदिन्दुसुन्दररुचिश्चेतसि सा मे गिरां देवी ।
अपहृत्य तम सन्ततमर्थानखिलान् प्रकाशयतु ॥१॥ (स, आ)

कुन्थमाधत्त जनयतात्यर्थ । अत्र ग्रन्थकृदेव कर्त्ता बोध्य । आरम्भकालस्य स्थूलत्वाद् योग्यतावशात् तत्पूर्वकारो एव मान्मुख्याधान वाच्यम्। न च श्लोके मान्मुख्याधानबोधका भावात् कथमिदमाभाषितमिति वाच्यम्, शरदिन्दित्यादि तत्सौन्दर्यकथनरूपस्तुत्या स्वचेतसि तमोनाशाऽर्थप्रकाशनप्रार्थनया च तल्लाभात्, स्तुतस्यानुकूलत्वनियमात् तदानुकूल्य प्रत्येवाभीष्टप्रार्थनाच्च । चेतस्यर्थप्रकाशे सत्यपि विघ्नाद् ग्रन्थस्य समाप्तिर्न भवतीत्यतो निर्विघ्नपरिसमाप्तिरपि तत्सान्मुख्यात् कामनीयेत्यत आह-**निर्विघ्नेनेति** । समाप्तिमात्रस्य लौकिककारणाधीनत्वेऽपि तद्विघ्नविघाता देवतानुकूल्यादेवेति विघ्नाभावविशिष्टसमाप्तिकामनयापि विघ्नाभावरूपावशेषणाशा विषयीक्रियते अहं सुखी स्यामिति कामनया सुखाश इव। प्रारिप्सितग्रन्थपरिसमाप्तिरूपे फलेऽन्यदेवतापेक्षया तस्या शीघ्रकारित्वप्रतिपादनाय तद्विशेषणमाह-**वाङ्मयेति**-स्वार्थे मयट्। वागधिकृताया इत्यर्थ । वस्तुतस्तु वाङ्मयाधिकृतनमेति प्रामाणिक पाठ । तथा च वाङ्मयस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तिरूप फल वागधिकारिण्या शाघ्र दातु शक्यमेवेति दर्शितम् ।

(वि,ख) **शरदिन्दित्यादि**। शरदिन्दुवत् सुन्दररुचि , सा प्रसिद्धा गिरा देवी सर

अशेषभाषारमणीभुजङ्ग साहित्यविद्यार्णवपारदृश्वा ।
धन्यध्वनिप्रौढधिया पुरोग श्रीविश्वनाथ कविचक्रवर्त्ती ॥ ३ ॥
स्वल्पाक्षर सुबोधार्थ प्रध्वस्ताशयदूषण ।
साहित्यदर्पणो नाम ग्रन्थस्तेन विनिर्मित ॥ ४ ॥
पार साहित्यविद्याब्धेर्गन्तु वाञ्छन्ति ये क्षितौ ।
कृतिरेषा तरिस्तेषा विश्वनाथमहाकवे ॥ ५ ॥
श्रव्याभिनेयालङ्कारतत्त्व सत्कविसम्मतम् ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥ ६ ॥
अस्य सत्कविवाग्गुम्फभावानो कृतिना मुदे ।
मया विधीयते चैका दुर्वाधार्थ-प्रबोधिनी ॥ ७ ॥

इह खलु सूत्राणामेवार्थं वृत्त्या विशदीकुर्वन् ग्रन्थादौ विघ्नविघाताय अविगीतसदाचारपरम्पराप्राप्ततया स्वाभीष्टदेवताराधनेन सम्मुखीकरणसूचिका कारिकामवतारयति-**ग्रन्थेति** । विघ्न प्रतिबन्धकदुरितसद्भाव प्रवर्त्तकसुकृतविरहो वा, तस्य अभाव -निर्विघ्नम् अव्ययीभाव । प्रारिप्सित प्रारब्धुमिष्ट दृश्यश्रव्यकाव्यनिरूपक प्रमेयजातम्, तस्य परिसमाप्तिर्यावद् विवक्षितार्थस्यास्खलनपूर्वक समापनम् । **वाङ्मयेत्यनेन** स्वशास्त्रविधेयत्वार्थमवदातृतया ब्रह्मादिदेवाराध्यत्वेन भगवत्या ग्रन्थनार्थानर्हत्व सूचितम् । देवतेत्यनेन जडरूप वाङ्मात्रवैलक्षण्येन तदधिष्ठातृत्व सूचितम् ।

(लो, आ) **शरदी यादि**-शरदिन्दुसुन्दररुचिरेव शरदिन्दो सुन्दररुचिरित्यध्य-

अस्य ग्रन्थस्य काव्याङ्गतया काव्यफलैरेव फलवत्त्वमिति काव्यफलान्याह—

चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्-स्वरूपं निरूप्यते ॥ २ ॥

चतुर्वर्गफलप्राप्तिर्हि काव्यतो रामादिवत् प्रवर्त्तितव्यं, न रावणादिवदित्यादिरूपाकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण + सुप्रतीतेन ॥ (ग, इ)

स्वती, मे मम चेतसि सन्तत विस्तृत, तम तमस्तुल्यमज्ञानम्, अपहृत्य, अखिलान् मया वक्ष्यमाणान् अर्थान् प्रकाशयत्विन्यर्थ । अत्रायें पादे लुप्तोपमामाहित्या शरदिन्दोरपि सुन्दरत्वचेत्व सन्तत तम पदार्थान्धकारनाशकत्व षटपदार्थाखिलार्थप्रकाशकत्व च सिद्धयति। तथा च एभि साधर्म्यै शरदिन्दुगार्देव्योरुपमानोपमेयभाव इति बोध्यम् ।

(वि, ग) काव्याङ्गतयेति—काव्यविचारकत्वेन तदङ्गता। चतुर्वर्गा धर्मार्थकाम मोक्षा , तद्रूपस्य फलस्य प्राप्तिरित्यर्थ । काव्यस्य चतुर्वर्गफलप्रापकत्व दर्शयति- **रामादिवदिति। प्रवृत्तिनिवृत्त्युपदेशद्वारेणेति**–प्रवृत्त्युपदेशेन प्रवृत्तस्य धर्मोत्पत्ति साक्षादेव, निवृत्त्युपदेशेन निवृत्तस्य धर्मोत्पत्ति प्रतिबन्धदुरितानुत्पत्त्या च, द्वेधापि तेषा प्रापकत्वम् । प्रवृत्तिजन्यधर्मोत्ति साक्षादेवार्थादय ।

वसाना । सेति तच्छब्दाच्चतुराननादिवाग्भेभवादिदासतया प्रसिद्धा । तमोऽज्ञानमन्ध कारश्च, अर्थान्-विवक्षितप्रमेयान् षटपदार्थश्च ।

(लो,इ) "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते" इति निबध्यमानकाव्यपरीक्षाशास्त्रस्य प्रयोजने वक्तव्ये "अग्निर्न फलेनैवाङ्गस्य फलवत्ता"इति न्यायात् उक्ता काव्य फलप्रतिपादिका द्वितीयकारिकामवतारयति–**अस्येति** । काव्याङ्गत्वं काव्यपरीक्षाशास्त्रत्वात् । चत्वारो वर्गा धर्मार्थकाममोक्षा । कृत्याकृत्यप्रवृत्तीत्यनेन काव्यस्य शास्त्रत्व प्रदर्शितम् । यदाहु

"प्रवृत्तेर्वा निवृत्तेर्वा नित्येन कृतकेन वा ।
पुसा येनोपदिश्येत तच्छास्त्रमिति कथ्यते ॥

ननु कथ कविनोत्पादितेतिवृत्तानां मालतीमाधवरत्नावलीमृच्छकटिकादीना

---

* यथा दर्शपौर्णमासाङ्गाना प्रयाजादीना दर्शपौर्णमासफलेनैव फलवत्त्व तथा काव्याङ्गस्य काव्यपरीक्षाशास्त्रस्यास्य काव्यफलैरेव फलवत्त्वमिति भाव ।

धर्मादर्थोऽर्थत काम कामात् सुखफलोदय ।

+ कृत्ये प्रवृत्ति अकृत्याच्च निवृत्ति –रामादिवत् प्रवर्त्तितव्य (पितृभक्त्यादौ) न रावणादिवत् प्रवर्त्तितव्य (परदारहरणादिषु) इत्युपदेश च यथायोग कवे सहृदयस्य च करोति । (काव्यप्र)

उक्तं च[1]—"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥" इति ।

किंच । काव्याद्धर्मप्राप्तिर्भगवन्नारायणचरणारविन्दस्तवादिना, 'एकः शब्दः सुप्रयुक्तः सम्यग्[2] ज्ञातः स्वर्गे लोके[3] कामधुग् भवति' इत्यादिवेदवाक्येभ्यश्च सुप्रसिद्धैव । अर्थप्राप्तिश्च प्रत्यक्षसिद्धा । कामप्राप्तिश्चार्थद्वारैव[4] । मोक्षप्राप्तिश्चैतज्जन्यधर्मफलाननुसन्धानात्, मोक्षोपयोगिवाक्ये व्युत्पत्त्याधायकत्वाच्च । (घ, ङ) +।

(वि, घ) कला वैदग्ध्यं, वैचक्षण्यं तत्र प्रवर्त्तकं ज्ञानं प्रवृत्त्युपदेशात्, एतज्जन्यफलाननुसन्धानादिति—तत्र फलं कामप्राप्तियोगाभ्यासश्च, व्युत्पत्त्याधायकत्वादिति—

स्वाभिधेयेषु प्रमाणत्वम् ? नचाप्रमाणरूपस्य शब्दस्य शास्त्रत्वमिति चेदाह—

"सुविदग्धप्रमा काव्यं प्रमाणं सर्वमेव नः ।
स्वप्रकाशरसास्वादप्रमितिप्रभवं यतः" ॥ इति ।

ननु प्रकारभेदा प्रहेलिका व्यङ्ग्यार्थविशिष्टा नीरसा वाक्यविशेषाः । यथा—

के दारपोषणरता का शीतलाम्बुवाहिनी गङ्गा ।
कं मंजघान कृष्णः क बलवन्तं न बाधते शीतम्" इति ।

अत्र हि प्रश्नरूपोऽर्थो वाच्यः, उत्तररूपश्च व्यङ्ग्यः । तथाविनिबद्धविभावादिज्ञानस्य वाप्यारोपितधूमज्ञानादेस्तात्त्विकधूमध्वजादिज्ञापकत्ववत्— रसप्रमित्यनुपपादकत्वमिति चेत्तत्राप्याह—

"शरीरादिविविक्तात्मतत्त्वभावनया यथा ।
तत्त्वतोऽप्रमयास्पृष्ट-तत्त्वसाक्षात्कृतिः प्रमा ॥
असत्यमुल्लिखन्त्याऽपि विभावादिधियाऽमुया ।
तद्वदेव रसादीनां व्यक्तिः प्रकरणादिषु" ॥ इति ।

+ फलस्य अननुसन्धानात्—अभिलाषाभावात्, निष्कामेण क्रियमाणं कर्म मोक्षाय कल्पते, "तद् यथेह कर्मचितो लोकः क्षीयते एवमेवाऽमुत्र पुण्यचितो लोकः क्षीयते ।" (छान्द. उप)

छन्दोव्याकरणकलालोकस्थितिपदपदार्थविज्ञानात् ।
युक्तायुक्तविवेकाद् व्युत्पत्तिरियं समासेन ॥ (रुद्रट)

1 सपुस्तके नास्ति ।
2 सुज्ञातः (गपुस्तके) ।
3 च (घपुस्तके)
4 द्वारेणैव (कपुस्तके) ।

चतुर्वर्गफलप्राप्तिर्हि[1] वेदशास्त्रेभ्यो नीरसतया दुःखादेव परिणतबुद्धीनामेव जायते। परमानन्द-सन्दोहजनकतया सुखादेव सुकुमारबुद्धीनामपि पुनः काव्यादेव। (ङ, उ) +।

काव्यस्यसस्कृतदर्शनाद् व्युत्पत्ते। एतानि च फलानि काव्यविशेषाणामेव। तथा च समस्तकाव्यप्रयोजनम्–"काव्यं यशसेऽर्थकृते" इति यत् काव्यप्रकाशकारेणोक्तं तच्च "करोति कीर्तिं प्रीतिं च" इत्यनेवोक्तम्, समस्तकाव्यफलेन तेनैवास्य फलवत्त्वं बोध्यम्,

(वि, ङ) ननु चतुर्वर्गफलसाधके वेदशास्त्रे सति किमर्थं लोके काव्ये प्रवर्त्तताभित्यत आह–**चतुर्वर्गफलप्राप्तिरिति**।

इह च न्यायोऽयमन्वाचय, प्रकरणादि प्रमाण रसास्वादजनकत्वात् काव्यत्वाद् वा, यदेवं तदेव, यथा रामायणादि, तथा चेद, तस्मात्तथेति। न यदेव न तदेव यथा प्रहेलिकेति। ननु रसरूपप्रमाणत्वेपि प्रकरणादे रत्यास्वादानन्तरमसद्भूतत्वेनार्थानर्थोपदर्शनाभावाद्धिताहितप्रवृत्तिनिवृत्तिकारित्वप्रयोजित कथ हि शास्त्रत्वमिति न वाच्यम्। तथा हि–

"लोकप्रसिद्धो व्युत्पादो नाटकाद्यवलोकनात्।
कार्यदर्शनतस्तस्यानुगुणा हेतुकल्पना"

इति न्यायेन सत्यासत्यत्व वर्णनावलात्॥

"स्फुरता, तेन वृत्तेन व्युत्पत्तिर्नीयते नृणाम्।
सत्यामसत्यत्वजिज्ञासा रसादेश्चरितेष्वपि॥
व्युत्पत्तिकालेनैवास्ति तया पाश्चात्यया त्वलम्।
"काकोऽस्ति वाटिकामध्ये" इति बालविभीषिका॥
स्वार्थप्रामाण्यहीनोऽपि न किं व्युत्पत्तिसाधनम्।
रसस्य ज्ञानरूपत्व तादात्म्यादिति वक्ष्यते॥
नचाप्रमाणज्ञान शुक्तौ रजतधीरिव।
तस्मिन् न जायते बाधो यस्मादुत्तरकालिक,"॥

(लो, ई) सुप्रयुक्त व्याकरणाविरोधेनोक्त। मोक्षोपयोगिवाक्य श्रुत्यादि। तत्र व्युत्पत्त्याधायकत्व पदपदार्थसम्बन्धबोधकत्वात्।

(लो, उ) सुखादित्यादि विवृणोति–**चतुर्वर्गेति**। परमानन्दो रसादिरूप तत्सन्दोहो विगलितवेद्यान्तररसततिस्तज्जनकत्वायुपचारात्। सुकुमारमतय सुखैकप्रवणा राजपुत्रप्रभृतय। परिणतबुद्धय श्रुत्याद्यभ्यासलब्धप्रज्ञा।

(+ —यथा वेदशास्त्रपुराणादेर्हितप्राप्तिरहितनिवृत्तिश्च तथा तदाश्रयात् काव्यादपि। इयान् विशेष —काव्यान् कर्त्तव्यताधी रसस्य अन्यत्र न तथा। (प्रतापरुद्रीय))

[1] चतुर्वर्गप्राप्तिर्हि (रघुनाथके)

ननु तर्हि परिणतबुद्धिभि सत्सु वेदशास्त्रेषु किमिति[1] काव्ये यत्न करणीय इत्यपि न वक्तव्यम्। कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिण सितशर्कराप्रवृत्ति साधीयसी न स्यात्। *

किंच—'काव्यस्योपादेयत्वमग्नि पुराणेऽप्युक्तम्—

नरत्व दुर्लभ लोके विद्या तत्र सुदुर्लभा।
कवित्व दुर्लभ तत्र शक्तिस्तत्र सुदुर्लभा॥' इति + (ऊ)

'त्रिवर्गसाधन नाट्यम्' § इति च। विष्णुपुराणेऽपि [3]—

'काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च।
शब्दमूर्त्तिधरस्यैते विष्णोरशा महात्मन' इति।

तेन हेतुना तस्य काव्यस्वरूप निरूप्यते। एव[4] चाभिधेय च प्रदर्शितम्। (च० ऊ) ×

(वि, च) एव चाभिधेय चेति। निरूपणार्थं काव्यस्य एतद्ग्रन्थाभिधेयत्वात्।

(लो, ऊ) शाक्त कारणत्वरूप सस्कारविशेष या विना काव्य न प्रसरेत्, प्रसृत वा उपहसनीय स्यात्। नाट्यमभिनेय नाटकादि।

---

*—ननु इति—ये शुद्धसारमतयोऽतिसुखस्वभावा रामकुमारादय नीरसे नातिशास्त्रे प्रवर्तयितुमशक्यास्तान् काव्य कान्तेव सरसतापादनेनाऽभिमुखीकृत्य उपदेश ग्राह्यति—गुडजिह्विकया शिशूनिवौषधम्। (प्रदीप)

यथा सुस्वादुद्रव्येण रोगप्रतीकारसम्भवे रोगिण कटुभेषजमपहाय सुस्वादु द्रव्यमेव भोक्तु प्रवर्तन्ते तथा सत्र नीरसदुर्बोधतया वेदादिशास्त्रमपहाय सरसतया काव्येषु प्रवर्त्तन्ते।

स्वादुकाव्यरसोन्मिश्र काव्यशास्त्र च भुञ्जते।
प्रथमालीढमधव पिबन्ति कटु भेषजम्॥

+—शक्ति-प्रतिभेत्यपरैरुदिता।
मनास सदा सुरसाधिनि विस्फुरणमनेकधाऽभिधेयस्य।
अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्ति॥ (रुद्र)
काव्यघटनानुकूलशब्दार्थोपस्थिति। (जगन्नाथ)

§—तौर्य्यत्रिक नृत्यगीतवाद्य नाट्यमिद त्रयम्। (अमर)

×—स्वरूप-स्व लक्ष्यपदार्थ रूप्यते लक्ष्यतेऽनेनेति व्युत्पत्त्या स्वरूप लक्षणमित्यर्थ।

1 काव्यषु किमिति यत्न (सपु)
2 आग्नेयपुराण (सपुस्तके)
3 'आप'—इति क्षत्रपुस्तकयोर्नास्ति
4 एतेनाभिधेय च (स, ग, ङ, च, पु) "च" सपुस्तके।

तत् किं स्वरूपं तावत् काव्यमित्यपेक्षायां कश्चिदाह[1]–"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि", इति । एतच्चिन्त्यम् । (छ, ऊ)

तथा हि—यदि दोषरहितस्यैव काव्यत्वाङ्गीकारस्तदा[2]—

'न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापस
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
धिग् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनपटुर्धोच्छ्वासैः किमेभिर्भुजैः ॥ इति[3] (ज, झ)*

(वि, छ) कश्चिदिति काव्यप्रकाशकार इत्यर्थः ।

(वि,ज) न्यक्कारो ह्ययमेवेति–श्रीरामाक्रान्तलङ्कस्य रावणस्य विषादोक्तिरियम् ,

---

काव्यपरीक्षणं दिदर्शयिषुः प्राचीनकाव्यलक्षणेषु प्रमेयविरोधं दर्शयन्नाह– तत् किं स्वरूपमित्याह–" **तददोषौ** "इति काव्यम्, दोषाः श्रुतिकष्टत्वादयः, गुणाः माधुर्यादयः, क्वाप्यनलङ्कृतीत्यनेन सर्वत्र सालङ्कारौ शब्दार्थौ काव्यम्, क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिरिति ।

(लो, ञ) न्यक्कार इति–एतद्रामभद्रेणाभिभूयमानस्य रावणस्य निर्वेदवाक्यम् । क्षुद्रो ग्रामो ग्रामटिका । विलुण्ठनं विधूननम् ।

अभिधेय विषय , तेन अनुबन्धचतुष्टय कथितम्—

"तत्रानुबन्धो नामाऽधिकारिविषयसम्बन्धप्रयोजनानि" । (वेदान्तसार)

प्रयोजनम् प्राक् प्रदर्शितम् , अधुना विषय प्रदर्श्यते। सम्बन्धस्तावत् विषयप्रयोजनयो कार्यकारणभावरूप साक्षादायाति ।

(*'मम अस्य इति बहुवचनेन शत्रुमद्भावो ममानुचित इति सम्बन्धानौचित्य क्रोधविभावो व्यज्यते , तपो विद्यते यस्येति पौरुषकथाहीनत्व तद्धितेन मत्वर्थीयेन अभिव्यक्तम् , तत्र अपिशब्देन निपातसमुदायेन तापसस्य सत शत्रुताया अत्यन्तासम्भाव्यमानत्वमभिव्यक्तम् , मत्कर्तृका यदि जीवनक्रिया तदा हननक्रिया तावदनुचिता तस्या च स कर्ता , अपिशब्देन मानुषमात्रक , अत्रैवेति मदधिष्ठितो देशोऽधिकरणम् , विलुण्ठनशब्दे विशब्दस्य उपसर्गस्य निर्दयावस्कन्दव्यञ्जकत्व वृथाशब्देन स्वात्मपौरुषनिन्दा व्यज्यते, भुजैरिति बहुवचनेन प्रत्युत भारमात्रमेतत् इति व्यज्यते,)(हेमचन्द्र काव्यानु०)

1 "आह" इति (क,गपुस्तकयोर्नास्ति) ,

2 "काव्यत्व तदा" इति (गपुस्तके)

3 "इति" इति (खचपुस्तकयोर्नास्ति)

अस्य श्लोकस्य विधेयाविमर्शदोषदुष्टतया काव्यत्व न स्यात्। प्रत्युत ध्वनित्वेनोत्तमकाव्यतास्याङ्गीकृता। तस्मादव्याप्तिर्लक्षणदोष । (झ, ञ)

मे यदस्य अयमेव न्यक्कार। तपस्विभक्तस्य मम एकस्यापसोऽरीरिरिति, अत्यन्तन्यक्कारत्वात्, आस्तां सोऽपि मिन्धोरुदीचीतीरे खरदूषणादिहन्ता, सोऽप्यत्रैव निहन्ति राक्षसकुलमस्तु द्विनिराक्षसान्। अहो आश्चर्यमेव न्यक्कारोऽपि रावणो जीवतीति। भवतु वा मम दैवस्य प्रातिकूल्यादेव शक्रस्य जेतारम् अर्थात् मेघनाद मम पुत्र धिक् धिक्, तथा प्रबोधितवन्त प्रबोधत प्रबोध तद्गता भावक्रान्तत्वेन प्रबोधवता कुम्भकर्णन वा किं फलमित्यर्थ। नत्वन क्तवतु, तस्य कर्मरूपनभिधानात्, तथा मम भुजैर्वापि किम्? कीदृशै, मम विलुण्ठने स्वर्गोऽपि ग्रामटिका स्वल्पग्राम, तद्विलुण्ठनेन वृथोच्छूनै निष्फलमुद्भटै।

(वि, झ) विधेयाविमर्शेति—विधेयस्य न्यक्कारस्योद्देश्यादरिमत्त्वात् पूर्वनिपातात् "अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत् इति नियमात्। अनुभवबलादेष नियम। काव्यत्व न स्यादिति—नन्विष्टापत्तिरित्यत्त आह—अत्युतेति। अङ्गीकृतेति सर्वत्रेति शेष। न केवल काव्यप्रकाशकृता, पर सर्व। काव्यप्रकाशकृता काव्यप्रकाशे, "इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधै कथित" इत्यनेन लक्षणेन ध्वनियुक्तत्वादस्य उत्तम काव्यत्वस्वीकारात्, तस्मादव्याप्तिदोष इति—अत्र दोषसामान्याभावो लक्षणघटक इति तदभिप्रायमुन्नीय इदमुक्तम्, तस्य तु शाब्दबोधविघटकदोषसामान्याभाव एवाभिप्राय। अन्यथा "तथाभूता दृष्ट्वा नृपसदसि पाञ्चालतनयाम्" इत्यादिश्लोक काकुसहकृतध्वन्युदाहरणतयोक्त्वा कथ तेनैव न्यूनपदत्वदोषे उदाहृत। कथ वा "हृतमनु मन दृष्ट वा यैरिद गुरुपातरम इत्यादिश्लोक रौद्ररसोदाहरणत्वेनोक्त्वाऽपि पुनरुक्तदोषत्वे उदाहृत। तस्मादव्याप्तिप्रदर्शन तदभिप्रायानवधानादेव।

(लो, ञ) विधेयाविमर्शाऽविमृष्टविधेयांश। वृथोच्छूनैरित्यत्र भुजानामुच्छूनतया वृथात्वस्य तत्कालमानजातत्वाभिप्रायेण विधेयता नेतुमुचितस्य तत्पुरुषसमासेन कविना गुणीभाव नीततया पूर्वसिद्धत्वात् अनुवाद्यत्व च प्रतीतेरिति विधेयस्य प्राधान्येनाऽविमर्श, अनिर्देश। अस्य श्लोकस्याङ्गीकृता पूर्वाचार्यैरिति शेष। ध्वनित्व ह्यत्र प्रतिपदमेवावभासते। तथा हि अयमेवेत्यन्ययोगव्यवच्छेदसूचकस्य एवकारस्य, मे इति काकुपदस्य, अरय इति बहुवचनस्य, अनेनैवेति सर्वनाम्न, निहन्ति जीवतीति तिङ, अहो इत्यव्ययस्य, रावण इति तत् तत् विशेषार्थान्तरसक्रमितवाच्यपदस्य, धिक् धिक् इति द्विरुक्ते, शक्रजितमिति तात्स्थ्यविहितङिप्रत्ययस्य, ग्रामटिकेति करूपतद्धितस्य, विलुण्ठनेति व्युपसर्गस्य, भुजैरिति बहुवचनस्य तद्व्यञ्जकविशेषत्वात् असलक्ष्यक्रमो ध्वनिश्चात्र स्वावमाननाभिवदाख्य सञ्चारिभाव। तस्मादव्याप्ति। ध्वनिकारादिभि ध्वनित्वेनोत्तमकाव्यत्वस्याङ्गीकारात् समनन्तरश्लोके तददोषाविति लक्षणाऽव्यापनात्।

ननु कश्चिदेवांशोऽत्र दुष्टो न पुन. सर्वो[1]ऽपीति चेत्तर्हि यत्रांशे दोषः सोऽकाव्यत्वप्रयोजकः, यत्र ध्वनिः स उत्तमकाव्यत्वप्रयोजकः, इत्यंशाभ्यामुभयत आकृष्यमाणमिदं काव्यमकाव्यं वा किमपि न स्यात् । न च क[2]श्चिदेवांश काव्यस्य दूषयन्ति[3]: श्रुतिदुष्टादयो दोषा', किं तर्हि सर्वमेव काव्यम् । तथा हि—काव्यात्मभूतस्य रसस्यानपकर्षकत्वे तेषां दोषत्वमपि नाङ्गीक्रियते । अन्यथा नित्यदोषानित्यदोषत्वव्यवस्थापि न स्यात् । (ञ, ट)

यदुक्तं[4] ध्वनिकृता—

(वि, ञ) स्वदत्तदोषं च स्वोद्भावितसिद्धान्तेन उद्धर्तुमाशङ्कते—नन्विति । तद्दूषयति—**चेत्तर्हीति**। नन्वशविशेषस्थितेन दोषेण अपरांशादूषणात्तदंशे काव्यत्वं दोषवदंशे चाकाव्यत्वं स्यादत आह—**न चेति** । किं तर्हि समस्तमेवेति, समस्तस्यैव दूषणे युक्तिमाह—**तथा हि—अन्यथेति**। काव्यात्मभूतरसावदूषणेऽपीत्यर्थ । **नित्यदोषाऽनित्यदोषेति** । च्युतसंस्कारादय. समस्तरसापकर्षकत्वान्नित्या , श्रुतिदुष्टत्व तु कतिपयशृङ्गारादिरसापकर्षत्वादनित्यमित्यभियुक्तकृता व्यवस्थापि न स्यात्, तन्मते रसापकर्षकत्वस्य दोषत्वप्रयोजकत्वादित्यर्थ ।

(लो, ट) कश्चिदेवांश , वृथोच्चूनैरिति भाव । इदं पद्यम् , ननु पदैकस्यैव विषयस्य विरुद्धधर्मयोग. स्यात् । इह तु दोषस्य यदङ्गस्य दूषकत्वं तस्याकाव्यत्वम्, ध्वनेश्च यस्योत्कर्षकत्वं तस्योत्तमकाव्यत्वमिति द्वयोर्न विरोध इत्याशङ्क्याह—**न चेति** । कथमङ्गमात्रनिष्ठस्य दोषस्य काव्यापकर्षकतेत्यत आह—**तथा हीति** । रसापकर्षकाणामेव दोषत्वात् , कथमेवेत्याह—**अन्यथेति** । रसापकर्षकत्वेऽप्यदोषत्वे, नित्यदोषाश्च्युतसंस्कृतप्रभृतय , तेषा सकलरसापकर्षकत्वात् । अनित्यदोषा श्रुतिकटुप्रभृतय तथा हि रौद्रादिरसे प्ररूढश्रुतिकटुत्वस्य गुणत्वम्, यथा मम तातपादाना विजयनरसिंहे—

('नि श्वासोद्घातवातप्रसरधुतकुलाहार्य्यमुद्घृष्टदंष्ट्रा-
जातज्योति स्फुलिङ्गप्रकरविरचितोल्कानिमायाभिशङ्का ।
अर्द्धेपारीन्द्रमर्द्धेनरमहह महालोकमालोक्य लोका.
स्तोकास्तोकविशेषा शरणमुपययुर्वारिधिं वारिधिं वा ॥')

---

1 " सर्व एवेति " [ख, ग, ङ, ज, पुस्तकेषु]
2 " किंचिदेवांश „ [ख पुस्तके]
3 " दूषयन्ति " [घ, च, पुस्तकयो]
4 'उक्तं हि' इति (गपुस्तके) ।

'श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः ।
ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः ॥ इति[1]।

किं चैवं काव्यं प्रविरलविषयं निर्विषयं वा स्यात्, सर्वथा निर्दोषस्यैकान्तमसम्भवात् । (ट, ए)

नन्वीषदर्थे नञ. प्रयोग* इति चेत्तर्हि 'ईषद्दोषौ शब्दार्थौ काव्यम्' इत्युक्ते निर्दोषयोः काव्यत्वं न स्यात् । (ठ, ऐ)

सति सम्भवे 'ईषद्दोषौ' इति चेत् , एतदपि काव्यलक्षणे[2]ऽवाच्यम् । रत्नादिलक्षणे कीटानुवेधादिपरिहारवत् । न हि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशाः किं तूपादेयतारतम्यमेव कर्तुं, तद्वदत्र[3] श्रुतिदुष्टादयोऽपि काव्यस्य ।

(वि, ट) ध्वन्यात्मन्येवेति—ध्वनिकाव्यस्यात्मभूते शृङ्गारे इत्यर्थ । शृङ्गारपदं चात्र माधुर्य्यव्यञ्जकोपलक्षणम् । तेन करुणशान्तरसयोश्च ते हेया इत्यर्थ । ननु नित्यत्वानित्यत्वप्रयोजकमेव रसापकर्षकानपकर्षकत्वं, दोषताप्रयोजकं तु न रसापकर्षकत्वं, किन्त्वभियुक्तोक्ततत्तत्स्वरूपमेव तत्प्रयोजकमित्यत आह—किंचेति ।

(वि, ठ) ईषदर्थे नञ इति—अदोषाविति नञ इत्यर्थ । निर्दोषयोरिति शब्दार्थयोरित्यर्थ । प्रौढदोषयोस्तु काव्यत्वाभावस्य इष्टत्वादिति भाव ।

तथा च न्यक्कार इत्यादावव्याप्तिर्न दोष । तयो प्रौढदोषवतो काव्यत्वाभावादिति भाव । लक्षणस्य दोषविशेषाभावघटितत्वेन कश्चिद्दोष इत्युक्तमवधेयम् ।

(लो, ए) ध्वन्यात्मनि ध्वनिस्वरूप इत्यर्थ । ननूत्तमकाव्यत्वेनाङ्गीकृतानामपि सदोषत्वे काव्यत्वं मा भूत् इत्याशङ्क्याह—किञ्चेति । एवम् अदोषशब्दार्थयोरेकवाक्यत्वे ।

(लो, ऐ) नञ —अदोषाविति पदस्थितस्य । निर्दोषयो क्वचित् कदाचित् कविनाऽदोषभावेन निर्मितयो काव्यत्वं न स्यात्, ईषद्दोषत्वकाव्यलक्षणस्य तत्रासम्भवात् ।

---

* ईषदर्थे नञ इति—

('तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्था षट् प्रकीर्तिता ॥')

ईषदर्थे यथा—अनुदरा कन्या—अल्पोदरा । तद्वत्—अत्रापि अदोषौ अल्पदोषयुक्तौ—इति चेत् ।

1 'इति' इति (घपुस्तके नास्ति) ।
2 'न वाच्यम्' इति (घपुस्तके) ।
3 'तथात्र' इति (ग, घ पुस्तकयो) ।

उक्तञ्च—'कीटानुविद्धरत्नादिसाधारण्येन काव्यता ।
दुष्टेष्वपि मता यत्र[1] रसाद्यनुगमः स्फुटः ॥' इति[2] (ड, ओ)*

किञ्च शब्दार्थयो सगुणत्वविशेषणमनुपपन्नम् गुणाना रसैकधर्मत्वस्य[3] 'ये रसस्याङ्गिनो धर्मा शौर्य्यादय इवात्मन ' इत्यादिना तेनैव प्रतिपादितत्वात्। रसाभिव्यञ्जकत्वेनोपचारत उपपद्यत इति चेत्, तथाप्ययुक्तम् । (ढ, औ)

तथा हि—तयो काव्यस्वरूपत्वे[4]नाभिमतयो शब्दार्थयो रसोऽस्ति, नवा । नास्ति चेत् , गुणवत्त्वमपि नास्ति । गुणाना तदन्वयव्यतिरेकानुविधायित्वात्। अस्ति चेत्, कथ नोक्त रसवन्ताविति विशेषणम् । (अ)

(वि,ड) सति सम्भव इति—स्फुटदोषरहिते कदाचिदौपद्दोषस्य सम्भवे सतीत्यर्थ । **उक्तञ्चेति**—यत्र रसादीनामसलक्ष्यक्रमाणाम् अनुगम स्फुट तत्र दुष्टेष्वपि कीटानुविद्धरत्नादिसाधारण्येन काव्यता मता इत्यर्थ ।

(**वि, ढ**) एवमदोषाविति विशेषण दूषयित्वा सगुणाविति विशेषण दूषयितु माह-**किञ्चेति**। तेन गुणाश्रयरसव्यञ्जकत्वरूपपरम्परासम्बन्धेन शब्दार्थयोर्गुणवत्त्वोपचार इत्यर्थ । तथाप्युक्त गुणवत्त्वविशेषणमित्यर्थ ।

(ओ) कीटानुविद्धेति—साधारण्येन सामान्येन काव्यतादुष्टेष्वपि मतेति सबन्ध ।

(लो, औ) एवमदोषत्वस्य काव्यलक्षणत्व दूषयित्वा सगुणत्वस्यापि दूषयति । अनुपपन्नम् असम्भवीत्यर्थ । **रसैकधर्म्मत्वस्य** रसमात्रधर्मत्वस्य । **तेनैव** काव्यप्रकाशकारेणैव। **रसाभिव्यञ्जकत्वेने**ति। अयमर्थ —शब्दार्थौ खलु प्राचीनोक्तरीत्या निर्मितौ रसाभिव्यञ्जकौ भवतोऽप्यनुमतौ तेन रसादिरूपव्यङ्ग्यरूपाणामपि माधुर्य्यादीना व्यञ्जकरूपशब्दार्थधर्मत्वेनोपचार । यदाह स एव

"गुणवृत्त्या पुनस्तेषा स्थिति शब्दार्थयोर्मता" इति ।

नैवमित्याह—**तथापी**ति। उपचारत सगुणौ शब्दार्थौ काव्यमिति यदुच्यत इत्यर्थ ।

(**लो, अ**) कुतोऽयुक्तमित्याह—**तथा हीति** । तयोरुपचारत । सगुणयो रसोऽस्ति नवेति, अयमर्थ —रसस्य सद्भावे एव काव्यत्व तदभावे वेति । आद्यं तुच्छतया द्वितीय निराकरोति—**नास्ति चेदि**ति । तदन्वयेति समानधर्मत्वादिति भाव । **रसोऽ-**

---

* यथा प्रभातिशयेन दोषतिरोधानात् न रत्नस्वरूपभङ्ग तथा काव्येऽपि व्यङ्ग्यवैचित्र्येण रसबोधे सति रसचमत्कारितया दोषतिरोधानात् न काव्यत्वहानिरिति भाव ।

1 'अन्यत्र' इति (ङ ज पुस्तकयो) ।
2 'इति' इति (गपुस्तके नास्ति ।)
3 " धर्मत्वात् " (इति ग पुस्तके ।)
4 " स्वरूपेण " इति (ग० पु० ।)

गुणवत्त्वान्यथानुपपत्त्यैतद्दृश्यत इति चेत्, तर्हि सरसावित्येव वक्तुं युक्तम्, न सगुणाविति। नहि प्राणिमन्तो देशा इति वक्तव्ये शौर्य्यादिमन्तो देशा इति केनाप्युच्यते। (ण, आ)

(वि, ण) चेत्तर्हीत्यत्र चेत्तथापीत्यर्थः। **नहि प्राणिमन्त** इति। शौर्य्याद्याश्रय-प्राण्याश्रये देशेऽनया परम्परया शौर्य्यादिमन्तो देशा इति केनापि नोच्यते इत्यर्थः। इदं च ग्रन्थकृताऽऽरोपबीजज्ञानबधानादेवोक्तम्; तथा हि परम्पराघटकस्य मध्यभूतसम्बन्धिनो बहिरिन्द्रियप्रत्यक्षत्वे सत्येव नैवमारोपः। यत्र तु परम्पराघटकमध्यभूतसम्बन्धी न बहिरिन्द्रियप्रत्यक्षस्तत्रैवमारोपो दृश्यत एव। यथा शीतो वायुरुष्णं जलं सुगन्धिर्वायुरित्यत्र परम्परासम्बन्धघटकानां मध्यभूतजलाग्निपुष्पावयवाना सूक्ष्मत्वेनाऽप्रत्यक्षत्वात् तादृश आरोपः। प्रकृतेऽपि बहिरिन्द्रियाऽप्रत्यक्षस्य रसादेश्च परम्परासम्बन्धघटकत्वात् सम्भवत्येव गुणवत्तारोपः शब्दार्थयोरिति। अत एव शब्दतारत्ववदाकाशमिति नारोपः। तत्र परम्परासम्बन्धघटकस्य शब्दस्य बहिरिन्द्रियप्रत्यक्षत्वात्। नचैवं ज्ञानत्ववानात्मा इत्यारोपापत्तिः। तत्र परम्परासम्बन्धघटकस्य ज्ञानस्य बहिरिन्द्रियाप्रत्यक्षत्वादिति वाच्यम्। यदि च तादृशारोपो नास्ति तदा कारणान्तराभावस्यैव तत्र कल्पनीयत्वात्। अत एवोदयनाचार्य्यैरुक्तम्, "आरोपे सति निमित्तानुसरणं न तु निमित्तमस्ति इत्यारोपः" इति। यत्तु जवाकुसुमस्य बहिरिन्द्रियप्रत्यक्षत्वेऽपि लोहितः स्फटिक इत्यारोपः तत्र जवाकुसुमं नेदृशपरम्पराघटकं जवाकुसुमस्य स्फटिकावृत्तित्वात्। किन्तु जवाकुसुमस्य स्वच्छद्रव्यसान्निध्यमेव तद्रहितं पृथगेवारोपनिमित्तमिति सुधीभिरवधेयम्। *

स्तीति प्रथमपक्षं दूषयति–**अस्ति चेदिति**। कथमिति–अयमाशयः, यदि गुणाभिव्यञ्जकयोः शब्दार्थयोः सतोरेव काव्यलक्षणत्वमभिमतं तदा लक्षणस्य न्यूनपदत्वम्।

(लो, आ) **गुणवत्त्वेति**—सगुणाविति पदेनैव शब्दार्थयोः सरसत्वमुक्तमित्यर्थः, **तर्हीति**—यदि सरसत्वप्रतिपादनाय सगुणावित्युक्तमित्यर्थः। तेन अलङ्काराः कटकवुण्डलादिवदिति वचनेन अलङ्कारस्योत्कर्षमात्राधायकत्वात् लक्षणं परास्तमित्यर्थः। किंचात्र, तददोषाविति लक्षणे शब्दार्थाविति वचनमप्यसमीचीनं, तथा हि, काव्यत्वसामान्यस्य किं शब्दार्थयो संयोगादिवद् व्यासज्यवृत्तित्वम्? उत गोत्वादिवत् प्रत्येकपरिसमाप्तिवृत्तित्वम्? नाद्यः सामान्यत्वादेव। न द्वितीयः शब्दार्थयोः

---

1 "अपि" इति अ. ग. पु नास्ति।

* एतत्तु न रुचिरं दूषणम्। स्थूलजलसंयोगेन शीतो वायुः अर्कोपलसंयोगेन उष्णं जलमित्यादौ स्थूलजलार्कोपलसंयोगघटितयोः परस्परयोर्मध्यपदार्थयोः स्थूलजलार्कोपलयोः बहिरिन्द्रियप्रत्यक्षत्वेऽपि विशिष्टाधीनियामकत्वेन सम्बन्धत्वाङ्गीकारात्। चिदानन्दचमत्कारमयस्य रसस्य बहिरिन्द्रियप्रत्यक्षाविषयत्वेन तद्घटितपरम्परायाः

ननु 'शब्दार्थौ सगुणौ' इत्यनेन गुणाभिव्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्याविति अभिप्राय इति चेत्, न। गुणाभिव्यञ्जकशब्दार्थवत्त्वस्यापि काव्ये उत्कर्षमात्राधायकत्वम्, नतु स्वरूपाधायकत्वम् (त)

उक्तं हि—काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः [1]शौर्य्यादिवत्, दोषाः का[2]णत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, अलङ्काराः कटक-कुण्डलादिवत्, इति।

एतेन 'अनलङ्कृती पुनः 'क्वापि' इति यदुक्तं तदपि परास्तम्। अस्य[3]ह्यर्थः सर्वत्र सालङ्कारौ क्वचित्त्वस्फुटालङ्कारावपि शब्दार्थौ काव्यमिति। तत्र सालङ्कार-

---

(वि, त) इदानीं सगुणत्वविशेषणस्य न लक्षणघटकत्वं किन्तु कव्युपदेशपरत्वमित्याशङ्क्य, ननु शब्दार्थाविति दूषयति—चेन्नेति। शब्दार्थवत्त्वस्यापीत्यत्र तादात्म्येनवतद्वत्ता शब्दार्थात्मक-काव्यस्य बोध्या।

न तु स्वरूपाधायकत्वमिति स्वरूपं लक्षणम्। न चेदमयुक्तं दूषणं स्वरूपाधायकत्वस्योक्ताशङ्कायामविषयत्वात्, किन्तु कव्युपदेशपरतया एवाशङ्कितत्वादिति वाच्यम्। न तु स्वरूपाधायकत्वमित्यस्य स्वरूपे लक्षणे न निवेशौचित्यमित्येव, अर्थात् कव्युपदेशपरविशेषणस्य लक्षणे दानानौचित्यादित्यर्थः।

(वि, थ) **शौर्य्यादिवदिति**—रसस्योत्कर्षाधायका इति शेषः। कटककुण्डला-

---

प्रत्येकं काव्यत्व-प्रसङ्गात्। (एतच्च एतद्ग्रन्थकृता स्वकृतायां काव्यप्रकाशटीकायां लिखितमपि प्राचीनगौरवनियन्त्रितेनात्रोपेक्षितम्। अदोषत्वादीनां तु काव्यलक्षणत्वे प्रमेयार्थविरोधप्रसङ्ग इति तन्निराकृतम्।*)

(लो, इ) **एतेनेति** अलङ्कारादीनां कटककुण्डलादिसामान्यतया उक्तया।

सम्बन्धत्वाङ्गीकारे बाधाभावाच्च। वस्तुतस्तु यत्र परम्परया विशिष्टधीनियामकत्वं तत्रैव तस्या सम्बन्धत्वं कल्प्यते। यत्र तु विशिष्टधीनियामकत्वं तत्र तु सम्बन्धत्वं न कल्प्यते एव। तेन 'ज्ञानवान् आत्मा' इत्यादौ स्वसमवायिसमवायस्य न सम्बन्धत्वमिति॥ रामचरणतर्कवागीशटीका।

(* किं च शब्दार्थयो प्रत्येक न काव्यत्वम्। अनर्थकशब्दे शब्दानुपस्थापिते अर्थे च अतिप्रसङ्गात्। किन्तु शब्दार्थसमुदायस्य काव्यत्व पञ्चभूतसंघातस्य शरीरत्वमिव, समुदायस्य कविव्यापारविषयता एव। अत एव वामनादयोऽपि गुणालङ्कार-संस्कृतयो शब्दार्थयो काव्यत्वमाहु। केचित् काव्यत्वं नाम सामान्यमाहु., तन्न 'शब्दार्थोभयधर्मतया स्वीक्रियमाणकाव्यत्वं, संयोगादिवत् अनेकाश्रितत्व व्यासज्यवृत्तित्व

1 "शौर्य्यादिव इव" इ ग पु.।

2 "कारणत्वखंजत्वादिवत्" इति ग त च, पु।

3 "अस्यार्थ" इति ख. ग. पु०।

शब्दार्थयोरपि काव्ये उत्कर्षमात्राधायकत्वात्। एतेन 'वक्रोक्तिः काव्यजीवितम्' इति वक्रोक्तिजीवितकारोक्त[1]मपि परास्तम्। वक्रोक्तेरलङ्काररूपत्वात्। (भ, इ,)

यच्च[2] क्वचिदस्फुटालङ्कारत्वे[3] उदाहृतम्—

"य कौमारहर स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभय प्रौढा कदम्बानिला ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेत समुत्कण्ठते ॥" इति

एतच्चिन्त्यम्। (द, ई)

दिवदिति शब्दार्थयो शोभका इति शेष। **एतेने**ति। उत्कर्षाधायकविशेषणस्य लक्षणेऽप्रवेश्यत्वेन इत्यर्थ।

सालङ्कारशब्दार्थयोरिति—शब्दार्थयो सालङ्कारत्वस्येति पर्य्यवसितार्थ।

(वि, द) 'य कौमारहर' इत्यादिश्लोकम् अस्फुटालङ्कारोदाहरणतया काव्य प्रकाशकार उदाहृतवान्, तत्र स्फुटालङ्कार एवास्तीत्याह—**यच्चे**ति। य कौमारहर इति। रेवातीरे कृतसङ्केताया चुलनाया स्वगृहे इय भावना। उत्कण्ठाकरण मम यद्यपि नास्ति तथापि तत्र कृतसङ्केते रेवारोधसि रेवातीरे वेतसीनामतरुतले सुरतव्यापाररूप लीलाविधिनिमित्त चेत समुत्कण्ठते इत्यर्थ। उत्कण्ठाकारणाभाव दर्शयति—**'यः कौमारहर'** इत्यादिना। कौमार कुमारीत्वम्—अपरिणीतात्वम्, परिणयनेन यस्तद्धर

वक्रोक्तिर्जीवितकार, क्वचिदाह—अलङ्काररूपत्वात्। तथा ह्युक्तम्—

'सैषा सर्वत्र वक्रोक्तिरनयाया विभाव्यते।
यत्नोऽस्या कविना कार्य कोऽलङ्कारोऽनया विना" इति।

(लो, ई) एव काव्यलक्षण दूषयित्वा काव्यप्रकाशकृत स्फुटालङ्कारविरहोदाह रणे स्फुटालङ्कार दर्शयन्नाह, **यच्चेति**—उदाहृत काव्यप्रकाशकारैरिति शेष। 'य कौमारेति' कौमार नवयौवनम्, तदकृतकप्रेमाऽसकृत्तया योऽतिवाहितवान्, स कौमार

व्यासज्यवृत्तिर्वा, गोत्वादिवत् प्रत्येकपरिसमाप्तिर्वा। नाद्य, सामान्यस्य व्यासज्यवृ त्तित्वानङ्गीकारात्। न द्वितीय, प्रत्येक काव्यता-प्रसङ्गात्। केचित् प्रमेयत्व नानार्थानुभवविषयत्व प्रमेयत्वादिवत् काव्यत्वमुपाधिमाहु। केचित् मिथुनादिशब्दवत् काव्य शब्दोऽपि सहतधर्मवचनमाहु। (अन्यकृत काव्यप्रकाशटीकायाम्))

1 "मतम्' इति (ख ग पु०)
2 "यत्तु (छ पु०)
3 "अपि इति अधिकपाठ (ज पु०)

अत्र हि विभावनाविशेषोक्तिमूलस्य सन्देहसङ्करालङ्कारस्य स्फुटत्वम् । (घ, ङ)

पतिरित्यर्थ । स एव वर श्रेष्ठ, यथेष्टरतिसमर्थ इत्यर्थ । चैत्रलक्षणा अपि सङ्केतस्थल इवात्राप्याविशिष्टा इत्याह–'ता एव' इति । सुगन्धिवायुरप्यत्राप्यविशिष्ट इत्याह 'ते चेति' । कदम्बानिला मध्यस्थितकदम्बवनानिला इत्यर्थ । अत एव ते प्रौढा अपि मन्दत्वपर्य्यवसन्ना । वनानिलस्य प्रौढत्वेऽपि मन्दत्व वनबहिर्भावेन । सौगन्ध्य तु मालत्यधीनमेव । चैत्रे कदम्बपुष्पस्याभाव एव, केचित्तु धूलीकदम्बपुष्पपरतया व्याचक्षते । तन्मते वायो प्रौढत्वविशेषणानौचित्यापत्ते अन्ये तून्मीलितमालतीना ते च प्रौढसुरभयो प्राणतर्पणगन्धा, इति व्याचक्षते । तच्च । तदा कदम्बानिला इत्यत्र ते च इत्यस्याभावात् प्रत्यभिज्ञानुपपत्ते । ते च इत्यस्यानुषगे प्रक्रमभङ्गदोषापत्ते, अनुषगग्राहकाभावाच्च । सा चेति अहमपि तदवस्थैव, उभयत्र इत्यर्थ । इत्युत्कण्ठाकारण नास्ति, तथापि चित्तस्वभाववैलक्षण्यादुत्कण्ठेत्यर्थ ।

(वि, ध) **विभावनेति**—उत्कण्ठाकारणाभावेऽपि उत्कण्ठावर्णना विभावना । "विभावना विना हेतु काय्योत्पत्तिर्यदुच्यते" इति तल्लक्षणात् । तथा नुत्कण्ठाकारणपत्यादिमत्त्वेऽपि उत्कण्ठारूपस्यानुत्कण्ठाभावस्य वर्णनाद् विशेषोक्ति । "सति हेतौ फलाभावे विशेषोक्ति" इति च लक्षणस्य वक्ष्यमाणत्वात्, तन्मूलसन्देह-सङ्करस्य तन्मूलसन्देहसङ्करालङ्कारस्य इत्यर्थ । तयोर्न सन्देह । अविरोधिनोस्तयो रेकत्र समावेशसम्भवेन सन्देहाभावात् । किन्तु तदुत्थापिताऽद्भुतरसश्चङ्काराभासयो रङ्गाङ्गिभावसन्देहेन रसवत् प्रेयोऽलङ्कारयोरेव सन्देह । तथा हि कारणाभावे फलात् कारणसद्भावे फलाभावाच्च विस्मयस्य उत्थापितत्वात्तत्स्थायिभावकोऽद्भुतरस । स किमुपनायकविषयरत्युत्कण्ठालब्धस्य शृङ्गाराभासस्याङ्गमिति रसवदलङ्कार, [1] रसस्या

हर वर स्वयङ्गत, नतु पित्रादिभिर्योजित । चैत्रो वसन्त,, तत्र जातिकदम्बा भावात्, मालती वासन्तिका । कदम्बो धूलिकदम्ब इति केचित् । सप्रदायविदस्तु स एव वसन्त ता एव वर्षा इति मन्मथोद्दीपकत्वाविशेषाद् ऋतुद्वयस्याऽपि ग्रह इति व्याचक्षते ।

(लो, उ) अत्र हीति कारणाभावे कार्य्योत्पत्तिर्विभावना सा चात्रास्फुटा । ये खलु उत्कण्ठाया कारणानि प्रियसङ्गमाऽभावादय तदभावेऽप्यत्र उत्कण्ठोत्पत्तेति, तदभावश्च तद्विरोधिप्रियसङ्गमसद्भावमुखेनोपनिबद्ध इति विभावनाऽस्फुटा । यदि खलु प्रियसङ्गमाभावादीना कारणानामसद्भावमुखेन वर्णन तदेव तस्या स्फुटत्वम् । विशेषोक्तिश्च कारणसामग्ये कार्य्यानुपत्तिरूपा, साप्यत्रास्फुटा, प्रियसन्निधानादयो धृते कारणानि । अत्र च तेषु सत्स्वपि धृतिर्नोत्पन्नेत्युत्कण्ठोत्पत्तिमत्त्वेन वर्णितम्, यदि

एतेन—"अदोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम् ।
रसान्वितं कवि कुर्वन् कीर्तिं प्रीतिं च विन्दति ।"
इत्यादीनामपि काव्यलक्षणत्वमपास्तम् । (न, ऊ)

यत्तु ध्वनिकारेणोक्तम्—"काव्यस्यात्मा ध्वनि." इति तत् किं यस्त्वलंकार-रसादिलक्षणस्त्रिरूपो ध्वनि काव्यस्यात्मा ? उत रसादिरूपमात्रो वा ? [1]नाद्य । प्रहेलिकादावतिव्याप्ते । द्वितीयश्चेदोमिति ग्रन्थ. । (प, ऋ)

क्षत्वेन रसवदलङ्कारस्य वक्ष्यमाणत्वात् । किं वा स एव रसाभासोऽद्भुतरसस्याङ्गमिति प्रेयोऽलङ्कार, आभासस्याङ्गत्वे प्रेयोऽलङ्कारस्य वक्ष्यमाणत्वात् । अङ्गाङ्गिभाव विना स्वातन्त्र्येण रसद्वयप्रतीत्यभावस्य सर्वालङ्कारिकसम्मतत्वात्। स्फुटत्वमिति—इद च न रुचिर दूषण, तथा हि स्फुटत्वास्फुटत्वे तावत् शीघ्रप्रतीयमानत्वाप्रतीयमानत्वाभ्या-मेव, तथा चात्र कारणाभावफलाभावयोर्वाचकस्य नञोऽभावेन तत् कल्पनाया विलम्बेनास्फुटत्वात् एव तयोरस्फुटत्वाच्च सुतरा तन्मूलदर्शितालङ्कारयोरस्फुटत्वम् ।

(मि, न) एतेनेति—अस्मदुक्तदूषणेनेत्यर्थ ।

(वि, प) ध्वनिरिति—व्यङ्ग्यार्थ इत्यर्थ । ननु ध्वनिकाव्यम् । काव्यस्य काव्यात्मत्वासम्भवात्। प्रहेलिकादाविति। न च तदपि काव्यमेवेति वाच्य व्यङ्ग्य-स्यास्वाद्यत्वबशादेव काव्यात्मत्वकथनात् । प्रहेलिकादौ तु व्यङ्ग्यस्याऽबोध्यतायामेव कवेस्तात्पर्यात्, अबोध्यत्वादेव तस्य वैचित्र्यम्, नत्वास्वाद्यव्यङ्ग्यत्वम्, तथा हि—

धृतिनोत्पन्नेत्युच्यते, तदा काव्यानुत्पत्ते स्फुटतयोक्तत्वात् विशेषोक्तिः स्फुटा स्यात् । इह विरुद्धरूपोत्कण्ठोत्पत्तिमुखेन धृतेरनुपपत्तिरङ्गम्, अतो विशेषोक्तिरस्फुटा । एवमत्र द्वयोर्विभावनाविशेषोक्त्योरस्फुटार्थत्वात् स्फुटालङ्कारविरह इति काव्यप्रकाशकृतो मतम् ।

तत्राह—अत्रेति, अयमर्थ—अत्र विभावनाविशेषोक्ती अस्फुटे, तथापि तदुभयारब्धसन्देहे सङ्करालङ्कारस्य स्फुटत्वात् कथ स्फुटालङ्कारविरह इति । ससृष्टि-सङ्करौ च लौकिकमुकुटाद्यलङ्कारमिश्रणेनेव पृथगलङ्कारत्वेनाभ्युपगतौ ।

(लो, ऊ) एतेन—तददोषाविति लक्षणस्य काव्यलक्षणत्वाभावकथनेन । अदोषमित्यादि सरस्वतीकण्ठाभरणोक्तलक्षणम् । विशेषश्चात्र सरसाविति वचने अलंशब्दस्यार्थत्वेन सगुणाविति वचन समनन्तरोक्तरीत्याऽनर्थकम् ।

(लो, ऋ) सम्प्रति रसमात्रध्वने काव्यत्वं सिषाधयिषुर्वस्त्वलङ्कारयोस्तन्निरस्यन् आह—यत्त्विति। ध्वनिकार श्रीमदानन्दवर्द्धनाचार्य्य । वस्तु अर्थमात्रम्, अलङ्कारस्तदेव विच्छित्तियुक्तम् । रस शृङ्गारादि , आदिशब्दात् भावतदाभासादयोऽसलक्ष्यक्रमभेदा ।

---

1 "तत्र नाद्य" (इति स पु० ।)

ननु यदि रसादिरूपमात्रो[1] ध्वनि काव्यस्यात्मा (क) तदा—

"अत्ता एत्थ णिमज्जइ एत्थ अह दिअस पलोएहि ।
मा पहिअ रत्तिअन्धअ से[2]ज्जाए[3] महे[3]ण मज्जहिसि" । (ब, ङ) *

'तरुण्यालिङ्गित कण्ठे नितम्बस्थलमाश्रित ।
गुरुणा सन्निधानेपि क कूजति मुहुर्मुहु ॥'

इत्यत्र य पूर्णोपमलशो व्यङ्ग्यस्तस्याऽबोध्यतायामेव कवेस्तात्पर्य्यादत्रैव वैचित्र्येण अलङ्कार एव प्रहेलिका । यत्तु अस्फुटगाख्ये गुणीभूते व्यङ्ग्ये कृच्छ्रगम्यत्व तत्र कृच्छ्रगम्यताया न कवेस्तात्पर्य्यमतस्तस्य नातिकृच्छ्रगम्यत्वम्, आस्वाद्यत्व चास्त्येव । प्रहेलिकादावित्यादिपदात् कर्तृकर्मगुप्त्यादिपरिग्रह । द्वितीयश्चेदिति—स्वीकारे ओंकार । मयापि 'वाक्य रसात्मक काव्यम्' इति वक्ष्यमाणत्वादिति भाव ।

(वि, फ) ननु यदि व्यङ्ग्यो रस एव काव्यस्यात्मा तदा वस्तुनो व्यङ्ग्यत्वे कथ काव्यत्वमित्याशङ्कते "ननु रसादिमात्रेति' ।

(वि, ब) अत्ता एत्थेति—

"श्वश्रूरत्र निमज्जति अत्राह दिवसक प्रलोक्य ।
मा पथिक रात्र्यन्ध शय्यायामावयोर्मङ्क्षयसि ॥"

रात्र्यन्धत्वेन कथितात्मान स्वगृहे कृतावास पथिक प्रति स्वय दूत्या उक्तिरियम् । अत्ता श्वश्रू वेशी । श्वश्रा निमज्जनकथनेन अस्या मृतप्रायत्व सूचितम् ।

प्रहेलिका—व्यङ्ग्यार्थविशिष्टो नीरसो वाक्यविशेष । यथा—

"के दारपोषणरता का शीतलाम्बुवाहिनी गङ्गा ।
क सजघान कृष्ण क बलवन्त न बाधते शीतम् ॥"

इत्यत्र प्रश्नरूपोऽर्थो वाच्य, उत्तररूपश्च व्यङ्ग्य । तथा हि—दाराणा भार्याणा पोषणे रता के ? शीताम्बुवाहिनी गगा का ? क कृष्ण सजघान ? बलवन्त क न बाधते शीतम् ? इति प्रश्न । उत्तरपक्षे केदारा क्षेत्राणि ।

(लो, ङ) अत्तेति—दिवसकमिति काले कर्म, अत्र पुश्चलीवचनेन मत्शय्या स्थानम् अभीत समागच्छेत्यर्थमात्रस्य ध्वनितम् । कथमेवमादीना काव्यत्वाभ्युपगम

---

* अत्र गृहे विद्यमानाया श्वश्वा अतिवृद्धतया बधिरनिष्ठेष्टत्वादियोगात् अन्यस्य च असत्त्वात् नि शङ्क व्यवहार इति वक्तृवैशिष्ट्यात् प्रतीयते ।

1 "रसादिमात्ररूप एव" इति (ख ग पु)

2 " सज्जाए " इति (ख० पु०)

3 " मह णिमज्जहिसि " इति (ख पु)

इत्यादौ वस्तुमात्रस्य व्यङ्ग्यत्वे कथं काव्यव्यवहार इति चेत्, न[1]। अत्रापि रसाभासवर्त्तयैव[3] भ्रमः। (भ)

अन्यथा "देवदत्तो ग्रामं याति" इति वाक्ये तद् भृत्यस्य तदनुसरणरूप-व्यङ्ग्यावगतेरपि काव्यत्वं स्यात्। अस्त्विति चेत्, न। रसवत एव काव्यत्वाङ्गीकारात्।

काव्यस्य प्रयोजनं हि रसास्वादमु[1]खपिण्डदानद्वारा[2] वेदशास्त्रविमुखानां सुकुमारमतीनां राजपुत्रादीनां विनेयानां रामादिवत् प्रवर्त्तितव्यम्, न रावणादिवदित्यादिकृत्याकृत्यप्रवृत्तिनिवृत्युपदेश इति चिरन्तनैरप्युक्तत्वात्। (म, लृ)

तथाचाग्नेयपुराणेऽप्युक्तम्—"वाग् वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्" इति। व्यक्तिविवेककारेणाप्युक्तम्—" काव्यस्यात्मनि संज्ञिनि रसादिरूपे न कस्यचिद् विमतिः" इति।(ए)

(वि, भ) **वस्तुमात्रस्य व्यङ्ग्यत्व** इति। मम शय्यायामागमिष्यसीत्येवं वस्तुमात्रस्य इत्यर्थः। **रसाभासेति**। उपनायकविषयत्वादाभासः। व्यङ्ग्यान्तरसत्त्वेऽपि रसपर्य्यवसान एव काव्यत्वम्। तथात्वाभावे काव्यत्वस्वीकारे त्वतिव्याप्तिरित्याह-**अन्यथेति**।

(वि,म)रसवत एव काव्यत्वाङ्गीकारे बीजमाह-**काव्यस्य प्रयोजनमिति**। कृत्याकृत्येति रसास्वादमुखपिण्डदानदर्शनात्तादृशमुखपिण्डस्यैव मुख्यप्रयोजनत्वमुक्तम्। तादृशोपदेशस्तु यथासम्भवमेवेत्युक्तम्। तथा च—'शून्यं वासगृहमित्यादि' 'यः कौमारहर' इत्यादिश्लोकेषु तादृशोपदेशाभावेऽपि काव्यत्वमक्षुण्णम्।

(वि, य) वाग्वैदग्ध्यमलङ्कारः। संज्ञिनि काव्यसंज्ञावति व्यङ्ग्यार्थसाधारण-

---

इति पूर्वपक्षः। सिद्धान्तमाह—**अत्रापीति**, रसाभासवर्त्तयैव। नतु केवलं वस्तुमात्रस्य व्यङ्ग्यत्वेन। रसाभासश्चात्र पुंश्चल्याः परनायकविषयाया रतेः प्रकाशनात्। अथवा नीरसेष्वपि वस्तुमात्रप्राधान्येन काव्यव्यवहारस्वीकारः।

(लो, लृ) **काव्यस्येति**—अयमर्थः, रसास्वाद एव मुखं पिण्डस्य द्वारेण तदुक्तम्—

'स्वादुकाव्यरसोन्मिश्रं वाक्यार्थमुपयुञ्जते।
प्रथमालीढमधवः पिबन्ति कटु भेषजम्॥' इति

(लो,ए)व्यक्तिविवेककारो हि महिमाचार्य्यः। आत्मलाभः कविसंज्ञाप्राप्तिः. ततसिद्धेः इतिवृत्तलाभात्। आदिशब्देन रसमात्रस्य काव्यजीवात्मत्वाप्रतिपादको वाग्गुम्फः। नन्

1 'मुख' इति (ख. ग. पु)
2 'द्वारेण' इति (ख. ग. पु.)
3 'संगिनि' इति (च. छ. पु.) 'आ आङ्गिनि' इति (ङ प्रकाशित पु.)

ध्वनिकारेणाप्युक्तम्—" नहि कवेरितिवृत्तमात्रनिर्वाहेणात्म'लाभः' । इतिहासादेरेव तत् सिद्धेः" इत्यादि। ननु तर्हि प्रबन्धान्तर्वर्त्तिनां केषांचिन्नीरसानां पद्या[2]नां काव्यत्वं न स्यादिति चेत्, न तु, रसवत् पद्यान्तर्गतनीरसपदानामि[3]व पद्यरसे[4]न प्रबन्धरसेनैव तेषां रसवत्ताङ्गीकारात्। यत्तु नीरसेष्वपि गुणक्रि[5]याभिव्यञ्जकवर्णसद्भावाद्दोषाभावादलङ्कारसद्भावाच्च काव्यव्यवहारः स रसादिमत्काव्यबन्धसाम्याद् गौण एव । यत्तु वामनेनोक्तम्—" रीतिरात्मा काव्यस्य" इति तन्न। रीतेः संघटनाविशेषत्वात्। संघटनायाश्चावयवसंस्थानरूपत्वात्, आत्मनश्च तद्भिन्नत्वात्। (य, ऋ)

यच्च ध्वनिकारेणोक्तम्—

"अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ।" इति।

अत्र वाच्य[6]स्यात्मत्वं 'काव्यस्यात्मा ध्वनिः' इति स्ववचनविरोधादेवापास्तम्। (र) तत्[7] किं पुनः काव्यमित्युच्यते—

वाक्यं रसात्मकं काव्यम् ॥१॥

स्यार्थस्य काव्यसंज्ञावत्त्वात्। इतिवृत्तं वर्णितार्थं। **गुणक्रियेति**। यद्यपि वर्णो गुणस्यैव व्यञ्जको न क्रियायास्तथापि अत्र वर्णोपदं वर्णोदिपरं बोध्यम्।

(वि, र) वाच्यप्रतीयमानाविति। अत्र वाच्यपदं प्रतीयमानपदार्थव्यङ्ग्यभिन्नपरम्, तेन लक्षणार्थस्यापि परिग्रह । **स्ववचनेति**। ध्वनिर्व्यङ्ग्यार्थ । तस्यात्मकत्वकथनवाच्यार्थात्मकथनरूपयोः स्ववचनयोर्विरोधादित्यर्थ ।

(वि, ल) तत् किं पुन काव्यमित्यादिप्रश्न । 'उच्यते' इत्यादि समाधानम्। प्रतिपादितत्वादिति–'देवदत्तो गच्छति' इत्यादिनेत्यर्थ ।

तर्हीति—ननु यदि रसवदेव काव्यमित्यर्थ । नीरसाना वर्णितपर्वतादिपद्यानाम्। सिद्धान्तमाह—प्रबन्धरसो महाकाव्यम्। रीतिः पदसंघटना, अवयवा पदानि।

(लो, ऐ) एवं प्राक्तनलक्षणानां प्रमेयविरोधं दर्शयित्वा स्वलक्षणमवतारयति। **तत् किं पुनरिति**–यदि नैतानि काव्यलिङ्गलक्षणानीत्यर्थ । रसात्मकमित्यत्र रस-

---

1 'आत्मपदलाभ' इति, (ङ, झ पु)
2 'पद्याना' इति, ग पु नास्ति।
3 'इव' इति, ग पु नास्ति।
4 'पद्यरसे' इति, (ट, पु)
5 'गुणाभिव्यंजक' इति, (ख ग घ ङ, च, पु,)
6 'वाच्यात्मत्वं' इति, (ञ पु)

रसस्वरूपं निरूपयिष्यामः । रस एवात्मा सार[1]रूपतया जीवनाधायको यस्य[2] । तेन विना तस्य काव्य[3]त्वाभावस्य प्रतिपादितत्वात् । "रस्यते इति रसः" इति व्युत्पत्तियोगाद् भावतदाभासादयोऽपि गृह्यन्ते[4] । तत्र रसो यथा—

(ल, ऐ)

"शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विश्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता चिरं बाला चुम्बिता ॥" (च, श्रो)

(वि,घ) शून्यं वासगृहमित्यादि । किंचिदुद्भिन्नयौवनायाः नवोढायाः क्रियावर्णनमिदम् । अत्र विलोक्येत्यादिक्रमेणैव सकलक्रियाणां पूर्वापरभावेन क्त्वानिर्देशो बोध्यः । शयनात् किंचिदुत्थानं प्रियजागरणे द्रुतं सम्वरणाय । शनैस्त्वं तु शब्दानुत्पत्तये । पतिमुखचिरनिर्वर्णनं निद्रानिश्चयायानुरागेण च । विश्रब्धं निद्रानिश्चयेन जाताश्वासं, यथा स्यात् तथा चुम्बनक्रियाविशेषणमिदम्, आलोक्य लज्जानम्रमुखी जाता इति शेषः मुखेन बोध्यम् । तदेव क्रियाद्वयैककर्तृकत्वेन क्त्वानिर्देशोपपत्तेः । एतत् पर्य्यन्तक्रियासु बाला कर्त्री, हासप्रियचुम्बनस्य तु कर्म । चुम्बनस्य चिरत्वं नायिकायां भावनिश्चयेन प्राणाशङ्काभावादनुरागाधिक्योत्पत्तेश्च । अत्र व्यङ्ग्यौ परस्परतिसम्भोगश्रृङ्गारौ । शून्यवासगृहविलोकनं रतेरुद्दीपनविभावः । शय्योत्थानादिमुखनम्रतान्ता क्रिया नायिकायां रतेरनुभावाः । ता एव नायकरतेरुद्दीपनविभावाः, प्रियेण चुम्बनं तदीयहासश्च तदीयरतेरनुभावौ, तावेव नायिकारतेरुद्दीपनविभावौ, उभयाभिप्ते सामाजिके रसोत्पत्तिः ।

पदेनाऽसंलक्ष्यक्रमभेदानां सर्वेषां परिग्रह इत्याह—रस्यत इति । रस्यते आस्वाद्यते, स्वाद्यः काव्यार्थसम्भेदादात्मानन्दसमुद्भव इत्युक्तप्रकारः, कर्मत्वं रसादीनामुपचारात् । धर्मकर्त्तरि, वा प्रयोगादिति वक्ष्यते । तदाभासा रसाभासा भावाभासाश्च आदिशब्दात् भावस्य शान्तिरुदयः सन्धिः शबलता च ।

(लो, श्रो) शून्यमिति—शून्यं विविक्तं वासगृहं केलिभवनं विलोक्य, शयनात्, शय्यायाः किञ्चिदुत्थाय उत्थिता भूत्वा शनैर्मन्दं नि शब्दमित्यर्थः । बाला निद्राव्याजमुपागतस्य प्रियस्य मुखं सुचिरं निर्वर्ण्य दीर्घकालं विलोक्य सम्यक् परीक्ष्य

---

1 "स्वरूपतया" इति ट, पु०
2 "अस्य" इति ट. पु०
3 "काव्यत्वनिर्वाहात्" इति ट पु०
4 "उच्यन्ते" इति ट. ठ. पु०

अत्र हि सम्भोगशृङ्गाराख्यो रस ।
भावो यथा महापराघवानन्दसान्धविग्रहिकाणाम्—

"यस्यालीयत शल्कसीम्नि जलधि, पृष्ठे जगन्मण्डल
दंष्ट्राया धरणी, नखे दितिसुताधीश पदे रोदसी।
क्रोधे क्षत्रगण, शरे दशमुख, पाणौ प्रलम्बासुरो
ध्याने विश्वमसावधार्मिककुल कस्मैचिदस्मै नम ॥"

अत्र भगवद्विषया रतिर्भाव । (श, औ)

(वि, श) **यस्यालीयत** इति । अस्मै यत्पदोपस्थापिताय कस्मैचित् अनिर्वचनीयाय अर्थाद्दशावतारिणे नारायणाय नम ।

तस्य मत्स्यादिदशावतारभेदेन धर्म्मानाह—**यस्येति** । जलधिरीऽपि मत्स्यस्य प्रौढोक्त्या महत्त्वात् तच्छल्कसीम्नि लय । पृष्ठ इति—इद कूर्मावतारे । अलीयत इति सर्वत्रान्वय । जगन्मण्डल भूमण्डल पृष्ठस्य महत्त्वात् । दंष्ट्रायामिति वराहावतारे । दितिसुताधीशो हिरण्यकशिपु, इद नरसिंहावतारे । रोदसी द्यावा पृथिव्यौ, इद वामनावतारे । क्रोध इति परशुरामावतारे । ध्यानम् इति बुद्धावतारे विश्वध्यायित्वात् । असाविति कल्कयवतारे असिना म्लेच्छच्छेदनात् ।

इत्यर्थ । विश्रब्ध नि शङ्क यथा स्यात्तथा परिचुम्ब्य आस्वाद्य जातपुलका उत्फुल्ल रोमाञ्चाङ्किता गण्डस्थली विलोक्य तज्जानमुखी व्रीडावनतवदना सती हसता प्रियेण चिर चुम्बितेति सम्बन्ध । नायिका स्वीया, नायकोऽनुकूल, अत्र नर्म गर्भनातिरलङ्कार । शून्यमित्यादि, अत्र विलोकनशब्दोऽन्तर्भूतणिगर्थ, तेना लोकनम्, अनयोरेककर्तृकतया पूर्वकालीनक्त्वाप्रत्यय । इह च नायको नायिका चालम्बनविभावौ । शून्यवासगृहादिरुद्दीपनविभाव । अनुभावा बालागतविलोकनादय नायकागता व्याजनिद्रादयश्च । निद्राया हि व्याजारब्धतया न व्यभिचारित्वम्, व्यभिचारिणश्च नायिकागता, विलोकनेन शङ्का, उत्थानेन चपलता । उत्थानस्य शनैस्त्वेन त्रास, चिर निर्वर्णनेन सुप्तो न वेति सन्देहप्रभवो वितर्क, विश्रब्धमित्यनेन निद्रानिश्चयज्ञानेन हर्ष, परिचुम्बनेनौत्सुक्यम्, आलोकनेन चपलता, मुखनमनेन लज्जा निर्दिष्टैव । नायकगता च व्याजनिद्राश्रयेण धृति, चिरपरिचुम्बनेनौत्सुक्य हर्षश्च । एभिश्च साधारणेनाभिव्यक्त सामाजिकरतिभाव शृङ्गाररसरूपता भजते । एव वक्ष्यमाणोदाहरणेष्वपि विभावादिविवेको बोद्धव्य ।

(लो, औ) **यस्यालीयतेति**—अत्र भगवतो दशावतारवर्णनम् । अत्रालीयतेति क्रियाया प्रतिवाक्यमन्वय । शल्कसीम्नि वल्कलप्रदेशे जलधिरलीयतेति, अनेन मत्स्य । पृष्ठदेशे जगन्मण्डलमलीयतेति कूर्म, एव वराहादय । कस्मैचिद् विशेषतो निर्देष्टुमशक्यत्वात् ।

रसाभासो यथा—

"मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः ।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः ।" (प, अ)

अत्र सम्भोगशृङ्गारस्य तिर्य्यग्विषयत्वाद्रसाभासः । एवमन्यत् । दोषाः पुनः काव्ये किंस्वरूपा (आ) इत्युच्यन्ते—

दोषास्तस्यापकर्षकाः ॥२॥

श्रुतिदुष्टापुष्टार्थत्वादयः काणत्वखञ्जत्वादय इव शब्दार्थद्वारेण देहद्वारेणेव व्यभिचारिभावादेः स्वशब्दवाच्यत्वादयो मूर्खत्वादय इव साक्षात् काव्यस्यात्मभूतं रसमपकर्षयन्तः काव्यस्यापकर्षका इत्युच्यन्ते*एषां विशेषोदाहरणानि वक्ष्यामः गुणादयः[1] किं स्वरूपा इत्युच्यन्ते—

उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः ॥ ३ ॥

गुणाः शौर्य्यादिवत्, अलङ्काराः कटककुण्डलादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, देहद्वारेणेव शब्दार्थद्वारेण तमेव[2] काव्यस्यात्मभूतं रसमुत्कर्षयन्तः काव्यस्योत्कर्षका इत्युच्यन्ते । (स)

इह यद्यपि गुणानां रसधर्मत्वं तथापि गुणशब्दोऽत्र गुणाभिव्यञ्जकशब्दा-

---

(वि, प) **मधुद्विरेफ** इति—महेशतपोभङ्गायाऽऽकालिके वसन्ते जाते तिरश्चामपि मान्मथविकारावरणेनेदम् । अत्र प्रियया साहित्येन मधुपानं प्रियाकण्डूयनं च द्विरेफकृष्णसारयो रतेरनुभावौ । तयोः शृङ्गारयोस्तिर्य्यग्गतत्वेन भासः। **एवमन्यदिति** । भावाभासादयोऽप्येवम्, ते चाग्रे प्रदर्शयिष्यन्ते ।

(वि,स) **श्रुतीति**—श्रुतिदुष्टादयः अपुष्टत्वादयोऽर्थदोषाः । एते च शब्दार्थद्वारेण रसमपकर्षयन्त इत्यन्वयः । व्यभिचारिभावादेः स्वशब्दवाच्यत्वादयः साक्षादित्यर्थः ।

उत्कर्षहेतव इति—काव्यात्मभूतस्य रसस्य उत्कर्षहेतव इत्यर्थः । तद्धेतुता च शब्दार्थद्वारेण इति व्याख्यास्यते । शब्दार्थावुत्कृष्य रसमुत्कर्षयन्तीत्यर्थः ।

(लो, अ) कुसुमरूपे एकस्मिन् पात्रे ।

(लो, आ) **दोषाः पुनरिति**—येषां सद्भावेन काव्यत्वं खण्डितमित्यर्थः । किं स्वरूपाः किमाकारेण वर्त्तन्ते इति पूर्ववद् व्याख्यानम् ।

---

*यथा काणत्वखञ्जत्वादयः देहद्वारेण आत्मानमपकर्षयन्ति मूर्खत्वादयश्च साक्षात् आत्मानमपकर्षयन्ति तथा श्रुतिदुष्टादयो दोषाः शब्दार्थद्वारेण काव्यस्यात्मभूतं रसमपकर्षयन्ति, व्यभिचारिभावादेः स्वशब्दवाच्यत्वादयो दोषाः साक्षात् काव्यस्यात्मभूतं रसमपकर्षयन्ति ।

1 "गुणाः किं" इति (च पु०)

2 "तस्यैव" इति (च पु०)

र्थयोरुपचर्य्यते । अतश्च 'गुणाभिव्यञ्जका शब्दा रसस्योत्कर्षका' इत्युक्त भवतीति प्रागेवोक्तम् । एषामपि विशेषोदाहरणानि वक्ष्याम । (ह, इ)

इति श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्याणर्णवकर्णधारध्वनिप्रस्थापन परमाचार्य्यकविसूक्तिरत्नाकराष्टादशभाषावारविलासिनीभुजङ्गसन्धि विग्रहिकमहापात्रश्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे काव्य-स्वरूपनिरूपणो नाम प्रथम परिच्छेद ।

(वि, ह) ननु शब्दार्थद्वारेण रसोत्कर्षकत्वमलङ्काररीतीनां शब्दार्थधर्माणामेव सम्भवति रसमात्रधर्माणामेव गुणाना कथ तद्द्वारकत्व व्याख्यातमित्यत आह—इहेति। **गुणाभिव्यञ्जकशब्दार्थयोरिति**। यद्यपि वर्णा एव गुणाभिव्यञ्जका इति वक्ष्यन्ते तथापि वर्णैर्न पद तेनार्थस्तेन च गुणो व्यज्यते, इत्यभिप्रायेण अर्थस्य गुणाभिव्यञ्जक-त्वमुक्तम्। तथा च स्वव्याख्यातार्थ एवानेनोपपादित स्वय, तथा व्याख्याने तु गुणाना साक्षाद्रसोपकारकत्वेनैव कारिकार्थ सगच्छते इति बोध्यम्।

प्रागेवोक्तमिति—ननु शब्दार्थद्वारा गुणाना रसोत्कर्षकत्व प्राङ्नैवोक्तम् । तत् कथ मिदमुक्तमिति चेत्, सत्यम् किन्तूत्कर्षहेतव प्रोक्ता गुणालङ्काररीतय इयुक्तौ अलङ्काररीत्यो समभिव्याहारेण पाठवशात् तद्रीतिकत्वलाभ । अत उक्तमित्यत्र उक्तप्रायमित्येवार्थ ।

इति श्रीमहेश्वरन्यायालङ्कारभट्टाचार्यविरचिताया साहित्यदर्पण टीकाया प्रथमपरिच्छेदविवरणम्

(लो, ह) **शौर्य्यादिवादिति**—शौर्य्यादिव्यञ्जकशारीरिकधर्मविशेषवत् । अल ङ्काराश्चानुप्रासोपमादय, ये च तद्धर्मविशेषान्त पातित्वादिरूपेण अतिपादयिष्य माणा प्राचीनोक्ता श्लेषप्रसादादय तद्युक्तशब्द चार्थश्च प्राचीनोक्तश्लेषप्रसादादि-गुणयुक्त तयो रसादिरूपव्यङ्ग्यानां गुणानां व्यञ्जकत्वेन उपचर्य्यते, तदाह काव्य प्रकाशकार एव, " गुणवृत्त्या पुनस्तेषा स्थिति शब्दार्थयोर्मता इति । ननु भवन्मते माधुर्य्यादयस्त्रय एव गुणास्ते च रसमात्रनिष्ठा । प्राचीनोक्ता श्लेषप्रसादादय शब्दा र्थनिष्ठत्वेन विंशतिप्रकारास्ते च भवद्भिरस्वीकृतत्वेन च निर्देष्टव्या, तत् कथमिदानी तद्युक्तयो शब्दार्थयोर्व्यञ्जकत्वम् ? उच्यते न खलु तेषामस्वीकार, किन्तु अन्त र्भावित्वादिरूपेण शब्दार्थमात्रनिष्ठत्वात् रसमात्रनिष्ठगुणवैलक्षण्यात् न पृथगुक्ति । यदाह— 'केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिता "इति। न वय तेषां यथासम्भव रसधर्मत्वे नोक्तानां व्यञ्जकत्व नास्वीकुर्म, किन्तु रसधर्मत्वम्। तदुक्त ध्वनिकृता,

("रौद्रवीररसानिष्ठा लक्ष्यन्ते काव्यवर्त्मनि ।
तद्व्यक्तिहेतू शब्दार्थावाश्रित्यौजो व्यवस्थितम् ॥")

इति सर्वमतावदातम्। इति साहित्यदर्पणलोचने प्रथमपरिच्छेद समाप्त ।

द्वितीयः परिच्छेदः ।

वाक्यस्वरूपमाह—(अ)

वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः ॥ २ ॥

योग्यता* पदार्थानां परस्परसम्बन्धे बाधाभाव (१) पदोच्चयस्यैतदभावेऽपि वाक्यत्वे वह्निना सिञ्चतीत्यपि वाक्य स्यात्। (क) आकाङ्क्षा+-प्रतीतिपर्य्यवसानविरहः (२) स च श्रोतुर्जिज्ञासारूप । (ख), (आ)।

(वि, क) वाक्यं रसात्मक काव्यमिति युक्तत्वात् वाक्यलक्षण वक्तुमाह—**वाक्यस्वरूपमिति** । बाधाभावो बाधमात्राभावत्वे बाधज्ञानाभाव, तु बाधिते बाधाऽज्ञाने शाब्दबोधानुपपत्ते । वह्निना सिञ्चतीत्यन्वयबोधजनकस्यैव वाक्यत्वं, सेकं प्रति वह्ने करणत्वान्वयबाधाज्ञान्वयबोध । नन्वेवमन्वयबोधजनकत्वमेव लक्षणमिति वाच्यम् ? अन्वयबोधजनकसामग्रीप्रदर्शनार्थं तद्घटितलक्षणकरणात् ।

(वि, ख) **आकाङ्क्षेति**—प्रतीतिपर्य्यवसानविरहमेव व्याचष्टे **सचेति** । जिज्ञासा च प्रतीतपदार्थातिरिक्तपदार्थे ; सा च प्रथमप्रतीतपदार्थान्वयबाधार्थमुत्थिता बोध्या, तेन गौरश्व इत्यादौ दैवादधेति जिज्ञासासत्त्वेऽपि नाकाङ्क्षा । चैत्रस्य भ्राता गृहं गच्छतीत्यादौ चैत्रस्य न गृहे आकाङ्क्षा उदेति भ्रातरि जनिताऽन्वयबोधात् । तेन चैत्रस्य गृहमिति न बोध । "विमल जल नद्या कच्छे महिषश्चरति" इत्यत्र विमलजलेऽन्विताया अपि नद्या कच्छस्य सम्बन्धिकत्वेनोपस्थिते नदीरूपे सम्ब

(लो, अ) सम्प्रति काव्यलक्षणयोर्वाक्यरसयो स्वरूपजिज्ञासाया प्रथमोद्दिष्ट वाक्य द्वितीयपरिच्छेदेन सपरिकर निरूपयितुकाम तत् सामान्यलक्षणप्रतिपादिका कारिकामवतारयति—**वाक्यस्वरूपमिति** । स्वमसाधारण रूप स्वरूपम्, इतरव्यावर्तको धर्म ।

(लो, आ) **वाक्यं स्यादिति** । एतद् विवृणोति । **योग्यतेति** । **पदार्थानामिति** । पदाना गौरित्यादीनामर्था पदार्था[1] । एतदभावे योग्यताया अभावेऽपि गौरित्यादीनां परस्परमाकाङ्क्षाविरहिणा पदाना प्रतीतिपर्य्यवसानविरह इत्येव विशदयति **श्रोतुर्जिज्ञासा** इति । आकाङ्क्षा आत्मधर्म श्रोतुर्जिज्ञासारूपत्वेन इच्छारूपत्वात् । योग्यताऽर्थधर्म स्फुट एव ।

---

1 'इत्याद्यपि' इति (क. ग. घ)

* अन्वयप्रयोजकरूपवत्त्व योग्यता (विश्वनाथस्य—अ० टी०)।

+ आकाङ्क्षेति—समभिव्याहृतपदस्मारितपदार्थजिज्ञासा आकाङ्क्षा ।

निराकाङ्क्षस्य वाक्यत्वे गौरश्व पुरुषो हस्तीत्यादीनामपि वाक्यत्व स्यात् (ग) आसत्तिर्बुद्धयविच्छेद । बुद्धिविच्छेदेऽपि वाक्यत्वे इदानीमुच्चरितस्य देवदत्तशब्दस्य[1] दिनान्तरोच्चारितेन गच्छतीतिपदेन सगति स्यात् (-) (घ)

न्धिनि तात्पर्य्यवशात् कर्च्छान्वयार्थमपि कर्च्छे जिज्ञासा उदेति इति न तत्राऽव्याप्ति । वह्निना सिञ्चतीत्यत्र तु करणताया कार्य विना अनुपपत्त्या सेके तत् कार्य्य उदेति एव आकाङ्क्षा इति बोध्यम् । एव चाकाङ्क्षितपरस्परसम्बन्धे बाधविरह एव योग्यता, अन्यथा अनाकाङ्क्षितस्य कालिकसम्बन्धस्य वह्निकरणतासेक्योरपि सत्त्वाद् योग्यता स्यात् ।

(वि, ग) **गौरश्व** इत्यादि । अत्र चाकाङ्क्षाभावादेव आकाङ्क्षितसम्बन्धे बाधविरहरूपा योग्यतैव नास्ति, इत्याकाङ्क्षाया एवाभावान्न वाक्यत्वम् । आकाङ्क्षाभावश्च प्रथमान्तपदार्थस्य प्रथमान्तपदार्थान्तरे भेदेनान्वयार्थं जिज्ञासानुदयस्याऽनुभाविकत्वादेव अभेदान्वये तु, बाध एव (वि, घ) आसत्तिलक्षणमाह—यत् पदबुद्ध्यव्यवधानेन यत् पदबुद्धिस्तेनैव सह तस्यासत्तिरित्यर्थ । अव्यवधान च तदन्वयानुपयुक्तार्थकस्वार्थक-पदान्तरेण, विलम्बेन वा बोध्यम् । तेन काष्ठै स्थाल्यामोदन पचतीत्यत्र स्थाल्यादि पदव्यवधानेऽपि काष्ठपदे पचधातोसंसर्गसत्तिरस्त्येव, स्थाल्यादिपदार्थाना तदन्वयोपयोगित्वात् । निरर्थकेन व्यवधान तु अस्त्येवाऽऽसत्ति—यथा "स वै गच्छति" इत्यत्र वैयाकरणस्तु निरर्थकेऽपि प्रामाणिकप्रयुक्त एव बोध्य । नतु चमरादि । तेन तदन्वयानुपयुक्तार्थकेन प्रामाणिकाऽप्रयुक्तनिरर्थकेन चाव्यवधानमर्थ । गिरिर्भुक्तमामिमान् देवदत्तेन इत्यत्र तु गिर्य्य ममत्पदयोर्नासत्ति । तदन्वयानुपयुक्तभुक्तपदेन व्यवधानात् । कालव्यवधाने तु कालस्य चिरत्व, तत्पदबुद्धिधारालोपाधिकरणत्वमेव । तत्रासत्त्यभाव दर्शयति—बुद्धिविच्छेदेऽपीति—नच तत्र पूर्वोच्चारितपदार्थस्मृतिर्यास्ति तदेवत्व एव तत्र वाक्यत्व, नचैतदभावादेव शाब्दबोधानुपपत्त्या वाक्यत्वाभाव इति वाच्यम्, शाब्द बोधजनकत्वस्यागात्तलक्षणेऽप्रवेशेन तत्पदस्मृत्यभावेन शाब्दबोधाजनकतया वाक्ये

एतदभावात् गौरश्व पुरुषो हस्तीत्यत्र च नान्वयबोध । साकाङ्क्षवाक्येऽपि अन्वयबोधानन्तर निराकाङ्क्षत्वव्यवहारात् । प्रकृतान्वयबोधसमानाकारशाब्दबोधा-भावोऽपि आकाङ्क्षान्तरम् । अतो घटमानय इति वाक्यम् एकदा अन्वयबोधे जनिते न अन्वयबोधान्तरजनकम् (का-प्र-टी-विश्वनाथ) । प्रतीतीति—प्रतीते पर्य्यवसानम् (समाप्ति) तस्य विरह (अभाव) केवल क्रियाश्रवणे बाधाभावश्च वाक्यस्य (प्रथमे कतु तत कर्मप्रभृतीनां) जिज्ञासा सत्त्व एवादेति ।

---

* अव्यवधानेनाऽन्वयप्रतियोग्युपस्थितिरागति । व्यवधान प्रकृतान्वयितावच्छेदकेन च बोध्यम् । तत्र गिरिर्भुक्तमामिमान् देवदत्त नात्र नान्वयबोध । भुक्तपदस्य

1 'पदस्य' (ग घ)

[1]अत्राकाङ्क्षायोग्यतयोरात्मार्थधर्मत्वेऽपि पदोच्चयधर्मत्वमुपचारात् । * (ङ)

वाक्योच्चयो महावाक्यम् ॥ २ ॥

योग्यताकाङ्क्षासन्निधियुक्त एव[2] ।

इत्थं चास्य द्विधा मतम् ॥ ३ ॥

इत्थमिति वाक्यत्वेन[3] महावाक्यत्वेन च । उक्तं च—

तत्रातिव्याप्तिप्रदर्शनस्य औचित्यादेव ।

(वि, ङ) ननु बाधज्ञानाभावरूपाया योग्यताया निज्ञासारूपाया आकाङ्क्षाया-श्चात्मार्थवृत्तित्वात् कथं पदोच्चयस्य तद्युक्तत्वम् इत्यत आह—**आकाङ्क्षायोग्यतयोरि-ति**—उपचारो विषयतासम्बन्धेन वृत्ति । सा च बाधविरहस्य प्रतियोगिनो बाधज्ञानस्य विषये पदोच्चये तद् विषयता साक्षादेव ।

(वि, च) वाक्यस्य द्वैविध्यमाह—**वाक्योच्चय** इति । क्वचित् वाक्यमात्रस्य क्वचिच्च महावाक्यस्य वाक्यत्वेन, द्वयोरपि लक्षणकथने आकाङ्क्षासत्त्वात् महावाक्य-लक्षणेऽपि योग्यतादिकं विशेषणमित्याह—**योग्यताकाङ्क्षेति** । तत्रार्द्रकाष्ठे वह्नि-र्ज्वलति तेन सिञ्चतीत्यत्र महावाक्यत्वापत्त्या तद्वारणाय योग्यताया, चैत्र पचति, मैत्रो गच्छति, इत्येतद् वारणायाकाङ्क्षाया, दिनान्तरोच्चारितवाक्यद्वयस्य विरोधि-वाक्यव्यवहितयो साकाङ्क्षयोग्यवाक्ययोर्वारणायाऽऽसत्तेरुपादानम् ।

(लो, इ) महावाक्यस्यापि काव्यत्वे आचार्य्यसम्मतिं दर्शयति—**तदुक्तमिति** । अङ्गाङ्गित्वेन प्रबन्धेषु विशकलितान्यपि वाक्यानि, अन्योऽन्यमङ्गाङ्गिभाव विना तु वातुलप्रलापपदसम्बन्धता भजन्ते । सहत्य समेत्य वाक्यमहावाक्ययोरित्यादिषु प्रत्येक व्यवच्छेद इत्यन्वय । साकाङ्क्षाणि अनेकपदानि, यथा देवदत्तो दण्डेन गाम् । अनेक-वाक्यानि च सहत्य समुदितार्थबोधनार्थम् इतरवाक्यसापेक्षाणि प्रबन्धेषु प्रसिद्धानि । तथाभूतानां हि पदानां वाक्यानां च विशकलितानेकार्थबोधने एव भट्टमते सामर्थ्यं नत्वेकार्थबोधने ।

व्यवधानात् । कालव्यवधान दर्शयति—**इदानीमिति**—मुद्धे पदार्थोपस्थितेरविच्छेद अव्यवधानम्, अव्यवहितपदार्थोपस्थितेरित्यर्थ ।

* अत्र आकाङ्क्षाया आत्मधर्मत्वेऽपि योग्यताया अर्थधर्मत्वेऽपि तयोर्यत्पदोच्चय-धर्मत्वमुक्तं तदुपचारात् ।

1 'तत्र' इति (ग, घ०)

2 'इत्येव' इति (ट घ०)

3 'वाक्यमहावाक्यत्वेन' इति, (छ, ज, घ०)

"स्वार्थबोधे[1] समाप्तानामङ्गाङ्गित्वव्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुनः संहृत्य जायते ॥" इति * (ट)

तत्र वाक्यं यथा—"शून्यं वासगृहम्" इत्यादि। (ठ) महावाक्यं यथा—रामायणमहाभारतरघुवंशादि।

पदोच्चयो वाक्यमित्युक्तं, तत्र[2] किं पदलक्षणमित्यत आह—

वर्णाः पदं प्रयोगार्हाननन्वितैकार्थबोधकाः ॥ ४ ॥ (ड)

यथा घटः। प्रयोगार्हेति प्रातिपदिकस्य व्यवच्छेदः (ज)। अनन्वितेति वाक्यमहावाक्ययोः (झ)।

शून्यं वासगृहमित्यादि—अत्र सर्वपदार्थानामेव उत्तरत्र सामाङ्गत्वेन क्वस्यापि स्वार्थबोधसमाप्त्यभावात् न महावाक्यत्वम्।

(वि, ड)—वर्णाः पदमिति—प्रयोगार्हाश्च तेऽनन्वितैकार्थबोधकाश्चेति कर्मधारय.। एकार्थबोधका इत्यत्र एकैकार्थबोधक इत्यर्थः। तेन वाक्यस्य-पदेषु मिलनेन अनेकार्थबोधकेषु नाव्याप्तिः। एकैकार्थकत्वं हि स्वसमसंख्यार्थकम्; अर्थस्य एकैकत्वस्य वक्तुमशक्यत्वात्। न च त्रिविधा सुरा इत्यत्र एकसुरा-शब्दस्य गौडीपैष्टीमाध्वीत्रयबोधकत्वात्तत्राव्याप्तिरिति वाच्यम्, तत्र गौडी सुरा पैष्टी सुरा माध्वी सुरा इत्येवमात्रयैवान्वयबोधस्वीकरणे सुरापदत्रयस्य स्वसमसंख्यार्थबोधकत्वे-नाव्याप्त्यभावात्। न च चैत्र-मैत्र-देवदत्ता सुन्दरा इत्यत्र एकसुन्दरपदेन सुन्दरत्रि-तयबोधनात् तत्राव्याप्तिरिति वाच्यम्; अर्थपदस्यार्थतावच्छेदेकपरत्वेन सौन्दर्य्य-स्यैकत्वादेव। न च तथापि त्रिविधा सुरा इत्यत्राव्याप्तिरिति वाच्यम् अर्थतावच्छे-दकानेकत्वे आवृत्तेरेव स्वीकारात्।

(वि, ज) प्रातिपदिकस्येति—तन्मात्रस्येत्यर्थ। विभक्त्यन्तस्यैव पदत्वस्वीकारात्, नहि विभक्तिं विना शुद्धप्रातिपदिकस्य प्रयोगार्हता। नचानन्वितैकार्थपदे नैव तद्वारणमिति वाच्यम्; अभिहितान्वयवादे तस्यानन्विताभिधायित्वादेव।

(वि, झ) वाक्यमहावाक्ययोरिति—व्यवच्छेद इत्यत्रान्वय। तयो परस्परमन्वितार्थबोधकत्वादेव। अत्र च वाक्यस्यान्वितानेकार्थबोधकत्वादेकार्थबोधकत्वे-नैव तद्वारणसम्भवेऽपि तद् विशेषणदानमन्विताभिधानवादोऽस्माभिर्नाद्रियते इत्य-भिप्रायसूचनायैव इत्यवधेयम्।

---

* स्वार्थबोधेति—स्वार्थबोधने समाप्ताना स्वमर्थं बोधयित्वा निराकाङ्क्षाणा वाक्यानामङ्गाङ्गित्वव्यपेक्षया गौणमुख्यपर्य्यालोचनया पुन सहत्य (परस्परम्) समेत्य एकवाक्यत्व जायते।

1 'स्वार्थबोधसमाप्ताना' इति (ट. ठ. पु०)
2 " तत् इति " (ख. पु.)

एकेति साकाङ्क्षानेकपदवाक्यानाम् (अ)

अर्थबोधका इति क-च-ट-त-पेत्यादीनाम्[1] । वर्णा इति बहुवचनमविवक्षितम् । (ट, ई)

अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः ॥ ५ ॥

वर्णा[2] स्वरूपमाह—

वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः ।
व्यङ्ग्यो व्यञ्जनया तास्युस्तिस्रः शब्दस्य शक्तयः ॥ ६ ॥

(ट) (उ)

(वि, अ) **साकाङ्क्षानेकेति**—साकाङ्क्षाणि अनेकानि पदानि यत्र तादृशवाक्यानां व्यवच्छेद इत्यर्थः । अत्र च वाक्यानामित्येव विवक्षितं, वाक्यत्वेनैवानेकपदत्वपरस्परसाकाङ्क्षत्वयोः प्राप्तेः । स्वरूपाख्यानपरत्वादेव तयोरुपादानस्य, न चान्वितार्थबोधकत्वविशेषणादेवान्वितार्थबोधकवाक्यावृत्तेरिति वाच्यम्, परस्परान्वितार्थकवाक्यद्वयस्य मेलित्वा पदत्वापत्तिवारणपरत्वादेव वाक्यानामित्युक्तेः । अनन्वितार्थेत्यादिना तु एकैकवाक्यस्यैव वारणम् ।

(वि, ट) **क-च-ट-त पेत्यादीनामिति**—ननु प्रयोगार्हेत्यत्र प्रयोगो नोच्चारणमात्रं, तदा प्रातिपदिकवारणापत्तेः । किन्तु अर्थबोधनार्थमुच्चारणमेवावश्यं वाच्यम् । प्रातिपदिकमात्रस्य तदर्थमनुच्चारणात् । तथा च प्रयोगार्हपदादेव निरर्थक-क-च-ट-त-पादीनां वारणं स्यादिति चेत्, सत्यम् । अर्थबोधकत्वाऽनुपादानेऽर्थविशेषणस्यान्वितेत्यस्यानुपादानमनायत्यैव पर्य्यवस्यति । ततश्च तदनुपादाने वाक्यमहावाक्ययोरतिव्याप्त्यापत्त्या तद्वारणायाऽनन्वितेत्यस्य दानावश्यम्भावे तदनुरोधेन तद्विशेषस्यार्थस्य बोधकत्वमुपादेयम् । अत एव क-च-ट-त-पेत्यादेरपि वारणमित्यभिप्रायात् । कचटतपादयश्च पदैकदेशवर्णा एव बोध्याः, नतु ब्रह्मादिवाचकैकवर्णाः, तेषां सार्थकत्वात् पदत्वाच्च । अत एव वर्णा इत्यत्र बहुत्वाविवक्षामाह—**वर्णा** इति ।

(वि, ठ) योग्यताकाङ्क्षयोरर्थघटितत्वेन अर्थस्य प्रभेदमाह—**अर्थ** इत्यादि । स्वरूपं लक्षणम् । शक्तयो वृत्तयः ।

(लो, ई) **वर्णा** इति । बहुवचनमविवक्षितं तेनैकस्य वर्णस्य द्वयोरपि च परिग्रह एव च मयि सानुग्रहो भवेत्यत्र अकारस्य एकवर्णस्य वासुदेवसम्बन्धोक्तस्य न पदत्वहानिः । **तत्रेति**—यथासम्भवं पदवाक्ययोः ।

(लो, उ) (तत्राभिहितान्वयवादिना मते वाक्यार्थोऽपि पदाभिधेय इति वक्ष्यते । अन्विताभिधानवादिना मते च वाक्यमभिधेयं, शक्यस्य पदजन्यत्वात् । व्यङ्ग्यश्च

---

1 " कचटतपाना " इति (ख ग. पु०)

2 'तत्र एषा' इति (च छ पु०)

ता अभिधाद्याः ।

✓तत्र संकेतितार्थस्य बोधनादग्रिमाभिधा ॥ ७ ॥ (ङ)

उत्तमवृद्धेन मध्यमवृद्धमुद्दिश्य "गामानय" इत्युक्ते तं गवानयनप्रवृत्तमुपलभ्य बालोऽस्य वाक्यस्य "सास्नादिमत्पिण्डानयनमर्थं" इति प्रथम

(वि, ङ) तत्राभिधालक्षणमाह-**तत्र संकेतितार्थस्येति**। अभिधेति अभिधीयते बोध्यते इति योगार्थ एव लक्षणम्, तत्र कस्यार्थस्य बोधनात्तादृशो योगार्थ इत्यत्राह **संकेतितेति**। सकेतो वृत्तिर्न त्वभिधा, आत्माश्रयापत्ते। ततस्तद् ग्रहार्थं कारितम्। तत्र कर्मणि क्तप्रत्ययेन गृहीतवृत्तिकस्यार्थस्येत्यर्थ। एव चागृहीतवृत्तिकार्थबोधिका व्यञ्जना वारिता। न च व्यङ्ग्यार्थवाचकशब्दान्तरस्य गृहीतवृत्तिकमर्थं बोधयन्ती व्यञ्जना कथ वारितेति वाच्यम्। गृहीततद्वृत्तिकस्येत्यर्थात् ततश्च लक्षणायामतिव्याप्ति स्यादित्यत आह—**अग्रिमेति**। प्रथमगृहीतेत्यर्थ। लक्षणा तु शक्तिग्रहोत्तरं बाधावतारे सत्येव गृह्यते। अत एव व्याख्यास्यति-शक्त्यन्तरानन्तरितेति। केचित्तु तिसृणा वृत्तीनाम् अग्रोक्त्यग्रिमपदार्थं व्याचक्षते। तन्न। तद्भङ्ग्याभिधाभिधेयेवमनन्वयापत्ते, शक्त्यन्तरानन्तरितेति व्याख्यानुपपत्तेश्च।

(वि, ढ) तत्र शब्दव्यवहारदर्शनार्थं सकेतग्रह, तत् प्रकार दर्शयति-**उत्तमेति**। मतमाश्रित्य व्याचष्टे-**उत्तमेति**। मध्यम वृद्धम्। बालो व्युत्पित्सु। वाक्यस्याखण्डस्येत्यर्थ। सास्नादिमत् पिण्डानयनमस्य खण्डाय। ननु प्रत्येक गोशब्दस्य सास्नादिमान् पिण्ड। आनयनस्य आहरणमिति प्रतिपद्यते जानाति।

वर्णपदवाक्यादीनाम्। ये त्वन्वितादयो लक्ष्ये वाक्यार्थ इति ऊचु तन्मते तत्पर्य्य वृत्तिरेव वाक्यार्थबोधिका, द्वितीयलक्षणेत्यपरं नाम। ननु तत्र गङ्गाया घोष इत्यादौ तटार्थबोधिका वक्ष्यमाणलक्षणा वृत्ति। गौण्याश्च लक्षणायामन्तर्भावनीयत्वादेव गौणार्थस्य न पृथङ्निर्देश। इह व्यञ्जनाया अभिधालक्षणयो साहचर्य्यकथनप्रस्तावात् शब्दमात्रशक्तित्ववचनमुपलक्षणम्। व्यञ्जनाप्रस्तावे लक्षणाप्रस्तावे तु मद्गते 'सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च'इति वक्ष्यति।)

(लो, ऊ) क्रमेणाभिधादीनां स्वरूपमाह-**तत्रेति** एतत् कारिकार्थमन्विताभिधान

—सकेत करोति (बाधयति) सकेतयति (संकेत+णिच्)। सकेतो हि शब्दार्थयो प्रतिपाद्यप्रतिपादकलक्षण सम्बन्ध। अस्मात् शब्दात् अयमर्था बोद्धव्य इत्याकारक आप्ताभिप्रायो वा। 'अस्मात् पदात् अयमर्थो बोद्धव्य इतीश्वरेच्छासकेत शक्ति इति नैयायिकमत न युक्तम्। सकेतग्राह्य शक्त्याख्यपदार्थान्तरमभिधा इति भाभासकवैयाकरणाना मतम्॥

प्रतिपद्यते । अनन्तरं च "गां बधान, अश्वमानय" इत्यादावावापोद्वापाभ्यां गोशब्दस्य "सास्नादिमानर्थः" । आनयनशब्दस्य[1] च "आहरणमर्थ" इति संकेतमवधारयति । (ङ) (ऊ) +

अस्य वाक्यस्येति । अनेन प्रथमं वाक्यवाक्यार्थयोः शक्तिग्रहो दर्शितः । आवापः प्रतिज्ञा, उद्वापः उद्धारः । आवापोद्वापौ श्रुतपदत्यागेन तत्स्थाने पदान्तरश्रुतिः ।

अयमर्थ—शब्दतदर्थयोर्वाच्यवाचकत्वे व्युत्पन्नानामेव वाक्यार्थप्रतीतिः, व्युत्पत्तिश्च वृद्धप्रयोगादेव, स च वाक्यरूप एव, वाक्यं चान्वितबोधनियतम् । ततश्चोपदेशकाले-ऽन्वितं एव सम्बन्धग्रहणमिति । ननु तर्हि वाक्यभागरूपेषु पदेषु पदार्थबोधव्यतिरेकेण भिन्नवाक्यनिष्ठेषु पदेषु कथमर्थावबोध इत्यत आह—अनन्तरं चेति । अयमाशय.—यद्यपि वृद्धव्यवहारपूर्विकैव सर्वा व्युत्पत्तिः, वृद्धव्यवहारश्च वाक्येनैव, तथापि यस्य पदरूपस्य वाक्यभागस्य बोधे यस्यार्थभागस्यावापः, यदुद्धारे चोद्धारस्तस्मिन् पदार्थे तस्य पदस्य शक्तिरावापोद्धारदर्शनेनैवानुगृहीततयाऽर्थापत्त्याऽवगम्यत इति । एवं चात्र पक्षे प्रत्ययानुमानार्थापत्तिभिः प्रमाणैः संकेतग्रह इति सूचितम् । यदाहुः—

('शब्दवृद्धाभिधेयाश्च प्रत्यक्षेणान्न पश्यति ।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया ॥
अन्यथानुपपत्त्या च बोधेच्छाशक्तिद्वयात्मिकाम् ।
अर्थापत्त्या च बुध्येत सम्बन्धं त्रिप्रमाणकम् ॥' इति

अस्य ह्यर्थः—शब्दो गामानय इत्यादिवाक्यम्, वृद्धौ प्रयोजकप्रयोज्यौ, अभिधेयो गवानयनादिः । तान् श्रोता प्रत्यक्षेण पश्यति जानाति । अनुमिमीते शरीरं च—चेयं प्रयोज्य वृद्धस्य प्रवृत्तिः सा एतदनुगुणबुद्धि पूर्विका; प्रवृत्तित्वात्; मदीयैवंविधप्रवृत्तिवत् । सा च प्रवृत्तिरेतत्प्रयोगजन्या, एतदन्वयव्यतिरेकानुविधानादिति द्वयमाश्रयभूतस्य वाक्यस्य वाचकत्वनियमनं, विषयभूतस्य वाच्यत्वनियमनम् आत्मा-स्वरूपं यस्याः तथाभूतां शक्तिं वाचकवाच्यत्वरूपं सम्बन्धम् अन्यथानुपपत्त्या अर्थात् प्रयोजकवृद्धप्रवृत्तेर्जानाति । नन्वेवं भिन्नवाक्ययोगात् प्रतिवाक्यं व्युत्पत्तिरपेक्षणीया, साऽशक्या दुरुपपादेति शब्दव्यवहारोच्छेदे इत्यत आह—अर्थापत्त्या च इति । अत्र चरमेण बोधे तु शक्तिं द्वयात्मिकामित्यस्य

+ आवापोद्वापाभ्याम्—अन्वयव्यतिरेकाभ्याम्। प्रथमतः शक्तिग्रहश्च वृद्धव्यवहारादेव भवतीति दर्शयति—बालः 'गामानय' इति उत्तमवृद्धवाक्यश्रवणानन्तरं मध्यमवृद्धस्य गवानयनं दृष्ट्वा अश्वमानय गां बधान इति वाक्यान्तरं च मध्यमवृद्धस्य वाक्यं ज्ञातमवेदय अन्वयव्यतिरेकाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिं अश्वपदस्य अश्वत्वविशिष्टे शक्तिमिति व्युत्पद्यते इति भाव. ।

(1) "पदस्य" इति (ग. घ पु.)

क्वचिच्च प्रसिद्धपद[1] समभिव्याहारात् † यथा—
'इह[2] प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति ।"
इत्यत्र । क्वचिदाप्तोपदेशात् । यथा—
"अयमश्वशब्दवाच्यः" । इत्यत्र । (ऋ)
तं च सङ्केतितमर्थं बोधयन्ती शब्दस्य शक्त्यन्तरानन्तरिता (ऋ) * शक्तिरभिधा नाम । (ण)

(वि, ण) क्वचिच्चेति—समभिव्याहारोऽन्वयित्वेनैकवाक्ये निर्देश । प्रभिन्नेति—अत्र मधुपदं पिबतिपदं च प्रसिद्धम् । केनापि कृतोप्यगृहीतशक्तिकस्य मधुकरपदस्य समभिव्याहृतमधुपानान्वयित्वात् भ्रमरे शक्तिर्गृह्यते । तं च सङ्केतितामिति-तत्तद्ग्राहकगृहीतवृत्तिकमित्यर्थः । शक्त्यन्तरानन्तरितेति—शक्तिवृत्तिस्तद्ग्रहानन्तरितेत्यर्थः । इयम् अग्रिमपदव्याख्या ।

परामर्शः । अवबुध्यते इति पाठे स्वर्थत एव तत् परामर्शः । एवं चायमर्थः; गृहीतसंकेतवाक्यभागरूपस्य तदर्थद्वयात्मिकां शक्तिं वाच्यवाचकसम्बन्धाम् अवापोद्धारदर्शनानुगृहीततया अर्थापत्त्या जानातीति । अर्थस्तु वाक्यवाक्यार्थयोः वाच्यवाचकत्वसम्बन्धिनि बोधने एकार्थापत्तिः । पदतदर्थयोश्चापरेति द्वयोरप्यर्थापत्त्योः सामान्यत एकतयाऽगणनम् ।

(लो, ऋ) क्वचिदेकेनैवोपमानेन प्रमाणेन संकेतग्रहं दर्शयति—क्वचिच्चेति । अयमर्थः—त्रिधा खलु उपमानप्रमाणव्यवस्थिति; यदाहुः—"सादृश्यं धर्ममात्रं च वैसादृश्यं च भेदतः" इति, तत्र सादृश्ये गोसदृशो गवयः । वैसादृश्ये काकविसदृशः कोकिलः । धर्ममात्रे प्रकृतमेव । उपादेयमुदाहरणम्—अत्र हि प्रभिन्नकमलोदरे मधुपातृत्वधर्मप्रतिपादकैः पूर्वावधारितसंकेततया प्रसिद्धैः पदैः समभिव्याहारात् मधुकरपदार्थो भ्रमर इति सङ्केतमवधारयति । एतच्च उपलक्षणं; तेन गोसदृशो गवयः काकविसदृशः कोकिल इत्यनयोरुपमानप्रमाणेन सङ्केतग्रह सूचितः । क्वचित् शब्दप्रमाण इत्यत

---

† शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥
अतः अन्यानपि सङ्केतग्रहोपायान् दर्शयति ।

* अन्या शक्तिः शक्त्यन्तरं (लक्षणाव्यञ्जने) तेन न अन्तरिता (व्यवहिता) । अभिधा तु लक्षणां व्यञ्जनां च अनपेक्ष्य प्रवर्तते । लक्षणा व्यञ्जना च अभिधामनपेक्ष्य न प्रवर्तते ।

1 'प्रसिद्धार्थ' इति (ह. ज. पु०)
2 'इह' इति ह. पु. नास्ति ।

सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च ॥ ८ ॥

जातिर्गोपिण्डादिषु गोत्वादिका (×) गुणो विशेषाधानहेतुः (*) सिद्धो वस्तुधर्मः। शुक्लादयो हि गवादिकं सजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्त्तयन्ति। द्रव्यशब्दा एकव्यक्तिवाचिनो हरि-हर-डित्थ-डवित्थादयः। क्रियाः साध्यरूपा वस्तुधर्माः पाकादयः। एषु हि अधिश्रयणावश्रयणान्तादिपूर्वापरीभूतो[1] व्यापार-कलापः पाकादिशब्दवाच्यः+।

(वि, त) ननु सङ्केतितोऽर्थः किं धर्मी धर्मो वा इत्यत्राह—सङ्केतितेति। शब्द-भेदेन सङ्केतग्रहविषयोऽर्थो भिन्न इत्युक्तक्रमेण। विशेषाधानमितरतो वैलक्षण्यबोध-जनकम्, एतद् रूपो यो वस्तुधर्मः स सिद्धो नित्य इत्याह—सिद्धो वस्तुधर्म इति—एतन्मते गुणा अपि नित्या एव—उत्पत्तिविनाशप्रतीतिस्त्वाविर्भावतिरोभावरूपैव। गुणानां विशेषाधानं प्राहयति—शुक्लादयो हि इति—व्यावर्त्तयन्ति विलक्षणतया बोधयन्ति। हरि-हरेति। इदं च बाल्यादावस्थाभेदेन व्यक्तिभेदानङ्गीकारे। तदङ्गीकर्त्तृणां मते तु अयमपि जातिशब्द एव। आकाशविन्ध्यमन्दरादिशब्दा एकैकव्यक्तिद्रव्यवाचका बोध्याः। क्रिया

आह—क्वचिदिति। आप्तो विश्वस्तः, न च निर्द्धारितवचनः। तेनायमस्वशब्दवाच्य इयुक्तोऽप्यर्थः सङ्केतं गृह्णाति।

(लो, ऋ) अग्निमेति—अग्निकपदार्थं शक्त्यन्तरानन्तरितेति। तेन लक्षणाव्यञ्जनयोरस्य वैपरीत्यं सूचितम्। लक्षणा हि अभिधान्तरितैव, व्यञ्जना यत्र लक्षणा नास्ति तत्राभिधान्तरिता। तद्द्वितीयान्तरिता, यद् वा, अग्निमेत्यनेन यत्नामा यत्र चैत्रादि तत्नामाविषयतयापि स इयुक्तप्रकारकाश्रित चैत्रेत्यादिनाम्ना विषयादेरिव सान्तरायसंबेतिताऽद्वैतलक्षणं सूचितम्।)

(लो, लृ) इह केचिदाहुः, जातिरेव पदार्थः, केचित् जातिव्यक्ती, केचिद् व्यक्त्या-कृतिजातय इत्यादीनि मतान्तराणि परिहृत्य सर्वेषां वाङ्मयानां व्याकरणमूलत्वात् अलङ्कारमन्येषु च प्रायेण तदनुगतत्वेनैव व्यवहाराय महाभाष्यकारमामाश्रित्याह—सङ्केत इति। गुणपदार्थं विवृणोति—गुण इति। विशेषाधानहेतुरिति जातेर्व्यवच्छेदः। सिद्ध इति क्रियायाः। गुणानां विशेषाधानहेतुत्वोपपत्तिमाह—शुक्लादय इति।

× जातिर्नित्या च 'नित्यस्यैकस्यानेकसमवेतत्वम्'। तत्र प्रमाणमनुगतबुद्धिरेव। बुद्धेरनुगतत्वं च नानाविशेषेषु सत्येकप्रकारकत्वम्।

* विशेष—सजातीयेभ्यो व्यावर्तनम् (शिष अदर्शनेऽपि इति धातोः) तस्य आधानं प्रत्ययस्तस्य हेतुरित्यर्थः।

+ अधिश्रयणं पुनर्भ्रंशस्य अधोऽवस्थानम्, अवश्रयणं-स्रंसस्य अधोऽवस्थानम्, अधिश्रयणम् च अवश्रयणम् चाधिश्रयणावश्रयणे, आदिश्च अन्तश्च=अन्तौ(शब्दस्या-

1 "पूर्वापरीभूतव्यापारकलापः" इति (ख ज ग. पु)

एष्वेव हि व्यक्तेरुपाधिषु सङ्केतो गृह्यते न व्यक्तौ; आनन्त्यव्यभिचारदोषा-

---


इति–साध्यरूपा जन्यरूपा महाप्रलये परमाणूनामपि निष्क्रियत्वेन क्रियाया न नित्यत्वम्, अतस्तस्या जन्यत्वमेवेत्यतस्तस्याऽनाविर्भावतिरोभावकल्पना । अपाकजरूपाणि परमाणुवृत्तीनि–नित्यान्येव इत्यतस्तद्वृत्तिपदार्थविभाजकोपाधिमत्त्वरूप नित्यत्वं सर्वगुणानामेवेत्यभिप्राय । **एष्वेवेति**–एषु क्रियारूपवस्तुधर्मेषु बोध्येषु पाकादिशब्दवाच्योऽधिश्रयणावश्रयणान्तादिक्रियाकलाप इत्यर्थ । अन्यथाऽनेककक्रियाघटितपाके का क्रियापदधात्वर्थ. स्यादिति भाव । **एष्वेवेति**–द्रव्यं विना एषु व्यक्तेरुपाधिषु

गवादिकं जात्या लब्धगोव्यवहारयोग्यताकम् । **द्रव्येत्यादि** । हेतुं विनापि अयं डित्थः डवित्थ इत्यादिरूपेण शब्दग्राहिकया वक्तृसंकेतेन व्यक्तिषु सन्निवेशित । सजातीयशून्ये डित्थादयोपस्थापक शब्द संकेतस्य विषय इति । पूर्वापरीभूत. प्रथमक्रियाया अवयवरूपतया कार्य्यकारणभूतेन सन्तानीभूत । **एष्वेवेति**—एषु जात्यादिषु । इह च द्रव्यस्योपाधेर्विषयत्वासम्भवेऽपि तत्संज्ञाया उपाधित्वेन तत्त्वमुपचारात् । डित्थादयर्थे चानन्त्यव्यभिचाराभावात् उपाधिं विनैव सम्भवति वाच्यवाचकसम्बन्धसमयग्रह इति नोपाधिरपेक्ष्यते । वक्तृस्वेच्छावलम्बितस्य संज्ञाशब्दस्य स्वप्रवृत्तावुपाध्यु-

---

दिषु परमिति पूर्वनिपात) अधिश्रयणावश्रयणे अन्तादी यस्य स., स चासौ पूर्वापरीभूतश्चेति अधि ... -भूत. । अत्र मुख्यो धात्वर्थस्तु फलं, यथात्र पचेर्विक्लित्तिः; अत्र पूर्वं अधिश्रयणादि. अपरं अवश्रयणादि । तौ च पाक्रियावयवभूतौ तत्र पूर्वस्य परं प्रति साधनत्वम् अपरस्य पूर्वं प्रति साध्यत्वम् अस्ति। अत अवयवाना पूर्वापरीभावो भवति। ततो बहवो व्यापारा मिलित्वा एका क्रिया भवन्ति ।

'यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते ॥'



पातात्। (त, ल) +

इत्यर्थः। **आनन्त्येति**—गवादिव्यक्तीनाम् आनन्त्येन तत्र सर्वत्र शक्तिग्रहाऽसम्भवादित्यर्थः। यदि च एकव्यक्तावेव संकेतग्रह इत्युच्यते तदाह—**व्यभिचारेति**। यद्व्यक्तौ संकेतो गृहीतस्तदभिन्नस्तत्सजातीयव्यक्तावपि स्वरूपोद्बोधात् कारणं शक्तिग्रहं विनापि कार्य्यबोधाद् व्यभिचारदोष इत्यर्थः।

पगमे पुनरात्माश्रयदोषः। तथापि द्रव्यसंज्ञाया अप्युपाधित्वं प्रतीत्यनुरोधेनोक्तम्। अत एव गुणद्रव्यक्रियासु चेति द्रव्यक्रियासु चेति द्रव्यस्य संकेतविषयत्वमुक्तं, तत्राऽनन्त्यव्यभिचारदोषापाताभावात्। **आनन्त्येति**—व्यक्तीनामनन्तत्वात् प्रत्येकं च रेखोपरेखादिसंस्थानविशेषस्य च भिन्नत्वात् तत्राऽशक्यः समयग्रह इति। नन्वेवं गवादिपदेन संकेतितत्वात् जातावन्तर्हितायाः कथं व्यक्तिप्रतीतिः। अविनाभावस्यानुसन्धानमन्तरेणाङ्गोपकत्वाभावात्। यथा वा धूमादिगतस्य वह्न्यादेरविनाभावानुसन्धानं चाप्रानुपलब्धिबाधितं, तत्राऽनुपयोगितया व्यक्तेः शाब्दबोधित्वं विना शाब्देऽन्वये प्रवेशाऽसम्भव इति जात्यभिधायके शब्दे तद्बोधार्थं व्यञ्जनेव शक्तिरुपासितुमुचितेति रहस्यम्। एवं च जातिमात्रसङ्केतपक्षे च निर्विवादम्। किं च संशयापगमार्थम् उपात्तानि पदानि संसर्गस्य मुख्याङ्गं संसृज्यमानं व्यक्तिरूपं साक्षान्न बोधयन्ति, बहिरङ्गन्तु तदुपाधिभूतं सामान्यमेव बोधयन्ति, इत्यसङ्गतम्। ये त्वाहुः, 'व्यक्तिगर्भीचीनायामेव जातौ सङ्केतः' इति तैरपि प्रकृतस्य लक्षणस्याऽसङ्केतितत्वात् सङ्केतितभेदानामभावात्, प्रकृतसंसर्गयोग्यव्यक्तिप्रतीतौ शक्त्यन्तरमवश्यमभ्युपेयम्। सामान्यस्य सर्वविशेषव्यापकत्वात् सङ्केतेन सर्वविशेषज्ञाने तु सर्वस्यापि सर्वज्ञत्वापत्तिः। प्रथमोद्देशकाले तु सर्वव्यक्तीनां सामुख्याप्रतीयमानतया सामान्यलक्षितया प्रत्यक्षीक्रियमाणेऽपि पुनराधुनिकस्यापि स्वलक्षणस्य प्रथमोपदेशकालवत् सम्मुखीक्रियमाणेन प्रतीतिः स्यात्। ततश्चान्ययोपपादिकायाः साक्षात् प्रतीतेः पदस्य शक्त्यन्तरं विना किं बीजमित्यलं बहुना।

+—ननु व्यवहारादि सङ्केतग्रहः। न च व्यक्तिनिष्ठ एव, अतः व्यक्तावेव संकेत उचित—इत्यादिकं व्यक्तिसंकेतपक्षं निराकरोति—**आनन्त्येति**। अनन्तानां व्यक्तीनामनुपस्थितेः संकेतस्याऽशक्यत्वाद् व्यक्तौ संकेतः ग्रहीतुं न शक्यत इत्यर्थः। **व्यभिचारेति**—एकव्यक्तिविशेष्यकशाब्दग्रहं प्रति तद्व्यक्तिविशेष्यकसंकेतग्रहस्य कारणत्वं यत् वक्ष्यते तत्र कारणं विना कार्योत्पत्तौ व्यभिचारात् इत्यर्थः। अतो व्यक्तेरुपाधिषु प्रकारीभूतजातिगुणद्रव्यक्रियासंज्ञेषु गृह्यते। व्यक्तिप्रतीतिस्त्वाक्षेपादिद्वारेण।

अथ लक्षणा[1]—

✓ मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते ।
रूढेः प्रयोजनाद् वासौ लक्षणा शक्तिरर्पिता ॥ ९ ॥
(थ, ए) *

(वि, थ) लक्ष्यो लक्षणया ग्राह्य इत्युक्त्वा लक्षणाया लक्षणमाह—**मुख्यार्थे** ति । मुख्यार्थ शक्यार्थ, तत्रापरपदार्थस्यान्वयबाधे ज्ञाते सतीत्यर्थ । गङ्गाया घोष इत्यादौ मुख्यार्थस्य गङ्गाया अबाधात्, किन्तु अपरपदार्थस्य घोषान्वयस्यैव बाधात् । तद्युक्तो मुख्यार्थसम्बद्ध अन्यो मुख्यार्थादन्य । यथा वृत्त्या ज्ञातया इति शेष । न केवल मुख्यार्थबाधज्ञानाधीन तज्ज्ञान, अपि तु **रूढे प्रयोजनाद् वापी**ति । —रूढि भूरिकालप्रयोग । तथा च एतत्त्रितयज्ञापितया यया वृत्त्या मुख्यार्थादन्यो मुख्यार्थसम्बद्धोऽर्थ प्रतीयते असौ शक्तिर्वृत्तिर्लक्षणेत्यर्थ । सा चार्पिता वक्तृपुरुषेण लक्ष्यार्थविषयतया जनितेत्यर्थ, तथा च वक्तृतात्पर्य्यात्मिकैव सा बोध्या । नतु

(लो, ए) **अथे**ति—अथाभिधानन्तर लक्षणोद्देशक्रमप्राप्ता लक्षणा निरूप्यत इति शेष । **मुख्यार्थे**ति—मुख्याया गङ्गादिशब्दस्य जलमयादि तस्य च आधेयपदार्थान्तरेऽन्वयानुपपत्तौ, न च यत कुतश्चित् यदेव तदेव लक्ष्यते—अतिप्रसङ्गादित्यत आह—**तद्युक्त** इति । तेन मुख्यार्थेन येन केनचित् सम्बन्धेन सम्बद्ध अन्योऽर्थ तटादि यया शब्दशक्त्या प्रतीयते बोध्यते, न च सम्बन्धमात्रादपि लक्ष्यार्थप्रतीति अपि प्रसङ्गादेव इत्याह—**रूढेः प्रयोजनाद् वा** । क्वचिद् रूढे अनादिरूढव्यवहार-

---

*—**मुख्यार्थबाध** इति—मुख्यार्थ—अभिधेयार्थ, वाच्यार्थ । तस्य बाध पदार्थान्तरे अन्वयानुपपत्ति । तस्मिन् सतीत्यर्थ । तदुक्तं—

"वाच्यस्यार्थस्य वाक्यार्थ सम्बन्धानुपपत्तिक ।
तत् सम्बन्धवशप्राप्तस्याऽन्वयाल्लक्षणोच्यते" ॥

तद् युक्त इति । तत् पदेन समासे गुणीभूतस्याऽपि मुख्यार्थस्य परामर्श । तेन मुख्यार्थेन युक्त संयोगादिसम्बन्धेन सम्बद्ध । (एतेन मुख्यार्थबाधमुख्यार्थसम्बन्धयोर्लक्षणाबीजत्वं सूचितम्) अन्य मुख्यार्थाद् भिन्न अर्थ यया वृत्त्या प्रतीयते प्रतिपाद्यते असौ क्रियाव्यापार लक्षणा नाम । निमित्तभेदेन लक्षणाया द्वैविध्यमाह—**रूढेरिति**। रूढि प्रसिद्धरचनादिप्रयोग । प्रयोजन लक्षणास्वीकारफलम् (अत्र त्यबलोपे पञ्चमी) रूढिं प्रयोजन वा उद्दिश्य इत्यर्थ । **अर्पिते**ति—शब्दार्थयो स्वाभाविक सम्बन्ध सङ्केत इति येषा (मीमासकाना) मत तेषा मते अर्पिता स्वाभाविकेतरा—स्वाभाविकव्यापारात् (सङ्केतात्) अन्या । तादृशी ईश्वरेच्छा सङ्केत इति येषा (नैयायिकाना) मत तन्मते ईश्वरानुद्भाविता ईश्वरेण अनाविष्कृता इत्यर्थ ।

1 "निरूप्यते" इति (ग घ पु अधिकपाठ)

"कलिङ्ग. साहासिकः" इत्यादौ कलिङ्गादिशब्दो देशविशेषादिरूपे स्वार्थे असम्भवन् यया [1]शब्दशक्त्या स्वसंयुक्तान् पुरुषादीन् प्रत्याययति, यया च 'गङ्गायां घोषः' इत्यादौ गङ्गादिशब्दो जलमयादिरूपार्थवाचकत्वात् प्रकृते असम्भवन् स्वस्य सामीप्यादिसम्बन्धसम्बन्धिन तटादिं बोधयति, सा शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम । पूर्वत्र हेतू रूढिः

नैयायिकोक्तशक्त्यसम्बन्धरूपा, तस्या वक्तृताऽन्येन वाऽर्पितत्वाभावात् । या तु व्यङ्ग्यार्थे तात्पर्य्याख्या वृत्तिर्ध्वनिकेनोक्ता या च पदार्थद्वयससर्ग तात्पर्य्याख्या वृत्ति प्राचीननैयायिकैरुक्ता सा नैतात्रितय ज्ञापिता, इत्यतो भिन्नैव सा । मुख्यार्थेऽपरपदार्थान्वयबोधेऽपि तात्पर्य्यविषयस्य तादृशान्वयस्य मुख्यतावच्छेदकरूपेण बोधानुपपत्तिरेव, तेन छत्रिणो गच्छन्ति कुन्ता प्रविशन्तीत्यत्र मुख्यार्थयो छत्रिकुन्तयो गमनप्रवेशान्वयसत्त्वेऽपि निरुक्तमुख्यार्थबाधसत्त्वान्नाऽव्याप्ति । छत्रिसार्थवाहित्वेन कुन्तित्वेन च रूपेणान्वयस्य तात्पर्य्यविषयस्य मुख्यतावच्छेदकच्छत्रित्वकुन्तत्वाभ्यामनुपपत्ते । अत्र च तात्पर्य्यविषयत्वानुपादाने तु छत्रिकुन्तयोर्गमनप्रवेशान्वयस्य मुख्यतावच्छेदकच्छत्रित्वकुन्ताभ्यामुपपद्यमानत्वात्–तत्राव्याप्त्यापत्ते । एव मुख्यतावच्छेदकरूपेण इत्यनुपादानेऽपि तयोरेवाव्याप्ति स्यात् । तात्पर्य्यविषयस्य छत्रिसार्थवाहिनो गमनान्वयस्य कुन्तिन प्रवेशान्वयस्य च लक्षतावच्छेदकच्छत्रिसार्थवाहित्वकुन्तित्वाभ्यामुपपत्ते । अन्योऽर्थ इत्यनापि मुख्यतावच्छेदकान्यधर्मावच्छिन्न इत्यर्थ । तेन घटपदस्य नील घटे लक्षणाया तस्य घटान्यत्वाभावेऽपि नाव्याप्ति । मुख्यतावच्छेदकघटत्वाऽन्यनीलघटत्वावच्छिन्नत्वात् ।

(वि, द) व्याचष्टे—फलिङ्ग इति । स्वाभाविकेतरेति । गवादिशब्दस्य स्वभावसिद्धा वृत्ति शक्तिस्तद्भिन्ना । स्वाभाविकस्यापि पुनरुक्तत्वगौरवादाह—ईश्वर मात्रनियमितेतरेत्यर्थ । मात्रगर्भत्वाकरणे वक्तृतात्पर्य्यस्यापि ईश्वरनियतत्वात्तस्य च

प्रसिद्धे क्वचित् प्रयोजनात् पावनत्वाद्यतिशय प्रयोजनमुद्दिश्य । अर्पितपदार्थेऽय वृत्तावेव सुव्यक्त । एव चात्र लक्षणाया हेतुत्रय मुख्यार्थबाध, च तत् सम्बन्ध, क्वचित् रूढि क्वचित् प्रयोजन चेति ।

(लो, ऐ) उदाहरणदर्शनपूर्वक कारिकार्थं वृत्त्या विशदयति—फलिङ्ग इति । स्वार्थं वाच्यरूपेऽसम्भवन् देशविशेषादिरूपार्थस्याऽचेतनतया साहसिकाद्यर्थेनाऽन्वयानुपपत्त्याऽनुपपद्यमानप्रयोग कुत इत्याह—जलमयादिरूपार्थस्य वाचकत्वात् । अयमर्थ—गङ्गादिशब्दो यस्मात् जलमयादिरूपमेवार्थं समयस्मरणाकातर सन् स्मारयति,

---

1 'शब्दस्य' इति (ख ग पु०)

प्रसिद्धिरेव। उत्तरत्र 'गङ्गातटे घोष' इति प्रतिपादनाद[1]लभ्यस्य शीतत्व-पावनत्वातिशयस्य बोधनरूप प्रयोजनम्। हेतुं विनापि यस्य कस्यचित् सम्बन्धिनो लक्षयेतिप्रसङ्ग स्यादित्यत उक्तम्—'रूढे. प्रयोजनाद्वासौ[2]' इति।

(द) ऐ)

केचित्तु 'कर्मणि कुशल' इति रूढावुदाहरन्ति। तेषामयमभिप्राय 'कुश' लाति' इति व्युत्पत्तिलभ्य. कुशग्राहिरूपो मुख्योऽर्थः प्रकृते असम्भवन् विवेचकत्वादिसाधर्म्यसम्बन्धसम्बन्धिन * दक्षरूपार्थं[3] बोधयति। तदन्ये न मन्यन्ते, कुशग्राहिरूपार्थस्य व्युत्पत्तिलभ्यत्वेऽपि दक्षरूपस्यैव मुख्यार्थत्वात्।

तद्भिन्नत्वानुपपत्ते। ईश्वरानङ्गीकर्तृमीमांसकमते तु शक्तिरूपादतिरिक्तपदार्थान्तरा-दितरेत्यर्थ। शक्तिरिति। पूर्वत्रेति—कलिङ्ग साहसिक इत्यत्रेत्यर्थ। प्रसिद्धिरिति भूरिकालप्रयोग इत्यर्थ। अतिप्रसङ्ग इति—इय कविप्रयोगार्हा लक्षणा व्युत्पाद्यते। रूढिप्रयोजनशून्या, लक्षणा तु नेयार्थ इति वक्ष्यते, सा च काव्ये दोष एव। तत्राति-प्रसङ्ग स्यादित्यर्थ।

(वि, ध) काव्यप्रकाशकृदुक्त रूढिलक्षणोदाहरण दूषयितुमुत्थापयति-केचित्तु इति। प्रकृते असम्भवन्निति—कर्मणान्यस्य लौकिककर्मपरत्वेन तन्निमित्त कुशग्रहणम-सम्भवदित्यर्थ।

तस्माद् वाच्यरूपस्य जलार्थस्य घोषार्थेन सहान्वयानुपपत्त्या प्रकृते वाचकत्वेन तस्य प्रयोगो न घटत इति। स्वस्यात्मीयस्य वाक्यार्थस्य जलमयादे, तस्यारोप-मात्र्योपनयनम्। सम्बन्धस्यान्वयस्य, तद्धि तटशब्दार्थं यया बोधयतीति सम्बन्ध। भट्टमते स्वाभाविकी अभिधा, तदन्या पदस्य शक्तिर्व्यापार, तेषामीश्वराऽनादरात् सङ्केतस्यानादिव्यवहारप्रसिद्धिस्वीकाराच्च। ईश्वरानुद्भाविनेति नैयायिकमतम्। तद-नयोरेकतरा स्वाभाविकी, इतरा ईश्वरानुद्भाविनेति द्विधा व्याख्यातम्। पूर्वत्र कलिङ्ग साहसिक इत्यत्र, उत्तरत्र गङ्गायां घोष इत्यादौ। गङ्गातट इत्यादौ तटस्य गङ्गाशब्देन प्रतिपादनात् गङ्गातादात्म्यप्रत्ये गङ्गार्थनिष्ठानां तदर्थनिष्ठातिशयितानां शीतत्व पावनत्वादीनां प्रतीतिर्लक्षणाया फलमित्यर्थ।

(लो, ओ) केचित्त्विति—प्रकृते कर्मणि कुशल इत्यनेनापि अर्थतयाऽसम्भ

---

*—प्रकृते-कर्मणि परान्यादिव्यापारे अयोग्यत्वात् अन्वयानुपपत्ते। एवत्र च परि हारेण अन्यतरोपादानम् अत्र विवक्षितम्। कुशग्रहिण इत्यादिपरिहारेण दर्भोपादा-

1 'प्रतिपादनाभ्यस्य' इति ङ ज पु०।
2 'वासौ' इति ङ ज पु०।
3 'कुशान्' इति ङ ठ पु०।
4 'रूपमर्थं' इति ट. ट. पु०।

अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तम् अन्यच्च प्रवृत्तिनिमित्तम्। व्युत्पत्तिलभ्यस्य मुख्यार्थत्वे 'गौः शेते' इत्यत्रापि लक्षणा स्यात् "गमेर्डो" (उ र. ६७) इति[1] गम्धातोर्डोप्रत्ययेन व्युत्पादितस्य गोशब्दस्य शयनकालेऽपि[2] प्रयोगात्×। (घ) तद् भेदानाह। (ओ)

दत्तस्यैव मुख्यार्थत्वादिति—भूरिप्रयोगेण दत्तत्वस्य लघुत्वेन च तदवच्छिन्नस्यैव शक्यत्वेन मुख्यत्वादित्यर्थः। अन्यद्धि इति—व्युत्पत्तिर्योगार्थबोधः। प्रवृत्ति प्रयोगः। तथा च तेनैव निमित्तेन शब्दस्य प्रवृत्तेस्तदवच्छिन्न एव मुख्यार्थ इत्यर्थः। लक्ष्यार्थे क्वचित् प्रयोगस्तु तात्पर्यविशेषमत्वे एव, यथा दक्षे शठस्य कुशलपदस्य गृहविशेषे शाकस्य मण्डपपदस्य च दैवकर्मणि कुशल इति रोगी मण्डप इति च तयोर्दैवकर्मरोगिपदसमभिव्याहारस्य तात्पर्यग्राहकत्वात्। गौः शेते इत्यत्र शेते इति मुख्यगो-प्रदर्शनार्थमेव। गौरस्तीति मुख्यगवि प्रयोगेऽपि लक्षणा स्यादिति बोध्यम्। अयं च प्रतिबन्धः न सर्वसम्मतः। उणादिप्रत्ययानां व्युत्पत्तेः प्रायिकत्वेन तया प्रयोगाभावात्। अत एव चिन्तामणिकृतोक्तं "पचपादिकलभ्यान् उणादिप्रत्ययान्" एवेनैव 'उणादयो बहुलम्' इति सूत्रेण वदता पाणिनेः अयमभिप्रायो यदुणादिप्रत्ययानां प्रायिक्येव व्युत्पत्तिरिति, तथा च न तया प्रयोगः। तथा च गोत्वेनैव रूपेण रूढिशक्त्या गोपद स्वपदगच्छद् गोसाधारण्येन प्रयुज्यते, न उणादि प्रत्ययव्युत्पत्त्या इति।

वन् अनुपपत्तिर्बाधिता। विवेचकरूपस्य मुख्यार्थत्वादित्यनेन मुख्यार्थबाधाभावादत्र कथं लक्षणेत्यर्थः।

गोशब्दो यद्यपि गमनाया व्युत्पत्तिनिमित्तं तथापि गोत्वापत्तिक्रियैव प्रवृत्ति-निमित्तम् अत एव गच्छत्यागच्छति गवि गोशब्दप्रयोगः। यदाह, पटशब्दप्रयोगे—'तन्तौ च तदात्मत्वापत्तिरूपा क्रिया मता' इति। तद्भेदानिति,—तयोः रूढिप्रयोजनाभ्यां द्विधोक्तयोर्लक्षणयोर्भेदान् विशेषान् भिनत्तीत्यनेन हीत् भेद इति व्युत्पत्त्या।

नाद् विवेचकत्वम्। दत्तस्याऽपि प्रकृतानुपयुक्तपरिहारेण प्रकृतोपयुक्तग्रहणाद् विवेचकत्वमुभयोः साधर्म्यम्। विवेचकत्वादि यत् साधर्म्यं समानधर्मवत्ता तद्रूपं यत् सम्बन्धः तेन सम्बन्धिनम्।

×—अत्र लाघवोद्धारादाने कर्तृविहितप्रत्ययस्य कर्तरि शक्तत्वेन कुशग्रहित्वस्य व्युत्पत्तिलभ्यत्वेऽपि न मुख्यार्थत्वम्। रूढिरियम्। वाचकशब्दस्त्रिविध —रूढो, यौगिकरूढो यौगिकश्चेति। अवयवशक्तिनिरपेक्षेण समुदायशक्त्याऽनादिप्रयोगविषयत्वं रूढत्वं यथा मण्डपादिशब्दा। औणादिकास्तु रूढा एव, अवयवशक्तेरभावात्। अवयवशक्तिर्ण

1 'इति' इति क पु नास्ति।

2 'शयनकालेऽप्रयोगात्' इति (ट ठ पु०)

मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये ।
स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा ॥ १० ॥ (न)

रूढावुपादानलक्षणा यथा–'श्वेतो धावति' । प्रयोजने यथा–'कुन्ताः प्रविशन्ति' । अनयोर्हि श्वेतादिभि कुन्तादिभिश्च अचेतनतया केवलैर्धावनप्रवेशनक्रिययो कर्तृतयाऽन्वयमलभमानैरेतत्सिद्धये आत्मसम्बन्धिनोऽश्वादयः पुरुषादयश्चाक्षिप्यन्ते । (प)

(वि, न) तद्भेदानाह—**मुख्यार्थस्येति** । वाक्यार्थे बोध्ये, मुख्यार्थस्य तात्पर्यविषयान्वयसिद्धये इतरस्य अमुख्यार्थस्याक्षेप प्रत्यायनमित्यर्थ । अन्वयवाक्यार्थयोरभेदात् वाक्यार्थ मुख्यार्थस्यान्वयसिद्धये इति नान्वय । अत्रापि यथेति शेष । अस्या उपादानसंज्ञाव्युत्पत्तिमाह—**स्यादात्मनोऽपीति** । आत्मनो मुख्यार्थस्यापि । अत्र तात्पर्यविषयत्व यदि अन्वयविशेषण न क्रियते तदा छत्रिणो गच्छन्ति कुन्ता प्रविशन्ति इत्यादिषु अव्याप्ति स्यात्, अत्र तात्पर्यविषयस्य शुद्धशक्यार्थस्यान्वयसिद्धिसम्भवेन तदर्थमतेरपामच्छत्रिकुन्तादीनामनाक्षेपात् । इतरसाहित्येनाऽन्वये तात्पर्यवशादेव शुद्धमुख्यान्वयस्य बाधोऽवधेय । तद्बाधोऽपि मुख्यता वच्छेदकरूपेणासम्भवरूप एव, लक्षणावच्छेदकरूपेण तु नासम्भव इति बोध्यम् ।

(वि, प) लक्षणासामान्यलक्षणोक्त रूढिप्रयोजनान्यतरहेतुकत्वमत्र धन्यन्नुदाहरति—**रूढावुपादानेति** । श्वेत श्वेतगुणवान् । कुन्ता इति कुन्तवन्त इत्यर्थ अनयोर्मुख्यार्थान्वयबाध दर्शयति ।

अनयोरिति । श्वेतादिभिरित्यादिपदात् नालादिगुणाना कुन्तादिभिरित्यादिपदात् अस्त्रान्तराणा च परिग्रह । **अचेतनतयेति** । इदमेतदुदाहरणाभिप्रायेणोक्तम् । वस्तुतस्तु छत्रिणो गच्छन्ति इत्यत्र छत्रिणश्चेतनत्वेऽपि तात्पर्यविषयच्छत्र-

---

(लो, औ) मुख्यार्थेति—मुख्योऽभिधेयोऽर्थ लस्य इतर प्रकृतनिर्वाहोपायिक, तस्याक्षेप आकृत्य उपनयनम् । अन्वयसम्बन्धस्य सिद्धये निर्वाहाय । आत्मनोऽप्युपादानात्, अयमर्थ इह सम्बन्धिधया बोधितस्यापि श्वेतकुन्तार्थस्य

चित्येन समुदायशक्त्याऽनादिप्रयोगविषयत्व योगरूढत्व यथा पङ्कजपथकजादिशब्द । यत्र रूढ्यर्थयोगार्थयोरेकत्र धर्मिणि समावेशस्तत्र रूढेन योगापहारित्व यथा पङ्कजादि । यत्र तु तयोर्विरोधस्तत्र योगापहारित्व यथा मण्डपादि । तत्र हि मण्डपानकर्तृत्वरूपयोगार्थस्य गृहविशेषविषयसमुदायशक्त्या प्रतिरोध । अत एव रूढिर्लक्षणिका योगमपहरतीति प्रवाद । रूढेर्लक्ष्यासमवेतसमयवशक्तयनुसन्धान विना जायमानत्वम् । रूढिरनादिप्रयोग इति । अवयवशक्तिपुरस्कारेण त्वाधुनिकप्रयोगविषयत्व यौगिकत्व यथा पाचकादिशब्द । रूढेर्योगापहारित्वात् कुशलपद न यौगिक दक्षार्थ रूढमेव ।

पूर्वत्र प्रयोजनाभावात् रूढिः । उत्तरत्र तु कुन्तादीनामतिगहनत्वं प्रयोजनम्। अत्र च मुख्यार्थस्यात्मनोऽप्युपादानम्; लक्षणलक्षणायान्तु परस्यैवोपलक्षणमित्यनयोर्भेदः । इयमेव "अजहत् स्वार्था" इत्युच्यते+। (फ) (औ)

अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये ।
उपलक्षणहेतुत्वादेषा लक्षणलक्षणा ॥ ११ ॥ × (ब)

रूढिप्रयोजनयोर्लक्षणलक्षणा यथा—'कलिङ्ग साहसिक', 'गङ्गायां घोषः'

न्वयस्यालाभ एव सर्वसाधारणो मुख्यार्थबाधो बोध्य । अश्वादय इत्यादिपदाच्छ्वेतगवादे, पुरुषादय इत्यादिपदात् कुन्तधारिवत् इतरस्य परिग्रह ।

(वि, फ) **प्रयोजनाभावादिति**—रूढिसत्त्वादेव प्रयोजनाऽननुसन्धानात् तदभाव । प्रयोजन प्रयोजनीभूतज्ञानविषय । एव रीत्यैव पावनत्वादिरपि प्रयोजनपदार्थो बोध्य । **लक्षणलक्षणायामिति**—वक्ष्यमाणायामिति शेष । परस्यैवेति एवकारान्मुख्यार्थव्यवच्छेद । उपलक्षणमुपस्थापनम् ।

(वि, ब) लक्षणलक्षणामाह-**अर्पणमिति**। अत्र अर्पणमित्यत्र परस्यैवेति शेष, स्वस्य परमात्मविषयता इत्यर्थ । ननु मुख्यार्थविषयतापीत्यर्थ । उपादानलक्षणाया तु मुख्यार्थस्यापि विषयता इति भेद । स्वस्येत्यत्र यस्या इति शेष । तथा च वाक्यार्थे बोध्ये परस्य अमुख्यार्थस्य अन्वयसिद्धये अन्वयबोधाय यस्या लक्षणाया स्वस्य अर्पण परमात्मविषयता एषा लक्षणलक्षणेत्यर्थ-। वाक्यार्थान्वयगौरवभेदाद् वाक्यार्थे परस्यान्वयसिद्धये इति तु नान्वय । तादृशसज्ञाव्युत्पत्तिमाह—उपलक्षणेति। मुख्यार्थं विहायाऽमुख्यार्थमात्रबोधनम् उपलक्षण स्वस्य तद्धेतुत्वादित्यर्थ ।

(वि, भ) अत्र रूढिप्रयोजनहेतुकत्वे यथासख्यमुदाहरणद्वयमाह—कलिङ्ग

पुन पुरुषादेर्विशेषणतया लक्षणीयत्वेन उपादानमिति । अतिगहनत्वं-कुन्तयुक्ता पुरुषा प्रविशन्तीति अभिधानात्तथम्। उच्यते-परैरिति शेष ।

(लो, अ) अर्पण स्वस्य गङ्गादे । परस्याम्रस्य तटादिरूपलक्षणहेतुत्वात् साम्यन्यमात्रस्य इत्यर्थ ।

+—स्वार्थाऽपरित्यागेन परार्थलक्षणमुपादानमित्यर्थ । स्वार्थ-परित्यागेन परार्थलक्षण लक्षणम्। अजहत् स्वार्थो या-सा अजहत् स्वार्था ।

×—यत्र वाच्यार्थस्य अन्वयस्तत्र उपादानलक्षणा । यत्र च वाच्यार्थस्य अन्वयाभावस्तत्र लक्षणलक्षणा । ननु काकेभ्यो दधि रक्षतामित्यादौ मुख्यार्थस्य अन्वयसिद्धये नेतराक्षेप । इत्याक्षेप विना अन्वयसद्भावात् । इति चेन्न—तत्र हि काकप्रतियोगिकदधिरक्षण न वाक्यार्थ । किन्तु काकाऽसाधारणदध्युपघातकत्वमात्रप्रतियोगिक रक्षणम् । तत्र काकमात्रस्य न अन्वयायोग्यता इति दध्युपघातकत्वेन लक्षितावच्छेदकेन अन्वया लक्षणा भवति इति अत्रापि उपादानलक्षणा ।

इति च। अनयोर्हि पुरुषतटयोर्वाक्यार्थेऽन्वयसिद्धये कलिङ्गगङ्गाशब्दावात्मानमर्पयत । (भ, अ) यथा वा-

"उपकृत बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे ! सुखितमास्स्व तत. शरदा शतम् ॥" *

अत्रापकारादीना वाक्यार्थेऽन्वयसिद्धये उपकृतादय: शब्दा आत्मानमर्पयन्ति । अपकारित्व प्रत्युपकारादिप्रतिपादनान्मुख्यार्थबाधो वैपरीत्यलक्षण सम्बन्ध; फलमप्यपकारातिशय । इयमेव "जहत्स्वार्था" इत्युच्यते । (म, आ) + ५२ ८

इत्यादि । अत्र कलिङ्ग साहसिक इति न पाठ । किन्तु कलिङ्ग साहस करोति इत्येव पाठ । साध्यवसानालक्षणाया उदाहरणप्रसङ्गे व्यक्तिर्भावष्यतीत्यर्थ । उभयत्रैव मुख्यार्थ कलिङ्गरूप देश प्रवाहरूपा गङ्गा च विहाय तद्देशस्थपुरुषतत्तीरयो परयोरन्वयप्रबोधाय पुरुषतटि-रूप-मात्र विषयता लक्षणाया । तदर्शयति—अनयोर्हीति। वाक्यार्थबोध्ये पुरुषतटयोरन्वयसिद्धये इत्यन्वय । समर्पयत इत्यत्र परमात्र इति शेष। परमात्र —विषयीकुरुत इत्यर्थ । कलिङ्गगङ्गाशब्दौ इत्यत्र कलिङ्गगङ्गाशब्दपदं तन्निष्ठलक्षणाद्वयपर यथा व्याख्यातार्थानुसारेण बोध्यम् । एवमुत्तरत्रापि व्याख्येयम् ।

(वि,म) प्रयोजनहेतुकत्वे उदाहरणान्तरमाह-यथा वा-उपकृतमिति। अपकारित्वेन अन्यतो ज्ञात प्रतीयमुक्ति । त्वया बहु उपकृत तत्र किमुच्यत इत्यर्थ । यत्रेति पाठे तु तत्रेति पूरणीयम्। अपकारादीनामिति-अनादिपदाद् दुर्जनत्वादु खितयो परिग्रह । फलम् अपकारातिशय इति फलीभूतज्ञानविषय इत्यर्थ । एवमुत्तरोत्तरमपि बोध्यम्। इद च न रुचिरमुक्तम्। लक्ष्यार्थतिशयस्य प्रयोजनत्वे रूढिलक्षणायामपि तत्सम्भवात् विशेषाभावापत्ते । किन्तु अपकारदुर्जनत्वलक्षणयो फल सम्बो यस्य कौटिल्य दु खितलक्षणायास्तु कौटिल्यफलत्वम् ।

(लो, आ) अपकारादीनामित्यादिशब्देन दुर्जनत्वदु खितत्वे उपकृतादय इत्यादि शब्देन सुजनत्वसुखितत्वे । अपकारातिशय -स्वशब्दाभिधानालभ्य ।

---

* बहुभिरपकारै तप्यमानस्य उक्तिरियम्—यत् त्वया बहु उपकृतं, तद् विषये किं वाच्यम् ? बहुत्वात् उपकाराणा वक्तु न शक्यते इत्यर्थ । भवता पर केवल सुजनता प्रथिता प्रकटीकृता । हे सखे तस्मात् ईदृशमेव सदा विदधत् कुर्वन् शरदा वर्षाणा शत सुखित सुखयुक्त यथा स्यात्तथा आस्स्व तिष्ठ इति मुख्योऽर्थ ।

+ स च प्रकरणादिना अपकारित्वे बाधित सन् विपरीतम् अपकारार्थं लक्षयति तद् यथा-उपकृतम्-अपकृत, सुजनता, दुर्जनता, सख-शत्रौ, सुखित-दु खितमित्यर्थ ।

आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा ॥१२॥ (य)
ता पूर्वोक्ताश्चतुर्भेदलक्षणा[1]।
विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्।
सारोपा स्यान्निगीर्णस्य मता साध्यवसानिका ॥१३॥

विषयिणा अनिगीर्णस्य विषयस्य तेनैव सह तादात्म्यप्रतीतिकृत् सारोपा। इयमेव रूपकालङ्कारस्य बीजम्[2]। (र, इ) +

रूढावुपादानलक्षणा सारोपा यथा–"अश्व श्वेतो धावति"। अत्र हि

(वि, य) उपादानलक्षणलक्षणाद्वय रूढिप्रयोजनद्वयहेतुकत्वेन चतुर्विधमुक्तम्। अधुना तच्चतुष्टयस्य द्वैगुण्येनाष्टविधमाह—**आरोपेति**। लक्ष्यार्थे प्रथमत शक्यार्थाऽभेदारोप आरोप। तस्यारोपस्य उत्कटत्वमध्यवसानम्।

(वि, र) ते कीदृशत्वे सति भवत इत्यत्राह—**विषयस्येति**। विषय आरोपाधिकरण लक्ष्यार्थ। तस्य अनिगीर्णस्य अनाच्छादितस्य अर्थात् स्ववाचकनामपदेन अनुक्तस्य अन्यतादात्म्य शक्यार्थाभेद। तत्प्रतीतिकृल्लक्षणा सारोपा स्यादित्यर्थ। निगीर्णस्य विशेष्य स्ववाचक-नामपदेन अनुक्त्य तु साध्यवसानिका मतेत्यर्थ। अन्यतादात्म्यप्रतीतिश्च लक्षणज्ञानत पूर्वं बोध्या। तत्प्रतीतिकृच्च यद्यपि समानविभक्तिकपदद्वयमेव, न तु लक्षणा, तथाप्यन्यतादात्म्यप्रतीतिपूर्वकप्रतीतिकृदित्येवान्यतादात्म्यप्रतीतिकृदित्यस्यार्थ। न च साध्यवसानाया स्ववाचकनामपदेनाऽनिर्देशे समानविभक्त्यन्तपदाभावात् कथ तादात्म्यप्रतीतिकृदिति वाच्यम्, आख्यातेन लक्ष्यार्थस्योक्तौ तत् प्रतीते, तच्चाग्रे दर्शयिष्यते।

(वि, ल) **अश्वःश्वेत** इति—अत्र श्वेतगुणवानश्व लक्ष्योऽर्थोऽनिगीर्णोऽश्व-

---

(लो, इ) एव चतुर्विधापि लक्षणा प्रत्येक सारोपा साध्यवसाना इत्यष्टविधेत्याह–**आरोपेति**। अनिगीर्णस्वरूपसामान्यतादात्म्यप्रतीतिरारोप। विषयनिगरणेऽभेदप्रतिपत्तिर्विषयिणोऽध्यवसानम्। एव स्वशब्दार्थनाम्ना गतार्थेऽपि स्फुटीकरणाय, लक्षणेन निर्दिशति—**विषयस्येति**।

(लो, ई) अश्व आरोपविषय। स्वसमवेत इत्यनेन समवायरूपस्य लक्षणाहेतो

+ विषय —आरोपाधिकरण घाहीकादिरित्यर्थ। विषयी आरोप्यमाणो गवादि। विषयविषयिणो भेदेन उपन्यास आरोप। तत्रार्थे रूपकालङ्कारे विषयविषयिणोरुपादानात् सारोपा। विषयिणा विषयस्य तिरोभाव –अध्यवसानम्। तत्र विषयिमात्रोपादानादतिशयोक्त्यलङ्कारे साध्यवसाना। निगरण भेदस्यधर्म्मस्याग्रहणम्।

1 ता पूर्वोक्ताश्चतुर्भेदलक्षणा' इति ग पु नास्ति।

2 विषयिणेत्यादिर्बीजमित्यन्तश्च पाठ स. ग प पु नास्ति।

श्वेतगुणवानश्वोऽनिगीर्णस्वरूप स्वसमवेत[1]गुणतादात्म्येन प्रतीयते ।

प्रयोजने यथा—'एते कुन्ता प्रविशन्ति' । अत्र सर्वनाम्ना कुन्तधारिपुरुष निर्देशात् सारोपात्वम्[2] (ल, ई)

रूढौ लक्षणलक्षणा सारोपा यथा—'कलिङ्ग पुरुषो युध्यते' । अत्र कलिङ्ग [3]पुरुषयोराधाराधेयभावः सम्बन्धः । प्रयोजने यथा-आयुर्घृतम् । अत्रायुष्कारणमपि घृत कार्य्यकारण[4]भावसम्बन्धसम्बन्ध्यायुस्तादात्म्येन प्रतीयते । अन्यवैलक्षण्येनाव्यभिचारेणायुष्करत्व प्रयोजनम् । *

यथा वा राजकीये पुरुषे गच्छति "राजासौ गच्छति" इति । अत्र स्वस्वामिभावलक्षण सम्बन्ध । यथा वा [5]'अग्रमात्रेऽवयवे हस्तोऽयम् ।

शब्देनैवोक्तत्वात् । श्वेतगुणाश्वयो समानविभक्तया तादात्म्यप्रतीति । **प्रयोजने यथा**—इति उपादानलक्षणेति शेष । **एते कुन्ता** इति, कुन्तानामविरलत्वमत्र प्रयोजनम् । कुन्तवान् लक्ष्यार्थ । एतत् पदेनोक्तत्वात् अनिगीर्ण । **अत्र सर्वनाम्नेति**—काव्यप्रकाशे तु सर्वनाम्ना लक्ष्यार्थनिर्देशे विशेष्य स्ववाचककुन्तादिपदेनाऽनुपादानात् साध्यवसानैव सेत्युक्तम् । विशेष्य स्ववाचकपदनिर्देश एव सारोपत्वात् ।

(वि, व) कलिङ्ग. पुरुष इति—अत्र पुरुषपदेन लक्ष्यार्थोपादानात् अनिगीर्णत्वम् । कलिङ्गत्वेन लक्षणा । **प्रयोजने यथेति**—लक्षणलक्षणेति शेष । अन्यवैलक्षण्येनाव्यभिचारेणेति, अव्यभिचार अन्यवैलक्षण्य च हेतुरुक्त ।

स्वसम्बन्धस्य निगरण श्वेतगुण आरोप्यमाण । प्रयोजन इत्यनन्तर पूर्वोक्ता उपादानलक्षणा सारोपेति अनुषज्यते । एवमुत्तरोदाहरणेष्वपि । सर्वनाम्ना तत् शब्दरूपेण ।

---

* **कार्य्यकारणभावसम्बन्धसम्बन्ध्यायुस्तादात्म्येनेति**—कार्य्यकारण भावसम्बन्धेन सम्बन्धि (कार्य्यतासम्बन्धवत्) यत् आयु , तस्य तादात्म्येन अभेदेन प्रतीयते । एतेन कार्य्यतारूप सम्बन्धो दर्शित । अन्यवैलक्षण्येन जनमान्तरस्त्रीरादि वैसादृश्येन कार्य्यकारित्वम् । अव्यभिचारेण घृत स्त्रीरादिवत् आयुष्य प्रति न व्यभिचारात् इति अव्यभिचारेण नियमेन कार्य्यकारित्वम् ।

1 'श्वेत' इति ग घ पु अधिक पाठ ।

2 'सारोपत्वम्' इति (ग घ पु०)

3 'पुरुषकलिङ्गशब्दयो इति (भ घ पु०)

4 'कार्य्यकारणसम्बन्धादायुस्तादात्म्येन' इति (ग पु०)

5 'हस्ताग्रमात्रेऽवयवे' इति (भ ट, ठ पु०)
'अग्रमात्रे हस्तावयवे भागे' (झ ट ठ पु०)

अत्रावयवावयविभावलक्षणः[1] सम्बन्धः । ब्राह्मणेऽपि[2] "तद्वासौ"। अत्र तात्कर्म्यलक्षणः सम्बन्धः[3]। इन्द्रार्थासु स्थूणासु "अमी इन्द्रः"। अत्र तादर्थ्यलक्षणः सम्बन्धः। एवमन्यत्रापि। (व)

निर्गीर्णस्य पुनर्विषयस्य अन्यतादात्म्यप्रतीतिकृत्साध्यवसाना। अस्याश्चतुर्षु भेदेषु पूर्वोदाहरणान्येव। तदेवमष्टप्रकारा[4] लक्षणा (श, उ)

काव्यप्रकाशे तु आयुर्घृतमिति सारोपायामन्यवैलक्षण्यम्। आयुरिदमिति साध्यवसानायामव्यभिचार इति द्वयोः पृथक् प्रयोजनद्वयमुक्तम्। कार्यकारणभावरूपसम्बन्धेन सारोपां लक्षणामुक्त्वा सम्बन्धान्तरैरपि तां दर्शयति—**राजकीये**-तीति। अत्र असाविति पदेन लक्ष्यार्थे पुरुषे निर्दिष्टे राज्ञोऽभेदारोपात् सारोपा। एवमुभयत्रापि सर्वनाम्ना लक्ष्यार्थनिर्देशे तथात्वं बोध्यम्। स्थूणाः स्तम्भा इन्द्रध्वजरूपाः। तादर्थ्यलक्षणः तत्पूजार्थतालक्षणः, अत्र इन्द्रवत् पूज्यत्वं प्रयोजनम्।

(वि, श) इत्थं सारोपामुक्त्वा 'निर्गीर्णस्य मता साध्यवसानिका'इति कारिकाखण्डं व्याचष्टे-**निर्गीर्णस्य पुनरिति**। अस्याश्चतुर्ष्विति रूढिप्रयोजनद्वये उपादानलक्षणाद्वयं तद्द्वये लक्षणलक्षणाद्वयं चेति साध्यवसानायाश्चत्वारो भेदाः। पूर्वोदाहरणान्येवेति रूढावुपादानलक्षणाया —'धेनो धावति' इति प्रयोजने उपादानलक्षणायाः 'कुन्ताः प्रविशन्ति'इति यदुद्वयमुदाहृतं, रूढौ लक्षणलक्षणायाः 'कलिङ्गः साहसं करोति'इति प्रयोजने लक्षणलक्षणायां तु राजकीये पुरुषे गच्छति 'राजानौ गच्छन्ति'इति यदुदाहृतं तत्र इदं पदत्यागेन उदाहरणमित्यत एतानि चत्वारि साध्यवसानाया उदाहरणानीत्यर्थः। राजा गच्छतीत्यत्र राजवत् परिचारकवेष्टितत्वं प्रयोजनम्। एतेषु चतुर्षु हि कर्त्र्या क्रियातनैव कर्तृलक्ष्यार्थस्य उपस्थापनात् नामपदेन तु अनुपस्थानान्निर्गीर्णता। तस्मिंश्च प्रथमं शक्यार्थतादात्म्यारोपात् साध्यवसानत्वमिति बोध्यम्। प्रयत्नान्तोऽत्रके प्रयत्नान्तपदार्थस्याऽभेदान्वयस्यु-

---

(लो, उ) एवमारोपे रूढिप्रयोजनयोरुदाहरणे चतुष्टयं दर्शयित्वा विषयव्याप्त्यर्थं सम्बन्धभेदेन उदाहरणान्याह-**यथा वेत्यादि**—राजानौ इत्यत्र पूर्ववत् अदःशब्देन विषयप्रत्यनम्। अग्रेति। अत्र हस्तावयवेऽग्रेऽपि हस्तशब्दप्रयोगः, एकदेशादाहेऽपि ग्रामो दग्ध इतिवत्। अत्र इदंशब्दो राजा अमी इत्यत्र च अदःशब्दवत्।

साध्यवसानालक्षणं विवृणोति—निर्गीर्णस्येति—पूर्वोदाहरणानि धेनो धावति, कुन्ताः प्रविशन्ति, कलिङ्गः साहसिकः, गङ्गायां घोषः।

---

1 'भाव' इति ग. घ. पु॰ नास्ति।
2 'ब्राह्मणेऽपि' इति (ट. ठ पु॰)
3 'सम्बन्ध' इति ट. ठ. पु॰ नास्ति।
4 'तदेव इत्यादि' ग. घ. पु॰ नास्ति।

सादृश्येतरसम्बन्धाः शुद्धास्ताः सकला अपि ।
सादृश्यात्तु मता गौण्यस्तेन षोडशभेदिता ॥१४॥ (प, ऊ)

ताः पूर्वोक्ता अष्टभेदा लक्षणा । सादृश्येतरसम्बन्धा कार्य्यकारणभावादयः । अत्र शुद्धानां पूर्वोदाहरणान्येव । (स) रूढावुपादानलक्षणा साराषा गौणी यथा—"एतानि तैलानि हेमन्ते सुखानि" । अत्र तैल शब्दस्तिलभवस्नेहरूप मुख्यार्थमुपादायैव सार्षपादिस्नेहेषु[1] वर्त्तते । + (ऋ)

त्पत्ते । गङ्गाया घोष इति तु लक्षणलक्षणोदाहरण यद्दर्शित तत्तु न साध्यवसानोदाहरणम् । तत्र लक्ष्यार्थे तीरे प्रवाहतादात्म्याऽनारोपात् । एव च रूढौ लक्षणलक्षणोदाहरण कलिङ्ग इत्यादिक यदुक्त तत्र साहसिक इति प्रामादिक पाठ । नामग्रहेण साहसिक इत्यनेन लक्ष्यार्थस्य पुरुषस्योपादानात् सारोपात्वेन साध्यवसानत्वाऽभावात् । किन्तु कलिङ्ग साहस करोति इत्येव तत्र पाठ । इत्थमुपादानलक्षणालक्षणलक्षणायो रूढिप्रयोजनहेतुकत्वेन चतुर्विधयो सारोपासाध्यवसानविरूपत्वेन द्वैगुण्यात् अष्टविधत्वम् ।

(वि, प) षोडशभेदानाह—**सादृश्येतरेति** । सादृश्येतरसम्बन्धा कार्य्यकारणभावादिरूपा पूर्वदर्शिता सकला अष्टविधा अपि शुद्धा शुद्धपरिभाषिता । सादृश्यसम्बन्धात्तु ता अष्टविधा गौण्य सादृश्यघटकरूपशक्यगुणयोगरूपयोगार्थेन गौण्यो गौणीपरिभाषिता इत्यर्थ । षोडशभेदिता अष्टद्वैगुण्यात् ।

(वि, स) **पूर्वोक्तोदाहरणान्येव** इति—धेतो धावनीत्यादानि, इन्द्रार्थो स्थूणो इत्यन्तानि सकलानि एव । तेषु एकत्रापि सादृश्यसम्बन्धाभावात् ।

(वि, ह) **तिलभवस्नेहरूपं मुख्यार्थमिति** । तिलस्येदमिति योगार्थवशात्तस्य मुख्यार्थत्व, तस्य स्निग्धतासारत्वेन सादृश्याश्रय शक्यलक्ष्योभयमेवात्र तैल

(लो ऊ) एवमष्टविधाऽपि लक्षणा प्रत्येक शुद्धा गौणी चेति षोडशप्रकारेति दर्शयति—**सादृश्येतरेति** । वृत्तौ स्पष्टो लक्षणार्थ ।

(लो, ऋ) **एतानीति**—अत्र तैलशब्दस्य तिलस्य स्नेहमात्रवाचकत्वात् ग्रहणे तस्य केवलस्य सुखमयत्वादिविवक्षणात् मुख्यार्थत्वाभाव, प्रयोजनाभावात् रूढि उपादानलक्षणात्व मुख्यार्थमुपादायैव इति कृत्वा स्मारितम् । स्नेहेषु वर्त्तत इत्यनेन

+—गौणी गुणनिमित्ता वृत्ति गुणेभ्य आगता गौणी, तत्र मुख्यार्थलक्ष्यार्थयो सम्बन्धस्तु समानीयगुणवत्त्वम् । अतो गौणी लक्षणा इयम् । यथा—तिलस्येद तैलम् इति व्युत्पत्त्या तैलशब्दस्य तिलोत्पन्नस्नेहपदार्थे शक्ति—पर तिलोत्पन्नस्नेहसमानीयगुणवत्त्वात् सर्षपोत्पन्नस्नेहपदार्थे तैलशब्दस्य लक्षणा गौणी पुन ।

1 "सार्षपादिषु स्नेहेषु" इति (ग, घ ङ चु)

प्रयोजने यथा—राजकुमारेषु तत्सदृशेषु च गच्छत्सु 'एते राजकुमारा गच्छन्ति' (ङ)। रूढावुपादानलक्षणा साध्यवसाना गौणी यथा—

'तैलानि हेमन्ते सुखानि'। प्रयोजने यथा—'राजकुमारा गच्छन्ति'।(च)

रूढौ लक्षणलक्षणा सारोपा गौणी यथा—'राजा गौडेन्द्रः[1] कण्टकं शोधयति (क)

प्रयोजने यथा 'गौर्वाहीकः'। * रूढौ लक्षणलक्षणा साध्यवसाना

शब्दार्थं इत्यतो मुख्योपादानम्। **एते राजकुमारा** इति। अत्र राजकुमारतुल्यशोभावत्त्वं प्रयोजनम्—तुल्यवयस्कत्व सादृश्यम्। उभयत्रैव एतानि एते इति सर्वनामपदेन लक्ष्यार्थोपादानात् तत्र शक्यार्थतादात्म्यारोपाच्च सारोपा लक्षणा।

(वि, च) सादृश्यात् साध्यवसानामाह—**तैलानीति**। अत्र सर्वनामपदेन लक्ष्यार्थानुपस्थापनान्न सारोपा, किन्तु शक्यार्थाऽव्यावर्त्तकेन शक्यलक्ष्यसाधारणेन सुखपदेन लक्ष्यार्थोपस्थापनात्तस्याच्छादनरूपा निगीर्णाना। तत शक्यार्थतादात्म्यारोपात् साध्यवसाना। **राजकुमार** इति। अत्राख्यातेनैव कर्त्तृणा लक्ष्यार्थानामुपस्थापनात्तेषा निगीर्णाना। तत्र शक्यराजकुमारतादात्म्यारोपश्चेति साध्यवसाना। तुल्यशोभावत्त्व प्रयोजनम्, तुल्यवयस्कत्व सादृश्यम्।

(वि, क) **राजा गौडेन्द्रमिति**। अत्र दुःखदायित्वेन कण्टकसदृशो गौडेन्द्रो लक्ष्यार्थ स्वशब्देनैवोपात्त। अत्र कण्टकतादात्म्यारोपात् सारोपा।

(वि, ख) **गौर्वाहीक** इति। वाहीको हलवाहक। स च स्वशब्देनैवोपात्त। अजत्वधर्मेण सादृश्यम्। जाड्यमान्द्यादिकम् अवैदग्ध्यं वा प्रयोजनम्। राजा कण्टक-

---

उभयो स्नेहरूपत्वात् सादृश्यलक्षण सम्बन्ध। एतानीति सर्वनाम्ना सारोपात्वम्, एवमुत्तरोदाहरणेऽपि बोद्धव्यम्।

(लो, भ्रु) प्रयोजन इत्यनन्तरम् उपादानलक्षणा सारोपा, गौणीत्यनुषज्यते, एवमुत्तरत्राप्युदाहरणे पूर्वोक्त इति। **एते** इति। अत्र राजकुमारसदृशेषु राजकुमारप्रयोगात् मुख्यार्थबाध। शौर्य्यसौन्दर्य्यपरिच्छदादिभि सादृश्य सम्बन्ध। प्रयोजनमेषाननिशय। **राजेति**—गौडेन्द्रे कण्टकशब्दस्य प्रयोगे प्रयोजनाभावाद्वृत्ति।

(*—वाहीक—बहिर्भव, इति शास्त्रीयाचाराद् बहिर्भूत (बहिषष्ठिलोपो य च ईकक् च। वार्त्तिक) अथवा वाहीको नाम देशविशेष। तत्र भव पुरुष वाहीक (प्राचा देशे, वाहीकग्रामेभ्यश्च) वाहीकलक्षणम्—

'पञ्चानां सिन्धुषष्ठाना नदीना येऽन्तरश्रिता।
तान् धर्मबाह्यानशुचीन् वाहीकान् परिवर्जयेत्॥'

(महाभारत कर्णपर्व)

[1] 'गौडेन्द्र' इति प्रकाशित स. पु०।

गौणी यथा–'राजा कण्टकं शोधयति'। प्रयोजने यथा–'गौर्जल्पति'। (ख, ङ)

अत्र केचिदाहु.–स्वार्थसहचारिणो[1] गुणा जाड्यमान्द्यादयो लक्ष्यन्ते। ते च गोशब्दस्य वाहीकार्थाभिधाने निमित्तीभवन्ति। तदयुक्तम्, गोशब्दस्यागृहीत-सकेत वाहीकार्थमभिधातुमसामर्थ्यात्[2] गोशब्दार्थमात्रबोधनाच्च। अभिधाया विरतत्वात् विरतायाश्च पुनरुत्थानाभावात्[3]। * (ग, छ)

मित्यर्थपरम्परालिखित प्रामादिक एव पाठ। लक्ष्यार्थस्य केनापि पदेन अनुपस्थापनात्, प्रथम तत्र शक्यतादात्म्यारोपानुपपत्ते। किन्तु राज्ञा कण्टक शोध्यते, इत्येव पाठ। तत्र कर्माख्यातेनोपस्थापिते शोध्ये कर्मणि वैशिष्टे प्रथमान्तकण्टकपदशक्यार्थस्य तादात्म्यारोपात्। गौर्जल्पतीत्यत्रापि गौर्जल्पकत्वाऽसम्भवादाख्यातेनोपस्थापिते जल्पके निगीर्णे गोतादात्म्यारोपात् साध्यवसाना। गोवद् वंदग्ध्य प्रयोजनम्, जडत्वा-दिना सादृश्यम्।

(वि, ग) अत्र केचिदिति—स्वार्थो गोत्व तत्सहचारिण इत्यर्थ। **वाहीकार्थाभिधाने** इति—अभिधया प्रतिपादने इत्यर्थ। **निमि-त्तीभवन्ती**ति—शक्यतावच्छेदकीभवन्तीत्यर्थ। तथा च जडत्वेन रूपेण वाहीक शक्त्यैव, जडो वाहीक इति प्रतीतिरिति तत्सिद्धान्त। **तदयुक्तमि**ति। अय च दोष तत् सिद्धान्ताऽनवक्लृप्तादेव धर्मे लक्षणया एव धर्मिणि शक्तिग्राहकत्वस्य तै सिद्धान्तित-त्यात्। **गोशब्दार्थे**ति—सकृदुच्चारितस्य शब्दस्य सकृदर्थबोधनेन शब्दविरत्या अभिधाया अपि विरतेरिति भाव।

चुदद् सदायित्व सादृश्य सम्बन्ध। कण्टकशब्दस्य प्रकृते स्वार्थपरित्यागात् लक्षणलक्षणा, गौडेन्द्रस्य विषयस्यानिगरणात् सारोपात्वम्। **गौर्वाहीक** इत्यादि–एतस्मिन् उदाहरणे यथा प्रयोजने लक्षणलक्षणा सारोपा गौणी। तथा वृत्तावेवाग्रे स्फुटीभविष्यति। एवं गौर्जल्पतीत्यत्रापि प्रयोजने लक्षणलक्षणा साध्यवसाना गौणी।

(लो, छ) सम्प्रति पूर्वपक्षनिरासपूर्वक गौण्या वृत्तेर्लक्षणायामन्तर्भाव दर्शयन् एकत्रापि उदाहरणे विप्रतिपत्तिनिरासेन सर्वमपि सामञ्जस्य भविष्यतीत्याह–**अत्रेति**।

---

* लक्षणया प्रथम जाड्यादयुपस्थिति तत अभिधया वाहीकस्य बोध। गोशब्दो हि भिक्षार्थकत्वात् वाहीकेन सह बाधितमुख्यार्थ सन् गोत्वसमाना-धिकरणात् जाड्यादिगुणान् लक्षणया बोधयति तत तान् एव गुणान् निमित्ती कृत्य वाहीकम् अभिधया बोधयति इति निष्कर्ष। एतस्मिन् मते गोशब्दस्य वाही कार्थे सङ्केताभावात् तदभिधानम् अनुपपन्नम्।

1 'गोसहचारिण' इति (ख ग घ ङ पु०)

2 'असक्यत्वात्' इति (ग ङ पु०)

3 'उत्थापनाभावात्' इति (ङ च पु०)

अन्ये च पुन—"गोशब्देन वाहीकार्थो नाभिधीयते, किन्तु स्वार्थ सहचारिगुणसाजात्येन वाहीकार्थगता गुणा एव लक्ष्यन्ते।" तदप्यन्ये न मन्यन्ते। (घ, ए) × तथा ह्यत्र गोशब्दाद् वाहीकार्थ प्रतीयते न वा? आद्येऽपि[1] गोशब्दादेव वा[2]? लक्षिताद् वा गुणात् अविनाभावद्वारा?

तत्र न प्रथम, वाहीकार्थ[3]स्यासकेतितत्वात्। (ऐ)।

न द्वितीय, अविनाभावलभ्यस्यार्थस्य शाब्देऽन्वये प्रवेशासम्भवात्।

(वि, घ) **गुणा एव लक्ष्यन्त** इति—वाहीकप्रतीतिस्त्वाक्षेपादिति भाव। (वि, ङ) **आद्येऽपीति**—गोशब्दाद् वाहीकप्रतीतिपक्षे इत्यर्थ। न प्रथम इत्यनेन तद्दूषणम्। **असकेतितत्वादिति**—एतदुद्धारश्च तन्मते दर्शित एव, इत्यवधेयम्। न द्वितीयो—लक्षितगुणाऽविनाभावेनाक्षेपात् प्रतीतिपक्षे। **शाब्देऽन्वये प्रवेशासम्भवादिति**—इद च स्वसिद्धान्ताभिप्रायेणोक्तम्। वस्तुतस्तु जातिशक्तिवादे जात्यविनाभावलभ्याया व्यक्ते शाब्दबोधप्रवेशवदनापि तथात्वे बाधकाभावात्।

गौर्वाहीक इत्यत्र स्वार्थो गौ लक्ष्यन्ते लक्षणया बोध्यन्ते ते तत्र लक्षिता गुणा चकारेण न खलु तेषा लक्षितत्वमात्रेण विश्रान्तिरिति, वाहीकार्थस्याभिधानेऽभिधया बोधने निमित्तीभवन्ति। पुनरुत्थानाभावात् शब्दबुद्धिकर्म्मणो विरम्य व्यापाराभाव इति न्यायात्, अभिधान्तरकल्पने कल्पनागौरवमित्याशय।

(लो, ए) मतान्तरमाह—**अन्य** इति। नाभिधीयते उक्तदेव न्यायात्। स्वार्थो गौ। साजात्येन सम्बन्धेन वाहीकगता गुणा जाड्यमान्द्यादय एव, अनेवकारेण गुणिनो व्यवच्छेद। लक्ष्यन्ते लक्षणया बोध्यन्ते तत् समनन्तरोक्त मतान्तरमपि।

(लो, ऐ) अत्र पक्षे आद्य प्रतीतिपक्षे। लक्षिताद् गुणात् स्वनिष्ठजाड्य मान्द्यादे। अविनाभावोऽव्यभिचारसम्बन्ध तद्द्वारा तद्बलेनाक्षेपादिभाव। प्रथम गौशब्दमात्राद् वाहीकस्य प्रतीतिपक्षे। प्रतीतिर्थाभिधया बोधिता।

(लो, ओ) अविनाभावलभ्यस्य न तु शब्दबोधितस्येत्यर्थ। आचार्य्यगम्म

× तथा च गोसदृशजाड्यादिसजातीयजाड्यादिगुणा गोशब्देन लक्ष्यन्ते। तैरेव गुणै 'गुणगुणिनो अविनाभावात्' गुणवान् वाहीक आक्षिप्यते। तत्तु न युक्तम्। गुणप्रहकसामग्या द्रव्यग्रहकत्वनियमे प्रमाणाभावात्। एतन्मते आक्षेपलभ्यार्थस्य शाब्दबोधविषयत्वाभावो विशक्षितार्थानन्वयश्च दोष।

1 "अपि" इति ग घ पु नास्ति
2 "वा" इति घ ङ च नास्ति
3 "वाहीकार्थस्यासकेतितत्वात्" इति (ग पु)

शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यते। न तृतीय[1], यदि हि गोशब्दाद् वाहीकार्थो न प्रतीयते[2], तदाऽस्य वाहीकशब्दस्य च सामानाधिकरण्यमसंगत[3] स्यात्। (ङ)

M 8 (औ) ∴ तस्मादत्र गोशब्दो मुख्यया वृत्त्या वाहीकशब्देन सह अन्वयमलभमानोऽज्ञत्वादिसाधर्म्यसम्बन्धाद्वाहीकार्थं लक्षयति। +

वाहीकस्याज्ञत्वाद्यतिशयबोधन प्रयोजनम्। (च, औ)

न तृतीय इति–गोशब्दात् वाहीकप्रतीत्यभावपक्षे। **सामानाधिकरण्यमिति**—स्वार्थयोरभेदबोधकत्वनियत समानविभक्तिकत्वमित्यर्थ।

(वि, च) तथा हि गोशब्दस्य वाहीकगत नाड्यमान्द्यादि गुणोऽर्थ। वाहीक शब्दस्य हलवाहित्वोऽर्थ। **वाहीकार्थ लक्षयती**ति–गोसदृशत्वेन रूपेणेति शेष।

तिमाह–**शाब्दीत्यादि**–हि यस्मात् शब्देनैव न त्वविनाभावादिलभ्यार्थेन। तृतीयो न प्रतीतिपक्ष।

(लो,औ) तत् का गतिरित्याकाङ्क्षायां स्वमतमाह–**तस्मादिति**। (यस्मादेवमन्या गति र्नास्ति इत्यर्थ। गोशब्दो गोशब्दार्थ। शब्दतदर्थयोरभेदोपचारात्। एवमन्यत्रा प्येवविधस्थले बोद्धव्यम्। मुख्या वृत्तिरभिधाप्रयोजनम्। वाहीकोऽत्र इति स्वशब्दप्रति पादनाऽलभ्यम्, एतस्या गौण्याख्यायां वृत्तेर्मुख्यार्थबाधादिनियतहेतुकत्वात् लक्षणाया-मन्तर्भाव स्फुट एव इत्याशय। इह च गङ्गानटयोस्तादात्म्यप्रतीत्या तटे शीतत्वा-द्यतिशय। गौर्वाहीक इत्यत्र गोवाहीकशब्दयोस्तादात्म्यप्रतीत्या वाहीके नाड्यादति शय प्रतीयते इति व्यवहारोऽयमुपचारो लक्षणायास काव्यप्रकाशकारस्येति चण्डीदासपरिगृहीतानामविचारिताभिधानम्। तथाहि सादृश्यसम्बन्धिनोरिव तदितर सम्बन्धिनोर्न सम्बन्धीदासीन्येन वृत्ति अत एवान्यैरक्तसम्बन्धान्तर लक्ष्यलक्षणयो साक्षात् सम्बन्धेन, सादृश्य तु गौर्वाहीकादितद्धर्मसाजात्यरूप, न तथेति, अत एव

---

* न च जातिपदार्थवादे यथाव्यक्त्यविनाभावात् जात्या व्यक्तिराक्षिप्यते इत्युक्त तथा प्रकृतेऽपि किं न स्यादिति वाच्यम्, तत्र आक्षेपस्य मुख्यार्थाऽविनाभावहेतुक त्वात्। किञ्च तत्र जातिग्रहसामग्र्या व्यक्तिग्राहकत्वनियम इत्याक्षेपोऽप्यस्ति। प्रकृते गुणग्राहकसामग्र्या द्रव्यग्राहकत्वनियमे प्रमाणाभावात् वाहीकस्य न आक्षेपल-भ्यत्वम्।

+—गोवृत्तिजाड्यादिगुणसमानजाड्यादिगुणाश्रयरूपसम्बन्धेन जाड्यादिगुण विशिष्टे लक्षणा। तेन गोवृत्तिजाड्यादिगुणजातीयजाड्यादिगुणवान् वाहीक इत्यर्थ।

1 "द्वितीय" इति (ग घ पु)
2 'प्रतीयते' इति (च छ पु)
3 'असमञ्जस" इति (ट ठ पु)

इय[1] च गुणयोगात् "गौणी" इत्युच्यते। पूर्वा तु उपचारामिश्रणात् शुद्धा। उपचारो हि नामाऽत्यन्त विशकलितयो सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम्। यथा–"अग्निर्माणवक्यो"। ×

शुक्लपटयोस्तु नात्यन्त[1] भेदप्रतीति। तस्मादेवमादिषु शुद्धैव लक्षणा। (छ, अ)

व्यङ्ग्यस्य गूढागूढत्वात् द्विधा स्युः फललक्षणा॥ १५॥

प्रयोजने या अष्टभेदा लक्षणा दर्शिता ता प्रयोजनरूपव्यङ्ग्यस्य गूढागूढतया

(वि, छ) **गुणयोगादिति**—शक्यगोनिष्ठशाक्त्यादिगुणसजातीयजाड्यादिगुणयोगादित्यर्थः। **पूर्वा त्विति** शुक्लपट, आयुर्घृतमित्यादिकेत्यर्थः। ननु तत्रापि समानविभक्तिकत्वप्रयोगादायुर्घृतयो. प्रथमभेदोपचारोऽस्त्येव इत्यत आह—**उपचारो हीति**। समानविभक्तिकत्वाभिधानेन उपचारेणाऽमिश्रण न शुद्धत्वप्रयोजक, किन्तु तत्रैव सादृश्यसत्त्वे एवेति भाव। **शुक्लपटयोस्त्विति**–आयुर्घृतयोश्चेत्यपि बोध्यम्।

क्वचित् तटादौ गङ्गादिसम्बन्धात् सिञ्चत् शैत्यादिकमस्त्येव, किन्तु गङ्गाशब्देन प्रतिपादने गङ्गात्वप्रतीतौ तत्शैत्यादिकमाधिक प्रतीयते। वाहीके पुनर्गोनिष्ठानां गुणाना कदाचिन्न सम्भव, किन्तु तत्सजातीयानाम्। किञ्च गौर्वाहीक इत्युक्तेऽपि प्रतिपत्तु सर्वथा नाऽभेदप्रतिपत्ति, किन्तु सामानाधिकरण्यप्रयोगात् तस्या स्थगनमात्रम्।)तदुक्त शारीरिकमामासाव्याख्याने वाचस्पतिमिश्रै —'अपि च परशब्द परत्र लक्ष्यमाणगुणयोगेन वर्त्तत' इति यत्र प्रयोक्तृप्रतिपत्रो सम्प्रतिपत्ति स गौण, सच भेदप्रत्ययपुर सर इति।

(लो,अ) एतदाभेप्रेत्य उक्तप्रकारेण लक्षणाविशेषणयोर्गौणशुद्धयोर्भेद दर्शयति-**इयं चेति**। इय सादृश्यसबन्धहेतुका गुणयोगात् नतु साक्षात्सम्बन्धात्। उपचारो नाम अत्यन्त विशकलितमौरित्यनेन सम्बन्धस्य साक्षात्त्व दर्शितम्। स्थगनमात्र नतु सर्वथाभाव। नात्यन्त भेदप्रतीत उक्तत्वेन सम्बन्धस्य साक्षात्त्वात्।

(लो, आ) सम्प्रति व्यङ्ग्यवैचित्र्येणैव लक्षणाभेदान् दर्शयति, **व्यङ्ग्यस्येति**–

× उपचारो नाम–विशकलितयो –भिन्नयो। सादृश्यात् अनन्तस्य तत्त्वेन व्यपदेश उपचार' (मल्लिनाथ)। उपचारस्तु यत्र सादृश्यात् वस्त्वन्तरे वस्त्वन्तर उपचर्य्यते यथा–गौर्वाहीक'। अत्र हि गोशब्दो मुख्यार्थ सन गगनादे ये जाड्यमान्द्यादय गुणा तत्सदृशमाहीकगतजाड्यगुणलक्षणद्वारेण गोगतजाड्य माद्यादिगुणसदृशजाड्यमान्द्यादिगुणयुक्ते वाहीके उपचरित'।

1 ' इत्थ ' इति (ग घ)

2 'अत्यन्तभेदप्रतीति ' इति (ग घ०)

प्रत्येकं द्विधा भूत्वा षोडशभेदाः। तत्र गूढः काव्यार्थभावनापरिष्कृतबुद्धिविभवमात्रवेद्यः, यथा "उपकृतं बहु तत्र" इति। अगूढः अतिस्फुटतया सर्वजनसंवेद्यः, यथा—

उपदिशति कामिनीनां यौवनमद एव ललितानि।
अत्र "उपदिशति" इत्यनेन "आविष्करोति" इति लक्ष्यते॥
आविष्कारातिशयश्चाभिधेयवत् स्फुट प्रतीयते (ज, आ)

धर्मिधर्मगतत्वेन फलस्यैता अपि द्विधा॥ १६॥

एता अनन्तरोक्ता षोडशभेदा लक्षणा। फलस्य धर्मिगतत्वेन धर्मगतत्वेन च प्रत्येकं द्विधा भूत्वा द्वात्रिंशद्भेदा।

दिङ्मात्रं यथा—

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेका कलाः।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे

(वि, ज) फललक्षणा प्रयोजनवत्यो लक्षणा। प्रयोजने या अष्टभेदा दर्शिता इति षोडशसु स्वभावोक्तौ प्रयोजने त्वष्टाविति दर्शितत्वात्। परिपक्वबुद्धि दृढसंस्कारजा बुद्धि। **उपकृतमिति**—अत्र ग्रन्थकृन्मतेऽपकारातिशय, अन्यमते त्वपकारिणि कौटिल्यादिकं प्रयोजनम्, व्यङ्ग्यविदग्धैकगम्यम्। सोल्लुण्ठनार्थस्याऽविदग्धाऽवेद्यत्वात्। **आविष्करोतीति**—उपदेशकत्वस्य गुरुधर्मत्वेन यौवनमदे तदाधानात् इति भावः। **आविष्कारातिशयश्चेति**—इदं तु नानुभाविकमुक्तम्। काव्यप्रकाशे तु शिक्षादानमेव लक्ष्यार्थस्ताडनायास एव प्रयोजनमभिधेयवत् सर्वजनवेद्यम्। तद्धि प्रयोजनमुपदेशस्य वाच्यार्थस्य धर्मा लक्ष्यार्थे शिक्षादाने प्रतीयते—उपदेशात् शिक्षायाश्चानायास सर्वजनवेद्य एव इति तदभिप्रायः।

(वि, झ) **षोडशभेदा** इति—गूढागूढप्रयोजनरूपा इत्यर्थः। धर्मिधर्मगतत्वेनेति, धर्मी लक्ष्यार्थः। धर्मस्तु लक्ष्यार्थनिष्ठपदार्थः। **स्निग्धश्यामलेति**—प्रावृट्काले उपस्थिते सीतावियोगिनो रामस्येयमुक्तिः। वेल्लन्ती चपला बलाका यत्र तादृशा। पयोदसुहृदा मयूराणाम् एते विरहोद्दीपकाः काम स्वाच्छन्द्येन सन्तु तथापि मां मारयितुं न शक्ता इत्यर्थः। यतो रामोऽस्मि, दृढं सहिष्णुरस्मि, तत्रत्वे हेतुमाह—कठोरेति। अत उक्तं घनादिकं सर्वमहं सहे इत्यर्थः। वैदेही तु अनीदृशी। कथं

फलं प्रयोजनं, तद्युक्ता लक्षणा। ललितानि चेष्टितानि। आभ्यामेव व्यङ्ग्यस्य गूढागूढताभ्यां स्वनिगूर्णीभूतव्यङ्ग्याख्यौ काव्यप्रकारविशेषौ वक्ष्येते।

(लो, ट) **स्निग्धेति**—वेल्लनं चलनं, पयोदसुहृदा मयूराणाम्, आनन्देन

वैदेही तु कथं भविष्यति हहा ! हा देवि ! धीरा भव ॥ (ङ) +

अत्राश्रयस्तदु सहिष्णुरूपे रामे धर्मिणि लक्ष्ये तस्यैवातिशय फलम्। " गङ्गाया घोष " इत्यत्र तटे[1] शीतत्वपावनत्वादिरूपधर्मस्यातिशय फलम् । (ञ, ट)

भविष्यति, किंप्रकारा भविष्यतीत्यर्थ । हाहा खेदे । तस्माद्देवि वैदेहि ! धीरा भव—दु खसहिष्णुर्भवेत्यर्थ ।

(वि ञ) **रामे लक्ष्ये** इति—घनाद्युद्दीपकसहरामत्वस्य प्रयोजकत्वाद् दु खसहिष्णुत्वरूपेण रामो लक्ष्यत इत्यर्थ । तस्यैवातिशय इति तस्यैव दु खसहिष्णो रामस्यातिशय विप्रलम्भरूप, नचात्र दु खसहिष्णुत्वस्याप्यतिशय प्रतीयत एव । तत् कथमिद धर्मगतस्योदाहरण न दर्शितमिति वाच्यम् । विवक्षितार्थविवेचनेन तस्यापि धर्मिगतत्वादेव तथाहि दु खसहिष्णुत्व तावद् सद्वेषाभावस्तस्य चाभावरूपस्यातिशयान्तराभावद्वेषसामान्याभावरूपत्वमेवातिशय । स च नातिरिक्तपदार्थ । किन्तु अभावस्वरूप एव । तस्य च रामरूपधर्मिगतत्वादेव । **शीतत्वपावनत्वादि-**

केन घनय कला मधुरास्फुटा । **अत्रेति**—अयमर्थ, रामोऽह सर्व सह इत्यत्र रामस्य सर्वसहत्वस्याऽप्रसिद्धे मुख्यार्थबाधात् रामस्यात्यन्तदु खसहिष्णुत्वरूपो

+ स्निग्धया जलसम्बन्धात् सरसया, श्यामलया द्रविडवनितोऽचितासितवर्णया कान्त्या लिप्तम् आच्छुरित (व्याप्त) वियत् नभो यै । वेल्लन्त्य चेलन्य प्रहर्षवशात् बलाका (वकपङ्क्तयो) येषु ते एवविधा मेघा । एव नभस्तावद् दृश्यलोक वर्त्तते । दिशोऽपि दुर्ग्रहा, यत —सूक्ष्मजलकणोद्गारिणो वाता । वातानां मन्दमन्दत्वम् अनियतदिग्भागगमन च बहुवचनेन सूचितम् । तर्हि गुहासु क्वचित् प्रविश्य आस्यतामित्यत आह—पयोदाना ये सुहृद तेषु च सत्सु शोभनहृदया मयूरा (पयोदा सुहृद येषा ते मयूरा इति केचित्) तेषाम् आनन्देन हर्षण बला मधुरा केका शब्दविशेषा । ताश्च सर्वं पयोदवृत्तान्त दु सह स्मारयन्ति स्वय च दु सहा इति भाव । एवम् उद्दीपनविभावोद्बोधितो विप्रलम्भ । इत एव प्रभृति प्रियतमा हृदये निधायैव स्ववृत्तान्त तावदाह—**काम सन्त्वयि** । दृढ सातिशय रामोऽस्मि—स एवाह भवामि (अतिशयेन कठोरहृदयोऽह राम राक्षसदु खपात्रत्वेन प्रसिद्धोऽस्मि । अत एव सर्वम् उद्दीपकजनित क्लेश सहे) भविष्यतीति क्रियासामान्य, तेन किं करिष्यति इत्यर्थ । अथ च भवनमेव अस्या असम्भाव्यमिति दृढप्रकारेण हृदयनिहितां प्रियां प्रयत्नभावितां हृदयस्खलनोन्मुखीं गतसम्भ्रमाह—**हृदयेति** । (हहेति अयो निपाता खेदातिशये) देवि ! तव धैर्यमित्यर्थ । धीरा भव धैर्यं कुरु 'दर्शनेन धैर्यस्य उचितत्वात्। (ध्वन्यालोकलोचन)।

1 "तटादिषु लक्ष्येषु' इति (ग घ क)

तदेवं लक्षणभेदाश्चत्वारिंशन्मता बुधैः ॥ १७ ॥

रूढावष्टौ, फले द्वात्रिंशदिति चत्वारिंशल्लक्षणाभेदा ।

पदवाक्यगतत्वेन प्रत्येकं ता अपि द्विधा ॥ १८ ॥

किञ्च—

ता —अनन्तरोक्ताश्चत्वारिंशद्भेदा । तत्र पदगतत्वेन[1] यथा–गङ्गायां घोष" इति । वाक्यगतत्वेन[2] यथा—"उपकृत बहु तत्र" इति एवमशीति-प्रकारा लक्षणा । × (ट, ई)

शयस्येति—अतिशयस्यातिशयान्तराभावादतिशयितशातत्वपावनत्वयेरित्यर्थ । अत्र चातिशयिताशो नातिप्रयोजन सम्पादायात एव बाध्य । नन्वत्र धर्मिगते शातत्वपावनत्वे एव प्रयोजने किं न स्यादितिचेन्न । गङ्गासम्बन्धवशात्तस्य शातत्वपावनत्वे वास्तवे एव । ततश्च लक्षणया तत्प्रतीतौ तत्सम्बन्धिनो तयो स्मरणस्यैव सम्भवेन व्यङ्ग्यत्वनियमरहितयोस्तयोरतिशय एव प्रयोजनमित्यभिप्रायात् ।

(वि, ट) फले द्वात्रिंशदिति—पूर्वोक्तषष्टविधप्रयोजनस्य गूढागूढत्वाभ्यां द्वैगुण्येन षोडशविधस्य धर्मिधर्मगतत्वेन द्वैगुण्याद् द्वात्रिंशदित्यर्थ । पदवाक्यगतत्वेन व्यङ्ग्यत्वेन । गङ्गायामिति—नन्विदमपि घोषान्वयवशात् वाक्यमेव यदि च वाक्यस्थैक-पदस्यैव लाक्षणिकत्वात्तद्व्यङ्ग्यस्य पदगतत्व तदा उपकृत बहित्यत्रापि न वाक्यगतत्वम् । उपकृत बहु तत्र किमुच्यते इति वाक्यस्थस्योपकृतपदस्य एकस्यैव लक्षणिकत्वादिति चेन्न । वाक्यगतपदद्वयस्य लाक्षणिकत्वे तयो पदयोर्वाक्यत्वेन वाक्यगत्वात् । भवति हि उपकृतमित्यत्र उपकृतमुच्यतापदयोर्वाक्यस्थयोर्लाक्षणिकत्वम् ।

विशेषो लक्ष्यते । तेन फलात् अत्यन्तदुःसहविष्णुः रामोऽस्मि इति शब्दाभिधानालभ्य तथाभूतरामविशेषस्य एवानिशयस्तात्पर्यमेव प्रयोजनमिति ।

(लो, ई) तस्मात् एवमुक्तप्रकारेण 'उपकृत बहु तत्र" इत्यत्र बहुपदनिष्ठत्वा भिप्रायेण वाक्यगतत्वम् । एवमत्र हि ध्वनिगुणीभूतव्यङ्ग्यदोषगुणालङ्काराणा वाक्य निष्ठत्वम् प्राचीनालङ्कारग्रन्थेष्वपि प्रायशो दृश्यते । तथाहि काव्यप्रकाशकृतो हि निहतार्थत्वे उदाहरणम् ।

' सायकसहायबाहोर्मम रथचलनियमितक्षमाधिपते ।
अञ्जनचिभास्वरस्ते भ्रातिरामवनिपश्चेत्" ॥ इति ।

×—अशीतिप्रकारेति, कथं अष्ट प्रयोजने च अष्ट लक्षणा च । प्रयोजनभूता अष्टौ लक्षणा प्रयोजनस्य गूढत्वेन अगूढत्वेन च (८×२) प्रत्येक द्विधा भूत्वा षोडशप्रकारा भवन्ति । ता षोडशप्रकारा धर्मगतत्वेन धर्मिगतत्वेन च (२६+२) प्रत्येक

2 ' पदगतत्वे" इति (ग फ)

3 ' वाक्यगतत्वे" इति (ग फ)

अथ व्यञ्जना—

"विरतास्वभिधाद्यासु ययार्थो बोध्यतेऽपरः ।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ॥ १६ ॥

" शब्दबुद्धिकर्मणा विरम्य व्यापाराभाव. " इति नयेनाभिधालक्षणातात्पर्याख्यासु तिसृषु वृत्तिषु स्व स्वमर्थं बोधयित्वोपक्षीणासु ययान्योऽर्थो बोध्यते सा शब्दस्यार्थस्य प्रकृतिप्रत्ययादेश्च [1]वृत्तिर्व्यञ्जनध्वननगमनप्रत्यायनादिव्यपदेशविषया[2] व्यञ्जना नाम । (ठ, उ)

नच क्रियते इत्यन्तस्य भिन्नवाक्यत्वात् कथं तयोरेकवाक्यत्वमिति वाच्यम्, "क्रियते अत सुजनता प्रथिता" इत्येकमेकवाक्यत्वात् ।

(नि, ठ) व्यङ्गयो व्यञ्जनयेत्युक्तत्वात् व्यञ्जनालक्षण वक्तुमाह—अर्थेति । नयेनेति । एतन्न्यायात् शब्दस्येव तन्निष्ठवृत्तेरपि विरति सिद्ध्यति इत्यर्थ । उपक्षीणास्विति । अर्थान्तरबोधने क्षीणसामर्थ्यासु ।

(लो, उ)—उद्देशक्रमप्राप्ता व्यञ्जना निरूपयति—अर्थेति । परोभिधेयादिव्यतिरिक्तो व्यङ्गयत्वेन निरूपयिष्यमाणो वस्त्वलङ्काररसलक्षण । तिसृष्विति—अभिहितान्वयवादिमतमाश्रित्य आन्विताभिधानमते तु द्वयो । तत्रापि लक्षणाया अभावे तु प्रथममते तु द्वयो द्वितीयमते त्वेकस्या । ध्वननादयो व्यञ्जनस्य पर्यायान्तराणि ।

द्विविधा भूत्वा द्वात्रिंशत्प्रकारा भवन्ति । ताश्च प्रयोजनमूला द्वात्रिंशत्प्रकारा रूढिमूलाभिरष्टभिर्मिलित्वा (३२ ६) चत्वारिंशत् प्रकारा भवन्ति । ताश्च सर्वा पदवृत्तित्वेन वाक्यवृत्तित्वेन पुन प्रत्येक द्विधा भूत्वा (४० × २) अशीतिप्रकारा भवन्ति ।

* विरम्य स्वविषय बोधयित्वा क्षीणा भूत्वा । प्रथमशब्दो द्वितीय जनयित्वा निवर्तते, न तु तस्य तृतीयशब्दबोधने शक्ति । एव द्वितीयादिरपि । तथैव ज्ञानमिच्छा जनयित्वा निवर्तते । तथैव प्रथम कर्म द्वितीय जनयित्वा निवर्तते । अत एका वृत्तिरेकमेवार्थं बोधयित्वाऽपरमपि बोधयितु न क्षमा । केचित्तु—शब्दबुद्धि शब्दज्ञानमेव । कर्म व्यापार —तासामभिधालक्षणातात्पर्याख्यवृत्तीना विरम्य स्व स्वमर्थं बोधयित्वा व्यापाराभाव पुनर्बोधनसामर्थ्याभाव । "सकृदुच्चरित शब्द सकृदेवार्थं बोधयति" इतिन्यायात् । विरतास्विति—अभिधाद्यासु विरतासु ययाऽपर अर्थ बोध्यते सा शब्दस्य अर्थादिकस्य वृत्तिर्व्यञ्जना नाम । व्यञ्जनात—

1 "शक्ति" इति (च छ.पुस्तकयो)
2 "विषय " इति (ठ पुस्तके)

तत्र—

अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा ॥ २० ॥

अभिधामूलामाह—

अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते ।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया ॥ २१ ॥

[1]आद्यशब्दात् विप्रयोगादयः । (ङ, ऊ)

उक्तं हि—"संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥" इति (ङ, ऋ) ।

(वि, ङ) अनेकार्थस्येति—संयोगादीन् वक्ष्यति, तैरनेकार्थस्य शब्दस्य एकमर्थं नियन्त्रिते अर्थान्तरबोधं प्रतिरुध्य बोधिते सति अन्यस्य प्रतिरुद्धार्थस्य धियो हेतुर्या वृत्तिः सा व्यञ्जनाऽभिधाश्रया इत्यर्थः । आद्यशब्दादिति संयोगाद्यैरित्याद्यशब्दादित्यर्थः ।

(वि, ढ) संयोगः, समभिव्याहृतापरपदार्थस्य । विप्रयोगः—त्यागः, सोऽपि तस्यैव । साहचर्यं—समभिव्याहृतपदार्थेन सह सर्वदा स्थितिः विरोधिता वैरिता सापि तादृशापरपदार्थेन सह । अर्थः प्रयोजनं तच्च समभिव्याहृतम् । प्रकरणमुपक्रमः । लिङ्गं चिह्नं तदपि समभिव्याहृतम् । सामर्थ्यं समभिव्याहृतपदार्थजनने । औचितीं तात्पर्यम् । देशकालावपि समभिव्याहृतौ । व्यक्तिः शब्दस्य पुंस्त्वादिलिङ्गानि । स्वरः उदात्तादिः । अनवच्छेदेऽनेकत्वे । विशेषस्यैकस्यैवार्थस्य स्मरणहेतवः संयोगादयः इत्यर्थः । नैयायिकमते सर्वेषामेव पदार्थानां स्मरणमन्वय-

---

(लो,ऊ) अनेकार्थस्य विष्णुसिंहादनशब्दाभिधेयशब्दस्य इत्यादेः एकमर्थं नियन्त्रिते इत्यन्वयः । अथ वाच्यरूपे नियन्त्रिते अर्थान्तरनिरुद्धप्रसरतया व्यवस्थापिते । अन्यस्य संयोगादिसाचिव्याभावात् अभिधाया अविषयस्य बुद्धेर्हेतुः व्यञ्जना ।

(लो, ऋ) उक्तं हि भर्तृहरिणा इति शेषः । संयोग इति । विरोधो वध्यघातकादिः । अर्थः फलम्, प्रकरणं प्रस्तावः । लिङ्गम् विषयव्याप्तो धर्मः । सन्निधिः

व्यञ्जनम्—व्यङ्ग्यप्रत्ययबोधनम् ध्वननम्—ध्वन्यर्थप्रतिपादनम् गमनम्—अवगतिजननम्—प्रत्ययनम्—प्रतीतिप्रतिपादनमित्यादयो ये व्यपदेशाः संज्ञा विषयवस्तु यस्या सा । अर्थादाद्यादिभिः संज्ञाभिः कथ्यते ।

* संयोगः सम्बन्धः स च गुणरूपः । विप्रयोगः—संयोगभङ्गः तस्य प्रतियोगिनागमनाधारणत्वनियमाद् विशेषोपस्थापकता । औचितीं—अनुरूपतया सम्बन्धः ।

1 'आदि" इति (ग घ)

" सशङ्खचक्रो हरि " इति शङ्खचक्रयोगेन हरिशब्दो विष्णुमेवाभिधत्ते। "अशङ्खचक्रो हरि" इति तद्वियोगेन तमेव। "भीमार्जुनौ" इति अर्जुन पार्थ। " कर्णार्जुनौ " इति कर्ण सूतपुत्र। " स्थाणु वन्दे " इति स्थाणुः शिवः।

" सर्वं जानाति देव " इति देवो भवान्। " कुपितो मकरध्वजः " इति पुरारि. शिवः। "मधुना मत्तः पिकः इति मधुर्वसन्तः। "पातु[1] वो दयिता-मुखम्" इति मुख साम्मुख्यम्।

"विभाति गगने चन्द्र " इति चन्द्र शशी। " निशि चित्रभानु " इति चित्रभानुर्वह्नि। " भाति रथाङ्गम्" इति नपुंसकव्यक्त्या रथाङ्गं चक्रम्। स्वरस्तु

बोधस्वेनैव पदार्थमादाय। एतन्मते तु यस्य पदार्थस्यान्वयबोधस्तस्यैव विशेषस्य स्मरणमिति।

(वि, ण) तद्वियोगेनेति—शङ्खचक्रत्यागेनेत्यर्थ। ननोऽत्र त्यागार्थकत्वात्। भीमार्जुनाविति साहचर्य्ये। अत्र अर्जुनपद पार्थकार्त्तवीर्य्ययो। भीमपदं महेशपार्थयोरनेकार्थम्। कर्णार्जुनाविति विरोधितायाम्। अत्र द्वयमपि पदमनेकार्थम्। प्रयोजने स्थाणुमिति। अत्र राज उपक्रमो वाक्यान्तराङ्गम्य। चिह्ने—कुपित इति कोपस्य कामचिह्नत्वात्। समुद्रोऽपि मकरध्वज। नच कामदेवस्यापि कोप इति वाच्यम्, विरहिण्या कुपित इत्यर्थात्। अन्यशब्दसन्निधौ स देव इति—अत्र देवशब्दोऽनेकार्थ। तुल्यविभक्तिकपुरारातिशब्दस्य सन्निध्यम्। सामर्थ्ये मधुनेति—अत्र मधुर्दैत्यविशेषेऽपि, कोकिलमादने वसन्तस्यैव सामर्थ्यम्। आंक्षेत्या 'पातु व'

सामानाधिकरण्यम्। सामर्थ्यं तत् कारणानियम। देशस्तद्विशेष। कालस्तद्विशेष। व्याकृ. पुंस्त्वादि स्वरा उदात्तादय। अनवच्छेदे एकवाक्यनियमे। विशेष एकवाक्यरूप।

(लो, ऋ) एषा नियन्त्रणस्वरूप क्रमादुदाहरणैर्दर्शयति—सशङ्खेत्यादि। विष्णुमेवेत्येवकारेण शार्ङ्गिहाद्यादेर्व्यवच्छेद। तयो शङ्खचक्रयोर्वियोगऽभावेऽपि तमेव हरिमेवाभिधत्ते इत्यनुपपन्नते, प्रतिषेधस्य प्रसज्यपूर्वकत्वात्। पथा नतु वृक्ष-विशेष। सूतपुत्रो नतु श्रवणम्। अत्र वध्यघातको विरोध, सहानवस्थाने तु छायातपाविति। स्थाणुशब्दस्य शब्दवाचकत्वे लक्ष्यच्छेदाख्य न घटते। भवान् प्रभुतो राजा। कामो न तु मकराकारो ध्वज, तस्य कोपरूपधर्मासभावात्। शिवो न मुरारिः। वगन्तो न तु मधम्। सान्निध्य न तु वदन, तस्य कामग्रनरतायोग्यत्वाभावात्। शशी न तु कर्पूरम्। वह्निर्न तु रवि। चक्र न तु चक्रवाक। वेद एव विशेष

एते शब्दार्थस्य शब्दवाच्यस्य अनवच्छेदे अनिश्चये सति (सन्देहे सति) विशेषस्य विवक्षितार्थस्य या स्मृतिर्ज्ञान तस्य हेतव —सन्देहनिराकरणेन अर्थस्य निर्णय कुर्वन्ति।

1 'पातु' इति (ग पु०)

वेद एव विशेषप्रतीतिकृत् न काव्ये इति तस्य विशेषो[1] नोदाहृत[2] ॥ (ण, ऋ)

इद च केऽप्यसहमाना आहुः—

"स्वरोऽपि काक्वादिरूपः काव्ये विशेषप्रतीतिकृदेव । उदात्तादिरूपोऽपि मुने पाठोक्तदिशा शृङ्गारादिरसविशेषप्रतीतिकृदेव, इत्येतद्विषये उदाहरणमुचितमेव" इति । तन्न । तथाहि स्वरा काक्वादय उदात्तादयो वा व्यङ्ग्यरूपमेव विशेष प्रत्याययन्ति न खलु प्रकृतोक्तमनेकार्थशब्दस्यैकार्थनियन्त्रणरूप विशेषम् । (त) किञ्च यदि यत्र क्वचिदनेकार्थशब्दाना प्रकरणादिनियमाभावादनियन्त्रितयोरप्यर्थयो अनुरूपस्वरवशेनैकत्र नियमन वाच्य, तदा तथाविधस्थले श्लेषानङ्गीकारप्रसङ्ग (त)

इति—अत्र मुखपद प्रभृत्यादावनेकार्थम् । मानिन्या साम्मुख्ये वक्तुत्वात्पर्य्यम् । देशे भानीति—अत्र चन्द्रपद कर्पूरेऽपि । देशो गमनम् । काले निशीति—विप्रभानु सूर्य्योऽपि । व्यक्तौ—रथाङ्गमिति, चक्रवाकस्तु रथाङ्ग ।

(वि, त) मुने. पाठोक्तदिशेति—मुनिना वेदस्य स्वरविशेषेणैव पठनात् । **द्वयोरर्थयोरनुरूपेति**—द्वयोरर्थयोर्मध्ये एकस्यानुरूपस्वरवशेनेत्यर्थ । एकोच्चारणे द्वयोरनुरूपस्वरासम्भवात् । तथात्वे एकत्र नियमनासम्भवाच्च । तदा तथाविधस्थले श्लेषानङ्गीकारप्रसङ्ग इत्यर्थ । एकार्थनियमनऽन्यार्थस्य व्यङ्ग्यत्वेन तस्योपमानत्वात् उप-

---

प्रतीतिकृत् इति अनेकार्थवाचकशब्दस्य एकार्थवाचकत्वे नियन्त्रणरूप, तत्प्रत्यय च स्वरो वेदे एव करोति । यथा इन्द्रशत्रुरित्यादौ षष्ठीतत्पुरुषे समासान्तोदात्तमूचिते इन्द्रस्य शमयिता वा दैत्योऽरिरेवाभिधीयते । बहुव्रीहौ तु पूर्वपदान्तोदात्तनिरूपणेति इन्द्र एव शमयिता शातयिता चेति । इद हि काव्यप्रकाशकारस्य उदाहरणम् ।

(लो, लृ) केऽपीति—श्रीचण्डीदासरायघवानन्दप्रभृतय । असहमाना इति । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव इत्यत्र विशेषपदस्याऽन्यानवबोधने इति शेष । **आहुः—स्वरोऽपि** इत्यादि **उचितमेव** यन्तम् । तत्र काक्वादीनां विशेषप्रतीतिकृदेव नियन्त्रणरूप । उदाहरण तेरेव दर्शनम् । यथा 'मध्नामि कौरवशतं समरे न कोपादित्यादि भीमवचनम् ।' अत्र न मध्नामीत्यनेन काकुवचनेन मध्नाम्येव इति विशेषप्रतीतिरिति । मुने पाठगुणाङ्गमार्गश्च तैरेव दर्शितो यथा—'यथाह मुनि भरत —'हास्यशृङ्गारयो स्वरितोदात्त, वारौद्राद्भुतेषु उदात्तकम्पित, करुणभीभत्सभयानकेषु अनुदात्तकम्पितम् उत्पादयेदिति । तन्न तत्र तेषा वचनमयुक्तम्, कथ

---

1 'विषये' इति (घ पु०)
2 'नोदाहृतम्' इति (ग पु०)

नच तथा। अत एवाहु. श्लेषनिरूपणप्रस्तावे-"काव्यमार्गे स्वरो न गण्यते" इति च [1]नये, इत्यलमुपजीव्यानां मान्यानां व्याख्यानेषु कटाक्षनिक्षेपेण। आदिशब्दात् " एतावन्मात्रस्तनी " इत्यादौ हस्तादिचेष्टादिभि. स्तनादीना कमलकोरकाद्याकारत्वम्। (ए)

एवमेकस्मिन्नर्थे अभिधया नियन्त्रिते या शब्दस्यान्यार्थबुद्धिहेतुः शक्ति., सा अभिधामूला व्यञ्जना। (थ)

माधुर्यनिष्ठस्यैव प्रसक्तेर्नतु श्लेषस्य। यथा वक्ष्यमाणे दुर्गालङ्घितविग्रहे इत्यादौ प्रकरणादुमामहादेवीवल्लभभानुदेवराजनियमने पार्वतीवल्लभस्य व्यङ्ग्यत्वेन राज्ञ तदुपमाध्वनिरेव।

(वि, थ) न च तथेति—तथात्वे पृथुकार्त्तस्वरपानमित्यादिश्लेपालङ्कारोच्छेदप्रसङ्गादिति भाव। अत एवाहुरिति काव्यप्रकाशकारादय आहुरित्यर्थ। उपजीव्यानामिति काव्यमार्गेऽपि स्वरगणयितृणा प्राचीनानामुपरीत्यर्थ। **आदिशब्दादिति**—स्वरादय इत्यादिशब्दादित्यर्थ। **हस्तेति**—हस्तचेष्टादिभि स्तनादीना कमलकोरकाद्याकारत्व स्मार्यत इत्यर्थ।

'एद्दहमेत्तथिणिआ एद्दहमेत्तेहि अच्छिवत्तेहिँ।
एद्दहमेत्तावत्था एद्दहमेत्तेहिं दिअ एहिँ॥' इत्यादि

प्राकृतश्लोकस्य हि—

'एतावन्मात्रस्तनिका एतावन्मात्रैरक्षिपत्रै।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसै'॥ इति संस्कृतम्।

स्तनादीनामिति—कमलकोरकादित्यादिपदद्वयात् चक्षुरादीना पद्मपलाशाद्या-

---

मित्याह—**तथाहीति**। व्यङ्ग्यरूपमेव भवद्दर्शितं, माधुर्यव्यञ्जकत्वमेव श्लेषालङ्कारस्य च। प्रकृतोक्त 'सयोगो विप्रयोगश्च' इत्यादिना भर्तृहरिणा उक्त दर्शितम्। अनेकार्थे इत्यादौ अर्थशब्दो वाच्यपर, विशेष इत्यनन्तर सयोगादिप्रयोगादीति शेष।

(लो ए) एवं प्राचीनोक्त दूषयित्वा स्वयमेव पूर्वपक्षमुत्थाप्य निराचष्टे किञ्चेति। यत्र क्वचिन्—

(" येन ध्वस्तमनोभवेन बलिजित्काय पुरा स्त्रीकृतो
यद्योदृत्तभुजङ्गहारवलयोद्गमा च योऽधारयत्।
यस्याहु शशिमत् शिरो हर इति स्तुत्य च नामामरा
पायात् स स्वयमन्धकक्षयकरस्त्वां सर्वदोमापत॥")

इत्यादौ द्वयोरप्यर्थयोर्हरस्तुतिपरयोरनुरूप स्वर उदात्तादिरेकत्र हरौ हरे वा। नच तथा श्लेषाङ्गीकार। अत्राचार्यसम्मति दर्शयति—अत एवेत्यादि।

---

1 " नय " इति (ग. पु.)

यथा मम तातपादानां महापात्रचतुर्देशभाषविलासिनीभुजङ्गममहाकवीश्वर-श्रीचन्द्रशेखरसान्धिविग्रहिकाणाम् ।—

" दुर्गालङ्घितविग्रहो * मनसिज सम्मीलयंस्तेजसा
प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभि ।
नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढा रुचिं धारयन्
गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभ ।"

कारपरिग्रह । अत्र एतत्पद नानाकारबोधकत्वेनानेकार्थम् । चेष्टाविशेषस्त्वाकार विशेषस्मारक । शक्ति वृत्ति ।

(वि, द) दुर्गालङ्घितेति । अत्र उमा नाम महादेवी तस्या वल्लभो भानुदेव-नृपति । प्राकरणिको राजति । कादृश शत्रुदुर्गणैरनिवारितयुद्ध । तेजसा देहकान्त्या मनसिज सम्मीलयन् सौन्दर्य्यगर्वात् सङ्कोचयन् । प्रोद्यन्ती राजकला नृपतिचातुर्य्य यस्य तादृश । गरिमा, वपु पुष्टि , गृहीततत्त्व । भोगिभिर्नाम भोगवद्भि अमा त्यैर्विष्वक् सर्वतो वृत । क्षत्रेशेषु क्षत्रियेश्वरेषु राजसु अवज्ञया न कृतेक्षणो अकृत दृक्पात । गुरौ महत्या गिरि वाचि, गाढा रुचिं प्रीतिं धारयन् गामाक्रम्य पृथिवी-मधिकृत्य, विभूत्या ऐश्वर्य्येण भूषिततनु । अत्र दुर्गादिपदान्यनेकार्थानि प्रकरणवशा-दुचितार्थं नियन्त्रिते वाचकानि (शब्दा) अर्थान्तर तु व्यञ्जनया बोधयन्ति । तथा हि—उमाया पार्वत्या वल्लभो महेशो राजति । कीदृश —दुर्गया, पार्वत्या, लङ्घित-

---

नय नीत्या लोकप्रसिद्धायाम् । तेषामुपजीव्यत्व—तद्ग्रन्थनिष्ठया स्वव्युत्पत्त्या विशेष सम्पादनात् । आदिशब्द , कालो व्यक्ति स्वरादय इत्यत्र । चेष्टादित्यादिशब्देन—इत स दैत्य प्राप्तश्रीर्नेत एवार्हति क्षयम्' इत्यादौ आत्मनिर्देशादय ।

(लो, ऐ) दुर्गालङ्घितेति—दुर्गाणि वनगिरिजलमयस्थानानि दुर्गा पार्वती च, अलङ्घितो लङ्घितश्च, विग्रहो युद्ध देहश्च, सम्मीलन तिरस्कारो दहन च, तेन कान्ति नयनाभिश्च । राजा पार्थिवश्चन्द्रश्च । कला कलना अंशश्च, गरिमा महिमा ऐश्वर्य्य विशेषश्च । भोगिन सर्पश्चन्दनादिभोगवन्त सर्पाश्च । क्षत्रेश्वरेषु अकृतदृष्टि *क्षत्रे शेन चन्द्रेण कृतनयनश्च । गुरौ महत्याम् । गिरि वाचि । गिरीणा गुरौ, श्रेष्ठे च गा पृथिवी वृषभ च । विभूति सम्पत् भस्म च । उमावल्लभो भानुदेव ईश्वरश्च । प्रक रणेन वर्णनीयत्वात् । इह च उमावल्लभशब्देन योऽयमप्रकृतो महेश्वरार्थ प्रतीयते तस्याऽसम्बद्धत्वमाशंक्यादिति महेश्वरभानुदेवयोरुपमानोपमेयभाव कल्प्यते । तेन उमावल्लभ इत्युपमाध्वनि व्यञ्जनयैव बोध्यते । इत्यत्रेवकारस्यायमाशय —इह खलूमावल्लभशब्दे येय द्वितीयार्थप्रतीति तत्राभिधाया प्रकृतार्थमात्रबोधने विरमात् लक्षणाया मुख्यार्थ

---

* दुर्ग. अलङ्घित (शत्रुभिरनिवारित) विग्रह युद्ध यस्य । शिवपक्ष—दुर्गया पार्वत्या लङ्घित (आक्रान्त) विग्रह (देहो यस्य स) ।

अत्र प्रकरणेनाभिधेये[1] उमावल्लभशब्दस्य उमा नाम महादेवी—तद्[2] वल्लभभानुदेवनृपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपोऽर्थो बोध्यते। एवमन्यत्। (द, ऐ)।

लक्षणामूलामाह—

लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनं।

विग्रह आश्लेषेण आक्रान्तशरीर। तेजसा नेत्रज्योतिषा, मनसिज सम्मीलयन् निघ्नन्। राकेला चन्द्रकला, शिरसि प्रद्योतन्त गृहीतगरिमा गृहीतजगद्गुरुभार। भोगिभि सर्प सर्वतो धृत। क्षत्रेशेन चन्द्रेण घटितलोचन सूर्यचन्द्राग्निमयलोचनत्वात्। गिरीणा गुरौ हिमालये गाढा रुचिं धारयन् श्वशुरत्वात् स्वीयतपोनिलयत्वाच्च। गा वृषम् आक्रम्यारुह्य राजतीयन्वय। विभूतिभिर्भस्मभिर्भूषिततनुश्च। इत्थमनाऽप्राकरणिके महेशे व्यञ्जिते प्रकृते सङ्गमनाय महेश इव राजेत्युपमाव्यञ्जनादुपमाध्वनिरयम्।

(वि, ध) यस्य कृते इति। यत्प्रतीतेर्निमित्तमित्यर्थ। वैशिष्ट्यात् वैलक्षण्यात्।

बोधहेतुकत्वात्। तात्पर्यस्य शक्त्यभिहितलक्षितसंसर्गमात्रबोधननैयत्यात् व्यञ्जनाख्या तुरीया वृत्तिरुपास्त्येवेति। नन्वत्राप्यर्थभेदेन शब्दभेद इति दर्शनात् शब्दभेदद्वयमस्ति। तच्च सामान्यादैक्यभ्रमहेतु। अतश्च प्रथममुमावल्लभादिशब्देन राजार्थबोधनाद् विरतायां प्रथमाभिधायां द्वितीय शब्द तन्निष्ठाभिधाशक्त्या द्वितीयार्थं बोधयतु किं वृत्त्यन्तरकल्पनया इति चेन्न। अत्र हि शब्दद्वयकल्पने कथ प्रकृतार्थस्य प्रथम प्रतीतिरनुभूयते, द्वयोरभिधेयत्वेन पूर्वपश्चाद्भावनैयत्यासम्भवात्। एव "भ्रमिमरतिम्" इत्यादावपि विषशब्दस्य गरलार्थत्वे भुजङ्गादिपदसाचिव्यात् न पुनरभिधाया उज्जीवन, किन्तु व्यञ्जनैव व्यापार। किन्त्वत्र द्वितीयार्थबोधे हेतुर्भुजङ्गादिरूप शाब्द। दुर्गालङ्घितेत्यादावार्थ। "येन ध्वस्तम्" इत्यादौ तु नियामकाभावात् अनेकार्थविषय सन्देह "व्यधा द्वेषामपि मेदिनीभृताम्" इत्यादौ चोभयाभिधानमपीति चण्डीदासपरिष्टता। एतन्निराकरिष्यामहे श्लेषालङ्कारव्याख्यानावसरे। दुर्गालङ्घितेत्यादौ च द्वितीयार्थस्यानुभवसिद्धस्याऽभाव वदतो महिमाचार्यस्य गजनिमीलिन्याय एव दुर्व्याख्यातृदुरुपदेशपरम्परयैव द्वितीयार्थप्रत्याख्याने व्यासवाल्मीकिप्रभृतिमहाकवीनां तादृशकाव्यनिबन्धस्य निष्फलताप्रसङ्ग। अर्थद्वयस्यापि प्रतीयमानत्वविशेषाद् व्याख्याविशेषनियमनायां प्रमाणाभावश्च। किञ्च द्वितीयार्थबोधने धर्मिकल्पनातो वर धर्मकल्पनेति भिन्नशब्दकल्पनात् भिन्ना एव व्यञ्जनाख्या वृत्तिरङ्गीकर्तुमुचिता तस्यास्तु यत्र तत्र अर्थेऽप्रतीयमाने शब्दभेदेन प्रत्यभिज्ञाऽभावात् इति सर्वमवदातम्।

---

1 'अभिधया इति (ग घ पु०)

2 'तद्' इति ग पु नास्ति।

यया प्रत्याय्यते सा स्याद् व्यञ्जना लक्षणाश्रया ॥ २२ ॥
(ओ) *

"गङ्गायां घोषः" इत्यादौ जलमयाद्यर्थबोधनादभिधाया विरतायां तटाद्यर्थबोधनाच्च लक्षणाया विरतायां यया शीतत्वपावनत्वाद्यतिशयादिर्बोध्यते, सा लक्षणामूला व्यञ्जना।

एवं शाब्दीं व्यञ्जनामुक्त्वा आर्थीं व्यञ्जनामाह—

वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः ।
प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च ।
वैशिष्ट्यादन्यमर्थं या बोधयेत्सार्थसम्भवा ॥ २३ ॥
व्यञ्जनेति सम्बध्यते (ध, ओ)

तत्र वक्तृ वाक्य प्रस्ताव-देश-कालवैशिष्ट्ये यथा मम—

"कालो मधुः कुपित एष च पुष्पधन्वा
धीरा वहन्ति रतिखेदहरा समीराः।
केलीवनीयमपि वञ्जुलकुञ्जमञ्जु-
र्दूरे पतिः कथय किं करणीयमद्य ? +

(वि, न) कालो मधुरिति—सखीं प्रति प्रोषितभर्तृकाया उक्तिरियम्। स्पष्टोऽर्थः।

(लो, ओ) लक्षणामूलामुद्देशक्रमप्राप्तामाह शेष। उपास्यते आश्रियते, यस्य कृते यन्निमित्तम् यया शब्दशक्त्या।

(लो, ओ) प्रकरणसङ्गतिमाह **एवमिति**—बोध्यते य स बोद्धव्य। शब्दप्रयोगस्य परार्थत्वात्, यत्समवेता प्रतीतिरुपपद्यते स इत्यर्थः। उच्यते शब्देन प्रतिपाद्यते य स वाच्य। तेन वाच्य-लक्ष्य व्यङ्ग्यात्मनस्त्रिविधस्यार्थस्य परिग्रहः। प्रस्ताव प्रकरणं, काकु ध्वनेर्विकारः, वैशिष्ट्यात् वैलक्षण्यादिति वक्त्रादिषु प्रत्येक मन्वयः। अन्य प्राचामभिधेयादिर्वैलक्षण्यम्।

(लो, अ) **काल** इति। एष इत्यनेन तत्कालानुभूयमानोन्मादकत्व कामस्य सूचितम्। **पतिरिति**—पतिर्भर्ता न तु प्रिय। अत्र वक्त्र्या मदनविह्वलतादिना वैशिष्ट्यम्, वाक्यस्य तथाभूतानुभूयमानविच्छित्तियुक्तत्वेन।

---

* यस्य (प्रयोजनस्य) कृते लक्षणा उपास्यते तत् प्रयोजन तु यया प्रत्याय्यते (बोध्यते) सा लक्षणा यया व्यञ्जना। यस्य पावनत्वादे फलस्य प्रतीत्यर्थलक्षणया शब्दप्रयोग —तत्फल यया वृत्त्या बोध्यते सा लक्षणमूला व्यञ्जना वृत्ति।

+ मधु वसन्त, पुष्पधन्वा कन्दर्प। वञ्जुलेति—वञ्जुल अशोक तेषा कुञ्जा ते मञ्जु मनोहरा।

अत्रत[1] देश प्रति शीघ्रं 'प्रच्छन्नकामुकस्त्वया प्रेष्यताम्' इति सखीं प्रति क्वचित् द्योत्यते[2] ॥ (न, अ)

बोद्धव्यवैशिष्ट्ये यथा—

"नि शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तथेयं[3] तनुः ।
मिथ्यावादिनि ! दूति ! बान्धवजनस्याज्ञातपीडागमे !
वार्षीं स्नातुमितो गताऽसि न पुनस्तस्याधमस्यान्तिकम् ॥ (प, आ)

अत्र तदन्तिकमेव गताऽसीति[4] विपरीतलक्षणया लक्ष्यम्। तस्य च रन्तुमिति

अत्रेति—एतद् देश केलावनीरूपम् । ईदृशव्यङ्ग्यबोधे केलावनीरूपस्य तत्प्रदर्शनेन करणायाजनामार्थस्वाक्यस्य तत् वक्त्र्या उद्दीपकप्रदर्शनलब्धशृङ्गारप्रकरणस्य मधुरूपकालस्य च वैलक्षण्य हेतु ।

(वि, प) नि शेषेति—उपनायकमानेतु प्रेषिता युवतिं तेनैव उपभुक्तामागत्या सौ मत्प्रार्थनयाऽपि नायात इति प्रतारयन्तीं दूतीं प्रति नायिकाया सोल्लुण्ठोक्तिरियम्। हे मत्प्रार्थनयाऽपि नायात इति मिथ्यावादिनि ! दूति ! बान्धवजनस्य मम अज्ञानकामर्पाटागमे इत स्नातु वापीं गताऽपि न पुनस्तस्याधमस्यान्तिक गताऽसि। वापीं स्नातुमिति नान्वय, स्नाधातोरकर्मकत्वात्। आपातत स्नानकार्याणि दर्शयति—**नि शेषेति**। यतस्ते स्तनतट स्तनपार्श्वभागो नि शेषच्युतचन्दनम्। अधरश्च निर्मृष्टराग। नेत्रे च दूरमतिशय यथा स्यात्तथाऽनञ्जने जाते इति शेष। तत् क्रियाविशेषण च दूरमिति। तथा इय तन्वी कृशा तव तनु पुलकिता; स्नानशीलात् जातपुलका इत्यर्थ। तथेति विशेषणसमुच्चये।

(वि, फ) गताऽसि इति लक्ष्यमिति । चन्दनच्यवनादीना रतिकार्य्यत्वेनैव

प्रस्तावस्य पतिदूरस्थित्यादिना देशस्य च क्रीडावनरूपस्य वसुलसुखादिना कालस्य वसन्तत्वेन एवमेषा वैशिष्ट्येन वक्रोक्त्या व्यङ्ग्यार्थप्रकाशन स्फुटमेव।

(ले, आ) नि शेषेति—तट समीप, स च समप्रायो देश। तत्र चन्दन नि शेषच्युत चुम्बनादिषु च शेषम्, अधरो निर्मृष्टराग न तूत्तरौष्ठ, दूरमनञ्जने निकटे तु रागणे अन्यत्रस्य क्वचिद् क्वचिदवशेष सूचित। इय तनु चिर कालेऽपि स्नाने इदानीं पुलकिता तन्वी श्यामा च। अधमस्य प्रागपि लक्षितनिकृष्ट परिग्रहस्य।

---

1 "न इति (च पु)
2 'व्यज्यते" इति (च छ पु)
3 तवेयमिति पाठान्तरम्। (ग घ ङ च पु)
4 "रन्तु" इति च पु अधिक पाठ।

व्यङ्ग्य[2] प्रतिपाद्यदूतिवैशिष्ट्यात् बोध्यते ॥ (फ, इ)

अन्यसन्निधिवैशिष्ट्ये यथा—

"उअ णिच्चल ! णिप्पन्दा भिसिणीपत्तम्मि रेहइ बलाआ ।
णिम्मलमरगअभाअण-परिट्ठिआ सङ्खसुत्तिव्व ।"

प्रतीत्या तदन्तिकेऽगमनबोधात्, तद्विपरीत गमन लक्षणयार्थ । तेया रतिकार्य्य त्वेनैव प्रतीतिर्हि—चन्दनाधररागयोश्च्युतिमार्जनाभ्या, स्नाने त्वनयो क्षालनमेवोक्त स्यात् । तथा दूरं, चुम्बनस्पृष्ट नेत्रप्रान्तभाग प्राप्य अनञ्जने स्नाने तु समस्तनेत्रस्यै-वानञ्जनत्वमुक्त स्यात् । तथा चन्दनच्युतिमहिम्ना ग्रीष्मकालप्राप्तौ पुलकेन च तदानी स्नानेन पुलकाभावात् । तथा तदन्तिकागमने तस्य दोषाभावात् अधमत्वोक्त्यनौ-चित्यम् दूतिरन्तृत्वेनैवाधमत्वोपपत्तेश्च । अत्र गमन लक्षणयेति यदुक्त तत् काव्य-प्रकाशकारस्याऽसम्मतम् । रन्तु तदन्तिकगमनस्यैव तन्मते व्यङ्ग्यत्वात् । तथा हि न गताऽसीत्यस्य काव्यत्वेन तत्र लक्षणाया एवाभावात् । तदुक्त 'वाक्ये न शक्तिर्न वा लक्षणेति' पदलक्षणा तु न सम्भवत्येव गमनस्य गमधातुवाच्यत्वादेव । नन्वर्थ स्य तु वापीगमनान्वयेनैव तदुपपत्त । यदि च वाक्येऽपि लक्षणा स्वीक्रियते तथ पि न लक्षणा । रन्तु तदन्तिकस्यैव तन्मते प्रथम व्यङ्ग्यत्वादेव । तथा हि चन्दनच्य वनादीना प्रथम स्नानकार्य्यत्वेनैव प्रतीत्या बाधानवतारात् । प्रतिसन्धानविशेषेण उत्तर-कालमेव बाधावतारात् । अत्र च व्यञ्जनाया प्रवृत्तेर्नतु लक्षणाया एव । प्रथम बाधा वतार एव लक्षणाया प्रवृत्ते । तदुक्तम् ।

('क्वचित् बाध्यतया ख्याति क्वचित् ख्यातस्य बाधनम् ।
पूर्वत्र लक्षणैव स्यादुत्तरत्राभिधैव तु ॥ इति ।)

पूर्वत्र प्रथम बाध्यतया ख्यातौ प्रतीतौ अभिधैव त्यनेन तत्र लक्षणाया अभावात् । तदुत्तर रन्तु तदन्तिकगमनं व्यञ्जनैवेत्युक्तम् । अत्र चन्दनच्युतादिसत्त्व बोद्धव्याया दूत्या वैलक्षण्यम् ।

(लो, इ) एषा च पदार्थाना वापीस्नानविरुद्धानामनुसन्धानादेव वापीस्नाना भावमात्रस्य प्ररोहाभावेन तदन्तिक न गतासीत्यत्र विपरीतलक्षणया गतासीति लक्ष्यते रन्तुमित्यत पूर्वं तेन सहेति शेष ।

(लो, ई) उअ णिच्चेति—

पश्य निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका ।
निर्मलमरकतभाजनप्रतिष्ठिता शङ्खशुक्तिरिव ॥

निश्चलेति—निरयमेति विसम्बोधनम् । शङ्खशुक्ति शखपात्री ।

---

1 'व्यङ्ग्यप्रतिपाद्य" इति (ट ढ पु)
'व्यङ्ग्य प्रतिपाद्य इति (च पु)

अत्र बलाकाया निष्पन्दत्वेन विश्रब्धत्व, तेनास्य देशस्य विजनत्वम्, अत. सङ्केतस्थानमेतत्, इति क्वाऽपि सन्निहित प्रच्छन्नकामुक प्रत्युच्यते। अत्रेयं स्थाननिर्जनत्वरूप[1]व्यङ्ग्यार्थवैशिष्ट्य प्रयोजनम्[2] ॥ (ब, ई)

" भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते " इत्युक्तप्रकाराया. काकोर्भेदा आकरेभ्यो ज्ञातव्याः। (उ)

एतद् वैशिष्ट्ये यथा—

"गुरुपरतन्त्रतया वत ! दूरतर देशमुद्यतो गन्तुम्।
अलिकुलकोकिललालिते नैष्यति साखि ! सुरभिसमयेऽसौ ॥"*

अत्र नैष्यति ? अपि तर्हि एष्यत्येवेति काक्वा व्यज्यते (भ)

चेष्टावैशिष्ट्ये यथा—

" सङ्केतकालमनस विट ज्ञात्वा विदग्धया।

(नि, च) सङ्केतस्थानमुपनायक दर्शयन्त्या दूत्या उक्तिरियम्—उअ इति। जानीहीत्यर्थ, पश्येति यावत्। निश्चलति सम्बोधनम्। अथवा निश्चलनिष्पन्देत्येक वा पदम्। तदा निश्चलादपि निष्पन्देत्यर्थ। शङ्खशुक्ति शङ्खस्थपालम्। उच्यमानस्य नायकस्य सन्निध्यात्—सङ्केतस्थलप्रदर्शन सामाजिकैर्व्यज्जनयाऽवगम्यते इत्यर्थ। तथा च द्योत्यत इत्यत्र द्योतन सामाजिकैर्व्यञ्जनया बुध्यत इति शेष। नायकेन तु बलाग्रप्रदर्शनरूपात् वक्ष्या वैलक्षण्यात् सङ्केतस्थल व्यञ्जनया बुध्यते।

(वि, भ) आकरेभ्य इति—भिन्नकण्ठध्वनिरित्यादिकावुविवेचनग्रन्थ आकर। स्वाभाविककण्ठध्वनितो भिन्न कण्ठध्वनिरित्यर्थ।

गुरुपरतन्त्रतयेति—दूरतरदेशगत पतिं शोचयन्त्या नायिकाया उक्ति प्रथमार्द्धम्। तामाश्वासयन्त्या सख्या उक्ति परार्द्धम्। नैष्यतीति—अपि लेष्यत्येवेत्यर्थ काक्वा व्यज्यते इति—काक्वा पर नञर्थापस्थापनान्न एष्यति एष्यत्येवेत्येवरूप। अत्र शिरःशालनगर्होत्पन्नत्व काकोर्वैलक्षण्यम्।

(तो, उ) भिन्नेति—भेदा तत्तत्सहकारिभेदा स्वरूपभेदान्वा।

(ली, ऊ) सङ्केतेति—दृगता विकसता नेत्रेण अर्पितमात्मनमभिप्रायो येन इति विटविशेषणम्। एषा चोक्तोदाहरणाना ध्वनिगुणीभूत-व्यङ्ग्यत्व तन्निरूपणे अग्रे

---

* गुरुपरतन्त्रतया—गुरूणा पित्रादीना पराधीनतया। अलिकुलेति। अलिकुलै भ्रमरसमूहै लालिते रमणीये सुरभिसमये वसन्तसमये न एष्यति—नागमिष्यति अपि तु एष्यत्येव।

1 रूप इति (च पु०)

2 'प्रयोजन' इत (च पु०)

"'हसन्नेत्रार्पिताकूत लीलापद्म निमीलितम्" । (ऊ)

अत्र सन्ध्या सङ्केतकाल. इति पद्मनिमीलनादिचेष्टया कयाचित् द्योत्यते (म) एव वक्त्रादीना व्यस्तसमस्ताना वैशिष्ट्ये बोद्धव्यम् ।

त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता ॥ २४ ॥

अर्थाना वाच्य लक्ष्य-व्यङ्ग्यत्वेन त्रिरूपतया सर्वा अपि अनन्तरोक्ता व्यञ्जना स्त्रिविधा । तत्र वाच्यार्थस्य व्यञ्जना यथा–"कालो मधुः" इत्यादि । लक्ष्यार्थस्य यथा–"नि.शेषच्युतचन्दनम्" इत्यादि । व्यङ्ग्यार्थस्य यथा–"उच्चैरिचल" इत्यादि । प्रकृतिप्रत्ययादिव्यञ्जकत्व तु प्रपञ्चयिष्यते ।

शब्दबोध्यो व्यनक्त्यर्थं शब्दोऽप्यर्थान्तराश्रय[1] ।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ॥ २५ ॥ (ऋ)

यत शब्दो व्यञ्जकत्वे अर्थान्तरमपेक्षते, अर्थोऽपि शब्दम्, तदेकस्य व्यञ्जकत्वे अन्यस्य सहकारिताऽवश्यमङ्गीकार्य्या ।

अभिधादित्रयोपाधिवैशिष्ट्यात् त्रिविधो मतः ।
शब्दोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा ॥ २६ ॥ (ए)

(वि, म) संकेतकालेति—विट धूर्त्तम् उपनायक सकेतकालमनस तज्जिज्ञासार्थं तन्मनस्क ज्ञात्वेत्यर्थ । हसता नेत्रेणार्पित स्थापितम् आकूत भावो यत्र तादृश यथा स्यात्तथा लीलापद्म निमीलितमित्यर्थ । द्योत्यत इति विट प्रतीत्यर्थ । सामाजिकैस्तु तद्द्योतनमपि बुध्यते इति बोध्यम् ॥

(वि, य) वक्तृबोद्धव्यादिदशवैशिष्ट्यात् याऽर्थी व्यञ्जनोक्ता, सा व्यञ्जकार्थत्रैविध्यात् त्रिविधेत्याह–अर्थाना व्यञ्जकार्थानाम् । इय दशविधा व्यञ्जना । नि शेषेत्यादौ लक्ष्यार्थस्य व्यञ्जकत्व स्वमताभिप्रायेणैवोक्तम् । उक्तशब्दार्थव्यञ्जकार्थत्रैविध्यस्यैवोक्तत्वात् इदानीं व्यञ्जकशब्दस्यापि त्रैविध्यमाह–अभिधादित्रयेति ।

स्फुटीभविष्यति, किन्तु व्यञ्जनाया आर्थत्वमात्रेणोदाहरणम्। चेष्टादीत्यादिशब्देन वस्त्वर्थं नीयनायकादिगतसात्त्विकादिपरिग्रह ।

(लो, ऋ) शब्दबोध्य इत्यर्थान्तरमपेक्षते, नत्वेकार्थमात्रप्रतिपादको व्यञ्जक यथा–दुर्गालङ्घितेत्यादौ। अर्थोऽपि शब्दमपेक्षते यथा कालो मधुरित्यादौ। एकस्येत्यादेरयमर्थ । शब्दार्थयोरेकस्य व्यञ्जकत्वे तदितर सहकारी सन् अवर्जनीयसन्निधिमात्रेणाऽवस्थित । किन्तु यत्र यच्छक्तिरुत्कटा तत्र तन्मूलो व्यञ्जकत्वव्यपदेश ।

---

1 'ईषत्' इति (च पु०)

अभिधोपाधिको वाचक । लक्षणोपाधिको लक्षक व्यञ्जनोपाधिको व्यञ्जक'।

किञ्च—

तात्पर्य्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने ।
तात्पर्य्यार्थं तदर्थं च वाक्यं तद्बोधकं परे २७ ॥ (र) *

अभिधाया एकैकपदार्थबोधनविरमात्[1] वाक्यार्थरूपस्य पदार्थान्वयस्य बोधिका तात्पर्य्यं नाम वृत्ति, तदर्थश्च तात्पर्य्यार्थ, तद्बोधक च वाक्यमिति अभिहितान्वयवादिना मतम् ॥ (ल)

इति श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे वाक्यस्वरूपनिरूपणो नाम द्वितीय परिच्छेद ॥

(वि, र) न केवल वाच्यादित्रिविध एव शब्दस्यार्थोऽपि तु वाच्यादित्रयभिन्न पदार्थसंसर्गोऽपि शब्दार्थस्तद्बोधक च वाक्यमित्याह—किं चेत्यादिना । पदार्थान्वय-बोधने तदन्वयबोधनिमित्तम् । परे नैयायिकास्तात्पर्य्याख्या वृत्तिमाहु । तदर्थं तस्या वृत्तेर्विषयरूपमर्थं तात्पर्य्यार्थं संसर्गरूप तद्बोधक च वाक्यमित्याहु ।

(वि, ल) अभिधाया संसर्गबोधनेऽसामर्थ्यं दर्शयन् व्याचष्टे—अभिधाया इति । तदर्थश्चेति संसर्गरूप इत्यर्थ.। अभिहितान्वयवादिना नैयायिकानां पदेन पदार्थेऽ-भिहिते स्मारिते तदन्वयबोधो वाक्यादेव ॥ इति ।

इति श्रीसाहित्यदर्पणटीकाया द्वितीयपरिच्छेदविवरणम् ।

---

* पदार्थो हि पदार्थान्तरविशिष्टो वाक्यार्थ । न च तत्र पदार्थानां सकेत तेषां सामान्यरूपे अर्थे संकेनितत्वात्, वैशिष्ट्यस्य च अन्यलभ्यत्वात् अतो भिन्नार्थवाचिभ्यो यत् संसर्गरूपवाक्यार्थप्रतिपत्ति सा वृत्त्यन्तरगाम्या । ता च तात्पर्य्याख्यामाहु । घटं करोतीत्यत्र घटवृत्तिकर्मतानुकूला कृतिरित्यर्थो बोध्यते । तत्र घटशब्दस्य घटोऽर्थ अम् प्रत्ययस्य च कर्मता वृत्तिता तु न कस्याप्यर्थ । पर तात्पर्यवृत्त्या वृत्तिता अनयो संसर्गविधया भासते इत्यर्थ ।

1 "विरामात्" इति (ट ठ पु)

तृतीयः परिच्छेदः ।

अथ कोय रस इत्युच्यते (क, अ)

विभावेनानुभावेन व्यक्त सञ्चारिणा तथा । (ख)
रसतामेति रत्यादि. स्थायी[1] भाव. सचेतसाम् ॥*(ग, आ)॥ १ ॥

(वि, क) वाक्य रसात्मकमित्युक्तत्वादस्य निरूपयितु पृच्छति—**अथेति** । **(ख)** विभावो रत्यादेरास्वाद्यत्वोद्दीपनकारणद्वयम् । अनुभावस्तस्य कार्यम् । सञ्चारी व्यभिचारी, निर्वेदादिरूप कार्यविशेष । तस्य पृथगुपादान च गोवृषन्यायात् प्राशस्त्यार्थम्, प्राशस्त्य च रत्यादे शाघ्रप्रतिपादकत्वात् । यद्यपि विभावादित्रयस्य मिलितस्यैव रसहेतुता वक्ष्यते, तथापि यत्र श्लोके मिलिता न सन्ति तत्रैकेनाऽन्यव्यञ्जने व्यभिचारिणामन्यापेक्षया शाघ्रव्यञ्जकत्वमित्येतद्द्वारा रसस्यापि शीघ्रप्रतिपादकत्व बोध्यम् ।

(ग) रत्यादि स्थायी भावो रसतामेतीत्यन्वय । ननु रामादिगतौ रत्यादिर्विभावादिभिर्व्यज्यते । तद्व्यञ्जनावशादेव रसादेरसलक्षणकमव्यङ्ग्यपरिभाषा, ततश्च भावनोपनीत स रत्यादिर्विभावादिनिष्टेन स्वादनाख्यव्यापारेण सामाजिकरत्याद्यभेदे

(लो, अ) रसस्वरूप निरूपयितुकामस्तस्यावसरप्राप्तत्व दर्शयन्नाह—**अथेति** । अथ—काव्यस्वरूपनिरूपणानन्तर कोय रसो यदात्मक वाक्य काव्यमित्यर्थ । इत्यपेक्षायामुच्यते—तत्स्वरूप निरूप्यते ।

(लो, आ) विभावेनेत्यादि—सचेतसां-सहृदयाना रत्यादि स्थायीभाव । भाव्यते—वास्यते इति व्युत्पत्त्या अनादिवासनान्तर्लीन इत्यर्थ । तदुक्तम्—

'वासनाऽनादिकालीना याऽसौ हृदि सचेतसाम् ।
स्वसामग्रीं समासाद्य व्यक्ता सैति रसात्मताम् ॥'

---

* वासनारूपतया अतिसूक्ष्मरूपेण अवस्थितान् रत्यादीन् स्थायिभावान् विभावयति, आस्वाद्योन्मुखता नयति इति विभाव , तेन । अनुभावेन—रत्यादीन् स्थायिभावान् अनुभावयति इति अनुभाव , तेन। **संचारिणेति** । रत्यादीन् स्थायिन कार्ये सचारयति मुहुर्मुहुरभिव्यनक्ति इति सचारी तेन ।

स्थायी—अविच्छिन्न प्रवाह ।

भाव —चित्तवृत्तिविशेष । चित्तवृत्तिरूपस्य आशु विनाशित्वेपि वासनात्मतया सूक्ष्मरूपेण अवस्थानात् स्थायित्व बोध्यम् ।

1 'स्थायिभाव ' इति (क्वचित्पुस्तकयो) ।

विभावादयो वक्ष्यन्ते । (इ)

सात्त्विकाश्चानुभावरूपत्वात् न पृथगुक्ता । (घ, ई)

व्यङ्ग्यो दध्यादिन्यायेन रूपान्तरपरिणतो[1] व्यङ्ग्यीकृत[2] एव रसो नतु दीपेन घट इव पूर्वसिद्धो व्यज्यते (ङ, उ)

नारोप्यमाण स्वप्रकाशानन्दतया तथा परिणमतीति परिणामवादसिद्धान्तेन, तस्य सामाजिके रसताप्राप्ति । एवमेवाग्रे व्यक्तिर्भविष्यति ।

(वि, घ) ननु सात्त्विकभावोऽपि रसादिव्यञ्जक , स कथ नोक्त इत्यत आह—**सात्त्विकाश्चेति** । ते चाग्रे वक्ष्यन्ते ।

(वि, ङ) परिणामवादसिद्धान्त दर्शयति—**दध्यादिन्यायेनेति** । दुग्धमेव यथाऽम्लद्रव्ययोगाद् दध्यादिरूपतया परिणमति, तन्न्यायेन रामादिरत्यादिरेव विभावादिनिष्ठखादनाख्यव्यापारेण सामाजिकरत्यादौ अभेदेनारोप्यमाण स्वप्रकाशानन्दात्मकज्ञानरूपतया परिणमतीत्यर्थ ।

व्यक्त इत्यस्यार्थं परिणत इत्यन्तेन दर्शयित्वा, तादृगवस्थ एव रस , नतु अतादृगवस्थ इति प्रतिपादयन् पुनराह—**व्यङ्ग्यो व्यङ्ग्यीकृत एवेति** । इद च व्यङ्ग्यीकृतरसास्वादाख्येन व्यापारेण विभावादिनिष्टेन व्यञ्जनाभिन्नव्यापारान्तरेण रामादिरत्याद्यारोपविषयसामाजिकरत्यादे स्वप्रकाशानन्दरूपतया विपर्यीकरणमित्यग्रे व्यक्तिर्भविष्यति ।

यद्यपीह मिलितो रत्यादि प्रपानकरसन्यायेन चर्व्यमाणोऽखण्डस्वरूपो रस , तथापि लोकप्रसिद्धिमाश्रित्य प्रत्यभिज्ञानात् स्थायिभावो रसतामेति । (इ) इत्युक्त विवृणोति—**विभावादय इति** । वक्ष्यते इहैव परिच्छेदे । सामान्यतस्तु—

'कारणानि च कार्याणि सहकारीणि यानि च ।
रत्यादे स्थायिनो लोके तानि चेन्नाट्यकाव्ययो ।
विभावा अनुभावाश्च वक्ष्यन्ते व्यभिचारिण ॥'

इत्युक्तप्रकारा । दशरूपावलोकम्—

'विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभि ।
आनीय मान स्वाद्यत्व स्थायिभावो रस स्मृतः ॥'

(लो, ई) तत्स्वरूपत्व लक्षणे सात्त्विकानामनुपादानमित्याशङ्क्याह—**सात्त्विकाश्चेति** । सात्त्विका स्तम्भस्वेदादय ।

(लो, उ) **दध्यादीति**—यथा दुग्ध दधिरूपेण परिणमते इत्यर्थ ।

---

1 'ननो व्यङ्ग्य व्यङ्ग्यीकृत एव' इति (च छ पुस्तकयो)

2 'व्यङ्ग्यीकृत एव रस ' इति क्वचित्पुस्तके नास्ति ।

तदुक्तं लोचनकारै—रसा प्रतीयन्ते इति तु ओदन पचतीतिवद् व्यवहारः इति। (च, ऊ)

अत्र च रत्यादिपदोपादानादेव प्राप्ते स्थायित्वे पुनः स्थायिपदोपादान रत्यादीनामपि [1]रसान्तरेषु अस्थायित्वप्रतिपादनार्थं[2], ततश्च हासशोकादय शृङ्गार वीराद्यैर्व्यभिचारिण एव। तदुक्तम्—

"रसावस्थ पर भावः स्थायिता प्रतिपद्यते" इति। (छ, ऋ)

अस्य स्वरूपकथनगर्भ आस्वादनप्रकार कथ्यते।

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यब्रह्मानन्द[3]सहोदरः।

(वि, च) ओदनं पचतीतिवदिति। पाकोत्तरमेवोदनोत्पत्तेस्तण्डुलपाकस्यैव तत्रोपचार व्यपदेशेन, रत्यादिप्रतीतेरेव रसे व्यञ्जनया प्रतीत्युपचार इत्यर्थ। अयमुपचारो मानस एव, शाब्दस्तु नोपचार। किन्तु ओदनपदस्य तण्डुले लक्षणेति बोध्यम्।

(वि, छ) "रसतामेति रत्यादि स्थायीभाव सचेतसाम्" इति यदुक्तं तत्र स्थायीत्वस्य उपादानफलमाह—अत्र रत्यादीति।

अस्थायित्वप्रतिपादनार्थमिति—किन्तु व्यभिचारिभावत्वप्रतिपादनार्थमिति बोध्यम्, तदाह—ततश्चेति।

रसान्तरे स्थायित्वाभावे मतवादमाह—तदुक्तं रसावस्थ इति। रस एव उत्तरत्र लम् अवस्था यस्य। पर केवल तादृशो हासशोकादिभाव स्थायितां प्रतिपद्यते इत्यर्थ। अतादृशस्तु न स्थायित्व प्रतिपद्यते इत्यर्थ।

(वि, ज) सत्त्वोद्रेकादिति कारिकार्धं प्रतिपद स्वयमेव व्याख्यास्यति। चिन्मय इत्यत्र चिद् ज्ञानम्।

(लो, ऊ) ओदनं पचतीतिवत्—न सत्त्वोदेन पूर्वसिद्धो व्यज्यते, किन्तु पक्व सन् ओदनो भवतीति तथायमपि व्यक्त सन् रसो भवतीत्यर्थ।

(लो, ऋ) क्रोधादय इत्यादिशब्दाद् जुगुप्सादय। रसावस्थ रसरूपतामापन्नस्य।

(लो, ऋ) सम्प्रति वीतरागवागायते येनेतदास्वादनलम्पट काव्ये प्रवर्तिष्यते लोक इत्याशङ्क्योक्तं सत्त्वोद्रेकादिति कारिकामवतारयति—अस्येति। अस्यास्वादनप्रकार इति उपचारप्रयोग, अन्यास्वादनातिरिक्तत्वात्। सत्त्वोद्रेकादिति—

---

1 'अन्यशास्त्रेषु' इति (प्रुफसंशे)
2 'स्थायित्वव्यपदेशार्थम्" इति (जयपुस्तकयो)
3 'स्वाद-' इति (ग घ)

लोकोत्तरचमत्कारप्राण कैश्चित् प्रमातृभि ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रस ॥ २ ॥ (ज, झ)

" रजस्तमोभ्यामस्पृष्ट मन सत्त्वमिहोच्यते " (ल)

इत्युक्तप्रकारो बाह्यमेयविमुखतापादक कश्चनान्तरो धर्म सत्त्वम्। तस्योद्रेक रजस्तमसी अभिभूयाविर्भाव । अत्र च हेतुस्तथाविधलौकिककान्यार्थपरिशीलनम्। अत्रैव इत्येक ण्वाय विभावादि[1]रत्यादिस्वप्र[2]काशसुखचमत्कारा

स्वाकारवदभिन्नत्वेनेति—अय रत्यादिज्ञानरूपो रस परिणामवशाद्रत्या यभिन्नत्वेन विशिष्ट आस्वाद्यते इत्यथ । नत्वभिन्नत्व तद्बोधे प्रकार । आरोप्यमाण रामादिरत्याद्यभेदेन अधिकरणीभूतसामाजिकरत्यादरेव य स्वप्रकाश आस्वाद तस्यैव रसचार् तत्र चाभिन्नत्वाभावात् । तन्नास्वादतद्विषयरत्यादैरभदे स्वाकारवादोक्त दृष्टान्तमाह **स्वाकारवदिति**। स्वाकारवादे हि विषयो ज्ञानाभिन्नो ज्ञानस्वाकार एवेति।

(वि, झ) तत्र सत्त्वमाचष्टे—**रजस्तमोभ्यामिति** । बाह्यमेयविमुखता सामाजिकस्यविभाव उद्बुध्य सहकारिप्राप्त्या कार्यजनकेति भावत् । सहकारिणश्चाह दर्शयति—**तत्र च हेतुरिति** । एकत्व ग्राहयति—**विभावादीति** । विभावादिश्च रत्यादिश्च तद्विषय यत् स्वप्रकाशरूप सुख तत्सहित चमत्कार आत्मा स्वरूप यस्य तादृश । चमत्कारश्च विस्मय इति वक्ष्यते । तादृशसुखचमत्कारयोरेकदा स्थितौ तत्र हेतु वक्ष्याम व्यापारोक्ति विभावादे इत्यादिना । विभावादे स्वादनाख्यव्यापारस्य चमत्कारहेतुताया सामाजिकाना रामादिनाश्चैक्याभेदारोपहेतुतायाश्च वक्ष्यमाणत्वात् ।

स्वाभिन्नाकार । स यथाऽभिन्नत्वेनानुभूयते उपचारादिति शेष तथायमास्वाद्यते । विवृणोति—(**ल**) **रजस्तमोभ्यामिति**—मनो हि सत्त्वरजस्तमोरूप त्रिगुणात्मकम् । बाह्यमया घटपटादय । आन्तरो धर्म सत्त्वमात्रावस्थितरूप । ननु कथमेवविध सत्त्वोद्रेको जायते, ततश्च कथमखण्डस्वप्रकाशानन्दाद् बोध इत्याशङ्क्याह—**तत्र चेति** । अयमाशय सत्त्व सुखे सञ्जयति रज कर्मणि भारत । प्रमादमोहौ तमसो भवतोऽज्ञानमेव च । इत्यादि भगवद्वचनात् त्रिगुणात्मके मनसि सत्त्वाशस्य प्रकाशो सुखोत्पत्ति सत्त्वाशस्य प्रकाशश्च रजस्तमसोरभिभवाद् वैषयिक सुख जनयति । तथा हि सत्त्वाशप्रकाशतारतम्याद् वैषयिकसुखस्यापि तारतम्य दृश्यते । तच्च सुख तारतम्य सुखकारणतारतम्यहेतुकमित्यवश्यमभ्युपगन्तव्यम् । तच्च सुखकारण यदि सकललौकिकसुखकारणात्तर तन रजस्तमसोरभिभव सर्वथा शक्यक्रिय एवेति । ततो न्यायात् लोकोत्तरकाव्यार्थश्रवणरूपकारणात् सर्वथा रजस्तमस्यभिभूय मनस

---

1 रत्या प्रकाशगुणश्च (ठ पु)
2 प्रतीति (ट ठ पु)

त्मकः। अत्र हेतुं वक्ष्यामः। स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्या। चिन्मय इति स्वरूपार्थे मयट् (ए) चमत्कारश्चित्तविस्तारूपो विस्मयापरपर्यायः। (तत् प्राणत्वं चास्मत्[1] पितामहसहृदयगोष्ठीगरिष्ठकविपण्डितमुख्यश्रीमन्नारायणपादैरस्माभिः।) तदाह धर्मदत्तः स्वग्रन्थे—(ऋ)

"रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते
तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः॥
तस्मादद्भुतमेवाह कृती नारायणो रसम्॥" इति। (अ, ऐ)

चिन्मय इति—स्वप्रकाशानन्द एव चिद् ज्ञान तत् स्वरूप इत्यर्थः। ज्ञानानन्दयोरभेदस्वीकारात्। लोकोत्तरचमत्कारपदार्थं व्याचष्टे—**चमत्कार** इति। चित्तस्य विस्तारः आत्मसंयोगविशेषेण जनितं विलक्षणं ज्ञानम्। तदेव दर्शयति—**विस्मयेति**। तत्प्राणत्वं च तत्सहभावेनैव स्थित्या। **तदाहेत्यादि** स्मिपि नारायणस्यैवोक्तिः।

(वि, अ) रसे सार इति रसास्वादहेतुत्वात् सार। तच्चमत्कारसारत्वे इति सति सप्तमीयम्। चमत्कारस्य विस्मयरूपत्वात् तेन स्वप्रकाशसुखेऽतिशयकरणात् तस्य सारत्वं विलक्षणसुखात्मकरसजनकत्वम्। तस्मिन् सति शृङ्गारादिरसकाव्येष्वपि अद्भुतो रस सम्भवति। तथा च सामान्यतः शृङ्गारादिरसे जातेऽद्भुतमुत्थाप्य विलक्षणास्वादरूप प्रकृष्टशृङ्गारादिरसो जन्यत इत्यर्थः। काव्यप्रकाशे तु आस्वाद एव चमत्कारः, नतु तद्धिन्नो विस्मयः। इयद्भुतप्रवेशो न सर्वत्र।

तस्मादद्भुतमेवेति—अत शृङ्गारादिकाव्ये प्रकृष्टशृङ्गारादिजनकतया अद्भुतमपि रसमग्रवादित्यर्थः।

सत्त्वांशस्यैव प्रकाशस्तदा तन्मात्रहेतुरोऽयंऽप्रकाशरूप आत्मावबोध प्रामाणिक एव। अत एवाहु—"स्वाद काव्यार्थसम्भेदादात्मानन्दरसुद्भव।" इत्युक्तप्रकारः। स चात्मानन्दाद् बोधो यदि "अन्वयव्यतिरेकाभ्या निरस्य प्राणनो यत। वीक्ष्यारब्धस्य बोऽर्मीति तत्त्वमित्याह—सौहृदात्" इत्यादि। शास्त्रानयनहेतुकः स्यात् तदा निरूपहितं अत्र प्रकाशते। यदि पुनर्नाट्यकाव्यदर्शनश्रवणाभ्या, तदा विभावादिसम्बलित-रत्याद्यंशकर्मुरितत्वेन विभुर्म। कारणवैचित्र्यस्यैवायं सहृदयानुभवसिद्धोऽनुभाव इति तस्य च रत्याद्यशशबलत्वेऽपि यथा स्वप्रकाशतमोविरुद्धं तथेहाग्रे दर्शयिष्यते। एतदेवाह—**स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्येति**। रत्याद्यंशशबलत्वादेव चास्य ब्रह्मास्वादस्य सहोदरत्वं, नतु तत्त्वं सूत्रेणोक्तम्। स्वरूपार्थे इत्यनेन मयट्-प्रत्ययार्थस्य निरास, तेन स्वप्रकाशानन्दचिदभिन्नत्वं रसस्योक्तं भवति।

(लो, ऐ) नारायणदासैरप्युक्तमिति—चमत्कार एव सर्वरसप्राणभूत।

---

1 'अस्मद्गुरुप्रभृतिभि' (क. घ)

कैश्चिदिति प्राक्तनपुण्यवद्भि , यदुक्तं, "पुण्यवन्तः प्रमिण्वन्ति योगिवद्रस-मन्ततिम्" इति । (ट, ठ)

यद्यपि "स्वाद काव्यार्थसम्भेदादात्मानन्दमसुद्भव" इत्युद्दिश्य रसस्याऽऽस्वादनातिरिक्तत्वमुक्तम् (ट, ठ) तथापि "रसः स्वाद्यते" इति काल्पनिकभेदमुररीकृत्य कर्मकर्तरि वा प्रयोग , (ड)

(वि,ट) पुण्यवद्भिरिति-पुण्यशालिभिरिति क्वचित् पाठ । वागनायामास्वादनाख्यव्यापारे च पुण्यमेव हेतुरित्यर्थ । 'न जायते तदास्वादो विना रत्यादिवासनाम्' इति वक्ष्यमाणत्वात् । 'विलक्षण एवाय वृत्तिशक्तिभेदेभ्य स्वादनाख्य कश्चिद् व्यापार' इति वक्ष्यमाणत्वाच ।

(वि, ठ) काव्यार्थसंभेदात् इति । रत्यादिरूपो य काव्यस्य व्यङ्ग्यार्थस्तत्-सभेदात्-तन्परिशीलनादित्यर्थ । वस्तुतस्तु सभेदादिति ल्यब्-लोपे पञ्चमी तेन विभावादिशबलित इति । आत्मानन्देति—आत्मनि य आनन्दस्तद्रूपेण समुद्भवो यस्य तादृश इत्यर्थ । तथा च आनन्दात्मकस्य रसस्य स्वादनातिरिक्तत्वमित्यर्थ ।

(वि, ड) काल्पनिकम्-अभेदे भेदारोपेण भेदम् । कर्मकर्तरि वेति-"भिद्यते कुशूल स्वयमेव" इत्यत्र एकस्यैव कुशूलस्य कर्मत्वकर्तृत्वोभयविवक्षया भेदारोपवद-

---

तस्य च रत्याद्यशबलत्वेन यथायथ शृङ्गारादिव्यपदेश । तद्भावाददभुतव्यपदेश इति ।

(लो, औ) पुण्यवन्त इति । प्रमिण्वन्तीत्यत्रापि पूर्ववदुपचार । स्वप्रकाश-रूपस्यास्य प्रमाविषयत्वानुपपत्ते । योगिवदिति । यथा योगिन शुद्ध ब्रह्म स्व-प्रकाशानन्दचिद्रूपतया साक्षात्कुर्वन्ति रत्याद्यशक्वुरितमपि तथा पुण्यवन्त इत्यर्थ । तथा चोक्त 'विभावादिसभिन्नानुद्दिश्यताद्रत्याद्यशक्वुरित स्वप्रकाशानन्दचमत्काररूपो रस' इति । केचित्तु रत्यादिसभिन्नानन्दसाक्षात्कारानन्तर प्रशान्तनिखिलप्रपच चिदानन्दमयब्रह्मतत्त्वाभिव्यक्तिं सुषुप्तिदशावत् समाधिवच्चेच्छन्ति । यदाहु —

पाठ्यादथ ध्रुवाख्यानात्तत सपूरिते रसे ।
तदास्वादभरैकाग्रो हृष्यन्यन्तर्मुख क्षणम् ॥
ततो निर्विषयस्यास्य स्वभावोऽवस्थितो निज ।
व्यज्यते ह्लादनिष्यन्दो येन तृप्यन्ति योगिन ।'

आचार्यास्तु शबलितस्यैवानुभवात् सुखमनुभवामीति प्रतिसन्धानस्य च तावतै-वोपपत्तेरधिक नेच्छन्ति । रससन्तति सन्तन्यमान रसम् । सन्तन्यमानत्वेन ब्रह्मास्वाद सहोदरस्यास्य विषयाऽविच्छिन्नप्रवाहत्वमिति सूचितम् ।

(लो, औ) काव्यार्थो विभावादि । तत्सम्भेदादिति ल्यब्लोपे पञ्चमी तेन विभावादिशबलित इत्यर्थ । (अ) काल्पनिकमौपचारिकम् । कर्मकर्तरि वेति । स्वा-द्यते-आस्वाद्यते प्रमाणान्तरोपनीतरत्यादितादात्म्येन समुल्लिख्यत इत्यर्थ ।

तदुक्तम् 'रस्यमानतामात्रसारत्वात् प्रकाशशरीरादनन्य एव हि रस । इति(ङ,अ)

एवमन्यत्राप्येवविधस्थलेषूपचारेण प्रयोगा ज्ञेया ।

ननु एतावता रसस्याज्ञेयत्वमुक्त भवतीति । (ण) व्यञ्जनायाश्च ज्ञान विशेषत्वाद्[1] द्वयारैक्यमापतितम् । (त श्रा)

ततश्च—"स्वज्ञानेनान्यधीहेतु सिद्धेऽर्थे व्यञ्जको मत ।

यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात् ॥ (थ, इ)

त्राणि आस्वाद्यास्वादनयोरभेदेपि भेदविवक्षया कर्मकर्तरि प्रयोग इत्यर्थ । नच आस्वाद्य आस्वादस्य विषयिता एव तत्रार्थ कर्तृत्वमिति वाच्यम् स्वप्रकाशत्वेन तत्र कर्तृत्वारोपात्।

(वि, ढ) **रस्यमानतामात्रसारत्वादि**ति—सारपदमत्र स्वरूपार्थकम् । तथा च रस्यमानताया आस्वादकर्मत्व दर्शितम् । प्रकाशशरीरत्वेन आस्वादकर्तृत्व च दर्शितम् । तथा च कर्मकर्तृत्वमुपपादितम् । स्वप्रकाशस्य प्रकाशकोभयरूपत्वात् ताभ्यामनन्य एवेत्यर्थ ।

(वि, ण) **एवमन्यत्रापी**ति—स प्रतीयत इत्यादावित्यर्थ । **नन्वेतावतेति**—रसस्यास्वादाभिन्नत्वकथनेनेत्यर्थ । अज्ञेयत्व स्वाभिन्नज्ञानाग्राह्यत्वमित्यर्थ । स्वेनैव स्वस्वग्राह्यत्वेन घटादिवत् ज्ञेयत्वासिद्धरिति भाव ।

(वि,त) ननु विभावादिसन्यन व्यञ्जनार्थानज्ञानेनैव विषयीकरणात् स्वाभिन्नज्ञान ग्राह्यत्वमस्त्येवेत्याशङ्कायामाह—**व्यञ्जनायाश्च ज्ञानविशेषत्वादि**ति । व्यञ्जनाया व्यञ्जनार्थानज्ञानस्य ज्ञानावशेषत्वात् आस्वादरूपज्ञानविशेषत्वात्। तथा च तद्रूपाया तद् भिन्नत्वानाग्राह्यत्वाद्ज्ञायत्वमित्यर्थ । तथा च रसरूपास्वाद्व्यञ्जनार्थानज्ञानयोरैक्यमवा पतितमित्याह—**द्वयोरैक्यमिति** । द्वयोरास्वादाभिन्नरसव्यञ्जनार्थानज्ञानयोरित्यर्थ । नन्वेतावता किमनिष्टमियतो विभावादेर्व्यञ्जकत्वानुपपत्त्या रसस्य व्यङ्ग्यत्वा नुपपत्ति एवानिष्टमिति चेन्तु प्रथम विभावादेर्व्यञ्जकत्वानुपपत्ति घटव्यञ्जकदीपवैलक्ष्ण्येन साधयति—**ततश्चेति** । घटादेर्व्यञ्जको यथा दीपो विभावादेस्तथात्वाभावाद् घटव्यञ्जकदीपतो विभावादे पार्थक्य पृथग्भावो वैलक्षण्यमिति समुदायार्थ । यथा श्रुताक्षरार्थेन त्वयमर्थो न घटते स्वविषयज्ञानेन स्वजन्यज्ञानेन वा घटधिया हता

(लो, आ) एतावतेत्यत्र प्रत्यक्षतेति शेष । रसस्य व्यङ्ग्यत्वेन निरूप्यमाणस्यैव ज्ञानत्वाशेषादित्यर्थ ।

(इ) अन्यधीहेतुव्यपयुदे कारणम् । सिद्धे ननु साध्ये व्यञ्जक मत शब्द इत्यर्थ । यथा दीप इति। न खलु दीपो घटादिक करोति । किन्तु स्वप्रकाशन सिद्ध मेव त प्रकाशयति । अन्यथाभाव असिद्धस्य साधन ।

---

1 'ज्ञानरूपत्वात्' (घ ङ पु०)

इत्युक्तादिशा घटप्रदीपवद् व्यङ्ग्यव्यञ्जकयो पार्थक्यमेवेति, कथं रसस्य व्यङ्ग्यता, इति चेत् सत्यमुक्तम्। (घ, ई) अत एवाहु —"विलक्षण एवाय वृत्तिशक्तिभेदस्य स्वादनाख्यस्य कश्चिद् व्यापार" (द, उ)। अत एव हि रसना स्वादनचमत्करणादयो विलक्षण एव व्यपदेशा इति। अभिधादिविलक्षण व्यापारमात्र[1]प्रसाधनप्रवृत्तिरस्माभी रसादीनां व्यङ्ग्यत्वमुक्त भवति। (ङ) *

दीपस्य घटव्यञ्जकत्वप्रसङ्गात् 'यथा दीप' इति दृष्टान्तानुपपत्ते । अतोऽत्र ज्ञानेनेति । तृतीयाऽभेदे । अर्थान्तर विशेषो हि निराधारतया विश्रान्तिहेतु । तथा च रसज्ञानाभिन्नता अन्यस्य ज्ञानादन्यस्य यियो हेतुर्य स एव सिद्धे ज्ञानं विनापि सिद्धे अथ व्यङ्ग्ये सतो यथा दीप इत्यर्थ विभावादिषु रसव्यञ्जनार्थीनज्ञानभिन्नस्याऽऽस्वादनचमत्कारादेर्नित्य एव न दीपवद् व्यङ्ग्यत्व इत्यर्थ । अन्यथाभूते अन्यथात्वे स्वजन्य प्रतीति स्वव्यङ्ग्यत्वे इत्यर्थ । अस्य विभावादे चारुत्वादौ विशेष इत्यर्थ । घटप्रदीपवद् इति यो व्यङ्ग्यव्यञ्जकयो रसविभावयो पार्थक्य केवलव्यङ्ग्यमेवेत्यर्थ न तु व्यङ्ग्यव्यञ्जकता परस्पर पार्थक्य भेद इत्यर्थ । तदा प्रत्युत रसस्य व्यङ्ग्यत्वमेव सिद्धेराशङ्कानुपपत्ते ।

(वि,च) व्यञ्जनास्वादयोराश्रयितभेदेन निरस्य रसावयस्य व्यङ्ग्यत्वाभाव सिद्धान्तयन् आह—" चेत् सत्यमित्याह "।

(वि,द) वृत्तिशक्तिभेदेभ्य इति—वृत्तिरुत्पादको व्यापार दण्डादेर्घटादिवत्। शक्ति ज्ञापको व्यापार, अभिधालक्षणाव्यञ्जना, तेभ्यो व्यापारेभ्यो भिन्न इत्यर्थ ।

स्वादनाख्य आस्वादरूप स्वप्रकाशज्ञानजनको वृत्तिविशेष इत्यर्थ । तथा च तद् विषय एव रस । व्यञ्जनाधीनज्ञान तु रत्यादिविषय ततो भिन्नमेव इत्यतो रसव्यञ्जनाधीनज्ञानयोरैक्यमित्युक्तम्। स च विभावादिर्निष्ठो व्यञ्जनाभिन्न इत्यर्थ । तथा च व्यञ्जनया रत्यादिज्ञानमेव, स्वादनाख्यव्यापारेण तु रसास्वाद इत्यन्वय । ननु कथ तर्हि रसो व्यङ्ग्य इत्युच्यते इयत आह—अभिधादीति । विलक्षणो

(लो,ई) उक्तादेशा ध्वनिप्रकाशोक्तमार्गेण व्यङ्ग्यव्यञ्जकयो पार्थक्यमित्यनेन व्यञ्जनाया व्यङ्ग्यस्य च पार्थक्य न्यायसिद्धमेव इति भाव । न त्वत्र घटस्य दीपप्रकाशेनैक्यम्।

(लो, उ) अत एवेति— आहुरित्यस्य व्यङ्ग्यत्वमुक्त भवतीत्यत्र दूरस्थेनेतिशब्देनान्वय । अत एव—यतो ज्ञानरूप एव रस इत्यर्थ । आहुर्न्यायविद प्राचीनाचार्या इति शेष । वृत्ति करण शक्तिर्ज्ञानम्; स्वादन स्वाद ('स्वाद्यते आस्वाद्यार्थ सभेदादात्मानन्दसमुद्भव' इत्युक्तप्रकार । काश्चिदित्यलौकिक । व्यापार—व्यापार विषयाद्रसादभिन्न । विलक्षणो व्यञ्जकादिति शेष ।

* अभिधादिभ्य (अभिधालक्षणातात्पर्याख्यवृत्तिभ्य) विलक्षण (भिन्नो)

1 व्यापारतात्र (ग घ ङ)

ननु तर्हि करुणादीनां रसानां दुःखमयत्वाद्रसत्वं न स्यादित्युच्यते—(ध)

करुणादावपि रसे जायते यत्परं सुखम् ।
सचेतसामनुभवः प्रमाणं तत्र केवलम् ॥ ३ ॥ (न, ऋ)

आदिशब्दाद् बीभत्सभयानकादय । * तथाप्यसहृदयानां सुखमुद्रणाय पक्षान्तरमुच्यते—(प)

किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः ॥ ४ ॥

नहि कश्चित् सचेता आत्मनो दुःखाय प्रवर्तते । करुणादिषु च सकलस्यापि साभिनिवेशप्रवृत्तिदर्शनात्[1] (फ, ऋ)

[2]अनुपपत्त्यन्तरमाह—

तथा रामायणादीनां भविता दुःखहेतुता ५ ॥(ब, ऌ)

[3]करुणरसस्य दुःखहेतुत्वात्[4] करुणरसप्रधानरामायणादीनामपि दुःखहेतुत्वमसङ्गः[5] स्यात् ।

व्यापारे व्यञ्जना रसो व्यङ्ग्य इति व्यङ्ग्यरामादिरत्याद्यारोपाधिकरणसामाजिकरत्यादेः स्वरूपतया परिणामात् परम्परया व्यङ्ग्य इत्यर्थः ।

(वि, ध) रसत्वं न स्यादिति—स्वप्रकाशानन्दरूपत्वाद्रसस्य इत्यर्थः ।

(वि, न) रसे इति—करुणादौ रस आद्ये करुणादिरसस्वरूपमेव यत् सुखं जायते इत्यर्थः । रसातिरिक्तसुखाभावात् । सचेतसामनुभव इति । रसादीनामेव शोकादु स्वज्ञानतृष्णा, सामाजिकानां तु सुखमेव जायत इत्यत्र सचेतसामनुभव प्रमाणमित्यर्थः ।

(वि, प) असहृदयानामपि परदु खज्ञानादपि दु खमेव जायत इत्येवं हृदयानामपीत्यर्थः ।

(वि, फ) किञ्च तेष्विति—दु खहेतुत्वे अनुपपत्त्यन्तरमित्यर्थः ।

(वि, ब) तथा रामायणेति—रामायणमत्र करुणरसविशिष्टनदेकदेशः ।

[ऊ] व्यङ्ग्यत्वमुक्त्वा, प्रकाशनमात्रोपचारादित्यर्थः ।

(ऋ) नन्विति। तर्हि यदीदृशानन्दस्वरूपो रस इत्यर्थः। रसे सुखमित्युपचारः । सचेतसां सहृदयानाम् । तेषु करुणादिषु ।

(लो, ऋ) साभिनिवेशा, नतु रत्यादिरहिता ।

(लो, ऋ) रामायण वाल्मीकिमहाकाव्यम् ।

या व्यापार (व्यञ्जना) तन्मात्रस्य प्रसाधनाय (सिद्धये) ग्राहिणी (यन्त्रवद्भि)

—* चिह्नाङ्कित पाठ ङ ढ पु नास्ति ।

1 'दर्शनाद्' इत्युत्तरम्, "सुखमयत्वमेव" इत्यधिक पाठ (प फ पु)
2 'उपपत्त्यन्तरम्' इति (ग पु) 3 'करुणादि' इति (झ पु)
4 दु खहेतुत्वात् इति (ठ पु) 5 प्रसङ्ग इति नास्ति (ग पु)

ननु[1] कथं दुःखहेतुभ्यः[2] सुखोत्पत्तिरित्याह—(भ)

हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात् ।
शोकहर्षादयो लोके जायन्तां नाम लौकिकाः ॥६॥ (म)
अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात् ।
सुखं संजायते तेभ्यः सर्वेभ्योऽर्पयति का क्षतिः॥७॥(प) *

"ये खलु [3]रामवनवासादयो लोके 'दुःखस्य कारणानि" इत्युच्यन्ते, त एव हि काव्यनाट्यसमर्पिता अलौकिकविभावनव्यापारवत्तया कारणशब्दवाच्यत्वं[4] विहायालौकिक[5]विभावशब्दवाच्यत्वं भजन्ते + तेभ्यश्च[6] सुखते दन्तघाता-

---

दुःखहेतुत्व-प्रसङ्ग इति—तथा च तत्-श्रवणे न कोपि प्रवर्तते ।

(वि, भ) दुःखहेतुभ्य इति—परशोकादय स्वदुःखहेतव एव, तेभ्य कथमित्यर्थः । (म) हेतुत्वमिति लोकसंश्रयात्—लोके दृष्टत्वात् स्वीय-शोकहर्षादेर्हेतुत्वगतेभ्य परशोकादिकारणेभ्यो लौकिकाः शोकहर्षादयो जायन्तां नामेति तुष्यतु दुर्जन इति न्यायेन उक्त्वा आह—अलौकिकेति ।

(लो, प) हेतुत्वमिति—हेतुत्वं गतेभ्यो रामवनवासादिभ्यो लोकसंश्रयात्; ननु काव्यसंश्रयात् । लोके ननु काव्ये, लौकिकाः; नत्वलौकिकाः । तेभ्य — रामवनवासादिभ्य. ।

(लो, पे) अलौकिकविभावनव्यापारवत्तया, ननु पर्यायान्तरत्वमात्रेण । विभावनादिस्वरूपं वक्ष्यते । सुरते दन्तघातादिभ्य इति । अनेन देशकालादिविशेषेण

---

* लोके यानि तावत् शोकहर्षादे कारणानि कार्याणि सहकारीणि, तानि काव्ये नाट्ये च विभावा अनुभावा व्यभिचारिण इति नाम्ना व्यपदिश्यन्ते अलौकिक इति । लोके हर्षसुखादिकारणेभ्यो हर्षशोकादयो जायन्ते । परं काव्ये नाट्ये च तेभ्य सुखमेव जायते इत्यादि लोकोत्तरत्वमेव विभावादीनामलौकिकत्वम् ।

+ विभावनव्यापारवत्तया वाग्गम्यतया अतिसूक्ष्मरूपेणावस्थितानां रत्यादीनामास्वादनयोग्यतयानयनरूपस्याभिधानं विभावनम् । तदेव व्यापारः तद्वत्तया इत्यर्थः । तस्मादेव कारणादय काव्ये नाट्ये च विभावादिनाम्ना व्यपदिश्यन्ते ।

1 ननु हर्षशोकादिकारणेभ्यो हर्षशोकादय एव जायन्ते इति व्याप्तिः; तत्कथं विभावादिभ्यः सुखोत्पत्तिरित्याह इत्यधिक पाठः 'ननु' इत्यस्मात् पूर्वमुपलभ्येत ग. पु.

2 "कारणेभ्य" इति (ग. पु)

3 'राम' इति नास्ति (प फ.)

4 'ताम्' इति (ग. पु)

5 'अलौकिक' इति नास्ति (च. फ.)

6 'च' इति नास्ति (घ. फ.)

दिभ्य इव सुखमेव[1] जायते। (ऐ) अतश्च[2] लौकिकशोकहर्षादिकारणेभ्यो[3] लौकिकशोकहर्षादयो जायन्ते इति लोक एव प्रतिनियम.। काव्ये (ओ) पुनः सर्वेभ्योपि विभावादिभ्य[4] सुखमेव जायत इति नियमाभ्र कश्चिद् दोष ।

कथं तर्हि हरिश्चन्द्रादिचरितस्य काव्यनाट्ययोरपि दर्शनश्रवणाभ्यामश्रुपातादयो जायन्ते इत्युच्यते।

अश्रुपातादयस्तद्वद् द्रुतत्वाच्चेतसो मताः[4] (य, औ)

ननु तर्हि कथ काव्यत सर्वेषामादृशी रसाभिव्यक्तिर्न जायते इत्याह।

न जायते तदास्वादो विना रत्यादिवासनाम्, (र) ॥ ८ ॥

वासना चेदानीन्तनी प्राक्तनी च [5]रसास्वादहेतु। तत्र यदि आद्या न स्यात्तदा [6]श्रोत्रियजरन्मीमासकादीनामपि सा स्यात् (ल) यदि द्वितीया न स्यात्तदा रागिणामपि केषाञ्चिद्रसोद्बोधो न दृश्यते तत्र स्यात्। (व)

(वि, य) द्रुतत्वाच्चेतस इति-चित्तस्य सदयत्वमेव द्रुतत्वम्। सुखमयत्वेपि तद्दयया अश्रुपात इति भाव ।

(र) विना रत्यादिवासनामिति-तया च पुण्यजनितरत्यादिवासनापि रसास्वादहेतुरिति युक्तम्।

(ल) यद्यद्येति-इदानीन्तनीत्यर्थ । श्रोत्रियेति-जरन्मीमासका हि कार्यकारणभावादितर्कमानानुशीलनात् न काव्यरसास्वादवन्त तदनुशीलनाच्च तदानीन्तनवासनावन्त इत्यर्थ । नच प्राक्तनवासनाभावादेव तेषा न काव्यरसास्वाद इत्येवमुच्यताम्, किमर्थमिदानीन्तन-वासनाभीकार इति वाच्यम्, तेषामेव तर्कानुशीलनत्यागेन काव्यानुशीलनाभ्यासे रसोद्बोधेन इदानीन्तन्या अपि अवश्यमाद्यत्वात्।

(य) रागिणामपीति-काव्यरसबोधानुभवनामपीत्यर्थ तेषामिदानीन्तन-वा-

---

पेण सुखमयस्यापि दु खमयत्व, दु खमयस्यापि सुखमयत्वम्। अत एवाहु,—"प्रशस्य सुखदु खमोहात्मकत्वम्"—साङ्ख्या

(औ) काव्ये अलौकिकार्थे।

(लो, औ) द्रुतत्वात्-द्रवीभावात् रसोद्बोध इति।

---

1 एव' इति नास्ति (ठ पु)

2 'अतश्च' इति च पु नास्ति

3 'आदि' इत्यधिक पट (प फ)

4 गतुर्नो तु अस्या वार्तिकाया, "चेतसो द्रवीभावात् सुखेऽप्यश्रुपातादयो भवन्तीत्यर्थ" इति व्याख्या दृश्यते।

5 रसास्वादहेतुरिति फ पु नास्ति

6 'तदा' इति ट पु नास्ति।

उक्तञ्च—धर्मदत्तेन—

" सवासनानां सभ्यानां रसस्यास्वादन भवेत् ।
निर्वासनास्तु रङ्गान्तः काष्ठकुड्यैरसन्निभा "। +

ननु[1] कथं रामादिरत्याद्युद्बोधकारणै. सीतादिभिः[2] सामाजिकरत्याद्युद्बोध इत्युच्यते (श, अ)

व्यापारोस्ति विभावादेर्नाम्ना साधारणी कृतिः । *

सनाभावादेव न रसोद्बोध इति वाच्यम् । इदानीन्तनवासनाजनकतदनुरागसत्त्वेन तन्मत्त्वाश्रयभावात् । वस्तुतस्तु वासनात्वेनैव कारणत्वमुचितम् । ननु तत्र इदानीन्तनत्वादिप्रवेश जात् मीमासकाना तु अत्यन्ततर्कानुराग एव प्रतिबन्धक इत्येतान्यत्र ।

(वि, श) ननु कथमिति—नाट्यश्रव्यदृष्टश्रुत-सीतादिभ्य इत्यर्थ (ष) व्यापारोस्ति इति ५ साधारणी कृति सामाजिके रामाद्यभेदारोपरूपस्य, रामादि-सीतादौ स्वीयत्वारोपरूपस्य, स्वीयरत्यादौ रामादिरत्याद्यभेदारोपरूपस्य च साधारणी

(लो, अ) नन्विति । रामादिरत्याद्युद्बोधकारणै सीतादिभि सामाजिकरत्याद्युद्बोध तन्मते रसतामापद्यमान ।

+ सवासनानामिति—वासना एव रसास्वादे हेतु ।

सवासनानाम्—वासनायुक्तानाम् ।

निर्वासना—वासनारहिता सभ्या ।

काष्ठ कुड्य (भित्ति) अश्मा च (पाषाण) तेषा सन्निभा तुल्या । यथा नाटकशालाया काष्ठकुड्यादीना रसास्वादो न भवति—वासनारहिताना नाटकदर्शकाना तद् वदेव रसास्वादो न भवति ।

* अन्यसम्बन्धित्वेन असाधारणस्य विभावादे. स्थायिनश्च व्यक्तिविशेषादापरिहारेण उपस्थापन साधारणीकरणम् ।

उक्तम्—

"सीतादिविभावादेर्नास्ति यद्यपि सम्भव ।
अभवद् भावनात् तत्र साधारण्योपपादनम् ॥
इयं काव्यार्थसम्बन्धनाट्याभिनययोगत ।
वैचित्र्येण च सामग्र्या पदार्थाना विचित्रता ॥
निशाकरकरस्पर्शात् चन्द्रकान्ते यथा द्रव ।
एवं चारणवैशिष्ट्यात् काव्ये साधारणी कृति "।

1 'ननु' इति ज पु नास्ति ।

2 'सीतादिभि' इति च ज ठ पुस्तकेषु नास्ति ।

तत्प्रभावेण यस्यासन्–[1]पाथोधि-प्लवनादयः ।
प्रमाता * तदभेदेन स्वात्मानं प्रतिपद्यते ॥ ६ ॥ (आ, प)

ननु[2] मनुष्यमात्रस्य समुद्रलङ्घनादावुत्साहोद्बोध इत्युच्यते (स) ॥

उत्साहादिसमुद्बोधः साधारण्याभिमानतः (ह)
नृणामपि समुद्रादिलङ्घनादौ न दुष्यति ॥ १० ॥ (इ)

रत्यादयोपि साधारण्येन[3] प्रतीयन्त इत्याह—(क)

साधारण्येन रत्यादिरपि तद्वत् प्रतीयते ॥ ११ ॥ (ई)

सा इति कारिकार्थ । कर्तरि अपि क्तिरत एव प्रयोगात् । **तत्प्रभावेणेति** । यस्य हनूमदादे पाथोधिप्लवनादय आसन् प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यत इत्यर्थ । तत्र हेतुमाह—**तत्प्रभावेणेति** । साधारणीकृतिप्रभावेणेत्यर्थ । भेदाग्रहे सत्येव अभेदग्रह उपपद्यते इत्यत आह—**तदभेदेनेति** । भेदाग्रहेपि—साधारणीकृतिप्रभावेणेत्यर्थ ।

(वि, स) इत्थ स्वस्मिन् हनुमदाद्याभेदारोपमुक्त्वा तदुत्साहज्ञानादेव स्वोत्साहोद्बोधमुपपादयितुमाशङ्कते ।

(ह) ननु कथमिति—साधारण्याभिमानत –स्वस्मिन् हनुमदाद्यभेदाभिमानत ।

(क) साधारण्येनेति–उभयसाधारण्येनेत्यर्थ, न त्वात्मगतत्वेनैव नैव रामादिगतत्वेनैवेत्यर्थ ।

(लो,आ) साधारणी कृति –साधारणीकरण नाम। तत्प्रभावेण–साधारणीकरणव्यापारस्य प्रभावेण । तदभेदेन स्वात्मान प्रतिपद्यत इति सम्बन्ध । **यस्यासन्निति** । विवृणोति—**तदभेदेनेति** । अयमर्थ, सभ्याना रामाद्यभेदप्रतिपत्तौ नाट्यकाव्ययो रावणादिदर्शनश्रवणाभ्या रोषोद्बोधेन सभात समुत्थाय धनुराकर्षणादिर्भवेत् । भेदेन प्रतिपत्तौ तु आत्मनिष्ठरोषादिस्थायिभावोद्बोधो न स्यात् । एव च यो दोष समनन्तरमेव दर्शयिष्यते । यदुक्तम्—अभेदेन प्रतिपद्यते-अख्यातिवादिना शुक्तौ रजतप्रत्यये भेदाग्रहवत् ।

(लो, इ) साधारण्याभिमानत —उक्तप्रकारेण विभावादीना साधारणीकरण व्यापारप्रभावेनोत्पन्नस्य स्वात्मनि साधारण्याभिमानबलात् । नृणा–सभ्यानाम् ।

(लो,ई)रत्यादि, सभ्याना स्थायिभाव । साधारण्येन प्रतीयते । विभावादिसाधारणीकरणव्यापारप्रभावादेवेत्यर्थ ।

---

* प्रमाता—नाटकस्य द्रष्टा, काव्यस्य बोद्धा सामाजिक ।

1 'यथाब्धि' इति (ग ङ पु०)

2 'ननु' इत्युत्तरं कथमित्यधिक पाठ (ग घ पु०)।

3 एवेत्यधिक पाठ (ट ठ पु०)।

[1]रत्यादेरपि [2]आत्मगतत्वेन प्रतीतौ सम्भोगादिभेदेन(ग) परगतत्वेन [3]परस्यतापातः (ङ)

विभावादयोपि प्रथमतः[4] साधारण्येन प्रतीयन्त इत्याह ।



परस्य न परस्येति ममेति[5] न ममेति च ।
तदास्वादे विभावादेः परिच्छेदो न विद्यते ॥ १२ ॥ (ग, ङ) *

ननु[6] तथापि[7] कथमेवमलौकिकत्व[8]मेतेषां विभावादीनामिष्यते ।

(ग) रत्यादेरपि—आत्मगतत्वेन—आत्मात्मगतत्वेन एवमुत्तरत्रापि मात्र-गर्भिता ।

(ग) परस्य न परस्येति—अत्रापि परस्येत्यादिरर्थः ।

(लो, ङ) आत्मगतत्वेन प्रतीतावुक्तम्—देवतादिरूपगतादिहेतुकत्वेनेति शेषः । अरस्यता—अनास्वादना ।

(लो, ङ) तदास्वादे—तस्य रसस्याऽऽस्वादे । एवं च विभावादयः स्वं साधा-रणत्वेन प्रत्याययन्तीत्यर्थः ।

---

* लोके हि त्रयो विधाः । कानिचित् वस्तूनि स्वस्यैव, कानि च शत्रोरेव, कानि पुनः शत्रुमित्रविलक्षणस्य उदासीनस्यैव । (मित्रवस्तुनोपि आत्मसम्बन्धित्वेन स्वकी-यत्वम्, अतो न विभागकल्पना) तत्र यदि स्वकीयत्वेन विभावादयः प्रतीयेरन् तर्हि इतरसामाजिकगतिषौ स्वौचित्यप्रक्रमोऽनुचित इति लज्जा एव स्यात्; रसास्वादस्तु दूरे एव । शत्रुसम्बन्धित्वेन विभावादीनां प्रतीतौ च ।

विद्वेषविभावश्चावश्यम्भावी । अतो रसास्वादप्रत्याशाऽपि नास्ति । उदासीनसम्ब-न्धित्वेन च विभावादीनां प्रतीतौ तदभावचिन्तया नितरामेव रसास्वादो अनुपपन्न इति सम्बन्धविशेषस्वीकारस्य अनिश्चय स्वीकर्तव्यः । परिच्छेदः—सामाजिकमात्र-निष्ठता तस्मात् साधारणविभावादिरूपेणैव प्रतीयन्ते विभावादय ।

1 'रत्यादेः' इत्यारभ्य 'इत्याह' इत्यतः पाठ प. फ पुस्तकयोर्नास्ति ।
2 स्वात्मगतत्वेन' इति (च. ज पुस्तकयोः)
3 'रसतापत्ति ' इति (घ, च पु०) ।
4 'प्रथमत.' इति ट. ठ. पुस्तकयोर्नास्ति ।
5 'न ममेति ममेति च' इति (क. ग. पुस्तकयो) ।
6 'ननु' इति च. प. पुस्तकयोर्नास्ति ।
7 'तथापि' इति च ज पुस्तकयोर्नास्ति ।
8 'एव' इति क ग पुस्तकयोर्नास्ति ।
9 'तेषाम्' इति (प. फ ज. पुस्तकेषु) ।

[1]विभावनादिव्यापारमलौकिकमुपेयुषाम् ।
अलौकिकत्वमेतेषां भूषणं नतु दूषणम् ॥ १३ ॥ *

[1]आदिशब्दादनुभावनसंचारणे । तत्र विभावनं रत्यादे (ङ) विशेषेणा-
ऽऽस्वादाङ्कुर[2]योग्यतानयनम् । (घ) अनुभावनमेवंभूतस्य रत्यादे· समनन्तरमेव
रसादिरूपतया भावनं (ङ) संचारणं-तथाभूतस्यैतस्य[3] सम्यक् चारणम्[4] ।
[5]विभावादीनां यथासंख्यं कारणकार्यसहकारित्वे कथं त्रयाणामपि रसोद्बोधे
कारणत्वमित्युच्यते ।

[6]कारणं कार्यसंचारिरूपा अपि हि लोकतः । (ङ)
रसोद्बोधे विभावाद्याः कारणान्येव ते मताः ॥ १४ ॥ +

(वि, घ) **आस्वादाङ्कुर** इति—व्यञ्जनया रत्याद्युपस्थापनमेव तद्योग्यता । अस्य योगार्थस्याऽनुभावादावपि सत्त्वेपि परिभाषाया योगरूढत्वान्न तत्र प्रयोग· । एवमग्रे अनुभावव्यभिचारिपरिभाषयोरपि बोध्यम् ।

(वि, ङ) अनुसंज्ञार्थमाह—**समनन्तरत्वमिति** । एवंभूतस्य आस्वादाङ्कुरतां प्रापितस्य रत्यादेः स्वनिष्ठस्वादनाख्यव्यापारेण रसरूपतया प्रवेशनमित्यर्थः । विभावादिभिरेवं क्रियत इति बोध्यम् ।

(वि, च) **कथं त्रयाणामपीति** कार्यस्य कारणत्वाभावादित्यर्थ. । रसास्वादे एकः प्रतिभास इत्यर्थ. । *

(लो, ङ) रत्यादेर्जगतो वामनान्तर्गतत्वात्तनान्तर्लीनस्येत्यर्थ ।
(लो, ङ) लोकतो—लोके ।

---

* **विभावनादिव्यापारमिति**—अलौकिकं विभावनादिव्यापारं (प्राग् दर्शितं यथा) उपेयुषां प्राप्तवतां विभावादीनाम् अलौकिकत्वं भूषणं (गुण एव) नतु दूषणं (दोष) ।

+ **कारणं कार्येति**—ते विभावाद्या यद्यपि लोकतः लौकिकव्यवहारेण कारण-

1 'आदि-' इत्यत 'समाहारे' इत्यन्त पाठ क., ख. ज पुस्तकेषु नास्ति ।
2 'स्फुरण' इति (क ग पुस्तकयो) ।
3 'भूतस्यैव तस्य' इति (क. च. पुस्तकयो.) ।
4 'परिपोषणमित्यर्थ ' इति ग. च पुस्तकयोरधिक. पाठ· ।
5 'ननु विभावादीनां प्रत्येकं कारणकार्यसहकारित्वाणां रसं प्रति कथं कारणत्वमुच्यते ।' (ग. पु)
6 'कार्यकारणसंचारिरूपा' (ख. घ पु) 'कारणकार्य—' (च. छ पु)

ननु[1] तर्हि कथ रसास्वादे तेषामेक· प्रतिभास इत्युच्यते (च)

" प्रतीयमान· प्रत्येकं प्रथमं हेतुरुच्यते
ततः सम्वलितः[2] सर्वो विभावादिः सचेतसाम् ।
प्रपान[3]करसन्यायाच्चर्व्यमाणो रसो भवेत् ॥ १५ ॥ *

यथा खण्डमरीचादीनां सम्मेलनादपूर्व इव(लृ) कश्चिदास्वादः प्रपानकरसे सजायते[4] । विभावादिसम्मेलनादिहापि तथेत्यर्थ । ननु यदि विभावानुभाव-व्यभिचारिभिर्मिलितेव रसस्तत्र कथमेकस्य द्वयोर्वा सद्भावेपि[5] स्यादित्युच्यते ।

सद्भावश्चेद् विभावादेर्द्वयोरेकस्य वा भवेत् ।
झटित्यन्यसमाक्षेपे (छ) तदा[6] दोषो न विद्यते ॥ १६ ॥

अन्येषा[7]माक्षेपश्च प्रकरणादिवशात् यथा—

"[8]दीर्घाक्ष शरदिन्दुकान्तिवदन बाहू नतावंसयो
सक्थिस निबिडोन्नतस्तनभुर पार्श्वे प्रसृष्टे इव ।

(वि, छ) झटित्यन्येति—शीघ्रमन्यव्यञ्जके सतीत्यर्थ ।

(वि,ज) दीर्घाक्षेति—अग्निमित्रनाम्ना राज्ञा मालविकानामराजपुत्र्या रूप

(लो, लृ) अपूर्व इव—तद् भिन्न इव ।

कार्यसचारिरूपा अपि रसोद्बोधे रसाविर्भावे कारणानि एव । यद्यपि लौकिकव्यवहारात् रत्यादे कारणानि विभावनाम्ना कार्याणि अनुभावनाम्ना सहकारीणि च (सचारि) व्यभिचारिनाम्ना व्यपदिश्यन्ते तथापि विभाववत् अनुभाव सचारिभावोपि रसास्वाद प्रति कारणानि भवन्ति ।

* **प्रतीयमान** इति—प्रथम प्रतीयमानो विभावादि प्रत्येक रत्यादिं प्रति हेतु रुच्यते । तत रसप्रतीतिवेलाया सम्वलितो मिलित सर्वो विभावादि प्रपानकरसवत् चर्व्यमाण आस्वाद्यमान सचेतसा सामाजिकाना रसो भवेत् । रसस्य चर्वणानन्य-

1 तदुक्त ध्वनिकृता—'विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभि । आनीयमान स्वाद्यत्व स्थायीभावो रस स्मृत ॥' इत्यश , ननु, इत्यत प्रागधिको दृश्यते(ग घ च पु०)

2 'सम्मिलित ' इति (ग. पु०) ।

3 'ण' इति (ग पु०) ।

4 प्रतीयते (च, पु०)

5 'अपि' इत्युत्तर स इत्यधिक पाठ (ट पु०,) रस इति (घ पु०) ।

6 तथेति (च, ज पु०) ।

7 'अन्यसमाक्षेपश्च' इति (ग पु०) ।

8 'वियदलिमलिनाम्बुगर्भमेघ मधुकरकोकिलकूजितैर्दिशा श्री ।
धरणिरभिनवाङ्कुराङ्करङ्का प्रणतिपरे दयिते प्रसीद मुग्धे ॥

मध्यः पाणिमितो नितम्बि जघनं पादावुदग्राङ्गुली
छन्दो नर्तयितुर्यथैव मनसः सृष्टं तथास्या वपुः ॥ (ञ, ए) *

अत्र मालविकामभिलषतोऽग्निमित्रस्य मालविकारूपविभावमात्रवर्णने[1] संचारिणामौत्सुक्यादीनामनुभावानाञ्च नयनविस्फारादीनामौचित्यादेवाक्षेपः । एवमन्याक्षेपेष्वूह्यम् ५(ऐ)

अनुकार्यगतो रस इति वदतः प्रत्याह । (झ, ओ)

पारिमित्यात्लौकिकत्वात् सान्तरायतया तथा ।
अनुकार्यस्य रत्यादेरुद्बोधो[2] न रसो भवेत् ॥१७॥ (ञ)

वर्णनमिदम् । उत्तमनटी नर्तयितुर्मनसो यथैवच्छन्द इच्छा तथैवास्या वपुः सृष्टम् (विधात्रा) तदेवाह—**दीर्घोत्तमिति**—बाहू-अंगयोः स्वमूलयोर्नतौ । संक्षिप्तं नातिस्थूलम् । निबिडौ-अन्योन्यसंसक्तौ उन्नतौ च स्तनौ यत्र तादृशं च उरः । प्रमृष्टे मार्जिते । पाणिमित. करतलेन परिमातुं शक्य' । जघनोत्तरभागः नितम्बः प्रशस्तः तद् युक्तं जघनम्, उदग्रा-उन्नता । **अत्रेति**-अभिनयं वर्णयत ।

(वि,झ) **अनुकार्येति**—नाट्येऽनुकार्यो रामादिरनुकारको नटः ।

(वि,ञ) **पारिमित्यादिति**-सीतादिविषयरते रामादिमात्रनिष्ठत्वेन परिमितत्वादित्यर्थ. । **लौकिकत्वादिति**—तन्निष्ठरत्यादेस्तत्रैव दृष्टत्वादित्यर्थ । काव्यनाट्ययोस्तु तद्गतरत्याद्यभेदेन आरोपविषयस्य सामाजिकरत्यादेरलौकिकत्वमेव । **सान्तरेति**—रामादिरत्यादेरित्यर्थ । तदभेदेनारोपविषय सामाजिकरत्यादिरेव विभावादिनिष्ठस्वादनाख्यव्यापारजन्यास्वादविषयो रस इत्यर्थ ।

(लो,ए)**दीर्घोत्तमिति**। छन्दोऽभिप्राय । सृष्टं विधात्रा इति शेष । नर्तयिता नर्तकीम् दीर्घोत्तमत्वाद्यभिनयेन दर्शयितुं शिक्षयति, मालविकाया सहजसौन्दर्यादेव तदस्तीति भाव ।

(लो,ऐ) **अन्याक्षेप इति**—अन्यत्-एकतमं द्वितयं वा ।

(लो,ओ) अनुकार्यो-रामादि., अनुकर्ता—नट पाठस्थ ।

लौकिके काव्यनिष्ठभेदमाश्रित्य चर्व्यमाण इति । यथा प्रपानके खण्डमरीचादयंशः न पार्थक्येनाऽनुभूयते, परं खण्डमरीचादीना प्रत्येकरसातिरिक्तः कश्चिदपूर्वो रस. अनुभूयते तथा अत्रापि रसे विभावादिप्रत्येकविलक्षण एव आस्वाद इति भावः ।

आलम्बनोद्दीपनविभावमात्रवर्णनेपि प्रगीतेतिपदसामर्थ्यात् कटाक्षविक्षेपादीनामनुभावादीना मुख्ये इयतो गर्वामर्षासूयादीनां च व्यभिचारिणामौचित्यादेवाक्षेप. इत्युदाहरणं (क. ख. पुस्तकयो.) ।

1 'नेऽपि' इति (ग. घ पुस्तकयो.) ।

2 'रत्यादेस्तद्बोधो न रसो भवेत्' इति (च. छ०) ।

'सीतादिदर्शनादिजो' रामादिरत्याद्यबोधो हि परिमितो लौकिको नाट्यकाव्यदर्शनादे सान्तरायश्च, तस्मात् कथ रसरूपतामियात्। रसस्यैतद्धर्मत्रितयविलक्षणधर्मकत्वात्। *

अनुगतकर्तृत्व चास्य निरस्यति। (ट)

शिक्षाभ्यासादि-भेदेन राघवादे स्वरूपताम्[1]।
दर्शयन् नर्तको नेव रसस्यास्वादको[4] भवेत्॥ १८॥ (ठ)

किञ्च—

काव्यार्थभावनेनायमपि सभ्यपदास्पदम्+॥ १९॥

यदि पुनर्नटोपि काव्यार्थभावनया रामादिरूपतामात्मनो दर्शयेत् तदा सोपि सभ्यमध्य एव गण्यते। (ओं)

(वि, ट) अनुकर्तेति—अनुकर्ता नट एव।

(वि,ट) स यदा काव्यार्थभावक स्यात्तदा सोपि सामाजिको भवेदित्याह—किञ्चेति।

(वि,ड) यद्यप्युक्तरीत्या रसस्य साक्षात् क्रियमाणत्व कार्यत्व कादाचित्कत्वेन भविष्यद्वर्तमानत्व सविकल्पकज्ञानविषयत्व तज्-ज्ञानस्य साक्षात्काररूपत्व च तथापि तस्य वैलक्षण्य साधयितु साक्षात् क्रियमाणघटादितोऽपि वैलक्षण्यसाधनेन कौतुकादसाक्षात् क्रियमाणत्व कारणविशेषकार्यत्वस्य केनचिदुक्तस्य दूषणेन कौतुकात् सामान्यतोऽकार्यत्वमेवमभविष्यन्त्वादिकमपि कौतुकाद् वस्तु प्रथम घटादिसाधारण-

---

(लो, ओं) सभ्यमध्य एव गण्यते। एतावता सभ्यानिष्ट एव रस इत्यर्थ।

---

* एतद् धर्मत्रितयेति—एतद् धर्मत्रितयात् (परिमितत्वलौकिकत्वसान्तरायत्वरूपधर्मत्रयात्) विलक्षणा विपरीता धर्मा यस्य तस्य भाव तत्त्वात्। रसस्तु अखण्ड —अलौकिक, निरन्तरायश्च इति प्राक् प्रतिपादितम्। अत रसस्य विरुद्ध धर्म्मवत्त्वात् नाय रसपदवाच्य।

+ सभ्यपदास्पद-रसस्याऽऽस्वादको भवेत्।

1 'अनुकार्यो रामादि, तद्गतो रत्यादिना परिमित, न अलौकिकश्च, कालान्तरभूतत्वात् सान्तरश्च। स कथमपरिमितालौकिकानुभूयमानो रसता गच्छेत्। इत्यधिकपाठानन्तर 'सीतादा त्यादि (ग घ)।

2 'दित' इति च पु०।

3 सरूपताम्' इति (ग घ पु०)।

4 'रसस्य स्वादक इति (च पु०)।

नायं ज्ञाप्यः स्वसत्तायां प्रतीत्यव्यभिचारतः ॥ २० ॥

(ड, अ)

योऽयं ज्ञाप्यो घटादिः स सत्तायामपि कदाचिदज्ञातो भवति नह्ययं तथा, प्रतीतिमन्तरेणाभावात् ।

यस्मादेष[1] विभावादिसमूहालम्बनात्मकः ॥ २१ ॥

तस्मान्न कार्यः (ढ)

यदि रस कार्यं स्यात् तदा विभावादिज्ञानकारणक एव स्यात् (ण)

साक्षात्कारविषयत्वमाह—**नायं ज्ञाप्येति**—स्वार्थकारितान्तत्वेन (णिजन्तत्वेन) नाय ज्ञेय इत्यर्थः । ज्ञाप्यत्व-ज्ञेयत्वयो समनियतत्वात् यथाश्रुतमेव वा । अज्ञेयत्व चात्र घटादिसाधारणेतरसाक्षात्कारविषयत्वम् । ज्ञेयत्वस्य केवलान्वयित्वेन तदभावा सम्भवात् । तत्र हेतुमाह-**स्वसत्तायामिति** । प्रतीत्यव्यभिचारत । साक्षात् कार विना असत्त्वात् साक्षात्कारदशायामेव रस । अन्यदा तु रत्यादिरेव । घटादि-स्वसाक्षात्कारदशायामपि घटादिरित्यतस्तद्वैलक्षण्यम् । साक्षात्कारहेतुसन्निकर्षार्थं पूर्वसत्त्वस्यावश्यमेवापेक्षणीयत्वात् । एतावतैव सामान्यतोऽज्ञेयत्वमेव अग्रे कौतुकाद् व्यक्तीकरिष्यति ।

(वि,ढ) हेतुविशेषकार्यत्व रसस्य ये वदन्ति तन्मत निरस्यति—**यस्मादेष** इत्यादि **तस्मान्न कार्य** इत्यन्तेन । अयमर्थ —'प्रधानकरसन्यायाच्चर्व्यमाणो रसो भवेदित्युक्त्या विभावादिरत्यादिसमूहालम्बनात्मको रस इत्युक्तम् । तच्च समूहालम्बन स्वादनाख्यव्यापारजन्यम् । केचित्तु तत्समकालोत्पन्न व्यञ्जनयापि तादृश समूहाल-म्बनानन्तर जायते, तत्कार्य एव रस इत्याहु , तन्निरस्यति—**यस्मादेष** इति । एष रसो यस्मात् स्वादनाख्यव्यापाराधीनसमूहालम्बनात्मक , अतो न कार्य , न समूहालम्बनकार्य स्वस्य स्वकार्यत्वात् स्वसमकालोत्पत्तिकस्य व्यञ्जनाधीनसमूहालम्बना-न्तरस्याभावाच्चेति भाव । तत्र स्वस्य स्वकार्यत्वासम्भवस्य स्फुटत्वात् ।

(वि, ण) स्वसमकालोत्पत्तिकसमूहालम्बनानन्तरकार्यत्वासम्भव व्याचष्टे—**यदि रसः कार्यः स्यादिति** । यदि समूहालम्बनकार्य स्यादित्यर्थ । विभावादिज्ञा-नकारणको विभावादिसमूहालम्बनज्ञानकारणक स्यादित्यर्थ । प्रत्येक विभावादिज्ञानकार-णकत्वे विप्रपत्तिरेव । "प्रतीयमान प्रथम प्रत्येकं हेतुरुच्यते" इत्यनेन प्रत्येकस्य हेतुत्वोक्त्या तत्कार्यत्वे विप्रतिपत्त्यभावात् ।

(लो ,अ) नाय ज्ञाप्य इति—अय रस सत्ताया सद्भावे प्रतीतिमन्तरेणा भावात् । असंविदितसत्त्वे च प्रमाणाभावात् ।

---

1 'व' इति (ब. स पु०)।

ततश्च रसप्रतीतिकाले विभावादयो न प्रतीयेरन् (त) कारणज्ञानतत्कार्यज्ञानयो[1]र्युगपददर्शनात् (थ) नहि चन्दनस्पर्शज्ञानं तज्जन्यसुखज्ञानं चैकदा सम्भवति (द) रसस्य च विभावादिसमूहालम्बनात्मकतयैव प्रतीतेर्न विभावादिज्ञानकारणकत्वमित्यभिप्रायः (ध, आ)

नो नित्यः पूर्वसम्वेदनोज्झितः ।
असंवेदनकाले हि न भावोऽप्यस्य विद्यते ॥ २२ ॥ (न)

न खलु नित्यस्य वस्तुनोऽसंवेदनकालेऽसम्भवः ।

(वि, त) ननु तादृशसमूहालम्बनकारणत्वे को दोषः इत्याह–**ततश्चेति**। रसप्रतीतिकाले, स्वादनाख्यव्यापारजन्यविभावादिसमूहालम्बनात्मकरसप्रतीत्युत्पत्तिकाले विभावादयो न प्रतीयेरन्, तत्कालोत्पन्नप्रतीतिविषयाः स्युरित्यर्थः ।

(वि, थ) कारणज्ञानस्य स्थितिः कार्यज्ञानस्योत्पत्तिरिति तु न सम्भवत्येव। कार्यकारणयोरुत्पत्तियौगपद्यस्यैवाभावात् । तदाह–**ज्ञानतत्कार्यज्ञानयोरिति** । अत्र ज्ञानेति ग्रहणाभिप्रायेणैव । कारणकार्यमात्रयोरेव युगपदुत्पत्त्यभावात् । न च पूर्वोत्पन्नमेव व्यञ्जनाधीनसमूहालम्बनमस्त्विति वाच्यम् । स्वादनाख्यव्यापाराधीनरसात्मकसमूहालम्बनातिरिक्तसमूहालम्बनस्यानुभवात्, तत्स्वीकारवैफल्याच्च ।

(वि, द) कारणकार्यज्ञानयोर्युगपदुत्पत्त्यसंभवं दर्शयति–**नहि चन्दनेति**।

(वि, ध) तस्मात् रसस्य समूहालम्बनात्मकत्वमेव, नतु समूहालम्बनजन्यत्वमित्युपसंहरति–**रसस्येति** । समूहालम्बनात्मकतयैव इत्येवकारात् समूहालम्बनजन्यत्वव्यवच्छेदः । तदेवाह–**न विभावादीति** । ज्ञानमत्रापि समूहालम्बनम् । एवं रसस्य समूहालम्बनकार्यत्वमेव खरीकृतं नतु कार्यत्वम् । एतावतैव कार्यत्वसामान्याभावसमर्थनात्तुकाद् वक्ष्यति ।

(वि, न) नित्यत्वाभावः स्पष्ट एव, तमाह–**नो नित्य** इति । पूर्वसंवेदनं, संवेदनात् पूर्वमुज्झितोऽसन्नित्यर्थः । तदेव दर्शयति–**असंवेदनकाल** इति ।

(लो, अ) **रसस्येति**–नहि विभावादिज्ञानकारणकमित्यनन्तरं ततश्चानुपलभ्यमानकारणान्तरस्य रसस्य न कार्यत्वमिति भावः ।

(लो, आ) **नो नित्य** इति–नित्यत्वाभावे हेतुमाह—

पूर्वसंवेदनोज्झित इति । पूर्वसम्वेदनाभावादित्यर्थः । ननु पूर्वसंवेदनाभावान्नित्यत्वाभावे इतरेषामपि नित्यवस्तूनामभावप्रसङ्ग इवत आह–**असम्वेदनेति** । अस्य रसस्य ।

---

1 'ज्ञानादीनाम्' (ग. पु.)

नापि भविष्यन् (इ) [1]साक्षादानन्दमयस्वप्रकाशरूपत्वात् ।
कार्यज्ञाप्यविलक्षणभावान्नो[2] वर्तमानोपि ॥ २३ ॥ (प)
विभावादिपरामर्शविषयत्वात् सचेतसाम् ।
परानन्दमयत्वेन सम्वेद्यत्वादपि[3] स्फुटम्
न निर्विकल्पकं ज्ञानं तस्य ग्राहकमिष्यते ॥ २४ ॥ (फ, ई) *

(वि, प) नापि भविष्यन्निति यद्यपि संवेदनात् पूर्वम् असत्त्वेनैव भविष्यत्व दुरपह्नवम् । तथापि भविष्यत्पदार्थान्तरस्य साक्षादानन्दमयप्रकाशत्वस्वरूपाभावात् तद्वैलक्षण्यमेव भविष्यत्वाभाव कौतुकादुक्त ।

(वि, फ) वर्तमानत्वाभावमपि कौतुकादाह-**कार्यज्ञाप्येति** । यद्यपि घटादिसाधारणज्ञाप्यत्वस्यैव समूहालम्बनकार्यत्वस्यैव चाभाव प्राग् दर्शित, तथापि तावतैव कार्यत्वज्ञाप्यत्वाभाव कौतुकादारोप्यैवमुक्तम् । तथा च कार्यज्ञाप्यभिन्नस्याऽलीकत्वान्न वर्तमान इत्यर्थः । स्वप्रकाशरूपस्य स्वमेव ग्राहक, तत्तु न निर्विकल्पमित्याह-**विभावादीति** । तत्परामर्शस्तत्समूहालम्बन, तद्विषयत्वात् स्वेनैव स्वस्य विषयीकरणात् । तत् प्रधानत्वादिति क्वचित् पाठे तत्परामर्श प्रत्येक तत् ज्ञान, तत् प्रधानत्वात् तज्जन्यत्वादित्यर्थ । उभयथापि निर्विकल्पकत्वाभाव एव । आद्ये विभावादिसमूहालम्बनस्य सविकल्पकत्वात् । अन्त्ये तु ज्ञानजन्यत्वेन निर्विकल्पकत्वाभावात् । ज्ञानजन्यज्ञानस्यैव निर्विकल्पकत्वात् । हेत्वन्तरमाह—**परानन्देति** । प्रकारप्रदर्शनात् सप्रकारत्व प्रदर्शितम् । तथा च न निर्विकल्पक निष्प्रकारकज्ञानस्यैव तथात्वात् ।

(लो, इ) नापि भविष्यन्निलाह—साक्षादनुभूयमानस्य हि कथ भविष्यत्त्वम् । यस्य खलु वस्तुनो भविष्यत्त्व सहजो धर्मस्तत् सदा भविष्यदेवेति भाव । कार्यज्ञाप्यविलक्षण भावात् समनन्तरोक्तन्यायसिद्धावित्यर्थ ।

(लो, ई) निर्विकल्पक ज्ञानम्—अस्ति ह्यालोचनमात्रप्रथम निर्विकल्पक ज्ञानम् । अमुकासदृश ज्ञान शुद्धवस्तुनमित्युल्लेखप्रकार, तस्य ग्राहकमित्युपचारप्रयोग । स एव रसो निर्विकल्पकज्ञानत्वेन गृह्यमाणो न भवतीत्यर्थ । तथा निर्विकल्पकस्य ज्ञान विषयोपीति । तत्र पक्षे यस्य ग्राहकत्वमिष्यते इत्यत्र नोपचार ।

* ज्ञान तावत् निर्विकल्पक सविकल्पक चेति द्विविधम्, तत्र नामरूपजात्यादिविशेषशून्य ज्ञान निर्विकल्पकम्, नामरूपजात्यादियुक्त ज्ञान सविकल्पकम् । तयोर्मध्ये रसो येन गृह्यते इत्याशङ्क्य नान्यतरेण गृह्यते इत्याह—**विभावादीति** । विभावादीना

1 'आनन्दमयस्वप्रकाश' (इति च घ पु)
2 'भावान्न' (इति क ख. पु)
3 'दविस्फुटम्' (इति घ फ)

तथाभिलाप[1]-संसर्गयोग्यत्व-विरहाच्च
सविकल्पकसंवेद्यः। (घ)

-सविकल्पकज्ञानसंवेद्यानां हि वचनप्रयोगयोग्यता नतु रसस्य। तथा (ङ)

साक्षात्कारतया न च।
परोक्षस्तत्प्रकाशो नापरोक्षः शब्द सम्भवात्॥२६॥ (म, ऋ)

(वि, घ) सविकल्पकसंवेद्यत्वाभावमपि तस्य कौतुकादाह—तथाभिलापेति। यद्यपि तद्ग्राहकस्य निर्विकल्पकत्वाभावयुक्तिप्रदर्शनेनैव सविकल्पकसंवेद्यत्व सिद्ध तथापि सविकल्पकसंवेद्यान्तरतो वैलक्षण्येन तदवेद्यत्वं कौतुकादुक्तम्। वैलक्षण्य मेवाह—तथाभिलापेति। तत्काव्यस्थशब्देन तस्याऽभिलप्यमानत्वाभावादित्यर्थ। तस्य विभावादयभिधानद्वारेणैव तस्य ज्ञेयत्वम्, नतु काव्यस्थशब्देन। प्रत्युत तस्य तत्प्रत्यस्य शब्दवाच्यत्वे स्वशब्दवाच्यत्व दोष एव वक्ष्यते। अत एव काव्य-प्रकाशकृताप्युक्त, 'रसादिलक्षणस्त्वर्थ स्वप्नेपि न वाच्य' इति। अय रसवानित्यादि-तत्काव्यस्थेन अशब्देन तु वाच्य, सविकल्पकवेद्य पदार्थान्तर तत्काव्यस्थशब्दे-नैव वाच्यमिति ततो वैलक्षण्यमिति वचनम्।

(वि, ङ) प्रयोगयोग्यता तत्काव्यस्थशब्देनेति शेष।

(वि, च) तत्प्रकाशस्य परोक्षत्व नास्तीत्याह—साक्षात्कारतयेति। स्पष्टमिदम्। साक्षात्कारानन्तरवैलक्षण्यप्रतिपादनाय साक्षात्काररूपस्यापि तत्प्रकाशस्य साक्षात्कारत्वाभावमपि कौतुकादाह—नाऽपरोक्ष इति। न साक्षात्कार इत्यर्थ। तत्र हेतुमाह—शब्दसंभवादिति। शब्दसभवात्-शाब्दत्वादित्यर्थ।

(लो, ऋ) तथाभिलापेति—अत्रापि पूर्ववत् रसो न सविकल्पकरूप इति। नच तद्विषयोपीतिव्याख्येयम्। सविकल्पकस्वरूप च—"अत पर पुनर्वस्तुधर्मैर्जा-त्यादिभिर्यया। बुद्धयाऽवसीयते सापि प्रत्यक्षत्वेन सम्मता।" प्रत्यक्षमत्र प्रकरणात् सविकल्पकम्। सविकल्पकत्वेन सम्मतेत्युक्तप्रकारम्। अत परमित्यत्र इदमानुपूर्वोक्त-निर्विकल्पकपरामर्श शब्दसभवात् शाब्दज्ञानम् परोक्षमिति भाव। तत् कथयति—तत्त्व स्वरूप, पूर्वं न श्रुतो न दृष्टश्चोक्तस्वरूपो निरूपणप्रकारो यस्य रसस्येत्यर्थ।

परामर्श स्मरणम् एव विषया यस्य तत्त्वात्। निर्विकल्पे हि ज्ञानान्तरजन्यत्वम्। इन्द्रियसम्बन्धमात्रग्रहण च नास्ति, तस्य निष्प्रकारकत्वात्। रसस्तु विभावादिभि र्ज्ञायते। अतो रसो निर्विकल्पेन ज्ञानेन न गृह्यते।

1 'घ' इति (ज पु०)।
2 सविकल्पकेत्याधशो (ग घ पुस्तकयोर्नास्ति।

तत् कथय कीदृगस्य तत्त्वम्[1] एवमश्रुतादृष्टपूर्वनिरूपणप्रकारस्येत्याह—

तस्मादलौकिकः सत्यं वेद्य सहृदयैरयम् ॥२७॥ (य, ऋ)

तत् किं पुनः प्रमाणं तस्य सद्भावे इत्याह—

प्रमाणं चर्वणैवात्र स्वाभिन्ने विदुषां मतम् ॥ २८॥ (र, लृ)

चर्वणा आस्वादनम्, तच्च "स्वाद काव्यार्थसभेदादात्मानन्दसमुद्भव" इत्युक्तप्रकारम्। (ल) ननु यदि रसो न कार्यस्तत्कथ महर्षिणा 'विभावानुभाव-व्यभिचारिसयोगाद्रसनिष्पत्ति" इति लक्षण कृतमित्युच्यते।

(वि, य) इत्थ किञ्चिन् वस्तुत सिन्चिच्च कौतुकाद् वैलक्षण्यमुक्त्वा कीदृशं तादृशवैलक्षण्य वस्तु तत् इति पृच्छति तत् कथयति। तस्यादृष्टचरत्वात् तन्निरूपणस्यापि अदृष्टचरत्व भवतीत्याह-**अदृष्टनिरूपणेति**।

वैलक्षण्य दर्शयति—**तस्मादलौकिक** इति। लोकदृष्टसुखादिपदार्थ-वैलक्षण्य इत्यर्थ। स चान्यलोकैरज्ञेय।

(वि, र) तत्सवेद्यत्वे एव किं प्रमाणमित्यत्राह—**प्रमाणमिति**। तदीय साक्षात्कार एव प्रमाणमित्यर्थ। स्वप्रकाशत्वेन साक्षात्कार्यसाक्षात्कारयोरभेदादेव विदुषा मतमित्यर्थ।

(वि, ल) **स्वादः काव्यार्थेति**—*स्वाद-साक्षात्कार। काव्यार्थसम्भेदात्* काव्यस्य वाच्य इत्यर्थ। लक्ष्यव्यङ्ग्यवस्तुना सम्भेदात् ज्ञानात् आत्मनो रसस्यानन्द-रूपेण समुद्भव। कृदभिहितभावत्वात् समुद्भूत आनन्द इत्यर्थ।

(वि, व) *रसादिरित्यादे* सामान्यरित्यादेर्वा उद्दीपनविभावानुभावव्यभिचारि-जन्यत्व नास्त्येव, ततस्तदात्मकस्य रसस्य तत्साक्षात्काररूपमात्रजन्यत्व सिद्धान्तयितु कौतुकोक्तमपि तस्याऽकार्यत्वमुक्त्वा आशङ्कते-**ननु यदि रसो न कार्य** इति। वस्तु-

---

(लो, ऋ) अलौकिको लौकिकवस्तुविलक्षण। यदाह एतन्निरूपणप्रस्ताव एव काव्यप्रकाशकार — अलौकिकसिद्धेर्भूषण ननु दूषणम्। न खल्वदर्शनमात्रेणाऽनुभूयमानवस्तुस्वरूपापह्नव शक्यक्रिय एवेति भाव। कथमीदृशोऽर्थस्माभिरनुभूयत इत्याह—**वेद्य** इति। प्राचीनवासनासम्वलिता विद्यानिपुणतोपस्कृता बुद्धिरत्र हृदयम्। तद्वद्भि. सहृदयै ननु वैयाकरणमीमासकदुर्दर्शुभिरिति भाव।

---

1 'तत्त्वमधुना' इति (ग पु०)।
'तत्त्व इदृग्रूपेण' इति (घ पु०)।
2 'सवेदादात्मा' (घ पु)

निष्पत्त्या [1]चर्वणस्यास्य निष्पत्तिरुपचारतः ॥ २६ ॥

यद्यपि [2]स्वाभिन्नतया चर्वणस्यापि न कार्यत्वं (च) तथापि तस्य कादाचित्कतया [3]उपचरितेन कार्यत्वेन कार्यत्वमुपचर्यते। (श, ए)

अवाच्यत्वादिकं तस्य वक्ष्ये व्यञ्जनरूपणे ॥ ३० ॥

तस्तु समूहालम्बनाकार्यस्यैव उक्तत्वात् निष्पत्तिरुपचारत इति । विभावादितो निष्पत्ति रित्यर्थः। स्वकारणाधीननिष्पत्तिकस्य रत्यादेर्निष्पत्तेर्वास्तवत्वेन निष्पत्तेरुपचाराभावात्। इत्थं विभावादितश्चर्वणाया निष्पत्तिरेव वास्तविकरत्यादेरंशस्य ततो निष्पत्तिरुपचरितेत्युक्त्या चर्वणाशस्यापि निष्पत्तिरुपचरितैवेति वक्तुमाह—**यद्यपीति**। अयमर्थः—रत्यादयस्तावदुद्दीपनविभावानुभावव्यभिचारिणामकार्यमित्युक्तमेव । अत एव रत्यादयश्चर्वणात्मकसाक्षात्काररूपतया परिणमन्तीति सिद्धान्तितम्। ततश्च रत्यादिरूपरसाभिन्न एव चर्वणात्मकः साक्षात्कारस्तथा रत्यादे· विभावाद्यकार्यतयैव चर्वणस्यापि विभावाद्यकार्यत्वमर्थसिद्धमिति यद्यपि रत्यादेरर्थः।

(वि, श) समाधाने **तथापीति** । परिणामरसास्वादचर्वणादिभावाद्यभिन्नतया निष्पन्ना। सा विभावादिज्ञानात् पूर्वं नास्तीति । किन्तु विभावादिज्ञानोत्तरमेव निष्पन्नेत्येवं कादाचित्कतया उपचरितेन कार्यत्वेन कार्यत्वमुपचर्यते इत्यर्थ। नचैवमन्यथासिद्धविभावादिज्ञानोत्तरभावित्वेन तत्कार्यत्वं चर्वणायाम् अवास्तवमेव तत् कथमुपचार इति वाच्यम् । रत्याद्यभिन्नतया कार्यत्वस्यैव वास्तवत्वात्। शुद्धायास्तस्या अवास्तवत्वमित्यभिप्रायात्।

(वि,ए) "तथाभिलाषसंसर्गयोग्यत्वविरहाच्चे"त्यादिना यत्तत् काव्यस्थशब्दावाच्यत्वमुक्तं तदुपात्तमग्रे करिष्यत इत्याह—**अवाच्यत्वादिकमिति**। आदिशब्दादलक्ष्यत्वादि इत्यत्र आदिपदादनुमेयत्वपरिग्रहः।

(लो, ए) अत्रैवमुक्तरूपे रसे स्वस्याश्चर्वणाया एवाऽभिन्ने। एवं च सहृदयानुभव एवात्र प्रमाणमिति पर्यवस्यति। तथाच नात्माश्रयदोषः।

(लो, ए) **यद्यपीत्यादि**—अयमर्थः समनन्तरोक्तप्रकारेण रसाभिन्ने चर्वणे यदाचित्कत्वाद् वस्तुनि व्यभिचारेण तस्य कार्यत्वं कादाचित्कत्वादेवोपचर्यते। तेन चर्वणस्यापरिचितेन कार्यत्वेन तदभिन्ने रसेपि कार्यत्वमुपचारादिति भावः। अस्य कादाचित्कत्वेपि न कार्यत्वमिति समनन्तरमेवोक्तम्। व्यञ्जननिरूपणे प्रागपरिच्छेदे।

---

1 'चर्वणस्यैव' (घ. पु०)।

2 'रसाभिन्नतया' (क. ग. च. ट. पु०)।

3 'उपचरितेन कार्यत्वेन' इत्यंशो नास्ति (ङ. ग. ट. पु०)।

[1]तस्य रसस्य आदिशब्दादलक्ष्यत्वादि। (ए) ननु[2] यदि मिलिता रत्यादयो रसास्तत्कथमस्य स्वप्रकाशत्वं कथं वा अखण्डत्वमित्याह (स, ऐ)

रत्यादि[3] ज्ञानतादात्म्यादेव यस्माद्रसो भवेत्।
'अतोऽस्य स्वप्रकाशत्वमखण्डत्वं च सिद्ध्यति ॥ ३१॥ (ह, ओ)

यदि* रत्यादिकं प्रकाशशरीरादतिरिक्तं स्यात् तदैवास्य स्वप्रकाशत्वं न सिद्ध्येत् + नच तथा, तादात्म्याङ्गीकारात्। यदुक्तम्—यद्यपि रसानन्यतया चर्वणा न कार्या तथापि कादाचित्कतया कार्यत्वमुपकल्प्य तदेकात्म्यनादिवासनापरिणतिरूपे रत्यादिभावेपि व्यवहार" इति। मुग्धादितादात्म्याङ्गीकारे चास्माकं सिद्धान्तशरण्यामधिशय्य दिव्यं वर्षसहस्रं प्रमोदनिद्रामुपेया."इति च*। [5]अभिज्ञोपि स प्रमात्रा वासनोपनीतरत्यादिवादा-

---

(स) मिलिता इति। विभावादिसाहित्येन समूहालम्बनविषया इत्यर्थः। तत् कथमस्य स्वप्रकाशत्वमिति—रत्यादेर्ज्ञानरूपत्वाभावात् ज्ञानस्यैव स्वप्रकाशत्वात्। मिलनकथनं च स्वरूपाख्यानमात्रम् एकैकत्राप्येवमाशङ्कासम्भवात्।

(वि, ह) ज्ञानतादात्म्यादिति। ज्ञानरूपतया परिणामादित्यर्थः।

(वि, क) यद्यपीति उक्तशङ्कासमाधानयोः प्राक्-कृतयोः सम्बन्धमाह—यदुक्तमिति। प्रागेव कृतव्याख्यानमिदम्। अनादिवासनेति—अनादिवासना

(लो, ऐ) ननु यदीति। स्व स्वप्रकाशत्व रत्यादीनां जडत्वादित्यर्थः।

(लो, ओ) रत्यादिरिति—अस्य रत्याद्यंशस्य यस्यापि "आमभूतमुखाकार-प्रकाशप्रतिमानत। ज्ञानाकारावभासित्वे सिद्धा स्यात् स्वप्रकाशता' इति। अस्यार्थः—ज्ञानाकारावभासित्वे नाममात्रं मुखाकारोऽपि प्रकाशते। तस्य प्रतिभानत्व गुणाकारस्यात् रत्याद्यंशोपि स्वप्रकाशः इति। ननु यदि चैतन्यस्य समानत्वेन जडस्य स्वप्रकाशता तदा प्रमातृभावमापन्नस्याऽन्तःकरणस्यापि स्वप्रकाशत्व स्यादिति चेन्नैवम्। तत्र हि त्रिगुणात्मके मनसि सत्त्वांशस्य रजस्तमोभ्यामसंपृष्टत्वम्। येनात्मनन्द-स्वप्रकाशांश वृत्तिरूपयते। नच तयो शबलत्वमपि तात्त्विक, तुच्छो तादात्म्यमिति, 'विमार्दकरणिजां नो बहिश्चिन्तया'।

+ प्रकाशशरीरात्—ज्ञानस्वरूपात्। अतिरिक्तमभिन्नम्।

1 तस्येत्यादि त्वाद्यन्त पाठ (ट ए पु नास्ति)।
2 ननिवि क. पु नास्ति।
3 रत्यादिज्ञानमिति समस्त पद (ग घ पु०)।
4 'तेति' (ग. पु०)।
* तारतम्यविचारान्तर्गत पाठः (ज ट ट पु नास्ति)।
5 तदुक्तं मुखिनेत्यादि (ब ग ट. प०)।

त्येन गोचरीकृत " इति च। (क, औ) ज्ञानस्य स्वप्रकाशत्वमनङ्गीकुर्वता-मुपरि वेदान्तिभिरेव पातनीयो दण्ड' । तादात्म्यादेव अस्याखण्डत्वम् । रत्यादयो हि प्रथममेकैकश प्रतीयमानाः सर्वेप्येकीभूता स्फुरन्त एव रसता-मापद्यन्ते । तदुक्तम्—

" विभावा अनुभावाश्च सात्विका व्यभिचारिण ।
प्रतीयमानाः प्रथम खण्डशो यान्त्यखण्डताम् ॥ इति (ख, अ)
परमार्थतस्त्वखण्ड एवाय वेदान्तप्रसिद्धब्रह्मतत्त्ववद् वेदितव्यः"इति
(ग, आ)

अथ- के ते विभावानुभावव्यभिचारिण' इत्यपेक्षाया विभावमाह—

रत्याद्युद्बोधका लोके विभावा काव्यनाट्ययोः ॥ ३२॥ (इ)

ये हि लोके रामादिगतरतिहा[1]सादीनामुद्बोधकारणानि सीतादयस्त एव

प्राक्तनी तत्त्वादिशून्या । तया रसादिरूपा परिणतिर्यस्य तादृशरूपे रत्यादिभागे विभा-वादिकार्यत्वव्यवहार इत्यर्थ । द्वितीय इति चेति पर्यन्त सम्वादवाक्यत्व बोध्यम् । तन्नाभिन्नोपीत्यादिक स्वप्रकाशनप्रदर्शनम् । रत्यादय इत्यादिपदात् विभावादिपरि ग्रह । तत्र विभावादे शब्दशक्त्यैव प्रतीति ।

रत्यादेस्तु ततो व्यञ्जनया समूहालम्बनरूपेति पूर्वापरविरोधेन बोध्यम् ।

(वि, स) **सात्त्विका व्यभिचारिण** इति । व्यभिचारिण एव सात्त्विका इत्यभेदेनाऽन्वय ।

(वि, ग) अखण्डताप्राप्तौ विमतिं निरस्यति—**परमार्थतस्त्विति** । ननु पूर्वाङ्कपरिच्छेदेन परमार्थताप्रदर्शनम् ।

ब्रह्मतत्त्ववदिति—खण्डाखण्डनानापदार्थानाम् अद्वैतभावनया अखण्डस्वरूप त्वात् ब्रह्मतत्त्वस्य इतिच इत्यन्त सम्वादवाक्यम् ।

(लो, औ) तादात्म्यानङ्गीकारे प्राचीनाचार्याणामिति शेष । यद्यपीत्यादौ तदे-वाम्मनीति पद तादात्म्यसूचकम् । गोचरीकृत इति चिदानन्दमयोय पुरुष इति वदुपचार ।

(लो,अ)अखण्डत्वे सम्मति दर्शयति—**तदुक्तमि**त्यादि । विभावा इत्यादि कारिकाया रत्यादिप्रकाशसुखचमत्कारा अखण्डैक्का अपि प्रकरणादवगेया ।

(लो, इ) **रत्यादी**ति—अनादिवासनान्तर्लीनस्य रत्यादे प्रकाशका ।

---

1 तारकार्चिह्नित पाठो न घ पु दृश्यते । किन्तु, 'ननु विभावादिभ्यो रग इत्युक्त के ते विभावाया इत्याह—यद्योऽर्था विभाव्यन्ते वागङ्गाभिनयात्मका । अनेन यस्मात्तेनय विभाव इति कीर्तित ' इत्येव पाठ दृश्यते ।

2 'रत्युद्बोध' (स च पु०)।

काव्ये नाट्ये निवेशिता: सन्तो विभाव्यन्ते आस्वादाङ्कुरप्रादुर्भावयोग्या: क्रियन्ते सामाजिकरत्यादिभावा एभि: इति विभावा उच्यन्ते । (घ)

तदुक्तं भर्तृहरिणा—

"शब्दोपहितरूपास्तान्[1] बुद्धेर्विषयता गतान् ।
प्रत्यक्षानिव[2] कसादीन् साधनत्वेन मन्यते ॥' इति । (ङ, ई)

तद्भेदावाह—

आलम्बनोद्दीपनाख्यौ तस्य [3]भेदावुभौ स्मृतौ ॥ ३३ ॥

स्पष्टम् । तत्र—

आलम्बन नायकादिस्तमालम्ब्य रसोदयात्[4] ॥ ३४ ॥

आदिशब्दात् नायिकाप्रतिनायिकादय: ।

(वि, घ) **विभाव्यन्ते** इति । रसप्रतीत्यर्थं विशेषेण भाव्यन्त इत्यर्थ । ननु प्रतीत्यर्थं कथं विशेषेण भाव्यन्ते तत्प्रतिपादनसामर्थ्य एव तथात्वौचित्यादित्यत आह—**आस्वादाङ्कुरे**ति । यत एभिर्विभावादिभि: सामाजिकरत्यादिभावा आस्वादाङ्कुर प्रादुर्भावयोग्या क्रियन्ते, अतो विशेषेण भाव्यन्त इत्यर्थ । अतो विभावा उच्यन्ते इत्यर्थ सामाजिकरत्यादिभावाना तथात्वकरण रामादिरत्यादीना च तत्रारोपात् बोध्यम् । स चारोपो वासनासहकृतैर्विभावादिभिर्व्यञ्जनयेति बोध्यम् । अत एवोक्त—वासनोपनीत-रत्यादितादात्म्येनेति । अस्या परिभाषाया योगारूढत्वादेतद्योगार्थस्यानुभावादौ सत्त्वेपि न तत्र प्रयोग इति प्रागप्युक्तम् ।

(वि, ङ) **शब्दोपहिते**ति—तान् प्रसिद्धान् कसादीन् श्रीकृष्णादिक्रोधस्य रौद्ररसस्थायिभावस्यालम्बनविभावान् शब्दोपहितरूपान् शब्दोपस्थाप्यान् प्रत्यक्षा निव सामाजिका मन्यन्ते । मन्यत इति पाठे तु सामाजिक । केन हेतुनेत्यत्राह—**साधनत्वेने**ति । शब्दोपहितत्वरूपेण प्रत्यक्षसाधनत्वेनेत्यर्थ । इदमेव विशेषण भावन सम्वादेन प्रदर्शितम् ।

(वि, च) **आलम्बन नायकादि**रिति नायिकाप्रकारे बोध्यम् । **नायिका**

(लो, ई) **शब्दे**ति—शब्दोपहितरूपान् काव्यरूपशब्दोपाधिना श्रवणात् तद् बुद्धिविषयतामापन्नाना साधनत्वेन साक्षाद्दायुद्बोधे मन्यन्ते सभ्या इति शेष ।

---

1 रूपाश्च इति (च छ पु०)।
2 'प्रत्यक्षमिव' (ग घ पु०)।
3 भावा (ङ पु०)।
4 रसोद्गमात् (क ख पु०)।

अत्र यो[1] यस्य रसस्य विभाव स तत्स्वरूपवर्णने वक्ष्यते (च, ङ)
तत्र नायकः—(छ)

त्यागी कृती कुलीन. सुश्रीको रूपयौवनोत्साही ।
[2]दक्षोऽ[3]नुरक्तलोकस्तेजोवैदग्ध्यशीलवान् नेता ॥ ३५ ॥ ×

दक्ष. क्षिप्रकारी, शील—सद्वृत्तम्। एवमादिगुणसपन्नो नेता नायको भवति। तद् भेदानाह —

धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च ।
धीरप्रशान्त इत्ययमुक्तः प्रथमं[4] चतुर्भेदः ॥ ३६ ॥ (ज)

स्पष्टम् ।
तत्र धीरोदात्तः—

अविकत्थन क्षमावानतिगम्भीरो महासत्त्व' ।
स्थेयान् (ऊ) निगूढमानो धीरोदात्तो दृढव्रतः कथितः ॥ ३७ ॥

अविकत्थनोऽनात्मश्लाघाकर + महासत्त्वो—हर्षशोकाद्यनभिभूत निगूढमानो विनयच्छन्नगर्व * । दृढव्रत —अङ्गीकृतनिर्वाहक । यथा—रामयुधिष्ठिरादि ।

प्रतिनायकादय इति नायकशब्दारे बोध्यम्। प्रतिनायिका चोपनायिका, सा च शब्दाराभासे। एव नायिकाशब्दाराभासे उपनायकोपि बोध्य ।

(वि, छ) तत्र नायको—नायकलक्षणमाहेति शेष ।

(वि, ज) प्रथमं चतुर्भेद इति—पश्चात्तु धीरोदात्तादीनाम् अपि दक्षिणधृष्टत्वादिभेदस्य वक्ष्यमाणत्वात् ।

(लो, उ) प्रतिनायकादीत्यादिशब्देन विकृतवेशा व्याघ्रादय । वक्ष्यत इति । दृष्टैव परिच्छेदे ।

(लो, ऊ) स्थेयान्—स्थिरतर ।

× कृती—कर्मकुशल । अनुरक्तलोक —अनुरक्त लोक यस्मिन् स । तेजो वैदग्ध्यवान् । (द्वन्द्वान्ते श्रूयमाण शब्द प्रत्येकमनुगम्यते इति न्यायेन) तेजस्वी वैदग्ध्यवान् (चातुर्ययुक्त) शीलवांश्च ।

+ अविकत्थन —विकत्थना, आत्मश्लाघा, तद्रहित ।

1 'यो' इत्यस्य, 'रसस्य' इत्यनन्तर पाठ (क स पु०)।

2 'कृती कृतज्ञ ' इत्यधिक पाठ० (ग. पु०)।

3 'नुरक्त' (च पु०)।

4 'मथ' इति (क स पु०)।

* तारकित पाठो ग पु नास्ति।

अथ धीरोद्धतः—

मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः ।
आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः ॥ ३८ ॥ *

यथा—भीमसेनादिः ।

अथ धीरललितः—

निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात् ॥ ३९ ॥

कला नृत्यादिका[1] । यथा रत्नावल्यादौ वत्सराजादिः ॥

अथ धीरप्रशान्तः—

सामान्यगुणैर्भूयान् द्विजादिको धीर[2]प्रशान्तः स्यात् ॥४०॥ (झ, ञ) * यथा मालतीमाधवादौ—मालतीमाधवादिः ।

एषां च शृङ्गारि[3]रूपत्वे भेदानाह—

एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोडशधा ॥ ४१ ॥ (त)

तत्र तेषां धीरोदात्तादीनां प्रत्येकं[4] दक्षिणधृष्टानुकूलशठत्वेन षोडशप्रकारो नायकः ।

एषु त्वनेकमहिला[5]समरागो दक्षिणः कथितः ॥४२॥(ट, ड) द्वयोस्त्रिचतुरप्रभृतिषु नायिकासु[6] तुल्यानुरागो दक्षिणनायकः ।

(वि, झ) सामान्यगुणैरिति—धीरोदात्तादिनयसाधारणगुणैर्भूयान् महानित्यर्थः ।

(वि, ञ) षोडशधेति—धीरोदात्तादीना चतुर्णां दक्षिणत्वादिचातुर्गुण्येन षोडशत्वम् ।

(वि, ट) अनेकमहिला—इति व्याचष्टे द्वयोस्त्रिचतुरिति ।

(लो, ञ) सामान्यगुणा—मन्त्र्यादिकधनित्वमादय.

(लो, ट) एषु—दक्षिणादिषु नायकमध्ये ।

---

* प्रचण्डः—उग्रस्वभाव । अहङ्कारदर्पभूयिष्ठः अहङ्कारदर्पो भूयिष्ठो यस्य सः । धीरैः पण्डितैः कथित ।

1 'त्यादिका' इति (क. पु०) ।
2 'प्रेति नास्ति (ग. घ. पु)
3 'शृङ्गारादिरूपत्वे (क च. पु.)
4 'दक्षिणधृष्टानुकूलशठत्वेन' (क., ग., पु.)
5 'महिलासु' (ट. ड. पु.)
6 'नायिकासु' (इति नास्ति

यथा—स्नाता तिष्ठति कुन्तलेश्वरसुता, वारोऽद्य राजस्वसु-
र्धूर्ते रात्रिरियं जिता कमलया देवी प्रसाद्याद्य च ।
इत्यन्तःपुरसुन्दरी[1] प्रति मया विज्ञाय विज्ञापिते
देवेनाप्रतिपत्तिमूढमनसा द्वित्रा स्थित नाडिकाः ॥ (ठ)

कृतागा अपि निःशङ्कस्तर्जितोऽपि न लज्जितः ।
दृष्टदोषोऽपि मिथ्यावाक् कथितो धृष्टनायकः ॥ ४३ ॥ (ड)

यथा मम—
शोण वीक्ष्य मुख विचुम्बितुमह यात समीप, तत
पादेन प्रहृत तया, सपदि त धृत्वा सहासे मयि ।
किञ्चित् तत्र विधातुमक्षमतया बाष्प त्यजन्त्या सखे !
ध्यातश्चेतसि कौतुक वितनुते कोपोपि वामभ्रुव ॥ (ढ, ल)

अनुकूल एकनिरतः ॥ ४४ ॥

[3]एकस्यामेव नायिकायामासक्तोऽनुकूलनायक । यथा—

(वि, ठ) स्नाता तिष्ठतीति—अन्तःपुरचरजनस्य कस्मिंश्चिदियमुक्तिः । अनेकपत्नीसम्भोगार्हा इयं रात्रिरिति तत्कर्मनियुक्तस्य राज्ञे निवेदनम् । श्लोकार्थः—स्नाता, ऋतुस्नाता। वार तत्सम्भोगनियतवासर । कमलया तन्नाम्न्या देव्या । देवी—कृताभिषेका । मानिन्यास्तस्या अद्यावश्य प्रसादनम् । द्वित्रा इति । सर्वासु अनुरागसाम्येन कस्याप्युपेक्षाऽनर्हत्वात् अप्रतिपत्त्या कर्तव्यनिर्णयाभावेन मूढमनस्कत्वेन द्वित्रादिदण्डस्थिति ।

(वि, ड) कृतागा अपीति—आगोपराध । मिथ्यावाक् कृतस्यापि मिथ्यात्ववादी ।

(वि, ढ) शोणं वीक्ष्येति—रोषारुणमुखीं प्रियां चुम्बितुं गतस्य तया प्रहर्तुमुद्यत पाद धृत्वा किञ्चित् कर्तुमक्षमीकृता रुदतीं तां दृष्ट्वा हसितवतो नायकस्य सख्यो वृत्तान्तकथनमिदम् ।

अत्र नायिकाक्रोधवशात् नायकस्य कृतागस्त्वसिद्धिः ।

(लो, ल) शोणमिति—विचुम्बितुं समीपं यातोऽनुनयादिकमकृत्वापीति भावः ।

---

1 'सुन्दरीमिति' (च ज पु)

2 'तस्या सान्द्रविलेपनस्तनयुगप्रश्लेषमुद्राङ्कित
किंचित्तरणानतिव्यतिकरव्याजेन गोपाय्यते ।
इत्युक्ते च तदित्युदीर्य सहसा तत्सम्रमार्तुं मया
सा श्लिष्टा रभसेन तन्मुखवशात्तन्व्या च तद्विस्मृतम् ॥
इति परकीयमुदाहरण (ग घ पु)।

3 एकस्यामित्यादिव्याख्यान ट ड पुस्तकयोर्न दृश्यते ।

अस्माकं सखि! वाससी न रुचिरे, ग्रैवेयकं नोज्ज्वल
नो वक्त्रा गतिरद्धतं न हसितं, नैवास्ति कश्चिन् मदः।
किन्वन्येपि जना वदन्ति सुभगोऽप्यस्याः प्रियो[1] नान्यतो
दृष्टिं निक्षिपतीति विश्वमियता मन्यामहे दुःस्थितम् ॥ (वि, ण)

शठोयमेकत्र बद्धभावो यः।
दर्शितबहिरनुरागो विप्रियमन्यत्र गूढमाचरति ॥ ४५ ॥

यः* पुनरेकस्यामेव नायिकायां बद्धभावो द्वयोरपि नायिकयोर्बहिर्दर्शितानुरागोऽन्यस्यां नायिकायां गूढं विप्रियमाचरति स शठनायकः। *

यथा—[2]'शठोऽन्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसा
यदाश्लिष्यन्नेव प्रशिथिलभुजग्रन्थिरभवः।
तदेतत् क्वाचक्षे घृतमधुमयत्वद्बहुवचो
विषेणाघूर्णन्ती किमपि न सखी मे गणयति ॥ (वि, त)

एषां च त्रैविध्यादुत्तममध्यमाधमत्वेन।

(वि, ण) अस्माकं सखीति—पश्यो सुभगाया सख्या उक्तिरियम्। वस्त्रोज्ज्वल्यादिकं सौभाग्यहेतुर्मम नास्ति। किन्तु न केवलमहमन्येपि जना वदन्ति अस्याः पतिरन्यतोऽन्यस्या नायिकाया दृष्टिं न निक्षिपतीति। विश्वम्—एतद् विश्ववर्ति स्त्रीजनं दुःस्थितं, मयि असूयया मदेनेदृशा सौभाग्याल्पत्वेन वा दुःस्थितं वयं मन्यामहे। पतिः कीदृशः, सुभगोपि सौन्दर्येणान्यनायिकाभिलषणीयत्वरूपसौभाग्यवानपि इत्यर्थः।

(वि, त) शठोऽन्यस्या इति—नायिकाया विप्रियकारिणं नायकं भर्त्सयन्त्या सख्या उक्तिरियम्। हे शठ! खल! मम सखीम् आश्लिष्यन्नेव त्वं यदन्यस्या नायिकाया काञ्चीमणिरणितशब्दमाकर्ण्य सहसा प्रशिथिलभुजग्रन्थि (बाहुवेष्टनं) अभवः तदेतत् क्व जने आचक्षे। अतो मे सखी घृतमधुमयेन मिश्रितघृतमधुरूपेण त्वदीयबहुचाटुवचोविषेणाघूर्णन्ती किमपि कर्तव्यं न गणयतीत्यर्थः। मिश्रितघृतमधुनी हि आपातमधुरेपि विषत्वं प्राप्नुतः।

(वि, थ) एषां चेति—एषामुत्तममध्यमाधमत्वेन त्रैविध्यादित्यन्वयः। चत्वारिंशदिति षोडश त्रैगुण्येन अष्टचत्वारिंशत्।

(लो,प) अन्यतः अन्यस्या मां विनेत्यर्थः। दुःस्थितं दुःस्थितं मन्यामहे। किन्तु मामेव सुस्थितामिति भावः। ग्रैवेयकं, कण्ठाभरणम्, मदोपि यौवनाद्यहङ्कारजनितः गर्वोपि नैवास्ति।

---

1 'पति' (क. ख ग. घ)
* तारकित पाठो नास्ति (ग. घ.)
2 'शठेऽन्यस्याः' (च. छ ज.)

उक्ता नायकभेदाश्चत्वारिंशत् तथाष्टौ च ॥४६॥ (थ)

सर्वेषामुक्तषोडशभेदानाम् ।

अथ प्रसङ्गादेषां सहायानाह (द, ऐ)

दूरानुवर्तिनि स्यात्तस्य प्रासङ्गिकेतिवृत्ते तु ।
किञ्चित्तद्गुणहीनः सहाय एवास्य पीठमर्दाख्यः ॥४७॥

तस्य नायकस्य बहुव्यापिनि प्रसङ्गसङ्गते[1] इतिवृत्ते अनन्तरोक्तैर्नायकसामान्यगुणैः (ओ) किञ्चिदूनः पीठमर्दनामा सहायो भवति । यथा रामचन्द्रादीनां[2] सुग्रीवादयः. (ध)।

अथ शृङ्गारसहायाः[3]—

शृङ्गारेऽस्य सहाया विटचेटविदूषकाद्याः[4] ।
भक्ता नर्मसु निपुणाः कुपितवधूमानभञ्जनाः शुद्धाः ॥४८॥ *

[5]आदिपदान्मालाकाररजकताम्बूलिकगान्धिकादयः ।

तत्र विटः—

संभोगहीनसम्पद् विटस्तु धूर्तः कलैकदेशज्ञः ।
वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम् ॥४९॥(न)+

(वि, द) अथ प्रसङ्गादिति—अत्र एषामित्यनेन नायकमात्रमेव परामर्शो नतु प्रकान्तशृङ्गारीयाष्टचत्वारिंशत एव । अत एव रामस्य सुग्रीवः सहायो दर्शयिष्यते ।

(वि, ध) दूरानुवर्तिनीति व्याचष्टे—तस्येति दूरानुवर्तिनि इत्यस्य व्याख्या बहुव्यापिनीति बहुदेशव्याप्यसाध्ये इत्यर्थ । प्रसङ्गसङ्गते—दैवेन उपस्थित इतिवृत्ते इत्यन्ते । किञ्चित् तद्गुणहीन इत्यस्यार्थमाह—अनन्तरेति—अनन्तरोक्ते पूर्वोक्ते ।

(वि, न) मधुर इति—मधुरभाषीत्यर्थः । गोष्ठ्या शृङ्गारीयगोष्ठ्याम् ।

(लो, ऐ) प्रसङ्गादिति । एषा हि सहाययुक्तत्वेन कार्यमारित्वेऽधिकरणपरिपोष । एवमन्यत्र ।

(वि, ओ) नायकसामान्यगुणैस्त्यागादीभि ।

* भक्त —अनुरक्त —नर्मसु परिहासादिषु निपुणा । कुपितानां वधूनां मानिनीनां मानभञ्जना मानभङ्गे क्षमा ।

+ सम्भोगेति । सम्भोगेन बहुव्ययेन हीना विनाशिता सम्पद् येन स । अतोऽयं लौकिकार्थं अपरमार्थयति । कलायाः एकदेशज्ञः । वेशो वेश्यादाये ये उपचारा व्यवहारा तेषु दक्षः ।

1 'प्रसङ्गेनेतिवृत्ते' (इति क ग. पु)
2 'रामस्य सुग्री' (इति ट. ड पु)
3 'शृङ्गारविषये सहाया' (इति क ख. पु.)
4 'या सु' (इति क. ख.)
5 'आदित्वादिपदात्कि' च. छ पु. नास्ति ।

चेट* प्रसिद्ध एव । (प)

कुसुमवसन्ताद्यभिधः कर्मवपुर्वेशभाषाद्यैः ।
हास्यकरः कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञ ॥५०॥ (औ, फ)

*स्वकर्मा भोजनादि । अर्थचिन्तन[1]सहायमाह (ब)

[2]मन्त्री स्यादर्थानां चिन्तायाम् ॥ ५१ ॥

अर्थांस्तन्त्रावापादय (भ)

यत्त्वत्र सहायकथनप्रस्तावे 'मन्त्री स्व' चोभय चापि सखा तस्यार्थचिन्तने' इति केनचिल्लक्षणं कृतम्, तदपि राज्ञोऽर्थचिन्तनोपायलक्षणप्रकरणे लक्षितव्यम् । न तु सहायकथनप्रकरणे । नायकस्य 'अर्थचिन्तने मन्त्री सहाय' इत्युक्तेऽपि नायकस्यार्थत एव सिद्धत्वात् । (म) यद्यप्युक्तम् 'मन्त्रिणा ललितः शेषा । मन्त्रिस्वा'यत्तसिद्धय' इति, तदपि स्वलक्षणकथनेनैव लक्षितस्य

(वि, प) **चेट प्रसिद्ध** इति—चेटीपुत्र इत्यर्थ ।

(वि, फ) विदूषकमाह—**कुसुमेति** । कर्मादिभिर्हास्यकर इत्यन्वय । कर्मणा, वपुषा, वेशेन, वासनादिना भाषार्थं सर्वथा हास्य जनयति ।

(वि,ब) रसीयनायकसहायकथनप्रसङ्गादन्यत्रापि सहायमाह—**अर्थचिन्तने**ति।

(वि, भ) **तन्त्रावापे**ति । तन्त्र राजकृत्य तस्य आवापो योग्यायोग्यानुष्ठानम् । तस्मिन् अर्थे मन्त्री सहाय इत्यर्थ ।

(वि, म) स्व चेति–स्व राजा तस्य राज्ञ । केनचिदिति लक्षण सहायज्ञापनम् । अत्र स्वस्यापि सहायत्वेन कथनात् पूर्वस्माद् भेद । **सहायकथनप्रकरणे** इति–स्वस्य स्वसहायत्वात् सहायताया भेदघटितत्वात् । नन्वेव तेन चिन्ता न कियतामित्याह–**नायकस्ये**ति ।

(वि, य) **मन्त्रिणे**ति—ललितो धीरललितस्तादृशो राजा मन्त्रिणैवार्थसाधक इति शेष , स्वस्य शृङ्गारनिरतत्वात् । शेषा धीरोदात्तधारोद्धतादय । **स्वलक्षण-**

(लो, औ) **कुसुमे**ति—कुसुमाभिधो विदूषको रसालकादि । वसन्ताभिध वसन्तकमाधवादि ।

(लो, भ) **यत्त्वत्रे**ति—यत्त्वेत्यादेर्गतार्थत्वमित्यनेनान्वय । तस्य मन्थस्या-

---

* तारकिताशो ट ठ पु० नास्ति ।

1 'चिन्तने' इति पृथक् पदम् (क. पु०)।

2 'मन्त्री स्यादर्थचिन्तायामर्थांस्तन्त्रावापादय' इति श्लोकाकार, 'तद्वदवरोध' इति गद्याकारस्थ पाठ (ख ग घ पु०)।

3 'स्वस्योभयस्यापि' (ग. पु०)।

4 'मन्त्र्यायत्त' इति (च ङ पु०)।

धीरललितस्य मन्त्रिमात्रायत्तार्थचिन्तनोपपत्तेर्गतार्थम् । नचार्थचिन्तने तस्य मन्त्री सहाय । किन्तु स्वयमेव सम्पादक । तस्यार्थचिन्तनाद्यभावात् (य) (अ) अथान्त पुरसहाया —

तद्वदवरोधे ॥ ५२ ॥

वामनषण्डकिरातम्लेच्छाभीरा शकारकुब्जाद्या ।
मदमूर्खताभिमानी दुष्कुलतेश्वर्यसयुक्त[1] ।
सोयमनूढाभ्राता * राज्ञ श्याल शकार इत्युक्त ॥५३॥ (र, आ)

आद्यशब्दान्मूकादय । तत्र षण्डकिरातकुब्जादयो यथा रत्नावल्याम्—

नष्ट वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा—
मन्त कञ्चुकिकञ्चुकस्य विशति ग्रासादय वामन ।

कथनेनेति । धीरललितलक्षणस्थनेनेत्यर्थ । 'निश्चिन्तो मृदुरनिश कलापरो धारलालित स्यादिनि धीरललितलक्षणे निश्चिन्तेत्वेनार्थचिन्तनस्य मन्त्रिमात्रनिष्पत्वसिद्धस्य मन्त्रिण सहायतास्थन गतार्थमित्यर्थ । धीरललितस्य यो मन्त्री तस्य स्वयमवार्थचिन्तकत्वम्। नतु स्वचिन्तने तस्य सहायत्वम्। स्फुटमेवाह—नचार्थचिन्तनमिति—तस्यार्थचिन्तनाद्यभावादित्यत्र तस्य धीरललितस्य। अय मन्त्री स्यादर्थाना चिन्तायामिति सूत्रस्य परभाग ।

(वि, र) शकारलक्षणमाह—मदेति । दुष्कुलता ऐश्वर्यं च ताभ्या सयुक्तोपि मदमूर्खताभ्यामभिमानीत्यर्थ ।

(वि, ल) नष्ट वर्षवरैरिति—राज्ञो वाग्विशालात आगतमेक महावानर दृष्ट्वा अन्त पुरस्थनपुसकादीना भीतिक्रियावर्णनमिदम् । कञ्चुकस्य सर्वाङ्गव्यापकलम्बमान वस्त्रस्यान्तरित्यर्थ । निजस्य नाम्न इति कृ विक्षेप इति धातुना किरातपदस्य साधितत्वाद् स्वस्य पर्यन्तविशीर्णत्व कृतमित्यर्थ । दुष्ट्वा न पलायिता । किन्तु नीचतयैव वानर

यमर्थ । सहायकथनप्रस्तावे मन्त्रिण एव सहायत्वकथन युक्तम् नतु आत्मन उभयस्य वा । आत्मन एव आत्मसहायत्व विरुद्धम्। किन्तु राजा केनार्थचिन्तन कुर्यादित्यपेक्षाया मेव क्वचिन् मन्त्रिणा क्वचिदात्मना क्वचिदुभयेनेति वक्तु युक्तम् । धीरललितस्य निश्चिन्तत्वादिरूपकथनेन मन्त्रिमात्रायत्तार्थचिन्तनमुपपद्यते । किञ्च तदप्यर्थाचन्तनोपायप्रकरण एव लक्षितव्यम् नतु सहायकथनप्रकरणे । तस्य धीरललितस्य नच सहाय स । मन्त्रिण सहायत्व धीरललितस्याप्यर्थचिन्तनप्रसङ्गात् ।

(लो, आ) शकारस्वरूपमाह—मदेति—मदो गर्व , मद्यविकारो वा ।

---

* अनूढाया अपरिणाताया उपभोग्याया स्त्रिया भ्राता ।

1 'सपन्न' इति (च छ पु०)।

पर्यन्ताश्रयिभिर्निजस्य सदृश नाम्न (इ) किराते कृत
कृत्वा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किन ॥' (ल) ×
शकारो मृच्छकटिकादौ प्रसिद्ध (च) अन्येपि यथादर्शन ज्ञातव्या ।

अथ दण्डसहाया —

दण्डे सुहृत्कुमाराटविका सामन्तसैनिकाद्याश्च ॥ ५४ ॥

(श) दुष्टनिग्रहो दण्ड । स्पष्टम् । [1]अथ धर्मसहाया —

ऋत्विक् पुरोधस. स्युर्ब्रह्मविदस्तापसास्तथा धर्मे ॥ ५५ ॥

ब्रह्मविदो वेदविद आत्मविदो वा ।

तत्र[2]—

उत्तमा पीठमर्दाद्या ॥ ५६ ॥

आद्यशब्दान्मन्त्रिपुरोहितादय ।

कर्तृके आत्मकर्मके ईक्षणे अशङ्किन शङ्कारहिता सन्त शनैर्यान्तीत्यर्थ ।

(घि, च) मृच्छकटिक नाटकविशेष ।

(वि, श) आटविकाना दण्डसहायत्वम् । दण्डनीयस्य अन्यस्य पलायितस्य प्रदर्शकत्वाद्दण्डनीयविपक्षराज्याटव्या स्थितत्वात्तद्वृत्तान्तज्ञातत्वाच्च । सामन्त सेनापति ।

(लो, इ) निजस्य नाम्न अन्तेवासित्वस्य ।

× वर्षवरै पण्डै कर्तृभि पण्डो वर्षवरस्तु यौ इत्यमर । मनुष्येषु या गणना तस्या अभावात् स्त्रीत्वपुस्त्वान्यतरप्रतीत्यादनरूपमनुष्यत्वाभावात् एतेषा मनुष्यगणना भाव । अपा लज्जाम् अपास्य त्यक्त्वा नष्टम् अन्तर्हितम् । अय पुरोवर्ती वामन त्रासात् (वानरादितिशेष) कञ्चुकिकञ्चुकस्य कञ्चुकिन सर्वाङ्गव्यापकत्वस्य अन्त मध्यभागे विशति । पर्यन्ताश्रयिभि —पर्यन्त समीपभागम् आश्रयन्तीति समीपवर्तिभि इत्यर्थ । किराते निजस्य नाम्न सदृश युक्त कृतम् आचरितम् । कृ विक्षेपे इत्यस्मात् । इगुपधज्ञा प्रीकिर क ' इति कप्रत्यये किर इति रूपम् । अतन्ति सतत गच्छन्तीति अना (पचाद्यच्) किरथ ते अताधेति किराता इति किरातनाम्नो व्युत्पत्ति । तस्य सदृश सिद्धिसतया इतस्ततो भ्रमणमित्यर्थ । आत्मेक्षणाशङ्किन —आत्मन यत् ईक्षण वानरकर्तृक दर्शन तत्र अशङ्किन शङ्कारून्या नीचतयैव स्वभावस्वर्गतेऽपि पुन सवापारेण शनै मन्द मन्द यान्ति ।

1 'अथ—या' (इति क पु नास्ति)

2 'अत्र च' (इति क पु)
'तत्र च (इति ग घ पु)
'तत्र' इत्यादि , 'लक्षणमाह' इत्यन्त पाठ (ट ड ढ पु नास्ति)

मध्यौ विटविदूषकौ ।
तथा शकारचेटाद्या अधमाः परिकीर्तिताः ॥ ५७ ॥

आद्यश्चन्द्रात्तास्मूलिकगान्धिकादयः । अथ प्रसङ्गादूतानां विभागगर्भं लक्षणमाह (ई) ।

निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः ।
कार्यप्रेष्यस्त्रिधा दूतो दूत्यश्चापि तथाविधाः ॥ ५८ ॥

तत्र कार्यप्रेष्यो दूत इति लक्षणम् ।

तत्र—

उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम् ।
सुश्लिष्टं कुरुते कार्यं निसृष्टार्थस्तु स स्मृतः ॥ ५९ ॥ (उ)

उभयोरिति—येन प्रेषित यदन्तिक प्रेषितश्च ॥

मितार्थभाषी कार्यस्य सिद्धिकारी मितार्थकः ।
यावद्भाषितसंदेशहारः सन्देशहारकः ॥ ६० ॥ (ऊ)

अथ सात्त्विका नायकगुणाः—(ए)

शोभा विलासो माधुर्यं गाम्भीर्यं[1] धैर्यतेजसी ।
ललितौदार्यमित्यष्टौ सत्त्वजा पौरुषा गुणाः ॥ ६१ ॥ (ऋ)

तत्र—शूरता दक्षता सत्यं महोत्साहोऽनुरागिता ।
नीचे घृणाऽधिके स्पर्द्धा यतः शोभेति तां विदुः ॥६२॥

तत्रानुरागिता यथा—(ऐ)

अहमेव मतो महीपतेरिति सर्वे प्रकृतिष्वचिन्तयत् ।

(वि,प) सात्त्विका नायकगुणा इति । सत्त्व बल बलवन्नायकगुणा इत्यर्थ ।

(वि, स) यतः शोभेति—यतो बलात् शोभालक्षणेन अनुरागितोक्त । तामुदाहरति—अहमेवेति ।

(वि, ह) रघौ अजवर्णनमिदम् । प्रकृतिषु अमात्येषु मध्ये सर्व एव इत्यचिन्तयत् कि तत् इत्यत्राह—अहमेवेति । मत सम्मत । अस्य अजस्य । विमानना

(लो, ई) विभागगर्भम्—विभागस्य गर्भे स्थितम् ।

(लो, उ) भावमभिप्रायम् । सुश्लिष्ट सुशोभनम् । उन्नीय ऊहित्वा ।

(लो, ऊ) मितार्थभाषी अल्पभाषी । यावदिति प्रेरकेण यावद् भाषितस्य सन्देशस्य हार ।

(लो, ऋ) सत्त्व गुणविशेष । सत्त्वजा तदुद्भवा सत्त्ववता नायकाना गुणा इत्यर्थ ।

---

1 'धैर्यं गाम्भीर्यतेजसा' इति (ग घ)

उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित् ॥

एवमन्यत्रापि[1]। अथ विलास —(ङ)

धीरा दृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः ॥६३॥ (क)

यथा—दृष्टिस्तृणीकृत-जगत्-त्रय-सत्त्वसारा

धीरोद्धता नमयतीव गतिर्धरित्रीम्।
कौमारकेपि गिरिवद्गुरुता दधानो
वीरो रसः किमयमेत्युत दर्प एव[2] ॥ (ख)

संक्षोभेष्वप्यनुद्वेगो माधुर्यं परिकीर्तितम् ॥६४॥ +

उह्यमुदाहरणम् (ग)

भीशोककोधहर्षाद्यैर्गाम्भीर्यं निर्विकारता ॥६५॥ (घ)

अवज्ञा अपमानम्। निम्नगा नद्य तासा सर्वासामेवोदधिना जलग्रहणेन कृतादरत्वात्।

(वि, क) धीरेति—विलासे सात्त्विके गुणे सति धीरेत्यादिक भवतीत्यर्थ ।

(वि, ख) दृष्टिस्तृणीकृतेति—कुशमवलोक्य रामचन्द्रेण वर्णनमिदम्। तृणीकृतो जगत्त्रयस्य सत्त्वाना बलाना सार प्रकृष्टो भागो यया । अस्य कुशस्य दृष्टिस्तादृशी। स्फुटमन्यत्।

(वि, ग) ऊह्यमुदाहरणमिति—

'त्यजतो मङ्गलक्षौमे चीरे च प्रतिगृह्णत ।
दद्दशुर्विस्मितास्तस्य मुखराग समा जना ॥'

इत्युदाहरणम्। अत्र हि मङ्गलक्षौमे गृह्णत चीरे प्रतिलक्षीकृत्य त्यजतश्च रामस्य मुखराग विस्मिता जना समान ददृशु इत्यनेन वनवासार्थं चीरग्रहण-सक्षोभेपि मङ्गलक्षौमग्रहणवद् अनुद्वग ।

(वि, घ) भीशोकेति। अत्र भयशोकयो प्रवेशात् माधुर्यत कियान् भेद । आहूतस्येत्यादिक तु माधुर्यस्याप्युदाहरण सभवतीति बोध्यम्। गाम्भीर्यस्य माधुर्यासकीर्णमुदाहरण तु—[3]

योऽविकल्पमिदमर्थमण्डल
पश्यतीश ! निखिल भवद्वपु ।

---

* धीरा उद्धता सदर्पा गति पादन्यास धरित्रीं पृथिवी नमयतीव। कौमारकेपि शैशवेपि गिरिवत् गुरुता भारवत्त्व दधान अय बाल किं वीरो रस उत दर्प एति मूर्तिमान् वीरो रस अहकारो वा आगच्छति।

+ सक्षोभेषु—उद्वेगकारणेषु विकारहेतुषु सत्सु।

1 'मन्यदपि' (ख ग घ)

2 'एष' (च छ)

यथा—'आहूतस्याभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोप्याकारविभ्रमः ।'

* व्यवसायादचलनं धैर्यं विघ्ने महत्यपि ॥ ६६ ॥ +

यथा—श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्
हरः प्रसख्यानपरो बभूव ।
आत्मेश्वराणां नहि जातु विघ्ना
समाधिभेदप्रभवो भवन्ति ॥ (ङ)

अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत् ।
प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् ।
वाग्वेशयोर्मधुरता तद्वच्चङ्कारचेष्टितं ललितम् ।
दानं सप्रियभाषणमौदार्यं शत्रुमित्रयोः समता ॥ ६७ ॥

एषामप्युदाहरणान्यूह्यानि । (च)

आत्मपक्षपरिपूरिते जगत्
त्यस्य नित्यसुखिन कुतो भयम् ॥ इति ।

इय हि तपस्यत परमेश्वरेण भीषितस्य कस्यचिदुक्ति । अविकल्प नि सशयम् । निखिलमर्थमण्डल यो भगवद्वपु स्वरूप पश्यति । आत्मपक्षेण भवता परिपूरिते जगति अस्य कुतो भयमित्यर्थ । यथा वा "न खल्वनिर्जित्य रघु कृती भवान्" इति इन्द्रेण भीषितस्य रघोरुक्ति ।

(वि, ङ) श्रुताप्सरोगीतिरिति—हरस्य समाधिभङ्गार्थमप्सरोभिर्गीयमानेऽपि तस्य समाधिभङ्गो माभूदिति पूर्वार्द्धार्थ । तत्र प्रसख्यान समाधि । अत्रार्थान्तरन्यासमाह—आत्मेश्वराणामिति । आत्मा धृतिस्तदीश्वराणा स्वायत्तधृतीनामित्यर्थ । 'आत्मा यत्नो धृतिर्बुद्धि स्वभावो ब्रह्मवर्त्म च' इति कोष । जातु कदाचित् ।

(वि, च) एषामप्युदाहरणान्यूह्यानि—तत्र तेजस उदाहरण यथा—

'पुरोजन्मा नाथप्रभृति मम राम पुनरह
न पुत्र पौत्रो वा रघुकुलभुवा च क्षितिभुजाम् ।
अधीर धीर वा कलयतु जनो मामयमहो
मया बद्धो दुष्टद्विजदमनदाक्षापरिकर ॥

+ महति विघ्ने उपस्थितेऽपि व्यवसायात् उद्योगात् अचलन धैर्यम् ।'

× परेण शत्रुणा प्रयुक्तस्य अधिक्षेपस्य निन्दावादस्य अपमानादेश्च प्राणात्यये जीवननाशसम्भावनेऽपि यत् असहनम् ।

* एतच्चिह्नान्तर्गत पाठ ✦ एतच्चिह्नान्तर्गतपाठानन्तर दृश्यते (ग घ ङ)

अथ नायिका त्रिविधा स्वान्या साधारणी[1] स्त्रीति ।
नायकसामान्यगुणैर्भवति यथासम्भवैर्युक्ता ॥६८॥ (छ)

[2]नायिका पुननायकसामान्यगुणैस्त्यागादिभिर्यथासम्भवैर्युक्ता भवति। सा च स्वस्त्री, अन्यस्त्री, साधारणस्त्रीति त्रिविधा[3] । तत्र स्वस्त्री—

विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया ॥६९॥(ज)

यथा—"लज्जापज्जत्तपसाहणाइं परतन्तणिप्पिवासाइं ।
अविणअदुम्मेहाइं धन्नाणं घरे कलत्ताइं ॥ (रू, ऋ)

सापि कथिता त्रिविधा[4] मुग्धा मध्या प्रगल्भेति ॥ ७० ॥ (ज,ल)

इयं परशुरामेणाऽधिक्षिप्तस्य लक्ष्मणस्य उक्तिः । ललितोदाहरणं यथा—

"प्रसादे वर्तस्व प्रकटय मुदं संत्यज रुषम्
प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः ।
निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं
न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः ॥" इति ।

अत्र हि कामिनो वाङ्मधुरता शृङ्गारचेष्टा च । औदार्योदाहरणं यथा—

"एते वयममी दाराः कन्येयं कुलभूषणा ।
व्रत केनार्थिनो यूयमनास्था बाह्यवस्तुषु ।"

इति सप्तर्षीन् इति हिमालयस्योक्तिः ।

(वि, छ) नायिकाप्रभेदमाह—**अथे**ति—स्वान्ययोरपि स्त्री इत्यस्यान्वयः ।

(वि, ज) **विनयार्जवादी**ति । एतादृशगुणरहिता तु स्वस्त्री अपि नोपक्रान्त-[5]शृङ्गारविभावः; किन्तु तदाभासविभाव एवेति बोध्यम् ।

(वि, झ) **लज्जाप** इति—'लज्जापर्याप्तप्रसाधनानि परचिन्तानिष्पिपासानि । अविनयदुर्मेधांसि धन्याना गृहे कलत्राणि ।' इति संस्कृतम् । पर्याप्तप्रसाधनं पर्याप्तवासितालङ्कारः । परचिन्ता—परपुरुषचिन्ता, तत्र तृष्णारहितानि । तन्त्रचिन्तायां देशी । अविनयदुर्मेधांसि—अविनयाद् दूरीकृतबुद्धीनि । **सापी**ति—सा स्वीया ।

(वि, ञ) **प्रथमे**ति—प्रथमावतीर्णयौवना, प्रथमावतीर्णमदनविकारेति द्विधा । एतानि विशेषणानि एकैकान्येव मुग्धाया बोध्यानि ।

(लो,झ) लज्जा एव पर्याप्तं पूर्वं प्रसाधनं भूषणं येषाम् । निष्पिपासानि—निःस्पृहाणि । दुर्मेधासि अनभिज्ञानि । (लो, ल) सा स्वस्त्री ।

1 साधारणा स्त्री च. (ग. घ. पु.)
2 'नायिका पुनः' इति (च. ट. पु. नास्ति.) ।
'नायिका—' इत्यादि—'कलत्राणि' इत्यन्तं (च. छ. पु. नास्ति ।
3 'त्रिभेदा' (ट. ड. पु.) 4 'त्रिभेदा' (क. ख. पु.)

तत्र प्रथमावतीर्णयौवनमदनविकारा रतौ वामा।
कथिता मृदुश्च माने समधिकलज्जावती मुग्धा॥ ७१॥ (ट)

तत्र (ए) प्रथमावतीर्णयौवना यथा मम तातपादानाम्—

मध्यस्य प्रथिमानमेति जघनं वक्षोजयोर्मन्दतां
दूरं यात्युदरञ्च रोमलतिका नेत्रार्जवं धावति।
कन्दर्पं परिवीक्ष्य नूतनमनोराज्याभिषिक्तं क्षणा-
दज्ञानीव परस्परं विदधते निर्लुण्ठनं सुभ्रुवः॥ (ऐ)

*प्रथमावतीर्णमदनविकारा यथा मम प्रभावतीपरिणये—

दत्ते सालसमन्थरं भुवि पदं निर्याति नान्तःपुरात्;
नोद्दामं हसति, क्षणात् कलयते ह्रीयन्त्रणां कामपि।
किञ्चिद् भावगभीरवक्रिमलवस्पृष्टं मनाग् भाषते
सभ्रूभङ्गमुदीक्षते प्रियकथामुल्लासयन्तीं[1] सखीम्॥ (ठ)

रतौ वामा यथा—

दृष्ट्वा दृष्टिमधो ददाति कुरुते नालापमाभाषिता
शय्यायां परिवृत्य तिष्ठति बलादालिङ्गिता वेपते।

(वि, ट) **मध्यस्य प्रथिमानमिति**—नूतनं यदस्या मनोराज्यं मनस्याधिपत्यं तत्राभिषिक्तं कन्दर्पं परिवीक्ष्य सुभ्रुव. अज्ञानि परस्परं निर्लुण्ठनं विदधते इत्यर्थः। राज्ञ. प्रथमाधिपत्यदिनेऽराजके राज्ये परस्परनिर्लुण्ठनस्य लोकसिद्धत्वात्, तद्दर्शयति—**मध्यस्येति**। शैशवे मध्यस्य प्रथिमा पृथुत्वमासीत्। यौवने च मध्यं क्षीणं जघनं च पृथु बभूव इत्यर्थ। वक्षोजयोर्मन्दता तनुत्वं दूरमतिशयमुदरं यातीत्यर्थ.। नेत्रस्य आर्जव रोमलतिका धावति प्राप्नोतीत्यर्थ., यौवनारम्भे नेत्रयो रक्तत्वात् रोमलतिकाया ऋजुभावेन उत्थितत्वात्।

(वि. ठ) **दत्ते सालसेति**—प्रियस्य कथा प्रसङ्गमुल्लासयन्तीं प्रस्तुवन्तीं सभ्रूभङ्गमुदीक्षते—पश्यति। गभीरो दुरवगाहो यो वक्रिम वक्रताया लवोऽल्पत्वम्। तेन स्पृष्टं यथा स्यात्तथा। मनाक् शनैः किञ्चिदल्पं भाषते। सालसपददानं शुश्रूषया। कामपि अनिर्वचनीया ह्रीयन्त्रणा लज्जाकृतपीडा कलयते अनुभवति।

(वि, ड) **दृष्ट्वा दृष्टिमिति**—नवोढाया वृत्तं सख्ये कथयत उद्भिरियम्। श्लोकार्थः स्पष्ट.।

(लो, ए) तत्र-तासु मध्ये।

(लो, ऐ) प्रथिमान पृथुत्वमेति गृह्णाति। मन्दता च याति गृह्णातीत्यर्थ.। निर्लुण्ठनं परस्परवित्तविग्रहणम्।

---

* तारकित पाठ ग. च. पु नास्ति।

1 'मुल्लापयन्तीम्' (ट. ठ. पु)

निर्यान्तीषु सखीषु वासभवनान् निर्गन्तुमेवेहते
जाता वामतयैव सम्प्रति मम प्रीत्यै नवोढा प्रिया॥" (ङ)

माने मृदुर्यथा—

सा पत्युः प्रथमापराधसमये सख्योपदेश विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसूचनम्।
स्वच्छैरच्छकपोल[1]मूलगलितै पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति [2]लुठल्लोलालकैरध्रुभि. (ङ, ओ)

समधिकलज्जावती यथा—"दत्ते सालसमन्थरम्" इत्यत्र श्लोके। अत्र समधिकलज्जावत्त्वेनापि लब्धाया रतिवामतायाः विच्छित्तिविशेषवत्तया पुन कथनम्। [3]अथ मध्या—

मध्या विचित्रसुरता प्ररूढस्मरयौवना।
ईषत्प्रगल्भवचना मध्यमव्रीडिता मता॥ ७२॥ (ण)

(वि, ढ) माने मृदुरल्पमाना। **सा पत्युरिति**—अल्पमानाया क्रिया सख्या कथयन्त्या सख्या उक्तिरियम्। सख्या उपदेश सखीकर्तृकमुपदेश विना सा पत्युरुपनायिकासम्भोगरूपप्रथमापराधसमये सविभ्रमयोरङ्गभङ्गीवक्रोक्त्योः सूचन प्रकाश नो जानाति। तत किं करोते इत्यत्राह—**स्वच्छैरिति**। विरहात् पाण्डुत्वेन कपोलस्यान्छता। अश्रुत्यागादधुण स्वच्छता। नेत्रोत्पलस्य पर्य्याय परेण तद् दर्शने लज्जया।

(लो, ओ) सा पत्युरिति—सख्योपदेश सख्येन सौहार्देन कृतमुपदेशम्। अथवा सख्येति हेत्वर्थतृतीयान्त पदम्। तेन सख्या कृतमुपदेशमित्यर्थ। सविलासा ऽपरिवर्तना सती पराङ्मुखीत्यर्थ। वक्रोक्तिभि कुटिलभाषितै सूचनमपराधज्ञापनं यतो नो जानाति नो वेत्ति। तत स्वच्छै अकलुषै अच्छकपोलमूलगलितै निर्मलगण्ड प्रान्तनि सृतै। लुठल्लोलालकै लुठन्त परिवर्तमाना लोलाश्चचला अलका चूर्ण कुन्तला येषु तानि तै। अश्रुभिर्बाष्पै पर्य्यस्तनेत्रोत्पला-पर्य्यस्ते नेत्रोत्पले यस्या तथा भूत्वा केवल रोदित्येव-रोदनमेव करोति। न किञ्चिदुपाय जानातीत्यर्थ। अत्र सविभ्रमाङ्गवलनेत्यनेन शय्याविरहो बोध्यते। एकशय्या शयनेनैवालकानामधु लुण्ठन सम्भवति। मुग्धा तूपदेश विना न किञ्चिज्जानाति। नायिका स्वीया मुग्धा च। नायक शठ। प्रतीयमानकृतो विप्रलम्भशृङ्गार। अश्रुभि पर्य्यस्तनेत्रोत्पलेतिसम्बन्ध।

---

1 'पालि' इति (ख घ पु)
2 'गलल्लोलोदकैरश्रुभि' (ट ठ ड पु)
3 मध्या यथा—
'मध्यामयौवनानम्रा मोदान्त सुरतक्षमा' इति लक्षण (ग घ, पु)

तत्र विचित्रसुरता यथा—

कान्ते तथा कथमपि प्रथितं मृगोक्ष्या
चातुर्य्यमुद्धतमनोभवया रतेषु ।
तत्कूजितान्यनुवदद्भिरनेकवारं
शिष्यापितं गृहकपोतशतैर्यथास्याः ॥ (त)

प्रारूढस्मरा—यथा अत्रैवोदाहरणे । (थ)

प्रारूढयौवना—यथा मम—

नेत्रे खञ्जनगञ्जने सरसिजप्रत्यर्थि पाणिद्वयं
वक्षोजौ करिकुम्भविभ्रमकरीमत्युन्नतिं गच्छतः ।
कान्तिः काञ्चनचम्पकप्रतिनिधिर्वाणी सुधास्पर्द्धिनी[1]
स्मेरेन्दीवरदामसोदरवपुस्तस्या कटाक्षच्छटा । (द)

एवमन्यत्रापि ।

अथ प्रगल्भा—

स्मरान्धा गाढतारुण्या समस्तरतकोविदा ।
भावोन्नता दरव्रीडा प्रगल्भा क्रान्तनायका ॥७३॥ (ध)

(वि, ण) विचित्रसुरतादिकम् अप्येकैकमेव मध्याया विशेषणम् । प्रारूढस्मरा प्रारूढयौवनेति विशेषणद्वयम् ।

(वि, त) **कान्ते तथेति**—सुरते नायिकया नानाविधं चातुर्य्यं कृतम् । तत्र च कण्ठे नायिकया पारावतवद् ध्वनय उच्चरिताः । पारावतैश्च तदनुवादः कृत इति समुच्चयार्थः ।

(वि, थ) **अत्रैवोदाहरणे** इति—किन्तु सुरतवैचित्र्याभावे प्रारूढस्मराया असंकीर्णमुदाहरणं बोध्यम्, यथा—

निद्रानिवृत्तावुदिते शुरक्ते सखीजने द्वारपदं प्रयाते ।
श्लथीकृताश्लेषरसे भुजङ्गे चचाल नालिङ्गनतोऽङ्गना सा ॥ इति ।

भुजङ्गे कामुके ।

(वि, द) **नेत्रे खञ्जनेति** । नेत्रे इत्यादिषु सर्वत्र तस्या इति सम्बन्धः । प्रत्यर्थि प्रतिद्वन्दि । विभ्रमकरी विशेषभ्रान्तिजनिका । सोदरं तुल्यम् । छटा कान्ति । अत्र स्मरक्रियाऽनुक्त्या यौवनस्यैव प्रारूढत्वम् । **एवमन्यत्रापीति** । "दीर्घाक्षं शरदिन्दु" इत्यादौ बोध्यम् ।

(वि, ध) स्मरान्धेत्यादिकमपि प्रत्येकमेव विशेषणम् । **दरव्रीडेति**—समधिकलज्जाभिका इत्येवार्थः । तेन स्वल्पव्रीडत्वे व्रीडाभावे वा दरव्रीडत्वं बोध्यमिति ग्रन्थकृतोऽभिप्रायः । आक्रान्तनायका इत्यर्थः ।

---

1 'स्पन्दिनी' (क. पु)

स्मरान्धा यथा—

धन्यासि या कथयसि प्रियसङ्गमेऽपि
विश्रब्धचाटुकशतानि रतान्तरेषु ।
नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्य ! शपामि यदि किञ्चिदपि स्मरामि ॥ (न) *

गाढतारुण्या यथा—

अत्युन्नतस्तनमुरो नयने सुदीर्घे
वक्त्रे श्रवावतितरां वचन ततोपि ।
मध्योऽधिक तनुरनूनगुरुर्नितम्बो
मन्दा गति किमपि चाद्भुतयौवनाया ॥ (प, औ)

×समस्तरतकोविदा यथा—

क्वचित्ताम्बूलाक्त क्वचिदगुरुपङ्काङ्कमलिन
क्वचिच्चूर्णोद्गारी क्वचिदपि च साक्षतकपद ।

(वि, न) सखिषु मध्ये एकया नायिकया कथितम्—"मया रतिकाले बहूनि चाटुवचासि पत्यौ कथ्यन्ते"ति रसानिविष्टा प्रतिपादयितु तत्कालेऽत्यन्तरसाविष्टत्वमात्मन सूचयन्ती काचित् सोल्लुण्ठमाह—**धन्यासीति** । रतान्तरेषु अत्यन्तरसावेशयोग्येषु रतमध्येषु स्वीयोत्कर्षकथने बह्वीनामवधानाय सख्य इति बह्वीना सम्बोधनम् । शपामि शपथ करोमि ।

(वि, प) **अत्युन्नतस्तनमिति**—अत्र अद्भुतयौवनाया इति सर्वेनाऽन्वय । किमपीत्यत्र किं पदमव्ययम् । कापि गतिर्मन्थे इत्यर्थ ।

(वि फ) **क्वचित् ताम्बूलाक्त** इति । प्रच्छदपट—शय्याच्छादनपट

(लो, औ) अनूनगुरु —अत्यन्तगुरु ।

(लो, अ) चूर्णानि कर्पूरादीनाम् । बलिभङ्गाभोगीरिति त्रयाणा विशेषणे तृतीया । तैरेव कथयतीति कथनकरणत्व वा । सर्वावस्थ बहुप्रकारम् ।

---

* हे सखि, या त्व प्रियसङ्गमे रतान्तरेषु अपि रतमध्येष्वपीनि विश्रब्धानां विश्वासयुक्तना चाटूकानां प्रियवाक्यानां शतानि कथयसि सा त्व धन्याऽसि । प्रथमत प्रिय सङ्गमे एव विलक्षणानन्दमन्थरतया तत् कथनमशक्यम् । तत्रापि रते, तत्रापि नादौ नान्ते किन्तु मध्ये । तस्य पुन स्मरणमित्याश्चर्यभूत तव सावधानत्वम् । भो सख्य, प्रियेण नीवीं प्रति करे प्रणिहिते प्रणिधानविषयीकृते नत्वर्पिते यदि किमिदपि स्मरामि तदा शपामि । भवतीनां शपथो नतु किमिदपि स्मरामीत्यर्थ । 'शप उपालम्भे' इत्या [illegible]

* तारकित पाठे ग घ पु नास्ति विविधगुरुतश्च-इति पाठान्तरम् ।

वलीभङ्गाभोगैरलकपतितैः शीर्णकुसुमै
स्त्रिया सर्वावस्थं कथयति रतं प्रच्छदपटः ॥ (फ, अ)

भावोन्नता यथा—

मधुरवचनैः सभ्रभङ्गैः कृताञ्जलितर्जनैः
रभसरचितैरन्यासैर्महोत्सवबन्धुभिः ।
असकृदसकृत् स्फारस्फारैरपाङ्गविलोकितैः
स्त्रिभुवनजये सा पञ्चेषो करोति सहायताम् ॥ (ब)

स्वल्पव्रीडा यथा—

'धन्यासि या कथयसि'—इत्यत्रैव ॥ (भ)

आक्रान्तनायका यथा—

स्वामिन् भङ्गुरयालक, सातिलक भाल विलासिन् कुरु
प्राणेश ! त्रुटितं पयोधरतटे हारं पुनर्योजय ।

स्त्रिया सर्वावस्थं न्युब्जोत्तानान्यावस्थीयं रतं कथयतीत्यर्थः । पटः कीदृशः ? क्वचित् ताम्बूलाक्तं इदं न्युब्जरते । क्वचिदगुरुपङ्केति—इदं पार्श्वरते । क्वचित् चूर्णेति—चूर्णक्षेपपूर्वकरते । क्वचिदपि सालक्तकेति—पदमत्र पदचिह्नम्, इदमुत्थितावस्थारते । वली भङ्गः प्रच्छदपटस्य वलनेन भङ्गः सङ्कोचः तस्य आभोगैः तत्परिपूर्णिताभिरपि कथयतीत्यर्थः । इदमलकपतितेत्यादिकं च विमर्दरते । विचित्रसुरतायास्त्वेतादृशविमर्दाभावादस्या ततो भेदः ।

(वि, ब) मधुरवचनैरिति—नायिका सा मधुरवचनादिभिः पञ्चेषुः त्रिभुवनजये सहायतां करोति इत्यन्वयः । मधुरवचनादिकं सर्वं नायके कदाचित् मधुरवचनं कदाचित् सभ्रभङ्गेत्यादिकं बोध्यम् । रभसः—सहसा । महोत्सवस्य बन्धुभिः सहायैः यूनामानन्दकरैः रङ्गाभ्यामैः स्फारैः स्फारैरतिदीर्घैः ।

(वि, भ) धन्यासि येत्यादिकं स्वल्पव्रीडोदाहरणमुक्तं, तन्न युक्तम्—अत्रालज्जाया अपि व्रीडाया अप्रतीतेः । किन्तु—'वनकोलि हिअनिअ सनक्खालि सनअवहुलम् । यन युअन सरुन्मत्त इअ गअण पवि उपरि चुम्बि अन्त' इत्येव स्वल्पव्रीडोदाहरणम् । यथा वा "शूलिन करतलद्यूनेन सा सनिरुध्य नयने हृताशुका । तस्य पश्यति ललाटलोचने मोघयत्नविधुरा रहस्यभूत्" इति । अत्र पार्वतीशूलिनोर्नयने इत्यन्वयः ।

(वि, भ) स्वामिनित्यादि—सम्पूर्णचन्द्रानना सुरतावसानसमये स्वामिन्नित्यादिकमुक्त्वा तेन स्पृष्टा सती पुनर्मोहनं याता इत्यन्वयः । भङ्गुरत्वेनालकानां विकीर्णत्वात् पुनर्भङ्गुरीकरणाय प्रेरणा । अत्र स्वामिन्नित्याज्ञाकरणात् नायिकाक्रान्ता ।

इत्युक्त्वा सुरतावसानसमये सम्पूर्णचन्द्राननां
स्पृष्ट्वा तेन तथैव जातपुलकां प्राह्वां पुनर्मोहनम् ॥ (म)

मध्याप्रगल्भयोर्भेदान्तराण्याह—

ते धीरा चाप्यधीरा च धीराधीरेति षड्विधे ॥ ७४ ॥ (आ)

ते मध्याप्रगल्भे ।

तत्र—

प्रियं सोत्प्रासवक्रोक्त्या मध्या धीरा[1] दहेद्रुषा ।
धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः ॥ ७५ ॥ (ई, इ)

तत्र मध्या धीरा यथा—

तदवितथमवादीर्यन्मम त्वं प्रियेति
प्रियजनपरिभुक्तं यद्दुकूलं वसानः ।
मदधिवसतिमागा कामिनां मण्डनश्री
र्भजति हि सफलत्वं वल्लभालोकनेन ॥ (र)

मध्यैव धीराधीरा यथा—

बाले ! नाथ विमुञ्च मानिनि ! रुषं, रोषान्मया किं कृतं
खेदोऽस्मासु, न मेऽपराध्यति भवान्, सर्वेऽपराधा मयि ।
तत् किं रोदिषि गद्गदेन वचसा कस्याग्रतो रच्यते
नन्वेतन्मम का तवास्मि दयिता नास्मीयतो रच्यते ॥ (ल, ई)

(वि, य) **प्रियं सोत्प्रासेति**—उत्प्रास समनाक् स्मितम् ।

(वि, र) **तदवितथमित्यादि**—त्वं मम प्रियेति यदवादीस्तदवितथं सत्यम् । यद् यस्मात् प्रियजनेन उपनायिकया सपत्न्या वा परिभुक्तं दुकूलं वस्त्रं वसानं दधानं सन् मदधिवसतिं मम गृहमागा आगतोऽसि । ननु एतावता कथं प्रियेत्युक्ते सत्यत्वमित्यत आह—**कामिनामिति** । वल्लभाया आलोकनेनेत्यर्थः । प्रियजनपरिभुक्तवस्त्रधारणमेवात्र मण्डनश्री सफलत्वं व्रजति । सेयं सोत्प्रासवक्रोक्तिः ।

(वि, ल) **बाले** इति—कामुकस्य मानिन्याश्च इमे उक्तिप्रत्युक्ती न मेऽपराध्यतीत्यादि मयेत्यन्तं नायिकाया उक्तिः, नन्वेतन्मे इत्यत्रापि अयमत इत्यस्याप्यनुषङ्गः । दयिता पत्नी । नायिकोक्तौ दयितविषयः ।

(लो, आ) षड्विधे प्रत्येकं त्रिविधत्वात् ।

(लो, इ) प्रिय दहेदित्यस्य रुदितैः परुषोक्तिभिरित्याभ्यां सम्बन्धः ।

(लो, ई) बाले अज्ञे । धीरमध्याया वक्रोक्त्या प्रियतापनम् धीराधीरायास्तु सोपहासवचनेनेति भावः । सर्वत्र मध्याप्रगल्भयोः समनन्तरोक्तेषु भेदेषु ।

---

1 'वदेत्' (र र)

इयमेवाधीरा यथा—

साद्धं मनोरथशतैस्तव धूर्त[1] कान्ता
सैव स्थिता मनसि कृत्रिमहावरम्या ।
अस्माकमस्ति नच कश्चिदिहावकाश
स्तस्मात्कृत चरणपातविडम्बनाभि ॥ (व)
प्रगल्भा यदि धीरा स्याच्छन्नकोपाकृतिस्तदा ।
उदास्ते सुरते तत्र दर्शयन्त्यादर[2] बहि ॥ ७६ ॥ (श)

तत्र प्रिये । यथा—

यथा—

एकत्रासनसंस्थिति परिहृता प्रत्युद्गमाद्[3] दूरत
ताम्बूलानयन[4]च्छलेन रभसाश्लेषोऽपि सविघ्नित ।
आलापोपि न मिश्रित परिजन व्यापारयन्त्यान्तिके
कान्त प्रत्युपचारतश्चतुरया कोप कृतार्थीकृत ॥ (ष)
धीराधीरा तु सोल्लुण्ठभाषितै खेदयेदमुम्[5] ॥ ७७ ॥

अमु नायकम्[6] । यथा* मम—

(वि, व) इयमेवेति मध्यैव इत्यथ । **साद्धं मनोरथै**रिति—चरणपतित कामुक प्रति मानिन्या अधीरमध्यमाया उक्तिरियम् । धूर्तेति कान्तसम्बोधनम् । सैव उपनायिकैव कृत्रिमभाव परस्त्रीत्वेन मिथ्यानुराग । इह मनसि । कृत व्यर्थम्, कृतशब्द योगे स्वार्थे तृतीया । विडम्बनाभि प्रतारणाभि इत्यर्थ ।

(वि, श) तत्रेत्यस्य व्याख्या दर्शयन्त्यादरमिति । बहिरादर दर्शयन्तीत्यर्थ ।

(वि, ष) **एकत्रासनेति**—चतुरया नायिकया उपचारतोऽयवार्यक्रियात कान्त प्रति कोप कृतार्थीकृत, सम्वरणेन तद्वशनात् सार्थाकृत इत्यर्थ । कोपसम्वरण हेतून् उपचारान् दर्शयति—**एकत्रेति**—एकत्र देशे आसनसंस्थितिरित्यर्थ । रभसा श्लेष, कान्तेन सहसालिङ्गनम् । अन्तिके परिजनमर्थात् तदुपचारार्थं गृहकार्यार्थं व्यापारयन्त्येत्यर्थ ।

(वि, स) **सोल्लुण्ठेति**—सोल्लुण्ठभाषितम् आपातमधुरकटुवचनम् ।

---

1 'आदरात् इति (क ग पु)
2 'प्रत्युद्गता दूरत इति (ट ड पु)
3 'लाहरण' (ग च पु)
4 'खेदयत्यमुम्' (प व पु)
5 'सोल्लुण्ठनवचनै (च ज पु)
* तारङ्कित पाठो च छ पु न दृश्यते ।

अनलङ्कृतोऽपि सुन्दर ! हरसि मनो मे यत प्रसभम् ।
किं पुनरलङ्कृतस्त्व सम्प्रति नवरत्नतंस्तस्याः ॥ (ख)

तर्जयेत्ताडयेदन्या ॥ ७८ ॥

अन्या अधीरा । यथा—"शोण वीक्ष्य मुखम्" इत्यत्र (१६पृ०)।

अत्र च सर्वत्र स्वेत्यनुवर्तते—

प्रत्येकं ता अपि द्विधा ।
कनिष्ठज्येष्ठरूपत्वान्नायकप्रणयं प्रति ॥ ७९ ॥ (ङ)

ता अनन्तरोक्ता षड्भेदा नायिका । यथा—

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रितकन्धरः सपुलकप्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलका धूर्तोऽपरा चुम्बति ॥ (च)

मध्याप्रगल्भयोर्भेदास्तस्माद्[1] द्वादश कीर्तिता[2] ।
मुग्धा त्वेकैव तेन स्युः स्वीयाभेदास्त्रयोदश ॥ ८० ॥
[2]परकीया द्विधा प्रोक्ता परोढा कन्यका तथा ॥ ८१ ॥ (क)

अनलङ्कृतोऽपीति । यतस्त्वमनलङ्कृतोऽपि मम मन प्रसभ सहसा हरसि । अत किं पुनरित्यन्वय । तस्या उपनायिकाया अत्र नखक्षतानामलङ्कारत्वासम्भवात् एतदुक्ते कटुत्वस्य अतिस्फुटत्वात् तदवितथमवादीरित्यादि धीरमध्योदाहरणादस्य विशेष, तत्र दुकूलस्याऽलङ्कारताया अपि सम्भवात् । कटुत्वस्फुटत्वादेव चास्या प्रगल्भत्व, न मध्यत्वम्।

(वि, ङ) शोण वीक्ष्येत्यादि व्याख्यातम् । तत्र पादप्रहारकथनात्ताडनम् । कनिष्ठज्येष्ठेति—नायकस्य य कपटप्रणयस्त प्रति न्यूनाधिक्यादित्यर्थ । षड्विधा इति । धीरा अधीरा धीराधीरा चेति त्रैविध्यात् मध्याप्रगल्भयो षट्त्वम् ।

(वि, च) दृष्ट्वैकेति—एकासनसंस्थित पत्नीद्वय दृष्ट्वा विहितक्रीडानुबन्ध च्छल कृतकौतुकोत्पत्ति धूर्तो नायक आदरात् तयो पश्चात् पृष्ठत उपेत्य गत्वा एकस्या पत्नया नयने पिधाय ईषद् वक्रितकन्धर सन् अपरा चुम्बति । अपरा कीदृशी सपुलक यथा स्यात्तथा प्रेम्णा उल्लसन्मानसा हृष्यन्मनस्का पुन कीदृशा अन्तर्हासेन लसती कपोलफलके गण्डयुगल यस्यास्ताम् । अत्र नायिकानुरागस्य न्यूनाधिकत्व स्फुटमेव ।

(वि, क) द्वादशेति—परद्वैगुण्यात् । मुग्धा त्वेकैवेति । तस्या प्रथमावतीर्ण—

---

1 'तेन' इति (क ग पु) 'तद्वद्' इति (च ज पु)

2 'कन्यका अनूढा । अस्याश्च पित्राद्यायत्तत्वात् परकीयत्वम्' इत्यधिक पाठो (ग पु)

तत्र—

यात्रादिनिरतान्योढा कुलटा गलितत्रपा ॥ ८२ ॥ (ख)

यथा[1]—

स्वामी नि श्वसितेप्यसूयति, मनोजिघ्र सपत्नीजन
श्वभ्रूरिङ्गितदैवत, नयनयोरीहालिहो यातर ।
तद् दूरादयमञ्जलि , किमधुना दृग्भङ्गिभावेन ते
वैदग्धीमधुरप्रबन्धरसिक ! व्यर्थोऽयमत्र श्रमः ॥ (ङ)

अत्र हि मम परिणेतान्नाच्छादनादिदातृतया स्वाम्येव नतु वल्लभ । त्व तु वैदग्धीमधुरप्रबन्धरसिकतया मम वल्लभोऽसीत्यादिव्यङ्ग्यार्थवशादस्या. परनायकविषया रति· प्रतीयते । (ग)

कन्या त्वजातोपयमा सलज्जा नवयोवना ॥ ८३ ॥

अस्याश्च पित्राद्यायत्तत्वात् परकीयात्वम् । यथा मालतीमाधवादौ मालत्यादिः—

धीरा फलाप्रगल्भा स्याद् वेश्या सामान्यनायिका ॥ ८४ ॥

•मदनविकारावभासादेकत्वम् । इत्थ स्वीयात्रयोदशेति उक्त्वा अन्या इत्युक्ताम् अन्या विभजति । **परकीयेति**—तत्र परकीयामाह ।

(वि, स) यात्रादीति—या परोढा कुलटा भवति सा गलितत्रपा सती यात्रा दिनिरता भवतीत्यर्थ । यात्रा अभिसार । आदिना दूतीप्रेषणात् नायकानयनपरिग्रह·

(वि, ग) स्वामीति—उपनायक प्रति नायिकाया उक्तिरियम् । दीर्घनि श्वासेन विरहाशङ्काया असूया । जिघ्र घ्राता । ईषल्लिङ्गितेनापि परनायकविषयमनोऽनुमापक इत्यर्थ । इङ्गितदैवतमिति दैवतत्वेन अत्यन्त तद् बोद्धी । **नयनयोरिति**—लेहनात् सामस्त्येन तद् बोद्धीत्यर्थ । यातर. पतिभ्रातृपत्न्य । **वल्लभोऽसीत्यादि**—इत्यत्र आदिपदात् अञ्जलिकरणादपीत्यर्थ । रति प्रतीयते इति तत्प्रतीतिवशाच्चास्या निरतत्वसिद्धि ।

(वि, घ) सान्या साधारणात्युक्ता साधारणीमाह—**धीरेति** । सामान्यनायिका

(लो, उ) नि श्वसितेऽपि—चेष्टायामपीत्यर्थ । मनोजिघ्र मनसा घृतमप्यना यासादनुमिनोति, इङ्गितदैवतम् इङ्गितज्ञान तस्या एव आयत्तम्। य खलु यत्राधिष्ठान तस्य तदभिज्ञान सुकरमेव । ईहालिह अत्रैव चेष्टाग्रहणशाला । वैदग्ध्या चातुर्येण मधुरो मनोहरो य प्रबन्धो व्यापारस्तत्र रसिकेत्यनेन चातुर्य्यण निर्वाह्यो यो मदभि गमनार्थं प्रबन्धस्तमाचरेति भाव ।

---

1 'तत्र परोढा यथा इति (ट ण पु)

निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि ।
वित्तमात्रं समालोक्य सा रागं दर्शयेद् बहिः ।
काममङ्गीकृतमपि परिक्षीणधनं नरम् ।
माता निष्कासयेदेषा पुनः सन्धानकाङ्क्षया ।
तस्कराः [1]पण्डूका मूर्खा सुखप्राप्तधनास्तथा ।
लिङ्गिनश्छद्मकामाद्या आसां प्रायेण वल्लभाः ।
एषापि मदनायत्ता क्वापि सत्यानुरागिणी ।
रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभम् ॥ ८५ ॥ (घ, ङ)

[2]पण्डूको वातपण्डूादिः । छद्म प्रच्छन्नं ये कामयन्ते ते छद्मकामा । तत्र रागहीना यथा—नटकमेलकादौ मदनमञ्जर्यादिः । रक्ता यथा—मृच्छकटिकादौ वसन्तसेनादिः ।

पुनश्च—

अवस्थाभिर्भवन्त्येताः षोडशभेदिताः ॥ ८६ ॥ (ङ, ऋ)

साधारणी नायिका, सा च वेश्या इत्यर्थ । सैव च धीरा, कलाप्रगल्भा च इत्यर्थ, कलाविलासकला विलास विब्बोकादय । माता मातृद्वारा । इदमुपलक्षणम्, अन्यद्वारापि इति बोध्यम् । तस्करादिप्रच्छन्नकामायन्ता प्रायेण सुखप्राप्तधना । अत एव तासा वल्लभा इत्यर्थ । एषापीति—एषा साधारणी मदनायत्ता चेत् तदा क्वाप्यनुरागिणी भवति । तथापि धनमात्रसाध्यत्वाद्रक्ताया विरक्तायां वा अस्या रत धनं विना सुदुर्लभमित्यर्थ । वातपण्डो रतिप्रतिबन्धकव्याधिविशेष ।

(वि ङ) विरक्ताया वेत्युक्त रागहीनां दर्शयति—तत्रेति । अवस्थाभिरिति—स्वात्रयोदश, परकीये द्वे । साधारणी चैका । एव षोडश नायिका । अवस्थाभिरष्टाभिर्विशेषणैरष्टौ अष्टगुणा भवन्ति ।

(लो, ङ) सामान्येति । सामान्यनायिका साधारणी स्त्रीत्युद्दिष्टा वेश्या । सा च धीरा चतुरा । न रज्यति बहिर्दर्शयते, मत्वन्तर्वहति । मात्रेति—माता निष्कासयेत्, मत्वात्मना, पुनर्धनयोगे सति मातरि दोष दत्त्वा परिग्राहयितुम् । सुखेति—सुखप्राप्तधन पित्राद्यर्जितधनम्, तु स्वार्जितस्य व्ययितुमशक्यत्वात् । लिङ्गिन तापस्विभगवत्प्रभृतय । मदनायत्तेति—अयमर्थ । मदनपरवशत्वस्य स्त्रीपुरुषसाधारणत्वात् तदुद्भवस्तस्या न दण्डकारित इति । प्रच्छन्न गुप्तम् । वातपण्डो रोगविशेषः ।

(लो, ऋ) अवस्थाभिरष्टौ प्रत्येकमित्यर्थ ।

---

1 'पुण्डूका' (ट ढ पु) 'पण्डका' (क पु)
2 'पण्डको वातपाण्डवादि' (क पु) 'पुण्डूको वातपुण्डूकादि' (ट ड. पु)

स्वाधीनभर्तृका तद्वत् खण्डिताथाभिसारिका ।
कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका ।
अन्या वासकसज्जा स्याद् विरहोत्कण्ठिता तथा[1] ॥८७॥ (च)

तत्र—

कान्तो[2] रतिगुणाकृष्टो न जहाति यदन्तिकम् ।
विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्तृका ॥ ८८ ॥ (छ, ज)

यथा—अस्माकं सखि वाससीत्यादि (९७ पृ०) ।

पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नितः ।
सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता ॥ ८९ ॥ (झ) *

यथा—तदवितथमवादीरित्यादि (१११ पृ०) ।

अभिसारयते कान्तं या मन्मथवशंवदा ।
स्वयं वाऽभिसरत्येषा धीरैरुक्ताऽभिसारिका ॥ ९० ॥

क्रमाद् यथा—(ञ)

(वि, च) आसामष्टावस्थारूपविशेषणवैशिष्ट्यं दर्शयति—**स्वाधीनेति** ।

(वि, छ) स्वाधीनभर्तृकालक्षणमाह—**कान्तो रतीति** । कन्यकायास्तु उपनायक एव कान्तो भर्ता च बोध्यः । तदनूढत्वमेव चास्याः । परोढत्वमुपनायकानेकहेतुसाधारणत्वमस्याः । अन्तिकात्यागोऽन्यस्थले न स्थितिः । वेश्यायास्तु निजपतेरेवं भावः ।

(वि, ज) खण्डितालक्षणमाह—**पार्श्वमेतीति**—कन्यकायास्तु उपनायक एव प्रियः । एवं साधारण्या अपि ।

(वि, झ) अभिसारिकालक्षणमाह—**अभिसारयते** इति । नचै स्वीयायाः कथमभिसारः । उपनायकाभिसारे परोढत्वमिति वाच्यम् । पितृगृहस्थाया. स्वस्वामिन्यपि अभिसारसम्भवात् । **क्रमात् यथेति** । प्रथमं कान्तमभिसारयन्त्या ततः कान्तमभिसरन्त्या उदाहरणमिति भ्रम. ।

(लो, ञ) तत्र तासु मध्ये । गुणो रतेर्विचित्रसुरतादिः शुश्रूषादिर्वा ।

---

* अन्यसम्भोगचिह्नितः । अन्यस्या नायिकाया सम्भोगचिह्नं दन्तक्षतादि तद्युक्तः । ईर्ष्याकषायिता ईर्ष्यया कषायिता विकृतिमापन्ना ।

1 'यथा' इति (क. ग. घ.)
2 'यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति' इति (ट. ठ. घ.)

[1]नच मेऽवगच्छति यथा लघुता
करणं यथा च कुरुते स मयि ।
निपुण तथैनमभिगम्य वदे-
रभिदूति काचिदिति सदिदिशे ॥ (ञ)
उत्क्षिप्त करकङ्कणद्वयमिद बद्धा दृढ मेखला
यत्नेन प्रतिपादिता मुखरयोर्मञ्जीरयोर्मूकता ।
आरब्धे रभसान्मया प्रियसखि ! क्रीडाभिसारोत्सवे
चण्डालस्तिमिरावगुण्ठनपटक्षेप विधत्ते विधु ॥ (ट) *

संलीना स्वेपु गात्रेपु मूकीकृतविभूषणा ।
अवगुण्ठनसंवीता कुलजाऽभिसरेद् यदि ॥ ९१ ॥ +
विचित्रोज्ज्वलवेशा तु रणन्नूपुरकङ्कणा ।
प्रमोदस्मेरवदना स्याद् वेश्याभिसरेद् यदि ॥ ९२ ॥ ×
मदस्खलितसलापा विभ्रमोत्फुल्ललोचना ।

(वि, ञ) **नच मे** इति । अभिदूति दूत्या काचिन्नायिका इति सदिदिशे । सन्देशमाह—**नच मे** इति । एव नायकमभिगम्य निपुण प्रकृष्ट वदे इत्यन्वय ।

(वि, ट) कान्तमभिसरन्तीमुदाहरति—**उत्क्षिप्तमिति** । तमस्विन्या चन्द्रोदयात् पथि स्वस्या अभिसारभङ्ग सख्या कथयन्त्या उक्तिरियम् । अवगुण्ठनमा च्छादन, तस्य क्षेपमपसारण विधत्ते इति अतीतसामीप्ये वर्तमान व्यधादित्यर्थ ।

(वि, ठ) **आविद्धगतिसंचारे**ति—आविद्ध सभग्नीका पितृगृहगत्यर्थं सञ्चारो यस्यास्तादृशी ।

---

* इद करकङ्कणद्वयम् उत्क्षिप्त यथा शब्दो न भवेत् तथा मेखला दृढ बद्धा । मुखरयो शब्दायमानयोर्मञ्जीरयोर्नूपुरयोर्मूकता नि शब्दता कृता । मया रभसात् हर्षात् क्रीडाभिसारोत्सवे विहाराय अभिसरणरूपोत्सवे आरब्धे सति चण्डाल चण्डालवत् क्रूर विधुश्चन्द्र तिमिरमन्धकार एवावरकत्वात् अवगुण्ठनपट तस्य क्षेपमपसारण विधत्ते ।

+ कुलजादिभेदेन अभिसारणप्रकारानाह—सलीना—अतीव सकुचिता । मूकीकृतानि नि शब्दीकृतानि भूषणानि यया सा । अवगुण्ठनेन संवीता आवृता ।

× विचित्रश्च उज्ज्वलश्च वेशो यस्या सा । वेश्या तु दृष्ट्वा चित्तार्कर्षणार्थम् एव करोति ।

1 "त्वरय प्रस्तुतविधये यावत्तिमिरणि तरणितरणानि ।
भावी कुलटावाट शशधरकरकणटकैरवह ॥" इत्युदाहरणान्तर (च ज ञ)

आविद्धगतिसंचारा स्यात् प्रेष्याभिसरेद् यदि ॥ ९३ ॥+ (ग)

तत्राद्ये उत्क्षिप्तमित्यादि ।

अनयोरुदाहरणम् । (ङ, छ)

प्रसङ्गादभिसारस्थानानि कथ्यन्ते । (ए)

क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनम् ।
[1]मालामद्यं श्मशानञ्च नद्यादीनां तटी तथा ।
एवं कृताभिसाराणां पुंश्चलीनां विनोदने
स्थानान्यष्टौ तथा[2] ध्वान्तच्छन्नेषु क्वचिदाश्रयः ॥ ९४ ॥ (घ)*
[3]चाटुकारमपि प्राणनाथं रोषादपास्य या ।

(वि, ङ) अनयोरुदाहरणमिति—आद्ये ।

"अनणुरणन्मणिनूपुरमविरतशिञ्जानमञ्जुमञ्जीरम् ।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते ॥" इति

इयं हि अभिसरन्ता वेश्या प्रति शान्तस्य कस्यचिदुक्तिः । रणरणकं कामचिन्ताम् । प्रेष्यायास्तु "नि शङ्कन्युत" इत्यादिकमुदाहरणम् । मदस्खलितादिविशेषणान्यस्या चन्दनादिवेशाद्ज्ञेयानि ।

(वि, घ) मालामद्यमुद्यानम्, कुत्रचिदाश्रय इत्यत्र विनोद इति शेषः ।

(वि, ण) कलहान्तरितालक्षणमाह—**चाटुकारमपीति** । कन्यकासाधारण्येनोपनायक एव प्राणनाथः ।

(लो, छ) प्रेष्याभिसारिका यथा—

ताम्बूलाक्तं दशनमसकृद्दर्शयन्तीह चेटी
घोटी स्खेपाद् विकृतरुदितं हेतुहीनं हसन्ती ।
स्थानास्थानस्खलितपदविन्यासमाभाषमाणा
यूनामग्रे सरति कुटिलं नर्तितोच्चैर्नितम्बम् ।

(लो, ए) स्थानानीति—अष्टानां स्थानानां महार्णवोक्तत्वात् भिन्ननिर्देशः । यदाह—

---

† मदेन गर्वात् स्खलितं विकृतं सलापो यस्याः सा । विभ्रमेण विलासेन उत्फुल्ले लोचने यस्याः सा ।

* पुंश्चलीनां, कुलटानाम् । ध्वान्तच्छन्नेषु अन्धकारावृतेषु स्थानेषु ।

1 मालापद्म ट. मालय च ज मालापद्मा ग मालायद्मा ङ मालायाद्म व मालामाद्मा (ढ. पु)

2 'मुनि प्राह ध्वान्तच्छन्न स्थल तथा' (च. ज पु)

3 "पादयो पतिते कान्ते या मान न विमुञ्चति ।
तस्मिन् गते तु तापार्ता कलहान्तरिता तु सा ।" इति लक्षणान्तरं (ग च ज.पु)

पश्चात्तापमवाप्नोति कलहान्तरिता तु सा ॥६५॥ (ण)

[1]यथा मम तातपादानाम्—

नो [2]चाटु श्रवणे कृतं नच दृशा हारोन्तिके वीक्षितः
कान्तस्य प्रियहेतवे[3] निजसखीवाचोपि दूरीकृताः ।
पादान्ते विनिपत्य तत्क्षणमसौ गच्छन् मया मूढया
पाणिभ्यामवरुध्य हन्त सहसा कण्ठे कथं नार्पित ॥ (त)

प्रियः कृत्वापि संकेतं यस्या नायाति सन्निधिम् ।
विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता[4]॥ ६६ ॥

यथा—उत्तिष्ठ दूति ! यामो यामो यातस्तथापि नायात. ।
याऽतः परमपि जीवेज्जीवितनाथो भवेत्तस्या. । (थ)

[5]नानाकार्यवशाद्यस्या दूरदेशं गतः पतिः ।
सा मनोभवदुःखार्त्ता भवेत्प्रोषितभर्तृका ॥ ६७ ॥

यथा—[6]तां जानीयाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।

(वि, त) **नो चाटुश्रवणे** इति । हारस्तत् प्रीत्यर्थं कान्तेन दत्त । विनिपत्येत्यनन्तरं मया निराकृत इति पूरणीयम् ।

(वि, थ) विप्रलब्धालक्षणमाह—**प्रियः कृत्वेति । उत्तिष्ठ** इति । यामो मदागमनावधिप्रहरो यात इत्यर्थ । या नायिका अतः परमपि जीवेत् तस्या एवासौ जीवितनाथो भवेत्, भविष्यतीत्यर्थ, नतु ममेति भाव. ।

(वि, ज) प्रोषितभर्तृकालक्षणमाह **नानाकार्य्येति** । अत्रापि कन्यापरोढयोरुपनायक एव पति । **तां जानीया** इति—शापप्रतिरुद्धप्रेयार्मनिधिगमनस्य यक्षस्य

"स्थानान्यष्टौ प्रवदति मुनि. पुश्चलीना विनोदे" इति अष्टौ स्थानानि एतान्येव क्षेत्रादीनि।

---

1 यथेत्यादि नास्ति (ग घ. पु.)
2 चाटुश्रवणं (क. ग पु) 3 'प्रियहेतवो' (च. ट. पु.)
4 "अहरहरनुरागाद् दूतिका प्रेष्य पूर्वं
सरभसमभिसृत्य क्वापि संकेतके च ।
न मिलति खलु यस्या वल्लभो दैवयोगात्
प्रवदति भरतस्तां नायिकां विप्रलब्धाम् ।"
इति लक्षणान्तरं (घ व पु.)
5 दूरदेशं गते कान्ते विवर्णा मलिना कृशा ।
या तिष्ठति तदाकाङ्क्षा सा स्यात् प्रोषितभर्तृका ॥ (इति च.)
6 च. पु. तु "आधिक्षामाम्—" इत्युदाहरणं दृश्यते

गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥ (अ)

[1]कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि ।
सा तु वासकसज्जा स्याद्विदितप्रियसंगमा ॥ ९८ ॥

यथा—*राघवानन्दानां नाटके—

विदूरे केयूरे कुरु, करयुगे रत्नवलयै-
रलं, गुर्वी श्रीवाभरणलतिकेयं किमनया ।
नवामेकामेकावलिमयि (ऐ) मयि त्वं विरचये-
र्न पथ्यं नेपथ्यं बहुतरमनङ्गोत्सवविधौ ॥ (ट) *

[2]आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रियः ।
तदनागमदुःखार्ता विरहोत्कण्ठिता तु सा ॥ ९९ ॥

मेघं संबोध्य प्रियावस्थाकथनमिदम् । जानीयाः जानीहि । एषु गुरुषु दिवसेषु गच्छत्सु गाढोत्कण्ठामत एव शिशिरमथिता पद्मिनीमिवान्यरूपा जातामहम् इत्यर्थः । वा-शब्द इवार्थे ।

(वि, ट) वासकसज्जालक्षणमाह—**कुरुते** इति । सज्जिते केलियोग्यतया सज्जीकृते वासवेश्मनि यस्या मण्डनं सखी कुरुते इत्यर्थः । विदितप्रियसंगमा निश्चित-प्रियसंगमा । स्वीयाकन्ययोस्तु पितृगृहस्थयोरेवंभावो बोध्यः । **विदूरे** इति । वासगृहे नायकसंयोगार्थम् अल्पभूषणरचनार्थं सखीं प्रेरयन्त्यास्तां प्रयुञ्जिरियम् । अयि सखि त्वं नवीनाम् एकामेकावली हारं मयि विरचयेः । यतोऽनङ्गोत्सवविधौ बहुतरं नेपथ्यं वेशः न पथ्यं न हितम्; कठिनसंयोगत्वेन आलिङ्गने दुःखदायकत्वात् अतोलङ्कारान्तरं निषेधति ।

(वि, ठ) विरहोत्कण्ठितालक्षणम्—**आगन्तुमिति** । अत्रापि कन्यकापरोढयो-

---

(लो, ऐ) नवामिति । एकावली एकगुणमुक्ताहार ।

---

* च. पु. तु तारकित पाठो न दृश्यते, किन्तु

अङ्गेष्वाभरणं करोति बहुश. पत्रेऽपि सञ्चारिणि
प्राप्तं त्वा परिशङ्कते वितनुते शय्या चिरं ध्यायति ।
इत्याकल्पविकल्पतल्परचनासंकल्पलीलाशत-
व्यासक्तापि विना त्वया वरतनुर्नैषा निशा नेष्यति ॥ इति दृश्यते ।

1 वासवेश्मनि सुकल्पिततल्पे या समागमविधिं विदधाना ।
तिष्ठति प्रियसमागमसज्जा तां मुनिर्वदति वासकसज्जाम् (इति च. पु.)

2 "उद्दाममन्मथमहाज्वरवेपमानां रोमाञ्चकञ्चुकितमङ्गकमावहन्तीम् ।
गाढानुरागवचना पुरतः सखीनामुत्कण्ठिता वदति तां भरतः कवीन्द्र. ।"
(इति लक्षणान्तरं च. पु.)

यथा—[1]किं रुद्ध प्रियया कयाचिदथवा सख्या ममोद्वेलित
किं वा कारणगौरव किमपि यन्नाद्यागतो वल्लभ ।
इत्यालोच्य मृगीदृशा करतले विन्यस्य वक्त्राम्बुज
दीर्घं निःश्वसित चिर च रुदितं चिक्षाश्च पुष्पस्रज ॥ (ड)

इति साष्टार्विंशतिशतमुत्तममध्यमाधमस्वरूपत. ।
चतुरधिकाशीतियुतं शतत्रयं[2] नायिकाभिधानं स्यात् ॥१००॥ (ङ)

" इह च परस्त्रियौ कन्यकोढे[3], सङ्केतात् पूर्वं विरहोत्कण्ठिते । पश्चाद् विदूपकादिना सहाभिसरन्त्याद्यभिसारिके । कुतोऽपि [4]साङ्केतिकस्थानमप्राप्ते नायके विप्रलब्धे इति व्यवस्थैवानयोरस्वाधीनप्रिययोरवस्थान्तरायोगात्" इति कश्चित्[5] । (ड, श्रो)

रुपनायक एव पति ।

किं रुद्ध इति—परोढाऽन्यकयोरुपनायकस्य स्वीयायाश्च सपत्नीगृह गतस्य नायकस्याऽनागमनेनोत्कण्ठितया इति पूर्वार्द्धोक्तिमालोच्य वक्त्राम्बुज करतले विन्यस्य दीर्घं निश्वसितमित्यादि । सख्या मया प्रेषितया ।

(वि, ड) इति साष्टार्विंशतीति षोडशानामष्टगुणेन साष्टार्विंशतिशतम् । तच्च उत्तममध्यमाधमस्वरूप सत् चतुरधिकाशीतियुतं शतत्रयम् । नायिकाभिधानम्—नायिकेति अभिधान यस्य साष्टार्विंशतिनायिकाशतस्य तादृशमित्यर्थ । कुलजाना पापि लेऽपि उत्तमत्वादिकामकलाकौशलतारतम्यात्। यद्वा—ब्राह्मणादिजातितारतम्यात् तथात्वम् । साष्टार्विंशतिशतत्वंगुण्यादुक्तसख्या ।

(वि, ढ) अत्र परस्त्रियो कन्यकोढयोरवस्थात्रयस्य एवाऽभावात् अष्टगुणत्वाभावेन उक्तसख्या न भविष्यतीति कश्चिदाह—तद्दर्शयति। इह चेति। सकेतात् पूर्वमिति सकेतात् हेतो पूर्वं विरहोत्कण्ठिते पश्चात् विदूपकेत्याद्यन्वय । **अवस्थान्तरा-**

(लो, श्रो) अष्टेति—अष्टार्विंशतिशत षोडशाना प्रत्येकमष्टधा गुणनात्। पुनश्च उत्तममध्यमाधमभेदात् तत् त्रिगुणितम् । चतुरशीत्यधिक शतत्रयमित्यर्थ ।

---

1 "एणीदृश प्रबलतापभयादिवास्या श्वासानिला प्रतिमुहु प्रसरन्ति दूरम् ।
बाष्पाम्बुबिन्दुचिषु निमज्जनकातरेव निद्रा दृशोर्न सविधेऽपि पद विधत्ते । "
इत्युदाहरणान्तर च पु

2 नायिकभेदा ग पु नायिकाभिदानां स्यात् ' इति (द पु) ।

3 'कन्यकान्याडे' इति (क ख पु.)

4 'साङ्केतस्थानम्' इति क । 'सङ्केतम्' इति ख

5 'कन्यकोढे' इति (च ज ट पु)

क्वचिदन्योऽन्यसाङ्कर्य्यमासां लक्ष्येषु दृश्यते ॥ १०१ ॥ (ण)

यथा—

न खलु वयममुष्य दानयोग्या. पिबति च पाति च यासकौ रहस्त्वाम् ।
विट ! विटपमुं ददस्व तस्यै भवति[1] यतः सदृशोऽश्चिराय योगः ॥ (त, थ)
तव कितव ! किमाहितैर्वृथा न क्षितिरुहपल्लवपुष्पकर्णपूरैः ।

योगादिति—तथाहि स्वाधीनभर्तृकात्वखण्डितात्वकलहान्तरितात्वप्रोषितभर्तृकात्व-वासकसज्जात्वरूपा पञ्चावस्था. भर्तृघटिता., कन्यकापरोढयोस्तादृशावस्थाभावादित्यर्थ । क्वचिदित्यस्वरससूचनस्यायमभिप्राय.—सर्वत्र भर्तृपतिपदानि उत्कटानुरागविषय-कामुकपराणि स्वभर्तृपनायकत्वाधारणानि । अतस्तद्घटिता. स्वाधीनभर्तृकादि-चतुरवस्था. संभवन्त्येव । वासकसज्जात्वावस्था तु पतिघटितैव न भवति इत्यतः कन्यकापरोढयोरपि ता पञ्चावस्थाः सभवन्त्येव । एवं च स्वकिया अपि पितृगृहस्थाया. पित्रधीनत्वेन पत्या सह स्वच्छन्दसम्भोगासंभवात् । पत्यौ अभिसारविरहो-त्कण्ठाविप्रलम्भा भवन्त्येव इति यथोक्तसंख्या. ।

(वि, ण) **क्वचिदन्योऽन्यसाङ्कर्य्यमिति**—आसा धीराधीराधीराणाम् ।

(वि, त) **न खलु वयमिति**—कुसुमितविटपं दित्सु स्वनायकं प्रति कोप-नाया उक्तिरियम् 'हे विट ! धूर्त्त ! अमुष्य विटपस्य दानयोग्या न खलु वयम् । किन्तु अमुं असौ सा उपनायिका त्वा चक्षुषा पिबति सुरते प्रीतिजननात् प्रतिपालयति च तस्यै अमुं विटपं ददस्व यत सदृशोयोगश्चिराय भवति । अनदृशोस्तु क्षणिकत्वं निष्फल इत्यर्थ , सदृशत्वं च दर्शितयोगार्थवशात् । साऽपि विटपी अयं च विटप इति सादृश्यम् ।

(वि, थ) **तव कितवेति**—वृक्षपल्लवं कर्णपूरं ददानं नायकं प्रति कोप-

---

क्वचिदित्यसंतोषोक्ति , तथा हि .जयदेवकृतगीतगोविन्दे मम पितृणां वंशवधे परस्त्रिया राधिकया अष्टावप्यवस्थाः स्पष्टमेव प्रकाशिता , अन्यस्या-प्यासीयत्वेन परिगृहीतस्य परयोषिदुपभोगेष्ववस्थोचिता । मृदुरान्तरो मान । तथापि मानेन कथंचिद् विभावदर्शनार्थमभिमुखं नायके गते कलहान्तरितात्वम् । तस्यैव प्रवासे प्रोषितभर्तृकात्वम् । एवमन्यदपि सुबुद्धिभिरूह्यम् ।

(लो, थौ) **न खल्वियमि**—पिबति सर्वतो निरुद्धप्रसरीकृत्य स्वामाशायत-तायां प्रवेशयति उपभुङ्क्ते वा । मदनशरपातकृतरं पाति रक्षति । अनङ्गविनि करुणनिद्र-तत्वेन तस्या. सुप्तितत्वं प्रकाश्यते । विटपेऽपि विटं पाति रक्षतीति व्युत्पत्तियोगः । तस्यामयुक्तप्रकारेण तथात्वमनेन द्वयो सादृश्यम् । एवमनयोर्विटपत्वेन सदृशयो-र्विटपयुवयोर्वा गर्हितत्वेन सदृशयोर्वा उचितो योगो मन. तस्यैव

---

[1] 'भवतु' (त)

ननु जनविदितैर्भवद्वलीकैश्चिरपरिपूरितमेव कर्णयुग्मम् ॥ (थ)
इति गदितवती रुषा जघान स्फुरितमनोरमपद्मकेशरेण ।
श्रवणनियमितेन कान्तमन्या सममसिताम्बुरुहेण चक्षुषा च ॥ (द)
इय हि वक्रोक्त्या परुषवचनेन कर्णोत्पलताडनेन च धीरमध्यताधीरमध्यता धीरप्रगल्भाभि सकीर्णा[1] ।

एवमन्यत्राप्यूह्यम् ।

'इतरा अप्यसरयास्ता नोक्ता विस्तरशङ्कया ॥ १०२ ॥ (अ)

ता नायिका । अथासामलङ्कारा —

यौवने सत्त्वजास्तासामष्टाविंशतिरीरिता[3] । (आ)
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजा ।
शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता ।

नाया नायिकाया उक्तिरियम्। हे कितव ! धूर्त ! आहृत्य दत्तै क्षितिरुहाणा वृक्षाणा पल्लवरूपै कर्णपूरै मम किं प्रयोजनमित्यर्थ । ननु भो जनविदितै भवद्व्यलीकै भवदपकर्मभि मम कर्णयुग्म चिरपरिपूरितमेव । तथा च योगार्थवशात् भवद्व्यलीकमेव मे कर्णपूर इत्यर्थ ।

(वि, द) **इति गदितेति**–पूर्ववर्णितनायिकातोऽन्या नायिका इति गदितवती सती रुषा अम्बुरुहेण चक्षुषा च त नायक जघान । कषायतचक्षुषा दर्शनमेव हननम् अम्बुरुहचक्षुषोर्द्वयो विशेषणमाह—**स्फुरिते**ति—स्फुरित मनोहर पद्ममेव केशरवत् यस्य तादृशन अम्बुरुहेण, यस्य तादृशन चक्षुषा । स्फुरितो मनोहरपद्मवत् केशरो यस्य तादृशन अम्बुरुहेण, तथा श्रवणपर्यन्तनियमितेन चक्षुषा श्रवणे नियमितेन अम्बुरुहेण उभयत्र स्थापन मेव नियमनम् ।

(वि, ध) अलङ्कारा इति । शोभाका धर्मा इत्यर्थ । अङ्गजत्वायङ्गजत्वस्वभाव त्वानि परिभाषामात्राणि नतु एषा परस्परवैलक्षण्यमस्ति । अत्र भावाद्यास्त्रय

विटप्रदानेन भवतीति उभयथा सम्बन्ध ।

(लो, अ) इतरा इति । असख्या पद्मिनीमृग्यादिभेदात् ।

(लो, आ) अथेति । अलङ्क्रियते भूष्यते एभिरित्यलङ्कारा ।

सत्त्व गुणविशेष । तासा नायिकानामीरिता उक्ता ।

✓ इत पूर्व, 'मुहुरुपहसितामिवालिनादैर्विवृतरसि न कलिका किमर्थमेनाम्। वगति-मुपगतेन धात्रि तस्या शठ ! कलिरेष महास्त्वयाय दत्त ॥' इति श्लोकान्तर दृश्यते ।

1 सकीर्यते (ग घ ङ)
2 इद तु श्लोकार्ध च ट ठ नास्ति ।
3 तिसख्यका' क ख ङ

औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः ।
लीलाविलासौ विच्छित्तिर्विब्बोकः किलकिञ्चितम् ।
मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः ।
विहृतं[1] तपनं मौग्ध्यं विक्षेपश्च कुतूहलम् ।
हसितं चकितं केलिरित्यष्टादशसंख्यकाः ।
*स्वभावजाश्च भावाद्याः दश पुंसां भवन्त्यपि ॥ १०३ ॥

पूर्वं भावादयो धैर्य्यान्ता दश नायकानामपि संभवन्ति । किन्तु सर्वेप्यमी नायिकाश्रिता एव विच्छित्तिविशेषं पुष्णन्ति । (ध) तत्र भावः ।

[2]निर्विकारात्मके चित्ते भावः प्रथमविक्रिया ॥ १०४ ॥ (इ)

जन्मतः प्रभृति निर्विकारे मनसि उद्बुद्धमात्रो विकारो भावः ।

यथा—

स एव सुरभिः कालः स एव मलयानिलः ।
सैवेयमबला किन्तु मनोन्यदिव दृश्यते ॥

अथ हावः—

भ्रूनेत्रादिविकारैस्तु सम्भोगेच्छाप्रकाशकः ।
भाव एवाल्पसंलक्ष्यविकारो हाव[3] उच्यते ॥ १०५ ॥ *

यथा—

विवृण्वती शैलसुताऽपि भावमङ्गैः स्फुटं बालकदम्बकल्पैः ।
साचीकृता चारुतरेण तस्थौ मुखेन पर्य्यस्तविलोचनेन ॥ (न, ई)

शोभायाः सप्त लीलाया अष्टादश इति अष्टाविंशतिः । विच्छित्तिविशेषं भङ्गीविशेषम् ।

(वि, न) विवृण्वती शैलसुतापीति—तपस्यतो महेशस्य समीपे कामेन धनुषि आरोपिते पार्वत्या हाववर्णनमिदम्, क्वचित् तस्याविलम्बयः । अङ्गैर्भावं विवृण्वतीत्यन्वयः । बालकदम्बपुष्पतुल्यताम् अङ्गानां पुलकेन मुखेन साचीकृता वक्रीकृता; वक्त्रमुखवंशिष्यात् तस्या वक्रता ।

(लो, इ) निर्विकारेति—विक्रियो मदनविकारः ।

(लो, ई) विवृण्वतीति अत्र हावेऽपि भावविशेषत्वात् भावशब्दप्रयोगः मुखेन साचीकृता न संमुखीभूतेत्यर्थः । पर्य्यस्तं समन्ततः क्षिप्तम् ।

---

* अल्पं संलक्ष्य. ज्ञेय· विकारः मनोविकृतिर्यस्य सः ।

1 'विहृतम्' इति (च. ट. पु.)

2 'निर्विकारात्मकम् सत्त्वाद् भावस्त्राद्यविक्रिया' (इति लक्षणान्तरं च. पु.)

3 'हावस्तु सदृशारो हावोऽभिलाषकृत् । प्रतिनियताङ्गविकारश्च सदृशारः स्वभावविशेषो हावः' (इति च. पु.)

अथ हेला—

हेलात्यन्तं समालक्ष्यविकार स्यात् स एव च ॥ १०६ ॥
स एव भाव एव ।

यथा—

तह से ऊसि पउत्ता वहुए सव्वङ्गविब्भमा सअला ।
ससहअसुद्धभावा होई चिर जह सहीणपि । (ध)

[1]रूपयौवनलालित्यभोगाद्यैरङ्गभूषणम् ।
शोभा प्रोक्ता ॥ १०७ ॥

तत्र यौवनशोभा यथा—

अमन्मूत मयङ्कनमद्भयेरनाभवारय करण मदस्य ।
कामस्य पुष्पच्यतिरिक्तमस्त्र बालयास्तं साध वय प्रवेदे ॥ (क)

एवमन्यत्रापि—

अथ कान्ति —

सैव कान्तिर्मन्मथाप्यायितद्युति ॥ १०८ ॥
मन्मथोन्मेषणाविर्भूर्णा शोभैव कान्तिरुच्यते ।

यथा—नेत्रे मदजनगलन इत्यादि— (घ)

अथ दीप्ति —

कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते ॥ १०९ ॥

यथा—मम चन्द्रकलानामनाटिकायां चन्द्रकलावर्णनम्—

(वि, घ)

तथा तस्या गतिति प्रहृता वधा गर्वाद्विभ्रमा सकलाः ।
सशक्तिसुग्धभावा भवन्ति चिर यथा सहीनामपि ॥

ही गाढ़नम् । नायक प्रति नर्मक्रिया विभ्रमोन्मेषणविर्भूतम् । मुग्धभावो वक्ष्यते मुग्धभाव ।

(वि, क) रूपयौवने—रूपादिचतुर्भिरङ्गभूषणम् अङ्गस्य शो । असमग्रं मण्डनमिति—शो पर्यायो अथ असमग्रा वाक्यात् पर वय यौवन प्रोक्त । वयस अथ असमग्र—असमग्रम् इति हारितादि सगारत्वम् अङ्गयोर्मण्डनम् । मदस्य मत्तताया कारणं हेतु । अनयत्वम् अनवस्य मदिराया या अन्यया सह सहितमासक्तिर्मिलितम् । पुष्पमिश्रं कामस्य अस्त्रम् अङ्गभूषणम् अङ्गस्य असमग्रमण्डनमिति । अपनत्वम् ।

(वि, घ) नेत्रे मदजनेरे । दत्तमुद्वर्तनं अङ्गयोर्मण्डनम् अनुलेपनम्

1 अत्र प्रन्, 'अथ शोभा' (ङ । च छ ज)

तारुण्यस्य विलासः समधिकलावण्यसंपदो हासः ।
धरणितलस्याभरणं युवजनमनसो वशीकरणम् ॥ (भ)

अथ माधुर्यम्—

सर्वावस्थाविशेषेषु माधुर्यं रमणीयता ॥ ११० ॥

यथा—

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥ (म)

अथ प्रगल्भता—

निःसाध्वसत्वं प्रागल्भ्यम् ॥ १११ ॥

यथा— absaice of perturbation

समाश्लिष्टाः समाश्लेषैश्चुम्बिताश्चुम्बनैरपि ।
दष्टाश्च दंशनैः कान्तं दासीकुर्वन्ति योषितः ॥

अथौदार्यम्—

औदार्यं विनयः सदा ॥ ११२ ॥

यथा—

न ब्रूते परुषां गिरं वितनुते न भ्रूयुगं भङ्गुरं
नोत्तंसं क्षिपति क्षितौ श्रवणतः सा मे स्फुटेष्यागसि ।
कान्ता गर्भगृहे गवाक्षविवरव्यापारिताक्ष्या बहिः
सख्या वक्त्रमभिप्रयच्छति परं पर्य्यश्रुणी लोचने ॥ (य)

(वि, भ) तारुण्यस्येति । एतदादीनि चन्द्रकलाया विशेषणानि । विलास-हासयोर्जनिका इत्यर्थः । शुद्धमारोपा इयं लक्षणा ।

(वि, म) सरसिजमिति—इयं शकुन्तला वल्कलेनापि अधिकमनोज्ञा । अतो मधुराणामाकृतीनां किमिव न मण्डनम्, तत्र दृष्टान्तमाह—सरसिजमिति—अनुविद्धं सम्बद्धम् । लक्ष्म कलङ्कः । लक्ष्मीं शोभाम् ।

(वि, य) न ब्रूते इति । प्रियायाश्चरितं सख्यौ कथयत उक्तिरियम् । मे मम स्फुटेऽपराधे सा कान्ता गर्भगृहे सख्या वक्त्रमभि सख्या वक्त्रे पर्य्यश्रुणी लोचने प्रयच्छति । सख्या, कीदृश्या सागसं मां द्रष्टुं गवाक्षविवरव्यापारिताक्ष्या । कान्तं परुषं रूक्षं न ब्रूते इत्यादि स्पष्टम् । क्षितौ श्रवणतः उत्तंसं क्षिपतीत्यन्वयः ।

अथ धैर्य्यम्—

मुक्तात्मश्लाघना धेर्य्यं मनोवृत्तिरचञ्चला ॥ ११३ ॥

यथा—

ज्वलतु गगने राजौ रात्रावखण्डकल शशी
दहतु मदन. किं वा मृत्यो परेण विधास्यते[1] ।
मम तु दयित श्लाघ्यस्तातो जनन्यमलान्वया
कुलममलिन नत्वेवाय जनो न च जीवितम् ॥ (र)

अथ लीला—

अङ्गैर्वेषैरलङ्कारै. प्रेमाभिर्वचनैरपि ।
प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतिं विदुः ॥ ११४ ॥

यथा—

मृणालव्यालवलया वेणीबन्धकपर्दिनी ।
हरानुकारिणी पातु लीलया पार्वती जगत् ॥ (ल)

अथ विलास—

यानस्थानासनादीना मुखनेत्रादिकर्मणाम् ।
विशेषस्तु विलास. स्यादिष्टसंदर्शनादिना ॥ ११५ ॥

(वि, र) मुक्तात्मश्लाघनेति—अचञ्चला मनोवृत्तिर्या मुक्तात्मश्लाघना सा धैर्य्यमिति भाव । ज्वलतु इति। गौरिकाविवाहे उद्वेजमानायास्तत्र समिताया मालत्या उक्तिरियम् । मम विरहोद्दीपनाय रात्रौ अखण्डकल शशी ज्वलतु । मदनोऽपि मा दहतु । मृत्यो परेण कर्मणा किं वा तेन विधास्यते । वर मृत्युरेव विधीयते, तथापि पितृमातृकुलकलङ्क न जनयिष्यामि इत्यभिप्रायेणाह—मम त्विति। अतस्तु मयि मम दयित दयायोग्यो यत श्लाघ्य निष्कलङ्क । अतस्तत्कलङ्क न जनयिष्यामीत्यर्थ । एवममलान्वया मम जनन्यपि दयितेत्यर्थ । नत्वेवाय जनो माधव दयितो जीवितञ्च न दयितमित्यर्थ ।

(वि, ल) अङ्गैर्वेषैरिति । प्रीतिप्रयोजितैरङ्गादिभि प्रियस्यानुकृतिं सदृशा चरण लीला विदुरित्यर्थ । मृणालेति । मृणालात्मकसर्पवलया । वेणीबन्धात्मक-कपर्दिनी पार्वती सर्पवलयस्य जटावतो हरस्यानुकारिणी जगत् पात्वित्यन्वय ।

(वि, व) यानासनेति । इष्टसदर्शनादिना यानादीना विशेष इत्यन्वय । यानम् गमनम् । विशेषो हर्षसूचक वैलक्षण्यम् । अत्रान्तर इति—वकुलवीथ्याम् उपविष्ट माधव विलोक्य गत्वेन यान्त्या मालत्या हर्षक्रिया मकरन्दे कथयत माधव स्मौत्क्रियम् । अत्रान्तरे पूर्वकथितवृत्तान्तमध्ये आयताक्ष्या मालत्यास्तन्मयानु-

---

1 'विधास्यति' इति (क. ख पु)

यथा—

अत्रान्तरे किमपि वाग्विभवातिवृत्त-
वैचित्र्यमुल्लसितविभ्रममायतार्च्या ।
तन्नूरिसात्त्विकविकारमपास्तधैर्य्य—
माचार्य्यक विजयि मान्मथमाविरासीत्" ॥ (घ, ङ)

अथ विच्छित्ति —

स्तोकाप्याकल्परचना विच्छित्ति. कान्तिपोषकृत्[1] ॥ ११६ ॥

यथा—

" स्वच्छाम्भ स्नपनविधौ तमङ्गमोष्ट-
स्ताम्बूलद्युतिविशदो विलासिनीनाम् ।
वासस्तु प्रतनु विविक्तमस्त्वतीया-
नाकल्पो यदि कुसुमेषुणा न शून्य ॥ " (श)

अथ विव्वोक –

विव्वोकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादर. ॥ ११७ ॥

यथा—

यासा सत्यपि सद्गुणानुसरणे दोषानुवृत्ति परा
या प्राणान् वरमर्पयन्ति न पुन सम्पूर्णदृष्टि प्रिये ।

भूतम्; मान्मथमाचार्य्यक मन्मथाचार्य्यापदिष्टक्रियाऽऽविरासादित्यर्थ । कीदृश वाग् विभवातिक्रान्तवैचित्र्य स्पष्टमन्यत् ।

(वि, श) **स्तोकाप्ति**ति । कान्तिपोषिका स्तोकापि आकल्परचना अल्पापि वेश रचनेत्यर्थ । **स्वच्छाम्भ** इति–विलासिनीनामाकल्पो वेश कुसुमेषुणा यदि न शून्य तदा इयानप्यस्तु । स क इत्यत्राह–**स्वच्छे**ति–स्व छाम्भसि स्नपनेन विधौत विच्छा लितमङ्गम् । ओष्ठस्य ताम्बूलद्युतिविशद । प्रतनु सूक्ष्म विविक्त परिच्छिन्न वाससेति ।

(वि, प) **यासा**मिति—सत्यपि भावे वामाचरणशालासु नायिकासु अनु रागिण कस्यचिदुक्तिरियम् । दोषानुवृत्ति दोषार्पणम् । तच्च गर्वात् चाटु कारयितु

(लो, ङ) **अत्रान्तरे** इति । मन्मथस्याचार्यत्वमाचार्यकत्व भावशिक्षाविशेष । मन्मथदेवाराधनेन य य भावविशेषमधिगतवती त त तत्र प्रकाशितवतीत्यर्थ ।

---

1 'पोषकृत् (क ख पु)
2 'विविक्त' (ट पु)
3 'वरम् (च ज पु)

अत्यन्ताभिमतेऽपि वस्तुनि विधिर्यासां निषेधात्मक-
स्तास्त्रैलोक्यविलक्षणप्रकृतयो वामा प्रसीदन्तु[1] ते ॥ (घ, ङ)

अथ किलकिञ्चितम्—

सितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम् ।
साङ्कर्यं किलकिञ्चितमभीष्टतमसङ्गमादिजाद्दर्पात् ॥११८॥

यथा—

पाणिरोधमविरोधितवान्छं भर्त्सनाश्च मधुरस्मितगर्भाः ।
कामिनः स्म कुरुते करभोरूर्ह्रीरि शुष्करुदितञ्च सुखेऽपि[2] । (स)

अथ मोट्टायितम्—

तद्भावभाविते चित्ते वल्लभस्य कथादिषु ।
मोट्टायितमिति प्राहुः कर्णकण्डूयनादिकम् ॥ ११९ ॥

यथा—

सुभग ! त्वत्कथारम्भे कर्णकण्डूतिलालसा ।
उज्जृम्भबदनाम्भोजा भिनत्त्यङ्गानि साङ्गना ॥ (ह)

अथ कुट्टमितम्—

केशास्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात् ।
प्राहुः कुट्टमितं नाम शिरःकरविधूननम् ॥ १२० ॥

यथा—पल्लवोपमितिसाम्यसपत्नं दष्टवत्यधरबिम्बमभीष्टे ।

प्रिये पर केवल प्राणान् अर्पयन्तीति अन्वय । न सपूर्णदृष्टिं गर्वात् कटाक्षमात्रम् । अत्यन्ताभिमते वस्तुनि सुरते ।

(वि, स) पाणिरोधमिति । करभोरू कामिन पाणिरोधादिकमविरोधिते-त्यादि विशिष्ट यथा स्यात् तथा कुरुते स्म । स्पष्टमन्यत् ।

(वि, ह) तद् भाव इति । वल्लभस्य कथादिषु प्रसङ्गेषु केनाप्यारभ्यमाणेषु तद्भावभाविते तदनुरागनिर्भरिते चित्ते सति कर्णकण्डूयनादिकं मोट्टायितमिति प्राहु इत्यर्थ । कथासु इत्यादिपदादिङ्गितपरिग्रह । कण्डूयनादिकमित्यादिपदादङ्गभङ्गीचरणभूमिलि-खनपरिग्रह । सुभगेत्यादि स्पष्टम् ।

(वि, ह) पल्लवोपमिति इति—अभीष्टे प्रियेऽधरबिम्ब दष्टवति सति अर्थात्

(लो,ऊ) अत्यन्ताभिमते इति—निषेधात्मको विधि किमनेनास्माकम् इत्याद्य-नादरयुक्तमेवाभिमतवस्तुन अपरिग्रह इत्यर्थ ।

(लो, ऋ) पल्लवेति । पल्लवस्य उपमित्या साम्येन सपत्नम् । द्वयोरपि कर-

---

1 'प्रसिध्यन्तु ते' (च ट. पु) 2 'सुखेऽपि' (ग, च. पु.)

पर्य्यकूजि सरजेव तरण्यास्तारलोलवलयेन करेण ॥ (ख, ऋ)

अथ विभ्रम —

त्वरया हर्षरागादेर्दयितागमनादिषु ।
अस्थाने भूषणादीनां विन्यासो विभ्रमो मतः ॥ १२१ ॥

श्रुत्वाऽऽयान्त बहि कान्तमसमाप्तविभूषया ।
भालेऽञ्जन दृशोर्लाक्षा कपोले तिलकः कृत ॥

अथ ललितम्—

सुकुमारतयाङ्गानां विन्यासो ललितं भवेत् ॥ १२२ ॥ (क)

यथा—

गुरुतरकलनूपुरानुनाद [1]सललितनर्त्तितवामपादपद्मा ।
इतरदनतिलोलमादधाना पदमथ मन्मथमन्थर जगाम ॥ (ख)*

अथ मद —

मदो विकारः सौभाग्ययौवनाद्यवलेपज. ॥ १२३ ॥

यथा—

मा गर्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति ।

निषेधार्थं धूयमानेन करेण पर्य्यकूजीत्यन्वय । कीदृशेन करेण तारस्वरलोलवलयेन । तदुत्प्रेक्षते-सरजेवेति । धर्मिणोऽधरत्वतमेव तदवयवस्यापि करस्य रुक् इतिभाव । अधरबिम्ब कीदृशम् [1] उपमित्यर्थेन साम्येन पल्लवपद्मम् । ५७।

(वि, क) सुकुमारतयेति—अङ्गानां विन्यासो विलक्षणन्यास सुकुमारतया कोमलतया ।

(वि, ख) गुरुतरेत्यादिक नर्त्तनक्रियाविशेषणम् । ललित सुन्दरम्, ननु प्रकृत ललितभावम्, नर्तनस्यैव तत्त्वात् । इतरत् पदम् ।

(वि, ग) मदो विकार इति । अवलेपो गर्व । मा गर्वमिति-अन्यनायिकाया पतिर्मौभाग्याऽधीनगर्वं सूचयन्त्या तत्सख्या तत्सपत्न्यामुक्तिरियम् । हे सखि! मम कपोलतले कान्तस्वहस्तालिखिता मञ्जरी पुष्पश्रेणिश्च चकास्ति शोभते इति गर्वं

धरयो पल्लवस्तु उपमानत्वेन निर्दिश्यते ।

(लो, ऋ) मा गर्वमिति । वेषपु कान्तस्य हस्तसम्बन्धी ।

---

* गा बाला ललितं सुन्दर ललित वामपादरूपं पद्म यया तथा गती गुरुतर अतिमहान् कल नूपुरस्य अनुनादो रवो यस्मिन् तादृशमितरत् पद दक्षिण पदमनतिलोल शनैरादधाना भूमौ विन्यस्यन्ती मन्मथेन कामवशेन मन्थरं मन्द जगाम ।

1 सु' (ट ठ)

अन्याऽपि किं न [1]खलु भाजनमीदृशीनां
वैरी न चेद्भवति वेपथुरन्तरायः ॥ (ग, ङ)

अथ [2]विकृतम्—

वक्तव्यकालेऽप्यवचो व्रीडया विकृतं मतम् ॥ १२४ ॥

यथा—

दूरागतेन कुशलं पृष्टा नोवाच सा मया किञ्चित् ।
पर्य्यश्रुणी तु नयने तस्याः कथयांबभूवतुः सर्वम् ॥ (घ)

अथ तपनम्—

तपनं प्रियविच्छेदे [3]स्मरावेशोत्थचेष्टितम् ॥ १२५ ॥

यथा—

श्वासान्मुञ्चति भूतले विलुठति त्वन्मार्गमालोकते
[4]दीर्घं रोदिति विक्षिपत्यत इतः क्षामां भुजावल्लरीम् ।
किञ्च प्राणसमान काङ्क्षितवती स्वप्नेऽपि ते सङ्गमं
निद्रां वाञ्छति न प्रयच्छति पुनर्दग्धो विधिस्तामपि ॥ (ङ, लृ)

अथ मौग्ध्यम्—

अज्ञानादिव या पृच्छा प्रतीतस्यापि वस्तुनः ।

मा उद्वह। कथमित्यत आह-अन्यापीति। अन्या तव सपत्नी मम सखी किं कथोले तन्न लिखतीत्यत्राह । वैरीति-वेपथुरत्र मञ्जरीलिखनाधिकारणमलाभो नायिकाया एव पत्युर्भावातिशयदर्शनेन भावोदयात्-ननु लेखकस्य पत्यु पाणे', तस्य गर्वितनायिकाविकारत्वाभावात् ।

(वि, घ) दूरागतेनेति। सख्यौ सख्युरुक्तिरियम् । मया कुशलं पृष्टेत्यन्वय सर्वमिनिविरहार्धीनं तत् तद् त्वमित्यर्थ ।

(वि ङ) श्वासान् मुञ्चति इति। इयं विरहेणार्धचेष्टा नायकं कथयन्ती उक्ति । हे तस्या प्राणसमान ! तव विरहे तव प्रिया श्वासान् मुञ्चतीत्यादि । क्षामां क्षीणाम् चेष्टान्तरकथनार्थमाह—किञ्चेति । तामपि निद्रामपि ।

(वि, च) अज्ञानादिवेति—प्रतीतस्यापि वस्तुन अज्ञानादिव या वल्लभस्य

(लो, लृ) किञ्चेति । प्राणसमानेति प्रियस्य सम्बोधनम् ।

---

1 'सखि' (घ. च पु.)
2 'विकृतम्' (ट. ड. पु.)
3 '-वेगो-' (ख. ग. च. पु)
4 'दीनं' (ख. ग. पु)

वल्लभस्य पुरः प्रोक्तं मोग्ध्यं तत्तत्त्ववेदिभिः ॥ १२६ ॥

यथा—

के द्रुमास्ते क्व वा ग्रामे सन्ति केन प्ररोपिता ।
नाथ[1] मत्कङ्कणन्यस्त येषा मुक्ताफल फलम् ॥ (च)

अथ विक्षेप —

भूषणामर्द्दरचना वृथा[1] विष्वगवेक्षणम् ।
रहस्याऽऽख्यानमीषच्च विक्षेपो दयितान्तिके ॥ १२७ ॥

यथा—

धम्मिल्लमर्द्दमुक्त कलयति तिलक तथासकलम् ।
किञ्चिद्वदति रहस्य चकित विष्वगवेक्षते तन्वी ॥ (छ)

अथ कुतूहलम्—

रम्यवस्तुसमालोके लोलता स्यात् कुतूहलम् ॥ १२८ ॥

यथा—

प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्वरागमेव ।
उत्सृष्टलीलागतिरा गवाक्षादलक्तकाङ्का पदवीं ततान ॥ (ज)

अथ हसितम्—

हसितन्तु वृथाहासो यौवनोद्भेदसंभव. ॥ १२९ ॥
अकस्मादेव तन्वङ्गी जहास यदिय पुन ।
नून प्रसूनबाणोऽस्यां स्वाराज्यमधितिष्ठति ॥' (झ)

पुर पूर्व्वा इत्यर्थ । के द्रुमा इति। येषा फल मुक्ताफलमित्यन्वय ।

(वि, छ) भूषणामिति—विष्वक् सर्वतो वृथान्वेक्षणमित्यन्वय । दयितान्तिके इति सर्वत्रान्वय । धम्मिल्लमिति—सयतकेशम्, अर्द्दमुक्तम् । तिलकमगकलय तन्वी कलयते करुते इत्यर्थ । अत्र पूर्व्वार्द्धे नायकानुरागोद्दीपकम्, परार्द्धे लज्जया ।

(वि, ज) प्रसाधिकालम्बितमिति—इन्दुमत्या स्वय वृतस्य अजस्य पुरीप्रवेशे दृष्टो स्त्रिया स्त्रियावर्णनमिदम् । प्रसाधिकया स्त्रिया आलम्बितम् अग्रपाद पदाग्रम् द्वरागमशुष्कमलक्तकमेव काचित् पुरन्ध्री आक्षिप्य आकृष्य उत्सृष्टलीलागति त्यक्तलीलागति गती पदवीमागवाक्षात् गवाक्षपर्य्यन्तम् अलक्तकाङ्का ततानेत्यन्वय ।

(वि, झ) अकस्मादेवेति—इय तन्वी यत् पुनरकस्मादेव जहास तेन इति पूरणादुत्तरार्द्धान्वय । स्वाराज्य स्वर्गराज्यम् इयमेव स्वर्ग इति भाव ।

---

1 'मिथ्या' (च छ ज ञ)

अथ चकितम्—

कुतोऽपि दयितस्याग्रे चकितं भयसंभ्रमः ॥ १३० ॥

यथा—

त्रस्यन्ती चलशफरीविघट्टितोरु-
वामोरूरतिशयमाप विभ्रमस्य ।
क्षुभ्यन्ति, [1]प्रततमहो विनापि हेतो-
र्लीलाभिः किमु सति कारणे तरुण्य ॥ (अ)

अथ केलिः—

विहारे[2] सह कान्तेन क्रीडितं केलिरुच्यते ॥ १३१ ॥

यथा—

व्यपोहितु लोचनतो मुखानिलै-
रपारयन्त किल पुष्पज रज ।
पयोधरेणोरसि काचिदुन्मनाः
प्रिय जघानोन्नतपीवरस्तनी ॥ ' (ट)

अथ मुग्धाकन्ययोरनुरागेङ्गितानि—

दृष्ट्वा दर्शयति व्रीडां सम्मुखं नैव पश्यति ।
प्रच्छन्नं वा भ्रमन्तं वाऽतिक्रान्तं पश्यति प्रियम् ।
बहुधा पृच्छ्यमानाऽपि मन्दमन्दमधोमुखी ।
सगद्गदं स्वरं किञ्चित् प्रियं प्रायेण भाषते ।

(वि, अ) कुतोऽपीति—दयितस्याग्रे कुतोऽपि हेतो भयसंभ्रम व्याकुलता इत्यर्थ । त्रस्यन्तीति—दयितेन सह जलक्रीडायां नायिकाया भयविभ्रमवर्णनमिदम् । वामोरू चलशफरीभिर्विघट्टितोरू सती त्रस्यन्ती विभ्रमस्य विलासस्याऽतिशयमाप इत्यन्वय । अर्थान्तरन्यासमाह क्षुभ्यन्तीति । अहो तरुण्य हेतोर्विनापि लीलाभि प्रततमतिशय क्षुभ्यन्ति सचलन्ति कारणे तु सति किमु इत्यर्थ ।

(वि, ट) व्यपोहितुमिति—काचिदुन्नतपीवरस्तनी उन्मना कामोद्विग्नमना प्रियमुरसि पीवरस्तनेन जघान । कीदृशी प्रियम् पुष्पज रज तस्या लोचनतो मुखानिलैर्व्यपोहितुम् अपाकर्तुम् अपारयन्नम् ।

(वि, ठ) मुग्धाकन्ययोरनुरागेङ्गितानि स्पष्टानि । अथ सकलनायिकानुरागेङ्गितान्याह । सव्यान वस्त्रम् (उत्तरीयम्)

---

1 'प्रगभ' (क ग. घ)
2 'विलासे' (ख च घ)

अन्यैः प्रवर्त्तितां शश्वत् सावधाना च तत्कथाम् ।
शृणोत्यन्यत्र दत्तात्मा प्रिये बालानुरागिणी ॥ १३२ ॥ (ठ)

अथ सकलानामपि नायिकानामनुरागोद्भितानि—

चिराय सन्निधे स्थानं प्रियस्य बहु मन्यते ।
विलोचनपथञ्चास्य न गच्छत्यनलङ्कृता ।
कापि कुन्तलसंव्यानसंयमव्यपदेशतः । (ड)
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ।
आच्छादयति[1] वागाद्यैः प्रियस्य परिचारकान् ।
विश्वसित्यस्य मित्रेषु बहुमानं करोति च ।
सखीमध्ये गुणान् ब्रूते स्वधनं प्रददाति च । (ढ)
सुप्ते स्वपिति दुःखेऽस्य दुःखं धत्ते सुखे सुखम् ।
स्थिता दृष्टिपथे शश्वत् प्रिये पश्यति दूरतः । (ण, ए)
आभाषते परिजनं [2]सम्मुखे स्वरविक्रियम् ।
यत् किञ्चिदपि संवीक्ष्य कुरुते हसितं मुधा । (त)
कर्णकण्डूयनं तद्वत् कबरीमोक्षसंयमौ ।
जृम्भते स्फोटयत्यङ्गं बालमाश्लिष्य चुम्बति । (थ)
भाले तथा वयस्याया रचयेत्तिलकक्रियाम् ।
अङ्गुष्ठाग्रेण लिखति सकटाक्षं निरीक्षते । (द)

(वि, ड) वागाद्यैरित्यादिपदात् ताम्बूलदानादिपरिग्रह ।

(वि, ढ) स्वधन ददाति च इत्यत्र याचकाय भर्त्ता इति शेष ।

(वि, ण) प्रिये दूरत पश्यति सति इति शश्वत् वारम्वारम् अस्य दृष्टिपथे स्थिता भवतीति शेष. ।

(वि, त) समुग्धस्वरविक्रिय मधुरस्वरविकार यथा स्यात्तथा ।

(वि, थ) स्फोटयति लीलया भङ्गयति। बालचुम्बन पतिसम्मुखे ।

(वि, द) सकटाक्षमिति । पूर्वं कटाक्षपूर्वकहासोक्ति इदानी कटाक्षमात्रस्य इति भेद ।

(लो, ए) स्थितेति । प्रियस्य दृष्टिपथे स्थिता तस्मिन् दूरत पश्यति सति । मुग्धस्वरविकारादियुक्तपरिजनाभाषणादीनि स्वाधरदशनपर्य्यन्तानि कर्म्माणि करोति इत्यर्थ । यदि च प्रियस्य कथा कथयति तदाऽधोमुखी सती कथयति ।

---

1 'आनन्दयति' (ट ठ ड पु)

2 'सम्मुग्ध स्मरविक्रियम्' (इति क ख ग. पु)

दशति स्वाधरं चापि ग्रते प्रियमधोमुखी ।
न मुञ्चति च तं देशं नायको यत्र दृश्यते । (ध)
आगच्छति गृहं तस्य कार्य्यव्याजेन केनचित् । (न)
दत्तं किमपि कान्तेन धृत्वाङ्के मुहुरीक्षते । (पे)
नित्यं हृष्यति तद्योगे वियोगे मलिना कृशा ।
मन्यते बहु तच्छीलं तत् प्रियं मन्यते प्रियम् ।
प्रार्थयत्यल्पमूल्यानि सुप्ता न परिवर्त्तते । (प)
विकारान् सात्त्विकानस्य सम्मुखं[1] नाधिगच्छति । (फ)
भाषते सूनृतं स्निग्धमनुरक्ता नितम्बिनी ॥ १३३ ॥
एतेष्वधिकलज्जानि चेष्टितानि नवस्त्रियाः । (ओ)
मध्यव्रीडानि मध्यायाः स्रंसमानत्रपाणि तु ।
अन्यस्त्रिया प्रगल्भायास्तथा स्युर्वारयोषितः ॥ १३४ ॥

दिङ्मात्रं यथा मम—

अन्तिकगतमपि मामियमलोकयन्तीव[2] हन्त दृष्ट्वाऽपि ।
सरसनखक्षतलक्षितमाविष्कुरुते भुजामूलम् ॥ (ब)
[3]लेखप्रस्थापनैः स्निग्धैर्वीक्षितैर्मृदुभाषितैः ।
दूतीसंप्रेषणैर्नार्य्या भावाभिव्यक्तिरिष्यते ॥ १३५ ॥

दूत्यश्च—

दूत्यः सखी नटी दासी धात्रेयी प्रतिवेशिनी ।

(वि, ध) अधरदंशनमपि लीलाविशेष ।
(वि, न) आगच्छति गृहं तस्येति भिन्नगृहस्थितस्य इत्यर्थ ।
(वि, प) प्रार्थयत्यल्पमूल्यानीति—बहुमूल्यप्रार्थने तदप्रीतिभयमित्यर्थ ।
(वि, फ) सम्मुखं नाधिगच्छति किन्तु पार्श्वस्था एव इत्यर्थः ।
(वि, ब) अन्तिकगतमपीति। सख्यौ सख्युक्तिरियम् । हन्त हर्षे दृष्ट्वापि इयं प्रियान्तिकगतमपि माम् अलोकयन्तीव अपश्यन्तीव सरसनखक्षतेन लक्षितं चिह्नितं भुजामूलं बाहुमूलम् आविष्कुरुते इत्यर्थ ।

(लो, पे) दत्तमिति । किमपि तुच्छमपि वस्तु ।
(लो, ओ) एतेषु अनुरागोद्रेतेषु मध्ये ।

---

1 'संमुखी' (क. ख. पु)
2 'लोकयतीव' (क. ख. च. पु.)
3 इत. प्राग्, 'तथा' इति (क. च. पु.)

वाला प्रव्राजिता कारू[1] शिल्पिन्याद्या. स्वयं तथा ॥ १३६ ॥

कारू रजकीप्रभृति'। शिल्पिनी चित्रकारादिस्त्री। आदिशब्दात्ताम्बूलिक-गान्धिकस्त्रीप्रभृतय। तत्र सखी यथा, श्वासान्मुञ्चतीत्यादि। स्वय दूती। यथा मम—

पन्थिअ ! पिआसिओ विअ लक्खीअसि जासिता किमणत्तो।
ण मण पि वारओ इध[2], अत्थि घरे घणरस पिअन्ताणम् ॥(भ, औ)

एताश्च नायिकाविषये नायकानामपि दूत्यो भवन्ति।

दूतीगुणानाह—

कलाकौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः।
माधुर्य्यं नर्म्म विज्ञानं वाग्मिता चेति तद् गुणा ।
एता अपि यथोचित्यादुत्तमाधममध्यमा. ॥ १३७ ॥

एता दूत्य ।

अथ प्रतिनायक'—

धीरोद्धत. पापकारी व्यसनी प्रतिनायकः ॥ १३८ ॥ (म)

यथा रामस्य रावण'।

अथोद्दीपनविभावा — (य, अ)

(वि, भ) स्वय तथेति स्वयमपि दूती। पन्थिअ इति।

पथिक ! पिपासुरिव लक्ष्यसे यासि तत् किमन्यत्र।
न मनागपि वारक इहास्ति गृहे घनरस पिबताम् ॥ इति संस्कृतम्

मनाक अल्प। घनरसम् जलम्। व्यङ्ग्यार्थस्तु त्व पिपासु रसास्वादेच्छु। घन-रस मुखेन निहित शृङ्गाररस पिबताम् आस्वादयताम्। वारकोऽल्पोऽपि नास्तीत्यर्थ।

(वि, म) प्रतिनायक इति वीररौद्ररसयोरित्यर्थ।

(वि, य) इत्यमालम्बनविभावप्रदर्शन समाप्य उद्दीपनविभावमाह—अथेति।

(लो, औ) पन्थिअ इति। पथिक ! पिपासुरिव लक्ष्यसे यासि तत् किमन्यत्र। न मनागपि वारक इहास्ति गृहे घनरस पिबताम् ॥ घनरस जलम्। व्यङ्ग्यार्थस्तु घनरसं मामनिवारितमुपभुङ्क्ष्व।

(लो, अ) एव सपरिकर विभावस्य आलम्बनाख्य भेद निरूप्य उद्दीपनाख्य भेद निरूपयन्नाह—अथोद्दीपनेत्यादि।

---

1 'कारुशिल्पिन्याद्या' इति (ब प फ पु)
2 'ह' (ब पु)

उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये ॥ १३९ ॥

ते च—

आलम्बनस्य चेष्टाद्या देशकालादयस्तथा ॥ १४० ॥

चेष्टाद्या[1] इत्यादिशब्दाद्रूपभूषणादय । कालादय-यादिशब्दाच्चन्द्रचन्दनकोकिलालापभ्रमरझङ्कारादय ।

तत्र चन्द्रो[2] यथा मम—

करमुदयमहीधरस्तनाग्रे गलिततम पटलाशुके निवेश्य ।
विकसितकुमुदेक्षण विचुम्बत्ययममरेशदिशो मुख सुधाशु ॥ (र, आ)

यो यस्य रसस्य उद्दीपनविभाव स तत् स्वरूपवर्णने वक्ष्यते ।

अथानुभावा —

[3]उद्बुद्धं कारणै. स्वैः स्वैर्बहिर्भावं प्रकाशयन् ।
लोके यः कार्यरूप. सोऽनुभावः काव्यनाट्ययोः ॥१४१॥(ल,इ)

(वि, र) करमुदयमहीधरेति—अय सुधाशु अमरेशस्य इन्द्रस्य दिशा प्राच्या मुख विचुम्बति । किं कृत्वा गलितं तम पटलरूपम् अशुक यस्मात् तादृशे उदयमहीधररूपस्य स्तनस्याग्रे कर रश्मिमेव कर निवेश्य । यद्यप्यत्र चन्द्रो नायक एव न उद्दीपनविभाव । तथापि चन्द्रदिशोर्नायकनायिकयोर्वक्त्रान्तदर्शनाद् उद्दीपनस्य वक्त्रशब्दस्य चन्द्र उद्दीपक । स्फुटमुदाहरणन्तु—

कर्पूरधूलिधवलद्युतिपूरधौत-
दिग्मण्डले शिशिररोचिषि तस्य यून ।
लीलाशिरोऽशुकनिवेशविशेषकल्पि-
व्यक्तस्तनोन्नतिरभूज्जयनाऽनना सा ॥ इति

(वि, ल) इत्थ विभावान् सामान्य अनुभावानाह । अथ अनुभावा इति । उद्बुद्धमिति । स्वै स्वै कारणै उद्बुद्ध भाव रत्यादिक बहि प्रकाशयन् इत्यर्थ । बहिर्दृष्ट सन् रत्यादिभाव सामाजिके प्रकाशयतीत्यर्थ ।

(लो, आ) करमुदयेति—कर किरण हस्तश्च कुमुदानाम् ईक्षण दर्शन पक्षे कुमुदमेव ईक्षण चक्षुर्यस्य । एवविध चन्द्र प्रस्तुतस्य वक्त्रादिरसमुद्दीपयति ।

(लो, इ) उद्देशक्रमप्राप्तमनुभाव निरूपयितुमवतारयति । अथेति—उद्बुद्धमिति रत्यादेर्वासनात्मनोलीनस्य रत्यादिभावनस्य उद्बोध यदि प्रकटयतीत्यर्थ ।

---

1 'चेष्टाद्या इत्यादिशब्दाद्' (क ङ)
2 'चन्द्रोदयो' (क ग ङ) 3 'उद्बुद्ध' (ग ङ)

यः खलु लोके सीतादिचन्द्रादिभि स्वै स्वैरालम्बनोद्दीपनकारणै रामादेरन्तरुद्बुद्धम् रत्यादिक बहिः प्रकाशयन् कार्य्यमित्युच्यते, स काव्यनाट्ययो पुनरनुभावः। क पुनरसाविलाह—

उक्ताः स्त्रीणामलङ्कारा अङ्गजाश्च स्वभावजाः।
तद्रूपाः सात्त्विका भावास्तथा चेष्टाः परा अपि ॥ १४२ ॥(व)

तद्रूपा अनुभावस्वरूपा तत्र यो यस्य रसस्यानुभाव स तत् स्वरूपवर्णने वक्ष्यते। तत्र सात्त्विका —

विकारा. सत्त्वसंभूताः सात्त्विका. परिकीर्त्तिताः ॥ १४३ ॥

सत्त्व नाम स्वात्मविश्रामप्रकाशकारी कश्चनान्तरो धर्म । (श, ई)

सत्त्वमात्रोद्भवत्वात्ते भिन्ना अप्यनुभावतः ॥ १४४ ॥

गोबलीवर्दन्यायेन इति शेष । के ते इत्याह—

स्तम्भः स्वेदोथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका स्मृताः ॥ १४५ ॥ (प,उ)

तत्र—

स्तम्भश्चेष्टाप्रतीघातो भयहर्षामयादिभिः।

(वि, च) उक्ताः स्त्रीणामिति—अङ्गजा स्वाभाविकाश्च ये स्त्रीणामष्टाविंशतिरलङ्कारा सात्त्विका उक्ता तथा अपरा अपि तासा पुसा वा या चेष्टा वक्ष्यमाणास्ता सर्वा सात्त्विकास्तद्रूपा अनुभावरूपा इत्यर्थ ।

(वि, श) आत्मविश्रामेति—रजस्तमोऽधीनविकाररहित्येन आत्मन स्थिति विश्राम । तत् प्रकाश तदुपलब्धिस्तत्कारीत्यर्थ ।

(वि, प) ते भिन्ना इति—लोके य कार्यरूप सोऽनुभाव इत्यनेन रत्यादे कार्यमात्रस्यैवानुभावत्वमुक्तम् । उक्तसात्त्विकभावानामपि तत्कार्यकृत् अनुभावतो भिन्ना इत्यर्थ । ननु किं तर्हि सात्त्विकेन पृथगुपादानमित्यत आह—गोबलीवर्देति। गोत्वेन प्राप्तस्याऽपि बलीवर्दस्यैव कार्यत्वेन प्राप्तानामपि सात्त्विकानां प्राशस्त्यार्थं पृथगुपादानमित्यर्थ । प्राशस्त्यञ्च अन्यकार्यापेक्षया रत्यादिप्रकर्षबोधकत्वरूप प्राधान्यम्। तथा अपरा अपि सात्त्विका इति यदुक्त तान् पृच्छति।

के ते इत्यष्टाविति—इत्यष्टावपीत्यर्थ ।

(लो, ई) कश्चनान्तरो धर्म्मो यच परगतदुःखहर्षादिभावनायामत्यन्ताऽनुकूलान्तःकरणत्वम्। तस्य च समाहितमनस्त्वेन राघवादि समानदान्तरत्वम्।

(लो, उ) गोबलीवर्दन्यायेन न तु स्वरूपेण।

वपुर्जलोद्गमः[1] स्वेदो रतिघर्म्मश्रमादिभिः ।
हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया ।
मदसम्मदपीडाद्यैः[2] वैस्वर्य्यं गद्गदं विदुः ।
रागद्वेष[3] श्रमादिभ्यः कम्पो गात्रस्य वेपथुः ।
विषादमदरोषाद्यैर्वर्णान्यत्वं विवर्णता ।
अश्रु नेत्रोद्भवं वारि क्रोधदुःखहर्षजम् ।
प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिरोधतिः ॥ १४६ ॥ (स, ऊ)

यथा मम—

तनुस्पर्शादस्या दृगमुकुलिते हन्त नयने
उदञ्चद्रोमाञ्च व्रजति जडतामङ्गमखिलम् ।
कपोलौ घर्म्मार्द्रौ ध्रुवमुपरताशेषविषय
मन सान्द्रानन्द स्पृशति झटिति ब्रह्म परमम् ॥ (ह)

एवमन्यत् । अथ व्यभिचारिणः—

विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च 'तद्विदः ॥१४७॥(च, ऋ)

(वि, स) आमयादिभिरित्यत्र आमयो रोग आदिपदात् शोकपरिग्रह । रतिघर्म्मेत्यत्र घर्म्मे आतप, आदिपदात् ज्वरपरिग्रह भयादिभ्य इत्यत्र आदिपदात् शीतपरिग्रह । मदसम्मदेत्यत्र मदो मत्तता सम्मदो हर्ष । पाडाद्यैरित्यादिपदात् अन्यन्तरदितपरिग्रह । चेष्टाज्ञानयोर्निरोधतिरुक्तादि ।

(वि, ह) तनुस्पर्शादस्या इति । अस्या नायिकायास्तनुस्पर्शान्नयन-मुकुलादिकपोलघर्म्मान्ता जाता इत्यर्थ । अतो ध्रुव निश्चितम् उपरताशेषविषय त्यक्त-समस्तविषय मन परम ब्रह्म झटिति स्पृशतीत्यर्थ । अत्र पुनो रोमाञ्चादयस्त्रय गर्हित्वेन ।

(वि, च) स्थायिन्युन्मग्न इति—स्थायिनि रत्यादौ आभिमुख्येन इत्यन्वय

(लो, ऊ) सम्मदो हर्ष ।
चेष्टाज्ञानयोर्निरोधतिरभाव ।

(लो, ऋ) अथ व्यभिचारिण उद्देशक्रमप्राप्त्या इति शेष । इत्यादौ तु लक्षण-करणाये निर्वेदादयो बुद्बुदप्राया । ते व्यधिकत्रिंशत्प्रकारा व्यभिचारिण इत्यर्थ ।

---

1 '-लोदय' (ग घ पु)
2 'हर्षाद्यै' (च ट. पु.)
3 'रागद्वेष' (ज ट. ड. पु.)
4 'ते मता' (क ख. पु)

स्थिरतया वर्तमाने हि रत्यादौ निर्वेदादय प्रादुर्भावतिरोभावाभ्याम् आभिमुख्येन चरणाद् व्यभिचारिणः [1]कथ्यन्ते । के ते इत्याह—(क)

निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोध
स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहित्थाः ।
औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसंत्रासलज्जा
हर्षासूयाविषादा सधृतिचपलता ग्लानिचिन्तावितर्काः ॥ १४८ ॥
(स, ऋ)

तत्र निर्वेद —

तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननम् ।
दैन्यचिन्ताश्रुनिःश्वासवैवर्ण्योच्छ्वसितादिकृत् ॥ १४९ ॥ (ग)

तत्र तत्त्वज्ञानान्निर्वेदो यथा—(घ)

आभिमुख्यञ्च आस्वादविशेषव्यञ्जने सहायत्वम् । केचित्तु चित्तपर स्थायिपदम् । तत्र उन्मेषेत्यादिरर्थ इत्याहु ।

(वि, क) उन्मेषेत्यादयो व्याख्यायन्ते—**स्थिरतये**ति । प्रादुर्भावेत्युन्मग्नतायास्तिरोभावेति निर्मग्नताया व्याख्या । प्रादुर्भावतिरोभावौ चोत्पत्तिविनाशौ एव, न तु प्रकाशाप्रकाशौ । मरणादेस्तथात्वाभावात् ।

(वि, ख) स्मृतिमतिर्भाहिता इत्यस्य विषादा इत्यस्यान्वय । साहित्यञ्च उन्नयेव नतु एषा परस्परसाहित्यम् । एकैकस्य तथात्वात् ।

(वि, ग) **तत्त्वज्ञाने**ति—तत्त्वज्ञानापदीर्ष्यादेरिति आदिपदात् योगाभ्यास प्रवृत्तेश्च स्वस्यावमाननमित्यर्थ ।

(लो, ऋ) के किमाख्या [2] एते च निर्वेदादयो वितर्कान्ता भावा उद्देशतस्त्रयस्त्रिंशदुक्ता । अन्या चित्तस्य वृत्तय एषामेव वक्ष्यमाणविभावानुभावरूपतया एष्वेवान्तर्भवितुमर्हन्तीत्यर्थ ।

(लो, ल) **तत्त्वे**ति—अयमर्थ । निर्वेदाख्यसंचारिभावस्य स्वस्यात्मनोऽवमानस्वरूपम् । सच तत्त्वज्ञानादेर्विभावादुत्पद्यते । दैन्यादिकमनुभाव करोति । उच्छ्वासो निश्वास एव मुहुरुत्कटतया उपलब्ध । एवमेषाञ्च सर्वेषामपि व्यभिचारिणा स्वरूपकथनप्रस्तावे विभावानुभावयो कथन वक्ष्यमाणस्वशब्दवाच्यत्वदोषपरीहारा महाकविभिस्तद् द्वारेण निर्देशेनापि महाकाव्येषु स्वप्रतिपत्त्यर्थम् । किंचैव स्वरूपप्रतिज्ञानमपि अतिसुगम भवतीत्याशय ।

---

1 'उच्यन्ते' (प व पु) 2 'वि' (क. ख पु)

मृत्कुम्भवालुकारन्ध्रपिधानरचनार्थिना ।
दक्षिणावर्त्तशङ्खोऽयं हन्त चूर्णीकृतो मया ॥ (घ, ए)

आवेगः सम्भ्रमस्तत्र वर्षजे पिण्डिताङ्गता ।
उत्पातजे त्रस्ततादृङ् धूमाद्याकुलताऽग्निजे ।
राजविद्रवजादेस्तु शस्त्रनागाधि[1]योजनम् ।
गजादेः स्तम्भकम्पादिः पांश्वाद्याकुलताऽनिलात् ।
इष्टाद्यर्थाः शुचोऽनिष्टाज् ज्ञेयाश्चान्ये यथायथम् ॥१५०॥ (ङ,ऐ)

तत्र शत्रुजो यथा—

अर्घ्यमर्घ्यमिति वादिन नृपं सोऽनवेक्ष्य भरताग्रजो यतः ।
क्षत्रकोपदहनार्चिषं ततः सन्दधे दृशमुदग्रतारकाम् ॥ (च, ओ)

एवमन्यदूह्यम् ।

अथ दैन्यम्—

दौर्गत्याद्यैरनौजस्यं दैन्यं मलिनतादिकृत् ॥ १५१ ॥ (औ)

(वि, घ) मृत्कुम्भेति सुगमम् । अनेनाऽन्यापदेशेन ऐहिकस्वल्पदु खनिवारणाय कुकर्म कुर्वता मयाऽधमेन पारत्रिकात्यन्तसुख विनाशितमिति लभ्यते। अत्र च स्वस्य कुकर्मकारित्वेन निन्दा स्वावमाननमेव ।

(वि, ङ) आवेग इति । अतर्कितवस्तूपस्थित्या व्याकुलता सम्भ्रम । निमित्तकारणजन्यस्य तस्य कार्याणि विभिन्नान्याह । वर्षजेति । वर्षजे तस्मिन् सति पिण्डिताङ्गता भवतीत्यर्थ ।

(वि, च) अर्घ्यमर्घ्यमिति रामस्य शत्रुभावेन उपस्थितं परशुराम दृष्ट्वा दशरथस्य सम्भ्रमादुक्ति । प्रथमचरण कथयन्त दशरथमनादृत्य भरताग्रजो राम यतो यस्या दिशि वर्त्तते तत्रोदग्रतारकां दृशं सदधे सन्निहितवान् । कीदृशां दृशं क्षत्रकोपदहनस्यार्चि स्वरूपाम् । अत्र विद्रावणादेरित्यादिपदग्राह्यमुनिजन्ये संभ्रमे सति अर्घ्यानयनादित्वम् ।

(वि, छ) दौर्गत्याद्यैरित्यादि । आद्यपदात् इष्टालाभेन चिन्तया च ।

(लो, ए) मृत्कुम्भेति । अत्र तुच्छसंसारभोगप्रवणतया नि श्रेयससाधनसमर्थोऽयं देहो मया नाशित. । तन् मा धिगिति स्वावमाननम् ।

(लो, ऐ) वर्षजे वृष्टिभवे त्रस्तता अनायत्ततया स्तब्धता । शस्त्रं शरादिभि., नागैर्गजैश्चाभियोजनं समन्तादाक्रमणम्। अन्ये एतज्जनिता लोकप्रसिद्धाः श्रेष्ठा इत्यर्थ. ।

(लो, ओ) अर्घ्यमित्यत्र प्रथमपादे एवावेग ।

(लो, औ) दौर्गत्यं दारिद्र्यम् । अनौजस्यम् ओजो हानि· ।

---

1 'दि' (क. ख. ङ)

यथा—

वृद्धोऽन्धः पतिरेष मञ्चकगतः स्थूणावशेषं गृहं
कालोऽम्यर्णजलागमः, कुशलिनी वत्सस्य वार्तापि नो।
यत्नात् सञ्चिततैलबिन्दुघटिका भग्नेति पर्याकुला
दृष्ट्वा गर्भभरालसां निजवधूं श्वश्रूश्चिरं रोदिति ॥ (छ) *

खेदो रत्यध्वगत्यादेः श्वासनिद्रादिकृच्छ्रमः ॥ १४२ ॥

यथा—

सद्यः पुरीपरिसरेषु शिरीषमृद्वी
गत्वा जवात् त्रिचतुराणि पदानि सीता। (झ)
गन्तव्यमस्ति कियदित्यसकृद् ब्रुवाणा
रामाभुजं कृतवती प्रथमावतारम् ॥ (ज)

अथ मदः—

सम्मोहानन्दसंभेदो मदो मद्योपयोगजः।
अमुना चोत्तमः शेते, मध्यो हसति गायति।
अधमप्रकृतिश्चापि परुषं वक्ति रोदिति ॥ १४३ ॥

अनौजस्यं दुर्बलता। **वृद्धोऽन्ध** इति—वृद्धान्धदरिद्रमर्तृकयाः प्रोषितपुत्रायाः तैलघटिकाभङ्गेन रोदनस्य वर्णनमिदम्। स्थूणास्तम्भः उपरिपटलभङ्गेन तदवशेषता। वत्सस्य पुत्रस्य प्रोषितस्य। तैलबिन्दुर्नतु बहुतैलम्, तच्च वधूप्रवासार्थं सञ्चितम्।

(वि, ज) **सद्यःपुरी**ति—वनवासे चलितायाः सीतायाः पुरीविहारेव वर्णनमिदम्। पौरीषु सभीषु। **प्रथमावतारमि**ति। सीताहरणे तूत्तरोत्तरं बहुभुजत्वं स्यात्।

(वि, झ) **सम्मोहानन्दे**ति—प्रकृतबुद्धितोऽन्याहशबुद्धिः सम्मोहः। सम्भेदो मिलनम्। **अमुने**ति—अमुना मदेन उत्तमादयो मद्यगतार.। प्रातिभमिति त्रिसरकं

(लो, अ) प्रीणि च चतुराणि च त्रिचतुराणि।

(लो, आ) सम्मोहानन्दयो संभेदो मिश्रण। प्रतिभा एव प्रातिभम्। त्रिविधः सखी मधु 'गौडी माध्वी पैष्टी' च।

---

* मम एव पतिः वृद्धः अन्धः मञ्चकगतः (यष्ट्याधिकः चलितुमक्षमः) गृहं स्थूणावशेषम्। स्तम्भमात्रावशिष्टम्। कालोऽम्यर्णजलागमः सन्निहितवर्षाकालः। अतो गृहेऽपि निश्चिन्तः सुखम्। वत्सस्य विदेशं गतस्य कुशलिनी कुशलवती वार्तापि नो प्राप्यते। यस्मात् सञ्चितानां तैलबिन्दूनां घटिका भग्नेति हेतोः पर्याकुला वधूः निजकं गर्भभरालसामागमप्रसवसमयं दृष्ट्वा रोदिति।

यथा—

प्रातिभ त्रिसरकेण गतानां वक्त्रवाक्यरचनारमणीय ।
गूढसूचितरहस्यसहासः सुभ्रुवा प्रवृते परिहास ॥ (ऋ, आ)

अथ जडता—

अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः ।
अनिमिषनयननिरीक्षणतूष्णीम्भावादयस्तत्र ॥ १५४ ॥

यथा मम कुवलयाश्वचरिते प्राकृतकाव्ये—

णवरि त जुअजुअल अण्णोण्णगिहिदसजलमन्थरदिट्ठिम् ।
आलेक्खअप्पिअ विअ खणमेत्त तत्थ थिअ मुअसण्णम् ॥ (ञ, इ)

अथोग्रता—

शौर्य्यापराधादिभवं भवेच्चण्डत्वमुग्रता ।
तत्र स्वेदशिरःकम्पतर्जनाताडनादय ॥ १५५ ॥

यथा—

प्रणयिसखीमलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपत
पततु शिरस्यकाण्डयमदण्ड इवैष भुज ॥ (ट)

मधुमदिरा तेन प्रातिभ प्रतिभासमूह गताना सुभ्रुवा परिहास प्रवृते । गूढसूचित-रहस्यवृत्तान्तश्चासौ सहासश्च इति विग्रह । अत्र प्रतिभासमूहप्राप्त्या वक्त्रवाक्येन मधुमद्योपयोगवशात् प्रकृतबुद्धयन्यादृशबुद्धि परिहासहासाभ्या चानन्द ।

(वि, ञ) णवरि तमिति—

केवल तयुवयुगलमन्याऽन्यनिहितसजलमन्थरदृष्टि ।
आलेख्यार्पितमिव क्षणमात्र तत्र स्थितमासन्नम् ॥ इति सस्कृतम् ।

चिरप्रवासागतपतिगृहस्थितपत्नीरूप तयुवयुगल च केवलमालेख्यार्पितमिव क्षणमात्रमासन्नञ्च तत्र स्थितमित्यर्थ । चिरप्रवासागतपतिगृहस्थितपत्नीरूप तत् युवयुगलम् । नवरिशब्द केवल देशी । कीदृशम् अन्योऽन्यनिहितसजलमन्थरदृष्टि । अनेष्टदर्शनाज्जडता ।

(वि, ट) मालतीं हन्तुमुद्यतमघोरघण्ट प्रति माधवस्योक्तिरियम् । यदस्या मालत्या वपु प्रणयिनीनां सखीनां सलीलपरिहासरसेनाधिगतैर्ललितशिरीषपुष्प

(लो, इ) णवरीति—अनन्तर तत् युवयुगलमन्योन्यनिहितसजल-मन्थरदृष्टि । आलेख्यार्पितमिव क्षणमात्र तत्र स्थितम् मुक्तसङ्गम् । युवा च युवतिश्च युवानौ तयोर्युगलम् । अनेष्टदर्शनात् जडता । एवमन्यत्र ।

अथ मोहः—

मोहो विचित्तता भीतिदुःखावेगानु[1]चिन्तनैः ।
[2]मूर्च्छनाज्ञानपतनभ्रमणादर्शनादिकृत् ॥ १५६ ॥

यथा—

तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥ (ठ, ई)

अथ विबोध —

निद्रापगमहेतुभ्यो विबोधश्चेतनागमः ।
जृम्भाङ्गभङ्गनयनमीलनाङ्गावलोककृत् ॥ १५७ ॥

यथा—

चिररतिपरिखेदात्[3] प्राप्तनिद्रासुखाना
चरममपि शयित्वा पूर्वमेव प्रबुद्धा ।
अपरिचलितगात्रा. कुर्वते न प्रियाणा-
मशिथिलभुजचक्राश्लेषभेदं तरुण्यः । (ड)

अथ स्वप्न —

स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः ।
कोपावेगभयग्लानिसुखदुःखादिकारकः ॥ १५८ ॥

हननैरपि नाम्यति । अत्र वपुषि वधाय शस्त्रमुपक्षिपतस्तव शिरसि मम एष भुजोऽकाण्डयमदण्ड इव पततु इत्यर्थः । अकाण्ड आकस्मिक । अत्र माधवस्य शौर्यम् अघोरघण्टस्यापराध । चण्डत्व माधवस्य ।

(वि, ठ) मोह इति । विचित्तता विषयात् विगतचित्तता ज्ञानलोप इति यावत् । तीव्राभिषङ्गेति—हरेण दग्धे कामदेवे रतिर्मोहेन ज्ञानलोपात् क्षणं कृतोपकारेव बभूव । उपकार दर्शयति—अज्ञातेति । मोहेन कीदृशेन तीव्रेणाभिषङ्गेण आपदा (पति मृत्युना) जनितेन । पुन कीदृशेन । इन्द्रियाणा वृत्तिं ग्राहकता सस्तम्भयता प्रतिबध्नता ।

(वि, ड) चिररतिपरिखेदेति । तरुण्यः चरम नायकशयनत पश्चाद् शयित्वा तज्जागरणात् पूर्वमेव प्रबुद्धाप्यपरिचलितगात्रा सत्य प्रियाणामशिथिलभुज चक्रस्य आश्लेषभङ्ग न कुर्वते इत्यर्थ । अत्र विबोध वाच्य एव ।

(लो, ई) तीव्रेति । अभिषङ्ग पराभव ।

---

1 'र्धं' (ग) 2 घूर्णनागात्रपतन' (ग.)
3 'पारिखेदप्राप्तनिद्रा–' (इत्यादि गमत्त पद क ख ग घ)

यथा—

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेषु।[1]
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानाम्
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः[2] पतन्ति ॥ (ढ)

अथापस्मारः—

मनःक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः।
भूपातकम्पप्रस्वेदफेनलालादिकारकः ॥ १५६ ॥

[3]यथा—

आश्लिष्टभूमि रसितारमुच्चै[4]र्ललद्भुजाकारबृहत्तरङ्गम्।
फेनायमानं पतिमापगानामसावपस्मारिणमाशशङ्के ॥ (ण) *

अथ गर्वः—

गर्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः।
अवज्ञासविलासाङ्गदर्शनाविनयादिकृत् ॥ १६० ॥

[5]यथा—

धृतायुधो यावदहं तावदन्यै. किमायुधैः।
यद्वा न सिद्धमस्त्रेण मम तत्केन साध्यताम्[6] ॥ (त)

(वि, ढ) मामाकाशेति। मेघद्वारा यक्षस्य प्रियाया स्वप्नवृत्तिनिवेदनमिदम्। स्वप्नसंदर्शनेषु तव निर्दयाश्लेषहेतोराकाशप्रणिहितभुजं मां पश्यन्तीनां स्थलीदेवतानां मुक्ताकुल्यस्थूला अश्रुबिन्दवो बहुशस्तरुकिसलयेषु न पतन्ति न। अपि तु पतन्त्येव इत्यर्थः।

(वि, ण) आश्लिष्टभूमिमिति—असौ कृष्णः आपगानां नदीनां पतिं समुद्रम् अपस्मारिणम् आशशङ्के। अपस्मारिधर्म्मानाह—आश्लिष्टेत्यादि। अपस्मारी अपि भूमौ पतति। अत्र समुद्रे आरोप्यमाणः पुरुषे स्मार्य्यमाणः अपस्मारः।

(वि, त) गर्व इति। अवज्ञा परस्मिन् सविलासाङ्गमात्मन.। धृतेत्यादिकं स्पष्टम्।

---

* उच्चैः रसितारं शब्दायमानम्। ललन्तः भुजाकारा बृहत्तरङ्गा यस्य तम्; फेनायमानं फेनिलम्।

1 'न' (ढ. पु.) 2 'सा.' (ढ. पु.)
3 'यथेति' (क. ख. पु. नास्ति) 4 'लोलत्' (इति च. ज. पु.)
5 'तच्छौर्यगर्वो यथा' (इति प. फ पु.) 6 'क्ष्यति' (इति ख. पु)

अथ मरणम्—

शरायैर्मरणं जीवत्यागोऽङ्गपतनादिकृत् ॥ १६१ ॥

यथा—

राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥ (थ, उ)

अथालस्यम्—

आलस्यं श्रमगर्भाद्यैर्जाड्यं जृम्भास्मितादिकृत्[1] ॥ १६२ ॥

यथा—

न तथा भूषयत्यङ्गं न तथा भाषते सखीम् ।
जृम्भते मुहुरासीना बाला गर्भभरालसा ॥ (द)

अथामर्षः—

निन्दाक्षेपापमानादेरमर्षोऽभिनिविष्टता ।
नेत्ररागशिरःकम्पभ्रूभङ्गोत्तर्जनादिकृत् ॥ १६३ ॥

यथा—

प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात् ।
नत्वेव[2] दूषयिष्यामि शस्त्रग्रहमहाव्रतम् ॥

अथ निद्रा—

चेतःसंमीलनं निद्रा श्रमक्लममदादिजम्[3] ।
जृम्भादिमीलनोच्छ्वासगात्रभङ्गादिकारणम् ॥ १६४ ॥

(वि, थ) शरायैरिति । ईदृशं मरणं न व्यभिचारिभावः । किन्तु मरणमात्रवचनमिदम् । राममन्मथेत्यादिकमपि मरणमात्रस्यैव उदाहरणम् । व्यभिचारिभावरूपमरणन्तु जातप्रायमेव वर्णनीयम्, नतु जातमित्यग्रे वक्ष्यते । राममन्मथेति—सा निशाचरी ताडितैव निशाचरी अभिसारिका जीवितेशस्य यमस्य जीवितेशस्य प्राणनाथस्य उपनायकस्य वसतिं जगाम । ईदृशी राम एव मन्मथस्तस्य मारकः तस्य शर एव कामोद्दीपकः शरः तेन हृदयेन ताडिता । पुनः कीदृशी दुर्गन्धवत् रुधिरमेव सुगन्धिद्रव्यविशिष्टं रक्तचन्दनं तेन उक्षिता ।

(वि, द) जृम्भाभिनं जृम्भायुक्तहासः । न तथेत्यादि सुगमम् ।

(लो, उ) राममिति । जीवितेशो यमः प्राणेश्वरश्च ।

---

1 'जृम्भाभिनादिकृत्' (इति क. ख. पु.)
2 'नत्वेवम्' (इति ख. च. पु.) 3 'मदादिजा' (इति क. ग. पु.)

यथा—

सार्थकानर्थकपद ब्रवती मन्थराक्षरम् ।
निद्रार्द्धमीलिताक्षी सा लिखितेवास्ति मे हृदि ॥ (ध)

अथावहित्था—

भयगौरवलज्जादे[1] र्हर्षाद्याकारगुप्तिरवहित्था ।
व्यापारान्तरसक्त्यन्यथा[2]भाषणविलोकनादिकरी ॥ १६५ ॥

यथा—

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥ (न)

अथौत्सुक्यम्—

इष्टानवाप्तेरौत्सुक्यं कालक्षेपासहिष्णुता ।
चित्ततापत्वरास्वेदद्दीर्घनि.श्वसितादिकृत् ॥ १६६ ॥

यथा—

य कौमारहर स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभय प्रौढा कदम्बानिला ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेत समुत्कण्ठते ॥

अत्र यत्काव्यप्रकाशकारेण रसस्य प्राधान्यमित्युक्तम्[3] तद्रसनधर्म्म[4]योगित्वाद् व्यभिचारिभावस्यापि रसशब्दवाच्यत्वेन गतार्थं मन्तव्यम् । (प)

(वि, ध) सार्थकेति । कश्चित् निद्राणा प्रिया स्मरत उक्तिरियम् ।

(वि, न) व्यापारान्तरासक्ति कर्म्मान्तरसङ्ग । अन्यथाभाषणम् अन्यथालोकनञ्च हर्षनन्यक्रियातोऽन्यरूपम् । एवं वादिनीति । महेशेन पार्वतीपरिणयघटनावाक्यवादिनि सतीत्यर्थ । अत्र पद्मपत्रगणनमन्यथा क्रिया ।

(वि,प) यः कौमारहर इत्यादि व्याख्यात प्राक् । अत्र उत्कण्ठापदाद्य एवमौत्सुक्यम् । रसनधर्मयोगित्वादिति—अयमत्रयक्रमत्व रसधर्म्म व्यभिचारिभावेऽप्य स्तीत्यर्थ । एतन्मते शृङ्गाराभासा नात्र प्रधानम्, किन्तु तथापि चेत समुत्कण्ठते इत्यनेन व्यङ्ग्ये विस्मय एव प्रधानतया भासते । स चाद्भुतरसस्य स्थायिभावोऽपि शृङ्गाराभासीयश्लोके व्यभिचारिभाव इत्यभिप्रायेण तस्य व्यभिचारिभावत्व युक्तम् । तस्य

---

1 'हर्षादेर्लज्जात्यतार' इति (ख ग घ ङ)
2 'न्यथाभाषण' (इति क ख ङ)
3 'इति' (इति नास्ति च. ज ङ) 4 'तद्रसनधर्मत्वात्' (इति ख ङ)

अथोन्मादः—

चित्तसम्मोह[1] उन्मादः कामशोकभयादिभिः ।
अस्थानहासरुदितगीतप्रलपनादिकृत् ॥ १६७ ॥

यथा मम—

भ्रातर्द्विरेफ ! भवता भ्रमता समन्तात्
प्राणाधिका प्रियतमा मम वीक्षिता किम् ?
(झङ्कारमनुभूय सानन्दम् ।)
व्रूपे किमोमिति सखे ! कथयाशु तन्मे
किं किं व्यवस्यति कुतोऽस्ति च कीदृशीयम् ? ॥ (फ)

अथ शङ्का—

परकौर्य्यात्मदोषाद्यैः शङ्काऽनर्थस्य तर्कणम् ।
वैवर्ण्यकम्पवैस्वर्य्यपार्श्वालोकास्यशोषकृत् ॥ १६८ ॥

यथा मम—

प्राणेशेन प्रहितनखरेष्वङ्कपत्रेषु रात्रान्ते
जातातङ्का रचयति चिरं चन्दनालेपनानि ।
धत्ते लाक्षामसकृदधरे दत्तदन्तावघाते
श्यामाङ्गीयं चकितमभितश्चक्षुषी विक्षिपन्ती ॥ (ब, ऊ)

चात्र निराकाङ्क्षयवाक्यव्यङ्ग्यत्वेन शृङ्गाराभासापेक्षया प्राधान्यम् । नचैवमद्भुत एव तदात्र रस इति वाच्यम्, लोकविलक्षणगुणबन्धतुल्यविषयत्वे एव विस्मयस्याऽद्भुतरसत्वप्राप्तिर्नान्यविषयत्वे अद्भुतालम्बनतया । वक्ष्यते हि "वस्तुलोकानिगम् आलम्बनं मतम्" इति । "गुणानां तस्य महिमा भवेदुद्दीपनं पुनः" इति च । अत्र च उत्कण्ठया अहेतुरेव विस्मयस्य विषयः । गतार्थमिति अवगतार्थमित्यर्थः । व्यभिचारिभाव एव तत्र रसशब्दार्थ इत्यर्थः ।

(वि, फ) भ्रातर्द्विरेफ इति । द्विरेफं सम्बोध्य विरहोन्मत्तस्य उक्तिरियम् । झङ्कार इत्यादि मध्ये चूर्णकम् । व्रूपे किमोमिति इति झङ्कारस्यैव स्वीकारार्थम् । ओमिति शब्दत्वेनाऽवगतत्वात् । इयं मम नायिका किं किं व्यवस्यति कीदृशी च इति कथय इत्यर्थः ।

(वि, ब) परकौर्य्येति । परस्य क्रूरतया आत्मदोषादिनाऽनर्थस्य चिन्तनं शङ्केत्यर्थः । प्राणेशेनेति—श्यामाङ्गी इत्यन्तायम् । चकितमभितश्चक्षुषी विक्षिपन्ती परीक्ष्यो

(लो, ऊ) प्राणेशेनेति । अत्रैवेत्र स्वार्थे कः ।

---

1 'भ्रम.' (इति स. पु.)

अथ व्याधिः—

व्याधिर्ज्वरादिर्वाताद्यैर्भूमीच्छोत्कम्पनादिकृत् ॥ १७१ ॥

तत्र दाहमयत्वे भूमीच्छादय शैत्यमयत्वे उत्कम्पनादय. ।

स्पष्टमुदाहरणम् । (य)

अत्र त्रास —

निर्घातविद्युदुल्काद्यैस्त्रासः कम्पादिकारकः ॥ १७२ ॥

यथा—

परिस्फुरन्मीनविघट्टितोरव सुराङ्गनास्त्रासविलोलदृष्टय ।
उपाययुः कम्पितपाणिपल्लवाः सखीजनस्याऽपि विलोकनीयताम्॥(र)

अथ व्रीडा—

धाष्टर्याभावो व्रीडा वदनानमनादिकृद्दुराचारात् ॥ १७३ ॥

यथा—मयि सकपटमित्यादि । (ल)

अथ हर्ष.—

हर्षस्त्विष्टावाप्तेर्मन प्रसादोऽश्रुगद्गदादिकर. ॥ १७४ ॥

यथा—

समीक्ष्य पुत्रस्य चिरात् पिता मुख निधानकुम्भस्य यथैव दुर्गत ।
मुदा शरीरे प्रबभूव नात्मन पयोधिरिन्दूदयमूर्च्छितो यथा ॥ (व)

अथासूया—

असूयान्यगुणर्द्धीनामौद्धत्यादसहिष्णुता ।

प्रमाणम् सन्देहनिरासकम् । अत्र स्वीयमनसो विशेषस्य निश्चायकत्वस्य सता सामान्याना मनोभि सामान्यै समर्पितत्वादर्थान्तरन्यास ।

(वि, य) स्पष्टमुदाहरणमिति—'भूमौ पतति तापार्त्ता विप्रयुक्ता वधूरिव । कदलीवानिलोद्धूता ज्वरार्त्ता कम्पते प्रिया' ॥ इति

(वि, र) परिस्फुरदिति—जलकीडायामूरुप्रविष्टमीनकदर्थितानामप्सरसा त्रासवर्णनमिदम् । सखीजनस्यापि विलोकनीयतामुपाययुरित्यन्वय । मीनघट्टितो-रुत्वमजानतोऽन्यजनस्य विलोकनीयता तावदस्तु दिनान्तरेऽपि तया त्व जानत सखीजनस्यापि इत्यर्थ । तच्चानित्रासान्मर्पदशार्दसम्भावनयेति भाव ।

(वि, ल) धाष्टर्याभाव इति—धाष्टर्यमलज्जत्वम् । मयि सकपटमित्यादिक स्मृतेरुदाहरणम् । यत्तन सलज्जमवान्वितमित्यनेन लज्जा ।

(वि, च) समीक्ष्येति—स्पष्टम्, चैत्यस्य दिवौकसस्य चर्णमिदम्—निधान कुम्भस्य निधिकुम्भस्य । मूर्च्छितो वर्द्धित ।

(वि, श) असूयान्येति—औद्धत्यादहङ्कारात् अन्यगुणस्य ऋद्धीनामा-

[1]द्वेषोद्वेषभ्रविभेदावज्ञाक्रोधेङ्गितादिकृत् ॥ १७५ ॥

यथा—

अथ तत्र पाण्डुतनयेन सदसि विहितं[2] मुरद्विषः ।
मानमसहत न चेदिपतिः परवृद्धिमत्सरि मनो हि मानिनाम् ॥ (श)

अथ विषादः—

उपायाभावजन्मा तु विषादः सत्त्वसंक्षयः ।
निःश्वासोच्छ्वासहृत्तापसहायान्वेषणादिकृत् ॥ १७६ ॥

यथा मम—

एषा कुडिलघणेण चिउरकडप्पेण तुह णिबद्धा वेणी ।
मह सहि दारइ दंशइ आआसजट्ठिव्व कालउरइव्व हिअअम् ॥
(प, ऋ)

अथ धृतिः—

ज्ञानाभीष्टागमाद्यैस्तु संपूर्णस्पृहता धृतिः ।
सौहित्यवचनोल्लाससहासप्रतिभादिकृत् ॥ १७७ ॥ (ल)

यथा मम[3]—

कृत्वा दीननिपीडनां निजजने वद्ध्वा वचोविग्रहं[4]
नैवालोच्य गरीयसीरपि चिरादामुष्मिकीर्यातनाः ।

षिष्यानाम् असहिष्णुतेत्यन्वयः । अथ तत्रेति—अथानन्तरं तत्र सभायां पाण्डुतनयेन युधिष्ठिरेण विहितं मुरद्विषः श्रीकृष्णस्य मानं पूजां चेदिपतिः शिशुपालः नासहत । तत्रार्थान्तरन्यासमाह—परवृद्धीति । मत्सरि असहिष्णु ।

(वि, प) सत्वसंक्षयो बलहानिः । उपायाभावजन्मत्वेनास्य दैन्याद्भेदः । एषा कुडिलेति—'एषा कुटिलघनेन चिकुरकलापेन तव निबद्धा वेणी । मम सखि ! दारयति दशति आयासयष्टिरिव कालोरगीव हृदयम्' ॥ इति संस्कृतम् । बद्धवेणिका प्रोषितभर्तृका दृष्ट्वा सख्या विषादोक्तिरियम् । दारणे आयासयष्टिर्दृष्टान्तः, दंशने च कालोरगी ।

(वि, स) कृत्वा दीनेति—संसारविरक्तस्य तपोवनस्थस्य उक्तिरियम् ।

(लो, ऋ) एषेति—एषा कुटिलघनेन चिकुरकलापेन तव निबद्धा वेणी मम सखि ! दारयति दशति आयासयष्टिरिव कालोरगीव हृदयम् ।

(लो, ल) ज्ञानेति—सौहित्यं तृप्तिः ।

---

1 'द्वेषान्वेष' (स. पु.) 2 'मधु' (क. स. पु)
3 'मम'इति नास्ति (स. पु) 4 'विदुरम्' (ट. ड. पु.)

द्रव्यौघाश्चिरसंचिताः[1] खलु मया यस्याः कृते साम्प्रतं
नीवाराञ्जलिनापि केवलमहो सेयं कृतार्था तनुः ॥ (स)

अथ चपलता—

मात्सर्य्यद्वेषरागादेश्चापल्यं त्वनवस्थितिः ।
तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः ॥ १७८ ॥

यथा—

अन्यासु तावदुपमर्दसहासु भृङ्ग !
लोलं विनोदय मनः सुमनोलतासु ।
मुग्धामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं नवमालिकायाः[2] ॥ (ह)

अथ ग्लानिः—

रत्यायासमनस्तापक्षुत्पिपासादिसंभवा ।
ग्लानिर्निष्प्राणताकम्पकार्श्यानुत्साहतादिकृत् ॥ १७९ ॥

यथा—

किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः ।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्म्मः केतकीपत्रगर्भम्[3] ॥ (ख, ए)

यस्यास्तनो. कृते दीननिपीडनादिकं कृत्वा मया द्रव्यौघाः संचिता. सेयं तनुः साम्प्रतं नीवाराञ्जलिनापि खलु कृतार्था इत्यन्वय । निजजने इष्टजने वचोविग्रहं वाक्कलहम् । आमुष्मिकी. पारलौकिकी. । चिरात्चिरकालीनाः ।

(वि, ह) अन्यास्विति—हे भृङ्ग ! उपमर्दसहासु अन्यासु सुमनोलतासु पुष्पलतासु लोलं मनो विनोदय । नवमालिकाया कलिकामकाले किं व्यर्थं कदर्थयसि कीदृशीं मुग्धां मूढां विमर्दसहामित्यर्थः । अजातरजसम् अजाते।परागाश्च । समासोक्ति-वशाच्च नवोढाकदर्थनायकप्रतीति. । अत्र अजातरजसम् अजातरजोयोगामित्यर्थ. । अत्र वाच्यसूत्रस्य व्यङ्ग्यनायकस्य च चपलता ।

(वि, ह) रत्यायासेति—निष्प्राणता बलहानि । हेतुविशेषार्थानत्वेन दैन्य-विषादतो भेद. । किसलयमिवेति । दारुणो दीर्घशोक. अस्या. क्षामं क्षीणं परि-पाण्डु च शरीरं ग्लपयति । तत्रोपमामाह । किसलयमिवेति—बन्धनात् वृन्तात् ।

(लो, ए) किसलयमिवेति—शरदिज इत्यलुक् समास. ।

---

1 'परिसंचिता.' (क. ग. ङ) 2 'मल्लिकाया.' (ग. घ. ङ.)
3 'केतकीगर्भपत्रम्' (क. ख. ङ.)

अथ चिन्ता—

ध्यानं चिन्ता हितानासे. शून्यताश्वासतापकृत् ॥ १८० ॥

यथा [1]मम—

कमलेण विअसिएण सजोएन्ती विरोहिण सामिदिम्बम् ।
करअल पल्लत्थमुही किं चिन्तसि सुमुहि [1] अन्तराहिअहिअया (क,ग)

अथ वितर्क *—

तर्को विचार. संदेहाद् भ्रूशिरोऽङ्गुलिनर्त्तकः ॥ १८१ ॥

यथा—किं स्कन्धः प्रियये त्यादि । (घ)

एते च त्रयस्त्रिंशद् [2]व्यभिचारिभेदा इति यदुक्तं तदुपलक्षणमित्याह—(ओ)

रत्यादयोऽप्यनियते रसे स्युर्व्यभिचारिण. ॥ १८२ ॥

तथाहि—शृङ्गारेऽनुद्बिद्यमानतयाऽवस्थानाद् रतिरेव स्थायिशब्दवाच्या ।
हास पुनरुत्पद्यमान व्यभिचार्येव, व्यभिचारिलक्षणयोगात् । यदुक्तं—
'रसावस्थं पर भाव. स्थायितां प्रतिपद्यते' इति (ग)

(वि, क) कमलेणेति । ' कमलेन विकसितेन सयोजयन्ती विरोधिन शशि बिम्बम् । करतलपर्यस्तमुखी किं चिन्तयसि सुमुखि ! अन्तराहितहृदया' ॥ इति सस्कृतम् । अत्र करतल विकसितकमल मुख शशिबिम्बम् । नायिकायाश्चिन्ता ।

(वि, घ) किं स्कन्ध इति—विरहाकुलितायाः उदाहरणम् ।

(वि, ग) रत्यादयोऽपीति—स्थायिभावानां ये रसा नियतास्तद्विपेऽनियते । व्यभिचारिलक्षणेति—उन्मज्जानर्मग्नतात्पर्यस्य यदाचित्कत्वस्य तल्लक्षणत्वात् । स्थायिभावोऽपि व्यभिचारिभावो भवत्यत्र गवाद दर्शयति—रसावस्थ इति । रस एव उत्तरकालम् अवस्था यस्य पर केवल तादृश एव भाव रत्यादिस्थायित्वम् प्रतिपद्यते । अतादृशावस्थस्तु न स्थायितां प्रतिपद्यते इति पर पदाभ्यते । अतादृशावस्थस्तु रसान्तरत्व सम्भवति । ग च यदि तत्र उपकारको भवति तदा तदीयस्थायिनि आभिमुख्येन चरणाद् व्यभिचारिलक्षणकान्तत्वेन तत्रापि व्यभिचारिपदस्य योगरूढत्वात्तोऽपि व्यभिचारी भवति, अर्थवशात्तस्याभिमतमर्थमाश्रित्य सम्बन्धो दर्शित इति बोध्यम् ।

(लो, घ) कमलेणेति—कमलेन विकसितेन सयोजयन्ती विरोधिन शशि-बिम्बम् । करतलपर्यस्तमुखी किं चिन्तयसि सुमुखि ! अन्तराहितहृदया ॥'

(लो, ओ) एते चेति—एतानि च उदाहरणानि व्यभिचारिलक्षणसद्भाव-दर्शनमात्राणि । तेषां क्वचित् प्राधान्ये क्वचित् अप्रधान्ये वा न कश्चित् प्रतिनियमः ।

मर्मणि नास्ति (च पु)

* स्थायित्व पद. (क पु) नास्ति । 1 मम नास्ति (ग पु) 2 व्यभिचरणानि नास्ति (ग पु)

तत्कस्य स्थायिन कस्मिन् रसे सचारित्वमित्याह—

शृङ्गारवीरयोर्हासो वीरे क्रोधस्तथा मतः ।
शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः ।
इत्याद्यन्यत्समुन्नेय स्वयं[1] भावितबुद्धिभि ॥ १८३ ॥ (घ)

अथ स्थायिभाव —

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमा ।
आस्वादाङ्कुरकन्दोऽसौ भाव स्थायीति सम्मतः ॥१८४॥ (ङ)

यदुक्तम्—

स्रक्सूत्रवृत्त्या भावानामन्येषामनुगामुक[2] ।
न तिरोधीयते स्थायी तैरसौ पुष्यते परम् ॥ इति । (च, औ)

तद्भेदानाह—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ता शमोऽपि च ॥१८५॥ (अ)

तत्र—रतिर्मनोनुकूलेऽर्थे मनस प्रवणायितम् ।

(वि, घ) **इत्याद्यन्यत्समुन्नेयमिति**—अत एव य कौमारहर इत्यत्राद्भुतरसस्थायिभावस्य विस्मयस्य व्यभिचारिभावत्वम् । ग्रन्थकृन्मते तु स श्लोक व्यभिचारिभावध्वनेरेवोदाहरणमिति । रसस्यैव हि प्राधान्यात् इति काव्यप्रकाशलिखने रसपदस्य व्यभिचारिभावपरत्व व्याख्यानादवसीयते ।

(वि, ङ) **अविरुद्धा विरुद्धा वेति**—स्थायिभावस्य अविरुद्धा विरुद्धा वा व्यभिचारिभावा इत्यर्थ । तिरोधातु बुद्धयविषयीकर्त्तुम् ।

(वि, च) **स्रक्सूत्रवृत्त्येति**। भावाना व्यभिचारिभावानाम् अनुगामुक सम्बद्ध स्थाया तैर्भावैर्न तिरोधीयते न बुद्धयविषयीक्रियते इत्यर्थ । अनुगामत्वे दृष्टान्तमाह—**स्रक्सूत्रेति**। वृत्त्या रीत्या स्रजिमालाया यथासूत्रमवस्य सम्बद्ध भवतात्यर्थ । स्वसम्बद्धै तै कीदृश क्रियते इत्यत्राह—**तैरसाविति**। पुष्यते आस्वादाङ्कुरीक्रियते इत्यर्थ ।

(वि छ) **रतिरित्यादि**। प्रवणायितम् उत्कट आवेश । स चानुरागे एव पर्य्य

(लो, ओ) **अथेति**। स्थायिभाव उद्देशक्रमप्राप्त । **अविरुद्धेति**। विरुद्धैरपि स्थायिनोऽतिरोधान महाकविकाव्येष्वभिव्यक्तमेव । **स्रगिति**। स्वसूत्र सवधा पुष्पाणां मुक्ताना वा यथा अनुगत तिष्ठति तथेत्यर्थ । तैर्भावै ।

(लो, अ) शान्तिरसस्थायिभावस्य शमस्य निराकरिष्यमाणविवादस्य नवत्वे नव मतया पृथङ् निर्देश ।

(लो, आ) **रतिरित्यादि**। प्रवणायित प्रवणीभाव । इय रतिर्मदनाविष्टा ।

---

1 'तथाभावित' (इति क ख पु) 2 'अनुगामक' (क पु)

वागादिवैकृताच्चेतो[1]विकासो हास इष्यते।
इष्टनाशादिभिश्चेतोवैक्लव्यं शोकशब्दभाक्।
प्रतिकूलेषु तैक्ष्ण्यस्याऽवबोधः क्रोध इष्यते।
कार्य्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते।
रौद्रशक्त्या तु जनितं चित्तवैकल्यजं[2] भयम्।
दोषेक्षणादिभिर्गर्हा जुगुप्सा विस्मयोद्भवा।
विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु।
विस्तारश्चेतसो यस्तु स विस्मय उदाहृतः।
शमो निरीहावस्थायामात्म[3]विश्रामज सुखम्॥ १८६॥

यथा—मालतीमाधवे रति। नटकमेलके हास.। रामायणे शोकः। महाभारते शम। एवमन्यत्रापि। एते हि एतेष्वन्तरा उत्पद्यमानैस्तैस्तैर्विरुद्धैरविरुद्धैश्च भावैरनुच्छिन्ना प्रत्युत परिपुष्टा एव सहृदयानुभवसिद्धा। (ख,श्रा)

किञ्च—

नानाभिनय[4]संबद्धान् भावयन्ति रसान् यतः।
तस्माद्भावा अमी प्रोक्ताः स्थायिसञ्चारिसात्त्विकाः॥१८७॥

यदुक्तम्—'सुखदु खादिभिर्भावैर्भावस्तद्भावभावनम्'। (ज, इ)

वस्यति। वागादीत्यादिपदात् वेशपरिग्रह। चेतोविकासो विलक्षणचित्तसयोगजन्य ज्ञानमुपहास्यताज्ञानपर्य्यवसन्न यतो मुखविकाशरूप स्मित जायते। वैक्लव्य तु स्वविशेष। सरम्भ सहर्षत्वरा। स्थेयान् स्थायी। तैक्ष्ण्यस्य उत्कटापचिकीर्षयाऽवबोध। रौद्रोऽपकर्तुं क्षम, तस्य शक्तया सामर्थ्येन वैकल्य भाविदु खज्ञानपलायनहेतु। दोषेक्षणादिभिरिति—दोष विकृतशब्दादि ईक्षणादिभिरित्यादिपदात् घ्राणपरिग्रह। गर्हा निन्दा। विस्मयोद्भवेति। कथमस्य एतादृशो दोष इत्येव विस्मयेन जनिता। चेतोविस्तारो दृष्टहेतुभ्योऽसभव्यत्वज्ञानेन हेत्वनुसधानम्। आत्मविश्रान्तिरात्ममात्रविषय ज्ञानम्। एतेष्वितिति। एतेषु रत्यादिषु सत्सु इत्यर्थ। स्थायिभावव्यभिचारिभावादिना भावसज्ञाव्युत्पत्तिमाह—

(वि, ज) किंचेति। भावयन्ति ज्ञापयन्ति। सुखदु खादिभिरिति। सुखदु खादिभावैस्तद्भावस्य रत्यादिसत्ताया भावनम् उद्बोधनम् अतो रत्यादिको भाव इत्यर्थ।

स्थायुगनिष्टत्र। शृङ्गारस्य स्थायी नत्वन्यथा स्थायिलक्षणायोगात्। एतेषु गमनन्तरोक्तग्रन्थेषु।

(लो, इ) सुखेति। भावैरामनिष्टै काव्यनिष्टैर्वा तस्य रामादेरनुकार्य्यस्य यो भाव स्वरूप तस्य भावन श्रवणं दर्शन वा।

---

1 'वैकृतेभ्यो' (क ख पु) 2 'वैक्लव्यद' (क ग पु.)
3 'वस्थायां स्वात्म' (क. ख पु) 4 'सबन्धान्' (क च पु)

अथ रसस्य भेदानाह—

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः ॥१८॥ (ई)

तत्र शृङ्गार—

शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः ।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते ।
परोढा वर्जयित्वाऽत्र वेश्यां चाननुरागिणीम् ।
आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः ।
चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम् ।
भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्तितः ।
त्यक्त्वौग्र्यमरणालस्यजुगुप्साव्यभिचारिणः ।
स्थायिभावो रतिः श्यामवर्णोऽयं विष्णुदैवतः ॥१८९॥ (ऊ, उ)

(वि, ऋ) तदागमनहेतुक इति । मन्मथस्यागमन प्राप्ति तदेव हेतुर्यस्य तादृश, कामिन एव शृङ्गाररसोद्बोधात् । वेश्या चेति । वेश्याऽनूढा, ऊढाया परोढत्वेन एव प्राप्ते । एवमनुरागिणी स्वस्त्री कन्यका च । दक्षिणाद्या इति । दक्षिणशठानुकूलशठा इत्यर्थ । ते च स्वनायका एव परनायकस्य तु परोढावत् शृङ्गाराभासालम्बनमेव । रोलम्बो भ्रमरः । औग्र्यादेरस्य त्याग । सम्भोग एव मरणस्य जातप्रायमात्रस्यैव वर्णनीयत्वात् वास्तवमरणस्यैव त्याग ।

(लो, ई) एव सपरिकरस्य रसस्य स्वरूपमुद्दिश्य निरूपयितुमुद्दिशति । अथेति । सात्त्विकबहुलगीतवाद्यादिपूर्वकपुराणवृत्तानुकराभिनयाश्रयत्वेन महर्षिणा कण्ठोक्त्या अष्टौ । अन्यै महाकाव्यादौ शान्तोऽपि नवमो रसोऽस्तीति तस्य पृथङ् निर्देशो न सम्यङ् नाट्योपयोगित्वाभावात् । यदाह धनिक "पुष्टिर्नाट्येषु नैतस्येति" । एव निरतिशयमुपास्वादनलक्षणत्वात् एक एव रसो न विशेषा सन्ति इति वादिनो मतमप्यपास्तम् । अत एवोक्तम् "यत्कारणं च कार्यं च ये च स्युर्व्यभिचारिणः । स्वरूपं यच्च तद्भावात् शृङ्गारादिभिदा स्मृता । इति"

(लो, उ) शृङ्गमिति—मन्मथोद्भेदस्य शृङ्गमिति नामान्तरम् । तस्यागमन रामादिष्वाविर्भाव । आङ्पूर्वात् गमेर्ल्युटि इत्यस्य धातो परान्तात् आरशब्दस्य व्युत्पादितत्वात् तत्र मन्मथोद्भेदस्य विशेषनिर्देशादुभयोरप्येतद्रसप्रकृतिभूतयो स्त्रीपुसयो परस्पर प्रौढतरानुरागहेतुकत्वमस्य सूचितम् । अनुरागस्य एकनिष्ठत्वे हि रसाभासो वक्ष्यते । दक्षिणाद्या अत्रार्थ. १. एषां. रसानां. वर्णदैवतरूपत्व. नाट्यगतेषु विशेषेषु व्यभिचारिषु, नवम. पद्यपूरणादिषु प्रत्यूहते । विवृणोति—अत्र इत्यादि । इहोद्दीपनविभावादि एकदेशो दर्शितम् । विस्तरत. प्रथमपरिच्छेदतो बोद्धव्यम् ।

यथा—शून्यं वासगृहम् इत्यादि ।

अत्र उक्तस्वरूपः पतिरूपस्वरूपा च बाला आलम्बनविभावौ । शून्यं वासगृहमुद्दीपनविभावः । चुम्बनमनुभावः । लज्जाहासौ व्यभिचारिणौ । एतैरभिव्यक्तः [1]सहृदयरतिभावः शृङ्काररूपतां भजत ।

तद्भेदानाह—

विप्रलम्भोऽथ संभोग इत्येष द्विविधो मतः ॥ १६० ॥

तत्र—

यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ ॥ १६१ ॥
अभीष्टं नायकं नायिकां वा (त्र, ऊ)
स च पूर्वरागमानप्रवासकरुणात्मकश्चतुर्धा स्यात् ॥ १६२ ॥

तत्र—

श्रवणाद् दर्शनाद्वापि मिथः संरूढरागयोः ।
दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते ॥१६३॥ (ट)
श्रवणं तु भवेत्तत्र दूतवन्दीसखीमुखात् ।
इन्द्रजाले च चित्रे च साक्षात् स्वप्ने च दर्शनम् ॥ १६४ ॥ (ठ)
अभिलाषश्चिन्तास्मृतिगुणकथनोद्वेग[2]प्रलापाश्च ।
उन्मादोऽथ[3] व्याधिर्जडता मृतिरिति दशात्र कामदशाः॥१६५॥
अभिलाषः स्पृहा चिन्ता प्राप्त्युपायादिचिन्तनम् ।
उन्मादश्चापरिच्छेदश्चेतनाचेतनेष्वपि ॥ १६६ ॥

(वि, त्र) नाभीष्टमुपैतीति—नायकस्य नायिका । नायिकायाश्च नायकोऽभीष्टः । अभीष्टता च अनुकूलतया । तेन मानिन्यामनुकूलतायाः प्राप्तायामपि नायकस्य विप्रलम्भ एव ।

(वि, ट) दशाविशेषो यत्रान्य इति शेषः । दशाविशेषो विरहकालीनदशादशा । विशेष इत्येकवचनं विशेषत्वैक्यमाश्रित्य । पूर्वरागोऽभीष्टप्राप्तेः पूर्वं रागः । स च श्रवणात् दर्शनात् वा भवतीत्युक्तत्वात् श्रवणदर्शनयोरुपायमाह—

(वि, ठ) श्रवणं त्विति—दूतादिमुखात् श्रवणम् इन्द्रजालस्वप्नाभ्यां चक्षुषा वा दर्शनमित्यर्थः । साक्षात्पदमत्र तद्धेतुचक्षुःपरम् ।

(वि, ड) अपरिच्छेदः चेतनाचेतनेष्वपीति—चेतनत्वायपरिच्छेद इत्यर्थः ।

(लो, ऊ) यत्र त्विति—रतिरेकाग्र्य प्रकृष्टा प्रकृष्टत्वं यावितरतिप्रकर्षस्य नायिकानिष्ठत्वे नायके नायकपक्षे च नायिकां लोपनि न प्राप्नोतीत्यर्थः । स च विप्रलम्भः—

---

1 'सहृदयविषयो रतिभाव' (क. पु)
2 द्वेगसंप्रलापाश्च क. ग. पु. । 3 अथेति नास्ति घ. पु.

अलक्ष्यवाक् प्रलापः स्याच्चेतसो भ्रमणाद् भृशम् ।
व्याधिस्तु दीर्घनिःश्वासपाण्डुताकृशतादयः ।
जडता हीनचेष्टत्वमज्ञानं मनसस्तथा ॥ १६७ ॥ (ङ)

शेष स्पष्टम् ।

क्रमेणोदाहरणानि—

प्रेमार्द्रा प्रणयस्पृश परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।
यास्वन्तः करणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशसापरिकल्पितास्वपि भवत्यानन्दमान्द्यो लय ॥ (ढ, ऋ)

कथमीदृशे कुरङ्गाक्षीं साक्षाल्लक्ष्मीं मनोभुव ।
इति चिन्ताकुल कान्तो निद्रा नैति निशीथिनीम् । (ण)

अथ कस्याश्चित् नायिकाया इन्द्रजालदर्शनप्ररूढरागस्य नायकस्य चिन्ता । इद मम । मयि सकपटमित्यादौ नायकस्य स्मृति । नेत्रे खञ्जनमञ्जने इत्यादौ गुणकथनम् । (त) श्वासान्मुञ्चतीत्यादौ उद्वेग ।

तेन वृक्षादावचेतनत्वाऽप्रतिसन्धानात् कातरोक्ति । सलापस्य प्रलापपर्य्यायत्वात् प्रलाप लक्षणमाह—अलक्ष्येति । अलक्ष्येऽनाधये आकाशादौ वाक् । इदमुपलक्षणमनर्थकत्वाचाऽपि । दीर्घनिःश्वासेति । तथा च व्याधिज्वरादिति यदुक्त प्राक् तदयादिपदग्राह्यमिद मुक्तमिति बोध्यम् ।

(वि, ढ) प्रेमार्द्रा इति—माधवस्य वचनमिदम् । मुग्धदृशो मालत्यास्तास्ता अन्यादृश चेष्टा मयि भवेयु । चेष्टाविशेषणानि—प्रेमार्द्रा इत्यादीनि । आर्द्रत्व निस्यन्दत्वेन सजलत्वम् । प्रणयो वात्सल्यम् । तत्सूचिका इत्यर्थ । परिचयो वार वार दर्शनम् । यासु चेष्टासु आशसायामिच्छाया परिकल्पितास्वपि अन्त करणस्य आनन्देन सान्द्रो व्याप्तो लय लीनता क्षणाद्भवति । अन्त करणमानन्दव्याप्त भवतीत्यर्थ । लय कीदृश —बाह्यकरणस्य व्यापारस्य रोधी प्रतिबन्धक । अत्र दर्शनेऽऽशयागद्वारा मालत्यामेवाभिलाष ।

(वि, ण) कथमीदृशे इत्यादिक स्पष्टम् । निशीथिनी व्याप्य नैति प्राप्नोति ।

(वि, त) नेत्रे इत्यादौ सौन्दर्यमेव गुण ।

(लो, ऋ) प्रेमार्द्रा इति—दर्शनादिगम्यो भावव्यञ्जक कथन चित्तवृत्तिविशेष प्रेम । तत्सूचिका वर्शाकार प्रणय । रहस्यसम्वेदनम् परिचय । लय तन्मयत्वमेव ।

त्रिभागशेषासु निशासु च क्षणं निमील्य नेत्रे सहसा व्यबुध्यत ।
क्व नीलकण्ठ ! व्रजसीत्यलक्ष्यवाग्गतस्यकण्ठार्पितबाहुबन्धना ॥ (थ)

अत्र प्रलाप.—

आतद्विरेफ इत्यादौ उन्माद ।

पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपु. ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि ! हृदन्त· ॥ (ङ)

अत्र व्याधि. (द)

भिसिणीअलसअणीए निहिअं सव्वं वि णिच्चलं अङ्गं ।
दीहो णीसासहरो एसो साहेइ जीअइत्ति परं ॥ (ध)

अथ जडता ।

इदं मम ।

रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते ।
जातप्रायन्तु तद्वाच्यं चेतसाकाङ्क्षितं तथा ।
वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्याददूरतः ॥ १६८ ॥ (न)

तत्राद्यं यथा—

शेफालिकां विदलितामवलोक्य तन्वी
प्राणान् कथञ्चिदपि धारयितुं प्रभूता ।

(वि, थ) त्रिभागशेषासु इति । पार्वतीसख्या विजयाया जटिलवेशप्रच्छन्नं महेशं प्रति उक्तिरियम् । भागत्रये जागरितत्वात् शेषावशिष्टासु निशासु नेत्रे निमील्य मीलयित्वा इयं सहसा व्यबुध्यत । कीदृशी अगत्ये हरस्य कण्ठेऽर्पितबाहुबन्धना सती हे नीलकण्ठ ' क्व व्रजसि इत्येवम् अलक्ष्यवाक् अनाश्रयवाक् ।

(वि, द) पाण्डुक्षामामिति—मालत्या तद्विरहावस्था पृच्छन्त्या लवङ्गिकाया उक्तिरियम् । हे सखि ! तव हृदन्त क्षेत्रियरोगम् अस्मिन् क्षेत्रे शरीरे अचिकित्स्यं रोगं पाण्डुक्षामवदनादिकं कर्तृ आवेदयतीत्यन्वय । क्षामं क्षीणम् । सरसं सहार्द्रम् ।

(वि, ध) भिसिणीति—'विसिनीदलशयनीये निहितं सर्वमपि निश्चलमङ्गम् । दीर्घो निःश्वासभर एव साधयति जीवतीति परम् ।' इति संस्कृतम् । सर्वमप्यङ्गं निश्चलम् । अतो दीर्घनिश्वास एव इयं जीवति साधयति इत्यर्थ· ।

(वि, न) चेतसाकाङ्क्षितमिति—मरणाकाङ्क्षा एव वर्णनीया न मरणमित्यर्थ. । वर्ण्यतेऽपीति । पुनरव्यवहिते जीवने सति मरणमपि वर्णनीयमित्यर्थ ।

(वि, प) शेफालिकामिति—विदलिता प्रातिस्वकुसुमा निविडकर्णिकायां

(लो, ङ) पाण्डुति—परक्षेत्रे न छेदनीयो रोग क्षेत्रियरोगः ।

आकर्ण्य सम्प्रति रत चरणायुधाना
किं वा भविष्यति न वेद्मि तपस्विनी सा ॥ (प, लृ)

द्वितीय यथा—

रोलम्बा परिपूरयन्तु हरितो झङ्कारकोलाहलै-
मन्दं मन्दमुपैति चन्दनवनीजातो नभस्वानपि ।
माद्यन्त कलयन्तु चूतशिखरे केलीपिकाः पञ्चम
प्राणा सत्वरमस्मसारकठिना गच्छन्तु गच्छन्त्वमी ॥(फ,ए)

ममैतौ । तृतीय यथा—

कादम्बर्यां महाश्वेतापुण्डरीकवृत्तान्ते । (व)
एष च प्रकारः करुणविप्रलम्भविषय इति वक्ष्याम (ऐ)

केचित्तु—

नयनप्रीति प्रथम चित्तासङ्गस्ततोऽथ सकल्प ।
निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाश ।
उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्यु "
इत्याहु ॥

तत्र च—

आद्यौ चाक्ष्य. स्मिया राग. पुंसः पश्चात्तदिङ्गितेः ॥१६६॥ (ओ)

रात्रौ तद्विदलनात्, कदाचित्तदानीमपि नायकागमनसभावनया प्राणधारणम् । चरणायुधाना कुक्कुटाना स्तम् । प्रात काल एवेति तत्र मरणसभावनया सख्या विषादोक्तिरियम् । तपस्विनी दु खिता ।

(वि, फ) रोलम्बा इति । अप्राप्तनायकदर्शनाया नायिकाया उक्तिरियम् । परिपूरयन्तु इत्यस्य हरित इति कर्म्म । हरितो दिश । नभस्वान् पवन । केलीपिक्य पालितकोकिला । भ्रमरझङ्कारादय तावदुद्दीपका सन्तु । कठिना प्राणा अपि यान्तु इत्यर्थ । कलयन्तु गायन्तु ।

(वि, य) तृतीयमिति—तृतीय मरणोत्तर जीवनम् ।

(लो, लृ) शेफालिकामिति—शेफालिकाविदलनेन निशीथकाल सूचित तपस्विनी शोच्या ।

(लो, ए) रोलम्बा भ्रमरा ।

(लो, ऐ) महाश्वेतापुण्डरीकवृत्तान्ते पुण्डरीकस्यैकप्राण पुनर्जीवनमल भत । करुणविप्रलम्भस्य विषय , ननु पूर्वरागप्रवासयो ।

(लो, ओ) आद्याविति—तदिङ्गितै तदिङ्गितानि दृष्ट्वा इत्यर्थ । इङ्गितानि अनुरागचेष्टितानि । उक्तमन्यत्रैव "दृष्ट्वा दर्शयति प्रीताम्" इत्यादिना ।

इङ्गितान्युक्तानि । यथा–रत्नावल्या सागरिकावत्सराजयो ।

आदौ पुरुषानुरागे सम्भवत्येव[1]धिक हृदयङ्गमं भवति ॥ (भ)

नीलीकुसुम्भमञ्जिष्ठाः पूर्वरागोऽपि च त्रिधा ॥ २०० ॥ (लो)

न चातिशोभते यन्नापैति प्रेम मनोगतम् ।

तन्नीलीरागमाख्यातं यथा श्रीरामसीतयोः ॥ २०१ ॥

कुसुम्भरागं तत्प्राहुः यदपैति च शोभते ॥ २०२ ॥

मञ्जिष्ठारागमाहुस्तद् यन्नापैत्यतिशोभते ॥ २०३ ॥ (म)

अथ मानः—

मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः ॥ २०४ ॥ (य)

द्वयोः प्रणयमानः स्यात् प्रमोदे सुमहत्यपि ।

प्रेम्णः कुटिलगामित्वात् कोपो यः कारणं विना ॥ २०५ ॥

द्वयोरिति नायकस्य नायिकायाश्च उभयो प्रणयमानः वर्णनीय ।

उदाहरण तत्र नायकस्य यथा—

अलीअपसुत्तअ विणिमीलिअच्छ देसु सुहअ मज्झ ओआसं ।

गण्डपरिउम्बणफुलइअङ्ग ण उणो चिराइस्सं । (र, अ)

(वि, भ) **इङ्गितान्युक्तानीति**—अनुरागकथनमेव तदुक्ति । आदौ स्त्र्यनुराग दर्शयति—**रत्नावल्यामिति**—अत्र सागरिकाया प्रागनुराग ।

(वि, म) **न चातिशोभते** इति—अविसृष्टत्वात् न चातिशोभते इत्यर्थ । **श्रीरामसीतयोरिति**—श्रीरामस्य धीरोदात्तत्वात् पुरुषस्य इत्यन्तप्रलापाभावेन नातिशोभते इत्यर्थ ।

(वि, य) पूर्वरागानन्तर मानमाह–**अथेति**—**प्रणयेर्ष्येति** । प्रणयेन ईर्ष्यया वा समुद्भवो यस्य तादृश इत्यर्थ ।

(वि, र) **अलीअपसुत्तअ** इति ।

अलीकप्रसुप्त विनिमीलिताक्ष ते सुभग ममावकाश ।

गण्डपरिचुम्बनात् पुलकितमङ्ग न पुनश्चिरयिष्यामि ॥ इति संस्कृतम् ।

प्रणयमानेन अलीकप्रसुप्त नायक चुम्बित्वा तेनाऽभ्यर्थिताया नायिकायास्तं

(लो, औ) नीली नालिराग 'कुसुम्भराग' मञ्जिष्ठारागश्चेत्यर्थ ।

(लो, अ) मान उद्देशक्रमप्राप्त इत्यर्थ । प्रणय प्रेम । **अलिअ** इति ।

अलीकप्रसुप्त ! निमीलिताक्ष ! देहि सुभग ' मह्यवकाशम् ।

गण्डपरिचुम्बनात्पुलकिताङ्ग ! न पुनश्चिरायिष्ये ॥

---

1 'सम्भवत्यपि एव' (क ख, पु)

नायिकाया यथा कुमारसम्भवे सन्ध्यावर्णनावसरे । (ल)

उभयोर्यथा—

पणअकुविआण दोण्ह वि अलिअपसुत्ताण माणइण्णाणम् ।
णिच्चलणिरुद्धणीसासदिण्णअण्णाण को मल्लो ॥ (च, आ)

अनुनयपर्य्यन्तासहत्वे त्वस्य न विप्रलम्भभेदता किन्तु सम्भोगसचारीर्ष्या रयभावत्वम् (श)

यथा—

भ्रूभङ्गे रचितेऽपि दृष्टिरधिक सोत्कण्ठमुद्वीक्षते
रुद्धायामपि वाचि सस्मितमिद दग्धानन जायते ।

प्रत्युक्तिरियम् । हे अलाकप्रसुप्त ! हे विनिमालिताक्ष ! हे सुभग ! मया ते तव गण्ड-परिचुम्बनया पुलकितमर्यात् तवाङ्गमेव ममावकाशो मम स्थित्यवकाश । इदानीमपि उन्मीलनाभावेन तदभावनिश्चयात् । अतो न चिरयिष्यामीत्यर्थ । अत्र च "आगामन्त्रितमसकृदि"ति सूत्रेण ते इत्यस्य असम्भवो नाशङ्कनीय । अव्यवहित-पूर्वस्य आमन्त्रणपदस्यैवासत्तायास्तदर्थत्वात् । उपपूर्वामन्त्रणपदोत्तर तु भवत्येव ते इत्यादेश ।

(वि, ल) **कुमारसंभव** इति । अत्र पार्वती त्यक्त्वा सन्ध्यावन्दनाय गते महेशे पार्वत्या माने तस्य तद्भङ्गप्रवृत्तौ तत्र हि

"सन्ध्यया कमलयोनिकन्यया या तनु सुतनु ! पूर्वमुज्झिता ।
सेयमस्तमुदयञ्च सेवते तेन मानिनि ! ममात्र गौरवम् ॥" इत्यादि महेशोक्तौ ।

(वि, च) **पणअकुविदे**ति—

'प्रणयकुपितयोर्द्वयोरप्यलाकप्रसुप्तयोर्मानविज्ञयो ।
निश्चलनिरुद्धनि श्वासदत्तकर्णयो को मल्ल ॥" इति संस्कृतम्

को मल्ल को मानरक्षणसमर्थ ।

(वि, श) न विप्रलम्भभेदता न विप्रलम्भप्रभेदता । भ्रूभङ्गे इति मानरक्षणसमर्थाया नायिकाया सख्यामुक्तिरियम् ।

एतच्चिरायिताया नायिकाया सकलामपि शय्यामावृत्य मिथ्याप्रसुप्तस्य नायकस्य गण्ड परिचुम्ब्य तस्या वचनम् ।

(लो, आ) **पणअ** इति—

' प्रणयकुपितयोर्द्वयोरप्यलीकप्रसुप्तयोर्मानवतो ।
निश्चलनिरुद्धनि श्वासदत्तकर्णयो को मल्ल ॥ ' इति

अत्र को मल्ल कथिर रोढु समर्थ न ज्ञायते इति भाव ।

कार्कश्य गमितेऽपि चेतसि तनू रोमाञ्चमालम्बते
दृष्टे निर्वहण भविष्यति कथ मानस्य तस्मिञ्जने ॥ * (प)

पत्युरन्यप्रियासङ्गे दृष्टेऽथानुमिते श्रुते ।
ईर्ष्यामानो भवेत् स्त्रीणा तत्र त्वनुमितिस्त्रिधा ।
उत्स्वप्नायितभोगाङ्कगोत्रस्खलनसम्भवा ॥ २०६ ॥ (इ)

तत्र दृष्टे यथा—

विनयति सुदृशो दृशो पराग प्रणयिनि कौसुममाननानिलेन ।
तदहितयुवतेरभीक्ष्णमक्ष्णोर्द्वयमपि रोषरजोभिरापुपूरे ॥ (स)

सम्भोगचिह्नेनानुमिते यथा—

नवनखपदमङ्क गोपयस्यशुकेन
स्थगयसि पुनरोष्ठ पाणिना दन्तदष्टम् ।

(वि, प) मया भ्रूभङ्गे रचितेऽपि मम दृष्टिस्त्व प्रिय सोत्कण्ठमुद्वीक्षते । इत्यादि-रीत्या तस्मिन् जने प्रियतमे दृष्टे सति कथ मानस्य निर्वहण निर्वाहो भविष्यतीत्यन्वय । दग्धानन गर्हित ममाननम् ।

(वि, स) उत्स्वप्नायित पत्युरन्यनायिकासङ्गस्य स्वप्ने दर्शनम् । यथा मम— "सखि ! त्वं किं ब्रूषे न भवति मदन्यत्र निरत पतिर्म धूर्त्ताऽसावृजुरसि न जानासि तन्मिथ्यम् । समुद्गत्याऽगारादपरयुवतीसङ्गनिरतो मया दृष्ट स्वप्ने तदलमिह सप्रीतिकथया ॥" पत्युरन्यप्रियासङ्गे दृष्टे उदाहरति—**विनयतीति** । सपत्नीरूपाया सुदृशो दृश । ईर्ष्यामान ।

(वि, इ) **नवनखेति**—अन्यनायिकासङ्गचिह्ननखपदादिमशुकादिना यद्यपि गोपयितु शक्नोषि तथापि विमर्दोत्थाङ्गरागगन्ध केन प्रकारेण वारयितु शक्य इति

(लो, इ) **ईर्ष्येति**—ईर्ष्याख्यभावत्व सचारिलक्षणयोगात् ।

उत्स्वप्नायितमिति—उत्स्वप्नायित स्वप्ने चेष्टा । स्वप्नस्योद्गमनकाल एव तत्कथनाय उत्थानम् । गोत्रस्खलन सबोधने तन्नामग्रहणम् ।

---

* 'तस्मिन् जने' इत्युदाहरणानन्तर यथा वा' इत्युपक्रम्य

एकस्मिञ्शयने पराङ्मुखतया वनितोत्तर ताम्यतो—
रन्योन्यस्य हृदि स्थितेऽप्यनुनये गरुहतोर्गौरवम् ।
दम्पत्यो शनकैरपाङ्गवलनान्मिथ्याभवच्चक्षुषो
र्भग्नो मानकलि सहासरभसव्यावृत्तकण्ठग्रह ॥

इत्युदाहरणान्तर (क ख ग घ ङ

प्रतिदिशमपरस्त्रीसङ्गशङ्की विसर्पन्
नवपरिमलगन्धः केन शक्यो वरीतुम् ॥

एवमन्यत्र (ह)

सामभेदोऽथ दानं च नत्युपेक्षे रसान्तरम् ।
तद्भङ्गाय पतिः कुर्य्यात् षडुपायानिति क्रमात् ॥ २०७ ॥
तत्र प्रियवचः साम, भेदस्तत्सख्युपार्जनम् ।
दानं व्याजेन भूषादेः पादयोः पतनं नतिः ॥ २०८ ॥
सामादौ तु परिक्षीणे स्यादुपेक्षावधीरणम्[1] ।
रभसत्रासहर्षादेः कोपभ्रंशो रसान्तरम् ॥ २०९ ॥ (च, ई)

यथा—नो चाटु श्रवणे कृतमित्यादि । अत्र हि सामादयः पञ्च सूचिता ।

रसान्तरमुदाहृतम् (क)

वाक्यार्थं । **एवमन्यत्रेति** । उत्स्वप्नायिते उदाहृतमेव । गोत्रस्खलिते यथा—

"एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया
सद्यः कोपपराङ्मुखं शयितया चाटूनि कुर्वन्नपि ।
आवेगादवधारितं प्रियतमं तूष्णीं स्थितं तत्क्षणाद्
माभूत् सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितम् ॥"

यथा वा मम ।

"परासङ्गामङ्कं मयि ! मम स यत् चाटु कुरुते
गमस्तोऽसौ व्याजप्रणय इति जानीहि नियतम् ।
तदा तां तु ध्यायन् स खलु लिखितव केलिशयने
मुदुस्तस्या नाम्ना ननु रहसि सम्बोधयति माम् ॥" इति ।

(वि, च) नत्युपेक्षे । नतिश्च उपेक्षा च इति । **तत् सख्युपार्जनमिति** । तस्या मानिन्या सख्या उपार्जनमाप्तीकरणमित्यर्थः । व्याजेन भूषादेर्दानं दानमित्यर्थः । एवमेवात्र दानपदमुद्दिश्य विधेयोभयात्मकम् । रभसत्रास आकस्मिकत्रास हर्षादेरित्यादिपदात् उत्कण्ठाव्याधिपातपरिग्रहः ।

(वि, फ) नो चाटूनीति । रसान्तरमुदाहरणम् । अत्र नाचाटुत्वमत्र साम । नन्वदोऽत्र दानम् । निष्पन्नप्रायवाच्यत्वेन भेदः सखीनामाप्तीकरणरूपः । आप्तिभावादेव कान्तस्य प्रियहेतुवाक्यकथनात् । पादान्त इत्यत्र नतिः । गन्धस्त्वित्यत्र उपेक्षा एताः पञ्च सूचिता इत्यर्थः । एभिरुपायैरस्या मानभङ्गाभावेऽपि न तदुपायहानिः तस्यामचाटूद्वेगरूपस्त्रीविरहेण फलानुत्पादनात् । षष्ठस्तूत्पाद्यो भग्न एव मानः । **रसान्त-**

(लो, ई) प्रसङ्गात् मानभङ्गोपायानाह । **सामेति** । प्रवास उद्वेगकम्पप्राप्त ।

---

1 'क्षावधारणम्' (ग स पु)

अथ प्रवासः—

प्रवासो भिन्नदेशत्वं[1] कार्य्याच्छापाच्च संभ्रमात् ।
तनाङ्गचेलमालिन्यमेकवेणोधरं शिरः ।
निःश्वासोच्छ्वासरुदितभूमिपातादि जायते ॥ २१० ॥ (ग)

किञ्च—

अङ्गेष्वसौष्ठवं तापः पाण्डुता कृशताऽरुचिः ।
अधृतिः स्यादनालम्बस्तन्मयोन्मादमूर्च्छनाः ।
मृतिश्चेति क्रमाज् ज्ञेया दश स्मरदशा इह ॥ २११ ॥
[2]असौष्ठवमनायत्तिः तापस्तु विरहज्वरः । (ग)
अरुचिर्वस्तु वैराग्यं सर्वत्रारागिताऽधृतिः
अनालम्बनता चापि शून्यता मनसः स्मृता ।
तन्मयं तत्प्रकाशो हि बाह्याभ्यन्तरतस्तथा ॥ २१२ ॥

शेषं स्पष्टम् ।

एकदेशतो यथा मम तातपादानाम्—

चिन्ताभि स्तिमितं मनः करतले लीना कपोलस्थली
प्रम्लानोपवनेदशेव वदनं श्यामैकनिष्ठोऽधरः ।
अम्भः शीकरपद्मिनीकिसलयैर्नोपैति तापः शमं
कोऽस्या प्रार्थितदुर्लभोऽस्ति सहते दीनां दशामीदृशीम् ॥ (घ)

न्तृष्ण्यमिति—हर्षाद् यथा—"चिरप्रवासात् सुहृदि प्रयाते यस्तत्र हर्षो मिथुनस्य जातः । तन्मानिनीमानविघातहेतु र्ग एव यातः चटुलाभिमानः ॥" अत्र तन्मानिनी तस्मिन् धुनीयमानिनी । अत्र हर्ष एव व्यभिचारभावो रसान्तरम् । भयाद् यथा—

"प्रवृत्ते मानभङ्गाय पत्यौ नाग उपागते ।
तं दृष्ट्वा सहसा कण्ठे पतिं जग्राह मानिनी ॥" इति ।

अत्र भयानको रसान्तरम् ।

(वि, घ) विप्रलम्भस्य पूर्वरागमानप्रवासकरुणरूपचातुर्विध्यस्य उक्तत्वात् पूर्वरागं मानञ्च समाप्य प्रवासमाह—**अथ प्रवास** इति ।

(वि, ग) अङ्गसौष्ठवादेर्लक्षणमाह—**असौष्ठवमनायत्तिरिति** । अनायत्तिरवशीनता ।

(वि, घ) **चिन्ताभिः स्तिमितमिति** । पत्यौ प्रवासस्थे करतले गण्डं दत्त्वा चिन्तयन्ती प्रति कस्याश्चिदुक्तिरियम् ।

---

1 'देशित्व' (क. पु) 2 'अङ्गसौष्ठवमायत्ति' (ग पु) 'असौष्ठव मनायत्ति' (क. पु.)

भावी भवन् भूत इति त्रिधा स्यात्तत्र कार्य्यजः ॥ २१३ ॥

कार्य्यजस्य[1] बुद्धिपूर्वत्वात् त्रैविध्यम्। तत्र भावी यथा मम-(ङ)

याम सुन्दरि ! याहि पान्थ !, दयिते शोकं वृथा मा कृथा ,
शोकस्ते गमने कृतो मम, ततो बाष्पः कुतो[2] मुञ्चसि ।
शीघ्रं न व्रजसीति, मां गमयितुं कस्मादियं ते त्वरा
भूयानस्य सहैव जिगमिषोर्जीवस्य मे सभ्रमः ॥ (च, उ)

भवन् यथा—

प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
दृष्ट्वा नः क्षणमासितं, व्यवसितं चित्तेन गन्तुं पुरः ।
यातु निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवितं ! प्रियसुहृत्सार्थं किमु त्यज्यते ॥ (छ)

(वि, ङ) प्रवासस्य कार्य्यात् शापात् इत्यादि त्रैविध्यस्योक्तत्वात् कार्य्यजमेव त्रिविधमाह-**भावीति**। कार्य्यानुरोधेन प्रवासस्त्रिविध इत्यर्थः। **तस्य बुद्धीति**। बुद्धिः कार्य्यज्ञानम्।

(वि,च) याम सुन्दरीति। द्वयोरुक्तिप्रत्युक्ती इमे। तत्र सुन्दरीत्यन्तं पत्युः। याहि पान्थेति प्रियायाः। मा कृथा इत्यन्तं पत्युः। शोक इत्यादिकं मनोज्ञान्तं प्रियायाः। तव इत्यादि मुञ्चसीत्यन्तं पत्युः। शीघ्रं न व्रजसीत्यन्तं प्रियायाः। त्वरेत्यन्तं पत्युः। भूयानित्यादि प्रियायाः। त्वया सह जिगमिषोः अस्य मे जीवस्य भूयान् सभ्रमस्त्वरेत्यर्थः।

(वि, छ) प्रस्थानं वलयैः कृतमिति। स्वजीवितं सम्बोध्य प्रियायाः उक्तिरियम्। हे जीवित ! प्रियतमे यातु निश्चितचेतसि सति त्वयि गन्तव्ये गन्तव्ये सति वलयादिप्रियसुहृत्सार्थं किमु त्यज्यते तेनैव सह गम्यतामित्यर्थः। वलयादयः सर्वेऽपि समं प्रस्थिताश्चलिताः। तेषां प्रस्थानमाह-**प्रस्थानमिति**। प्रस्थानं यात्रा बहुदिनव्यापारतद्वार्तया कारणेन वलयश्रेणी गतं चलितम्। अत्र पृथक् प्रियसुहृत्त्वोपादानम् अत्यन्तप्रियत्वप्रतिपादनाय। तत्र मरणहेतुशोकादिदुःखेऽप्यश्रुपातेन तद्दुःखस्य निर्विदुपशमात्। जीवरक्षा भवत्यत्र स्मरणाकारित्वेनाऽत्यन्तं प्रियत्वम्।

(लो, उ) **याम इति**। तत्र गमने मम कुत शोक जीवनाभावादिति भावः। **शीघ्रं न व्रजसीति**। त्वामेव पश्यन्त्या मम तत्रागमनसम्भावनात्। तथा भारयन्त्या नास्य मोचनमिति भावः। सति कृतत्वेनवतस्तव न क्वापि कदाचिद् गमनम्। त्वत्प्राणदुरापायान्दोलितचेतसा प्राणानामुत्क्रमणभारोऽयमसह्यीय इति। तत्प्रारब्धगमने सहगो त्वमेवैकमिति निर्णयेन आकुलभावो निवर्त्तनीयमिति।

---

[1] 'कार्य्यस्य' (क ङ) [2] 'कथं' (क ङ)

भूतो यथा—चिन्ताभि स्तिमितमित्यादि । शापाद् यथा–'ता जानीथा' इत्यादि । सम्भ्रमो दिव्यमानुषनिर्घातोत्पातादिज । यथा–विक्रमोर्वश्याम् उर्वशी-पुरूरवसो । अत्र पूर्वरागोन्नानामभिलाषादीनामग्रोन्नानाञ्चाङ्गसौष्ठवादीनामपि दशानामुभयेषामपि उभयत्र सम्भवेऽपि चिरन्तनप्रसिद्ध्या[1] विविच्य प्रतिपादनम्। अथ करुणविप्रलम्भ — (ज)

यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनरलभ्ये ।
विमनायते यदेकस्तदा भवेत्करुणविप्रलम्भाख्य. ॥ २१४ ॥

यथा कादम्बर्यां पुण्डरीकमहाश्वेतावृत्तान्ते । (ऊ)

पुनरलभ्ये शरीरान्तरेण वा लभ्ये तु करुणाख्य एव रस । किञ्चात्राकाश सरस्वतीभाषानन्तरमेव शृङ्गार । सङ्गमप्रत्याशया रतेरुद्बुद्धत्वात् । अयन्तु करुण. इत्यभियुक्ता मन्यन्ते। यच्चात्र सङ्गमप्रत्याशानन्तरमपि भवतो विप्रलम्भशृङ्गारस्य प्रवासाख्यो भेद एव इति केचिदाहु । तदन्ये मरणरूपविशेषसम्भवात्तद् भिन्नमपि मन्यन्ते ।

(वि, ज) उर्वशीपुरूरवसोरिति । तयोर्वृत्तान्ते इत्यर्थ । पुरूरवस एव विप्रलम्भात् । तत्र च देवेन उर्वश्या हरणमेव दैव उत्पात ।

(वि, झ) पुण्डरीकेति । तत्र महाश्वेताया मरण आकाशसरस्वत्या पुनर्लभ्यत्वमुक्तम्। तया च तत्र विप्रलम्भ एव इत्युक्त्वा प्रथम करुण पश्चात्तु विप्रलम्भ इत्यभियुक्तानां मत दर्शयितुमाह–किञ्चेति । मरणविशेषसम्भवादिति । यथा पूर्वरागमानप्रवासरूपा विशेषास्तथा मरणस्यापि विशेषस्य सम्भवादेतद्भेदेन प्रवासाभिधमर्पयत्यर्थ ।

(लो, ऊ) करुणविप्रलम्भाख्य करुणाख्यो विप्रलम्भ'। कादम्बर्यां पुण्डरीके मृते महाश्वेताया विलाप । एतद्ग्रन्थकृत युवलयाश्वचरिते च युवतेर्मदालसायास्तथाभावे युवनयाश्वस्य शरीरान्तरेण लभ्ये अनेन्दुमतावृत्तान्तवत् । आकाशसरस्वतीभाषान्तरे त्वयाऽसौ पुनर्लभ्ये इति ।

(लो, झ) यद्यत्रेत्यादि । अयमाशय —यथा भवद्भिरेकदेशस्थयोर्वियोगाविरहाख्य विदेशस्थयो प्रवासाख्य इति ईषद्भिन्नधर्मयोगेऽपि भेद स्वीकृत । अस्माभिस्त्वभिन्ने शरीरे वियोग –प्रवासाख्य शरीरान्तरे तु करुण इति बहुतरभिन्नधर्मयोगे इति वा ज्ञाने । यत्तु केचिद् अभिलाषप्रलापेष्याविरहशापहेतुकत्वेन यथा विप्रलम्भ इत्युक्तम् तत्र सङ्गमप्रागभावस्योऽभिलाष पूर्वराग एव । एकदेशस्थयोरपि गुर्वादेर्यदा सङ्गमोपरोधित्वरूप विरहत्व यदि कन्यादिविषयस्तदा पूर्वराग एव । यदा तु परोढादिविषय तदा रागाभावरूपत्वात् न शृङ्गाररागभेद , यदि तूपयुक्तनायिकादिविषय

---

1 ' प्रसिद्ध्या इत्यनन्तरम्, 'उभयसम्भवे' इत्यधिक पाठ (क पु)

अथ सम्भोग —

दर्शनस्पर्शनादीनि निषेवेते विलासिनौ ।
यत्रानुरक्तावन्योन्यं सम्भोगोयमुदाहृतः ॥ २१५ ॥ (ऋ)

आदिशब्दादन्योऽन्याधरपानचुम्बनादय यथा–'शून्य वासगृहम्' इत्यादि । (ऋ)

संख्यातुमशक्यतया चुम्बनपरिरम्भणादिबहुभेदात् ।
अयमेक एव धीरैः कथित. संभोगशृङ्गार. ॥ २१६ ॥
तत्र स्यादनुपदृक्तं चन्द्रादित्यौ तथास्तमय. ।
जलकेलिवनविहारप्रभातमधुपानयामिनीप्रभृति. ।
अनुलेपनभूषाद्या वाच्यं शुचिमेध्यमन्यच्च ॥ २१७ ॥

तथा च भरत —

यत्किञ्चिल्लोके शुचि मेध्यमुज्ज्वल दर्शनीय वा तत्सर्वं शृङ्गारेणोपमीयते

(वि, ऋ) दर्शनस्पर्शनादीनीति—अन्योऽन्यमित्यस्यायमर्थ । कदाचित् एकेन कदाचित्तमयेन नापि दर्शनादिक क्रियत इत्यर्थ । तेन एकैकस्य दर्शनादौ अपि सम्भोगो बोद्धव्य । 'शून्य वासगृह' मित्यादौ उभयोरेव । "यान्त्या मुहुर्वलित-कन्धरमानन तदाक्तवृन्तशतपत्रनिभ वहन्त्या । दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या गाढ निखात इव मे हृदये कटाक्ष ॥" इत्यत्र गवोपरि स्थिताया मालत्या दर्शनम् । माधवस्य तु विप्रलम्भ एव ।

(वि, ट) वाच्यं शुचिमेध्यमिति—शुचि शुद्ध वस्त्रादि, मेध्य पवित्रम् अन्यद् वा यत् तदुद्दीपनविभावरूपतया वाच्यमित्यर्थ । शृङ्गारेणोपमीयते इति ।

स्तदास्य प्रवासाख्यभेदान्त पात । एवमेव च शापतोऽप्यन्तराये स्वदेशस्थयोरपि प्रवासाख्यभेदमेवाचख्यते । अत एव महर्षिणा प्रवासदशदशालक्षणे "पूर्वानुभव जा ज्ञेया दश स्मरदशा इह" इति पूर्वानुभवत्वमुक्तम् । पूर्वानुभाव पूर्वोपभोगानुभव । एव च पूर्वरागोऽनुपभुक्त इति विषय । तथा च एकदेशस्थयोर्भिन्नदेशस्थयोर्वा पूर्वरागप्रवासौ भवत । यत्तु प्रवासलक्षणे भिन्नदेशत्वमुक्त तद्व्यवहितत्वमात्र विषयम् । यदि चैकदेशस्थयोर्न प्रवासस्तत् कथय कियति योजने क्रियति वा क्रोशेऽसौ महर्षिभिर्निरूपित । कथ वा दूरदेशस्थयोर्नलदमयन्त्यो प्रद्युम्नप्रभावत्यो-र्हंसमुखा गुणश्रवणानन्तर पूर्वरागस्तया चक्रवाक्योस्तृणमात्रव्यवधानेऽपि शापप्रवासा त्यशृङ्गारोभाग इति सर्वं सुस्थम् ।

(लो, ऋ) संभोग इति—सभोग. सम्भोगाख्यो भेद । विलासी च विला-सिनी च विलासिनौ ।

(लो, ऌ) संख्यातुमिति—परिरम्भणादित्यादिशब्दात् विभावानुभव-

युज्यते च। (ट, ल्)
किञ्च—

कथितश्चतुर्विधोऽसावानन्तर्य्यात्तु पूर्वरागादेः ॥ २१८ ॥

यदुक्तम्—

न विना विप्रलम्भेन सम्भोग पुष्टिमश्नुते।
कषायिते हि वस्त्रादौ भूयान् रागो विवर्द्धते ॥

तत्र पूर्वरागानन्तर सम्भोगो यथा कुमारसम्भवे पार्वतीपरमेश्वरयो। (ठ)
प्रवासानन्तरं सम्भोगो यथा मम तातपादानाम्—

खेम ते ननु पद्मलाक्षि! किसअ खेम महङ्ग दिढ
पुताहक् कृशता कुत तुह पुणो पुट्ठ सरीर जदो।
केनाह पृथुल प्रिये पणइणीदेहस्स समेलणात्
त्वत्तः सुभ्रु! न कापि मे जइ इद खेम कुदो पुच्छसि ॥ (ए)

शृङ्गारेण हेतुना उपमीयते तदुद्दीपनतया उपमीयते उपस्थाप्यते इत्यर्थ। वर्ण्यते इति यावत्। युज्यते इति शृङ्गारे तदुपयोगात्।

(वि, ठ) सम्भोगशृङ्गारस्य एतद्विधत्वमुक्त्वा पूर्वरागाद्यानन्तर्यण तस्य चातुर्विध्य वक्तुमाह-**किञ्चे**ति। कषायिते प्रथम मिश्रिद्रव्यीकृते। **पार्वतीपरमेश्वरयो**रिति—अत्रापि तयोर्वृत्तान्ते इत्यर्थ। पूर्वरागसभोगो मदनदाहानन्तर विवाहे सति पार्वतीपरमेश्वरयो। एव मालतीमाधवयोरपि बाध्यम्।

(वि, ड) **खेमं ते ननु** इत्यादि—इमे दम्पत्योराक्तप्रत्युक्ती। तत्र प्रथमा रागतस्य पत्यु सस्कृतोक्ति तत् पत्न्या प्राकृतोक्ति। प्रथमसस्कृतेन पृच्छा नायकस्य, प्राकृतेनोत्तर प्रियाया। एवमुत्तरोत्तरम्। कीदृशम् खेम ममाङ्ग दृढमित्यर्थ। **पुट्ठमिति**—तव पुन शरीर पुष्ट यत इत्यर्थ। **पणइणी**ति—प्रणयिन्या मम देहस्य समिश्रणात् समेलनात् कृशीस्मरणादित्यर्थ। एतावत् काल तव वैदेश्यात्, निर्धनेन तदानुरागेण यतोऽहं कृशा अतो मा कृशा कृ वा मन्मासेन तव शरीर पुष्टमित्यर्थ। **त्वत्त** इति। हे सुभ्रु! त्वत्त कापि न मे कापि पुष्टि इत्यर्थ। **जइ इदमिति** यदीद तदा खेम कुत पृच्छसि। स्वानुरागविषयस्यैव खेमपृच्छा। मत्काश्यैंऽपि

वैचित्र्यम्। तत्र स्यादित्यनन्तर यथासभव विभावादिरूपेणेति बोद्धव्यम्। यत् किंचित् दर्शनीय शय्यागृहादि।

(लो, ए) **किसअमिति**—कृशक खेम ममाङ्ग दृढम्। **तुहेति**—तव पुन पुष्ट शरीर यत। **पणइणी**ति—प्रणयिनीदेहस्य समिश्रणात्। **जइ** इति—

एवमन्यत्राप्यूह्यम् । (ढ) अथ हास्य[1]

विकृताकारवाग्वेशचेष्टादेः कुहकाद् भवेत् ।
हासो हासस्थायिभावः श्वेतः प्रमथदैवतः ।
विकृताकारवाक् चेष्टं यमालोक्य हसेज्जनः ।
तमत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम् ।
अनुभावोऽक्षिसंकोचवदनस्मेरतादयः ।
[2]निद्रालस्यावहित्थाद्या अत्र स्युर्व्यभिचारिणः ॥ २१९ ॥
ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च ।
नीचानामपहसितं तथातिहसितश्च[3] षड्भेदाः ॥२२०॥(ढ,ऐ)
ईषद् विकासि नयनं स्मितं स्यात् स्पन्दिताधरम् ।
किञ्चिल्लक्ष्यद्विजं तत्र हसितं कथितं बुधैः ।
मधुरस्वरं विहसितं सांसशिरःकम्पनमवहसितम् ।
अपहसितं साश्रुाक्षं विकृतास्यं भवत्यतिहसितम् ॥ २२१ ॥

यथा मम[4]—

गुरोर्गिरं पञ्च दिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयञ्च ।

तव पुष्टया च मयि तवानुरागाभावेनैव पुष्टि । अनुरागसत्त्वे तु मद्विरहात् कार्श्यं स्यादिति भाव । **एवमन्यत्रेति**—करुणविप्रलम्भानन्तर सम्भोग इत्यर्थ । तत्र च मरणानन्तर जीवने महाश्वेतापुण्डरीक्यो. सम्भोगे ।

(**वि, ढ**) **ज्येष्ठानामिति**—उत्तमाना नायकानामित्यर्थ । **स्मितहसित** इति—कस्यचिदुत्तमनायकस्य स्मित कस्यचित्तु हसितम् इत्यर्थ । एवमुत्तरोत्तरमपि एकैकस्य एकैकमिति षड्भेदा ।

(**वि, ण**) स्मितादिलक्षणमाह । **ईषदिति** । **गुरोर्गिरं** इति—वक्तुर्मिश्रपादोपहास ।

यदि इद त्वैम कुत पृच्छसि । अयमर्थ—यदाहमेव प्रणयिनी किमिति मा परिहृत्य दूरं गतोऽसि यद्धेतुकस्तवाय प्रश्न । अत्र सम्भोग सयुक्तनायकविषय । सयोग-वियोगौ च परस्परायत्ततारूपौ तेन दूतिप्रेषणादे सभोगविषयत्वम् । ईर्ष्यामानादेश्च विप्रलम्भविषयत्वमविरुद्धम् ।

(**लो, ऐ**) **हास्य** इति—विकृताद् विकियायुक्ताद् वाग्वेशचेष्टादे कुहकाख्य-वञ्चनाप्रयोगाच्च हास्यरसो भवेदिति सम्बन्ध । प्रमथा शिवगणविशेषा । यद्वस्तु । ज्येष्ठानामुत्तमप्रकृतीनाम् ।

---

1 हास्य (क ख ग पु) 2 'हावहित्थप्रमुखास्तथा' (प फ पु)
3 हसित तदेव षड्भेद । (क ख पु) 4 ममेति (क ख पु) नास्ति ।

अमी समाघ्राय च तर्कवादान् समागता कुक्कुटमिश्रपादा ॥ (ख)

[1]अस्य नटकमेलकप्रभृतिषु परिपोषो द्रष्टव्यः। (ओ)

अत्र च—

यस्य हासः स चेत् कापि साक्षान्नैव निबध्यते।
तथाप्येष विभावादिसामर्थ्यादुपलभ्यते।
अभेदेन विभावादिसाधारण्यात् प्रतीयते।
सामाजिकैस्ततो हास्यरसोऽयमनुभूयते ॥ २२२ ॥ (त)

एवमन्येष्वपि रसेषु बोद्धव्यम्।

अथ करुण —

इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत्।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः।
शोकोऽत्र स्थायिभावः स्यात् शोच्यमालम्बनं मतम्।
तस्य दाहादिकावस्था भवेदुद्दीपनं पुन ॥ २२३ ॥
अनुभावा दैवनिन्दाभूपातक्रन्दितादयः।
वैवर्ण्योच्छ्वासनिःश्वासस्तम्भप्रलपनानि[2] च।
निर्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ॥ २२४ ॥

शोच्य विनष्टबन्धुप्रभृति।

(वि, त) अत्र चोत्तमादिषु य उपहासकस्तस्य स्मितादिरनुनेयम्। साक्षान्नैव निबध्यत इति। नशब्देन वाच्य इत्यर्थः। अभेदेनेति—स उपहासक सामाजिकै विभावादिसाधारण्यात् यत अभेदेन प्रतीयते ततो हास्यरसोऽयमनुभूयत इत्यर्थः। विभावादिसाधारण्यञ्च उपहासकस्य यो विभावादिरूपो द्रष्टव्य वेषकृत्यादि, तत्र सामाजिकस्यापि स्वोपहसनीयत्वाद्यारोप्य। स च स्वात्मनि उपहासकभेदारोपात्। ततश्च स्वनिष्ठहासे उपहासकहासाऽभेदारोप विभावादीना साधारणीकरणव्यापारात्। ततश्च स्वादनाख्येन व्यापारेण हास्यरस आस्वाद्यत इति पूर्वापरमन्यनिष्कर्षः। एवमेव रसान्तरेऽपि रसे।

(लो, ओ) अत्र कुक्कुटमिश्रपादा आलम्बनम्। तेषा च पक्षादिनाप्ययनादय उद्दीपनानि। कायोच्छ्वसनशङ्कितसङ्कोचादयो हर्षावहित्थादयश्च अनुभावव्यभिचारिण अनुक्ता अपि सामर्थ्यालभ्या। एवमन्यत्रापि।

---

1 अस्येत्यादि द्रष्टव्य इत्यन्त पाठो (घ च छ पु) नास्ति।

2 'प्रलपनानि च' (क. स पु)

यथा मम राघवविलासे[1]—

विपिने क्व जटानिबन्धनं तव चेदं क्व मनोहरं वपुः ।
अनयोर्घटनाविधेः स्फुटं ननु खड्गेन शिरोपकर्त्तनम् ॥ *

अत्र हि रामवनवासजनितशोकार्त्तस्य दशरथस्य दैवनिन्दा । एवं बन्धुवियोगविभवनाशादावप्युदाहार्य्यम् । परिपोषस्तु महाभारते स्त्रीपर्वणि द्रष्टव्य (थ)

अस्य करुणविप्रलम्भाद्भेदमाह—

शोकस्थायितया भिन्नो विप्रलम्भादयं रसः ।
विप्रलम्भे रतिः स्थायी पुनः सम्भोगहेतुकः ॥ २२५ ॥ (द)

अथ रौद्र —

रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः ।
आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम् ।
मुष्टिप्रहारपतन[2]विकृतच्छेदावदारणैश्चैव ।
सग्रामसंभ्रमाद्यैरस्योद्दीप्तिर्भवेत् प्रौढा ।
भ्रूविभङ्गोष्ठनिर्दंश बाहुस्फोटनतर्जनाः ।
आत्मावदानकथनमायुधोत्क्षेपणानि च ।
अनुभावास्तथाक्षेपक्रूरसंदर्शनादयः ।

(वि, थ) विपिने क्वेति स्पष्टम् । एवं बन्धुवियोगेति । तत्र बन्धुवियोगे यथा—

"हा मातस्त्वरितासि कुत्र पितरं हा देवता क्वाश्रिष
धिङ् प्राणान् पतितोऽशनिर्हतवहस्तेऽङ्गेषु दग्धे दृशौ ।
इत्थं घर्घरमध्यरुद्धरुदितैः पौराङ्गनानां गिर
श्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि ॥"

इदं मदालसाया मृतायां पुरस्त्रीणां रोदनस्य केनापि कथनम्। वित्तनाशे यथा—

"किं करोमि क्व गच्छामि शरणं क्व व्रजाम्यहम् ।
चिरेणोपार्जितं वित्तं दस्युनापहृतं मम" ॥ इति ।

(वि, द) पुनः सम्भोगहेतुक इति । पूर्वरागमानप्रवासहेतुकत्वे करुणसाङ्कर्यशङ्कैव नास्ति । मरणे सत्येव तत्साङ्कर्यसम्भावना । तत्र पुनः सम्भोगसम्भावनासत्त्वे विप्रलम्भ । पुनः सम्भोगहेतुक पुनः सम्भोगसम्भावनाहेतुक इत्यर्थः ।

---

* अत्र राम आलम्बनविभाव । तस्य वनगमनमुद्दीपनविभाव । दैवनिन्दा अनुभाव । शोक स्थायिभाव ।

1 'विलापे' (ट ड पु) 2 'पातन' (क, ख पु.)

उग्रतावेगरोमाञ्चस्वेदवेपथवो मदः ।
मोहामर्षादयश्चात्र भावाः स्युर्व्यभिचारिणः ॥ २२६ ॥

यथा—

कृतमनुमत[1] दृष्ट वा यैरिद गुरुपातक
मनुजपशुभिर्निर्मर्य्यादैर्भवद्भिरदायुधै ।
नरकरिपुणा सार्द्धं तेषा सभीमकिरीटिना-
मयमहमसृज्ये दोमासै करोमि दिशा बलिम् ॥ (ध, औ) *

अस्य युद्धवीराद्भेदमाह—

रक्षास्थेनेयता चात्र भेदिनी युद्धवीरतः ॥ २२७ ॥

अथ वीर —

उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः ।
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः ।
आलम्बनविभावास्तु विजेतव्यादयो मताः । (न)
विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः ।
अनुभावास्तु तत्र स्युः सहायान्वेषणादयः ।
सञ्चारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः ।
सच दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्याद् ॥२२८॥

(वि, ध) कृतमनुमतामिति । अर्जुन सम्बोध्य कृष्णस्य अस्यवाक्यस्य उक्तिरियम् । इद स्वय कृतस्य मम यदि शिरश्छेदरूप गुरुपातक यैरदायुधैर्मनुजपशुभिर्निर्मर्यादैर्भवद्भि कृतमनुमत दृष्ट वा नरकमुरस्य रिपुणा श्रीकृष्णेन सार्द्धं सभीमकिरीटिना तेषां भेदोमासै दिशा दिक्स्थितभूतानां बलिमयमहम् एतत्क्षणवर्त्ती अह करोमीत्यर्थ । किरीटी अर्जुन । भेदस्तैलम् । नरकरिपुपदोपादानात् नरकहेतुपातकहन्तार गुरुपातकारिणश्च हनिष्यामीति सूचनात् मत्क्रोधे जगदेव नश्यति इति सूचितम् ।

(वि, न) धर्मवीरदानवीरयुद्धवीरदयावीररूपतया वीररसस्य चातुर्विध्य वक्ष्यते । तेषामालम्बनादिभेदो विजेतव्यादय इत्यादि सर्वमवार्थमादिपदम् ।

(लो, औ) कृतमनुमतामित । तेषा भवताम् ।

---

* अत्रापकरिणोऽर्जुनादय आलम्बनम् । पितृहन्तृत्वमस्त्रादेरुद्दीपनम् । प्रतिज्ञा अनुभाव । अन्तर्नरेष्वन्यतमत्वं व्यभिचारिभाव । क्रोध स्थायिभाव । सामाजिके क्रोधप्रकृतिको वीर रसो व्यज्यते ।

1 'मनुहत' (क. स J)

स च यौरो दानवीरो धर्मवीरो दयावीरो युद्धवीरश्चेति चतुर्विधः ।

तत्र दानवीरो यथा परशुराम·—त्याग सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः इति। अत्र परशुरामस्य त्यागे उत्साहः स्थायिभावः, संप्रदानभूतब्राह्मणालम्बनविभावैः सत्त्वाध्यवसायादिभिश्चोद्दीपनविभावैर्विभावितः सर्वस्वत्यागादिभिरनुभावैरनुभावितो हर्षौग्र्यादिभिः सञ्चारिभिः पुष्टिं नीतो दानवीरतां भजते। (प)

धर्मवीरो यथा युधिष्ठिर —

राज्यं च वसु देहश्च भार्य्याभ्रातृसुताश्च ये ।
यच्च लोके ममायत्तं तद्धर्माय सदोद्यतम् ॥

युद्धवीरो यथा श्रीरामचन्द्रः—

यो लङ्केश्वर ! दीयतां जनकजा राम स्वयं याचते
कोऽयं ते मतिविभ्रमः स्मर नयं नाद्यापि किञ्चिद् गतम् ।
नैवं चेत् खरदूषणत्रिशिरसां कण्ठासृजा पङ्किलः
पत्त्री नैष सहिष्यते मम धनुर्ज्यावन्धवन्धूकृतः ॥ (फ) ×

दयावीरो यथा जीमूतवाहन·—

शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि तवापि तावत् किंभक्षणात्त्वं विरतो गरुत्मन् ॥

एष्वपि विभावादयः पूर्वोदाहरणवदूह्याः— (ब) ※

(वि, प) **त्याग सप्तसमुद्रेति**—सप्तसमुद्राक्रान्ताया मह्या निर्व्याजदानपर्य्यन्तः त्याग इत्यर्थः । सत्त्वाध्यवसाय सात्त्विककियाभावितः । पूर्वोक्तप्रकारेण ज्ञापितः ।

(वि, फ) **भो लङ्केश्वर** इति । रामो रामनाम्ना ख्यातो बालिहन्ता स्वयं याचते । नय नीतिं स्मर । **नाद्यापीति** । मया सह सन्धेरुपाय कोऽपि न गत इत्यर्थः । नैवं चेत् सीता न दीयते चेत् तदा मम धनुर्ज्यावन्धस्य वन्धूकृत एष पत्री बाणो न सहिष्यते । कीदृशः खरादीनामसृजा रक्तेन पङ्किलः ।

(वि, ब) **शिरामुखैरिति** । गरुडेन भक्ष्यमाणं नागं परित्रातुं तद्भक्षणाय आत्मदेहमर्पितवतस्तद्भक्षितबहुमांसस्य जीमूतवाहनस्योक्तिः प्रत्युक्तिरियम् । हे गरुत्मन् ! अद्यापि मम देहे मांसमस्ति । अत्र हेतुमाह—मम ईदृशस्य शिरामुखैः रक्तं स्यन्द-

---

× अत्र रावण आलम्बनं तेन सीताहरणमुद्दीपनम् । तस्मिन् उपेक्षा अनुभाव सोढ्येत इति गम्यमानश्च व्यभिचारिभावः । उत्साहः स्थायिभाव ।

※ नाग आलम्बनविभाव । तस्य वानरोक्तिरनुभाव. । आनन्दश्च अनुभाव. । धैर्य्यश्च सञ्चारिभाव । दयायामुत्साह स्थायिभाव ।

अथ भयानक —

भयानको भयस्थायिभाव [1]कालाधिदेवत ।
स्त्रीनीचप्रकृति कृष्णो मतस्तत्त्वविशारदै ।
यस्मादुत्पद्यते भीतिस्तदत्रालम्बन मतम् ।
चेष्टा घोरतरास्तस्य भवेदुद्दीपन पुन ।
अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभाषणम् ।
[2]पुलकस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादय । (भ)
जुगुप्सावेगसमोहसत्रासग्लानिदीनता ।
शङ्कापस्मारसभ्रान्तिमृत्यवाद्या व्यभिचारिण ॥ २२९

यथा 'नष्ट वर्षवरै रियादि—

अथ बीभत्स —

जुगुप्सास्थायिभावस्तु बीभत्स कथ्यते रस ।
नीलवर्णो महाकालदैवतोयमुदाहृत
[3]दुर्गन्धमासपीशितमेदास्यालम्बन मतम् ।
तत्रैव कृमिपाताद्यमुद्दीपनमुदाहृतम् ।
निष्ठीवनास्यवलननेत्रसङ्कोचनादय ।
अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिण ।
मोहोऽपस्मार आवेगो व्याधिश्च मरणादय ॥ २३० ॥

यथा—

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोभभूयांसि मांसा
न्यसस्फिक्पृष्टपिण्डाद्यवयवसुलभान्युग्रपूतीनि नत्वा ।

त एव । अतो यद्यपि बहूनि मासानि भक्षितानि तथापि तृप्तिमाप्नामि न पश्यामि । अतस्त्व किं भक्षणाद् विरतोसाल्यर्थ ।

(वि, भ) भयानकानुभावेषु पुलक किञ्चिद् अङ्गेषु रोमा । रोमाञ्चस्तु सर्वाङ्गेषु इति भेद ।

(वि, म) तद्व्यभिचारिभावेषु—जुगुप्साभयहेतुप्रेतादिदर्शनात् । सत्रासश्च भयाद्विक्ष । उत्कृत्येति—करालाराधनाय गतस्य माधवस्य शव भुक्तान प्रत दृष्ट्वा उक्तिरियम् । अथ प्रेतरङ्क । प्रेतेषु दरिद्र । अङ्कस्थात् करङ्कात् शवात् अस्थिसस्थ

(लो, अ) उत्कृत्योत—उच्छ्राय उच्छ्रूनता । पिण्डो नद्वोर्ध्वभाग । रङ्क थिरदुलभाहार । करङ्कोऽस्थिशेष शिर । स्थपुर विकृतगभीरभाग ।

---

1 भूताधिदैवत (च न पु) 2 प्रलय' (क ख पु)
3 दुर्गन्धिमासरुधिर (ख पु) दुर्गन्धमासरुधिर (क पु)

आर्त्तेः पर्य्यस्तनेत्र प्रकटितदशन प्रेतरङ्ग करङ्का-
दङ्कस्थादस्थिसस्थ स्थपुटगतमपि क्रव्यमन्यग्रमत्ति ॥ * (म, अ)

अथाद्भुत —

अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः[1] ।
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ।
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ।
स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसंभ्रमः ।
तथा नेत्रविकासाद्या अनुभावाः प्रकीर्तिताः ।
वितर्कावेगसंभ्रान्तिहर्षाद्या व्यभिचारिणः ॥ २३१

यथा—

दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-
ष्टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः ।

स्थपुटगतमपि क्रव्य मास प्रकटितदशन सन्नव्यग्र यथा स्यात्तथाऽत्ति । किं कृत्वा प्रथम कृत्तिं चर्म्म उत्कृत्योत्कृत्य । अथानन्तर असे भुजमूले स्फिचि नितम्बे पृष्ठे च । आदिना उरौ च । पिण्डेऽवयवे मुलभानि मासानि जग्ध्वा भक्षयित्वा । ईदृशक्रमेण भक्षणाद् अव्यग्रता । मासानि कीदृशानि पृथुना उच्छ्रोयेन तत्फुल्लतया भूयासि बहूनि तथा अतिदुर्गन्धीनि ।

(वि, य) अद्भुतव्यभिचारिभावेषु सभ्रान्ति , भ्रमण चपलता । तेनानुभावत्वेन उक्तसभ्रमाद्भेद । दोर्दण्डेति—रामेण धनुषि भग्ने तच्छब्द श्रुत्वा लक्ष्मणस्य उक्तिरियम् । दोर्दण्डेनाञ्चितस्य उल्लिखितस्य चन्द्रशेखरधनुर्दण्डस्यावभङ्गेन उद्गतो झङ्कारध्वनि अहोऽद्यापि न विश्राम्यति । कादृश । आर्य्यस्य रामस्य बालचरितानां प्रस्तावनाया प्रख्यापनाया डिण्डिमो वाद्यविशेष । पुन कीदृश —द्राक्सहसा पर्य्यस्ताभ्यामुत्क्षिप्ताभ्या कपालसपुटाभ्या पुनर्मिलितो ब्रह्माण्डभाण्डस्य चण्डशब्दात् उत्कृत्य पुनर्मिलित ब्रह्माण्डकपालद्वय तदुदरे भ्राम्यन् इत्यर्थ । अत्र रामो लोकातिग वस्तु । धनुर्भङ्गे गुण ।

(लो, आ) दोर्दण्डेति । आर्य्यो राम द्राक्सहसेति । पर्य्यस्ताभ्यां सपूर्णाभ्यां कपालसपुटाभ्यां यस्य । एव विशेषणविशिष्टतया मिलति जायमाने ब्रह्माण्डभाण्डोदरे भ्राम्यन्

---

* अत्र शव प्रेतरङ्को वा आलम्बनम् । तत्कर्त्तन मासादनञ्च उद्दीपनम् । तद्दृष्टु नासोच्छ्वनवदनविधूननविवर्त्तननिष्ठीवनादयोऽनुभावा । उद्वेगादयो व्यभिचारिण । जुगुप्सा स्थायिभाव । सामाजिके वीभत्सरसो व्यज्यते ।

1 'मन्मथदैवत (च ज पु)

द्राक् पर्यस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदर-
भ्राम्यद्भिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति ॥
(य, आ) *

अथ शान्त—

शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः । (इ)
कुन्देन्दु[1]धवलच्छायः श्रीनारायणदैवतः ।
अनित्यत्वादिनाशेषवस्तुनिःसारता तु या । (र)
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते ।
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः ।
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः ।
रोमाञ्चाद्याश्चानुभावास्तथा स्युर्व्यभिचारिणः ।
निर्वेदहर्षस्मरणमतिभूतदयादयः ॥ २३२ ॥

यथा—

रथ्यान्तश्चरतस्तथा धृतजरत्कन्थालवस्याध्वगै.
सत्रासञ्च सकौतुकञ्च सदय दृष्टस्य तैर्नागरै ।
[2]निर्बीजीकृतचित्सुधारसमुदा निद्रायमाणस्य मे
नि.शङ्क[3] करट कदा करपुटीभिक्षा विलुण्ठिष्यति ॥ (ल,ई)

(वि, र) अनित्यत्वादिना इत्यत्र आदिपदात् इष्टवियोगादिना वैराग्यपरिग्रह ।

(वि, ल) रथ्यान्त इति । सगोत्रविरक्तस्योक्तिरियम् । निर्बीजीकृतया चित्सुधारसमुदा ज्ञानामृतहर्षेण निद्रायमाणस्य मे कदा करपुटीभिक्षा करट काको विलुण्ठिष्यति । कामनाभावात् निर्बीजता । मम कदिदास्य, भिक्षाविलुण्ठनादिभयाभावात्

पिण्डित पिण्डाभूत चण्डिमा चण्डत्व यस्येति भद्राक्षरध्वनेर्विशेषणम्।

(सो, इ) उत्तमरूप शम स्थायिभावो यस्य । यतु निर्वेदस्य स्थायिभावतावलम्बनेन शान्तरसस्यामर कृतस्तदयुक्तम्, तस्य स्थायमानरूपत्वात् सचारिभावस्यैव नाट्यत्वात्।

(सो, ई) रथ्येति—त्यक्तो लेश । छिद्रमयत्वात् विकृताकारत्वात्सभागम् । तथाद्भुतस्याऽदृष्टपूर्वत्वात्सकौतुकम् । अकिञ्चनत्वात् सदयम् । निर्बीजीकृतो

---

* अत्र धनुष्टङ्कार आलम्बनविभाव । तस्य विशालतोद्दीपनविभाव । तस्य वर्णनमनुभाव । हर्षादयश्च व्यभिचारिभावा । अद्भुत स्थायिभाव । सामाजिके ऽद्भुतरसो व्यज्यते ।

1 'सुन्दरच्छाय.' (ट. ठ पु.) 2 'निर्बीजीकृत' (क ग. पु)
3 'नि शङ्क' (ग घ. प.)

पुष्टिस्तु महाभारतादौ द्रष्टव्या ।

निरहङ्काररूपत्वाद् दयावीरादिरेष नो ॥ २३ ॥

दयावीरादौ हि [1]जीमूतवाहनादौ अन्तरा मलयवत्याद्यनुरागादेरन्ते च विद्याधरचक्रवर्त्तित्वाद्यासेर्दर्शनादहङ्कारोपशमो न दृश्यते । शान्तस्तु [2]सर्वप्रकारेणाहङ्कारप्रशमैकरूपत्वान्न तत्रान्तर्भावमर्हति । अतश्च नागानन्दादे.[3] शान्तरसप्रधानत्वमपास्तम् ।

ननु—

न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा ।
रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु समप्रमाणः[4] ॥ (ब,उ)

इत्येवरूपस्य शान्तस्य मोक्षावस्थायामेवात्मस्वरूपापत्तिलक्षणाया प्रादुर्भावात् तत्र सचार्य्यादीनाम् अभावात् कथं रसत्वमित्युच्यते । (ऊ)

निःशङ्कं चरत रथ्यान्तः नगररत्नमार्गमध्ये चरत । धृतजरत्कन्थालवस्य । अतः तैः रथ्यास्थैः अध्वगैर्नागरैः कन्यादिविपरीतदर्शनात् सत्रासस्य सकौतुकस्य दरिद्रावस्थादर्शनात् सदयस्य दृष्टस्य । अत्र समस्तसुखहेतूपक्षेपणात् लब्धाशेषवस्तुनि सारता आलम्बनम् । नागरैरुक्तरूपेण दर्शनान उद्दीपनानि । भिक्षाविलुण्ठनाशसालम्भौ रोमाञ्चहर्षावनुभावव्यभिचारिणौ ।

(वि, च) दयावीरस्य भेदमाह—**निरहङ्कारेति** । **नागानन्देति**—जीमूतवाहननायके नागानन्दे नाम्नि काव्यप्रकाशे शान्तस्य जीमूतवाहनस्य युक्तिमाक्षिपति—**अतश्च** इति । **सर्वेषु भावेष्विति**—सर्वेषु कान्तादिसकलपदार्थेषु सत्स्वपीत्यर्थः । **अत्र च** इति—मोक्षावस्थीयशान्तः स एव यतो रसतामेतीति काव्यनाट्यसमर्पित सन्निति शेषः ।

योऽसौ चिज्ञानमेव सुधारसः तेन प्रकाशेन या मुत् प्रीतिः सुखैकमयता तया निर्व्रायमाणस्य पश्यतोऽपि प्रमेयज्ञानमपश्यतः चित्सुधारसस्य । निर्वीनीकृतस्यायमर्थः—निर्गतं वानं संसारकारणम् अविद्याख्यं यस्मात् प्रकाशादित्यर्थः । निर्गतं वीजम् आत्मप्रकाशज्ञानकारणं मनो यत्र स निर्वीजः । ब्रह्माकारां वृत्तिमुपाद्य मनसः सत्त्वांशस्यापि विनाशाभ्युपगमात् ।

(लो, उ) **निरहमिति**—दयावीरादीत्यादिशब्दात् धर्मवीरादि । नागानन्दाख्यं नाम नाटकम् । सर्वेषु लोष्ट्राश्मकाञ्चनादिषु भावेषु पदार्थेषु समं तुल्यं प्रमाणं ज्ञानं यत्र ।

(लो, ऊ) **आत्मेति**—आत्मस्वरूपस्य आपत्तिः प्राप्तिः लक्षणं स्वरूपं यस्याः ।

---

1 हि नागानन्दादौ जीमूतवाहनादेरन्तरा । 2 सर्वाकारेण (क ख पु)
3 'नागानन्दे' (च छ पु) 4 शमप्रधान (च ज ट पु)

युक्तवियुक्तदशायामवस्थितो यः शमः स एव यतः ।
रसतामेति तदस्मिन् संचार्यादेः स्थितिश्च न विरुद्धा ॥२३४॥

यश्चास्मिन् सुखाभावोऽप्युक्तस्तस्य वैषयिकसुखपरत्वान्न विरोध । (श,ऋ)

उक्तं हि—

यच्च कामसुखं लोके यच्च दिव्यं महासुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥
सर्वाकारमहङ्काररहितत्वं व्रजन्ति चेत् ।
अत्रान्तर्भावमर्हन्ति दयावीरादयस्तदा[1] ॥ (प, ऋ)

आदिशब्दात् धर्मवीरदानवीरदेवताविषयरतिप्रभृतय

तत्र देवताविषया रतिर्यथा—

कदा वाराणस्यामिह सुरधुनीरोधसि वसन्
वसान कौपीन शिरसि निदधानोऽञ्जलिपुटम् ।
अये गौरीनाथ ! त्रिपुरहर ! शम्भो ! त्रिनयन !
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान् ॥ (स)

(वि, श) **न विरुद्धेति**—निर्वेदरूपसंचारिस्थिति अत्रास्त्येव इत्यर्थ । **वैषयिकसुखपरत्वादिति** । तेन शान्तस्य वैषयिकसुखभिन्न तृष्णाक्षयार्थीन सुखमस्त्येव इत्युक्तम् ।

(वि, प) तत्र च सम्वादमाह । **उक्तं हीति**—एते काममुखादिव्यसुखे ।

(वि, स) **देवताविषयरतिर्यथेति**—शान्तान्तर्भावमापन्ना देवताविषयरति-र्यथेत्यर्थ । ***कदा वाराणस्यामिति***–इह वाराणस्या सुरधुन्या गङ्गाया रोधसि तीरे पुलिने वा वसन् अह कौपानद्वयञ्च वसान शिरस्यञ्जलिपुट दधानश्च अये गौरीनाथे-त्यादिनाऽऽक्रोशन् च कदा दिवसान् निमेषमिव नेष्यामीत्यर्थ । अत्र कौपीनादि विशेषणैं सुरादिराहित्यप्राप्त्या सर्वाहङ्काररहित्यलाभाद् देवविषयरतेरपि शान्त-रसत्वप्राप्ति ।

(लो, ऋ) **युक्तेति**—तत्र विषयेभ्य परावृत्य साक्षात् कर्तव्ये ब्रह्मणि मनो निधाय वर्त्तमानत्वाच्चिन्तासन्तानवान् युक्त, यस्य च योगजधर्मसहकृतेन मनसा, जिज्ञासितवस्तुसाक्षात्कारो जायते, यश्च भूम्वेन्द्रियजयी अणि माद्या कायसिद्धीर्दूरश्रवणाद्या ह्यतीन्द्रियसिद्धीरासादितवान् । समाधिव्युत्थितो वियुक्त । यस्य योगजधर्मसहकृतानि बाह्येन्द्रियाणि स्वे स्वे विषये महत्त्वास्मितार्पादि-सहकारनिरपेक्षाणि वर्त्तन्ते, एव युक्तवियुक्तावस्थायामित्यर्थ ।

(लो, ऋ) **अत्रेति**—अत्र महाविषये दयावीरादय स्वल्पविषया ।

---

1 'तथा' (क स पु)

अथ मुनीन्द्रसम्मतो वत्सलः—

स्फुटं चमत्कारितया वत्सलं च रसं विदुः ।
स्थायी वत्सलतास्नेहः पुत्राद्यालम्बनं मतम् । (ह, लृ)
उद्दीपनानि तच्चेष्टाविद्याशौर्योदयादयः ।
आलिङ्गनाङ्गसंस्पर्शशिरश्चुम्बनमार्जनम् ।
पुलकानन्दवाष्पाद्या अनुभावाः प्रकीर्तिताः ।
संचारिणोऽनिष्टशङ्काहर्षगर्वादयो मताः ।
पद्मगर्भच्छविर्वर्णो दैवतं लोकमातरः ॥२३५॥

यथा—

यदाह धान्या प्रथमोदितं वचो
यया तदीयामवलम्ब्य चाङ्गुलिम् ।
अभूच्च नम्रः प्रणिपातशिक्षया ।
पितुर्मुदं तेन ततान सोर्भकः ॥ (ह) +

एषाञ्च रसानां परस्परविरोधमाह—

आद्यः करुणवीभत्सरौद्रवीरभयानकैः ।
करुणो हास्यशृङ्गाररसाभ्यामपि तादृशः ।
भयानकेन शान्तेन तथा वीररसः स्मृतः ।
शान्तस्तु वीरशृङ्गाररौद्रहास्यभयानकैः ।
भयानकेन करुणेनापि हास्यो विरोधभाक् ।
रौद्रस्तु हास्यशृङ्गारभयानकरसैरपि ।

(वि, ह) वत्सलतास्नेह इति—न चैवं दयावीरत्वप्रसक्तिरिति वाच्यम्, आत्मापकारेणापि परोपचिकीर्षाप्रयोजकधर्मविशेषस्य दयात्वात् सुखसम्बन्धिनि अनुरागविशेषस्य च स्नेहत्वात् इति अनयोर्भेदात् ।

(वि, त्त) यदाह धान्येति—उदितस्य उच्चारितस्य प्रथमं प्रथमोदितमिति "राजदन्तादिसमासात्" । धान्या उदितश्च नारायणेत्यादिशब्दश्च प्रथमं "ना" इत्यादि यद्वच. रघुराह तदीया धात्रीयाम् अङ्गुलिमवलम्ब्य यच्च यया प्रणिपातशिक्षया यच्च नम्रोऽभूत्, तेन कर्मणा पितुर्दिलीपस्य मुदं ततान इत्यर्थः ।

(लो, लृ) स्फुटमिति—चमत्कारस्यात्रोक्तप्रकारेण रसे सारत्वाभिदेशः । तस्य च विभावादिशबलितस्वप्रकाशानन्दमयत्वं दैवसिद्धमित्युक्तम् । चमत्कारितयेति । वत्सलतास्नेहः ।

+ दिलीपस्य वत्सलता स्थायिभावः । रघुरालम्बनविभावः । तादृशभाषणगमनादिकमुद्दीपनविभाव । आलिङ्गनादिकमनुभाव । हर्षादयः संचारिभावा ।

शृङ्गारवीररौद्राख्यहास्यशान्तैर्भयानकः ।
शृङ्गारेण तु बीभत्स इत्याख्याता विरोधिता ॥ २३६ ॥

आद्यः शृङ्गारः । एषां च समावेशप्रकारा वक्ष्यन्ते ।

कुतोऽपि कारणात् क्वापि स्थिरतामुपयन्नपि ।
उन्मादादिर्न तु स्थायी पात्रे न स्थैर्य्यमेति यत् ॥२३७॥ (क,ए)

यथा विक्रमोर्वश्यां चतुर्थेऽङ्के पुरूरवस उन्मादः ।

रसभावो तदाभासौ भावस्य प्रशमोदयौ ।
सन्धिः शबलता चेति सर्वेऽपि रसनाद्रसाः ॥ २३८ ॥

रसनधर्मयोगित्वाद् भावादिष्वपि रसत्वमुपचारात्[1] इत्यभिप्राय । भावादय उच्यन्ते— (ख, ऐ)

सञ्चारिणः प्रधानानि देवादिविषया रतिः । (ओ)
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ॥ २३९ ॥

न भावहीनोऽस्ति रसो न भावो रसवर्जितः

(वि, क) पात्रे न—स्वभावत इति शेषः ।

(वि, ख) प्रशमोदयौ नाशोत्पत्ती । **रसनाद्रसा** इति—रसनम् आस्वादनं तद्रूपमादृश्यात् गौण्या लक्षणया रसपदार्थ इत्यर्थः । तस्य रसस्य साम्यं व्याचष्टे—**रसनधर्मेति**—

(वि, ग) **प्रधानानीति** । निरालम्बवाक्यव्यङ्ग्यत्वमेव प्राधान्यम् । प्रधानभूता देवादिविषया रतिश्चेति चार्था बोध्या । उद्बुद्धमात्र ज्ञातमात्र नतु विशिष्य निश्चित इत्यर्थः । स्थायी स्थायिभाववद् वाच्यो नतु स्थिरतामापन्न इत्यर्थः । ननु सञ्चारिणस्तावद्रसनधर्मसम्बन्धिन एव, ततश्च सञ्चारिसत्त्वेऽवश्यं रससत्त्वम् । तथा च ध्वनिरेव रस इयत कथं तत्र भावध्वनित्वमित्यत आह—**न भावो रसेति**। अत्र भावपदं सञ्चारिपरं, देवादिरतिभावस्य रसहीनत्वाद् । तत्र यथाऽप्रधानतया रसस्तिष्ठति एवं रसेऽपि अप्रधानतया भावस्तिष्ठतीत्याह—**न भावहीन** इति ।

(लो, ए) ननून्मादानां स्थायित्वमवलम्ब्य कथमन्येऽपि रसा नोक्ता इत्याशङ्क्याह-**कुतोऽपीति** ।

(लो, ऐ) ननु यदि रसात्मकं वाक्यमेव काव्यं तर्हि भावादिप्रधानमकाव्यं स्यादित्याशङ्क्याह—**रसाभावादिति** । तदाभासौ रसाभासो भावाभासश्च । रसनं स्वादनमुक्तप्रकारम् ।

(लो, ओ) रतिरित्यनन्तरं परिशेष्य न नीतेति शेषः ।

---

1 रसत्वमौपचारिकम् (च ज पु)

परस्परकृता सिद्धिरनयो रसभावयो ॥ (ग)

इत्युद्दिशा परमालोचनया परमविश्रान्तिस्थानेन रसेन सहैव वर्त्तमाना अपि राजानुगतविवाहप्रवृत्तभृत्यवदापाततो यत्र प्राधान्येनाभिव्यक्ता व्यभिचारिणो देवमुनिगुरुनृपादिविषया च रतिरुद्बुद्धमात्रा विभावादिभिः परिपुष्टतया [1]रसतामनापाद्यमानाश्च स्थायिभावा भावशब्दवाच्याः । (घ)

तत्र व्यभिचारी यथा—"एव वादिनि देवर्षौ" इत्यादि । अत्रावहित्था (ङ) देवविषया रतिर्यथा मुकुन्दमालायाम्—

दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक ! प्रकामम् ।
अवधीरितशारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि ॥ (च)

मुनिविषया रतिर्यथा—

विलोकनेनैव तवाऽमुना मुने !
कृत कृतार्थोऽस्मि निबर्हिताहसा ।

(वि, घ) **राजानुगतेति** । स्वविवाहदिने भृत्य एव प्रधानम् । राजा च तदनुग । एव प्रधानमपि रसो निराकाङ्क्षत्वात्स्वव्यङ्ग्यस्य भावस्य प्रधानस्य अनुग इत्यर्थ । उद्बुद्धमात्रा इत्यादिना स्थायिनो भावा इत्यस्य विशेषणम् । तेषा रसतानाप्तौ हेतु विभावादिरिति, तैरपरिपोषश्च तस्य विशिष्याऽनिश्चितत्वात् । तच्चाग्रे उदाहरणे दर्शयिष्यते ।

(वि, ङ) **एव वादिनीति** । देवर्षौ हरेण पार्वतीघन्नार्थवाक्यवादिनि सति इत्यर्थ । अधोमुखत्व लज्जया । कमलपत्रगणनमनवधानसूचनाद् हर्षाकारगोपनाय । अवहित्था आकारगुप्ति ।

(वि, च) **दिवि वा भुवि वेति**—हे नरकासुरान्तक मरणे जाते मम दिवि भुवि वा नरके वा वासोऽस्तु । तथापि तव चरणौ स्मरामि इत्यर्थ । मरणकालेऽपि स्मरामीति बहव । तदा च दिवि वा इत्यादिकम् असम्बद्ध स्यात् । नहि त्वच्चरणस्मरणात् नरकवासप्रसक्ति, येन तत्सहितोक्ति । चरणौ कीदृशौ शोभयावधारितशरत्कालपद्मौ ।

(वि, छ) **विलोकनेनैवेति** । नारद प्रति श्रीकृष्णस्योक्तिरियम् । हे मुने ! तव अमुना विलोकनेनैव कृतार्थ कृतोऽस्मि । कृतार्थता दर्शयति—**निबर्हितेति** । निबर्हित नाशितम् अह पाप येन तादृशेन । तथापि तव गरीयसी गिर शुश्रूषु श्रोतु-

---

1 'रसरूपताम्' (ङ ढ पु)

तथापि शुभ्रपुरहं गरीयसी—

गिरोऽथवा श्रेयसि केन तृप्यते ॥ (छ)

राजविषया रतिर्यथा मम—

त्वद्वाजिराजिनिर्धूतधूलीपटलपङ्किलाम् ।
न धत्ते शिरसा गङ्गा भूरिभारभिया हरः ॥ (ज)

एवमन्यत् ।

उद्बुद्धमात्रस्थायिनो[1] यथा—

हरस्तु किञ्चित्परिवृत्तधैर्य्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥

अत्र पार्वतीविषया भगवतो रतिः । (झ) *

ननूक्तं प्रपानकरसवद् विभावादीनामेकोऽवभासो रस इति तत्र सञ्चारिणः पार्थक्याभावात् कथं प्राधान्येनाभिव्यक्तिरित्युच्यते—(ञ)

भिच्छुरसि । हेतुं विनैव श्रवणेच्छामुक्त्या हेतुमपि वक्तुमाह—**अथवेति** । केन जनेन श्रेयसि मङ्गले तृप्यते, अपि तु न केनाऽपीत्यर्थः ।

(वि, ज) त्वद्वाजिराजीति । तव वाजिराज्या निर्धूतं यद् धूलिपटलं तेन पङ्किलाम् । पङ्किलत्वात् पङ्कजलाभ्या भूरिभार । **भियेति**—वोढुमसामर्थ्येन उत्तरोत्तर भावदु सद्वेषरूपेण भयेनेत्यर्थः ।

(वि,झ) स्थायिन इति । स्थायिभावस्य भावत्वप्राप्तेर्मथा इत्यर्थः । क्वचित्तु स्थायी यथेत्येव पाठः । **हरस्त्विति** । कन्दर्पेण धनुषि आरोपिते आकालिके वसन्ते जाते तपस्यतो महेशस्य पार्वतीं दृष्ट्वा किंचिद् धैर्यपराङ्मुखत्ववर्णनमिदम् । चन्द्रोदयस्यारम्भे प्राथमिकदशाया तदानीमेव तस्य धैर्यपरावृत्ते । किंचित्त्वात् भगवतो रतिरत्रभवना आसा इत्यर्थः । धैर्य्यपरावृत्त किंचिद् उद्भावेन रसतामनासत्वेन भावत्वस्यैव प्राप्तेरित्यर्थः ।

(वि, ञ) सञ्चारिण प्रधानानि इत्यनेन प्रधानीभूतस्यैव व्यभिचारिभावस्य भावत्वप्राप्तिरुक्ता । विभावादीना सर्वेषामेव रसादबोधे एकीभावेन विषयतोक्ता । ननु तत्र व्यभिचारिभावस्य पार्थक्येन प्राधान्यमवगम्यते । अत एव कथमेवंवादिनीलनाऽवहित्थाया प्राधान्यमेवाशङ्कते—**ननूक्तमिति** । रस इत्यत्र भाव एव रस । भावस्यैवाप्राधान्यशङ्कया भावत्वाभावस्यैव शङ्कितत्वात्, पार्थक्याभावात् पृथक् प्राधान्याभावात्।

---

* अत्र रतेराविर्भवन्त्या प्रकरणादिपर्य्यालोचनया परिपोषाभावात् न रसत्वम् । रसान्तरानङ्गत्वात् न व्यभिचारित्वम् । अतो भावनामात्रविषयत्वात् भावत्वमेव युक्तम् । एवम्—

"जरदम्बरसम्वरमन्थविधौ मन्थकरोऽहम् ।

[1] 'भावो' (ब पु) 'स्थायी यथा (ट पु)

यथा मरीचग्रहणादेरेकीभावे प्रपानके ।
उद्रेकः कस्यचित्कापि तथा सञ्चारिणो रसे ॥ २४० ॥ (ट, आ) +

अथ रसभासभावाभासौ—

अनौचित्यप्रवृत्तत्व आभासौ रसभावयोः ॥ २४१ ॥

अनौचित्यं चात्र रसानां भरतादिप्रणीतलक्षणाना सामग्रीरहितत्वे 'सत्येकदेशयोगित्वोपलक्षणपर बोध्यम्। तच्च बालव्युत्पत्तये एकदेशतो दर्श्यते। (ट, अ) *

उपनायकसंस्थायां मुनिगुरुपत्नीगतायाञ्च ।
बहुनायकविषयायां रतौ तथाऽनुभयनिष्ठायाम् ।
प्रतिनायकनिष्ठत्वे तद्वदधमपात्रीतर्य्यगादिगते ।

(वि, ट) तथा सञ्चारिणि इति । उद्रेक इति अनुषङ्ग । रसो भाव उद्रेकनियमश्च निरासाङ्गत्वाभिप्रायेण ।

(वि, ठ) अनौचित्यप्रवृत्तेति । रसानामनौचित्यप्रवृत्तत्वे इत्यन्वय । भरतादिप्रणीतेति। भरतादिमुनिप्रणीतानि यानि लक्षणानि तेषा सामग्रीसमग्रत्वम् । तद्राहित्ये सति तदेकदेशयोगित्वोपलक्षणमनौचित्यमित्यर्थ । तल्लक्षणोक्त यद् त्रियिद् सत्त्वे एकदेशयोगिता इत्यर्थ । भरतोक्तलक्षण वक्ष्यमाणानौचित्यमालायां यद् यदालम्बनादिकमुक्त तद्रसादेर्बोध्यम् ।

(वि, ड) उपनायकेति । उपनायकविषयायामित्यर्थ । इद प्रियारतौ । मुनिगुर्विति। इद मुनिगुर्वादिव स्वकन्या रतौ। अन्यस्या तु परोढावर्जनादेव आभासस्यासिद्धि । बहुनायकेति । अनूढवेश्यायां रतौ तस्या उपनायकाभावात् । अनुभवनिष्ठायामिति । नायकनायिकयोरेकतरमात्रनिष्ठत्वे इत्यर्थ । प्रतिनायकेति। इद वीर-

---

(लो, औ) रसास्वादानन्तर विरोधेनाऽनुभूयमान ।

(लो, अ) सामग्रीति । न खलु सामग्री सर्वथा नास्ति । किन्त्वेकदेशयोगित्वे सति आभासत्वमित्यर्थ ।

परिमितकदन्नवसनविधानपारङ्गता गृहिणी ॥",

इत्यत्र दुर्गतस्यात्मदशापर्य्यालोचनया प्रादुर्भूतोऽपि हास परिपोषविरहान्न रसप्रकृति ।

+ यथा प्रपानकरसे क्वचित् कस्यचिद्रसस्योद्रेक, तद्वदत्रापि सञ्चारिणि उद्रिक्ततया चमत्कारे सति तन्मुखेन व्यपदेश इति भाव ।

* अनौचित्यादृते नास्ति रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषद् परा ॥ इति ।

अनौचित्य हि लोकशास्त्रादिविरुद्धम् ।

1 'त्वेकदेश' (ग घ पु)

शृङ्गारेऽनौचित्यं रौद्रे गुर्वादिगतकोपे ।
शान्ते च हीननिष्ठे गुर्वाद्यालम्बने हास्ये ।
ब्रह्मवधाद्युत्साहेऽधमपात्रगते तथा वीरे ।
उत्तमपात्रगतत्वे भयानके ज्ञेयमेवमन्यत्र ॥ २४२ ॥ (ङ)

तत्र रतेरुपनायकनिष्ठत्वे यथा मम—

स्वामी मुग्धतरो वन घनमिद बालाऽहमेकाकिनी
क्षोणीमावृणुते तमालमलिनच्छायातम·सहति ।
तन्मे सुन्दर ! मुञ्च कृष्ण ! सहसा वर्त्मेति गोप्या गिर
श्रुत्वा तां परिरभ्य मन्मथकलासङ्गो हरि पातु व ॥ (ढ, आ)

बहुनायकनिष्ठत्वे यथा—

कान्तास्त एव भुवनत्रितयेपु मन्ये
येषा कृते सुतनु ! पाण्डुरय कपोल. ।

रसे, तत्र जेतव्य प्रतिनायक । तन्निष्ठत्वे गुर्वादिगते गुर्वादिविषये । एवमुत्तरोत्तर गतपर क्वचित् तद्विषयपर क्वचित् तद्विशिष्टपर योग्यतया बोध्यम् ।

(वि, ढ) सन्ध्याकाले पन्थानमावृत्य तिष्ठन्त श्रीकृष्ण प्रति गोप्या उक्तिरियम् । मुग्धतरो भद्रानभिज्ञ , अविचारेणैव क्रोधकारीत्यर्थ । अत्र कृष्णविषया गोप्या रति । तथा हि मुग्धतरो मूढतरो मम तव आसङ्ग तर्कयितुममसमर्थ । घनवनादिक रतिहेतु । मुनिगुरुपत्नीगतत्वेनोदाहृतम् । तत्र गुरुपत्नीगतत्वे यथा—

मर्धा प्रभूते पिम्नाददृते मन्दानिलोद्धूतविकाशिचूते ।
प्रियामुखालोकनमात्रकर्म्मा गुरुर्न धर्म्माय न पाठनाय ॥

मुनिपत्नीगतत्वे यथा—

तपोविभावसभवातुलविभूतिक सौभरि
र्मुनिर्नृपतिकन्यकाशतपरिग्रह कामत· ।
प्रचुम्बति मुहुर्मुहु कुचनिपीडमालिङ्गति
स्मितोत्तरमुदीक्षते परिहसत्यनत्र प्रियाम् ॥

(वि, ण) कान्तास्त एव इति । कान्ता कमनीयपुरुषा । अत्र

(लो, आ) स्वामीति । इह हि स्वामीति मुग्धतर इति च पदाभ्या भयदत्व पदे प्रियत्वाभावो रतिनागरत्वाभावश्च वनस्य घनत्वे गृहगमनदुर्घटत्वम् , बाल्ये भय यौवन च, यौवनेन च एतादृशि वयसि अनुरूपपतिर्नास्त एकाकिनीत्यनेन सन्ध्याकालादरणकथनेन च स्वैरयातसङ्गत्व गोप्यारसपरकृष्णाक्षान्तिश्च, सुन्दरेति सम्बोधने परित्यागार्थं चाटु , स्वाभिलषणीयत्वञ्च । लोचनी समाप्ता ।

अनुभयनिष्ठत्वे यथा—मालतीमाधवे नन्दनस्य मालत्याम्।
पश्चादुभयनिष्ठत्वेऽपि प्रथममेकनिष्ठत्वे रतेराभासत्वम् इति श्रीमल्लोचनकारा.।
तत्रोदाहरणं यथा—रत्नावल्यां सागरिकाया अन्योऽन्यदर्शनात् प्राग्वत्सराजे रतिः।

(ण)

प्रतिनायकनिष्ठत्वे यथा—हयग्रीववधे हयग्रीवस्य जलक्रीडावर्णने।
अधमपात्रगतत्वे यथा—

जघनस्थलनद्धपत्रवल्लीगिरि[1]मल्लीकुसुमानि कापि भिल्ली।
अवचित्य गिरौ पुरो निषण्णा स्वकचानुत्कचयाञ्चकार भर्त्रा। (त)

तिर्य्यग्गतत्वे यथा—

मल्लीमतल्लीषु वनान्तरेषु वल्ल्यन्तरे वल्लभमाह्वयन्ती।
चञ्चद्विपञ्चीकलनादभङ्गीसङ्गीतमङ्गीकुरुते स्म भृङ्गी॥ (थ)

आदिशब्दात्तापसादयः। रौद्राभासो यथा—

रक्तोत्फुल्लविशाललोलनयनः [2]कम्पोत्तराङ्गो मुहु-
र्मुक्त्वा कर्णमपेतभीर्धृतधनुर्बाणो हरेः पश्यतः।
आध्मातः कटुकोक्तिभिः स्वमसकृद्दोर्विक्रमं कीर्त्तय-
न्नंसास्फोटपटुर्युधिष्ठिरमसौ हन्तुं प्रविष्टोऽर्जुनः॥ (द)

बहुवचनादनूढनायिकाया वेश्याया नायकबहुत्वलाभः। वत्सराज इति। अत्र वत्सराजस्येति क्वचिद् अप्रामाणिकः पाठः।

(वि, त) जघनस्थलेति—कापि भिल्ली किराती जघनस्थले नद्धा धृता पत्रवल्लिः पत्रलता यया सा तथा। गिरिमल्लीकुसुमानि कुटजपुष्पाणि अवचित्य गिरौ पुरो निषण्णा सती भर्त्रा स्वप्रयोज्येन स्वकचान् अर्थादवचितकुसुमैः उत्कचयाञ्चकार उद्दीप्तांश्चकारेत्यर्थः। दीप्त्यर्थकचधातोः इदं रूपम्। अत्र च वल्लि इत्यत्र ह्रस्वान्तवल्लिशब्दस्य रूपम्। दीर्घान्तत्वे कप्रत्ययप्रसङ्गात्। अत्राऽधमस्य भर्त्तुरतिः।

(वि, थ) मल्लीमतल्लीष्विति। मतल्ली पुष्पविशेषः। वल्ल्यन्तरे स्थित्वेत्यर्थः। चञ्चद्विपञ्चीकलनादभङ्गीसङ्गीतं चञ्चन्त्या विपञ्च्या वीणायाः कलनादभङ्ग्या सङ्गीतम्।

(वि, द) तापसादय इति। अत्र च तापसस्य जीमूतवाहनस्य नृपस्य मलयवत्यां रतौ बोध्यम्। रक्तोत्फुल्लेति। कर्णात् प्राप्तापमानस्य युधिष्ठिरस्य कटुकोक्तिभिराध्मातः कुपितोऽर्जुनः युध्यमानं कर्णं त्यक्त्वा युधिष्ठिरं हन्तुं प्रवृत्तः। अपेतभीर्गुरुहननभयरहितो हरेः कृष्णस्य पश्यतः इति—पश्यन्तं हरिमनादृत्य इत्यत्रानादरे षष्ठी। स्वं स्वीयम्। अंसो भुजमूलं, तस्य आस्फोटे पटुः। हीननिष्ठे शान्ते गुर्वाद्यालम्बने हास्ये ब्रह्मवधायुत्साहेऽधमपात्रगते वीरे च नोदाहृतम्। क्रमेण यथा

---

1 'पत्रवल्ली गिरि-' (क, ग. पु.) 2 कम्पोत्तरङ्गो (ग. पु.)

भयानकाभासो यथा—

अशक्नुवन् सोढुमधीरलोचनः सहस्ररश्मेरिव यस्य दर्शनम् ।
प्रविश्य हेमाद्रिगुहागृहान्तरं निनाय बिभ्यत् दिवसानि कौशिकः ॥ (ध)
स्त्रीनीचविषयमेव हि भयं रसप्रकृतिः । एवमन्यत्र ।

भावाभासो लज्जादिके तु वेश्यादिविषये स्यात् ॥ २४३ ॥ (न)

चण्डालयोनाविह जन्म लब्धं द्विजातिजन्मापि न काङ्क्षितं मे ।
पुण्ये वने क्वापि वपुर्विहास्यन् पुनर्भवच्छेदमहं समीहे ॥ १ ॥
अपानवायुं सततं विमुञ्चन् असंयमव्यग्रकपूर्वकेशः ।
अध्यापयत्येष गुरु सदा मे लालाक्लवक्त्रो मलदिग्धवासाः ॥ २ ॥
अनिवृत्तपिपासा हि क्षुद्रवीरजशोणितैः ।
द्रोणस्य रुधिरेणाद्य तृप्यन्तु मम सायकाः ॥ ३ ॥
नरेन्द्रपुत्रान् मृगया प्रवृत्तान् विद्धं मृगं नेतुमुपात्तवेगाः ।
अमी किरातः शरपूर्णचापा धावन्ति मन्वा तृणवत्तमेव ॥ ४ ॥

(वि, ध) अशक्नुवन्निति—कौशिको वासवो यस्यासुरस्य सहस्ररश्मेरिव दर्शनं सोढुमशक्नुवन् बिभ्यत् हेमाद्रिगुहा प्रविश्य दिनानि निनाय । अधीरलोचनः कातरात् चञ्चललोचनः । शब्दशक्तिमूल उपमाध्वनिरियम् । तथा हि कौशिकः पेचक सहस्ररश्मेर्दर्शनं सोढुमशक्नुवन् अद्रिगुहा प्रविश्य यथा दिनानि नयति, अधीरक्षुद्रिरलोचनो दिवान्धत्वात्, तथा च पेचक इव इन्द्र इत्युपमाध्वनिः । अत्र इदमवधेयम् । रसभावतदाभासादीनामसंलक्ष्यक्रमव्यङ्ग्यत्वं वक्ष्यते । तच्च स्थायिभावस्य व्यङ्ग्यस्य बोधकमापरिचयादेव । अत्र श्लोके भयस्य स्थायिभावस्य बिभ्यदित्येतद्वाच्यत्वात् व्यङ्ग्यत्वमेव नास्ति, कथं व्यङ्ग्यक्रमापरिचयार्थानमसंलक्ष्यक्रमव्यङ्ग्यत्वम् अतोयं न रसाभासध्वनिः, किन्तूपमाध्वनिरेव । तदुदाहरणं तु

जातिदुष्टोऽपि संश्लाघ्यः स कालयवनो नृपः ।
युद्धोद्युक्तं यमालोक्य श्रीकृष्णोऽपि पलायितः ॥

(वि, न) वेश्यादिविषये । वेश्यादिनिष्ठे यथा—

लीलानम्रमुखी शिरोंऽशुकमवाकृष्यानयन्ती पुरो
नेत्रोपान्तविलोकनेन परितो यूना धयन्ती मनः ।
एषा वारविलासिनी ननु सखे ! कस्याऽपि पुण्यात्मन
पुण्यौघं परिपाकमाशमथितुं लीलोत्तरं गच्छति ॥

अत्र वेश्यालज्जामिश्रितत्वम् ।

स्पष्टम्—

भावस्य शान्तावुदये सन्धिमिश्रितयोः क्रमात्। (प) *
भावस्य शान्तिरुदयः सन्धिः शबलता मता ॥ २४४ ॥

क्रमेण यथा—

सुतनु ! जहिहि कोपं पश्य पादानतं मां
न खलु तव कदाचित्कोप एवंविधोऽभूत्।
इति निगदति नाथे तिर्य्यगामीलिताक्ष्या
नयनजलमनल्पं मुञ्चमुञ्चं न किञ्चित् ॥

अत्र बाष्पमोचनेन ईर्ष्याख्यसञ्चारिभावस्य शमः। †

चरणपतनप्रत्याख्यानात्प्रसादपराङ्मुखे
निभृतकितवाचारेत्युक्त्वा रुषा परुषीकृते।
व्रजति रमणे निःश्वस्योच्चैः स्तनस्थित[1]हस्तया
नयनसलिलच्छन्ना दृष्टिः सखीषु निवेशिता[2] ॥ + (फ)

(वि, प) सन्धिरुत्तरोत्तरविरुद्धभावमिश्रणम्। सैव शबलता। तत्र उत्तरोत्तरभावस्य पूर्वपूर्वापेक्षया बलवत्त्वात्। सन्धिस्तु द्वयोस्तुल्यकक्षत्वे। सुतन्विति स्पष्टम्।

(वि, फ) "हे निभृत ! कितवाचार !" इत्युक्त्वा इत्यर्थः। स्तनास्थितहस्तया मानिन्या इत्यर्थः।

---

* **भावस्य शान्ताविति**। भावस्य उदयो व्यपशालिनो व्यभिचारिण एव नतु स्थायिनः, तस्य सक्सूत्रवृत्त्या सन्ततमविच्छेदिनः शान्त्यादिवर्णनं विरसमेव। तत्र विरुद्धसामग्रीप्राबल्येन प्रशमः। स्वसामग्रीप्राबल्येन उदयः। उभयसामग्रीप्राबल्यात् परस्परानुपमर्देन बोधः सन्धिः। पूर्वपूर्वोपमर्देन उत्तरोत्पत्तिः शबलता इति चतुष्टयं भावशान्त्यादिपदेन बोध्यते।

† **सुतन्विति**—हे सुतनु ! कोपं जहिहि त्यज। पादानतं मां पश्य। कदाचिदपि तव एवंविधः कोपः न खलु अभूत्। नाथे पत्यौ इति निगदति कथयति सति तिर्यगामीलिताक्ष्या वक्रभावेन ईषन्मुद्रितनयनया कयाचिन्नायिकयाऽनल्पं बहुलं नयनजलम् अश्रु मुक्तं पातितम्। किन्तु किञ्चिन्नोक्तम्। अत्र शान्तावेव चमत्कारप्रतीतेरीर्ष्याया शमः।

+ **चरणेति**—चरणयोः पतनेऽपि प्रत्याख्यानात् निराकरणात् प्रसादपराङ्मुखे प्रसन्नतारहिते हे निभृत ! कितवाचार ! इत्युक्त्वा रुषा क्रोधेन परुषीकृते निष्ठुरे रमणे प्रिये व्रजति परित्यज्य प्रस्थिते सति उच्चैर्निःश्वस्य स्तनस्थितहस्तया वक्षसि स्थापितहस्तया कयाचित् नायिकया नयनसलिलेन बाष्पेण आच्छन्ना आवृता दृष्टिः सखीषु निवेशिताऽर्पिता।

1 'स्तनाहित–' (स. पु.) 2 निपातिता (स. पु.)

अत्र विषादस्योदय ।

नयनयुगासेचनक मानसवृत्त्यापि दुष्प्रापम् ।
रूपमिद मदिराक्ष्या मदयति हृदय दुनोति च मे ॥

अत्र हर्षविषादयोः सन्धि

काकार्य्यं शशलक्ष्मण क च कुल भूयोऽपि दृश्येत सा
दोषाणा प्रशमाय न[1] श्रुतमहो कोपेऽपि कान्त मुखम् ।
किं वक्ष्यन्त्यपकल्मषा कृतधिय स्वप्नेऽपि सा दुर्लभा
चेत स्वास्थ्यमुपैहि क खलु युवा धन्योऽधर धास्यति[2] ॥ (व)

अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानां शबलता । *

इति साहित्यदर्पणे रसादिनिरूपणा नाम
तृतीय परिच्छेद ।

(वि, व) काकार्य्यमिति—उर्वशीविरहे मरणे प्रत्यु निवृत्तस्य पुरूरवस उक्तिरेयम् । अत्र कुलमित्यन्ते वितर्क । सेत्यन्ते औत्सुक्यम् । श्रुतमित्यन्ते अर्थ निर्द्धारणरूपा मति । मुखमित्यन्ते स्मरणम् । कृतधिय इत्यन्ते शङ्का । दुर्लभेत्यन्ते दैन्यम् । उपैहि इत्यन्ते धृति । क खलु इत्यादौ चिन्ता । एतेषा व्यभिचारिभावाना पूर्वपूर्वापेक्षया बलवत्ता ।

इति श्रीमद्देश्वरन्यायालङ्कारभट्टाचार्यविरचिताया साहित्यदर्पण
टीकाया तृतीयपरिच्छेदविवरणम् ।

---

* अकार्यम् अन्यासङ्गिरूप क [1] शशो मृगभेद लक्ष्म चिह्न यस्य तस्य शश लक्ष्मण चन्द्रस्य कुल क [1] द्वयेन ज्ञानद्वयस्य सहानवस्थितिप्रतिपत्ति । तेनाऽत्यन्ताऽनौचित्य व्यज्यते । अत्र शान्तसचारिवितर्कावगम । भूयोऽपि पुनरपि साऽद्भुतसौन्दर्या उर्वशी दृश्यते, कथ दृक्गोचरा भवेत् [1] अत्र व्यङ्ग्येन शृङ्गारसचार्यौत्सुक्येन शान्तसचारिवितर्कबाधनम् । नोऽस्माक श्रुत शास्त्रश्रवण दोषाणा प्रमादादीना प्रशमाय आत्यन्तिकनाशाय श्रुतम् । अत्र व्यङ्ग्य या शान्तसचारिण्या मत्या पूर्वौत्सुक्यबाधनम् । अहो कोपेऽपि तस्या मुख कान्त मनोहरम् । अत्र व्यङ्ग्येन शृङ्गारसचारिणा स्मरणेन पूर्वाक्रमतेर्बाधनम् । अप गत कल्मष पाप येभ्यस्तेऽपकल्मषा । कृते महात्मभिराचरिते पुण्यकर्म्मणि धीर्येषा ते कृतधिय पण्डिता किं वक्ष्यन्ति । अत्र व्यङ्ग्यया शान्तसचारिण्या शङ्कया

1 'मे (क. ख पु) 2 'पास्यति' (क ख पु)

चतुर्थः परिच्छेदः

अथ काव्यभेदमाह—(अ)

काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यश्चेति द्विधा मतम् ॥ १ ॥

तत्र—

वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम् ॥ २ ॥

[1]वाच्यादधिकचमत्कारिणि व्यङ्ग्यार्थे ध्वन्यतेऽस्मिन्निति व्युत्पत्त्या ध्वनिर्नामोत्तमं काव्यम् । (क, आ) ❀

भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ ।

अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च ॥ ३ ॥ (इ)+

तत्राविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः । लक्षणामूलत्वादेवात्र वाच्यमविवक्षित बाधितस्वरूपम् । विवक्षितान्यपरवाच्यस्त्वभिधामूलः । अत

(वि, क) काव्यलक्षणं कृते तदेव काव्यं कतिविधमित्याकाङ्क्षायामाह—**काव्यं ध्वनिरित्यादि** । **ध्वन्यतेऽस्मिन्निति**—ध्वन्यते व्यज्यते व्यङ्ग्यार्थः शब्दादिना अस्मिन् काव्ये इत्यर्थः ।

(वि, ख) लक्षणामूलाभिधामूलयोर्यथासङ्ख्यं स्वरूपमाह—**अविवक्षितेति**—व्याचष्टे—**तत्रेति** । **अविवक्षितमिति**—वाच्याविवक्षाया बीजमाह—**बाधित**

(लो, अ) एवं काव्यस्य स्वरूपमुक्त्वा विशेषं निरूपयितुमवतारयति—**अथेति**—भिद्यते अनेनेति भेदः ।

(लो, आ) **वाच्येति**—वाच्यादतिशयस्तात्पर्यविषयत्वात् ।

(लो, इ) लक्षणाऽभिधा च मूले कारणेऽर्थाद् व्यङ्ग्यात् व्यञ्जने ययोः । यस्य ध्वनेः व्यङ्ग्यार्थरूपोपाधिलक्षणाभिधामूलत्वेन द्वैविध्यप्रतिपादनात् तदुपाधिकस्य काव्यस्य द्वैविध्यम् । ध्वनिशब्दो ह्यनेकार्थः, तथा हि ध्वन्यत इति ध्वनिः, रसादिरर्थः । ध्वनतीति ध्वनिः शब्दवाच्यादिरर्थो वा । ध्वन्यतेऽस्मिन्निति ध्वनिः, शब्दादिगता शक्तिः । ध्वनन ध्वनिः रसादिप्रतीतिः । ध्वन्यते अस्मिन् इति ध्वनिः काव्यम् ।

❀ **काव्यमिति**—वाच्यार्थरसयोरान्तरात्मिकस्य व्यङ्ग्यस्य उत्कर्षाऽनुत्कर्षाभ्यां ध्वनिगुणीभूतव्यवस्था इति भावः ।

+ **अविवक्षितेति**—न विवक्षितम् अनुपयुक्तम् अन्वयायोग्यं वा यत्र वाच्योऽर्थः यत्र स ध्वनिः अविवक्षितवाच्यः । (वाच्यः) विवक्षितम् (अन्वययोग्यमपि) अन्यः परः (व्यङ्ग्यनिष्ठः) वाच्यः वाच्योऽर्थः यत्र स ध्वनिः विवक्षिताऽन्यपरवाच्यः ।

1 वाच्यादित्यादिकारिका ग ज पु नास्ति ।

पुनात्र वाच्य विवक्षितम् अन्यपरं व्यङ्ग्यनिष्ठम्।

अत्र हि वाच्योऽर्थ 'स्वरूप प्रकाशयन्नेव व्यङ्ग्यार्थस्य प्रकाशकः। यथा प्रदीपो घटस्य। अभिधामूलस्य बहुविषयतया पश्चाल्लिङ्गेन। अविवक्षितवाच्यस्य भेदावाह-(ख, ई)

अर्थान्तरं संक्रमिते वाच्येऽत्यन्तं तिरस्कृते।
अविवक्षितवाच्योऽपि ध्वनिर्द्वैविध्यमृच्छति ॥ ४ ॥

अविवक्षितवाच्यो नाम ध्वनिरर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविध। यत्र स्वयमनुपयुज्यमानो मुख्योऽर्थ स्वविशेषरूपेऽर्थान्तरे परिणमति (उ) तत्र मुख्यार्थस्य स्वविशेषरूपार्थान्तरसंक्रमितत्वादर्थान्तरसंक्रमितवाच्यत्वम्। यथा—(ग) *

स्वरूपमिति—वाच्यतावच्छेदकरूपेण विवक्षाभावात् तेन रूपेण बाधो विशिष्टाभावरूप। तेन अजहत्स्वार्थाभिधायाम् उपादानलक्षणाया वाच्यस्याऽबाधेऽपि वाच्यतावच्छेदकरूपेण तद्बाध, जहत्स्वार्थाया तु अर्थयोरेव बाध। **वाच्यं विवक्षितमिति**—वाच्यतावच्छेदकरूपेण बोध्यम्। **व्यङ्ग्यनिष्ठमिति**—व्यङ्ग्यनिष्ठा तात्पर्यपर्याप्तिर्यस्य तादृशम्।

(वि, ग) **भेदावाहेति**—वाच्येऽयऽर्थान्तरमवच्छेदकान्तर संक्रमिते प्रापिते अर्थाद्बोद्धुर्ज्ञाने इत्यर्थ। **अत्यन्त तिरस्कृत** इति—वाच्यार्थस्यावच्छेदकान्तरेणापि अविवक्षणात् अत्यन्त तिरस्कार, तत्रार्थान्तरसंक्रमितवाच्य व्याचष्टे—**मुख्यार्थस्येति**।

(लो, ई) अन्यपरमिति कारिकापदार्थो व्यङ्ग्यनिष्ठमिति भाव, व्यङ्ग्ये निष्ठा तात्पर्यं यस्य वाच्यार्थस्य, एतेन गुणीभूतव्यङ्ग्यव्यवच्छेद। **अत्र हीति**—अयमाशय, अविवक्षितवाच्ये लक्ष्योऽर्थ स्वरूप प्रकाशयन् व्यङ्ग्यार्थं प्रकाशयति, तत्र लक्षणामूला व्यञ्जना। इह तु वाच्योऽर्थ तथा इत्यभिधामूला।

(लो, उ) **संक्रमित** इति—योगकाङ्क्षादिसाहाय्यसूचन वाच्ये इति काकाक्षिन्यायेनोभयत्र सम्बध्यते। अनुपयुज्यमानत्वमर्थात् स्वरूपमात्रेण संक्रमिते इति कारिकापदार्थ। **परिणमतीति**—परिणामश्च तत्त्वादपरिच्युतस्य धर्मिणोऽवस्थान्तरगमनम्। जाड्यातिशय स्वशब्दाभिधानाऽलभ्य।

---

* अनुपयुज्यमान—प्रकृतान्वये बाधित। अर्थान्तरे वाच्यलक्ष्यसाधारणेऽर्थे परिणमति अर्थात् यत्र वाच्योऽपि प्रकारान्तरेण लक्ष्य इत्यर्थ। यथा—काकेभ्यो दधि रक्ष्यताम् इत्यादौ वाच्योऽपि काक दध्युपघातकरूपेण लक्ष्य। अयम् उपादानलक्षणास्थले एव सभवति। अर्थान्तरे (स्वस्यैव विशेषरूपे) संक्रमित वाच्य यत्र स अर्थान्तरसंक्रमितवाच्य।

1 'स्व प्रकाशयन्नेव' (ट ठ ड)

कदली कदली करभ करभ
करिराजकरः करिराजकर ।
भुवनत्रितयेऽपि बिभर्त्ति तुला-
मिदमूरयुग न चमूरदृश ॥

अत्र द्वितीयकदल्यादिशब्दा पौनरुक्त्यभिया सामान्यकदल्यादिरूपे मुख्यार्थे बाधिता जाड्यादिगुणविशिष्टकदल्यादिरूपमर्थं बोधयन्ति जाड्याद्यतिशयश्च व्यङ्ग्य (घ)। यत्र पुन स्वार्थं सर्वथा परित्यजन्नर्थान्तरे परिणमति तत्र मुख्यार्थस्यात्यन्ततिरस्कृतत्वादत्यन्ततिरस्कृतवाच्यत्वम्। (ङ) * यथा—

नि श्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते।

अत्रान्धशब्दो मुख्यार्थे [2]बाधितोऽप्रकाशरूपमर्थं बोधयति। अप्रकाशातिशयश्च व्यङ्ग्य । अन्धत्वाप्रकाशत्वयो सामान्यविशेषभावाभावान्नार्थान्तर

(वि, घ) **कदली कदली** यादि। चमूरदृश हरिणेक्षणाया ऊरुयुग भुवनत्रितयेऽपि कस्यापि तुला सादृश्य न बिभर्त्तीत्यर्थ। तथा च तेन कस्यापि सादृश्याऽधारणात् कोऽपि तदुपमान न अर्हतीत्याह—**कदलीति**। कदली रम्भा करभ ऊर्वाकार. पाणिपार्श्वभाग 'मणिबन्धादानिष्ट करस्य करभो बुधै" इति कोषात्। करिराजस्य हस्तिश्रेष्ठस्य कर, शुण्डा, एषु उद्देश्येषु द्वितीयकदल्यादिपदाना पौनरुक्त्यात् तदर्थाना विधेयत्वाऽसम्भवात् तानि पदानि जाड्यादिविशिष्टकदल्यादिपराणि। तदाह—जाड्यादिविशिष्टकदल्यादिरूपमर्थं बोधयन्तीति तथा च प्राथमिककदल्यादिपदेभ्य कदल्यादयशप्राप्तौ जाड्यादिविशिष्यमाने द्वितीयकदल्यादिशब्दाना लक्षणा। तत कदली जाड्या करभोऽशोभन करिराजकर कर्कश इत्यर्थ।

(वि, ङ) **निःश्वासान्ध** इति। नि श्वासेन अन्ध आदर्श इव चन्द्रमा न प्रकाशते न दीप्यते। अनाऽचेतनस्य आदर्शस्याऽन्धत्वबाधात् लक्ष्यार्थमाह—**अत्रेति**। तथा च नि श्वासेन अप्रकाश आदर्श इवेत्यर्थ।

ननु शक्यतावच्छेदकभिन्नेन अप्रकाशत्वेन रूपेण बोधनात् कथ नेयमर्थान्तरसक्रमितवाच्यलक्षणा इत्यत आह—**अन्धत्वाऽप्रकाशत्वयोरिति**—शक्यता

(लो, ङ) अत्यन्ततिरस्कृत इति कारिकापदार्थं विवृणोति—**यत्र पुनरिति**—अत्र परिणमतीत्युपचारपदप्रयोग तेन प्रवर्तते इत्यर्थ।

(लो, घ) **अन्धत्वेति**—अयमाशय, न ह्यनार्थस्याप्रकाशत्व विशेष,

---

* अय च उपादानलक्षणातिरिक्तस्थले एव सम्भवति।

2 बाधिते (क ख पु)

संक्रमितवाच्यत्वम्। (ङ, ङ्ग) *

यथा—

भम धम्मिअ वीसत्थो सो सुणओ अज्ज मारिओ देण
गोलाणईकच्छकुञ्जवासिणा दरीअसीहेण (च)

अत्र भम धार्म्मिकेत्यतो भ्रमणस्य विधि प्रकृतेऽनुपयुज्यमानतया भ्रमण-निषेधे पर्य्यवस्यतीति विपरीतलक्षणाशङ्का न कार्य्या। यत्र खलु विधिनिषेधा-

---

वच्छेदक सामान्य लक्ष्यतावच्छेदक यदि तद्विशेषो भवेत् तदा एव अर्थान्तरसंक्रमित-वाच्यलक्षणा। यथा घटपदस्य नीलघटपदत्वे अत्र तु लक्ष्यतावच्छेदकमप्रकाशत्वमेव सामान्यम्। अन्धत्वमेव तद्विशेष इति अतो न तथा इति भाव। इदं तु प्रायिकमेव न सार्वत्रिक "रामोऽस्मि सर्वं सहे" इत्यत्र तु असहिष्णुत्वरामत्वयो करभ करभ इत्यत्र शोभाराहित्यकरभत्वयोश्च तथात्वाभावात्। किन्तु अत्रान्धत्वरूपस्यार्थ परित्यागादेव न तथात्वमिति बोध्यम्।

(चि, ञ) भम धम्मिअ इत्यत्रापि विपरीतलक्षणाभ्रम केषाञ्चित् निरसयितु-माह—**भमेति**।

भ्रम धार्मिक विश्वस्त स श्वाऽद्य मारितस्तेन।
गोदानदीकच्छकुञ्जवासिना दरीसिंहेन॥ इति संस्कृतम्।

गोदावरी नदी तत्तीरे कुञ्जे कृतसंकेताया तत्रैव प्रतिदिन पुष्पावचयनेन तत्-संकेतभञ्जक स्वगोपितकुक्कुरोपद्रवेणाऽपि अनिवृत्त धार्मिक प्रति उक्तिरियम्। स श्वा तव उपद्रावक कुक्कुर।

(चि, छ) भ्रमणविधि प्रकृते अनुपपद्यमानतया इति—सिंहत्वेन कथिते स्वसंकेतस्थले भ्रमणोपदेशस्य बाधितार्थकत्वात् निवृत्तीच्छया उक्तवाक्यस्य प्रवर्त्तकत्वानुपपत्तेश्च निषेधे पर्यवस्यतीति विपरीतलक्षणेति शेष। **उत्पद्यमाना-वेति**—वाक्यार्थबोधोत्पत्तिदशायाम् एव इत्यर्थ। तद्दशाया क्वचित् विधि निषेधे क्वचित् निषेधो विधौ पर्यवस्यतीत्यर्थ। तत्र तद्दशायां विधे निषेधे पर्यवसान यथा—

औत्सुक्य दैवन्य चिन्तालसत्व सखि श्वसितम्।
मम मन्दभागिन्या कृते सखि त्वमपि परिभवति॥

इत्यत्र नायिकाया सोत्सुण्ठवाक्य मम कृते इति विधे न मम कृते इति लक्षणया पर्यवसानम्। निषेधस्य विधौ पर्यवसान यथा—' मा पथिक राज्यन्ध शय्यायामावयो-

---

किन्तु सामान्य तत्रैव सामान्ये, सर्वविषयकज्ञानत्वस्यौत्सर्गात्, विशेष एवार्थान्तर भवितु-महतीति, न पुनर्विशेषस्य सामान्यमिति।

---

* यत्र सामान्येन विशेषरूपस्य प्रतीति तत्र अर्थान्तरसंक्रमितवाच्यम्।

उत्पद्यमानावेव[1] निषेधविध्यो पर्य्यवस्यतस्तत्रैव तदवसर । (छ, ऋ)

यत्र पुन प्रकरणादिपर्य्यालोचनेन विधिनिषेधयोनिषेधविधौ अवगम्येते तत्र ध्वनित्वमेव । तदुक्तम् । (ज, ऌ)

क्वचिद्बाध्यतया ख्याति क्वचिल्ख्यातस्य बाधनम् ।
पूर्वत्र लक्षणैव स्यादुत्तरत्राभिधैव तु ॥ (झ, ए)

निमज्जामि" इति स्वय दूतिकाया उक्तौ स्वशय्याया गमननिषेधस्य स्वशय्यायामागमनविधौ लक्षणया पर्यवसानम् । यत्तु नि शेषच्युतचन्दनमित्यादावपि तदन्तिकगमननिषेधस्य तदन्तिकगमनविधौ लक्षणया पर्यवसानमिति ग्रन्थकृता पूर्वमुक्तं तन्न रुचिरम्, तत्र भ्रम धार्मिक इत्यादाविव प्रथम वान्यनिषेधस्यैव बोधात् उत्तरकालनेवाधमत्वोक्तेश्च्युतनिर्मृष्टपदश्रीभ्रमरालपुलककथनात् तात्पर्यपर्यालोचनया एव तदन्तिकगमनविधे. व्यञ्जनयैव प्रतीयमानत्वात् । अत एव काव्यप्रकाशकृता तत्र तदन्तिकगमनविधे व्यङ्ग्यत्वमेवोक्तम् ।

(वि, ज) **तत्र ध्वनित्वमेवेति**—व्यङ्ग्यत्वमेवेत्यर्थ , न तु लक्ष्यत्वमेवेत्यर्थ । ध्वनिकाव्य तु गमनलक्षणायामपि रमणव्यञ्जनया अविहतमेव । तद्वत् इहापि प्रथम भ्रमणविधि शङ्कयैव प्रतीयते । पश्चादेव तस्या वृत्तगतत्वस्य प्रकरणादिना प्रतीतौ भ्रमणनिषेधो व्यञ्जनयैव प्रतीयते, इयतोऽत्र विपरीतलक्षणाशङ्का न कार्या इत्यर्थ ।

(वि, झ) **क्वचित् बाध्यतयेति**—ख्याति प्रतीति । यथा गङ्गाया घोष इत्यादौ घोषनिवासस्य यथा वा "उपकृत बहु तत्र किमुच्यते" इत्यपकारेण प्रत्युक्त्वा उपकारस्य च प्रथममेव बाध्यतया ख्याति । **क्वचित् ख्यातस्येति**—प्रथम प्रतीतस्य इत्यर्थ । यथाऽत्रैव श्लोके, नि शेषेत्यादौ च । उत्तरत्र अभिधैव तु इत्युक्त्या निषेधविध्योस्तु व्यङ्ग्यत्वमेवेति दर्शितम् ।

(लो, ऋ) **उत्पत्स्यमानावेवेति**—अनन्तरमनुपपद्यमानान्वयसिद्ध्यर्थमिति शेष । तदवसरस्तस्या विपरीतलक्षणाया अवसर ।

(लो, ऌ) विधिनिषेधयोरित्यत्र पूर्वमन्वयानुपपत्त्या पर्यवसितयोरिति पूरणीयम् ।

(लो, ए) **क्वचिदिति**—अत्रोत्तरम् अभिधैव त्वितिवचनम् । यत्पर शब्द स शब्दार्थ इति व्यङ्ग्यार्थस्याप्यभिधाने यत्परत्वेन ख्यातस्य बाधनेऽप्यभिधाव्यापारस्वीकारात् । एतत्त्वग्रे निराकरिष्यते ।

---

1 उत्पत्स्यमानावेव (क ख घ)

अत्राद्ये मुख्यार्थस्यार्थान्तरे सङ्क्रमण प्रवेश , नतु तिरोभाव । अत एवात्रा जहत्स्वार्था लक्षणा । द्वितीये तु स्वार्थस्यात्यन्त तिरस्कृतत्वाज्जहत्स्वार्था । (ञ)

विवक्षिताभिधेयोऽपि द्विभेदः प्रथमं मत* ।
[1]असंलक्ष्यक्रमो यत्र व्यङ्ग्यो लक्ष्यक्रमस्तथा ॥ ५ ॥ (ट, ऐ)*

*[ञ]विवक्षितान्यपरवाच्योऽपि ध्वनिरसलक्ष्यक्रमव्यङ्ग्य संलक्ष्यक्रमव्यङ्ग्यश्चेति द्विविध ।

तत्राद्यो रसभावादिरेक एवात्र गण्यते ।
एकोऽपि भेदोऽनन्तत्वात् संप्रत्येयस्तस्य नैव यत् ॥ ६ ॥

(वि, ञ) इत्थमविवक्षितवाच्यध्वनेरर्थान्तरसङ्क्रमितवाच्यत्वान्यन्ततिरस्कृतवाच्यत्वेन द्वैविध्यमुक्त्वा तदुदाहृतस्य च आद्यस्यार्थान्तरसङ्क्रमितवाच्यस्य तादृशपरिभाषाया बीजमाह—**अत्राद्ये** इति । अर्थान्तरे शक्यतावच्छेदकार्थान्तरेऽवच्छेदकान्तरे शक्यतावच्छेदकरूपेण बोधनमित्यर्थ , न तु तिरोभाव नतु अबोधनमित्यर्थ । अत एवेति स्वार्थ स्वाश्रयशब्दस्य मुख्यार्थमजहती उपस्थापयन्ती अजहत्स्वार्था (राजदन्तादिसमासासिद्धा) नच कदली कदलीत्यादौ प्रथमकदलीपदेनैव कदल्या उपस्थितौ तत्र लक्ष्यार्थस्य जडताया अभेदान्वयसम्भवे किमर्थं कदल्यशो लक्षणेति वाच्यम्, लक्ष्यतावच्छेदकजडत्वाश्रयत्वेन तेन रूपेण तदुपस्थापनस्य अनिवार्यत्वात् । **द्वितीये त्विति**—अत्यन्ततिरस्कृतवाच्ये इत्यर्थ । अत्यन्ततिरस्कृतत्वात् केनापि रूपेणाऽबोधितत्वात् जहत्स्वार्था, उक्तरूप स्वार्थं जहती अनुपस्थापयन्ती ।

(वि, ट) विवक्षितान्यपरवाच्यस्यापि प्रथम भेदद्वयमाह—**विवक्षिताभिधेयोपीति**—विवक्षितवाच्य इत्यर्थ । **प्रथममिति** पश्चात्तूभयोरपि प्रभेदबाहुल्यस्य वक्ष्यमाणत्वात् । तद्द्वैविध्यमाह । **असंलक्ष्येति**—व्यङ्ग्यो यत्र असलक्ष्यक्रम अपरिचेयज्ञानोत्पत्तिक्रम , वाच्यज्ञानानन्तर व्यङ्ग्यज्ञान जायते इति क्रमो यत्र अपरिचेय इति भाव । रसभावादीनाम् अत्यन्तास्वाद्यतया शीघ्रबोध्यत्वेन उत्पलपत्रशतभेदनस्येव क्रमापरिचयात् । अपरो वस्त्वलङ्काररूपो व्यङ्ग्यस्तु लक्ष्यक्रम । तद्ज्ञानोत्पत्तिक्रमस्य लक्षणीयत्वात् ।

(लो, ऐ) विवक्षिताभिधेय इत्यस्यार्थ विवक्षितान्यपरवाच्यो ध्वनिरिति । तत्र च रसवति काव्ये क्षणित्यास्वादपर्यन्तगमनाद्वस्त्वलङ्काररूपव्यङ्ग्ययोरपि प्रतीतिर्न विलम्बिता, नीरसे तु प्रतीतिविलम्बात्तत्सान्निध्येन सलक्ष्यक्रमव्यङ्ग्यव्यवहार ।

---

* असलक्ष्य अशेष क्रम पौर्वापर्यं (व्यङ्ग्येन=विभावानुभावाद्यर्थेन सह) यस्य स , यत्र वाच्यव्यङ्ग्ययो क्रमस्तु अशेष इति भाव ।

1 'असलक्ष्यक्रमव्यङ्ग्यो लक्ष्यव्यङ्ग्यक्रम पर' इति पाठव्यत्यय (च ज पु)

[ञ] तारकित पाठो (च पु) नास्ति ।

उच्चरूपो [1]रसभावादिरसलक्ष्यक्रमव्यङ्ग्य । अत्र व्यङ्ग्यप्रतीतेर्विभावादिप्रतीतिकारणकत्वात् + क्रमोऽवश्यमस्ति किन्तु उत्पलपत्रशतव्यतिभेदवल्लाघवाच्च † सलक्ष्यते । (ठ) एषु रसादिषु च एकस्यापि भेदस्यानन्तत्वात् सङ्ख्यातुमशक्यत्वादसलक्ष्यक्रमव्यङ्ग्यध्वनिर्नाम काव्यमेकभेदमेवोच्चम् । तथा हि—एकस्यैव शृङ्गारस्य एकोऽपि सम्भोगरूपो भेद परस्परालिङ्गनाधरपानचुम्बनादिभेदात् प्रत्येकञ्च विभावादिवैचित्र्यात् सङ्ख्यातुमशक्य, का गणनात्र सर्वेषाम् । (ड)

शब्दार्थोभयशक्त्युत्थे व्यङ्ग्येनुस्वानसन्निभे ।
ध्वनिर्लक्ष्यक्रमव्यङ्ग्यस्त्रिविध कथितो बुधै ॥ ७ ॥ *

क्रमलक्ष्यत्वादेवानुरणनरूपो यो व्यङ्ग्यस्तस्य शब्दशक्त्युद्भवत्वेन अर्थश

(वि, ठ) आद्य असलक्ष्यक्रम । **विभावादिप्रतीतिकारणकत्वादिति** । प्रत्येक तत् प्रतीतिकारणकत्वादित्यर्थ । "प्रतीयमान प्रथम प्रत्येक हेतुरुच्यते" इत्युक्तत्वात् । "तत् समूहालम्बनप्रतीतिस्तु रस एव' इत्युक्तत्वाच्च । लाघवात् शाघ्रप्रतीतित्वात् ।

(वि, ड) एकोऽपि भेद इत्यादिक व्याचष्टे—**एषु चेति** । **एकभेदमेवेति** असलक्ष्यक्रमत्वमेकमुपाधिमाश्रित्य इति शेष । विभावानुभावभेदाभेदगणने अनन्तत्वम्, तद्दर्शयति—**तथाहीति** । विभावादिवैचित्र्य कन्यामध्याप्रगल्भत्वादि भेदेन उत्तममध्यमाधमत्वभेदेन वैचित्र्य बोध्यम् ।

(वि, ढ) लक्ष्यक्रमव्यङ्ग्यध्वनिं विभजति—**शब्दार्थोभयेति**—तत्र अनुस्वान सन्निभ इति यदुक्त तद् व्याचष्टे—**क्रमलक्ष्यत्वादेवानुरणनरूप** इति । अनुरणन प्रतिध्वनि । स हि प्रथमध्वनेरनन्तर जायते तदुत्पत्तिक्रमश्च लक्ष्यते तत् तुल्यो यो व्यङ्ग्यस्तस्य त्रैविध्य व्याचष्टे—**तस्य शब्दशक्त्युद्भवत्वेन** इति । शब्दस्य अर्थस्य

(लो, ओ) सलक्ष्यक्रमव्यङ्ग्यभेदानाह—**शब्दार्थेति** । अनुस्वानेति कारिकापदस्यार्थं विवृणोति—**अनुरणनमिति** ।

+ विभावादीना प्रतीतिरेव कारण यस्य, तथा भाव तत्त्वात् ।

† उत्पलपत्रशताना व्यतिभेद युगपद्वदारण तद्वत् ।

* यथा ध्वनिप्रतिध्वन्यो क्रमो लक्ष्यते तथा यत्र वाच्यप्रतीयमानयोरर्थयो प्रतीतिक्रमो लक्ष्यते स सलक्ष्यक्रम । अविवक्षितवाच्येऽपि क्रमो लक्ष्यते परन्तु व्यङ्ग्यव्यङ्ग्ययोर्बोधप्रतिसन्धानेन विच्छेदात् ततोऽस्य भेद । अत्र तु क्रममात्र लक्ष्यते न विच्छेदोऽपि ।

1 रसेति नास्ति (क ख)

क्त्युद्भवत्वेन शब्दार्थशक्त्युद्भवत्वेन त्रैविध्यात् संलक्ष्यक्रमव्यङ्ग्यनाम्नो ध्वने. काव्यस्यापि त्रैविध्यम्। (ड, ओ)

तत्र—

वस्त्वलङ्काररूपत्वाच्छब्दशक्त्युद्भवो द्विधा ॥ ८ ॥

अलङ्कारशब्दस्य पृथगुपादानादनलङ्करणं[1] वस्तुमात्रं गृह्यते (औ)। तत्र वस्तुरूपशब्दशक्त्युद्भवो व्यङ्ग्यो यथा—(ण)

पन्थिअ ण एत्थ सत्थरमत्थि मण पत्थरत्थले गामे।
उण्णअपओहरं पेक्खिअ ऊण जइ वससि ता वससु ॥ (अ)

च शक्तिः सामर्थ्यम्। न तु अभिधारूपा वृत्ति तया व्यङ्ग्यावोधनात् अर्थस्य तदभावाच्च। तेन सामर्थ्येन उद्भव उत्पन्नविषयता यस्य तादृशव्यङ्ग्यस्येत्यर्थ। तत् त्रैविध्यात् तत्सम्बन्धेन सलक्ष्यक्रमव्यङ्ग्यनाम्नो ध्वनिकाव्यस्य त्रैविध्यमित्यर्थ।

(वि, ण) तत्र काव्यस्य शक्त्युत्थत्वप्रयोजकं शब्दशक्त्युद्भव व्यङ्ग्यं द्विधा विभजते—**तत्र वस्त्वलङ्काररूपत्वादिति**। पृथक् उपादानादिति वस्तुत्वस्य केवलान्वयित्वेन अलङ्कारस्यापि वस्तुत्वात्। तथा च गोबृषन्यायात् वस्तुपदस्यालङ्कारभिन्नवस्तुपरता व्याचष्टे—**अलङ्करणमिति**। अलङ्करणमलङ्कार तद्भिन्नमित्यर्थ.। अनलङ्कार इति बहुपुस्तकेषु पाठ तल्लेखकप्रमादादेव। अलङ्कारशब्दस्य पुलिङ्गत्वेन तस्य नञ् तत्पुरुषे लिङ्गत्यागाभावात्।

(वि, त) **पन्थिअ ण एत्थेति**–

"पथिक नात्र सस्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे।
उन्नतपयोधर प्रेक्ष्य यदि वससि तद्वस" ॥ इति संस्कृतम्।

निवासार्थिन पथिक प्रति स्वय-दूत्या उक्तिरियम्। हे पथिक! प्रस्तरस्थलेऽत्र ग्रामे मनाक् स्वल्पमपि सस्तर शयनीयास्तरणं नास्ति। प्रस्तर एव वयं स्वपिम इति भाव। मनागित्यत्रापि अथाऽध्याहार्य। उन्नतमुद्भूतं पयोधरं मेघं प्रेक्ष्य गमनप्रतिबन्धात् यदि वस्तुमिच्छसि तदा वस इति आपाततो भावार्थ.। अत शब्दशक्त्युत्थं गूढं व्यङ्ग्यार्थं

(लो, औ) अनलङ्करण वैचित्र्यमात्ररहितम्।

(लो, अ) सस्तरं-तृणादिशय्या। प्रस्तरा पाषाणा। पयोधरः मेघः। व्यङ्ग्यपक्षे सस्तरं शास्त्र रत्नुशासकम्। उन्नतपयोधरा मामित्यर्थः। न चेह सस्तरशब्दस्य शास्त्रार्थत्वेन उपमाध्वनि, सादृश्यस्याऽविवक्षितत्वात्। रहस्यसंगोपनार्थमेव हि व्यर्थप्रयोगः।

---

1 अनलङ्करमिति पाठान्तरम्।

अत्र सत्थरादिशब्दशक्त्या यद्यपभोगक्षमोऽस्ति तदास्स्वेति वस्तु व्यज्यते।

(त) अलङ्काररूपो यथा—दुर्गालङ्घितविग्रह इत्यादि।

अत्र प्राकरणिकस्य उमानाममहादेवीवल्लभभानुदेवनृपनेर्वर्णने द्वितीयार्थ-सूचितमप्राकरणिकस्य पार्वतीवल्लभस्य वर्णनमसम्बद्धं मा प्रसाङ्क्षीदितीश्वरभानु देवयोरुपमानोपमेयभाव कल्प्यते। तदत्र उमावल्लभ इवेत्युपमालङ्कारो व्यङ्ग्य ।

(थ)

यथा वा—

अमित समित प्राप्तैरर्कपैर्हर्षद ! प्रभो !
अहित सहित साधुयशोभिरसतामसि ॥

अत्रामित इत्यादावपि शब्दाभावाद् विरोधाभासो व्यङ्ग्य। (द,आ)*

दर्शयति—अत्रेति। प्राकृतश्लिष्टस्य सत्थरशब्दस्य शास्त्रमप्यर्थ । प्रकरणनियन्त्रण वशात् सोऽथा व्यङ्ग्यमन्यथा च "परदारान्न गच्छेदि' ति स्मृत्यादिशास्त्र नास्ति इत्यर्थ । इति आदिपदात् प्रस्तरस्थलपयोधरपदयोरपि परिग्रह । तथा हि शय्याविरहात् प्रस्तरस्थ स्त्रीजन पुरुषो लातिरित्यर्थं गृह्णाति इति प्रस्तरस्थल तत्र इत्यर्थन उत्तुङ्गस्तनदर्शनेन च "यद्युपभोगक्षमेत्यादि" व्यञ्जनात् परम्परया शब्दशक्तिमूलता।

(वि, थ) शब्दशक्त्युद्भवोपमालङ्कारव्यञ्जनामाह—दुर्गालङ्घितेति । व्याख्यातमिदम्। द्वितीयार्थ पार्वत्यादि तेन सूचित पार्वतीवल्लभस्य वर्णनमित्यर्थ । **मा प्रसाङ्क्षीदिति**—प्रसक्त माभूदित्यर्थ । तत्प्रसङ्गो कवेरन्यत्तापते । अत कवेरीश्वरभानुदेवयोरुपमानोपमेयभावे तात्पर्यात् उपमानोपमेयभाव कल्प्यते संव्यज्यते इत्यर्थ । स एव च उपमालङ्कार । त व्यङ्ग्य विशदयित्वा दर्शयति **तदत्रेति**।

(वि, द) शब्दशक्त्या व्यङ्ग्यविरोधभासालङ्कारमाह—**यथा वा—अमित** इति। हे हर्षद प्रभो ! समित युद्धात् प्राप्तैरर्कपैरमित अपरिच्छिन्नोसि, उत्कर्ष बाहुल्यात् त्व कीदृश असतामहित शत्रु साधुयशोभि सहित । अत्र अमित परिमाणरहित समित परिमाणयुक्तश्चेति । अहितो हितशून्य सहितो हितयुक्तश्चेति विरोध । विरोधस्य वाचकाभावात् व्यङ्ग्यतामाह—अत्रेति ।

(लो, आ) **अमित** इति। समित सग्रामात् प्राप्तैरुत्कर्षैरपरिमित असतामहित शत्रु । मान मित तेन सहित । हितेन रहित कथ तेन युक्त इति विरोध । **अपिशब्दाभावादिति**। अपिशब्दसद्भावे "युवतिमपि कलत्रवल्लभ

---

* अत्र विरोधप्रतिपादकस्याऽप्यादिपदस्याभावात् पश्चादनुसन्धानेन विरोधप्रतिभासाय व्यङ्ग्य इत्यर्थ । ननु वाच्यविरोधालङ्कारादस्य को भेद इति चेदुच्यते-यत्र विरोधपदार्थानां समन्वये शब्दश्रवणादेव विरो। प्रतिभासने तत्र वाच्ये विरोध

व्यङ्ग्यस्यालङ्कार्यत्वेऽपि ब्राह्मणश्रमणन्यायादलङ्कारत्वमुपचर्य्यते । (ध)*

वस्तु वालङ्कृतिर्वापि द्विधार्थः सम्भवी स्वतः ।
कवेः प्रौढोक्तिसिद्धो वा तन्निबद्धस्य चेति षट् ।
षड्भिस्तैर्व्यज्यमानस्तु वस्त्वलङ्काररूपकः ।
अर्थशक्त्युद्भवो व्यङ्ग्यो याति द्वादशभेदताम् ॥ ६ ॥ (इ)

स्वत सम्भवी औचित्याद् बहिरपि सम्भाव्यमान । प्रौढोक्त्या सिद्धो न

(वि, ध) ननु व्यङ्ग्यार्थ एव आस्वाद्य तस्य शोभको य स एवालङ्कार । तथा च उपमादेर्व्यङ्ग्यत्वे परेण शोभ्यमान एव स. न शोभक । तत्कथमत्र व्यङ्ग्यो पमादेरलङ्कारत्वमित्यत आह—**व्यङ्ग्यस्येति**–अलङ्कार्य्यत्वे वाच्यालङ्कारान्तरेणैव शोभ्यत्वेऽपि इत्यर्थ । श्रमण सन्यासी तद्दशाया तस्य ब्राह्मण्याभावेऽपि यथा तस्य दशान्तरीय ब्राह्मण्यमादाय ब्राह्मणत्वमुपचर्य्यते तथा वाच्यतादशायामलङ्कार त्वमादाय व्यङ्ग्योपमादेरलङ्कारत्वमुपचर्य्यते इत्यर्थ ।

(वि, न) अर्थशक्त्युद्भव दर्शयितु व्यञ्जनार्थस्य वस्त्वलङ्काररूपद्विविधस्य स्वत सम्भवित्वादिनैविध्येन षड्विधत्वमाह–**वस्तु वाऽलङ्कृतिर्वेति** । षड्विध व्यङ्ग्याना द्वादशविधत्वमाह—**षड्भिस्तैरिति** । **बहिरपीति** । शब्दप्रमाणात् बहि । प्रमाणेनापि सिद्धत्वात् उचितसम्भावन इत्यर्थ । **प्रौढोक्त्येति**–कवित-न्निबद्धयो प्रतिभामात्राधीनोक्तया इत्यर्थ । **ननु औचित्येनेति**—तस्याऽर्थस्याऽलीक-त्वेनौचित्याभावात् ।

मित्यादौ अपिशब्दबलात् झटिति विरुद्धार्थ एवाभासते । अन्यथा अपिशब्दस्य निरर्थकतापत्ते । अमित इत्यादौ तु अपेरभावात् प्राकरणिकतया प्रथमम् अविरुद्धा-र्थ एव प्रतिभासते । अनन्तरम् अमित सन्कथ सामित इति विरोधप्रतिभासनाद् विरोधाभासो व्यङ्ग्य इति । अपिशब्दाभावादित्युपलक्षणम्, अन्येषामपि विरोधा-भिधायि शब्दानामभावेऽपि विरोधाभासस्य व्यङ्ग्यत्वं बोद्धव्यम् ।

(लो, इ) **वस्तु** वेति—स्वत सम्भविकविप्रौढोक्तिनिबद्धवस्तुप्रौढोक्तिसि-द्धाभि वस्त्वलङ्काररूपाभि षड्विधाभि व्यञ्जनाभि व्यङ्ग्ययोर्वस्त्वलङ्कारयो द्वादश विधत्वेन द्वादशप्रकारमर्थशक्त्युद्भवव्यङ्ग्यध्वनिकाव्यमिति ।

यथा अनस्य गृह्णतो जन्मेत्यादौ । यत्र तु शब्दश्रवणाऽविरुद्ध एव ग्रहणार्थ प्रतीयते पश्चात्तस्यैव शब्दस्य पुनरनुसन्धानेन विरोधस्तत्र ध्वनिरेव ।

* ननु ध्वनित्वे कथमेषामलङ्कारत्वम् इत्यत आह–**व्यङ्ग्यस्येति**। स्थानान्तरदृष्टा लङ्कारसामान्येनाऽत्र तद्व्यपदेशो भाक्त । परमलङ्कार्य्य एवाऽयम् । यथा श्रमण दशाया पूर्वदृष्टब्राह्मणत्वप्रत्यभिज्ञानाद् ब्राह्मणव्यवहार ।

स्वौचित्येन । (न) *

तत्र क्रमेण यथा—

दृष्टे हे प्रतिवेशिनि ! क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायेणास्य शिशोः पिता न विरसाः कौपीरप पास्यति ।
एकाकिन्यपि यामि सत्वरमितः स्रोतस्तमालाकुल
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थय ॥ (प)

अनेन स्वत सम्भविना वस्तुमात्रेण एतत्प्रतिपादिकाया भाविपरपुरपोपभोगजनरक्षतादिगोपनरूप वस्तुमात्र व्यज्यते । (फ)

दिशि मन्दायते तेजो दक्षिणस्या रवेरपि ।
तस्यामेव रघो पाण्ड्या प्रताप न विषेहिरे ॥

अनेन स्वत सम्भविना वस्तुना रवितेजसो रघुप्रतापोऽधिक इति व्यतिरेकालङ्कारो व्यज्यते । (ब)

आपतन्तममु दूरादरीकृतपराक्रम. ।
बलोऽवलोक्यामास मातङ्गमिव केसरी ॥

(वि, प) स्वत सम्भविवस्तुव्यङ्गय वस्त्वाह—**दृष्टे हे** इति । नदीजलानयनवर्त्मनि वने कृतसकेताया कुलटाया तज्जलानयनच्छलेन निर्गमिष्यो र्भाविनख क्षतसम्वरणोक्तिरियम् । **इहापी**ति—स्वगृह इव अस्मद्गृहेऽपास्यर्थ । अस्य मदीयस्य शिशो पिता कुलटात्वात् स्वपतित्वेनाऽनुक्ति । विरसा स्वादरहिता कौपी कूप सम्बन्धिनी अप जलाभिप्रायेण इत्यनेन मम बाध्यादिना अशङ्कितेदेने पिबतीत्युक्तम् । आलिखन्तु इति, तदा लेखनसम्भावनासत्त्वेऽपि यास्यामीत्यर्थ । जरठच्छेदा कठिनच्छिन्नभागा नीरन्ध्रा अविरला । नलग्रन्थय नलाख्यतृण पर्वदेशा ।

(वि, फ) **स्वतःसम्भविने**ति—अस्य श्लोकार्थस्याऽनलीकत्वेन प्रमाणान्तरेणापि गम्यत्वसम्भवात् ।

(वि, ब) स्वत सम्भविवस्तुव्यङ्गयमलङ्कारमाह—**दिशी**ति । पाण्ड्या पाण्ड्यदेशीया राजान । व्यतिरेकालङ्कार इति उपमानात् रवितेजसो रघुप्रतापस्याधिक्यरूप । सच व्यङ्गय एव असहनेनैव तत्प्राप्ते ।

(वि, भ) स्वत सम्भव्यलङ्कारव्यङ्गय वस्त्वाह—**आपतन्तममु**मिति । आपतन्तम् आगच्छन्तम् अमु वेणुदारिनामासुर रामो बलराम । वेणुदारिण

---

* यद्यपि स्वत सम्भावेत्यादिक व्यङ्गयार्थेऽपि सम्भवति तथापि तस्य काव्यात्मभूतस्य चमत्कारैकरूपतया प्रतीतिकाले तादृग्विशेषप्रतिसन्धान न भवति ।

अत्र उपमालङ्काररूपेण स्वतःसम्भविना व्यङ्ग्यकार्येण बलदेवः क्षणेनैव वेणुदारिणः क्षयं करिष्यतीति वस्तु व्यज्यते । (भ)

गाढकान्तदशनक्षतव्यथासंकटादरिवधूजनस्य यः ।
ओष्ठविद्रुमदलान्यमोचयन्निर्दशन् युधि स्वया निजाधरम् ॥

अत्र स्वत.सम्भविना विरोधालङ्कारेणाधरो निर्दष्टः शत्रवो व्यापादिताश्चेति समुच्चयालङ्कारो व्यङ्ग्यः । (म, ई) *

सज्जेइ सुरहिमासो ण आप्पअई जुअइजणलक्खसहे ।

क्षयमिति बलोपमानस्य सिंहस्य वेणुदार्युपमानमात्रसंक्षयकारित्वेन तदुपमानोपमेययोरपि तद्धर्मलाभात् ।

(वि, म) स्वत.सम्भव्यलङ्कारव्यङ्ग्यमलङ्कारमाह—**गाढकान्तेति** । यो राजा युधि निजाधरं निर्दशन् अरिवधूजनस्य ओष्ठरूपाणि विद्रुमस्य प्रवालस्य दलानि रतकालीनगाढकान्तदशनक्षतव्यथारूपात् संकटादापदोऽमोचयत् । युधि क्रोधेन स्वाधरं निर्दश्य तत्पतिं हत्वा तथा चकारेत्यर्थ. । **अत्रेति**—अधरदंशक्षत्वाधरदंशमोचनत्वयोः वस्तुगत्या अविरोधेऽपि आपततो विरोधस्य आभासमानत्वात् विरोधाभासालङ्कारेण इत्यर्थ । **समुच्चयालङ्कार** इति—द्वयोरेककालोत्पत्तिरूप इत्यर्थ. । चकारद्वयस्य समं शब्दस्य वाऽभावात् व्यङ्ग्यएव इत्यर्थः ।

(वि, य) कविप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यं वस्तु आह—**सज्जेइ** इति ।

(लो, ई) **विरोधालङ्कारेणेति**—विरोधमूलेन कार्यकारणपौर्वापर्यविपर्ययरूपेणैवातिशयोक्त्यलङ्कारेणेत्यर्थ । तथा च अत्र स्वाधरनिर्दशनं कारणभूतं वैरिस्त्रीणाम् ओष्ठाना च क्षान्तदन्तक्षतमोचनं कार्यभूतं समकालतया निर्दिष्टम् । किञ्चात्र निर्दशनरूपक्रूरपिशाचो ममाधरं बलिरूपं प्राप्यान्यानधरान् सुखिनः करोतिति बुद्ध्वैव निजाधरं दष्टवानिति तस्य राज्ञ बुद्धिमपेक्ष्य उत्प्रेक्षा च । ततश्चात्र समुच्चयोत्प्रेक्षयोरेकाश्रयानुप्रवेशः सङ्करश्च ।

(लो, उ) **सज्जेति**—"राजयति सुरभिमासो न चार्पयति युवतिजनलक्ष्य-

---

* **विरोधालङ्कारेणेति**—विरोधाभासालङ्कारेण इत्यर्थ. । ओष्ठविषयकयोः दशनमोचनयोर्विरोधः (यो निजाधरं दशति स कथं परेषामधरान् मोचयति इति विरोध.) ओष्ठत्वेन सामानाधिकरण्यस्य विवक्षितत्वात् । ओष्ठदशनेन ओष्ठदशनव्यथामोचनं विरुद्धम् । विरुद्धं च ओष्ठदशनव्यथामोचनक्रिययो. कारणकार्ययोरपि समकालिकत्वं च । तेन च स्वाधरदशनशत्रुव्यापादनयोरेककालिकत्वरूपैकधर्मसम्बन्धात् समुच्चयालङ्कार. । अन्ये तु वदन्ति विरोधालङ्कारेण इत्यस्य वास्तव

अहिणअसहआरमुहे णवपल्लवपत्तले अणङ्गस्स सरे ॥ (ङ)

अत्र वसन्त शरकार कामो धन्वी, युवतयो लक्ष्य, पुष्पाणि शरा 'इति कविप्रौढोक्तिसिद्ध वस्तु प्रकाशीभवन्मदनविजृम्भणरूप वस्तु व्यनक्ति । (य)

रजनीषु विमलभानो करजालेन प्रकाशित वीर !
धवलयति भुवनमण्डलमखिल तव कीर्त्तिसन्तति सततम् ॥

अत्र कविप्रौढोक्तिसिद्धेन वस्तुना कीर्त्तिसन्ततेश्चन्द्रकरजालादधिककाल-प्रकाशकत्वेन व्यतिरेकालङ्कारो व्यङ्ग्यः । (र)

दशाननकिरीटेभ्यस्तत्क्षण राक्षसश्रिय ।
मणिव्याजेन पर्य्यस्ता पृथिव्यामश्रुबिन्दव ॥

"सज्जयति सुरभिमासो न चार्पयति युवतिजनलक्ष्यशते ।
अभिनवसहकारमुखान् नवपल्लवपत्तलान् अनङ्गस्य शरान्॥" इति संस्कृतम् ।

प्रथमप्रवृत्तवसन्तवर्णनमिदम् । सुरभिमासोऽभिनवसहकारमुखान् अभिनवानि सहकाराणि मुखम् आदर्शयेषा तादृशान् अनङ्गस्य शरान् सज्जयति । युवतिजनरूपे लक्ष्यशते शरव्यशते न चार्पयति । शरसज्जनस्य वर्त्तमानत्वात् अनिष्पन्नत्वेन तन्निष्पत्त्यानन्तरमेव तादृशलक्ष्यशतेऽर्पयितु प्रेरयिष्यति इति भाव । शतपदात् द्विरि-युक्त्या त्वर्पयितु प्रेरयतीति लभ्यते । न चार्पयतीति हेतुगर्भितान्तम् । अनङ्गशरान् मोदशान्-नवपल्लवपत्तलान् नवपल्लवं पत्तला पत्ररचना येषा तादृशान् । "शराणा पत्ररचना पत्तला परिकीर्त्यते" इति कोष । **वस्तुप्रकाशीभवदिति**—न च सुर भिमासादौ शरसाधादिरूपकालङ्कार एव प्रकाशाभवति इत्यतोऽलङ्कारस्यैव व्यञ्जकत्व-मात्रेति वाच्यम् । सुरभिमासादौ शरकारादिभेदाऽप्रकाशात् किन्तु सुरभिमासादौ शरसज्जनादेरेव प्रकाशात् ।

(**वि, र**) कविप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यमलङ्कारमाह—**रजनीष्विति** । हे वीर विमलभानो निर्मलकिरणस्य चन्द्रस्य करजालेन भुवनमण्डलं धवलयतीत्यर्थ । **व्यतिरेकालङ्कार** इति—अधिककाल व्याप्य प्रकाशनात् उपमानात् चन्द्रकरात् आधिक्यरूप इत्यर्थ ।

(**वि, ल**) कविप्रौढोक्तिसिद्धालङ्कारव्यङ्ग्य वस्त्वाह—**दशाननेति** । दशा-ननस्य किरीटेभ्य मणिव्याजेन मणिपतनच्छलेन राक्षसश्रिय अश्रुबिन्दव पृथिव्या

सहान् । अभिनवसहकारमुखान् नवपल्लवपत्तलान् अनङ्गस्य शरान्॥" इति संस्कृतम् ।

विरोधमूलोऽसङ्गत्यलङ्कारेण इत्यर्थ । स्वाधरनिर्देशनैवास्त्रिधूननौष्ठव्यथामोचनयो कारणकार्ययो वैयधिकरण्येन निदर्शनात् विरोधस्य स्फुटत्वम् । तत् सर्वं चिन्त्यम् ।

अत्र कविप्रौढोक्तिसिद्धेनापह्नुत्यलङ्कारेण भविष्यद्राक्षसश्रीविनाशरूप वस्तु व्यज्यते। (ल)

धम्मिल्ले नवमल्लिकासमुदयो हस्ते सिताम्भोरुह
हार कण्ठतटे पयोधरयुगे श्रीखण्डलेपो घन.।
एकोऽपि त्रिकलिङ्गभूमितिलक ! त्वत्कीर्तिराशिर्ययौ
नानामण्डनता पुरन्दरपुरीवामभ्रुवा विग्रहे ॥

अत्र कविप्रौढोक्तिसिद्धेन रूपकालङ्कारेण भूमिष्ठोऽपि स्वर्गस्थानामुपकार करोपीति विभावनालङ्कारो व्यज्यते। (व)

शिखरिणि क्व नु नाम कियच्चिर
किमभिधानमसावकरोत्तपः।
सुमुखि ! येन तवाधरपाटल
दशति बिम्बफल शुकशावक ॥

अनेन कविनिबद्धस्य कस्यचित् कामिन प्रौढोक्तिसिद्धेन[1] वस्तुना तवाधर पुण्यातिशयलभ्य इति वस्तु प्रतीयते। (श)

सुभगे कोटिसख्यत्वमुपेत्य[2] मदनाशुगै ।
वसन्ते पश्यता त्यक्ता पश्यतामीद् वियोगिनाम् ॥

पर्यस्ता पतिता । **अपह्नुत्यलङ्कारेणेति**—मणिपानाऽपह्नुत्या व्यानपदेन अश्रुबिन्दुसाधनात्।

(**वि, व**) कविप्रौढोक्तिसिद्धालङ्कारव्यङ्ग्यमलङ्कारमाह—**धम्मिल्ल** इति । हे त्रिकलिङ्गभूमितिलक ! कलिङ्गदेशभूषणतिलक ! एकोऽपि तव कीर्तिराशि पुरन्दर पुरीवामभ्रुवा सुराङ्गनाना विग्रहे शरीरे नानामण्डनता ययौ । तदेव दर्शयति—**धम्मिल्ल** इति । धम्मिल्ल सयता कचा । **विभावनेति**—स्वर्गस्थितिरेव स्वर्गस्थाना मुपकारकारणम् । तदभावेऽपि स्वर्गस्थोपकारकरणरूपफलव्यक्तिरूपा विभावना, सा च स्वर्गस्थित्यभाववाचकशब्दाभावात् व्यङ्ग्या ।

(**वि, श**) कविनिबद्धवक्तृप्रौढोक्तिसिद्धवस्तुव्यङ्ग्य वस्त्वाह—**शिखरिणि** इति । असौ शुकशावक क्व नु शिखरिणि कस्मिन् पर्वते कियच्चिर किमभिधान किं नामकं तप अकरोत्। येन हेतुना तव अधरवत् पाटल बिम्बफल दशति । तव अधरतुल्यवस्तुदशनमपि तप फलमिति श्रोतुरस्य भावार्थ ।

(**वि, ष**) कविनिबद्धवक्तृप्रौढोक्तिसिद्धवस्तु व्यङ्ग्यमलङ्कारमाह—**सुभग** इति । वसन्ते मदनाशुगै कोटिसख्यत्वम् उपेत्य लब्ध्वा, पश्यता पश्यतस्त्यक्ता,

---

1 प्रौढोक्तिरूपेण (प फ ब) 2 मुपेत्य (च ज. ब)

अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन [1]कामशराणां कोटिमस्य वप्राप्त्या निखिलवियोगिमरणेन वस्तुना शराणा पञ्चता शरान् विमुच्य वियोगिन श्रितेवे युत्प्रेक्षालङ्कारो[2] व्यज्यते। (घ)

मल्लिकामुकुले चण्डि [1] भानि गुञ्जन् मधुव्रत ।
प्रयाणे पञ्चबाणस्य शङ्खमापूरयन्निव ॥

अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन उत्प्रेक्षालङ्कारेण कामस्यायमुन्मादक काल प्राप्तस्तत्कथ मानिनि मान न मुञ्चसीति वस्तु व्यज्यते। (ङ)

महिलासहस्सभरिए तुह हिअए सुहअ सा अमाअन्ती।
अणुदिणमणण्णकम्मा[3] अग तणुअ पि तणुएइ ॥ (ऊ)

अत्र अमाअन्ती इति कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन काव्यलिङ्गालङ्कारेण

वियोगिना पथता मरणकालीनपथभूतविश्लेष आसीत्। अत्रेति—**सुभगे** इति। सम्बोधनात् कामुक एवात्र वक्ता नतु कवि। तत्प्रौढोक्तिसिद्धेन वियोगिना मरणेन सहान्वय। **उत्प्रेक्षा व्यज्यत** इति—तद्वाचकैवशब्दाभावाद् व्यञ्जना।

(वि, स) कविनिबद्धवक्तृप्रौढोक्तिसिद्धालङ्कारव्यङ्ग्य वस्त्वाह—**मल्लि** केति। **शङ्खमापूरयन्निवेति**। मल्लिकामुकुलस्य शङ्खाकारत्वात् मृदुगुञ्जनस्य शङ्खशब्दतुल्यत्वात्। मानिनी प्रतीयमुक्तिरित्यभिप्रायेण कविनिबद्धवक्तृप्रौढोक्तिमि दमुदाहरणमिदम्। अत एव स्थ मान न मुञ्चसि इति व्याख्या।

(वि, ह) कविनिबद्धवक्तृप्रौढोक्तिसिद्धालङ्कारव्यङ्ग्यमलङ्कारमाह—**महिला-सहस्सेति**।

'महिलासहस्रभरिते तव हृदये सुभग ! साऽमान्ती।
अनुदिनमनन्यकर्मा अङ्ग तन्वपि तनयति ॥" इति संस्कृतम्।

नायकस्य बहुनायिकत्वभावनादु त्येन कृशाया नायिकाया अवस्था नायके कथयन्त्या सख्या उक्तिरियम्। महिला स्त्री तासा सहस्रेण भरिते तव हृदय अमान्ती अव काशमलभमाना सा अनुदिन दिवस व्याप्य अनन्यकर्म्मा त्यक्तान्यकार्य्या सती तनु स्वत कृश अङ्ग तनयति तनूकरोति कृशतर करोति। नामधातोरन्तस्य तनुशब्दस्य रूपमिदम्। **काव्यलिङ्गेति**—काव्यलिङ्ग हेत्वलङ्कार। हृदये स्थानालाभस्य अङ्गत

(लो, ऊ) महिलासहस्रभरिते तव हृदये सुभग साऽमान्ती।
अनुदिनमनन्यमना अङ्ग तनुरपि तनूकरोति।

(लो, ऋ) अत्रेति—रूपणादय कवेर्व्यापारा कवेश्च प्राधान्यस्यरूप

---

1 कामेति नास्ति स पु 2 अलङ्कार इति नास्ति स पु
3 मणा इति पाठान्तरम्।

तनोस्तनूकरणेऽपि तत्र हृदये न वर्त्तत इति विशेषोक्त्यलङ्कारो व्यज्यते । (ह,ऋ)*

न खलु कवे कविनिबद्धस्येव रागाद्याविष्टता । अत कविनिबद्धवक्त्रौढोक्ति कविप्रौढोक्तेरधिक सहृदयचमत्कारिणीति पृथक् प्रतिपादिता । (क)

एव वाच्यार्थस्य व्यञ्जकत्वे उदाहृतम्[1]। (ख) एषु च अलङ्कृतिव्यञ्जनस्थले रूपणोत्प्रेक्षणव्यतिरेचनादिमात्रस्य प्राधान्य सहृदयसम्वेद्य, न तु [2]रूपादीना

नूकरणहेतुत्वात् । **हृदये न वर्त्तते** इति—तनयतीति वर्त्तमाननिर्देशात् अद्यापि हृदये स्थानलाभ । विशेषोक्तेरीति अङ्गतनूकरणरूपकारणसत्वेऽपि हृदये स्थानलाभरूपस्य कार्यस्याभावरूपा विशेषोक्ति ।

(वि, क) ननु—प्रागेवोक्तसिद्धत्वेनैव उभयसग्रहसम्भवे किमर्थं कविनिबद्ध वक्तृकत्वेन पृथगुपादानमित्यत आह—**न खल्विति** । काव्यापेक्षया कविनिबद्धस्य रागातिशयात् पृथगुपादानमित्यर्थ ।

(वि, ख) एव वाच्यार्थस्येति—इदमनाधेयम् । गाढकान्तदर्शनेत्यादौ दर्शितस्य विरोधालङ्कारस्य व्यञ्जकस्य वाचकाऽपिसाराभावाद् व्यङ्ग्यत्वमेव, एव तत्र याति सुरभिमास इत्यादौ वसन्तादे शरकरणादिरूपवस्तुनो व्यञ्जकस्य व्यङ्ग्यत्वमेव इत्यनोऽत्र प्रायश इति पूरणीयम् । काव्यप्रकाशकृन्मते तु व्यञ्जकत्वेऽलङ्कारो वाच्य त्वाद्यनियम एव । अत एव लक्ष्यव्यङ्ग्ययोरपि व्यञ्जकत्वमुदाहार्य्यमिति तेनोक्तम् । ननु रूपणमेव रूपकालङ्कार । उत्प्रेक्षणमेव उत्प्रेक्षालङ्कार, व्यतिरेचनमेव व्यतिरेकालङ्कार तथा च यत्र रूपकालङ्कारस्य व्यङ्ग्यत्वम् तत्र किं रूप्यमाणवस्तूदाहरण न स्यात् । एवमुत्प्रेक्ष्यमाणव्यतिरिच्यमानवस्तुनोरित्यत आह—**एषु चेति**—तत्तद् वस्त्वपेक्षया तदलङ्कार एव अधिकचमत्कारीति तत्तदुदाहरणमेव तत्तत् इति भाव । यद्यपि सुभगे कोटिमख्यात्वम् इत्यत्र उत्प्रेक्षालङ्कार, दिशि मन्दायते इत्यत्र व्यतिरेकालङ्कारश्च व्यज्यत उक्त । रूपकालङ्कार व्यङ्ग्यत्व तु नोक्त तथापि—

चलापाङ्गा दृष्टिं स्पृशसि बहुशो वेपथुमती
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचर ।

बाधनार्थो रूपणादयो व्यापारा यथात्र चमत्कुर्वन्ति न तथा वाच्येषु । रूपकादय लङ्कारेषु हि वाच्यानां रूप्याणां सुभगादीनामेव रूपणादिव्यापाराद् रूपकादिभ्यश्चन्द्रा दिभ्यश्च प्राधान्यमित्यर्थ ।

---

* अत्र भ्रमन्ती इत्यस्य महिलागहनभरितत्व हेतु, तनूकरण भ्रमन्तात्व च हेतु इति द्वाभ्या काव्यानिङ्गालङ्काराभ्या विशेषोक्तिर्व्यज्यते ।

1 एवमित्यादिरुदाहृतमित्यन्त पाठ (ङ ख पु) नास्ति.

2 'प्या' (क ख पु

मित्यलङ्कृतेरेव प्राधान्यम्। लक्ष्यार्थस्य यथा नि शेषच्युतचन्दनमित्यादि। व्यङ्ग्यार्थस्य यथा-उच्च णिच्चलेत्यादि। अनयोः खलु स्वत सम्भविनौ लक्ष्यव्यङ्ग्यार्थौ व्यञ्जकौ। एवमन्येष्वेकादशभेदेषूदाहार्यम्। (ग)

एकः शब्दार्थशक्त्युत्थे ॥ १० ॥

उभयशक्त्युद्भवे व्यङ्ग्ये एको ध्वनेर्भेदः। यथा—(घ)

हिममुक्तचन्द्ररुचिर सपद्मको
मदयन् द्विजान् जनितमीनकेतन.।

कर व्याधुन्वत्या पिबसि रतिसर्वस्वमधर
वयं तत्त्वान्वेषान्मधुकर! हतास्त्वं खलु कृती ॥

इत्यत्र मधुकरे कामुकरूपण व्यङ्ग्य बोध्यम्।

(वि, ग) लक्ष्यार्थस्य यथेत्यादि-इदमनवधेयम्-"भस्म धम्मिअ" इत्यादावप्यध्वनण व्यङ्ग्यप्रसङ्गम्। तत्तुल्ययुक्तिके नि शेषेत्यादौ तदन्तिरस्कृतत्व लक्ष्य-मित्युक्तमिताद खोक्तिविरुद्धम्। "क्वचिद् वाच्यतया स्थाति" रित्यायुक्त्युक्तेरुभयत्र समानत्वात्।

(वि, घ) उभयशक्त्युद्भवमुदाहरणमाह—एकेति। एक प्रभेद इत्यर्थ.। शब्दशक्त्युद्भवे व्यङ्ग्ये तत्प्रथमस्य अर्थशक्त्युद्भवे व्यङ्ग्ये तत्प्रथमस्य दर्शितत्वात्। उभयशक्त्युद्भवप्रकारस्य तावतैव गतार्थत्वात् एक इत्युक्तम्। न तु दर्शयिष्यमाणो-दाहरणेऽलङ्कारस्य व्यङ्ग्यत्वात् अलङ्काररूपतया एक इत्युक्त इति केनचिदुक्त युक्तम्।

"क्षणदागमक्षणदाकनमन व्यसनमव्यसनम्।
वत वीर! तव द्विषता पराङ्मुख त्वयि पराङ्मुख सर्वम् ॥"

इत्यत्राऽर्थान्तरन्यासघटकशब्दशक्त्याऽर्थान्तरन्यासरूपाऽर्थशक्त्या च विधिरपि स्वामनुवर्त्तते इति वस्तुव्यञ्जनाया अपि सम्भवात् स्वत सम्भव्यार्थव्यङ्ग्यत्वेन भेदान्तरप्रसक्तेर्दुर्वारत्वाच्च।

(वि, ङ) हिममुक्तेति—माधव कृष्ण प्रमदाजनस्य मेहान्तरो महोत्सव हेतुश्चित्राय अभवत्। अत्र शुद्धसारोपा लक्षणा। सदृश हिममुक्तचन्द्र इव रुचिर। सपद्मक पद्मया लक्ष्म्या हस्तपादस्थरेखाम्यपद्मेन वा सहित। द्विजान् ब्राह्मणान् मदयत् आनन्दयन्। जनितो मीनकेतन प्रद्युम्न येन तादृश। प्रणादता प्रणिनाम् गुरु देवा येन तादृश। अत्र माधवो गतोऽपि शब्दशक्त्या अर्थशक्त्या च

(लो, घ) हिमेति—हिममुक्तचन्द्र इव पद्म हिममुक्तचन्द्रेण रुचिर। पद्मा लक्ष्मी पद्म कमल च। मीनकेतन प्रद्युम्नस्तार, सामान्यमदनश्च, गता शिरसा, गुरु गरुम्। माधवो हरिर्वसन्तश्च। अत्र माधवशब्दप्रतिपाद्यतया हरिवसन्तयो र्धर्मस्यप्रतिपादकस्य हिममुक्त इत्यादिशब्दस्य शब्दपरिवृत्तिसहत्वेऽर्थशक्तेर्दर्शनम्।

अभवत् प्रसादितसुरो महोत्सवः
प्रमदाजनस्य स चिराय माधवः ॥ (ङ) ×

अत्र माधवः कृष्णो माधवो वसन्त इवेत्युपमालङ्कारो[1] व्यङ्ग्य । (ञ)

एवं च व्यङ्ग्यभेदादेव व्यञ्जकानां काव्यानां भेदः ।

तदष्टादशधा ध्वनिः ॥ ११ ॥

अविवक्षितवाच्योऽर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविध । विवक्षितान्यपरवाच्यस्तु असंलक्ष्यक्रमव्यङ्ग्यत्वेनैक संलक्ष्यक्रमव्यङ्ग्यत्वेन[2] च शब्दार्थोभयशक्तिमूलतया पञ्चदशेति अष्टादशभेदो ध्वनिः । (च) । एषु च—

वाक्ये शब्दार्थशक्त्युत्थस्तदन्ये पदवाक्ययोः । (छ)

तत्र अर्थान्तरसंक्रमितवाच्यो ध्वनिः पदगतो यथा—(छ)

व्यज्यते । तथा हि माधवशब्दस्य वसन्तेऽपि शक्त्या सपद्मक इत्यत्र सपद्मकशब्दरूपस्य पद्मसहितेऽपि शक्त्या, द्विजान् इत्यत्र द्विजशब्दस्य पक्षिण्यपि शक्त्या, जनितमीनकेतन इत्यत्र सुराप्रमादनेऽप्यस्य शब्दस्य शक्त्या च वसन्तप्रत्यायने शब्दशक्तिः । हिममुक्तेत्यत्र प्रमदाजनस्येत्यत्र श्लिष्टशब्दाभावात् अर्थशक्तिः । ततश्च वसन्तस्याऽप्राकरणिकत्वेन तत्प्रत्यायनस्य प्रकृतेऽनुपयोगाद् वसन्त इव कृष्ण इत्युपमाप्रतीतिः । तदाह—**उपमालङ्कार** इति ।

(वि, च) अष्टादशत्वं दर्शयति—**अविवक्षितेति** । **पञ्चदशेति**—शब्दशक्त्युत्थौ द्वौ, अर्थशक्त्युत्थश्च द्वादश, उभयशक्त्युत्थे एक इति पञ्चदश ।

(वि, छ) **वाक्य** इति—उभयशक्त्युत्थो व्यङ्ग्यो वाक्यमात्रव्यङ्ग्य इत्यर्थः । व्यञ्जकार्थवाचकश्लिष्टशब्दानां च एकव्यङ्ग्यव्यञ्जने वाक्यत्वनियमात् । **तदन्ये** इति—तदन्ये व्यङ्ग्या पदेन वाक्येन च व्यङ्ग्या इत्यर्थः । **तत्रेति**—तत्र ध्वनिपदं व्यङ्ग्यपरम् । पदगतः पदमात्रव्यङ्ग्यः ।

(लो, छ) शब्दपरिवृत्तिसहत्वासहत्वाभ्यामेव हि सर्वत्र शब्दार्थशक्तिमूलत्वस्य व्यवस्थापनम् । अत एव चास्य भेदस्य बहुपदानिष्टत्वेनैव सम्भवाभिप्रायेण ग्रन्थकृत्पदनिष्टत्वं नास्तीति वक्ष्यति । तथैव च प्राचीनैरुक्तम् । "पथिश्च ण एत्थ" इत्यादौ परिवृत्त्यसहे एव सप्तम्यपोढरशब्दयोरेव व्यञ्जकत्वमिति शब्दशक्तिमूलत्वम् । व्यञ्जकत्वस्य बहुनिष्टत्वेऽपि पदसमुदयनिष्टत्वाभिप्रायेण वाक्यनिष्टत्वम् ।

× वसन्तपक्षे-हिमात् शिशिरात् मुक्तेन चन्द्रेण सहितः । पद्मेन सह वर्तमानः सपद्मकः । द्विजान् कोकिलादीन् पक्षिणः मदयन् आनन्दयन् जनितमीनकेतनः विहितकामावेशः । प्रसादिता निर्मलीकृता सुरा मद्यं येन प्रसादितसुरः । स माधवः वसन्तः प्रमदाजनस्य स्त्रीजनस्य महोत्सवं अभवत् ।

1 उत्प्रेक्षालंकारः (ट. ट. पु) 2 'क्रमव्यङ्ग्यवाच्यत्वेन च' (ट. ध. पु.)

धन्य स एव तरुणो नयने तस्यैव नयने च ।
युवजनमोहनविद्या भवितेय यस्य सम्मुखे सुमुखी ॥
अत्र द्वितीयनयनशब्दो भाग्यवत्तादिगुणविशिष्टनयनपर । (ज)
वाक्यगतो यथा—

त्वामस्मि वच्मि विदुषा [1]समुदायोऽत्र तिष्ठति ।
आत्मीया मतिमादाय[2] स्थितिमत्र विधेहि तत् ॥

अत्र प्रतिपाद्यस्य सम्मुखीनत्वादेव लब्धे[3] प्रतिपाद्यत्वे त्वामिति पुनर्वचनमन्यव्यावृत्तिविशिष्ट स्वदर्थं लक्षयति । एव वच्मीत्यनेनैव कर्त्तरि लब्धे अस्मीति पुनर्वचनम्[4] । तथा विदुषा समुदाय इत्यादिवचनेनैव वक्तु[5] प्रतिपादने सिद्धे पुन वच्मीति वचनम् उपदिशामि इति वचन विशेषरूपमर्थं लक्षयति[6] । एतानि च लक्षितानि स्वातिशय व्यञ्जयन्ति । एतेन मम वचन तवात्यन्त हित तदवश्यमेतत्कर्त्तव्यमित्याभिप्राय । (झ)

तदेवमय वाक्यगतोऽर्थान्तरसक्रमितवाच्यो ध्वनि. । अत्यन्ततिरस्कृत वाच्य पदगतो यथा—नि श्वासान्ध इवेत्यादि । वाक्यगतो यथा—उपकृतं बहु तत्रेत्यादि । अन्येषा वाक्यगतत्वे उदाहृतम् । पदगतत्वे[7] यथा—

लावण्य तदसौ कान्तिमद्रूप स यच्च क्रम ।

(वि, ज) द्वितीयनयनशब्द इति—अत्र लक्ष्यार्थस्य अतिशयो व्यङ्ग्य इति वक्ष्यति ।

(वि, झ) त्वामस्मीत्यत्र त्वदायनेकलाक्षणिकपदाना लाक्षणिकत्व दर्शयति—अत्रेति । अन्यव्यावृत्तिविशिष्टमिति—तथा च त्वामेव अहमेव इत्यर्थ । एतानि चेति—एतानि लक्ष्यार्थ रूपाणि वस्तूनीत्यर्थ । स्वातिशयमिति—स्वोपक्षयाऽधिकार्थ एव स्वातिशय । तमधिकमर्थमाह—एतेनेति । अभिप्रायो अभिप्रायस्यव्यङ्ग्यार्थ ।

(वि, ञ) अगलक्ष्यक्रम पदगत व्यङ्ग्यमुदाहरति—लावण्यमिति ।

(लो, ए) लावण्यमिति—सर्वावयवगत कोऽप्यतिशय लावण्यम् ।

---

1 'गमाय' (क ङ) 2 आस्थाय' (क ङ)
3 'लब्धे' (ट ङ) 4 अन्यव्यावृत्तिविशिष्ट मदर्थं लक्षयति' इत्यधिक पाठ (ब भ. ङ) 5 'कर्तुं' (ज झ ङ)
6 'क्षयति' (भ. ङ) भाषयति (च ङ) 7 'गतत्व' (क. ङ)

तदा 'सुधास्पदमभूदधुना तु ज्वरो[1]' महान् ॥ (ए)

अत्र लावण्यादीनां [3]तादृगनुभवैकगोचरताव्यञ्जकानां तदादिशब्दानामेव प्राधान्यम् । अन्येषां तु तदुपकारित्वमेवेति[4] तन्मूल एव ध्वनिव्यपदेशः । (ए)

तदुक्तं ध्वनिकृता—

एकावयवसंस्थेन भूषणेनेव कामिनी ।
पदद्योत्येन सुकवेर्ध्वनिना भाति भारती ॥ ७

एवं भावादिष्वप्यूह्यम् (ट)

मुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः ।

अत्रेति—लावण्यादीना यदनुभवैकगोचरत्वं तत्तद् व्यञ्जकानामित्यर्थः । व्यञ्जकानामित्यत्र ज्ञापकानामित्यर्थः । तेन अनुभवैकगोचरत्वं तदादिपदाना वाच्यमेव बोध्यं, न तु व्यङ्ग्यम् किन्तु विप्रलम्भ एव व्यङ्ग्यः । तदाद्येनेकपदाना चात्र न वाक्यत्वं विभिन्नवाक्यस्थत्वेन परस्परानन्वयात् । न च तदा सुधास्पदमभूदित्यत्र सर्वेषां तदादिपदार्थानामन्वयात् वाक्यत्वमेवेति वाच्यम् । तल्लावण्यामित्यनेनैव विप्रलम्भव्यञ्जनेन तदा सुधास्पदमित्यन्वयापेक्षा विनैव व्यञ्जकत्वेन पदत्वेनैव व्यञ्जकत्वात् । महावाक्यव्यङ्ग्यत्वेऽपि पदगतव्यङ्ग्यमूलो व्यवहारः ।

(वि, ट) तन्मुखेनैव काव्यशोभाप्रतीतिरित्यत्र संवादं दर्शयति—तदुक्तमिति । ध्वनिना व्यङ्ग्येन भारती वाक्यरूपा । पदव्यङ्ग्ये रसादिरूपेऽसंलक्ष्यक्रमे उदाहृते भावादिरूपाऽसंलक्ष्यक्रमस्यापि पदव्यङ्ग्यत्वमूह्यमित्याह ।

(वि, ट) शब्दशक्त्युद्भवं वस्तुपदव्यङ्ग्यमाह—भुक्तिमुक्तिकृदिति—उपनायकागमनं दृष्ट्वा सन्तोषं व्यञ्जयन्त्या उक्तिरियम् । वाच्यार्थे सदागमः सद्भावान्तिरुज्ज्वलता च पृथक् पृथगवयवाश्रिता । ज्वरः पीडादायकः । लावण्यादीनाम् इत्यतः पूर्वं प्रतीतेर्विभावादिसामग्रीराह्यत्वेऽपि पूरणीयम् ।

(लो, ऐ) भुक्तीति । भुक्तिर्भोग , सम्भोगश्च। मुक्तिः निःश्रेयसम् इतरव्यापारव्यागश्च परित्यागगुप्त च । सदागमः परमार्थस्वरूपं सङ्केतस्थानं च । सदागमः सद्भावं गतः पुरुषस्यागमनं च ।

---

७ यद्यपि वाक्यव्यङ्ग्य एव सर्वो ध्वनिस्तथाप्यन्वयव्यतिरेकाभ्या यत्र पदे वाक्ये वा वाक्यत्वमधिकमुपलभ्यते तस्यैव व्यञ्जकत्वं व्यवस्थाप्यते । एकावयवसंस्थेन हस्तादौ एकत्र स्थितेन भूषणेन अलङ्कारेण कामिनीव पदद्योत्येन पदप्रकाश्येन ध्वनिना सुकवेः भारती वाक्य भाति शोभते।

1 'सुधास्यन्द' (ङ. ग. पु.)
2 'ज्वरोपगम्' (च. ज. पु.) 3 'तादृगनुभवैकगोचर' (ठ. पु.)
4 'व्यङ्ग्यकत्वमेवेति' (ट. पु)

कस्य नानन्दनिस्यन्दं[1] विदधाति सदागमः (ठ, ऐ)

अत्र सदागमशब्दाः सन्निहितमुपनायकं प्रति सच्छास्त्रार्थमभिधाय सतः पुरुषस्यागमः इति वस्तु व्यनक्ति । (ड)

ननु सदागमः सदागम इवेति [2]उपमाध्वनिरिति चेन्न सदागमशब्दयोरुपमानोपमेयभावाविवक्षणाद् रहस्यसंगोपनार्थमेव हि व्यर्थपदप्रतिपादनं[3] [4]प्रकरणादिपर्य्यालोचनेन च सच्छास्त्राभिधानस्यासम्बन्धत्वात् । (ढ) *

अनन्यसाधारणधीर्धृताखिलवसुन्धरः ।
राजते कोऽपि जगति स राजा पुरुषोत्तमः ॥ †

स्वम् । भुक्तिमुक्ती स्वर्गभोगमोक्षौ । एकान्त सम्यगादेशनं तत्त्वज्ञानोपदेश. । व्यङ्ग्यार्थे तु सदागमः सत्पुरुषोपनायकागम. । भुक्तिमुक्ती सुरतोपभोगगृहकर्मत्यागौ । एकान्तस्य समादेशनं रहस्योपदेशः ।

(वि, ड) अत्र श्लिष्टसदागमपदशक्तिमूलकव्यङ्ग्यत्वमेव अन्यव्यङ्ग्यपदानामिति तत्पदस्यैव व्यञ्जकत्वं तदाह-अत्रेति—सच्छास्त्रमापाततः प्रकरणागम्यं सामान्यतोऽभिधाय उपनायकं प्रति सत्पुरुषागमं व्यनक्ति इत्यर्थ. ।

(वि, ढ) सत्पुरुषागमसच्छास्त्रयोरुपमाध्वनित्वमाशङ्कते-नन्विति । समाधत्ते-नेति । उपमाऽविवक्षाबीजमाह-रहस्येति । ननु रलस्य संगोपनमुपमा चास्त्वित्यत्र आह—प्रकरणादीति । आदिपदात् तात्पर्य्यपरिग्रह. । सच्छास्त्रमापाततः एव प्राकरणिकम् । सत्पुरुषागम एव प्रतिसन्धानेन प्राकरणिक. । प्रतिसन्धानेन सत्पुरुषागमस्यैव आस्वाद्यत्वेन अप्राकरणिकसच्छास्त्रस्य प्रकृतागम्बन्धत्वात्; तस्या आस्वाद्यत्वाभावात् तदुपमाया अपि अनास्वाद्यत्वेन तावता सम्बन्धीकरणस्यापि अनुपयोगात् ।

(वि, ण) शब्दशक्तिमूलमलङ्कारं पदद्योत्यमाह—अनन्येति । धृता पालिता,

---

* यत्र हि शब्दशक्तिमद्भिन्नोपस्थापितो द्वितीयोऽर्थोऽप्रकृततयाऽनुपपद्यमान प्रकृतस्योपमानत्वेन स्वात्मानं व्यवस्थापयति तत्रैवोपमाध्वनेर्विषय । अत्र तु व्यङ्ग्यार्थस्य विवक्षिततया प्रकृतत्वम् । नच तर्हि प्रकृततया वाच्य स एवास्तु द्वितीयोऽर्थ इति वाच्यम् । रहस्यगोपनार्थमप्रकृतस्यैव मुख्यत. प्रतिपाद्यमानत्वात् । उक्तं च "व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्तु" । अत्र श्लिष्टस्य सदागमपदस्यैव व्यञ्जकत्वे प्राधान्यम्—अन्यपदानां तत्सहचारेण व्यञ्जकत्वात् ।

† अनन्यसाधारणधीर्यस्य स. । धृता परिपालिता कूर्मरूपेण पृष्ठे स्थापिता च अखिला वसुन्धरा येन स । पुरुषेषु उत्तम. श्रेष्ठ. राजा नारायणश्च राजते ।

1 सन्दोहं (स. पु.) 2 'न चैवमुपमाध्वनि.' (इति क. ग. पु.)
3 'व्यर्थपदोपादानं' (स. पु. 4 प्रकरणादिपदपर्या— (ग घ. पु.)

अत्र पुरुषश्रेष्ठ[1] पुरुषोत्तम इत्येतावदुपमाध्वनिः । अनयोः शब्दशक्तिमूलौ संलक्ष्यक्रमभेदौ । (ण)

सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितं
यातोऽस्ताचलमौलिमम्बरमणिर्विस्रब्धमत्रांगतिः ।
आश्चर्यं तव सौकुमार्य्यमभितः क्लान्ताऽसि येनाधुना
नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति[2] तेनासितुम् ॥ (त,थो)

अत्र स्वतःसम्भविना वस्तुना कृतपुरुषपरिचया स्नाताऽसीति वस्तु व्यज्यते । तच्चाधुना क्लान्ताऽसि न तु पूर्वं कदाचिदपि तवैवंविध. क्रमो दृष्ट इति बोधयतोऽधुनापदस्यैवेतरपदार्थोत्कर्षाऽधुनापदस्यैव पदान्तरापेक्षया वैशिष्ट्यम् । ❀

तदभ्यासिमहादु सविलीनाशेषपातका ।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ।

पक्षे कूर्माऽनन्तमूर्त्या ऊटा । अस्य पदस्यापि शक्त्या व्यञ्जकत्वेऽपि न वाक्यव्यञ्जकत्वं पुरुषोत्तमपदश्लेषाधीनप्रतीतिस्वादस्य श्लिष्टार्थस्य । उपमाध्वनिरिति-अस्य पुरुषोत्तमपदस्य सङ्गोपनादिप्रयोजनकत्वाऽभावेन उपमायामेव तात्पर्य्यात्संलक्ष्यक्रमभेदौ वस्त्वलङ्कारौ ।

(वि, त) स्वतःसम्भविवस्तुव्यञ्जकं वस्तुपदद्योत्यमाह—सायमिति । स्नानवर्त्मनि उपनायकोपभुक्त स्नातागना क्लान्ता सखी प्रति सख्या उपहासोक्तिरियम् । अधुना तव सौकुमार्य्यमाश्चर्य्यम् । येन सौकुमार्य्येण अभितः सर्वाङ्गं क्लान्ताऽसि । ननु कर्मनि आगतान् ईदृश· क्रम इत्यत्राह—सायमिति । मलयजेन चन्दनेन इति । एतद्द्वयमपि क्रमनिवारकम् । ननु स्नानादुत्तरं मुहूर्त्तद्वयागमनायंसले स्नानसम्बन्धात् तत एव क्रम इत्यत्राह—यातोऽस्तेति । अम्बरमणिः सूर्य्यः । द्रुतगमनात् क्रममपि निरस्यति—विस्रब्धमिति—विस्रब्धं यथेष्टम्, आगतिक्रियाविशेषणमिदम् । विश्रब्धमन्येति क्वचित् पाठ. । ननु क्रमः कथं जात[3] इत्यत्राह—येनाऽधुना इति । येन क्रमेण तव नेत्रद्वन्द्वम् अमीलनव्यतिकरं मीलनसम्बन्धरहितं यथा स्यात्तथा आगन्तुं स्थातुं न शक्नोति ।

(वि, थ) स्वत सम्भविवस्तुव्यञ्जकमलङ्कारं पदव्यञ्जकमाह—तदभ्यासिमहादि-

---

(लो, ए) सायमिति—न विद्यते मीलनेन व्यतिकर सम्पर्को यत्र तत् अमीलनव्यतिकरं यथा स्यात्तथाऽऽगन्तुं स्थातुमित्यर्थः ।

❀ क्रमस्य सौकुमार्यजन्यत्वे समयान्तरेऽप्येवं स्यात् । अत समयान्तरव्यावर्त्तकतदधुनापदात् सम्भोगार्थीन एव क्रम. इति भाव. । अत. अधुनापदस्य व्यञ्जकत्वम् ।

1 'पुरुषोत्तम.' (इति क. पु.) 2 'शक्नोऽसि' (ग. घ. पु) 3 'जातः' (ग. घ. पु)

चिन्तयन्ती जगत्सूति[1] [2]परब्रह्मस्वरूपिणम्।
निरुच्छ्वासतया मुक्तिं गताऽन्या गोपकन्यका ॥ (थ, औ) *

अत्राशेषचयपदप्रभावादनेकजन्मसहस्र[3]भोग्यदुष्कृतसुकृतफलराशितादात्म्याध्यवसिततया भगवद्विरहदुःखचिन्ताह्लादयोः प्रत्यायनमित्यतिशयोक्तिद्वैयप्रतीतिरशेषचयपदद्वयबोध्या। अत्र च व्यञ्जकस्य 'कविप्रौढोक्तिमन्तरेणापि सम्भवात्स्वतः सम्भविता। (द) †

श्लोकद्वय पूर्ववर्णितव्यवसायाद् अन्या गोपकन्यका निरुच्छ्वासतया निरुद्धप्राणवायुतया मुक्तिं गता। मुक्तिहेतुं श्रीकृष्णचिन्तनमाह—**चिन्तयन्ती**ति। जगत्सूतिं जगज्जनकं श्रीकृष्णं तथापि समस्तपापपुण्यक्षये एव मुक्तिरिति तदुपपादयति—**तदप्राप्ती**ति—तच्चिन्तेति च।

(वि, द) अत्रेति—तदप्राप्तिदुःखस्य तच्चिन्ताह्लादस्य चोपभोगेन तज्जनकपापपुण्ययोरेव क्षय सम्भवति, नतु समस्तपापपुण्ययोः। अत समस्तपापपुण्यनाशकसमस्ततत्फलदुःखसुखेष्वनुक्तेषु उक्तदुःखसुखयोरारोपः। अयमेव चात्रातिशयोक्त्यलङ्कारः। अतोऽत्र तदलङ्कारद्वयम्। अनुक्ते उपमेये उक्तोपमानारोपस्य तत्त्वात्। यथा कमलमनम्भसीत्यत्र अनुक्त उपमेये मुखे उपमान कमलारोपः। प्रकृतानीत्यत्र उपमेयानि अनुक्तानि उक्तमुखदुःख चाऽप्रकृतत्वात् उप-

---

(लो, औ) तदप्राप्तीति—मुक्तिं गुरुयन्त्रणाया मोक्षम्। न तस्य प्राणा उत्क्रामन्ति तत्रैव समवलीयन्ते इति श्रुते। निरुच्छ्वासतायां मोक्षेऽपि सम्बन्धः।

---

* अन्या काचिद् गोपकन्यका निरुच्छ्वासतया निरुद्धप्राणवायुतया परब्रह्मस्वरूपिणं सच्चिदानन्दरूपिणं जगत्सूतिं जगतः सूतिरुत्पत्तिर्यस्मात् तादृशं श्रीकृष्णं चिन्तयन्ती भावयन्ती सती मुक्तिं गता। (निरुच्छ्वासतया नाऽस्या प्राणाः समुत्क्रामन्ति। अत्रैव समवलीयन्ते इति श्रुते मोक्षकाले निरुच्छ्वासता। निरुच्छ्वासतया प्राणायामेन इति केचित् निरुच्छ्वासतया प्राणोत्क्रमणं विना इति केचित्) कीदृशी—**तदप्राप्ती**ति—तस्य श्रीकृष्णस्य अप्राप्त्या वियोगेन यत् महद् दुःखं तेन विलीनानि नष्टानि अशेषाणि समग्राणि पातकानि यस्यास्तथाभूता। पुनः कीदृशी—**तच्चिन्ते**ति—तस्य श्रीकृष्णस्य चिन्तया भावनया यद् विपुलं महान् आनन्दः, तेन क्षीणं नष्टं पुण्यस्य चयः समूहो यस्यास्तथाभूता 'प्रारब्धकर्म्मणा भोगादेव क्षय इति न्यायात्

† अत्र जन्मसहस्रैरुपभोग्यानि सुकृतदुष्कृतयोः फलानि कृष्णस्य वियोगदुःखेन चिन्ताह्लादेन च कयाऽपि अनुभूतानि। एव दुष्कृतसुकृतराशितादात्म्यन अध्यवसिता भगवद्वियोगदुःखचिन्ताह्लादौ प्रतीयेते इति अतिशयोक्तिद्वयम् अशेषचयपदाभ्या

1 'जगद्योनिं (घ च पु 2 परं (क ख पु)
3 सहस्रेति (ग घ पु) नास्ति। 4 कवाति नास्ति (ख पु)

पश्यन्त्यसंख्यपथगा त्वद्दानजलवाहिनीम् ।
देव ! त्रिपथगात्मान गोपयत्युग्रमूर्द्धनि ॥

इदं मम । अत्र पश्यन्तीति कविप्रौढोक्तिसिद्धेन काव्यलिङ्गालङ्कारेण न केऽप्यन्ये दातारस्तव सदृशा इति व्यतिरेकालङ्कारोऽसंख्यपदद्योत्यः[1] । (ध)

एवमन्येष्वप्यर्थशक्तिमूलसलक्ष्यक्रमभेदेषूदाहार्य्यम् । तदेवं ध्वने[2]र्मूलेष्वष्टादशसु भेदेषु मध्ये शब्दार्थशक्त्युत्थो व्यङ्ग्यो वाक्यमात्रे भवत्येकः । अन्ये पुन ससदश वाक्ये पदे चेति चतुस्त्रिंशदिति पञ्चत्रिंशद्भेदा ।

प्रबन्धेऽपि मतो धीरैरर्थशक्त्युद्भवो ध्वनिः ॥ १३ ॥

[3]प्रबन्धो महावाक्यम् । (न)

अनन्तरोद्दिष्टद्वादशभेदोऽर्थशक्त्युत्थ । यथा महाभारते गृध्रगोमायुसंवादे-

---

मानानि अतस्तदारोपादतिशयोक्तिद्वयम् । उपमेयस्यानुक्तत्वेन चातिशयोक्त्यलङ्कारो व्यङ्ग्य एव । तद्व्यव्यपदौ चात्रापचयशब्दौ पापपुण्ययो, अपचयत्वाभ्यां नाशकयोर्दुःखसुखयोरपचयत्वव्यञ्जनात् । अत्र अपचयपदयोरेकवाक्यस्थत्वेऽपि द्वाभ्यां व्यङ्ग्यद्वयव्यञ्जनानैकवाक्यत्वेन व्यञ्जकत्वमत पदत्वेनैव व्यञ्जकत्वम् ।

(वि, ध) गतेषार्थमलङ्कारस्य वस्त्वलङ्कारव्यञ्जनामुपेक्ष्य प्रौढोक्तिसिद्धालङ्कारस्य व्यङ्ग्यमलङ्कारपदद्योत्यमाह—पश्यन्तीति । त्वद्दानजलवाहिन्या नद्या असंख्यपथगामित्वदर्शनात् पथत्रयगामिन्या गङ्गाया लज्जया शिवशिरसि आत्मगोपनम् । काव्यलिङ्गेनेति—दर्शनस्य आत्मगोपनहेतुत्वात् हेत्वलङ्कारेण इत्यर्थ ।

(वि, न) महावाक्यमिति—कुलकरूपमहावाक्यमित्यर्थ । तदग्राह्यिनहादु खेत्यादिश्लोकद्वयस्य महावाक्यत्वेऽपि तत्र व्यञ्जकपदद्वयसत्त्वात् तद्व्यङ्ग्यस्यैवोदाहरणत्वेन तदर्शितम् ।

द्योत्यते । बहुजन्मार्जितानि सर्वाणि पापानि पुण्यानि च मुहूर्तव्यापिना तु रागुग्भोगेन क्षपयितु न शक्यते । अतो भवद्वियोगदु खचिन्ताह्लादयोरनेकजन्मभोग्यदुष्कृतसुकृतनादाम्येनाऽप्यवसाय विना अशेषपापपुण्यक्षयो नोपपद्यते । तेनायमर्थ—भगवदग्राप्तिर्महादु खमेव जन्मगहस्यभोग्यदुष्कृतफलम् । तदुपभोगेन विलीनानि अशेषाणि पातकानि यस्या । तथा तच्चिन्ताह्लाद एव जन्मगहस्यसुकृतफलम् । तद्भोगेन क्षीण पुण्यचय यस्याः सा ।

1 'व्यङ्ग्य' (क ग घ ङ) 2 पूर्वोक्तानि (च छ.) 3 'प्रबन्धो महावाक्ये' (इति ग. घ. ङ. छ)

अल स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसकुले ।
कङ्कालबहुले[1] घोरे सर्वप्राणिभयङ्करे ॥
न चेह जीवित कश्चित्कालधर्ममुपागत ।
प्रियो वा यदि वा द्वेष्य प्राणिना गतिरीदृशी ॥ (अ) *

इति [2]दिवसे शक्रस्य[3] गृध्रस्य श्मशाने मृत बालमुपादाय तिष्ठता दिवमे[4] त परित्यज्य गमनमिष्टम् । (प)

आदित्योऽय स्थितो मूढा [1]स्नेह कुरुत साम्प्रतम् ।
बहुविघ्नो मुहूर्त्तोऽय जीवेदपि कदाचन ॥

(वि, प) अलं स्थित्वेति–श्मशाने मृतबालकम् अन्यजनस्तद्बन्धून् प्रति गृध्रवाक्यमिद श्लोकद्वयरूप महावाक्यम् । **दिवसे शक्रस्य** इति–दिवसे एव भक्षणासमर्थस्येत्यर्थ । **गमनमिष्टमिति**–वक्तुर्गृध्रस्य इष्ट मृतबन्धूना गमनमित्यर्थ । तथा च बालक त्यक्त्वा यूय गच्छध्वमिति वस्तु स्वत सम्भविवस्तुन उक्तप्रबन्धार्थस्य व्यङ्ग्यमित्यर्थ ।

(वि, फ) आदित्योऽयम् इत्यादिश्लोकद्वयरूप महावाक्य गोमायोरुक्ति । **बहुविघ्न** इति–तथा च विघ्नशून्यमुहूर्त्तान्तरे जीवनसम्भावना दर्शिता । एव कनक-

---

(लो, अ) **अलमिति**–कालधर्मो मरणम् । अस्य च श्लोकस्य पद्यान्तर-सचिवस्यैव महावाक्यतेति स्पष्टार्थम् । महावाक्यान्तरमुदाहरति ।

(लो, आ) **आदित्य** इति–स्नेह जीवनोपायानुसरणरीतिम् । मुहूर्त्त सन्ध्या-काल, बहुविघ्न भूतावेशसम्भावनादायित्वात् । अत स्वत सम्भविना वस्तुना

---

* **अलमिति**–मृत बालक सन्ध्यासमये श्मशाने समानीत दृष्ट्वा दिवसे एव मृतस्य मांसभक्षणक्षमस्य रात्रौ अन्धत्वात् असमर्थस्य गृध्रस्य तद्बन्धुविसर्जनपर-मिद श्लोकद्वयम् । हे जना ! अस्मिन् श्मशाने स्थित्वा अलम् । कीदृशे श्मशाने गृध्रै र्गोमायुभि शृगालैश्च सकुले व्याप्ते, तथा कङ्काला अस्थीनि बहुला यत्र एवभूते अत एव घोरे दारुणे, तथा सर्वेषा प्राणिना भयङ्करे नामश्रवणके इत्यर्थ । एव निष्प्रयोजना सम्भावितानिष्ठा च एवविधस्थले भवता स्थितिरनुचिता इति भाव । ननु बालकस्य जीवन सम्भाव्यते तत्राह–**न चेहेति**–इह ससारे कालधर्म्म मृत्युम् उपागत प्राप्त प्रिय मित्र द्वेष्य शत्रुर्वा यदि अथ वा कश्चित् उदासीनोऽपि न जीवित अद्य यावत् इति शेष । तथा च मृतस्य पुनर्जीवनमसम्भावितम् इत्यर्थ । प्राणिना ससारिणाम् ईदृशी मरणानन्तरम् अपरा वृत्तिरूपा गति स्वभाव । अत खेदो न कार्य्य ।

1 'बहले' (ख पु) 2 दिवा (ग पु)
3 प्रभवत (ग पु) 4 'दिवसे' (इति क पु नास्ति)

अमु कनकवर्णाभं बालमप्राप्तयौवन
गृध्रवाक्यात् कथं बाला[1] त्यजध्वमविशङ्किता ॥ *

इति निशि समर्थस्य गोमायोर्दिवसे परित्यागोऽनभिलषित इति वाक्य-समूहेन द्योत्यते। अत्र स्वत सम्भवी व्यञ्जक । एवमन्येष्वेकादशभेदेषूदाहार्य्यम्[2]। (फ,आ)

वर्णेन रूपविपर्ययाभावादप्राप्तयौवनत्वेन च मृत्युहेतुयौवनाधानाऽकार्य्याभावा जीवनसम्भावना दर्शिता। **बाला** इति—शिशुबुद्धय इत्यर्थ । मूढा इति क्वचित् पाठ । **नाभिलषित** इति । तथा च अत्रापि स्वत सम्भविना एतत्प्रबन्धार्थेन बालकपरित्यागानभिलाषरूप वस्तु व्यज्यते इत्यर्थ। **एवमन्येष्विति**। स्वत सम्भवि वस्तुव्यङ्ग्यालङ्कारयेकादशभेदेष्वित्यर्थ ।

वस्तु व्यज्यते। **उदाहार्य्यमिति**—तथा च रघुवशे "समयुज्यत भूपतिर्युवा" इत्यादिना "उभया सिद्धिमुभावपतु" इत्यन्ते तुल्ययोगितया काव्यलिङ्गेन वा रघुराघवयोर्व्यतिरेकालङ्कार प्रतीयते। तथा कुमारसम्भवे हिमगिरिवर्णनप्रौढोक्त्या प्रौढोक्तिसिद्धालङ्कारसृष्टे हिमगिरेरितरोत्कर्ष प्रतीयते । अर्थशक्तिभूरित्युपलक्षणम्। शब्दशक्त्युद्भवोऽपि क्वचित् प्रबन्धव्यङ्ग्यो दृश्यते। यथा माघकाव्ये शिशुपालदूतोक्तौ सन्ध्या काव्ये वस्तुमात्ररूपो विग्रह उपमाध्वनिरपि तथाविध सम्भाव्यते।

---

* **आदित्योऽयमिति**—निशि एव मृतमासभक्षणक्षमस्य दिवान्धस्य शृगालस्य मृतबालकबन्धूना श्मशाने रात्रि यावत् अवस्थानार्थं वचनमिदम् । हे बाला अयम् आदित्य स्थित । अत रात्रिचरेभ्यो भयमधुना नास्तीति भाव । अत यूय साम्प्रतम् अधुना स्नेह (मृते बालके) कुरुत। मृतस्य जीवनासम्भवात् निष्फलमेव स्नानम्, अत आह—**बहुविघ्न** इति। अय मुहूर्त्त सन्ध्यात्मक बहुविघ्न भूतावेशादिरूपविघ्नबहुल । कदाचित् अपि बाल (भूतावेशापगमात् पर) जीवेत्[1] अपि सम्भावनाया यूयम् अविशङ्किता लोकापवादशङ्कारहिता गृध्रस्य वाक्यात् बाला विचाररहिता सन्त अमु बाल कथ त्यजध्वम् (आत्मनेपदमार्षम्) कीदृश बाल कनकवर्णवत् आभा कान्तियस्य तादृश तथा न प्राप्त यौवन येन तथाभूताम्। अत्र बालत्वेन मृत्युरालाभाव । कनकेत्यादिना मृत्युनिर्हेतुवर्ण्याद्यभाव । अप्राप्तेत्यनेन परदारोपगमनादिपापराहित्येन आयु सत्त्व सूच्यते।

1 मूढा इति पाठान्तरम्।

2 'एष वाक्यार्थव्यङ्ग्यत्वे उदाहृतम्। लक्ष्यार्थस्य यथा—'नि शेषच्युतचन्दनम्' इत्यादि । व्यङ्ग्यार्थस्य यथा—' उष्ण किल ' इत्यादि । अनयोः स्वत सम्भविनोर्लक्ष्यव्यङ्ग्ययोरर्थयो, एवमन्येषु एकादशभेदेषूदाहार्यम्।" इत्यधिक पाठ (क ख. पु)

पदांशवर्णरचनाप्रबन्धेष्वस्फुटक्रम. ॥ १४ ॥

असलक्ष्यक्रमव्यङ्ग्यो ध्वनिस्तत्र पदांशे[1] प्रकृतिप्रत्ययोपसर्गनिपातादि-भेदादनेकविधः। (व)

यथा—

चलापाङ्गा दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।
करं व्याधुन्वन्त्या[2] पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर[1] हतास्त्वं खलु कृती ॥

अत्र "हता" इति न पुनर्दुःख प्राप्नवन्त इति हन्प्रकृते (भ, इ)

मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् ।
मुखमंसविवर्ति पक्ष्मलाक्ष्या कथमप्युन्नमितं न चुम्बितं तु ॥

अत्र "तु" इति निपातस्यानुतापव्यञ्जकत्वम् । (म)

(वि, व) **पदांश** इति—असंलक्ष्यक्रमस्य अक्रमव्यङ्ग्यध्वनिरयं इत्याह—**असंलक्ष्येति**। अत्र ध्वनिपद काव्यपरम् । व्यङ्ग्यपरत्वे व्यङ्ग्यो व्यङ्ग्य इत्यन्वया नुपपत्ते । पदांशादिव्यङ्ग्य इत्यर्थ । तत्र पदांशोत्थाना बहुविधत्वमाह—**तत्रेति**।

(वि, भ) **चलापाङ्गामिति**। शकुन्तला व्याकुलयन्त भ्रमर प्रति दुष्यन्त स्याक्तिरियम्। **तत्त्वान्वेषात्** इति। किं ब्राह्मणस्य औरसकन्यात्वेन मत्परिणया-योग्या, किं वा तस्य पुष्टकन्यात्वेन मत्परिणययोग्या इत्येव तत्त्वस्यान्वेषणादित्यर्थ । **हन्प्रकृतेरिति**। हन्धातुरूपप्रकृतेरित्यर्थ । अत्र मृत्युकथनात् विप्रलम्भातिशयो व्यङ्ग्य ।

(वि, म) **मुहुरङ्गुलीति**—शकुन्तला प्राप्य तत्सम्भोगविघ्ने सति अनु तप्यमानस्य दुष्यन्तस्य उक्तिरियम् । **असंविवर्त्तीति** भुजमूले परावर्त्तमानम् । अङ्गुलि शकुन्तलाया । **अन्नेति**—नखा एव चुम्बनाभावलाभे तुशब्देन चुम्ब नस्य अत्यन्तव्यवच्छेदलाभात् विप्रलम्भानुतापातिशयो व्यङ्ग्य ।

(लो, इ) **पदांशे** इति—इह यद्यपि प्रकृत्यादे केवलस्य न व्यञ्जकत्वम्, तथापि वाचकसमुदायप्रविष्टस्य रसादिषु तदतिशयाधायकत्व सहृदयानुभवसिद्धम्। **हता** इत्यादि—अत्र हननप्रतीतिरनन्तर निर्वेदव्यङ्ग्यत्वमिति शेष । तथा ह्यत्र हता इत्यस्य स्थाने क्तप्रत्यय स्थापयित्वा हन स्थाने प्रकृत्यन्तरनिवेशने न तथा प्रतीति ।

---

1 'पदांश' (ख पु) 'पदांशप्रकृति' (क पु)
2 'व्याधुन्वन्त्या' इति (क पु)

"न्यक्कारो ह्ययमेव मे यदरय" इत्यादौ "अरय" इति बहुवचनस्य, "तापस" इत्येकवचनस्य, "अत्रैव" इति सर्वनाम्न, "निहन्ति" इति "जीवति" इति च तिङ, "अहो" इत्यव्ययस्य, "ग्रामटिका" इति करूपतद्धितस्य, "विलुण्ठन" इति व्युपसर्गस्य, "भुजै" इति बहुवचनस्य व्यञ्जकत्वम् ॥ (य, ई)

(वि, य) न्यक्कार इति—अत्र व्यञ्जकत्वमित्यत्र विषादव्यञ्जकत्वमित्यर्थ । बहुवचनस्येति—मम एकोऽप्यरिर्नास्ति बहु तत्सत्त्वे सम्भाविते विषाद । एकवचनस्येति—बह्वीभि पिपीलिकाभिरप्यपसृत्यशक्यत्वे एकस्मिन्नपसारिणि तु अत्यन्त विषाद । अत्रैवेति इति—विप्रकृष्टमार्गवर्त्तिखरदूषणाद्यनेकराक्षसवधोऽपि सह्य । अत्रैव लङ्कायामित्यत्र विषाद । तिङ इति—मदनवधाने पूर्वं निहन्तु, वर्त्तमानमपि हननमित्यत्र विषाद । अहो इति—अदृश्यविपर्ययदर्शनात् विस्मयेन अत्यन्त-विषाद । करूपेति कप्रत्ययस्य तद्धितत्व पाणिनिमते । अल्पार्थकस्य तस्य विषादातिशयव्यञ्जकत्वम्। तथा हि—यदि लुण्ठने स्वर्गोऽपि स्वल्पग्राम कप्रत्ययवशात् चात्यन्त स्वल्प । तद्विलुण्ठनोन्द्युनभुजानामिदानी त्रिमपि कर्त्तुमक्षमत्वेन वैयर्थ्यमित्यन्त विषाद । व्युपसर्गस्येति विशेषलुण्ठनबोधनात् । भुजैरिति एकद्वित्रिभुजवैयर्थ्यं सह्य बहुना वैयर्थ्यादित्यत्यन्तविषाद ।

(लो, ई) न्यक्कार इत्यादौ उदाहरणद्वये पदाशव्यञ्जकत्वस्य प्रकृतत्वेऽपि प्रसङ्गात् पदव्यञ्जकत्वकथनम् । एवम्—

'रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्त प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययादिह परं देवो न जानाति तम् ।
वन्दी वैष यशांसि गायति मरुत् यस्यैकबाणाहत
श्रेणीभूतविशालसालविवरोत्कीर्णैः स्वरैः सप्तभिः ॥"

अत्रासाविति सर्वनाम्ना साक्षात् क्रियमाणा तदीयलोकोत्तरप्रसिद्धिर्व्यज्यते । भुवनेष्वित्यत्र बहुवचनेन गुणैरित्यत्र प्रकृत्या बहुवचनेन च । ते ते विशेषा अस्मद् भाग्यविपर्ययादित्यत्र च न तव न मम किन्त्वस्माकं सर्वेषामपि भाग्यविपर्यया दित्यस्मद्भाग्यविपर्ययादित्यत्र न स्वल्पभाग्यात् किन्तु भाग्यविपर्ययात् । एव हि पूर्वमस्माकं भाग्यमवस्थितम् । सम्प्रति तु अनवधानेन तस्य विपर्ययो जात इति प्रतिपादनादात्मना प्रतिपादनेन च ते ते सहृदयसंवेद्या अर्था प्रतीयन्ते । तथा रक्तोत्पलेत्यादौ हरे. पश्यत इत्यत्रानादरपक्ष्या किञ्च न केवल रसादिध्वनेरेव पदाशप्रकाशता, किन्तु वस्तुवलङ्कारयोरपि । अत्रालङ्कारस्य यथा—

'पथि पथि शुकचञ्चूचारुरागाङ्कुराणा
दिशि दिशि पवमानो वारुधा लाक्षकश्च ।

वर्त्तमानोपदेशस्य तत्तद्विषयव्यञ्जकत्व सहृदयसंवेद्यम् । (ल)

वर्णरचनयोरुदाहरिष्यते । प्रबन्धे यथा—महाभारते शान्त । रामायण करुण । मालतीमाधवरत्नावल्यादौ शृङ्गार । एवमन्यत्र । (व, ङ)

तदेवमेकपञ्चाशद्भेदास्तस्य ध्वनेर्मता ।
सङ्करेण निरूपेण संसृष्ट्या [1]चैकरूपया ।
वेदखाग्निशरा शुद्धैरिषुबाणाग्निसायका ॥ १५ ॥

एव दृढ इत्यर्थ । **वर्त्तमानोपदेशस्येति**—विप्रलम्भविशेष ।

(वि, च) **प्रबन्ध** इति । प्रबन्धोऽत्र ग्रन्थरूप । **शान्त** इति । स्वर्गारोहणरूपमहाभारतश्रोतु युधिष्ठिरशमज्ञातु शान्तरसो बोध्य इत्यर्थ । **रामायणे**ति । राम शोकज्ञातु रामायणश्रोतु करुणरस इत्यर्थ । **मालती**ति—माधववत्सराजरति ज्ञातुस्तन्नाटकश्रोतु शृङ्गार इत्यर्थ ।

(वि, श) **एकपञ्चाशदि**ति—पूर्वदर्शिता पञ्चत्रिंशत् कुलकरूपमहावाक्य व्यङ्ग्या द्वादशपदैकदेशादिव्यङ्ग्या चत्वार इत्येकपञ्चाशत् एषा परस्परयोजने सख्या दर्शयति—**सङ्करे**ति । अङ्गाङ्गित्वरूपेण एकाश्रयानुप्रवेशरूपेण सादृश्यरूपेण च त्रिविधेन सङ्करेण योजने तस्य निरूपना । किमयम् अय वेति सशयास्पदत्वरूप एव, तया परस्परानुग्राहकानुग्राह्यभावरूपो द्वितीय, तयोरेकव्यवहारेण व्यवहनरूपस्तृतीय । संसृष्टि तु एतत् त्रितयराहित्येनैकपद स्थिति । एभिर्या सख्या भवन्ति ता आह—**वेदे**ति—'अङ्काना वामत क्रम इति रीत्या वेदाश्चत्वार तद्वाम स्थ शून्यम् ।

(लो, ङ) **प्रबन्ध** इत्यादि । अयमाशय—न केवल वस्त्वलङ्कारध्वनिवदर्थान्तरमाह । वाक्यव्यङ्ग्येऽपि तत्समुदायभूत महाभारतादिप्रबन्धेऽपि अन्यथा काव्यत्वहानेरिति ।

(लो, ऊ) **तदेवमि**ति—एव व्यङ्ग्यस्य पदवाक्यगतत्वेन वृत्तौ पञ्चत्रिंशद्भेदा सख्याता । तदनन्तरमर्थशक्त्युद्भवस्य प्रबन्धगतत्वेन द्वादश । रसस्य पदांशवर्ण रचनाप्रबन्धगतत्वेन चत्वार इति मिलित्वा ध्वनिकाव्यस्य एकपञ्चाशद्भेदा शुद्धा इत्यर्थ । **सङ्करेणे**ति । सङ्करस्याङ्गाङ्गिभावैकव्यङ्ग्यानुप्रवेशसादृश्यभेदात् त्रिभि प्रकारै परस्परनिरपेक्षैकप्रकारया संसृष्ट्या चान्योऽन्यमिश्रणे शुद्धभेदानामेव पञ्चाशा सम्भूय वेदाश्चत्वार, स शून्यम् अग्नयस्त्रय, शरा पञ्च एव चाङ्कविन्यास यैर्लेम्भस्य गणितशास्त्रप्रसिद्धत्वात् पञ्चसहस्राणि शतत्रय चत्वारश्च भेदा "५३०४"। तथा हि प्रथमभेदस्य गजानायामिश्रणे चत्वारो भेदा त्रिकर्त्रीये पञ्चाशता प्रत्येक घानना त्रिमिश्रणे चत्वारो भेदा इति मिलित्वा चतुरधिक भेदशतद्वय द्वितीयस्य भेदशतद्वयमव । यदि प्रथमभेदस्य द्वितीयभेदेन सह

---

1 'चाप्येवमथा (ज ज ञ)

शुद्धैः शुद्धभेदैरेकपञ्चाशता योजनेनेत्यर्थः । (श, ऊ) ×
दिङ्मात्रं तूदाह्रियते—

अत्युन्नतस्तनयुगा तरलायताक्षी
द्वारि स्थिता तदुपयानमहोत्सवाय ।

तद्वामेऽभ्रयन्त्रय. । तद्वामे शरा पञ्च । नन्वेवमित्थमेकपञ्चाशत् चतुर्गुणेन चतुरधिकद्विशतमेव भवति । तत्कथमेतादृशी संख्येति चेन्न । एकस्यैव स्वजातीयेन एकेन स्वस्वजातीयैः पञ्चाशता च चतुर्गुणने एकस्यैव चतुरधिकद्विशतरूपत्वम् । एवं तदुत्तरस्य पूर्वेण सह चातुर्विध्यं पूर्वगणनाया प्रविष्टमित्यत. तस्य चातुर्विध्यस्य अगण्यत्वात् तस्य द्विशतरूपत्वम् । एवं तदुत्तरस्य पूर्वद्वान्या चतुश्चतुर्विधत्वस्य अगण्यत्वात् चतुर्न्यूनद्विशतरूपत्वम् । एवं रीत्या चरमस्य चतुरूपत्वमात्रं गुण्यमिति भवत्युक्तरूपा संख्या । काव्यप्रकाशे तु दर्शितक्रमेण क्रमशो ह्रासमविचार्य्य सर्वेषामेव चतुरधिकद्विशतरूपत्वेन एकपञ्चाशत एव तादृशसंख्यात्वेन 'वेदखाग्नि-वियच्चन्द्राः' इत्येव संख्या एव उत्सर्गसिद्धा दर्शिता । वस्तुतस्तु अत्यन्तविचारे वेदसाग्निशररूपा या संख्या ग्रन्थकृता दर्शिता साऽपि न सम्भवति । तथा हि एकपञ्चाशत एव उक्तचातुर्विध्यं न सम्भवति, पदैकदेशपदव्यङ्ग्ययो. पदवाक्यव्यङ्ग्ययोश्च शब्दशक्त्युत्थव्यङ्ग्ययोरर्थान्तरसंक्रमितवाच्याऽत्यन्ततिरस्कृतवाच्यव्यङ्ग्ययोश्च एकव्यङ्ग्यानुप्रवेशरूपसंकराऽसम्भवात् चातुर्विध्याभावात् । एषु शुद्धैरेकपञ्चाशन्मीलनेन संख्यामाह—**शुद्धैरिषुबाणेति** । व्याचष्टे-**शुद्धैरिति** । योजनेन संख्यातुं योजनेन ।

(चि, प) अत्युन्नतेति—प्रवासादागच्छन्तं पतिं द्वारि स्थित्वा दृष्टवती नायिका कस्मिंश्चिन्निवेदयत. कस्यचिदुक्तिरियम् । स्तनयुग पूर्णकुम्भौ आयतमक्षियुगं नवनी-

---

मिश्रयणं, द्वितीयभेदस्य प्रथमभेदेन सह तत्तदेवेति । द्वितीयभेदे प्रथमभेदापेक्षया चत्वारो भेदाः पातनीया । एवं तृतीयेऽष्टौ चतुर्थ द्वादश इति क्रमेणान्येषामपि स्वीयाद्यभेदापेक्षया सर्वेषा भेदचतुष्टयपातनम् । **शुद्धैरिति** । इषव पञ्चबाणा , पञ्च अभ्र अभ्रय सायका पञ्च एव पञ्चसहस्राणि शतत्रयं पञ्चाशत् पञ्च च, "५३५५"

× अत्र अग्रिमाग्रिमभेदस्य योजने एकैकभेदह्रासात् एवं प्रकारेण एवं योजन भवति ।

"एको राशिर्द्विधा स्थाप्य एकमेकाधिकं कुरु ।
समार्द्धेनासमो गुण्यः एतत् संकलितं लघु ॥"

इयुक्तदिशा द्विपञ्चाशदर्द्धेन षड्विंशत्या एकपञ्चाशतं गुणयेत् । तथा (५१×२) ÷२=२६ । ५१×२६=१३२६ सख्या जायन्ते । तेषु चतुर्भिर्गुणितेषु (१३२६=४=५३०४ पञ्चसहस्राणि चतुरधिकं शतत्रयं संकीर्णभेदा ।

सा पूर्णकुम्भनवनीरजतोरणस्रक्[1]-
सम्भारमङ्गलमयत्नकृतं विधत्ते ॥ (प) +

अत्र स्तनावेव पूर्णकुम्भौ, दृष्टय एव नवनीरजस्रज इति रूपकध्वनि-रसध्वन्योरेकाश्रयानुप्रवेशः सङ्करः ।

धिन्वन्त्यमूनि मदमूर्च्छदलिध्वनीनि
धूताध्वनीनहृदयानि मधोर्दिनानि ।

रजतोरणस्रक्सम्भारः । **रसध्वन्योरिति**-एतत् वाक्यव्यङ्ग्यत्वात् शृङ्गारस्य । ध्वनिपदमत्र व्यङ्ग्यरसपरम् । एकाश्रय एतत् वाक्यम् ।

(**वि, स**) ध्वन्योः संसृष्टिमाह-**धिन्वन्त्यमूनि** इति । अमूनि मधोर्दिनानि धिन्वन्ति लोकान् प्रीणयन्ति । कीदृशानि-मदेन मूर्च्छन् वर्द्धमान. अलिध्वनिर्येषु । तथा निस्तन्द्र उन्निद्र चन्द्रः तादृशवदनाया यद् वदनारविन्दं तस्य सौरभ्यं सौगन्ध्य तस्य सौहृदेन सपर्क्येण सगर्वो समीरणा यत्र तादृशानि । अत्रेति चन्द्रस्य निद्राभावात् तन्द्रापदस्याप्रकाशे लक्षणा समीरणस्योत्कृष्टत्वं तद्व्यङ्ग्यम्, तथा समीरणस्य गर्वाभावात् उत्कृष्टे लक्षणा सुखस्पर्शत्वं तद्व्यङ्ग्यम् । एषां व्यङ्ग्यानां त्रिविधसंकराभावात् एकपदसंस्थितिरूपा संसृष्टि । तदाह-**निस्तन्द्रेत्यादीति** । इदमुपलक्षणम् । अलिध्वनिचन्द्रसमीरणै. कामोद्दीपकै व्यङ्ग्यस्य शृङ्गारस्य अन्यत्र प्रतीतिरिखतस्तस्य चन्द्रोज्ज्वलत्वेन समीरणोत्कृष्टत्वेन तस्य सुखस्पर्शत्वेन च लक्षणामूलकव्यङ्ग्ये न प्रत्यर्पणादनुग्राह्यानुग्राहकभावरूपसंकरोऽप्यत्रैव श्लोके बोध्य । संशयास्पदरूपसङ्करस्त्वत्र नोदाहृतः । तदुदाहरणं च काव्यप्रकाशकृता दत्तमन्वेष्टव्यम् । यथा-

खणपाहुणिआ देअर जाआए किं पिदे भणिआ ।
रुअइ पडाहेपिलहीधरम्मि अणुणिज्जउ वाराई ॥" इति ।

(**लो, ऋ**) **धिन्वन्तीति**—धिन्वन्ति प्राणयन्ति । अध्वनीना. पथिका निस्तन्द्रसौहृदसगर्वशब्दा निर्मलादयभावग्राहकरूपार्थपर्य्यवसानादत्यन्ततिरस्कृतवाच्याः ।

+ अत्युन्नतं स्तनयुग यस्याः सा । तरले आयते दीर्घे च अक्षिणी यस्या. सा । सा नायिका द्वारि द्वारे स्थिता सती तदुपयानमहोत्सवाय तस्य नायकस्य उपयानम् आगमनमेव महोत्सवः तस्मै प्रयत्नकृतम् अनायासेनैव विहितम् । पूर्णकुम्भो नवनीरजाना तोरणस्रज तोरणमालाः तेषा सम्भार एव आयोजनमेव मङ्गल तद्विधत्ते करोति यथा महोत्सवकाले पूर्णकुम्भौ द्वारपार्श्वे स्थापयन्ति तोरणं च माल्यादिना भूषयन्ति, तद्वत् सा नायकागमनमहोत्सवे स्तनरूपकुम्भद्वयं स्थापितवती चक्षुरूपनवनीरज. तोरणस्रक् सम्भारं विहितवती ।

1 'श्री' (घ पु) 2 'दृष्टय एव नीरजतोरणस्रज.' (स. पु)

निस्तन्द्रचन्द्रवदनावदनारविन्द-
सौरभ्यसौहृदसगर्वसमीरणानि ॥ (स, ऋ)

अत्र निस्तन्द्रेत्यादिलक्षणामूलध्वनीना ससृष्टि ।

अथ गुणीभूतव्यङ्ग्यम्—

अपरं तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये ॥ १६ ॥

अपर काव्यम् । अनुत्तमत्व न्यूनतया साम्येन च सम्भवति ।

तत्र स्यादितराङ्गे[1] काक्वाक्षिप्त च वाच्यसिद्ध्यङ्गम्[2]।
संदिग्धप्राधान्यं तुल्यप्राधान्यमस्फुटमगूढम् ।
व्यङ्ग्यमसुन्दरमेव भेदास्तस्योदिता अष्टौ ॥ १७ ॥ (ह, ऋ)*

क्षणप्राघुणिका देवर जायया किमपि ते भणिता ।
रोदिति पश्चाद् भागवलभीगृहे अनुनायता बराकी ॥ इति सस्कृतम् ।

गृहपतिप्रमङ्गासुपनायिकासु सर्वे तद्गृहागता तत्पत्न्या भर्त्सिता पश्चात् गृहे रुदतीमनुनेतु गृहपतिज्येष्ठभ्रातृपत्न्या सोपहासोक्तिरियम् । अत्र क्षण उत्सवस्तत्र प्राघुणिका अभ्यागता उत्सवागतेत्यर्थ । तद्देवर सा ते तव जायया किमप्यप्रिय भणिता सती पश्चाद् वलभीगृहे रोदितीति । तादृशी बराकी दु खिता अनुनीयतामित्यर्थ । भवता इति शेष । अत्र च अनुनयो वाच्यार्थ । तद्व्यङ्ग्य उपभोग इति । अय किं स्वत सम्भविवस्तुव्यङ्ग्यवस्तुध्वनि किंवा अनुनयपदे उपभोगलक्षणा, तद्व्यङ्ग्य तस्याः दु खापसारणमित्ययमर्थान्तरसंक्रमितवाच्यलक्षणा मूलध्वनिरिति ध्वन्यो सशयास्पदत्वम् । एतादृशव्यङ्ग्योपयोगाय पश्चाद्गृहमुक्त निर्जनत्वात् ।

(वि, ह) गुणीभूतव्यङ्ग्यकाव्यमाह—**अथेति** । **काव्यमनुत्तमत्वमिति** । व्यङ्ग्यानुत्तमत्वेन काव्याऽनुत्तमत्वम् । **भेदास्तस्योदिता** इति—तस्य गुणीभूत-व्यङ्ग्यकाव्यस्य एवमष्टविधव्यङ्ग्यभेदात् तस्याऽष्टौ भेदा उदिता इत्यर्थ ।

(लो, ऋ) एव ध्वन्याख्य काव्यस्य भेद निरूप्य गुणीभूतव्यङ्ग्यमवतारयति **अथेति—तत्र स्यादिति**—काक्वा आक्षिप्त वाच्यवत् स्फुटीकृतम् । वाच्यसिद्धेरङ्ग कारणम् । असुन्दर वाच्यापकृष्टचमत्कारकम् । व्यङ्ग्यमिति प्रतिपदमन्वय । भेदा विशेषा ।

---

* **तत्र स्यादिति**—*इतरस्य वाक्यार्थभूतस्य वाक्यतात्पर्यविषयतया प्रधानस्य अङ्गमुपकारकम् । काक्वाक्षिप्त काकुध्वनेर्विकार तया आक्षिप्तम् स्फुटीकृतमिति प्रकाशित, यया काक्वा विना वाक्यार्थ एव नात्मान लभते तया प्रकाश्यमित्यर्थ । वाच्यसिद्ध्यङ्ग वाच्यस्य वाच्यार्थस्य सिद्धि विश्रान्ति तत्र अङ्ग, निदान वाच्यस्य सिद्धिरेव यदधीनेत्यर्थ । सदिग्धप्राधान्य सदिग्धं चमत्कारजनने वाच्यव्यङ्ग्ययो सन्देह-*

'अपराङ्ग' (घ च पु) 2 सिद्ध्यस्य' (घ च पु)

इतरस्य रसादेरङ्ग रसादि[1]।

यथा—

अथ स रसनोत्कर्षी पीनस्तनविमर्दन ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रसन कर ॥ (क, ल) *

अत्र शृङ्गार करुणस्याङ्गम्।

(वि, क) रसादेरङ्ग रसादि इत्युभयत्र आदिपदात् भावाद्यङ्गताऽपि रसादे, एव वाच्याङ्गत्वमपि वस्त्वलङ्कारयोरित्युक्तम्। **अथ स** इति—भूरिश्रवस समरपतित हस्तमादाय रुदत्यास्तत्पत्न्या उक्तिरियम्। **अत्रेति**—रसोत्कर्षणादिना व्यङ्ग्य शृङ्गार मृतालम्बनकत्वेन रसतामनापन्नो मृतालम्बनकस्य करुणस्याङ्गम्। रसतापन्नस्य तस्य शृङ्गारेण प्रकर्षणात् पूर्वानुभूतसुखस्मरणे हि करुणप्रकर्ष।

(लो, ल) यथोद्देशमुदाहिर्षुरितराङ्गमिति विवृणोति, इतरस्यार्थात् प्रधान भूतस्य रसादे, रसशब्देनात्र भावादीनामुपग्रह आदिशब्देन वाच्यस्याङ्गम् उत्कर्षकारि रसादि अत्रादिशब्दादनुरणनरूपम्। **अथं स** इति—इद हि महाभारते, समरच्छिन्न भूरिश्रवसो हस्तमादाय तत्कान्ताया विलपनम्।

विषयभूत प्राधान्य यत्र तत्, यत्र वाच्यकृतो व्यङ्ग्यकृतो वा चमत्कार इति सन्देह इत्यर्थ। तुल्यप्राधान्य तुल्यमर्थाद् वाच्येन समान प्राधान्य यत्र तत्, चमत्कारजनने वाच्यव्यङ्ग्ययोर्द्वयोरपि चमत्वेन तुल्यता बोध्या। अस्फुटं सहृदयानामपि कष्टेनेयम्, अगूढम् असहृदयैरपि झटिति सवेद्यम्, अत स्फुटतया वाच्यसदृशम्। तदेतदुक्तम्—

"नान्ध्रीपयोधर इवातितरां प्रकाशो
नो गुर्जरीकुच इवातितरां निगूढ ।
अथा गिरामपि हित पिहितश्च कथित्
सौभाग्यमेति मरहट्टवधूकुचाग्र ॥'

तस्माद् गूढ सहृदयमात्रवेद्य व्यङ्ग्य ध्वनिरेव। असुन्दर स्वभावादेव वाच्या पेक्षयाऽचारु।

* स पूर्वानुभूततत्तच्छृङ्गारवस्तु अय दृश्यमानदुखस्य (पूर्वानुभूतावस्था विशेषणेराह) उत्कर्षतीति उत्कर्षी "सुप्यजातौ णिनिस्ताच्छील्ये" इति णिनि-प्रत्यय। रणनाया काञ्च्या उत्कर्षी। पीनयो पृथुलयो स्तनयो विमर्दन विमर्दनकारी। नाभे उर्वो जघनस्य च स्पर्शी। नीव्या नाभितलवसनग्रन्थे विस्रसन मोचक। **अत्रेति**—शृङ्गार नायिकाविषय नायकाश्रय। करुणस्य नायिकाश्रयस्य अङ्गम्। अत्र करुणमादाय अस्य काव्यस्य ध्वनित्वम्। शृङ्गारस्थायिन-मादाय गुणीभूतव्यङ्ग्यत्व बोध्यम्।

1 तत, 'व्यङ्ग्यम् इत्यधिक पाठ (क ख पु.)

मानोन्नतां प्रणयिनीमनुनेतुकाम-
स्त्वत्सैन्यसागररवोद्गतकर्णताप ।
हा हा कथ नु भवतो रिपुराजधानी-
प्रासादसन्ततिषु तिष्ठति कामिलोक ॥ (ख) +
अत्रौत्सुक्यत्राससन्धिसस्कृतस्य करुणस्य राजविषयरतावङ्गभाव ।
जनस्थाने भ्रान्त कनकमृगतृष्णान्वितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।

(वि, ख) भावस्याङ्ग करुणमाह—**मानोन्नतामिति**। उन्नतमानामित्यर्थ । हाहेति त्रासविज्ञातुर्वक्तुस्तद्विषयशोक । भवतो रिपुराजधानीप्रसादसन्ततिषु कथ कामिलोकस्तिष्ठति इति अन्वय । अत्रेति औत्सुक्य मानिन्यनुनयकामनया व्यङ्ग्यम् । तद्विरुद्ध त्रास यथोक्तकर्णतापपदव्यङ्ग्य इत्यनयो सिद्धि । तादृश-सन्धिविशिष्टाना रिपुराजधानीकामिलोकाना शोच्यावस्थाज्ञातुर्वक्तु शोकरूप करुणो रतिविषयरतिभावस्याङ्गमित्यर्थ । अत्र च हाहाशब्द क्रोधव्यञ्जक-हुङ्कारवन्निरर्थक । शोकव्यञ्जक इति ग्रन्थकृतोऽभिप्राय तदेव व्यङ्ग्यभूतस्य हाहाशब्दप्रतिपाद्यस्य शोकरूपकरुणस्य व्यङ्ग्यत्वोपपत्ते । हाहाशब्दस्य वाच्य एव शोकरूप करुण । हाहेत्युक्ते शोचामीति प्रतीत्या तद्वाच्यतासिद्धे । अन्यथा गोशब्दस्यापि गौर्न वाच्य स्यात् । अतो ग्रन्थकृत द्विरमेवात्र ।

(वि, ग) वाच्यार्थस्याऽङ्ग सादृश्यरूप वस्त्वाह—**जनस्थान** इति । दरिद्रस्योक्तिरियम् । मया रामत्व प्राप्त रामसदृशोऽह जात इत्यर्थ । शब्दात्मक सादृश्यमाह—**जनस्थान** इति । मया कनकरूपया मृगतृष्णया मरीचिकयाऽन्धितधिया जनाना स्थाने भ्रान्तम् असारे ससारे कनकस्यापि तुच्छत्वेन तस्योपादेयत्वभ्रमजनकत्वादु-पादेयत्वभ्रमकनकमृगतृष्णयाऽन्धितधिया भ्रान्तम् । मया वै इति सम्बोध्य प्रतिपद

(लो, ए) अङ्गपरिपोषकत्वाद् वाच्याङ्गभूतमनुरणनरूप शब्दशक्तिमूलमुदा हरति एव च रसभावादेरङ्ग रसभावादि, वाच्यस्य चानुरणनरूप व्यङ्ग्यमिति द्वितीयेत्यर्थ । **जनस्थान** इति । जनस्थान—नगरग्रामादि, दण्डकारण्य च । कनक प्रति मृगतृष्णा विफलाशा, कनकमृगे तृष्णा च वै निश्चित देहि प्रयच्छ विदेहजा सीता च । अत

+ हे राजन् ! भवत रिपुराजधान्या प्रासादसन्ततिषु अट्टालिकासमूहेषु मानो न्नताम् अतिमानवती प्रणयिना प्रियाम् अनुनेतुकाम प्रसादयितुमिच्छु कामिलोक तव सैन्यसागरस्य रवेण आक्रमणशब्देन उद्गत ज्ञात कर्णयो ताप पीडा यस्य स तादृश सन् कथ नु तत्र तिष्ठति ?

कृता लङ्काभर्तुर्वदनपरिपाटीषु घटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥ (ग, ए)

अत्र रामत्वं प्राप्तमित्यवचनेऽपि शब्दशक्तेरेव [1]रामत्वमवगम्यते । वचने[2] तु सादृश्यहेतुकतादात्म्यारोपणमाविष्कुर्वता तद्गोपनमपाकृतम् । तेन[3] वाच्यं

स्थाने २ देहीति वच. । मया भर्तुः ईश्वरस्य परिपाटीषु परिचर्य्यासु अलमित्यर्थका घटना न कृता तद्वत् रामेणाऽपि लङ्काभर्तुः रावणस्य वदनाना मुखाना परिपाट्या परिपाटनस्य निमित्तमिषुघटना कृता । किन्तु कुशलं दारिद्र्यापनायकं वसु धनं यस्य तादृशता तु मया न प्राप्ता । अत्र तुशब्देन रामभाक् छेदात् रामेण तु कुशलवसुता प्राप्ता इत्यर्थ प्रतीयते—तत्र च कुशलवौ सुतौ यस्यास्तादृशी सीतेत्यर्थः ।

(वि, घ) अत्र विषादाधिक्यव्यञ्जक्या कुशलवसुताऽप्राप्त्या प्राप्ततत्कात् रामात् उपमानाद् वैलक्षण्यरूपो व्यतिरेकालङ्कार. नयो वाच्य. । तत्प्रयुक्तया *रामसादृश्यं व्यङ्ग्यम् । तदङ्गमिति मनसिकृत्य व्यङ्ग्यस्य सादृश्यस्य अगूढत्वात्* गुणीभूतत्वमुपपादयितुमाह—**अत्र रामत्वमिति** । अवचनेऽपीति अनुक्तावपीत्यर्थ । **वचने तु** इति । तदुक्तौ इत्यर्थ । तादात्म्यारोपणं रामत्वप्राप्त्या रामतादात्म्यारोपम् । तदारोपश्च सादृश्यमूलक इत्याह—**सादृश्यहेतुरिति**—आविष्कुर्वता वक्त्रा तद् गोपनं ध्वनित्वहेतुतद्गुणत्वम् । तद्गोपनात् सादृश्यस्य गुणीभूतत्वमुपपादितम् । यद्यपि एकशब्दरूपं सादृश्यं श्रोत्रग्राह्यमेव न तु वाच्यं, व्यङ्ग्यस्यैव च गुणीभूतत्वे गुणीभूतव्यङ्ग्यं भवति । तथापि शब्दस्य सादृश्यत्वेन रूपेण व्यङ्ग्यत्वमेव न श्रोत्रग्राह्यत्वम् । तथा च तस्याऽपराङ्गत्वमुपपादयति—**तेन वाच्यमिति**—व्यङ्ग्यमित्यर्थ । न च तद् गोप-

---

व्यर्थम् । काभर्तुः कुत्सितस्वामिन. यद् वदनं तस्य परिपाटीषु परम्परासु लङ्काभर्तुः रावणस्य वदनाना मुखाना परिपाट्या पङ्क्तौ इषुघटना शरयोगश्च । कुशलम् आयतिशुद्धं वसु धनं यस्य एवंभूतता, कुशलवौ सुतौ यस्याः सा सीता च ।

(लो, ऐ) **अत्रेति** वचने तु रामोऽस्मीत्युक्त्वा पुन सादृश्यहेतुकतादात्म्यरोपण जनस्थान इत्यादि वचनप्रतिपादनेनाऽपि लभ्यम् । तद्गोपन व्यङ्ग्यभूतरामतादात्म्यारोपस्य गोपनम् । वाच्यं मयाप्तं रामत्वमिति पदाभिधेयम् । सादृश्यस्य व्यङ्ग्यतो व्यङ्ग्यत्वेऽपि स्फुटप्रतिभासने वाच्यत्वमुक्तम् । व्यङ्ग्यमिति पाठे तु सुगमा एव व्याख्या । सादृश्य रामेण सहेत्यर्थ । वाक्य जनस्थान इत्यादि । एवमर्थशक्तिमूलानुरणनरूपस्य व्यङ्ग्यस्याऽपि व्यङ्ग्यत्वे उदाहार्य्यम् ।

---

1 'रामसदृशत्वमव—' (च छ पु.) 2 वचनेन (क. ख पु)
3 'तेनावाच्य' (ज झ पु)

सादृश्य वाक्यार्थान्वयोपपादकतयाङ्गता नीतम्। (घ, ऐ) ❀

काकाक्षिप्त यथा—

मध्नामि कौरवशत समरे न कोपाद्
दु शासनस्य रुधिर न पिबाम्युरस्त ।
सचूर्णयामि गदया न सुयोधनोरू
सन्धि करोतु भवता नृपति पणेन ॥

नात् अगूढरूपगुणीभूतव्यङ्ग्यप्रभेद एवायमिति वाच्यम्। तथात्वेऽपि अपराङ्गतान पायात्। वाच्यार्था रामव्यतिरेको नाम वाच्य, तत्प्रकर्षान्वयोपपादकतया इत्यर्थ । न तु रामव्यतिरेकस्यान्वयनिष्पादकतया अबाधितत्वेन तद् विनापि तन्निष्पत्ते । प्रकर्षद्वाराऽपराङ्गत्वाच्च। ननूपमानापेक्षया उपमेयस्याधिक व्यतिरेकालङ्कार । स च सादृश्यहेतुकोपमानत्वधर्मित एव। तथा च व्यतिरेकालङ्कारशरीरघटकमेव सादृश्यम्, कथ तत्प्रकर्षकमिति चेन्न । एकविशेषणेनाऽपि तद् घटनसम्भवे बहुविशेषणसम्भवात्तत्प्रकर्षकत्वमपि लभ्यते तच्च सहृदयैकवेद्यम् ।

(वि, ङ) **काकाक्षिप्तमिति**—काका उच्चारणेन शिरश्चालनसहकृतध्वनिविशेषेणाक्षिप्तम् । शाब्दबोधस्य प्राक् पदार्थविषया सहसा प्रत्यायितमित्यर्थ । **मध्नामीति**—दुर्योधनेन सह सन्धिकरणे प्रवृत्त युधिष्ठिर श्रुत्वा क्रुद्धस्य भीमस्य सहदेव प्रत्युक्तिरियम् । भवतामित्यनेन अस्माकम् अस्मदीहितकारित्वात् नास्माकं नृपतिरिति सूचितम् । सुयोधनामिति दुर्योधनस्यापर नाम । कृतकौरवशतवध प्रतिज्ञस्य तत्क्रोधमत्त्वेन मध्नामीत्युक्तिर्बाधितार्था । अतो नन्न शिरश्चालनसहकृता काकु प्रतीयते। तया व्यञ्जनया अपरनाम्नाऽपस्थापनात् न मध्नामीत्यर्थो लभ्यते ।

❀ **अत्रेति**—श्लिष्टैकशब्दप्रतिपाद्यत्वरूपसादृश्यावगमात् रामेण सहोपमा इवादिशब्दभावादवाच्यत्वेन व्यङ्ग्येत्यर्थ, सा च उपमानभूताद् रामात् स्वव्यतिरेकरूपालङ्कारस्य वाच्याङ्गता नीता न च रामत्व प्राप्तमित्यनेन रामाभेदप्राप्तिरेव प्रतीयते इति रूपकमेवेदमिति वाच्यम्। समानविभक्तिकत्वाभावाद् भेदान्वयबोधस्य अशाब्दत्वात्। नच श्लोकस्याऽय विषय इति वाच्यम्। यत्र शब्देन द्वितीयोऽर्थ साक्षात् प्रतिपाद्यते स श्लेषस्य विषय । यत्र तु शब्दसामर्थ्यादपरोऽर्थ आक्षिप्यते नतु शब्देनोच्यते स व्यञ्जनाया एव विषय । शब्दस्य साक्षात्प्रतिपादक नत्वेव यत्र शब्दप्रतिपादितोऽर्थ समभिव्याहृतशब्दान्तरेण सार्द्धं विवक्षितमन्वय लभते यथा—येन ध्वस्तमि त्यादौ । प्रकृते तु प्रतिपन्नो द्वितीयोऽर्थो रामेणेत्यन्वयप्रतियोगिपदाविरहेणान्वय भजते। अतो रामेण यथा जनस्थाने भ्रान्त मया तथा इत्यर्था व्यञ्जनालभ्य एव।

• अत्र मध्राम्येवेत्यादि व्यङ्ग्यं वाच्यस्य निषेधस्य सहभावेनैव स्थितम् । (ङ, ओ) *

दीपयन् रोदसीरभ्रमेष ज्वलति सर्वतः ।
प्रतापस्तव राजेन्द्र ! वैरिवंशदवानलः ॥

अत्रान्वयस्य वेणुत्वारोपणरूपो व्यङ्ग्य । प्रतापस्य दवानलत्वारोपसिद्धयङ्गम् । (च)

तच्च मयनायोगव्यवच्छेदरूपम् । तदाह—**अत्र मध्राम्येवेति** । आदिपदात् पिबाम्येव इत्यादिकं बोध्यम् । **इत्यादि व्यङ्ग्यमिति**—इत्यादि एकदेशरूपं व्यङ्ग्यमित्येवार्थः । एवकारार्थक नञ्द्वये एकनञर्थस्यैव व्यङ्ग्यत्वात् ।

(वि, च) वाच्यसिद्धयङ्गमुदाहरति—अनुपपन्नस्य वाच्यार्थस्य यद् व्यङ्ग्यान्वयेनैव सिद्धिः तादृशं व्यङ्ग्य वाच्यसिद्धयङ्गम् । **दीपयन्निति**—रोदसीरन्भं द्यावापृथिव्योरन्तरालम् । **अत्रेति** । अन्वयस्य वैरिकुलस्य वंशपदवाच्यस्य वेणुत्वारोपणरूपो व्यङ्ग्य इति कुलवेणुद्वयार्थकस्य वंशपदस्य प्रकरणात् कुले नियन्त्रणेन वेणोस्तद् व्यङ्ग्यत्वेन तद्रूपणस्यापि व्यङ्ग्यत्वात् दवानलत्वारोपसिद्धयङ्गमिति कुले दवानलबाधेन वेणावेव तद् बाधात् । अत्रेदमवधेयम् । यदि प्रकरणवशात् अनेकार्थस्य वंशपदस्य प्रथमं कुलबोधकत्वम्, तदैव वेणुरूपोऽर्थो व्यङ्ग्यो भवति तदेव तु न; दवानलस्य कुले बाधात् । किन्तु कुलवेणुयोरुभयोरेकदा एव दवानलान्वयार्थं तात्पर्य्याद्

(लो, ओ) सहभावेनैव स्थितमित्यनेन ध्वनित्वनिरासः ।

---

* काकुः—" भिन्नस्वरूपध्वनिर्धीरैः काकुरित्यभिधीयते । " भवतां नृपतिः करोतित्यनेन स्वाऽसम्मतिसूचिका वक्रोक्तिः । अहं समरे युद्धे कौरवाणां दुर्योधनादीनां शतं न मध्नामि । अत्र प्रतिज्ञातकुरुकुलक्षयस्य भीमस्य "न मध्नामि" इत्युक्तिर्विरुद्धेति नञा काकुः प्रतीयते । तया च काक्वा नञर्थान्तरं प्रतीयते । तेन च न मध्नामि इति न अर्थात् मध्राम्येवेत्यवधारणं गम्यते ।

एवमग्रे सर्वत्र दु शासनस्य उरस्त हृदयात् रुधिरं रक्तं न पिबामि । सुयोधनस्य उरू सक्थियुग्मं गदया न संचूर्णयामि ? भवता नृपति न तु मम नृपतिः । पणेन ग्रामपञ्चकरूपेण सन्धिं मैत्रीं करोतु इत्यर्थ । अत्र "वर्त्तमानसामीप्ये वर्त्तमानवद् वा" इति वर्त्तमानसामीप्ये लट् । **अत्रेति** । वाच्यो यो मथनादिनिषेधस्तत्समकालप्रतीतिकतया स्थितमित्यर्थः । तुल्यकालतया स्थितस्य वाच्यार्थस्य व्यङ्ग्यार्थोपस्थितावनुपयोगात् काकुरेव नियमविशिष्टविधिव्यञ्जिका इत्यर्थ । अतो विरोधिलक्षणाया अपि नायं विषयः मुख्यार्थबाधायनुसन्धानात् प्रागेव काक्वा विवक्षितार्थोपस्थितेः । यद्यप्यगूढव्यङ्ग्यान्तःपातित्वमस्य युज्यते तथापि काकुरूपविच्छित्तिविशेषात् पृथग्गणनम् ।

वंशयोरुपस्थिता अर्थद्वयमेव वाच्यम्। ननु वेणुरूपाऽर्थो व्यङ्ग्यस्तथा च परम्परितरूपमेवेद वेणुत्वरूपणस्य दवानलरूपणकारणत्वात् तद् वक्ष्यति स्वयमेव—

"यत्र क्वचिदारोप परारोपस्य कारणम्।
तत् परम्परितम्। इति।

उदाहरिष्यति च—

"आहवे जगदुद्दण्डराजमण्डलराहवे।
श्रीनृसिंहमहीपाल! स्वस्त्यस्तु तव बाहवे॥" इति

अत्र हि राजमण्डलस्य ग्रासकरूपसम्बन्धितया राहुबाधात् बाहौ राहुरूपणमनुपपन्नमतो नृपमण्डले चन्द्रमण्डलत्वस्यारोपो बाहौ राहुरूपणकारणमिति। अत एव काव्यप्रकाशकृताऽपि सदृशमुक्तमणिरित्यत्र राज्ञो मुक्तामण्यारोपणस्य सत्कुले बाधात् सत्कुले सह वेणुरोपण तत्कारणमित्युक्तम्। अतो दीपयन् रोदसीरन्ध्र मित्यादिक परम्परितरूपकोदाहरणमेव, न वाच्यसिद्धयङ्गोदाहरणम्। अन्यथा स्वोक्ते काव्यप्रकाशकृदुक्तेश्च विरोधापत्ति। न हि दीपयन् इत्यादौ आहवे जगदुद्दण्डेत्यादौ च एकस्य वाच्यसिद्धयङ्गत्वमन्यस्य परम्परितरूपकत्वमित्यत्र विनिगमक नास्ति। वाच्यसिद्धयङ्गोदाहरण तु—

"गच्छाम्यच्युत! दर्शनेन भवत किं तृप्तिरुत्पद्यते
किन्त्वेव विजनस्थयोर्हतजन सम्भावयत्यन्यथा।
इत्यामन्त्रणभङ्गिसूचितधृतावस्थानखेदालसा-
मालिख्यन् पुलकोत्करावृततनुर्गोपी हरि पातु व॥"

इति काव्यप्रकाशवृद्धिदत्तमेवान्वेष्टव्यम्। तथा हि इत्यामन्त्रणेत्यादिर्वाच्यार्थ। पूर्वार्द्धमन्त्रणेत्यादिवाक्यार्थस्य अप्रतीतिकाले असिद्धेस्तद्-व्यङ्ग्यार्थस्य हे अच्युत! मद्विधनायिकादर्शनेनाऽपि धैर्यच्युतरहित इत्यवधिधाया भङ्ग्या. प्रतीत्यैव सिध्यति। न च नृपमण्डले चन्द्रमण्डलारोपणमपि व्यङ्ग्य सदेवालङ्कारः। तथा च परम्परितरूपकालङ्कारवाच्यसिद्धयङ्गयो सकर एवेति वाच्यम्। व्यङ्ग्यतेऽलङ्कारत्वाभावस्य ब्राह्मणश्रमणेत्यादिना एव उक्तत्वात्। प्रथम नृपमण्डले राहोरन्वयासम्भावेन राजमण्डलपदादेकदैव नृपचन्द्रमण्डलयो उपस्थित्या द्वयोरपि वाच्यत्वाच। ननु तत्त्वम्—

"भ्रमिमरालिमलद्धृदयतां प्रणय मूर्च्छां तम शरीरमादम्।
मरण च जलदभुजगज प्रसह्य कुरुते विष वियोगिनीनाम्।"

इत्यत्र विशेषणदले रूपित इलाहल व्यङ्ग्य भुजगरूपणसिद्धिमुद्दिश्योक्तया हलाहलस्य व्यङ्ग्यत्वमुक्त्वा काव्यप्रकाशकृता वाच्यसिद्धयङ्गोदाहरणत्वेन तदुक्तमिति नेय। तत्र उद्दीपकतया प्राकरणिकमनेकार्थस्य शिवशब्दस्यार्थो जलम् इत्यनोऽप्राकरणिकं हलाहलं व्यङ्ग्यमित्युक्तम्। न च दीपयन्नित्यादौ प्राकरणिकत्वेन वक्ष्यमाणार्थस्योक्तवाच्य

हरस्तु किञ्चित् परिवृत्तेत्यादौ विलोचनव्यापारचुम्बनाभिलाषयोः प्राधान्ये सन्देहः। (छ, औ)

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यस्तथा[1] मित्रमन्यथा दुर्मनायते॥

अत्र परशुरामो रक्षःकुलक्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं

वेणुस्तु अप्राकरणिको व्यङ्ग्य एवेति वाच्यम्। दवानलरूपणस्यापि तात्पर्य्यविषयत्वेन तस्य कुले बाधेन तदुपपादनतया वेणोरपि प्राकरणिकत्वात्। अन्यथा "आह्वे जगदुद्दण्ड" इत्यादावपि परम्परितरूपकं न स्यात्। किन्तु वाच्यसिद्धयङ्गमेव तदपि स्यात्। अभिसरतिमित्यादौ तु जलदे भुजगरूपणं श्यामत्वेनापकारित्वेन च जले हलाहलरूपणं विनापि आपाततः सिध्यन्त्येवेति हलाहलमप्राकरणिकमित्यतो व्यङ्ग्यमेव। परन्तु प्रणिधाने सति जलस्य भुजगजन्यत्वाऽसम्भवेन भुजगरूपणाऽसिद्धया तत्सिद्धिकारित्वेन पश्चाज्जले हलाहलरूपणमिति।

(वि, छ) संदिग्धप्राधान्यमाह—हरस्त्विति। प्राधान्यं रसव्यञ्जकतया व्यज्यते रसे। किं वाच्यार्थेन किं वा व्यङ्ग्यार्थेन व्यञ्जितोऽयं रस इत्येवं सन्देहविषयत्वं तत्त्वम्। हरस्त्विति कुमारसम्भवे आमालिके वसन्ते जाते सर्वेषामेव कामोद्रेके सति हरस्यापि किञ्चित् तथात्ववर्णनमिदम्। चन्द्रोदयस्यारम्भे नतु चन्द्रस्योदये तदानीमेवाम्बुराशेर्धैर्य्यपरिवृत्तेः किञ्चित्त्वात्। अत्रेति—प्राधान्यसन्देहो हरस्य शृङ्गारव्यञ्जकतासन्देहः। विलोचनव्यापारो हि वाच्यः। चुम्बनाभिलाषस्तु व्यङ्ग्यः तद्द्वयमपि शृङ्गारानुभावस्तत् केन रसो व्यञ्जित इति सन्देहात्। न च द्वाभ्यामेव व्यज्यता, तथा च तुल्यप्राधान्योदाहरणमेव इदमस्त्विति वाच्यम्। धैर्य्यपरिवृत्तेः किञ्चित्त्वेन चुम्बनाभिलाषो जातो न वा, इति सन्देहेन तदीयरसव्यञ्जकतायाः अपि तदधीनसन्देहात् अत एव वाच्यार्थेन तद्व्यञ्जनमपि संदिग्धमेव।

(वि, ज) तुल्यप्राधान्यमाह—ब्राह्मणेति—दिग्विजये परशुरामं जिगीषुं रावणं प्रति तदमात्यस्य तन्त्रासकवाक्यमिदम्। भवतामेव भूतये न तु स्वार्थं ब्रवीमीत्यर्थः। तथेति—ब्राह्मण इत्यर्थः। मित्रमित्यत्र चार्थो गम्यः मित्रं चेत्यर्थः। अन्यथेति अतिक्रमे इत्यर्थः। दुर्मनायत इत्यत्र भविष्यत्सामीप्ये वर्त्तमाना। समं

(लो, औ) सन्देह.—द्वयोरपि रसाभिव्यञ्जकत्वाऽविशेषात्।

(लो, अ) ब्राह्मणेति—रावणं प्रति परशुरामदूतस्य वाक्यमिदम्। भवता रक्षसां मित्रे जन्मप्रभृति निर्मिलरहस्यवेदी। अत्रेति—अत्र वाच्यव्यङ्ग्ययो. सामदण्डयोस्तुल्यतयैव वैरमोचने पर्य्याप्तत्वादप्रस्तुतप्रशंसावत् परस्परानपेक्षया चमत्कारास्पदत्वात् द्वयोरपि समं प्राधान्यम्।

---

1 'दय वो मि–' (क. स. पु)

प्राधान्यम्। (ज, अ)

सन्धौ सर्वस्वहरण विग्रहे प्राणनिग्रहः।
अह्लावदीननृपतौ न सन्धिर्न च विग्रह ।

अत्राह्लावदीनाख्ये नृपतौ [1]दानादिमन्तरेण नान्य प्रशमोपाय इति व्यङ्ग्य व्युत्पन्नानामपि झटित्यस्फुटम्। (झ, आ)

अनेन लोकगुरुणा सता धर्म्मोपदर्शिना।
अह व्रतवती स्वैरमुद्रेन किमत परम्॥

प्राधान्यमिति–यथोक्तव्यङ्ग्यार्थस्याऽप्यत्र निश्चितत्वेन द्वयोरपि रावणत्रासरूपव्यभिचारिभावे व्यवक्तत्वात्। वाच्येन ब्राह्मणातिक्रमेणाऽपि शापतो भस्मास्करणसम्भावनया त्रासात्।

(वि, झ) अस्फुटमाह **सन्धाविति**—विदग्धानामपि कष्टगम्य व्यङ्ग्यमस्फुटम्। झटित्यस्फुटमिति तत् प्रशमोपायो नास्त्येव इति हि व्यङ्ग्यमापातत प्रतिभाति। यथोक्त व्यङ्ग्य तु कृच्छ्रगम्यम्। तद्धि जीवनरक्षार्थं सर्वस्वदानेनापि सन्धि करणीय इत्येवरूपम्।

(वि, ञ) अगूढमाह—**अनेने**ति। शाक्यमुनिना बलादुपभोक्तुमुपक्रम्यमाणाया तैर्थिक्योपित उक्तिरियम्। अह व्रतवतीति धर्मोपदेशिन अस्य उपभोगो

(लो, आ) पूर्वत्र सन्देहालङ्कारवत् सादेग्धत्वम्। नान्य उपशमोपाय इति व्यङ्ग्यम्। प्राणनिग्रह प्राप्ते धनत्यागादे ईषत्करत्वाभिप्रायेणेत्यर्थ ।

(लो, इ) अनेनेत्यादौ अर्थशक्तिमूलानुरणनरूपव्यङ्ग्यस्यागूढत्वम् । अत्यन्ततिरस्कृतवाच्यस्यागूढत्व यथा—

---

* **ब्राह्मणे**ति—महावीरचरितनाटके द्वितीयेऽङ्के रावणमुद्दिश्य रावणामात्य माल्यवन्त प्रति परशुरामेण प्रेषिते पत्रे पद्यमिदम्। ब्राह्मणानामतिक्रम अवमान तस्य त्याग भवतामेव भूतये कल्याणाय भवति, न तु ब्राह्मणाना, जामदग्न्ये जीवति तेषामनिष्टाऽसम्भवात् इत्यर्थ । अन्यथा ब्राह्मणातिक्रमस्य अत्यागे तथा तादृश मित्र जामदग्न्य परशुराम दुर्मनायते।

अत्र जामदग्न्य क्षत्रियाणामिव रक्षसामपि स्वय करिष्यतीति दण्डरूप व्यङ्ग्य मिव मित्रत्वाभिधानरूप सामोपायात्मक वाच्यमपि प्रधानमेव । अत्र विग्रहवत् सन्धेरपि अनर्थनिवारकत्वात् वाच्यस्य व्यङ्ग्यस्य च तुल्य प्राधान्यम्। भार्गवपत्रेण रावण प्रति सन्धेर्व्यवसितत्वात्। तस्य साम्ना भयादिदर्शनेन च सिषाधयिषितत्वादुभयो सामदण्डयोर्वाच्यव्यङ्ग्ययो सम प्राधान्यमित्यर्थ ।

1 'दानसामादिम—' (क ख पु) दानमानादिम–' (ग च पु)
2 'धमापदेशिना' (क ग पु)

अत्र प्रतीयमानोऽपि शाक्यमुने तैर्थिकयोपिति[1] बलात्कारोपभोग स्फुटतया वाच्यायमान इत्यगूढम्। (अ, इ)

वाणीरकुडगुड्डीणसउणिकोलाहल सुणन्तीए।
घरकम्मवावडाए वहुए सीअन्ति अगाइ ॥ *

अत्र दत्तसकेत. कश्चिल्लतागृह प्रविष्ट इति व्यङ्ग्यात् "सीदन्त्यङ्गानि" इति वाच्यस्य चमत्कार सहृदयसवेद्य इत्यसुन्दरम् ॥ (उ, ई)

मम व्रतभङ्गाय नो भविष्यतीत्यतोऽह व्रतवत्येव इत्यर्थ। स्वैर स्वच्छन्दम् अत परम् उक्तेन किं प्रयोजनमित्यर्थ। **अत्रेति**–प्रतीयमानोऽपि व्यज्यमानोऽपि। प्रतीयमानस्य प्रायशोऽस्फुटत्वेन स्फुन्त्वे तद् विरोधेऽनाऽपिकार **स्फुटतयेति**—प्रबन्धश्लोका त्प्रकरणवशाद् बलात्कारोपभोगज्ञानात् स्फुन्ता।

(वि, ट) असुन्दरमाह–**वाणीरेति**। वाच्यार्थान्न्यूनचमत्कारिव्यङ्ग्यमसुन्दरम्।

"वानीरकुञ्जोड्डीनशकुनिकोलाहल शृण्वन्त्या।
गृहकर्मव्याप्ृताया वध्वा सीदन्त्यङ्गानि" ॥ इति सस्कृतम्।

वानीरकुञ्जे कृतसंकेताया गृहकर्मव्यापारात् तत्र गन्तुमशक्तया वध्वा अङ्गावसाद-वर्णनमिदम्। **अत्रेति**–प्रविष्ट इत्यन्तमात्र न व्यङ्ग्य वध्वास्तत्रागमनस्यापि तदीय पक्षिकोलाहलश्रवणाधीनाङ्गावसादेन व्यङ्ग्यत्वात्। तथा चोक्तं–व्यङ्ग्यादित्यत्र इत्यादि

"एतद् विभाति चरमाचलचूलचुम्बी
हिंगीरपिण्डरुचिशीतमरीचिबिम्बम्।
प्रज्ज्वालितस्य रजनी मदनानलस्य
धूम दधत् प्रकटलाञ्छनकैतवेन।"

अत्र चुम्बीति पदे वदनसंसर्गरूपस्यार्थस्यागम्भवात् ससर्गमात्र लक्ष्यते तदनि शयधाभिधेयवत् स्फुट प्रतीयते।

(लो, ई) वार्णीरेति—वानीरकुञ्जोड्डीनशकुनिकोलाहल शृण्वन्त्या। गृह कर्मव्याप्ृताया वध्वा सीदन्त्यङ्गानि ॥ वाच्यस्य चमत्कार प्रधानप्रत्यासत्तेरधिकत्वात्।

---

* **वार्णीरेति**—वार्णीरा वेतसा। तथा कुञ्जानि गहनस्थानानि। 'निकुञ्जकुञ्जौ वा स्त्रियां लतादिपिहतोदरे" इत्यमर। तेभ्य उड्डीना उत्प्लुता ये शकुनय पक्षिण तथा कोलाहल शृण्वन्त्या गृहकर्मणि रन्धनादौ व्याप्ृताया व्यापारयुक्तया वध्वा स्त्रिया अङ्गानि सीदन्ति अवसाद प्राप्नुवन्तीत्यर्थ। कुञ्जे नायकप्रवेशात् शकुनीना मुड्डयने कोलाहल। अत्र दत्तसकेत कश्चिद् लतागहन प्रविष्ट इति व्यङ्ग्यम्। तत्र वध्वा गृहव्यापारवशादगमनेन अङ्गावसाद। स च वाच्योऽनुभावरूपो विप्रलम्भाभास व्यङ्ग्यत्वाद् यथा चमत्करोति न तथा व्यङ्ग्यमित्यसुन्दरम्।

1 तिर्यग् ये त्रिति पाठान्तरम्।

किञ्च यो दीपकतुल्ययोगितादिषु उपमाद्यलङ्कारो व्यङ्ग्यः स गुणीभूतव्यङ्ग्य एव। काव्यस्य दीपकादिमुखेनैव चमत्कारविधायित्वात्। तदुक्तं ध्वनिकृता—

अलङ्कारान्तरस्यापि प्रतीतौ यच्च * भासते।
तत्परत्व न काव्यस्य नासौ मार्गो ध्वनेर्मत ॥ (ठ, ड)

यत्र च शब्दान्तरादिना गोपनकृतचारुत्वस्य विपर्य्यास। (ढ)

यथा—

दृष्ट्या केशव! गोपरागहृतया किञ्चिन्न दृष्ट मया
तेनात्र स्खलितास्मि नाथ! पतिता किं नाम नालम्बसे।

व्यङ्ग्यादित्यर्थ वाच्यस्य चमत्कार इति वध्वा विप्रलम्भव्यञ्जकत्वेन ह्यत्र चमत्कार.। स चानौचित्यकशकुनिकोलाहलश्रवणाधीनाऽवसादस्य विप्रलम्भ विना अन्यतोऽसम्भवात् तत्प्रतीत्यवश्यम्भावेन सङ्केतस्थले वध्वा अगमनादुक्ताऽऽवसादसहकारं विना न विप्रलम्भप्रतीत्यवश्यम्भाव। वध्वा ईदृशकार्य्यत्यागेनापि तत्रागमनसम्भवा, इते वाच्याङ्गावसादमुखप्रेक्षित्वेन तस्य न्यूनचमत्कारितेत्यर्थ।

(वि, ठ) असुन्दरस्य बहून्युदाहरणानि सम्भवन्तीति दर्शयितुमाह—**किञ्च यो दीपके**ति। बहूपमानानामेकधर्मान्वयो दीपकम्। उपमेयोपमानानामेकधर्म्मान्वयस्तुल्ययोगिता। सर्वत्रैव व्यञ्जनया उपमा प्रतीयते। अस्याश्च गुणीभूतत्वे हेतुमाह—**काव्यस्ये**ति। अलङ्कारान्तरस्यापि प्रतीतौ सत्या यच्चाऽलङ्कारान्तर भासत इत्यर्थ। काव्यस्य न तत्परत्व, चमत्कारानुत्कटत्वेन तत्तत्तात्पर्य्यकत्वम्। अतो भासमानालङ्काररूपोसौ न ध्वनेर्मार्ग इत्यर्थ। यत्रेति पाठे तु यत्र काव्ये भासते इत्यलङ्कार इति कर्तृपदमध्याहार्य्यम्।

(वि, ड) अन्यमपि गुणीभूतव्यङ्ग्यप्रकारमाह **यत्रे**ति—व्यङ्ग्यार्थस्य गोपनकृतचारुत्वे हि ध्वनित्व तद् विपर्य्यासो व्यक्तीकरण यत्र शब्दान्तरादिना क्रियते सोऽगूढरूपगुणीभूतव्यङ्ग्यप्रभेद इत्यर्थ।

(वि, ढ) **दृष्ट्ये**ति—केशव दृष्ट्वा मदनान्धतया गोष्ठे पतिताया गोप्या सलेश सश्लेष गदितो हरिश्चिरमवतात्। **दृष्ट्ये**त्यादि—सश्लेषोक्ति तत्र वाच्यार्था

(लो, उ) इदानीमन्यत्रापि व्यङ्ग्यस्य गुणीभावस्थले ध्वनिभ्रम निरस्यन् आह—**किञ्चे**ति। **अलङ्कारान्तरस्यापी**ति। काव्यस्य च तत्परत्व न भासत इति सम्बन्ध।

(लो, ऊ) **दृष्ट्ये**ति—गवा परागेण रजसा हृतया तिरस्कृतया। गा इन्दि-

---

* यत्र—पाठान्तरम्।

एकस्त्वं विषमेषुखिन्नमनसां सर्वाबलानां गति-
र्गोप्यैवं गदितः सलेशमवताद् गोष्ठे हरिर्वश्चिरम् ॥ (ढ, ऊ)

अत्र गोपरागादिशब्दानां गोपे रागे इत्यादिव्यङ्ग्यार्थानां सलेशमिति पदेन स्फुटतया 'रसाभासः'। (ण)

सलेशमिति पदस्य परित्यागे ध्वनिरेव। किञ्चात्र[2] यत्र वस्त्वलङ्काररसादिरूपव्यङ्ग्यानां रसाभ्यन्तरे गुणीभाव तत्र प्रधानकृत एव काव्यव्यवहारः। (त, ऋ)

यथा—हे केशव गवा परागेण रजसा हृतया नष्टया दृष्ट्या मया किमपि न दृष्टम्। तेन हेतुना अत्र स्खलिताऽसि पतिताऽसि। हे नाथ! पतिता मा किं नालम्बसे। कथमालम्बिष्ये इत्याह—एकस्त्वमिति—विषमेषूच्चनीचेषु वर्त्मसु खिन्नमनसां पतनेन क्लान्तहृदयाना सर्वाबलाना सकलबलरहिताना स्त्रीणा पुंसा च यतस्त्वं गतिरिति। व्यङ्ग्यार्थो यथा—हे केशव गोप गोपालक। रागेण त्वय्यनुरागेण हृतया दृष्ट्या मया किञ्चिन्निजपतिरोषादिकं न दृष्टम्। तेनात्र गोष्ठे स्खलितासि आगतासि। हे नाथ! पतिता पतिभावं भर्तृत्वं किं नाम नालम्बसे नाश्रयसि। यतो विषमेषुणा पञ्चेषुणा खिन्नमनसा सर्वासाम् ध्वस्तानां त्वमेको गतिरिति।

(वि, ण) स्फुटतयेति—श्लेषवशादेव तत्प्रतीतेः सलेशपदेन तत् स्फुटीकरणम्। रसाभास इति योद्धृणामल्पसन्तोष इत्यर्थः। न त्वनौचित्यप्रवर्तितरूपरसाभासः तद्गोपनेऽपि परनायकविषयत्वेन तदवश्यभावात्।

(वि, त) क्वचित्तु व्यङ्ग्ये गुणीभूतेऽपि ध्वनिकाव्यव्यवहार एव न गुणीभूतव्यवहार इत्याह—किञ्चात्र यत्र वस्त्विति। रसाभ्यन्तरे प्रधानीभूतरसादौ। तत्र प्रधानकृत एवेति व्यवहारो ध्वनिव्यवहारः। न चेदं कथमुपपद्यते ईदृशस्थलेऽपराङ्गाख्यगुणीभूतव्यङ्ग्यस्यैवोक्तत्वात् इति वाच्यम्, यत्र गुणीभूतानामलङ्काररसादीनामाक्षिप्तजनकत्वमेव नास्ति प्रकर्षकत्वं तत्रैवाक्षिप्तो व्यङ्ग्यविशेषणत्वेनाक्षिप्त एव चमत्कारित्वात् ध्वनिव्यवहारात्। यथा च चलापाङ्गा दृष्टिमिलत्रे मधुकरसमुरूपालङ्कारस्य

यापि सम्भोगदानादिना प्रीतीति गोप तस्मिन् गोपे त्वयि, रागेण प्रेम्णा हृतया वशीकृतया स्खलिता भ्रष्टपादा गतधैर्या च। अथ पतिता मार्गपतिता धवत्वं च नावलम्बसे न धारयसि न परिगृह्णासि च। विषमेषु उच्चनीचस्थानेषु, विषमेषुः कामः तेन च खिन्नमनसाम्। अबलानां दुर्बलानां स्त्रीणां च।

(लो, ऋ) किञ्चात्रेति। प्रधानेन रसेनैव काव्यव्यवहारो न तु गुणीभूतव्यङ्ग्येन। तथा च तत्रोत्तमकाव्यत्वमेव इत्यर्थः। यथा "अयं स रशनोत्कर्षी" त्यादावेव हि तत्र शृङ्गारस्य गुणभावेऽपि तं भागमवलम्ब्य मध्यमकाव्यव्यवहारोऽपि न वक्तव्यः।

---

1 'रस' इति नास्ति (ग घ च छ) 2 अत्रेति क ख. पु. नास्ति

तदुक्तं तेनैव—

प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम् ।
धत्ते रसादितात्पर्यपर्यालोचनया पुनः ॥ (थ

यत्र तु—

यत्रोन्मदानां प्रमदाजनानां—
मभ्रंलिहः शोणमणीमयूखाः ।
सन्ध्याभ्रमं प्राप्नुवतामकाण्डे—
ऽप्यनङ्गनेपथ्यविधिं विधत्ते ॥ (द)

इत्यादौ रसादीनां नगरीवृत्तान्तादिवस्तुमात्रऽङ्गत्वे तत्र तेषामतात्पर्यावषय

व्यङ्ग्यस्य हता इति व्यक्तविशेषलभ्य व्यङ्ग्यविप्रतिपत्तिप्रतिबन्धकत्वात् नापराङ्गत्वं किन्तु विप्रतिपत्त्यध्वनित्वमेव । यथा—

[illegible]

इत्यत्र विधिप्रत्यूषाध्वनिरेव शठपदेन व्यक्तविशेषेण व्यङ्ग्यः । नो यामि धामयामि इत्यनेन व्यङ्ग्यस्य विप्रलम्भस्य तु असूयाजनकत्वमेव नासूयाप्रकर्षकत्वमिति ततो नाऽपराङ्गत्वमित्यादि स्वयमूह्यम् ।

(वि, थ) प्रकारोऽयमिति—रसादितात्पर्यपर्यालोचनमङ्गीभूतरसादेरङ्गित्वादिना तत्रैव तात्पर्यपर्यालोचनम् । क्वचित्तु प्रकरणगम्ये वस्तुनि तात्पर्यसत्त्वेन अङ्गीभूतरसादौ तात्पर्याभावऽपि आपाततश्चमत्कारिभिस्तैरङ्गभूते रसादौ पराङ्गव्यवहार इत्याह ।

(वि, द) यत्र तु यत्रोन्मदानामिति—अत्र पुरेऽभ्रंलिहः मेघस्पर्शिनः शोणमणीमयूखाः पद्मरागमणिकिरणाः यस्मिन् । सन्ध्याभ्रमं तादृशरश्मिसञ्चरणादेव सन्ध्याकाले इति भ्रान्तिं प्राप्नुवतामुन्मदानां मदनमत्तानां प्रमदाजनानामनङ्गनेपथ्यविधिं कामसम्भोगवेशविधानं विधत्ते इत्यन्वयः । सन्ध्याकाले प्रमदानामनङ्गक्रीडाधनपथ्यविधानात् नेपथ्यवेशत्व

न्त्वङ्गिन करणमात्रित्व उत्तमकाव्य व्यवहार एवार्थः । तदुक्तं काव्यप्रकाशकारैः यद्यपि स नास्ति कश्चिद् विषयो यत्र वाक्यगुणभूतव्यङ्ग्यया स्वप्रभेदादिभिः सकलः सम्पत्तिर्वा नास्ति तथापि प्राधान्येन व्यपदेशा भवन्तीति क्वचित् केनचित् व्यवहार कृते इति ।

---

1 प्राप्नुवताम् (ख पु) 2-वृत्तान्तादि (क ख पु)

त्वेऽपि तैरेव गुणीभूते काव्यव्यवहार । (ध)

[1]*तदुक्तमस्मत्सगोत्रकविपण्डितमुख्यश्रीचण्डीदासपादै *—

("काव्यार्थ स्याखण्डबुद्धिवेद्यस्य तन्मयीभावेनास्वाददशाया गुणप्रधान [2]भावावभासस्तावन्नानुभूयते, कालान्तरे[3] तु प्रकरणादिपर्य्यालोचनया भवन्नप्यसौ न काव्यव्यपदेश व्याहन्तुमीशस्तस्यास्वादमात्रायत्तत्वात् ")इति[4]। (न, ऋ)

केचित् चित्राख्य तृतीय काव्यभेदमिच्छन्ति । तदाहु —

शब्दचित्र वाच्यचित्रमव्यङ्ग्य त्ववर स्मृतम् । इति (लृ)

तन्न । यदि च अव्यङ्ग्यत्वेन व्यङ्ग्याभावस्तदा तस्य काव्यत्वमपि नास्तीति प्रागेवोक्तम् । (ष)

(वि, ध) अत्र हि प्रकरणात् पुराप्रकर्षे तात्पर्य्यसत्त्वेन अनङ्गनेपथ्यविधानव्यङ्ग्यस्य शृङ्गारस्य तात्पर्य्यविषयत्वाभावेऽपि आपाततश्चमत्कारित्वलाभेनैवाऽपराङ्गव्यवहार ।

(वि, न) काव्यार्थस्यारभ्यते—प्रकृते काव्यार्थ अनङ्गनेपथ्यव्यङ्ग्य शृङ्गार । तस्य विभावादिनानापदार्थघटितत्वेऽपि प्रधानकरसन्यायेनाऽखण्डबुद्धिवेद्यत्व, बोद्धुस्तन्मयीभावेनाऽऽस्वाददशाया शृङ्गारो गुण । पुरीप्रकर्षे प्रधानमित्यवभासस्तावदापाततो नानुभूयत इत्यर्थ । तत्र आपाततस्तदननुभवेऽपि उत्तरकाल प्रकरणादिपर्य्यालोचनया पुरीप्रकर्षप्राधान्यावगमो भवन्नपि काव्यस्य गुणीभूतव्यङ्ग्यव्यपदेश व्याहन्तु नेश इत्यर्थ । अत्र हेतुमाह—**तस्येति** । अस्य काव्यव्यवहारस्य आस्वाद मात्रायत्तत्वादित्यर्थ । तथा च अप्रधानेनाऽपि शृङ्गारेणाऽऽस्वादात् न गुणीभूतव्यङ्ग्य व्यपदेश इत्यर्थ ।

(वि, प) *काव्यप्रकाशकृत्ता चित्राख्य तृतीय काव्यमुन्यते तद्दूषयितुमाह*— **केचिदिति** । तद्दूषयितु वितर्कयति । **तन्न यदि हीति, काव्यत्वमपि नास्तीति** ।

(लो, ऋ) यत्रेति—असौ गुणप्रधानभावाभास । काव्यव्यपदेश प्राधान्य दर्शनेन मूर्खमतिभि अपेक्षणीयम् ।

(लो, लृ) चित्रमिति—गुणालङ्कारयुक्तम् । अवर मध्यमम् ।

---

1 तात्रिकपाठस्थाने, । यच्च केचिदाहु ' इतिपाठ (द ध पु)

2 'काव्यस्याग' (इति च ज पु) 3 भावाभास ' (च ञ पु)

4 पश्चात् (च ज पु) 5 इतीत्यनन्तरम्, "तदतीव हृदयङ्गमम् । तथापि यथा सर्वेषा रसाना चमत्कारगरत्वेनाद्भुतानतिरेकोऽपि मुनिवचनविरोधेन बहुभेदत्व तथा काव्यस्यापि ध्वनिगुणीभूतव्यङ्ग्यत्वेन द्विधा व्यपदेश आर्षानानाम्" इत्यधिक- पाठ (च ज पु)

ईषद् व्यङ्ग्यत्वमिति चेत्, किं नाम ईषद् व्यङ्ग्यत्वम्, आस्वाद्यव्यङ्ग्यत्वम्, अनास्वाद्यव्यङ्ग्यत्वं वा ?

आद्ये प्राचीनभेदयोरेवान्तर्भावः। द्वितीये स्वकाव्यत्वम्। यदि चास्वाद्यत्वं तदा अक्षुद्रत्वमेव। क्षुद्रतायामनास्वाद्यत्वात्। (फ, ए)

तदुक्तं ध्वनिकृता—

प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैव व्यवस्थिते।
उभे काव्ये ततोऽन्यद् यत् तच्चित्रमभिधीयते ॥ इति। (ब, ऐ)

इति साहित्यदर्पणे ध्वनिगुणीभूतव्यङ्ग्याख्यकाव्यभेद-
निरूपणो नाम चतुर्थः परिच्छेदः ॥

सगुणावितिं तै काव्यलक्षणे कृते व्यङ्ग्यरसद्वारेणैव च सगुणत्वेन व्यङ्ग्याभावे सगुणत्वाभावात् काव्यत्वं नास्तीत्यर्थः।

(वि, फ) आद्ये आस्वाद्यत्वे प्राचीनभेदयो ध्वनिगुणीभूतव्यङ्ग्ययो। द्वितीये त्विति—अनास्वाद्यव्यङ्ग्यत्वे इत्यर्थः। **अकाव्यत्वमिति**। आस्वाद्यव्यङ्ग्यत्वे एव काव्यत्वाङ्गीकारात् इदं च स्वकपोलकल्पितं दूषणम्। अनास्वाद्यव्यङ्ग्यत्वेऽप्यास्वाद्यालङ्कारत्वेन तै काव्यत्वाङ्गीकारात्। ननु आस्वाद्ये एव तारतम्यान्न प्राचीनद्वयान्तर्भाव इत्यत आह—**यदि चास्वाद्यत्वमिति—तदा क्षुद्रत्वमेवेति**—प्राचीनभेदद्वयात् अस्याल्पत्वमेवेत्यर्थः। अस्तु तावत् क्षुद्रत्वं तु काव्यत्वाप्रयोजकत्वेनाऽनुपादेयत्वादनास्वाद्यत्वमेव इत्याह—**क्षुद्रतायामिति**—तथा च ध्वनिगुणीभूतव्यङ्ग्याख्यं द्वयमेव काव्यम्। चित्राख्यं पद्यं न तु काव्यमिति भावः।

(वि, ब) अत एव ध्वनिकारोक्तसंवादमाह—**यदुक्तमिति**। एवमुक्तप्रबन्धेन व्यङ्ग्यस्य प्रधानगुणभावाभ्याम् उभे एव काव्ये व्यवस्थिते। ततोऽन्यत्तु चित्राख्यं पद्यमेव न तु काव्यमित्यर्थः। तत्र काव्यव्यवहारस्तु साधर्म्याद् गौण इति भावः।

इति श्रीमहेश्वरन्यायालङ्कारभट्टाचार्यविरचितायां
साहित्यदर्पणटीकायां चतुर्थपरिच्छेदविवरणम् ॥

(लो, ए) प्राचीनभेदयो ध्वनिगुणीभूतव्यङ्ग्ययोरेव।

(लो, ऐ) काव्यत्वमाचार्यसम्मतमित्याह—**तदुक्तमिति**। चित्रं विचित्रमानमास्वादाभावादिति भावः। ननु सरसत्वमेव काव्यसामान्यमिति न्यायसहस्रैरुक्तम्, उच्यते वक्ष्यते च—तस्य च व्यङ्ग्यस्य प्राधान्याप्राधान्याभ्यां ध्वनिगुणीभूतव्यङ्ग्याख्यौ द्वौ भेदौ, तयोरपि प्रत्येकं व्यङ्ग्यस्य वस्त्वलङ्काररसरूपत्वेन त्रैविध्यमित्युक्तप्रकारेणात्मना एव आत्मनो भेदः प्रभेदश्च। इति दुरुपपादं सामान्यलक्षणञ्च व्याप्ते इति

चेत्; अत्रोच्यते—यदि वयं रसवत्त्वाख्यस्य काव्यसामान्यलक्षणस्य वस्त्वलङ्कारव्यङ्ग्ययो काव्यभेदयोरभाव ब्रूम तदेष दोषो, न तथा। 'गतोऽस्तमर्कः' इत्यादिवाक्यानां 'गावो निरध्यन्ता' मित्यादिव्यङ्ग्येषु तात्पर्येऽपि न काव्यत्वम्। किन्तु गुणीभूतयोर्वस्त्वलङ्काररूपयो रसवत्त्वादेव काव्यत्वमित्युक्तत्वात्। रसवत एव काव्यत्वादित्युक्तत्वात्तथा चेयमत्र व्यवस्था, रसवदेव काव्यं, तच्च क्वचित् वस्तुध्वनिना शबलं क्वचिदलङ्कारध्वनिना क्वचिच्चुभयेनेति त्रिविधम्। एवं गुणीभूतव्यङ्ग्येऽपि त्रैविध्यं बोद्धव्यम्। अत एवाह—रसाद्यपेक्षया तु सर्वगुणीभावव्यभिचार एव इति। ननु तर्हि कथं निःशेषच्युतचन्दनमित्यादौ वस्तुध्वने प्राधान्यं, तत्र हि दौत्यकर्मजीविकाया कृतघ्नाया त्वयि तस्मिन् अधमे धृष्टे च मम नासूया, किन्तु यदेवविधाया त्वयि विश्वसिमि, तथाविधे च तस्मिन् अनुरक्तोऽस्मि, तदेवबहुनासहसंजातप्रौढपरितापायास्तु मम युक्तमेवेति विप्रलम्भप्रभेदेर्ष्यामानव्यभिचारनिर्वहणेन प्रधानम्। तदङ्गस्तु लक्षणामूलध्वनिरिति चेत्, मैवम्। वाच्यस्य प्राधान्याप्राधान्यमात्रेण वस्तुध्वनिगुणीभूतव्यङ्ग्याभ्युपगमात्। 'प्राधान्याप्राधान्ये च प्रधानभूतास्वादप्रत्यासत्तयप्रत्यासत्तयपेक्षे एव' इति न्यायविदामभ्युपगमात्। ननवेवमपि यथाकथञ्चित् प्राधान्यमुपकल्प्य वस्त्वलङ्काररूपयोर्ध्वनिगुणीभूतव्यङ्ग्ययो काव्यव्यवहारवर्त्तनेऽस्तु 'रसाद्यनेनापि स निवर्त्तनामिति चेत्,' अत्राह काव्यप्रकाशकार—'यत्रानन्तरं क्रमेण यत्र वा नास्ति कश्चिद्विषय इति। प्रधानं चापातमात्रेण चमत्कारेण प्रथमेन रसेन एव व्यपदेशः।' तथा तेनैवोक्तमलङ्कारप्रस्तावे—"रसादेरङ्गं व्यङ्ग्योऽर्थोऽलङ्कारान्तरं च सर्वत्राव्यभिचारीत्यगणयित्वा एव तदलङ्कारा उदाहृताः" इति। ननवेवमपि ध्वनिगुणीभूतव्यङ्ग्याख्यकाव्यभेदकल्पनया। तयोरलङ्कारेभ्यः पृथगप्रतीतिरिति चेत्, मैवम्। यत्र खलु समासोक्त्यादयोऽलङ्कारेषु व्यङ्ग्यस्य वैचित्र्येणापि प्रतीतिः, न तेषु व्यङ्ग्यस्यान्तर्भावः। वाच्यापेक्षया व्यङ्ग्यस्य प्राधान्याभावात्। यदुक्तं ध्वनिकृता—

"काव्यस्य यत्राप्राधान्यं वाच्यमात्रानुयायिनः।
समासोक्त्यादयस्तत्र वाच्यालङ्कृतय स्मृताः॥" इति

किञ्च क्वचित् कदाचित् यत्रालङ्कारे व्यङ्ग्यस्यास्वादप्रत्यर्थकत्वेन प्राधान्यं, यथाऽप्रस्तुतप्रशंसायां—

'ज वेल्लिएण मइ अणि ज चाणि परहरिं पिअन्तेण।
तमएडे कोहलि अज्ज वन्न रिउत्ति हसि॥'

इत्यादावप्रस्तुतेन कुम्भकर्णेनार्थात् प्रस्तुतस्य गृहस्थस्य युवानं प्रति नायिकाया अप्रसङ्गनिषेधाय प्रस्तुतस्य बालाया यौवनोद्भेदकथनस्य रम्यं ध्वनौ अन्तर्भावेऽस्तु, उक्तरीत्या तस्य महाविषयत्वात्। एवं चालङ्कारेषु गुणीभूतव्यङ्ग्यस्यान्तर्भावे एष एव न्यायः। किञ्च दीपकतुल्ययोगितादौ वेयमुपरञ्जकालङ्कारगणो

प्रतीतिर्न तत्र गुणीभूतव्यङ्ग्याख्यकाव्यभेदान्त पातोऽनास्वाद्यत्वात् व्यङ्ग्यस्य, किं त्ववर्णनीयसन्निधित्वमात्रेणाऽवस्थिते ।। अत एव कविप्रतिभारम्भगाद्यङ्ग्य तपु नास्तीति वाच्यम्। वानारकुञ्जे इत्यादौ व्यङ्ग्यस्य नाऽनास्वाद्यत्वम् किन्तु वाच्या पक्षया आस्वादापकर्षे ह्रते तेषु उचितो गुणीभूतव्यङ्ग्याख्यकाव्यव्यवहारः। कथ च ध्वनिगुणीभूतव्यङ्ग्ययोरलङ्कारेष्वन्तभाव तयोरङ्गित्वात्। अलङ्काराणां च तदङ्गभूतशब्दार्थाश्रितत्वात्। तदुक्त ध्वनिकृता एव—

"अङ्गाश्रितास्त्वलङ्कारा मन्तव्या कटकादिवत्।" इत्यल बहुना।

इति श्रीसाहित्यदर्पणालोचने चतुर्थ परिच्छेद ।

पञ्चमः परिच्छेदः

अथ केयमभिनवा व्यञ्जना नाम वृत्तिरिति, उच्यते । (क, अ)

वृत्तीनां विश्रान्तेरभिधातात्पर्यलक्षणाख्यानाम् ।
अङ्गीकार्या तुर्या वृत्तिर्बोधे रसादीनाम् ॥ १ ॥ (ख, आ)

अभिधायाः संकेतितार्थमात्रबोधनविरतायाः न वस्त्वलङ्काररसादिव्यङ्ग्यबोधने क्षमत्वम् । न च संकेतितो रसादिः ; न हि विभावाद्यभिधानमेव तदभिधानम् ; तस्य तदैक्यरूप्यानङ्गीकारात्[1] । यत्र च स्वशब्देनाभिधानं तत्र प्रत्युत दोष एवेति वक्ष्यामः । क्वचित्तु "शृङ्गाररसोऽयम्" इत्यादौ स्वशब्दाभिधानेऽपि

(वि, क) व्यङ्ग्यभेदात् काव्यभेदस्य उक्तत्वाद् व्यङ्ग्यस्य च व्यञ्जनावृत्तिगम्यत्वाद् व्यञ्जना पृच्छति—**अथ केयमिति** । **अभिनवेति** । आलङ्कारिकैरेव स्वीकृतत्वेन अभिनवत्वम् ।

(वि, ख) **वृत्तीनामिति**—अभिधालक्षणातात्पर्याख्यानां तिसृणां वृत्तीनाम् । **विश्रान्तेरिति**—स्वबोध्यार्थं बोधयित्वा विरतेरित्यर्थः । तुर्या चतुर्थी ।

(वि,ग) व्याचष्टे—**अभिधाया इति**। ननु रसादिरभिधयैव बोध्यताम् इत्यत आह—**न च संकेतित इति** । ननु विभावादिभिरेव रसादिभावादिः संकेतित एव इत्याह—**न हीति**। तदैक्यरूप्यं तत्स्वरूपता, विभावादिर्हि नायकादिः, रसश्च तद्व्यङ्ग्यरत्यादिः। रसस्याऽभिधा गम्यत्वे बाधकान्तरमाह—**यत्र चेति** । काव्यान्तर्गतरसादिशब्देनाऽभिधाने तु न रसादिप्रतीतिरित्याह—**क्वचिच्चेति** । ननु रसादिर्नाभिधया बोध्यताम्,

(लो, अ) इदानीं समनन्तरोक्तं काव्यभेदद्वयस्य व्यञ्जनाव्यापारनिरूपणाधीनत्वेन तत्र विप्रतिपत्तिं निराचिकीर्षुः प्रथमं परिच्छेदमारभमाणः प्रथममभिधादिप्राचीनवृत्तिवेद्यत्वनिराकृतिं प्रथमकारिकामवतारयति—**अथेति**। कः—किं प्रमाणः। इयं समनन्तरोक्तस्य काव्यभेदद्वयस्य साधिका । अभिनवा—अखिलशास्त्रार्थतत्त्ववेदिनः काव्यपुरुषस्यावतारात् श्रीमदानन्दवर्धनाचार्यात् प्राचीनैराचार्यैरप्रदर्शिता ।

(लो, आ) **वृत्तीनामिति**—तुर्या वृत्तिर्व्यञ्जनाध्ययनगमनप्रत्ययनादिव्यपदेशविषया । रसशब्देनात्रास्वाद्यमात्रस्य ग्रहणम् । आदिशब्देन वस्त्वलङ्कारयोः । रसस्य प्राधान्यात् प्रथमं निर्देशः ।

(लो, इ) संकेतितो वाच्याऽर्थः । रसादिरिति कथं न संकेतित इत्याशङ्क्याह—**न चेति** । कुत इत्याह—**न हीति** । यदि स्यादयमर्थः । यदि रसादेः संकेतितत्व-

1 'न च रसादिशब्देन शृङ्गारादिशब्देन चाभिधेयत्वम्, तस्य तदन्वयव्यतिरेकानुविधानात्। किं च' इत्यधिकः पाठः (च. पु)

न तथेति, तस्य स्वप्रकाशानन्दरूपत्वात्।

अभिहितान्वयवादिभि[1]रङ्गीकृता तात्पर्याख्या वृत्ति[2]रपि ससर्गमात्रेण[3] परिणीता न व्यङ्ग्यस्य बोधिनी। (ग) इ)

यच्च [4]केचिदाहु—"सोयमिपोरिव दीर्घदीर्घतरोऽभिधाव्यापार" इति, (घ, ई)

यच्च [5]ध्वनिकेनोक्तम्—

"तात्पर्यान्यतिरेकाच्च व्यञ्जकत्वस्य न ध्वनि.।

नैयायिकस्वीकृतया तात्पर्याख्यया वृत्त्या बोध्यतामित्यत आह—**अभिहितान्वयेति**।

(वि, घ) उभयसिद्धत्वान्न्यायस्य बोधिका शक्तिरूपा वृत्तिरेव व्यङ्ग्यबोधिका, यथा धनुर्धरमुक्तेन इषुणा प्रतिमहितमेकं लक्ष्यं दीर्घेण वेगरूपव्यापारेण भित्त्वा अग्रे तिष्ठति लक्ष्यान्तरमपि दीर्घतरीभूतेन तेनैव वेगरूपव्यापारेण भिनत्ति इति यत् केषाञ्चिन्मतम्, यच्च तात्पर्यवृत्तिरेव व्यङ्ग्यबोधिका इति ध्वनिकस्य मतम्, दूषयितुं तदुभयमुत्थापयति—**यच्च केचिद्** इति। 'सोऽयमित्यभिधैव व्यङ्ग्यबोधिकेति यत् कैश्चिदुक्तं तत्र सोऽयमित्यभिधानरूपेषोर्व्यापार इत्यर्थः।

(वि, ङ) **यच्च ध्वनिकेति—तात्पर्यव्यतिरेकादिति**—व्यञ्जकत्वस्य व्यञ्जनायास्तात्पर्यानतिरिक्तत्वाद् असौ न ध्वनिर्न व्यञ्जना, किन्तु तात्पर्यमेवेत्यर्थः।

मुच्यते तत् किं विभावादिवाचकेन शब्देन[2] किं स्वशब्देन वा[1] नाद्य, तस्य विभावादिभिर्व्यञ्जनीयत्वात्। स्वशब्दाभिधाने च न तस्य प्रतीतिः किन्तु दोष एव। स्वशब्दो हि रसशब्द शृङ्गारादिशब्दो वा इत्यर्थः।

"शृङ्गार सखि! मूर्तिमानिव मधौ मुग्धो हरिः क्रीडती"त्यादौ च विभावादिसामर्थ्यादेव तद्व्यञ्जकत्वम् न तु शृङ्गारादिशब्दस्य। ससर्गमात्रेण प्रत्येक पदैरभिहितानामर्थानामित्यर्थः।

(लो, ई) **यच्चेति**। अयमर्थः—यथा खलु धनुष्मता मुक्तो बाण एकेनैव वेगरूपव्यापारेण शत्रो कवचादिकमनेक भिनत्ति, तथैक एव शब्दस्य व्यापारो यावदुद्देश्य बोधयति।

(लो, उ) ध्वनिको दशरूपकर्ता। तात्पर्यकार्यमुद्देश्यम् यदर्थं शब्दप्रयोग इति भावः। न तुलया धृतम् क्वचिन्निरुद्धप्रसरीकृत्य वाक्यार्थबोधनमात्रे व्यवस्थापितम्।

---

1 '–भिरप्यङ्गी–' (क पु) 2 शक्ति (क पु)
3 ससर्गमात्रबोधने (ख पु)
4 केचिल्लोल्लटादय (घ च पु) 5 ध्वनिना (च पु) ध्वनिकारेण (घ पु)

यावत्कार्यप्रसारित्वात्तात्पर्यं न तुलाधृतम् ॥ " इति, (ङ, उ) ❀ तयोरपरि 'शब्दबुद्धिकर्मणा विरम्य व्यापाराभाव"वादिभिरेव पातनीयो दण्ड । (च, ऊ) *

यावत्कार्यं यावदर्थबोधनरूप कार्यम् , तत्प्रसारित्वात्तात्पर्यम् , न तुलाधरणेन नियमितमित्यर्थ ।

(वि, च) तयोरुपरीति । इषुव्यापारवादितात्पर्यवादिनोरुपरीत्यर्थ । वाच्यव्यङ्ग्ययोर्युगपद्बोधने तात्पर्यसत्त्वे क्रमशो बोधनानुपपत्ति , क्रमशो बोधे च तत्सत्त्वे विरम्य व्यापाराभाव इत्यर्थ । इद च दूषण न रुचिरम्, व्यञ्जनावादिनापि क्रमशो बोधाङ्गीकारेण विरम्य व्यापारस्वीकारात् । तात्पर्यसत्त्वे वृत्तिभेद एव विरम्य व्यापार स्वीक्रियते, न तु एकया वृत्त्या इति चेन्न । तात्पर्यस्यैव नियामकत्वेन वृत्तिभेदस्याकिञ्चित्करत्वात् शब्दविरतेश्चोभयत्र साम्यात् । तस्मात् क्रमशो बोधेन तात्पर्यग्राहकाभाव एव तयोरपरि दोष । न च फलमेव तद्ग्राहकमिति वाच्यम्, फलस्य तात्पर्योत्तरभावित्वात् । क्रमशो व्यञ्जनया बोधने तु वक्तृबोद्धव्यादिवैशिष्ट्यमेव तात्पर्यग्राहकम् । न चैव तद्ग्राहित तदेव तात्पर्यं ध्वनिकर्मते वृत्तिरस्तु, न व्यञ्जनेति वाच्यम् अतात्पर्यविषयेऽपि क्वचिद् व्यञ्जनादर्शनात् । यथा "यन्नोन्मदाना प्रमदाजनानाम्" इत्यत्रातात्पर्यविषयस्य व्यङ्ग्यशृङ्गारस्य अपराङ्गम्, यथा वा "सुरभिमास भुङ्क्ष्व" इति सुगन्धिमासतात्पर्यके वाक्ये धेनुमासव्यञ्जना । दीर्घदीर्घतराभिधावादिमते तु तदभिधाग्राहकशब्दाद्यभाव एव दोष , अगृहीतयैवाभिधया व्यङ्ग्यबोधनोक्तिस्तत्प्रमाणाभावेनैव निरसनीया ।

(लो, ऊ) विरम्य व्यापाराभाववादिभि —अभिहितान्वयवादिभि । किमस्माकमार्द्रचर्माणि वा वहिलचिन्तया इत्यर्थ ।

❀ व्यञ्जकत्वस्य व्यञ्जनायास्तात्पर्याव्यतिरेकात् तात्पर्यादभिन्नत्वान्न ध्वनि । व्यञ्जनावगम इति भाव । ननु तात्पर्याख्यवृत्तेस्तात्पर्यबोधकत्वात् व्यङ्ग्यार्थस्यापि बोधकत्वमत आह—**यावदिति** । तात्पर्यस्य कार्याणि यावत् काल तिष्ठन्ति तावत्काल स्थायित्वात् तात्पर्यव्यङ्ग्यार्थयोरपि बोधनक्षमत्वमिति भाव । न तुलाधृतम्, तात्पर्यवृत्ते सीमा तु निर्धारितो न भवति, अतोऽधिक व्यङ्ग्यादिरपि बोधयतीति भाव ।

* प्रथमशब्दो द्वितीय जनयित्वा निवर्तते, एव द्वितीयादिरपि । तथैव ज्ञानमिच्छां जनयित्वा निवर्तते, तथैव प्रथम कर्म द्वितीय जनयित्वा निवर्तते । अत एका वृत्तिरेकमर्थं बोधयित्वाऽपरमपि बोधयितु न क्षमा । इति तु येषा मत तैरत्र दोषो दर्शनीय । अत्र तात्पर्यवृत्ति फलरूप सस्पर्शमात्र बोधयित्वा विरता सती कथ व्यङ्ग्यार्थमपि बोधयितु क्षमा ?

1 'इति' इत्यधिक पाठ (क पु) 'भाव इति विरम्यव्यापाराभावादिभिरेव' (ग पु)

एवञ्च किमिति लक्षणाऽभ्युपास्या, दीर्घदीर्घतरा[1]भिधाव्यापारेणापि तदर्थ बोधसिद्धे । (छ, ऋ)

किमिति च " ब्राह्मण ! पुत्रस्ते जात कन्या ते गर्भिणी" त्यादावपि हर्षशोकादीनामपि न वाच्यत्वम् । (ज, ऋ) *

यत्पुनरुक्तम् , "पौरुषेयमपौरुषेय च वाक्य सर्वमेव कार्यपरम्, अतत्परत्वेऽनुपादेयत्वादुन्मत्तवाक्यवत्, ततश्च काव्यशब्दाना निरतिशयसुखास्वादव्यति

(वि, छ) अभिधारूपाया वाच्यार्थबोधकवृत्तेर्व्यङ्ग्यबोधकत्वे दोषान्तरमाह—एवञ्चेति ।

(वि, ज) ननु न अङ्गीकार्यैव लक्षणा इत्यत आह—किमिति चेति । कन्येति—अत्र कन्या अदत्ता तस्या एव गर्भ पितु शोकात् । अत्र हि सम्बोध्य-ब्राह्मणसन्निहिताऽपरजनस्य तादृशशब्दश्रवणानन्तर ब्राह्मणस्य हर्षशोकावगमात् त च्छब्दीयदीर्घतराभिधयैव तद्बोधसम्भवेन तयोर्वाच्यतापत्तिरित्यर्थ ।

(वि, झ) यत्पर शब्द स शब्दार्थ " इति जैमिनिवाक्यमेव व्यङ्ग्य बोधने तात्पर्याख्यवृत्तौ प्रमाणमिति मत दूषयितुमुत्थापयति—यत्पुनरिति । पौरुषेय लौकिकवाक्यम् , अपौरुषेय वैदिकवाक्यम् । कार्यपरम्—साध्यतात्पर्यकम् । ननु कार्यपरत्वे प्रकृते किमायातमित्यत आह—ततश्चेति । निरतिशयसुखास्वाद एव

(लो, ऋ) एव च यदि शब्दश्रुतेरनन्तर यावानर्थोऽवगम्यते तावति शब्दस्याभिधा एव व्यापार इति भाव । 'लक्षणा' इत्यनन्तर पृथगिति शेष । तदर्था लक्षणीय ।

(लो, ऋ) अनुपपत्त्यन्तरमाह—किमिति चेति । अयमर्थ—हर्षादयो हि न केनापि वाच्यत्वेनाभ्युपगम्यन्ते, यतोऽमी वाच्यार्थप्रतीत्या न क्रियन्ते । न खलु शब्दस्य कारकत्व ज्ञापकत्वात्तस्य ।

(लो, ऌ) सम्प्रति गुरुमतैकदेशीयस्य, "यत्पर शब्द स शब्दार्थ इति वादिनो मतमाशङ्क्य दूषयति—यत्पुनर् इति । पौरुषेयमित्यादिन्यायादित्यन्त

---

* यदि तात्पर्याभिधान्यतरव्यापारेण व्यङ्ग्यावबोधे व्यञ्जना निरस्ता तदा तेनैव व्यापारेण लक्ष्यार्थस्यापि बोधो भवितुमर्हति । अतो लक्षणापि निरसनीया पर तु तैरेवाङ्गीक्रियते लक्षणा । किमितीति—प्रोषितेन ब्राह्मणेन पृष्टो देशादागतो विप्रो गृहवार्ता कथयति, ब्राह्मणेति गर्भानन्तरमस्यागमनात् । पुत्रोत्पत्तिप्रतिपादक वाक्य हर्षव्यञ्जकम् गर्भिणीतिवाक्यमविवाहिताया कन्याया स्वामिव्यभिचारबोधकत्वात् शोकव्यञ्जकम् । व्यञ्जनानङ्गीकारे अनयोरपि शोकादीना वाच्यत्वापत्ति ।

1 तरेति नास्ति (न पु) 2 गुर्विणी (ख पु)

रेकेण प्रतिपाद्यप्रतिपादकयोः प्रवृत्त्यौपयिकप्रयोजनान्तरानुपलब्धेर्निरतिशयसुखास्वाद एव कार्यत्वेनावधार्यते—'यत्परः शब्दः स शब्दार्थः' इति न्यायात्। इति। (ऋ, लृ) *

तत्र प्रष्टव्यम्—किमिदं तत्परत्वं नाम? तदर्थत्वं वा, तात्पर्यवृत्त्या बोधकत्वं[1] वा? आद्ये न विवादः; व्यङ्ग्यत्वेऽपि तदर्थत्वानपायात्। द्वितीये तु—केयं तात्पर्याख्या वृत्तिः? अभिहितान्वयवादिभिरङ्गीकृता, तदन्या[2] वा? आद्ये दत्तमेवोत्तरम्। द्वितीये तु नाममात्रे विवादः; तन्मतेऽपि तुरीयवृत्तिसिद्धेः। (ऋ, ए)

कार्यत्वेनानुभूयत इति। तथा च सुखास्वादकारणता काव्यवाक्यस्य व्यङ्ग्यबोधद्वारेणैव एतद्वाक्यस्य व्यङ्ग्यतात्पर्यकत्वात्। **स शब्दार्थ** इति। जैमिनिवाक्यस्य सशब्दस्य तात्पर्यवृत्तिलभ्योऽर्थ इत्यर्थ।

काव्यप्रकाशे तु अस्य वाक्यस्य भिन्न एवार्थ कृतः। तथा हि—"यत्परो यत्साध्यतात्पर्यक शब्दः स शब्दस्य प्रामाण्यनियामकोऽर्थ' न तु सिद्धाशे तस्य शब्दस्य प्रामाण्यम्" इति। यथा, "गामभ्याज" इत्यत्र साध्याशोऽभ्याजनं प्रामाण्यनियामकोऽर्थो न तु सिद्धगवाशः, यथा वा, "दध्ना जुहोति" इत्यत्र दध्नः करणत्वं साध्याशस्तु तथा, न तु वाक्यान्तरत. सिद्धहोमांश इति।

(वि, ञ) स्वयं कल्पितार्थे वितर्कयति—**तत्र प्रष्टव्यमिति**। स शब्दार्थ इत्यस्य वाक्यस्य तत्परत्वमर्थ तदेव तत्परत्वं पृच्छति—**किमिदमिति**। तदर्थत्वम्—तत्प्रतीतिप्रयोजनकत्वम्। तदर्थत्वानपायात्—तत्प्रतीतिप्रयोजनकत्वानपायात्। **दत्तमेवोत्तरमिति**—संसर्गमात्र एव तैस्तात्पर्याख्यवृत्त्यभ्युपगमादित्यर्थः। **तदन्या वा इति**—तात्पर्याख्या वृत्तिः संसर्गं बोधयित्वा व्यङ्ग्यार्थमपि बोधयतीति ध्वनिनेन यदुक्तं तच्च

शब्दग्रन्थः। तत्रेत्यादिना सिद्धान्तः। पौरुषेयं लौकिकम् अपौरुषेयो वैदिकम्। कार्यमुद्देश्यम्। ततश्च यस्मादेवमनुमानमित्यर्थ। प्रतिपाद्यो यं प्रति वाक्यं श्राव्यते; प्रतिपादकस्तस्य श्रावयिता। कार्यत्वेनावधार्यते इत्यर्थ'। तस्मान्निरतिशयसुखास्वादरूपो रसादिरूपोऽर्थः शब्दस्य तात्पर्यविषयो जातः किं वृत्त्यन्तरकल्पनयेति। यत्परो यदुद्देश्यप्रयुक्तः; स शब्दार्थः शब्देनास्यं बोद्धव्यः।

(लो, ए) **तत्रेति**—यदुक्तं पौरुषेयमित्यादि तत्र प्रष्टव्यमित्यर्थ.। तदर्थत्वं तस्य शब्दस्यार्थत्वम्। दत्तमेवोत्तरं तयोरुपरीत्यादिना।

---

* प्रतिपाद्यप्रतिपादकयो. श्रोतृवक्त्रोः। 'इदं पदमसुमर्थं बोधयतु' इति वक्तुरिच्छा तात्पर्यम्। शब्दस्य यत्र तात्पर्यं स शब्दार्थः। अतस्तात्पर्येणैव रसादिबोधे व्यञ्जनाद्वीप्सारेणालमिति भाव।

1 'बत्परत्वं' (ग घ) 2 'तद्बोधकत्वं' (ङ. घ)

नन्वस्तु युगपदेव तात्पर्यशक्त्या विभावादिससर्गस्य रसादेश्च प्रकाशनमिति चेन्न, तयोर्हेतुफलभावाङ्गीकारात्। यदाह मुनि —"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति" इति। सहभावे च कुत सव्येतरविषाणयोरिव कार्यकारणभाव ? पौर्वापर्यविपर्ययात्। (ट, ऐ) * "गङ्गायां घोष" इत्यादौ तटाद्यर्थमात्रबोधनविरतायां लक्षणायाश्च कुत शीतत्वपावनत्वादिव्यङ्ग्यबोधकता ? तेन तुरीया वृत्तिरपास्यैवेति निर्विवादमेतत्। (ठ, ओ)

प्रागेव दूषितम्। ततोऽन्या वेत्यस्य तात्पर्यभिन्नोऽतिरिक्तपदार्थ इत्येवार्थ। **नाममात्रे**ति—अङ्गीकृताया तुरीयवृत्तौ, 'व्यञ्जना वा तात्पर्यं वा तन्नाम' इत्येव विवाद इत्यर्थ।

(वि, ट) ननु अतिरिक्तपदार्थरूपा तुरीया वृत्तिर्ध्वनिकेन नोच्यते, किन्तु कल्पिततात्पर्यमेव व्यङ्ग्यबोधकम्। तेन च क्रमशो बोधन एव, "शब्दबुद्धिकर्मणाम्" इत्यादुक्त दूषण युगपदेव तेन बोध्यतामित्याशङ्कते—**नन्विति**। तात्पर्यशक्त्या तात्पर्यरूपतया वृत्त्या। तयो विभावादिससर्गप्रकाशनरसादिप्रकाशनयोरित्यर्थ। रसनिष्पत्तिरित्यत्र रसस्य ज्ञाननिष्पत्तिरेव निष्पत्ति स्वप्रकाशस्य स्वज्ञानाभिन्नत्वात्। षष्ठ्या च विभावादिससर्गज्ञानस्य कारणताप्रदर्शनात्। सहभावेनोपपत्तौ तद्दर्शितकारणतानुपपत्तिं दर्शयति—**सहभावे चेति**। सव्येतरविषाणे वामदक्षिणगवादिशृङ्गे।

(वि, ठ) ननु लक्षणामूलव्यञ्जना नाद्रियताम्, एकयैव लक्षणया लक्ष्यव्यङ्ग्यार्थद्वय बोध्यतामित्यत आह—**गङ्गायामिति**।

(लो, ऐ) नन्विति। प्रकाशनमित्यनन्तर, "तथा सति विरम्यव्यापारो न भविष्यति" इति शेष। अनयैव दिशा प्रतीयमानयोर्वस्त्वलङ्कारयोरपि, "यत्पर शब्द स शब्दार्थ" इतिन्यायाश्रयेण व्यञ्जनाङ्गीकारोऽनुपपन्न एव। किञ्च, "यत्पर शब्द स शब्दार्थ" इति न्यायमङ्गीकुर्वता व्यञ्जनानङ्गीकारे वानीरकुञ्ज इत्यादौ गुणाभूत प्रतायमानार्थ प्रथममवतरन् शब्दस्य तत्परत्वाभावात् कस्य व्यापारस्य विषयतामवलम्बताम् ? ननु तर्हि भट्टनयवत्, 'पीनो देवदत्तो दिवा न भुङ्क्ते।' इत्यादौ, 'रात्रौ भुङ्क्ते' इत्यादिवदत्रापि व्यङ्ग्यार्थप्रतीतौ वाक्यशेष कल्पतामिति चेन्न। "धर्मिकल्पनातो वर धर्मकल्पना" इति न्यायाद् व्यापारान्तरकल्पनस्यैव न्याय्यत्वात्।

(लो, ओ) एव पूर्वोक्तव्यङ्ग्यानामभिधातात्पर्यावेद्यत्व निरस्य लक्षणावेद्यत्व दूषयति—**गङ्गायामिति**। उपसहरति—**तेनेति**। तेन हेतुना।

---

* हेतुफलभावाङ्गीकारात्—कार्यकारणत्वस्वीकारात्। तथा हि विभावादिससर्गः कारण रसादिकार्यम्। पर तयोर्यौगपद्ये तु कार्यकारणभावो न सम्भवति। अनन्य-

1 'पौर्वापर्यविपर्ययात्' इति नास्ति (घ पु)

किञ्च—

बोद्धृस्वरूपसंख्यानिमित्तकार्यप्रतीतिकालानाम् ।
आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः ॥ २ ॥
(ड, श्रो)

वाच्यार्थव्यङ्ग्यार्थयोर्हि पदतदर्थमात्रज्ञाननिपुणैरपि वैयाकरणै सहृदयैरेव च संवेद्यतया बोद्धृभेद । (ढ)

" भम धम्मिअ " इत्यादौ क्वचिद् वाच्ये विधिरूपे निषेधरूपतया, क्वचित् , " नि शेषच्युतचन्दनम्—" इत्यादौ निषेधरूपे विधिरूपतया च स्वरूपभेद । (ण, थ)

" गतोऽस्तमर्कः " इत्यादौ च वाच्योऽर्थ एक एव प्रतीयते । व्यङ्ग्यस्तु

(वि, ड) ननु अभिधा लक्षणा च दीर्घतरीभूतैव व्यङ्ग्यार्थं बोधयतु, कुतस्तयोर्विरम ? शब्दस्य विरम्यव्यापारस्तु भवन्मते व्यङ्ग्यबोधन इव स्वीकार्य इत्यतो वैधर्म्यादेव वाच्यव्यङ्ग्यबोधकव्यापारयोर्भेद साधयति । किञ्च—**बोद्धृस्वरूपेति**—बोद्धा, स्वरूपम्, सख्या, निमित्तम्, कार्यम्, प्रतीति, काल, आश्रय, विषयश्चेत्यादीना च भेदादित्यर्थ । एषा भेद स्वयमेव दर्शयिष्यति । **भिन्नोऽभिधेयतो व्यङ्ग्य** इति—यद्यपि अभिधाव्यञ्जनयोरेव भेद प्रदर्शनीय, तथापि तद्भेदप्रदर्शनेनैव तद्बोधकस्यापि भेद प्रदर्शित इत्याशयेन इत्थमुक्तम् ।

(वि, ढ) तत्र बोद्धृभेद दर्शयति—**वाच्यार्थव्यङ्ग्यार्थयोरिति** । वाच्यार्थस्य वैयाकरणैर्वेद्यतया, व्यङ्ग्यार्थस्य च सहृदयैरित्येव यथासख्यमन्वय । वैयाकरणा हि पदस्य पदवाच्यार्थस्य ज्ञानमात्रे निपुणा, न तु व्यङ्ग्यार्थज्ञाने ।

(वि, ण) स्वरूपभेद दर्शयति—**भमेति** । अत्र भ्रमणविधिर्वाच्योऽर्थ । अभ्रमण निषेधो व्यङ्ग्य । **निषेधरूपे** इति—तदन्तिकेऽगमन निषेधो वाच्य । तदन्तिके गमनविधिर्व्यङ्ग्य इत्यर्थ । विधिरूपे वाच्ये ज्ञाते सति निषेधरूपतया व्यङ्ग्यो ज्ञायत इत्यर्थ । एवमुत्तरत्रापि ।

(लो, औ) व्यङ्ग्यस्याभिधेयत्वे दूषणान्तरमवतारयति—**किञ्चेति** । भेदादित्यस्य बोद्धृत्वादौ प्रत्येकमन्वय । तेन बोद्धृभेदात्, स्वरूपभेदात्, सख्याभेदादित्यादि बोद्धव्यम् ।

(लो, अ) 'नि शेषच्युतचन्दनम्' इत्यादौ "गतासौ" इत्यर्थस्य व्यङ्ग्यत्वमङ्गीकृत्य विधिरूपत्वोक्ति ।

थाद्भिन्नियतपूर्ववर्तित्व कारणत्वम्, नियतपश्चाद्भावित्व कार्यत्वमिति तल्लक्षणात् । तयोर्योगपद्ये तु कारणकार्यलक्षणस्य तत्राव्याप्तिरिति भाव ।

तद्बोद्धादिभेदात् क्वचित् " कान्तमभिसर " इति, " गावो निरुध्यन्ताम् " इति, " नायकस्यायमा[1]गमनावसर " इति, "सन्तापोऽधुना नास्ति " इत्यादिरूपेणानेक इति सख्याभेद (आ)

वाच्यार्थं शब्दोच्चारणमात्रेण वेद्य , एष तु तथाविधप्रतिभानैर्मल्यादिनेति निमित्तभेद । प्रतीतिमात्रकरणाच्चमत्कारकरणाच्च कार्यभेदः (त)

केवलरूपतया चमत्कारितया च प्रतीतिभेद । पूर्वपश्चाद्भावेन च कालभेद । शब्दाश्रयत्वेन शब्दतदेकदेशतदर्थवर्णसघटनाश्रयत्वेन चाश्रयभेद । (थ) *

कस्स वा ण होइ रोसो दट्ठूण पिआए सव्वणं अहरं ।
सभमरपडमग्घाइणि ! वारिअवामे ! सहसु एण्हिं ।

(वि, त) सख्याभेद दर्शयति—**वाच्याऽर्थं** इति । **एष** इति—व्यङ्ग्य इत्यर्थ । कार्यभेद दर्शयति—**प्रतीतिमात्रेति**—अभिधाया अभिधेयप्रतीतिमात्र कार्यम्, व्यञ्जनायास्तु चमत्कारोऽपि कार्यम् ।

(वि, थ) कालभेद दर्शयति—**पूर्वपश्चादिति** । आश्रयभेद दर्शयति—**शब्दाश्रयत्वेनेति** । अभिधाया शब्दमात्रमाश्रय । व्यञ्जनायास्तु शब्दतदेकदेश वर्णादि ।

(वि, द) विषयभेद दर्शयति—**'कस्स वा ण होइ'** इति ।

कस्य वा न भवति रोषो दृष्ट्वा प्रियाया सव्रणमधरम् ?
सभ्रमरपद्माघ्रायिणि ! वारितवामे !सहस्वेदानीम् ।" इति सस्कृतम् ।

उपनायकदष्टाधरा पत्नी तर्जयन्त प्रति नायिकासख्या प्रतारणोक्तिरियम् । हे वारितवामे ! वारिते सभ्रमरपद्माघ्राणे वामे प्रतिकूले इत्यापातत । वारितायामधर

(लो, आ) बोद्धादीत्यादिशब्देन वक्तृप्रकरणादय ।

(लो, इ) **कस्स वा** णेति—वारितादर्थाद् वामे प्रतिकूलकारिणि । तत्र वाच्य सखीविषयम् भ्रमरेण दष्टाधरेय, न पुन परकामुकेन इति व्यङ्ग्यं तु कान्तविषयम् । एव बोद्धृस्वरूपादिभेदेऽपि यदि वाच्यव्यङ्ग्ययोरेकत्व तदा क्वचिदपि नीलपीतादौ नरपुङ्गवादौ भेदो न स्यादित्याशय । ननु गतोऽस्तमर्क इत्यादिवाक्ये प्रकरणादिरूपज्ञापकान्तरसहायेनैव बाधितस्य कान्तमभिसरेत्यादि

---

* पूर्वं हि वाच्योऽर्थ प्रतीयते पश्चात्तु व्यङ्ग्य इति कालस्य भेद । वाच्यस्य शब्दमात्रमाश्रय , व्यङ्ग्यस्य तु शब्द , तदेकदेश , प्रकृतिप्रत्ययादि । तदर्थ —शब्दार्थ —वाच्य-लक्ष्य व्यङ्ग्यात्मकस्त्रिविधोऽपि, वर्ण सघटना रचना च । तदाश्रयत्वेनाश्रयस्य भेद ।

1 '—यमनागमना—' इति (ग पु)

इति सखीतत्कान्तविषयत्वेन[1] विषयभेद । तस्माज्ञाभिधेय एव व्यङ्ग्य' । (द, इ)।

तथा[2]—(ई)

प्रागसत्त्वाद्रसादेर्नो बोधिके लक्षणाभिधे ।

दशपर्यन्ताया रतौ वामे' इति तु गूढम् । सहस्वेत्यत्र पत्युस्तर्जनकर्म बोध्यम् । **सखीतत्कान्तेति**—वक्त्र्या सखी नायिका, तत्कान्तस्तत्पति । तद्विषयत्वेन—तज्ज्ञानविषयत्वेन । नायिकया हि प्रतीयते इयं प्रतारयतीत्येव व्यङ्ग्यार्थ । **तस्मादिति**—व्यङ्ग्यार्थो नाभिधागम्य इत्यर्थ ।

(**वि ध**) रसादिबोधिका न लक्षणा नापि अभिधा सम्भवतीत्याह-**प्रागसत्त्वादिति** । तत्काव्यस्थशब्दजन्यो यो रसास्तस्य शब्दबोधानन्तरमेव जन्यमानत्वात् तत्प्राक् तस्याऽसत्त्वात् तत्र तत्काव्यस्थशब्दस्य शक्तेर्लक्षणाया वा ग्रहीतुमशक्तत्वादित्यर्थ, प्रागुपस्थिते वस्तुन्येव तयोर्ग्रहणसम्भवात् । ननु काव्यात् प्रथममनुभूयमानो यो रसस्तन्निष्ठसामान्यधर्मरूपया सामान्यलक्षणया उपस्थिते भाविन्यपि रसे शक्तिग्रहोऽस्त्विति चेन्न । शक्त्या लक्षणया वा प्राथमिकरसबोधस्यैव तत्सम्भवात् प्राक् तस्याऽनुपस्थितत्वात् विभावादिवाचकशब्दानां तत्र शक्तिग्राहकत्वाभावाच्चेत्यपि

व्यङ्ग्यार्थस्य कथं शब्दप्रमाणबोध्यत्वम्, शब्दैकगम्यत्वाभावाद्, इति चेद्—अत्र केचिदाहु—यथा शब्दबोधितस्य क्वचिद् वाच्यस्यार्थस्य सत्यागत्यत्वजिज्ञासायां गत्यत्वमनुमानविषय इति शब्दानुमानप्रमाणयोर्भिन्नविषयत्वम् । व्यङ्ग्यस्तु एष एव शब्दप्रमाणेन प्रकरणादिबोध्य इति दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यम् । तत्र का गतिरिति चेत्—तत्रैव शक्तिरिति । यथा प्रकरणादेर्विप्रलम्भायनेकाभिधेयस्याऽपि हर्याद्यभिधेयावच्छेदकत्वं तथानेकव्यञ्जकस्यापि शब्दस्य एकव्यङ्ग्ये प्रकरणादिगाह्यस्यैवेति कर्तव्यतारूपतया शब्दस्याऽङ्गत्वं स्वाङ्गस्य चाव्यवधायकत्वं न्यायसिद्धमेवेति न शब्दप्रमाणव्याकोप । इह च यद्यपि वाक्यार्थस्य प्रतीत्यनन्तरं तस्य सत्यागत्यत्वजिज्ञासायां गत्यत्वं प्रमाणान्तरेणानुमानेनैव बोध्यते, तथापि गत्यागत्यत्वजिज्ञासात पूर्वमुपस्थाया वाक्यार्थप्रमाया अप्रमाभावात् शब्दैकगम्यत्वस्य न शब्दप्रमाणस्य व्याकोप । न हि चक्षुषादिना प्रतीतौ सत्यामनुमानेन प्रामाण्यं व्याकुप्येत ।

(**लो, ई**) **तथेति** । न ननु एतावतैव व्यङ्ग्यस्यानभिधानमुक्तबोध्यत्वं नास्ति, अपि तु इतरथापीत्यर्थ ।

(**लो, उ**) **प्रागिति** । अयमर्थ—रसभावादेर्व्यङ्ग्यस्य प्रागसत्त्वान्नलक्षणाभिधे न वाचिके । अयोगमपि व्यङ्ग्यानां मुख्यार्थबाधविरहादपि न लक्षणा केचिदिति । अपि पूर्वोक्तमुक्त्यै ।

---

1 '-सत्यागत्यत्व' (ग घ) 2 (ङ च (क घ)

किञ्च मुख्यार्थबाधस्य विरहादपि लक्षणा ॥ ३ ॥
'न बोधिका इति शेषः । (ध, उ)

[1]*नहि कोऽपि रसनात्मकव्यापारान्निन्नो रसादिपदप्रतिपाद्यः पदार्थः प्रमाणसिद्धोऽस्ति; यमिमे लक्षणाभिधे बोधयेताम् । किञ्च यत्र 'गङ्गायां घोषः' इत्यादौ उपात्तशब्दार्थानां बुभूषन्नेवान्वयोऽनुपपत्त्या बाध्यते तत्रैव हि लक्षणायाः प्रवेशः । * (न, ऊ)

तदुक्तं न्यायकुसुमाञ्जलावुदयनाचार्यैः—

श्रुतान्वयादनाकाङ्क्षं न वाक्यं[2] ह्यन्यदिच्छति ।
पदार्थान्वयवैधुर्यात्तदाक्षिप्तेन सङ्गतिः ॥ (प, ऋ)

बोध्यम् । नापि कोषग्राहितशक्तिमात् काव्यस्थशृङ्गारादिशब्दात्तद्बोधः, अननुभवात् । प्रत्युत तत्तत्त्वे रसादेः स्वशब्दवाच्यतादोषस्यैव वक्ष्यमाणत्वात् । अतः शृङ्गारादिशब्दबोध्यत्वे रसत्वानाप्तेः, किन्तु विभावाद्यभिधानद्वारैव तत्प्रतीतेरानुभविकत्वात् ननु इह काव्यस्थात् शृङ्गारादिशब्दाज्ज्ञातस्य रसस्य प्रागुपस्थितत्वेन विभावादिवाचकशब्दैर्लक्षणया रसादेर्बोधोऽस्तु इत्यत आह—**किञ्च मुख्यार्थेति** । लक्षणेत्यस्य शेषश्चलं पूर्वतोऽनुषज्यते—**न बोधिकेति** ।

(वि, न) ननु रसेऽपि तात्पर्यसत्त्वाल्लक्षणा विना तदनिर्वाह एव मुख्यार्थबाध उच्यत इत्यत आह—**न ह्रीति** । यदि रसादिशब्दात्तस्य प्रागुपस्थितिस्तदैव तस्य लक्षणया बोधार्थमुक्तरूपमुख्यार्थबाधनिर्वचनं सैव तु नेत्यर्थः । रसनात्मको व्यञ्जनात्मको व्यापारो यस्य, एतादृशरसाद् भिन्न एव रसादिप्रतिपाद्य इत्यर्थः । बुभूषन्—भवितुमिच्छन् । प्रवाहादौ घोषाद्यन्वयः ।

(वि, प) अस्मिन्नर्थे संवादं दर्शयति—**तदुक्तम्** इति । श्रुतान्वयात्—श्रुतपदार्थयोरन्वयसम्भवात्, अबाधितादन्यन्नाऽनाकाङ्क्षं वाक्यमन्यद्धि नेच्छति नाकाङ्क्षति । पदार्थान्वयवैधुर्यात्—पदार्थयोरन्वयाऽसम्भवात् । तदाक्षिप्तेन—तदुल्लिखितेन । सङ्गतिरन्वय इत्यर्थः ।

(लो, ऊ) प्रमाणसिद्ध इत्यनन्तरम् , " क्वचिद् " इति शेषः ।

(लो, ऋ) श्रुतान्वयादिति । अन्यत्—पदार्थान्तरम् । नेच्छति नापेक्षते । यदि तु 'गङ्गाया घोषः' इत्यादौ पदार्थानामन्वयकाल एव बाधप्रतिभासाद्यन्वयस्य विधुरीभावस्तदा तेन पदार्थेन जलमयादिना आक्षिप्तो यस्तटादिस्तेन सङ्गतिरन्वय इत्यर्थः ।

---

1 * तारकितः पाठः ग. घ. पु. नास्ति । 2 'वाच्य' (ज. पु.)

न पुन, 'शून्य वासगृहम्' इत्यादौ मुख्यार्थस्य बाध । (फ, ऋ)

यदि च, " गङ्गायां घोषः " इत्यादौ प्रयोजनं लक्ष्य स्यात्, तीरस्य मुख्यार्थत्व बाधितत्व च स्यात्, तस्यापि च लक्ष्यतया प्रयोजनान्तरम्, तस्यापि प्रयोजनान्तरमित्यनवस्थापात । (ब, ऌ)

न चापि प्रयोजनविशिष्ट एव तीरे लक्षणा विषयप्रयोजनयोर्युगपत्प्रतीत्य-

---

(वि, फ) एव, 'शून्य वासगृहम्' । इत्यादौ शून्यवासगृहादीना विलोकना यन्वयाबाधाद् न रसलक्षणेत्याह—**न पुनरिति** ।

(वि, ब) नन्वेव रसबोधनार्थमेव व्यञ्जना स्वीकियताम्, 'गङ्गाया घोष ' इत्यादौ यत् शैत्यपावनत्व च व्यङ्ग्यमुक्त तीरलक्षणानन्तर तत्रापि लक्षणैवास्तु, किं व्यञ्जनया ? इत्याह—**यदि चेति** ।

प्रयोजन प्रयोजनीभूतज्ञानविषय । **मुख्यार्थत्वं बाधितत्वं च स्यादिति**—उभय-मेव तु नास्तीति शेष । प्रयोजनस्य लक्ष्यत्वेऽनवस्था स्यादित्यत आह—**तस्यापीति** । अनवस्थापात इत्यत्र अनवस्थापातश्चेत्यर्थ ।

(वि, भ) ननु लक्ष्यार्थबोधानन्तर यदि प्रयोजने लक्षणा तदैवानवस्था, शीतपावने तीरे घोष इत्येव प्रयोजनविशिष्ट एव लक्षणास्त्वित्यत आह—**न चापीति** । तत्र गङ्गातीरे घोष इत्यतोऽधिकार्थस्य प्रतीति प्रयोजनमिति काव्यप्रकाशकृदुक्त प्रयो-जनमनुमन्येयम् । समाधत्ते—**विषयप्रयोजनयोरिति** । पावनत्वविशिष्टतीरलक्षणाया

(लो ऋ) तत किमित्यत आह—**न पुनरिति** । तत्र्य रसादिप्रतीतौ लक्षणा इत्यर्थ ।

(लो, ऌ) नन्वेव *विवक्षितान्यपरवाच्ये ध्वनौ मास्तु लक्षणा, अविवक्षितवाच्ये* तु शीतत्वपावनत्वादिरूप प्रयोजन लक्षणीयमस्त्वित्याशङ्क्याह—**यदि चेति** । शब्दो हि प्रथम मुख्यमर्थ प्रतिपाद्य तस्य वाक्यार्थान्वयानुपपत्तौ तत्सम्बन्धिनमर्थ लक्षयति । इह यदि तीरप्रत्ययानन्तर बोध्य प्रयोजन लक्षयति तदा गङ्गाशब्दस्य तीर मुख्योऽर्थ स्यात् । तस्य च वाक्यार्थान्वयानुपपत्ति स्यात् इत्यर्थ । प्रयोजनलक्ष्यत्वेऽनवस्यादोषो-ऽपीत्याह—**तस्यापीति** । तस्य तया लक्ष्यतया अङ्गीकार्यस्य प्रयोजनान्तरम्, रूढिप्रयोजनाभावे लक्षणासम्भवादित्यर्थ । तस्यापि—द्वितीयप्रयोजनस्य । " अनवस्था या मूलक्षतिकारिणी " मूल खल्व तीरनिष्टस्य पावनत्वस्य च पूर्वपक्षेण लक्ष्यत्वेनाङ्गी-कार । तस्येयविधाऽनर्थमूलत्वेन परित्यागो न्याय्य इति भाव ।

(लो, ए) ननु यदि तटार्थबोधनाय लक्षणावृत्तिराश्रयणीया, इह चैतद्वि शिष्टमेव तट लक्षणा बोधयतु किं वृत्त्यन्तरेण ? तथा हि गङ्गातादात्म्येन तत्-प्रत्ययस्यालक्ष्य, गङ्गातादात्म्यप्रतीत्या च तटस्य दैवसिद्धमेव शैत्यादिविशिष्टत्व-मित्याशङ्क्याह—**न चापीति**—प्रयोजनविशिष्टेऽपि लक्षणेत्यर्थ । कुत ? इत्याह—

नभ्युपगमात् । नीलादिसवेदनानन्तरमेव हि ज्ञाततायाः अनुव्यवसायस्य वा सम्भवः । (भ, ए) *

हि लक्षणाविषयस्तीरम्, विशेषण पावनत्वादि । प्रयोजन—प्रयोजनीभूतज्ञानविषयरूप पावनत्वादि तयोर्युगपत्प्रतीति ,–लक्षणाजन्यैक्यप्रतीति., तदनभ्युपगमादित्यर्थ । ननु तदनभ्युपगमे किं बीजम् ? इति चेत्–लक्षणया यत्पावनत्वविशिष्ट ज्ञानं जनयितव्यं तत्प्रयोजनीभूत ज्ञान च तदेव पर्यवसितमित्यत कार्यकारणयोरभेदापत्तिरेव बीजामिति सर्वत्र तु तयोर्भेद एव दृश्यते इत्याह—**नीलादी**ति । नीलादिज्ञान व्यवसायरूपं कारण, तत्कार्यं तु ज्ञातता । नैयायिकाना मुरारेश्च मतेऽनुव्यवसाय· तादृशकार्य-कारणयोश्च क्रमोत्पत्तिरेव इत्यर्थ । क्रमिकयोश्च भेद इत्यर्थ ।

विषयेति । लाक्षणिकज्ञानविषयस्य तटादेस्तत्स्थस्य च तटादिनिष्ठस्य च पावनत्वा-देरेककालप्रतीत्यसम्भवादित्यर्थ । गङ्गातादात्म्यप्रतीते· कार्ये एव तटपावनत्वादिप्रत्ययो भवतु तादात्म्यविशिष्टज्ञानस्य विशेष्यविशेषणज्ञानपूर्वकत्वात् । इह गङ्गायामित्यत्र सरिद्भेद एवार्थ प्रतीयते, न खलु सलग्नशैत्यादिरपि । न हि धर्मिणि सकेत्ये तद्गत सर्वोऽपि गुणादि सकेत्यो भवितुमर्हति । ततश्च गङ्गातादात्म्यप्रत्यायनेन सरिद्भेदत्वमेव प्रतीयते, तत्कारणकश्च शैत्यादिप्रत्यय इति । तेन तटशैत्यादिप्रत्यययोर्हि हेतुफलरूपयोर्भिन्नकालत्वमेव वक्तु युक्तमिति कथमेकवृत्तिविषयत्वमित्याशय । एतदेव व्याप्तिदर्शनेन दृढयति—**न चापि** इति । हि यस्माज् ज्ञातता प्रकटतापरनामको धर्म स च प्रत्यक्षादिना नीलादेर्विषयीकरणानन्तर तत्र जातो ज्ञानजन्यो ज्ञानज्ञेयत्वनि-यामक कश्चनातिशय , येन ज्ञातोऽय घट इति मतिरुत्पद्यते इति भट्टमतम् । ज्ञान-विषयक ज्ञानमनुव्यवसायाख्यमिति नैयायिका ।

---

* शैत्यपावनत्वादिना विशिष्ट तट लक्षणीयमिति पक्षो न युज्यते । न खलु लक्षणात पूर्व गङ्गातटे गङ्गावृत्तिशैत्यादय पूर्वसिद्धा सन्ति येन तद्विशिष्ट तट लक्षणीय स्यात् । अस्मन्मते तु लक्षणया तटे गङ्गादिशब्दप्रवृत्तौ सत्या स्वार्थशब्दयो-रविनाभावसबन्धेन तटेऽपि गङ्गात्वप्रतिपत्तिर्भवतीति तद्बदविनाभावेन च शैत्यादिप्रत्यय । अतो लक्ष्यज्ञानप्रयोजनज्ञानयोर्हेत्वङ्गभावनियमेन कथमेकज्ञानविषयत्वम् ?

विषयस्तीरादि । प्रयोजन पावनत्वादिकम् । प्रयोजनस्य पश्चाद्भावित्व दृष्टा-न्तेन गमयति—**नीलादी**ति । द्रव्यचाक्षुषज्ञानस्य रूपोपलब्धिपूर्वकत्वात् नीलादी-त्युक्तम् । घटादिविषयज्ञाने जाते ज्ञातता नाम पदार्थान्तर घटादौ जायते–ज्ञातोऽय घट इति प्रतीते । सा च अन्वयव्यतिरेकाभ्या ज्ञानेन जन्यत इत्युच्यते भट्टमी-मासके । अतस्तद्विशिष्टे घटे नैकज्ञानविषय । नैयायिकास्तु—अतीतेऽनागते च घटे ज्ञानेन ज्ञाततायाः जनयितुमशक्यत्वात् ज्ञानविषयत्वमेव ज्ञातता न पदार्था-

नानुमानं रसादीनां व्यङ्ग्यानां बोधनक्षमम् ।
आभासत्वेन हेतूनां स्मृतिर्नेच रसादिधीः ॥ ४ ॥ (म, ऐ)

*व्यक्तिविवेककारेण हि, " यापि विभावादिभ्यो रसादि[1]निष्टप्रतीति सा अनुमान एवान्तर्भवितुमर्हति । विभावानुभावव्यभिचारिप्रतीतिर्हि रसादिप्रतीतेः साधनमिष्यते । ते हि रत्यादीना भावाना कारणकार्यसहकारिभूतास्ताननुमापयन्त एव रसादीन् निष्पादयन्ति । * त एव प्रतीयमाना आस्वादपदवीं गता

(वि, म) व्यक्तिविवेककारमते विभावादिभ्यो रत्याद्यनुमितिरेव रस, न रत्यादीना व्यञ्जना—इति, तद्दूषयति—**नानुमानम्** इति । रसादीना रत्यादीना व्यङ्ग्यधाना बोधनक्षम बोधकारण नानुमानमित्यर्थ । कुत ? इत्यत्राह—**आभासत्वे-**नेति । अन्यकृन्मते हि ज्ञायमानविभावादीना रत्यादिलिङ्गत्वसम्भवेऽपि, राम सीता-विषयकरतिमान्, सीतादिविभावादिमत्त्वात् इत्यनुमितिर्न रस तस्याऽनन्दस्वरूपत्वाभावेन अनास्वाद्यत्वात्, किन्तु शब्दान्वयव्यतिरेकानुविधायित्वेन व्यञ्जनया शाब्द बोधविषयो रत्यादिर्भावुकैर्भाव्यमान स्वप्रकाशानन्दमयत्वेन परिणत आस्वाद्यमानो रस । तस्य च व्यङ्ग्यत्व प्रपानकरसन्यायेन, तच्छरीरप्रविष्टरत्यादेर्वा व्यङ्ग्यत्वादिति । तथा च तादृशरसस्य हेतूना रत्यादिकार्यकारणसहकारिरूपाणा विभावादीनामाभासत्वेन नानुमान नानुमितिरित्यर्थ । तथा हि विभावादय सीतादयो हेतवो मतुवर्थादिदृक्षादिसम्बन्धेन रामादिवृत्तय । साध्यस्तूक्तरूपो रस काव्यबोद्धनिष्ठ इत्यतो हेतूना विरुद्धत्वमसिद्धिश्चेति हेत्वाभासता । वृत्तावप्ययमर्थो व्यक्तिर्भविष्यति । रसादिबुद्धि स्मृतिरूपापि नेत्याह—**स्मृतिर्नेच रसादिधी.** इति । सस्कारजन्यत्वेन रसादिबुद्धि स्मृतिरूपेति केचिदाहु । तच्च सस्कारजन्यप्रत्यभिज्ञाया व्यभिचारादाभासरूपमेवेत्यग्रे वक्ष्यते । वस्तुतस्तु स्वप्रकाशानन्दरूपत्वेनैव न स्मृति, तस्या एवाभावाभावात् ।

(वि, य) व्याचष्टे—**व्यक्तिविवेककारेणेति** । रसादिनिष्टा रसादिविषया । क्वचित्तु, 'रसादीनाम्' इति पाठ । तादृशी या विभावादिभ्य प्रतीति सिद्धेत्यर्थ । तान् रसादीन्निष्पादयन्तीति निष्पादनप्रकारमाह—**त एवेति** । त एव अनुभीयमाना

(लो, ऐ) एव व्यङ्ग्यस्यास्य प्राचीनवेद्यत्व निरस्य महिमभट्टेन खलु रसवत्त्वलङ्कारव्यवहाराना वाक्यानामन्तर्भावार्थं यदनुमान दर्शित तत्तद्धेत्वाभासदोषेण विधुरीकृतम् ।

न्तरम्, इत्याहु । तन्मते दृष्टान्तमाह—**अनुव्यवसायस्येति** । अनुव्यवसायो ज्ञानविषयक ज्ञानमित्यर्थ, स च, 'घटविषयकज्ञानवानहम्' इत्यादिबुद्धि । एव च ज्ञानविषय प्रयोजनाजन्य एव । प्रयोजनस्य (फलस्य) ज्ञानजन्यत्वाद् विषयस्य तत्पूर्वजन्यत्वात् । अत प्रयोजनमपि विषयादन्यदेवेति भाव ।

* प्रथमतो विभावादिलिङ्गज्ञानम्, ततो व्याप्त्यादिप्रतिसन्धानम्, ततो मानस-

1 'रसादीना प्रतीति' (क ख घ)

सन्तो रसा उच्यन्ते, इत्यवश्यंम्भावी तत्प्रतीतिक्रम, केवलमाशुभावितयाऽसौ[1] न लक्ष्यते, यतोऽयमद्यापि व्यभिचार्यभ्रम[2]" इति यदुक्तम्, (य) तत्र प्रष्टव्यम्—किं शब्दाभिनयसमर्पितविभावादिप्रत्ययानुमितरामादिगतरागादिज्ञानमेव[3] रस त्वेनाभिमत भवत ? तद्भावनया भावकैर्भाव्यमान स्वप्रकाशानन्दो वा ? (र)

आद्ये न विवाद, किन्तु रामादिगतरागादिज्ञान रससज्ञया नोच्यतेऽस्माभिरित्येव विशेष । द्वितीयस्तु व्याप्तिग्रहणाभावाद्धेतोराभासतया सिद्ध एव ।

रत्यादय एव पुन पुनरनुशीलनादास्वाद्यपदवीं गता सन्तो ज्ञानसम्बन्धेन सामाजिकनिष्ठरसतामापद्यन्त इत्यर्थ । **तत्प्रतीतिक्रम** इति—विभावादिज्ञानम्, ततो रत्यनुमिति, तत पुन पुनरनुशीलनम्, तत आस्वाद इत्येव प्रतीतिक्रम इत्यर्थ । **आशुभावितया** इति । रत्याद्यनुमितेर्विभावादिज्ञानानन्तर्यस्याशुभावितया व्याप्त्या-द्युपस्थित्यधीनानुमितिक्रमो न लक्ष्यत इत्यर्थ । किन्तु विभावादिभिरेव रत्यादिर्व्यज्यत इत्येव भ्रमो जायत इत्याह—**यतोऽयमद्यापी**ति ।

(वि, र) **शब्दाभिनये**ति—शब्दो विभावादिवाचक शब्द, अभिनयो नाट्याभिनय, समर्पण ज्ञापनम्, रागोऽनुरागो रति । **तदि**ति—पूर्वमेवेद दर्शितम्। स्वप्रकाशानन्दो वेत्यत्रानुमित इति शेष । अनुमितिविषयस्यैव वितर्क्यमाणत्वात् ।

(वि, ल) **न विवाद** इति । रत्यादेरनुमान व्यञ्जना चेति विवादो नापातत इत्यर्थ । तदेवात्र विवाद स्याद् यदा रामादिगतरत्यादिव्यञ्जन मया रसत्वेनोक्त स्यात्, तदेव तु नेत्याह—**किन्त्विति** । मयोच्यते रामादिगतरत्यादेर्व्यञ्जनम्, ततश्च व्यङ्ग्यरत्यादिरेव सामाजिकरत्यादावभेदेनाऽऽरोप्यमाणो रसनाख्यव्यापारेण स्वाद्यमानो रस इति रसनिरूपणप्रस्तावोक्तसिद्धान्त । स एव द्वितीय पक्ष, तस्यानुमेयत्वासम्भव इत्याह—**द्वितीयस्त्वि**ति । **व्याप्तिग्रहणाभावादि**ति—विरुद्धहेतौ तद्भावनियमादित्यर्थ । इदमुपलक्षण स्वरूपासिद्धेश्चेत्यपि बोध्यम्, सीतादिविभावादिमत्त्वस्य रामादिमात्रवृत्तेर्न तु सामाजिके । ईदृशाभासतामाह—**हेतोरि**ति । असिद्ध इत्यस्य द्वितीय पक्ष विशेष्यम् । आभासत्वेन हेतूनामित्यस्य व्याख्यानमिदम् ।

(लो, ओ) **हेतोराभासतये**ति— आभासत्वेन हेतूनाम् इति कारिका पदार्थ । कथ हेतोराभासतेत्याह—**व्याप्तिग्रहणाभावादि**ति ।

परामर्शेन रामत्वेन प्रतीयमान नट पक्षीकृत्य सामाजिकाना रसानुमिति सैव निष्पत्ति पदस्यार्थ । तत्रैव प्रयोग रामोऽय सीताविषयकरतिमान् सीतालम्बनविभावादित्वात्, अहमिवेति व्यतिरेकी । यद्वा, स्वकान्ताविषयकरतिमान् तदालम्बनत्वात्, अहमिवेत्यन्वयी ।

1 असाविति (क पु) नास्ति । 2 '—व्यक्तिक' (क पु)
3 ज्ञानमित्यादि, गतरागादीत्यन्त पाठ (ज पु) नास्ति

(ल, औ) यच्चोक्तं तेनैव, "यत्र यत्रैवविधाना विभावानुभावसात्त्विकसचारिणा मभिधानमभिनयो वा तत्र तत्र शृङ्गारादिरसाविर्भाव" इति सुग्रहैव व्याप्ति पक्षधर्मता च। (व, औ) *

तथा—

"यार्थान्तराभिव्यक्तौ व सामग्रीष्टा निबन्धनम्[1]।
सैवानुमितिपक्षे नो गमकत्वेन समता॥" इति (श, अ)

इदमपि नो न विरुद्धम्। नह्येवंविधा प्रतीतिरास्वाद्यत्वेनास्माकमभिमता,

---

(वि, व) व्यक्तिविवेककारेण सम्बन्धविशेषणविभावादीनां यथोक्तानन्दरूप सव्याप्यता पक्षधर्मता च साध्यते, दूषयितुं तदप्युत्थापयति—**यच्चोक्तमिति**। **सात्त्विकसचारिणामिति**—शृङ्गाररसानुमित्यभिप्रायेणोक्तम्, तेषां शृङ्गाररसस्यैव व्याप्यत्वात्। क्वचित्तु विभावानुभावसचारिणामित्येव पाठो न सात्त्विकेत्यादि। अभिधान वाचक शब्द, अभिधेयो नाट्यम्, तद्व्यञ्जिका क्रिया, तदुभयमपि स्वविषय बोधाश्रयतासम्बन्धेन रसाश्रयसामाजिकवृत्तिरिति व्याप्ति। पक्षधर्मता च सुग्रहेत्यर्थ।

(वि, श) अस्मिन्नेतस्य कारिकामाह—**यार्थान्तरेति**। अर्थान्तरस्य रसस्याभिव्यक्तौ आस्वादने निबन्धनकारणं यो युष्माकं या सामग्रीष्टा सैव विभावादिरूपा सामग्री नोऽस्माकं मते गमकत्वेन अनुमापकत्वेन सम्मतेत्यर्थ।

(वि, प) दूषयति—**इदमपीति**। अनुमितिर्हि न स्वप्रकाशानन्दरूपा इत्यर्थ। निर्भरस्तद्रूप, तादृश एव सिषाधयिषित इत्यर्थ। सिषाधयिषितत्व चात्र इच्छा

(लो, औ) अत्र महिमभट्टदर्शिता व्याप्तिं दूषयित्वा व्याप्तिग्रहणाभाव द्दूषयति—**यच्चेत्यादि**। **पक्षधर्मतेत्यन्तेन**। तस्मादत्र शृङ्गाररसाविर्भाव इति रूप।

(लो, अ) भवद्भिरेवंविधा व्याप्तिरन्वेष्टव्येत्यत आह—**यार्थेति**। अर्थान्तराभिव्यक्तौ या सामग्री कारणम् इष्टा सैवास्माकमनुमितौ लिङ्गमित्यर्थ। सामग्रीभावेऽपि हि व्यङ्ग्यार्थप्रतिपत्तौ यत कुतश्चिदपि यदेव तदेव प्रतीयते। एव व्यङ्ग्यस्य प्रकाशने लिङ्गमवश्यमन्वेष्टव्यम्। तस्य व्याप्तिग्रहण विना आभासतैव स्यादिति भवतामपि व्याप्तिग्रहण विना व्यङ्ग्यज्ञान न सम्भवतीति भाव। सम्मतेत्यत्रेति पदस्य यच्चोक्तमित्यत्र सम्बन्ध।

(लो, आ) सिद्धान्तमाह—**इदमपीति**। इद महिमभट्टस्य समनन्तरोक्तम्।

---

* सदिग्धसाध्यधर्मा पक्ष, तस्य धर्मता पक्षधर्मता। काव्यमात्र पक्ष तद्वृत्तित्व विभावाद्यभिधानस्यास्तीति पक्षधर्मता। व्याप्त्या सामान्यसिद्धे पक्षधर्मतया विशेष सिद्धि यथा वह्निमान् धूमादित्यत्र व्याप्त्या सामान्यसिद्धे पक्षधर्मतया पर्वते वह्निमत्त्वादिविशेषसिद्धि।

1 निबन्धनी।

किन्तु स्वप्रकाशमात्रविश्रान्त. सान्द्रानन्दनिर्भर । तेनात्र सिषाधयिषितादर्थादर्थान्तरस्य साधनाद्धेतोराभासता । (प्र भा)

यच्च, " भ्रम धम्मिअ–" इत्यादौ प्रतीयमानं वस्तु,

जलकेलितरलकरतलमुक्तपुन पिहितराधिकावदन' ।
जगदवतु कोकयूनोर्विघटनसङ्घटनकौतुकी कृष्णः ॥

इत्यादौ च रूपकालङ्कारादयोऽनुमेया एव । (स, इ)

विषयत्वमात्रम्, न तु अनुमितिसित्वम्, नेऽनुमित्यभावात् । आभासता असिद्धसाधनरूपाभासता । इद दूषण सौलभ्यादेवोक्तम् । वस्तुतस्तु सामाजिके साक्षात्क्रियमाण स्वप्रकाशानन्दोऽनुमीयत एव न, अनुमित्याभावात्, न हि तस्य नियमतोऽनुमित्सा भवति, रसबोधस्तु नियमत एव । तथा ज्ञातविभावादिरूपा सामग्री रसाबोद्बुर्नस्याप्यस्तीति व्यभिचारश्चेति बोध्यम् ।

(वि, स) यत्र वस्तुनोऽलङ्कारस्य वा व्यञ्जना तत्र वस्त्वलङ्कारौ अनुमानगम्यौ एवेति नैयायिकमत दूषयितुमुत्थापयति—**यच्चेति** । यच्च पर्यवस्यतीति दूरेन्वय । उक्तमिति तस्य शेष । तथा च यच्च पर्यवस्यतीत्युक्तमित्यर्थ । प्रतीयमान वस्तु, अभ्रमणम् । अलङ्कारव्यञ्जनास्थल दर्शयति–**जलकेलीति** । जलकेलौ श्रीकृष्णेन स्वीयकरदत्तजलेन राधिकामुखचन्द्र पुन पुनरभिषिच्य स्वीयकरेण पिधीयते च मुच्यते च । ततस्तादृशचन्द्रस्य पिधानमोचनाभ्या कोकमिथुनस्य सघटनविघटने भवत । पिधाने रात्रौ विरहिणस्तस्य प्रात कालभ्रमात् सघटनम्, मोचने चन्द्रोदयविशिष्टसन्ध्याकालभ्रमाद् विघटनम् । कृष्णस्य तादृशकौतुकवर्णनमिदम् । पिधानमोचने कृष्णस्यैव करेण नतु राधिकाया , तत्करस्य जलकेलितरलत्वे कृष्णमुखस्यैव सिच्यमानत्वसम्भवेन स्वमुखस्य पिधानाऽयोगात् । यद् वा–राधिकाकरेण पिधानमोचनयोरपि जलसेकद्वारा कृष्णकरप्रयोज्यत्वात्तद्द्वारा कृष्णकरेणैव पिधानमोचने । **इत्यादौ रूपकादय** इति । अत्र श्लोके मुख चन्द्ररूपणम् आदिपदद्वयात् श्लोकान्तरे अलङ्कारान्तरमित्यर्थः ।

सिषाधयिषितोऽर्था रसादेरनुमानान्तर्भाव । साधितमर्थान्तरम् । तत्र काव्ये शृङ्गारादिरस इत्यादिज्ञानस्याऽनुमेयत्वम् ।

(लो, इ) एव रसादेरनुमानागोचरत्व व्यवस्थाप्य वस्त्वलङ्कारयोरपि व्यञ्जनयोस्तद्दर्शयति—**यच्चेति** । च पूर्वोक्तसमुच्चये । पर्यवस्यतीत्यत्र दूरस्थितेन इतिशब्देन सम्बन्ध । यदुक्त महिमभट्टेन तदप्युक्तमित्यर्थ । किमुक्तमित्याह—**जलकेलीत्यादि** । जलकेलीत्यादौ रूपकालङ्कार । राधिकामुखस्य चन्द्रत्वस्य व्यङ्ग्यत्वाच्चन्द्रदर्शनादर्शनाभ्या हि रात्रिसद्भावाभावबुद्धया चक्रवाकयोर्विघटनसघटने भवत ।

तथा हि—

अनुमानं नाम पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्तत्वविशिष्टाल्लिङ्गाल्लिङ्गिनि[1] ज्ञानम्[2]। (ह, ई,) *

ततश्च[3] वाच्यादसंबद्धोऽर्थस्तावन्न प्रतीयते, अन्यथातिप्रसङ्गः स्यादिति + बोध्यबोधकयोरर्थयोः कश्चित्सम्बन्धोऽस्त्येव। (क, उ)

ततश्च बोधकोऽर्थो लिङ्गम्, बोध्यश्च लिङ्गी, बोधकस्य चार्थस्य पक्षसत्त्वं निबद्धमेव। 'पक्षसत्त्वविपक्षव्यावृत्तत्वेऽनिबद्धेऽपि सामर्थ्यादवसेये' तस्मा-

---

(वि,ह) तत्र वस्तुरूपं व्यङ्ग्यमुपक्रम्य तस्यानुमेयतां घटयति—**तथा हीति**। लिङ्गिनि साध्ये विषये ज्ञानम्।

(वि, क) लिङ्गस्य त्रिरूपता च साध्यव्याप्तिसत्त्वे एव सम्भवतीति। अतस्तान् दर्शयति—**ततश्चेति**। असम्बन्धोऽव्याप्यः। अतिप्रसङ्गोऽव्यापकस्यापि प्रतीत्यापत्तिः। कश्चित्सम्बन्धो व्याप्तिरूपः।

(वि, ख) **बोधकस्य चार्थस्य** इति। गोदावरीतीरदेशे भीरुणा धार्मिकेण न भ्रमणीयम्, तत्र सिंहसत्त्वादित्यनुमानेन बोधकार्थः सिंहसत्त्वम्। **सामर्थ्यादिति**—अव्यभिचारिसहचारादित्यर्थः।

(लो, ई) कथमनुमेय इत्याह—**तथाहीति**। नाम प्राकाश्ये। पक्षे पर्वतादौ सपक्षे महानसादौ च विपक्षे जलह्रदादौ व्यावृत्तत्वम्। लिङ्गाद् व्याप्याद् धूमादेः लिङ्गिनि व्यापके वह्न्यादौ।

(लो, उ) अत्र प्रकृते, 'भ्रम धार्मिक' इत्यादौ बोध्योऽर्थो व्यङ्ग्यो बोधको वाच्यः।

---

* लिङ्गं व्याप्यम्, लिङ्गी तु व्यापकः। यथा धूमो लिङ्गम्, वह्निस्तु लिङ्गी। सपक्षसत्त्वविपक्षव्यावृत्तत्वेन तयोर्व्याप्तिज्ञानं भवति। धूमे लिङ्गे, सपक्षो निश्चितसाध्यधर्मा महानसादिः तत्र सत्त्वं सपक्षसत्त्वम्, विपक्षो निश्चितसाध्याभावयान् जलह्रदादिः तद्व्यावृत्तत्वं तद्रहितत्वम्। पक्षः सन्दिग्धसाध्यधर्मा पर्वतः तत्र सत्त्वम्। एतैर्विशिष्टाल्लिङ्गाद् धूमाल्लिङ्गिनि वह्निविषये ज्ञानमनुमितिरित्यर्थः।

+ यदि असम्बन्धार्थस्य प्रतीतिस्तदा यतः कुतश्चिदर्थाद् यस्य कस्याप्यर्थस्य प्रतीतिर्भवेत्; एकस्मिन् श्लोकेऽपरश्लोकस्यापि प्रतीतिः स्यादित्यतिप्रसङ्गः स्यादित्यर्थः।

1 'नो' (क. ख. पु.) 2 'व्यक्ति' इत्यादिः, 'लिङ्गिनि ज्ञानम्' इत्यन्तः तारकितः पाठो ट. पु. नास्ति।

3 'वाच्यादसंबद्धो व्यङ्ग्यार्थो न प्रतीयते' तथात्वेऽतिप्रसङ्गात्। ततश्च व्यङ्ग्यव्यञ्जकभावेन संबन्धेन भवतीति व्याप्यत्वेन नियतधर्मनिष्ठत्वेन त्रिरूपाल्लिङ्गाल्लिङ्गिनो ज्ञानमनुमानं यत्तद्रूपे पर्यवस्यति इति (च.पु.) 4 'सपक्ष' (क.ख.पु.) 5'अनुमेये'(क.पु.)

दत्र यद्वाच्यार्थालिङ्गरूपालिङ्गिनो व्यङ्ग्यार्थस्यावगमस्तदनुमान एव पर्यवस्यति" इति, । (ख, ऊ)

तन्न[1]। तथा ह्यत्र, 'भम धम्मिअ' इत्यादौ गृहे श्वनिवृत्त्या विहित भ्रमण गोदावरीतीरे सिंहोपलब्धेरभ्रमणमनुमापयति इति यद्वक्तव्य तत्र अनैकान्तिको हेतुः । (ग, ऋ) +

भीरोरपि गुरो प्रभोर्वा निदेशेन प्रियानुरागेण च [2]गमनस्य सम्भवात्। पुंश्चल्या वचनं प्रामाणिक न वेति सन्दिग्धासिद्धेश्च[3]। (घ, ॠ) 'जलकेलि' इत्यत्र, य आत्म-

---

पर्यवस्यतीति–यच्च पर्यवस्यतीत्युक्तमित्यर्थ प्रागेव व्याख्यात ।

(**वि,ग**) दूषयितु तदभिमतार्थमनुवदति–**तत्र तथा हीति**। **सिंहोपलब्धेरिति**–कुलटावाक्योपलब्धसिंहादित्यर्थ । अनुमापयतीत्यत्र कुलटा कर्त्री । दूषयति–**तन्नेति** । अनैकान्तिको व्यभिचारी ।

(**वि,घ**) व्यभिचार ग्राहयति—**भीरोरपीति** । प्रियानुराग सिंहदेश प्रविष्ट प्रियानुराग । हेतो सन्दिग्धासिद्धिमपि दर्शयति–**पुंश्चल्या** इति। पुश्चलीवाक्ये प्रामाण्यसन्देहात् । पक्षे गोदावरीतीरे हेतो सिंहसत्त्वस्य सन्देहात् सन्दिग्धासिद्धिरित्यर्थ ।

(**वि, ङ**) 'जलकेलि' इत्यादौ अलङ्कारस्यानुमेयतामपि हेतोर्व्यभिचारात् दूषयति–**जलकेलीत्यत्रेति** । आत्मा दर्शनीयरूप ।

(**लो, ऊ**) बोधकस्य चार्थस्य–लिङ्गरूपस्य दृप्तसिंहसद्भावस्य । पक्षे गोदावरीतीरनिकुञ्जरूपे आश्रये सामर्थ्यादवसेय इति न खलु सपक्षसत्त्वविपक्षव्यावृत्तत्वाभाव । लिङ्गात्साध्यावगम स्यात्–लिङ्गिन साध्यस्य भीरोरभ्रमणरूपव्यङ्ग्यस्य ।

(**लो, ॠ**) दूषयति–**तन्नेति**। तन्न युक्तम्। कुतो न युक्तमित्याह–**तथा हीति अत्र–गृहे** इति । अयमर्थ –यस्य खलु भीरोर्गृहे श्वनिवृत्त्या भ्रमण विहित स कथ सिंहोपलब्धिस्थाने भ्रमिष्यति । अनैकान्तिक साध्यव्यभिचारी ।

(**लो, ॠ**) कुतोऽनैकान्तिक इत्यत आह—**भीरोरपीति** । प्रियानुरागेण चेत्यनन्तर भयस्थान इति शेष । पुंश्चल्या वचनम्–भ्रम धार्मिकेत्यादिवचनम् । किञ्च य खलु वीर स्पर्शादिशङ्कया शुनो बिभेति स सिंहसद्भावस्थान प्रत्युत मृगयादिकुतूहलेन गच्छतीति दर्शनाद्विरुद्धो भ्रमणरूपसाध्यविरुद्धस्य साधनात् ।

+ अत्र व्यतिरेकव्याप्तिर्दर्शिता । यथा–गोदावरीतीरम् भीरुभ्रमणायोग्य सिंहवत्त्वाद्, यन्नैव तन्नैवम्–यथा गृहम् । अनुपलभ्यमानभयकारणवत्त्व हेतु । यद्यनुपलभ्यमानभयकारणवत् तत्तद्भीरुभ्रमणायोग्यम्, यथा महदरण्यम् (अन्वयी) यद्यन्न भीरुभ्रमणायोग्य न तदुपलभ्यमानभयकारणवद् यथा गृहम् । (व्यतिरेकी)

1 'तन्न' इति नास्ति (घ पु) 2 'भ्रमणस्य' (ट ठ प) 3 सिद्धश्च' (क.ख.पु)

दर्शनादर्शनाभ्यां चक्रवाकविघटनसङ्घटनकारी स चन्द्र एव[1] ' इत्यनुमितिरेवायमिति न वाच्यम् उत्त्रासकादावनैकान्तिकत्वात्। (ङ, लृ)

एवंविधोऽर्थ एवंविधार्थबोधक एवंविधार्थत्वात्, ' यच्चैवं तच्चैवम् ' इत्यनुमानेऽपि [2]आभासमानयोगक्षेमो हेतु'; एवंविधार्थत्वादिति हेतुना एवंविधानिष्टार्थसाधनस्याप्युपपत्ते. । (च, ए)

तथा यत् , "दृष्टि हे प्रतिवेशिनि ! क्षणमिहाप्यस्मद्गृहे इत्यादौ" नलग्रन्थीनां स्तनलिखनम्[3], एकाकितया च स्रोतोगमनम्, तस्याः परकामुकोपभोगस्य लिङ्गिनो लिङ्गमित्युच्यते, तच्च तत्रैवाभिहितेन स्वकान्तस्नेहेनापि सम्भवतीति अनैकान्तिको हेतु । (छ, ऐ) यच्च, " नि शेषच्युतचन्दनम् " इत्यादौ

उत्त्रासकादाविति। उत्त्रासको हि आत्मनो दर्शनादर्शनाभ्यां चक्रवाकसंघटनविघटनकारी। न चासौ चन्द्र इति व्यभिचार.। आदिपदात् सूर्यपरिग्रहः। सोऽपि तथाविधोऽपि न चन्द्रः।

(वि, च) सामान्यासिद्ध्यव्याप्त्या व्यङ्ग्यस्यानुमेयताप्रदर्शनमपि दूषयितुमाह—**एवंविधेति**। आभासमान आभासो हेतोरुपलभ्यमानो व्यभिचार कोत्त्रासकवृत्तिः स्वदर्शनादर्शनरूपः। एवंविधार्थत्वादितिहेतुस्तत्तुल्ययोगक्षेमस्तत्तुल्यव्यभिचारः। स हेतुः साध्याभावेन सहचरितत्वेन व्यभिचरतीत्यर्थ। तद्दर्शयति—**एवंविधार्थत्वादिति। एवंविधानिष्टार्थस्येति**—तथा च एवंविधार्थव्यभिचारी हेतुरित्यर्थः।

(वि, छ) श्लोकान्तरेऽपि व्यङ्ग्यान्तरस्यानुमेयता हेतोर्व्यभिचारेण दूषयितुमाह—**तथा यद्दृष्टिमिति**। स्रोतोगमनमित्यत्र स्रोतोगमनकथनं चेत्यर्थ.। यत्रेत्यमनुमानम्, इयं परकामुकोपभोगेच्छावती नलग्रन्थिना स्तनदारणसम्भावनासत्त्वेऽपि स्रोतोगमने एकाकित्वप्रवृत्तत्वाद् इति। ग्रन्थकृतस्तु स्तनाघातस्रोतोगमनयोः पृथक्कथनेऽपि न पृथक् हेतुद्वयम्। किन्तु हेतुविशेषणमेव तद्द्वयं बोध्यम्। हेतोर्व्यभिचारं दर्शयति—**स्वकान्तेति**। अपिकारात् तद्भयेनापीति बोध्यम्।

(वि, ज) नि.शेषच्युतेत्यादावपि दत्तास्तत्कामुकोपभोगस्य व्यङ्ग्यस्यानुमेयता दूषयितुमाह—**यच्चेति**।

(लो, लृ] उत्त्रासक'—यस्य करतालदानादिनोत्त्रासेन पक्षिणो न घटन्ते, तदभावे च संघटन्ते।

(लो, ए) योगक्षेम इतिकर्तव्यता आभासस्य, यथा इतिकर्तव्यता कार्यनिष्पादनं तथैवैवंविधार्थत्वादितिहेतोरिति भाव'। कुत इत्याह—**एवमिति**।

(लो, ऐ) इममेवाभिमतमर्थमुदाहरणेष्वपि हेत्वाभासं दर्शयन् द्रढयति—**तथेति**। हेतुर्वाच्याऽर्थ ।

---

1 'स्व' (ङ.पु.) 2 'आभासमानयोग' (क.पु) 'इत्यसमानयोग' (ग. पु)
3 तनूल्लिखनम्' (क. पु)

[1]दूत्यास्तत्कामुकोपभोगोऽनुमीयते, तत् किं प्रतिपाद्यया[2] दूत्या[3] तत्कालसन्निहितैर्वान्यैः ? तत्काव्यार्थभावनया वा सहृदयैः ? (ज)

आद्ययोर्नं विवाद । तृतीये तु तथाविधाभिप्रायविरहस्थले व्यभिचार । (ऋ, ओ)

ननु वक्त्राद्यवस्थासहकृतत्वेन विशेष्यो हेतुरिति न वाच्यम् (ऋ, औ)

एवविधव्याप्त्य[4]नुसन्धानस्याभावात् । (ट) किञ्च, एवविधाना काव्याना कविप्रतिभामात्रजन्मना प्रामाण्यानावश्यकत्वेन सन्दिग्धासिद्धत्व हेतो । (ठ, अ)

(वि, ऋ) **आद्ययोर्न विवाद** इति—दूतिकर्तृकमनुमान तावन्न सम्भवत्येव, तस्यास्तदुपभोगस्य प्रत्यक्षसिद्धत्वेन सिद्धसाधनात् । तत्काले सन्निहितजनस्तु यदि न व्यङ्ग्यबोद्धा तदा तस्यानुमानमपि नास्तीत्यतस्तत्रापि न विवाद । यदि तु व्यङ्ग्यबोद्धा तदा तृतीयपक्षे एवान्तर्भाव इत्यर्थ । सामाजिकबोधविषयस्यैव तदास्वाद्यस्य मया विचार्यत्वेन तत्रैवानुमेयत्वादनुमेयत्वविवादात् । तदनुमेयता दूषयति—**तृतीये** त्यिति । तथाविधाभिप्रायो दूत्यास्तत्कामुकोपभोगाभिप्राय । तद्विरहेणोक्तस्य चन्दनच्यवनादेरुपभोगव्याप्यता नास्तीति तत्रैव व्यभिचार इत्यर्थ ।

(वि, ऋ) स्नानादिव्यावृत्तचन्दनच्यवनादेर्विशेषणदानेन व्यभिचाराभावोक्तिं दूषयितुमाह—**वक्त्राद्यवस्थे**ति । वक्त्र्यवस्थादिरित्यर्थ । आदिपदात् स्तनार्पण-चुम्बननखक्षतपरिग्रह । अवस्था तु रतिविशिष्टत्वम् । तथा च तादृशावस्थादिसहकृतत्वेन चन्दनच्यवनादेर्हेतुर्विशेषणीय इत्यर्थ ।

(वि, ट) समाधत्ते—**एवविधे**ति । एवविधविशेषणघटितव्याप्त्यनुसन्धानस्ये त्यर्थ । न हि श्लोके तादृशविशेषणमस्ति । व्याप्त्यादिपदादीदृशविशिष्टहेतुपरिग्रह ।

(वि, ठ) तत्रापि हेतौ सन्दिग्धत्वमपि दर्शयति—**किञ्चे**ति । **प्रामाण्या नावश्यकत्वेने**ति—वक्त्र्या चन्दनच्यवनादिकथनेऽपि सम्भाव्यैव कवेस्तदुक्त्यनुवाद-

---

[लो, ओ] **न विवाद** इति—न खलु वय दूत्यास्तत्कालसन्निहितानामनुमान निराकुर्म । **तथाविधे**ति—न खलु, ' नि शपच्युतचन्दनम् ' इत्यादिप्रतिपादिकाया अभिप्राय केनचिज्जीवितनया विपर्यीकृत इत्यर्थ ।

(लो, औ) **नन्विति**—वक्त्री यादृशमवस्था प्राप्य तथोक्तवती सावस्था हेतोर्विशेषणीकर्तव्येत्यर्थ ।

(लो, अ) **किञ्चेति**—सादृश्यसिद्धत्वम्—न खलु कवि सिद्धमेवार्थं वर्णयति ।

---

1 'यानि चन्दनच्यवनादीनि गमकत्वेनोपात्तानि तानि कारणान्तरादपि भवन्ति । यत्तु स्नानकार्यत्वेनात्रैवोक्तानि । अतो नोपभोग एव प्रतिबन्धनात्तेनैवन्तिकानि ।' (च पु) 2 'प्रतिपादयतया' (क पु) 3 '–व्याप्त्याद्य–'(क. ग पु)

व्यक्तिवादिना चाधमपदसहायानामेवैषा पदार्थानां व्यञ्जकत्वमुक्तम्, तेन च तत्कान्तस्याधमत्वं प्रामाणिकं न वेत्यपि कथमनुमानम्। (ङ, आ)

एतेनार्थापत्तिवेद्यत्वमपि व्यङ्ग्यानामपास्तम्। अर्थापत्तेरपि पूर्वसिद्धव्याप्ति[1]-च्छायामुपजीव्यैव प्रवृत्ते । (ढ, इ)

यथा—

" यो जीवति स कुत्राप्यवतिष्ठते, जीवति चात्र गोष्ठ्यामविद्यमानश्चैत्र " इत्यादि। (ण, ई)

सम्भवादित्यर्थ । वक्त्यनुदितवाक्यलब्धचन्दनच्यवनादिना हि सामाजिकै सम्भोगो ऽनुमातव्य । तच्चन्दनादिक वक्त्युक्तमनुक्त वेति सन्देहात्सन्दिग्धमित्यर्थ ।

(वि, ङ) ननु व्यभिचारिणा सन्दिग्धेन वा चन्दनच्यवनादिना कथमुप भोगस्य भवन्मते व्यञ्जनापीत्यत आह—**व्यक्तिवादिना चेति**। व्यञ्जनावादिनेत्यर्थ । फलबलेन व्यञ्जकत्वसिद्धेस्तथोक्तमित्यर्थ । न ह्यनुमान इव व्यञ्जनायामपि व्यभि चारादिकमङ्गमिति भाव । अनुमानपक्षे अधमसन्निहितप्रेषितत्वे सतीति विशेषण-दानमपि न सम्भवतीत्याह—**तेन चेति**। तेन अधमपदेन उक्तमधमत्वमित्यर्थ । इद मुपलक्षणम्। अधमत्वस्य प्रामाणिकत्वेपि तस्य दूतीगमनेच्छाराहित्ये सति तावताप्यनु मानासम्भव इत्यपि बोध्यम्।

(वि, ढ) व्यङ्ग्यानामर्थापत्तिवेद्यत्वमपि खण्डयति—**एतेनार्थापत्तिरिति**। व्याप्तिच्छाया व्याप्तिरीतिमव्यभिचरितसहचारमित्यर्थ ।

(वि, ण) तादृश सहचारं दर्शयति—**यो जीवतीति**। तमुपजीव्य प्रवृत्तामर्थापत्तिं दर्शयति—**जीवति चेति**। तस्मादेतद्गोष्ठ्यभिन्नस्थलेऽस्तीत्यर्थापत्तिलभ्योऽर्थ । तथा च दर्शितोदाहरणेषु हेतोर्व्यभिचारेण व्याप्तिच्छायोपजीवनासम्भवान्नार्थापत्ति रिति भाव ।

(लो, आ) व्यक्तिवादिना व्यञ्जनाव्यापारस्थापनार्थमुद्युक्तेन । अधमपद न पुनस्तत्स्थाधमस्यान्तिकमित्यत्र स्थितम् ।

(लो, इ) **एतेनेति**—एतेनानुमानहेत्वाभासदर्शनेन । कुत ? इत्याह—**अर्थापत्तेरपीति**। पूर्वसिद्धा—पूर्वगृहीता व्याप्तिच्छायाम्।

(लो, ई) यदि खलु पूर्वं जीवत कुत्रापि स्थानमवगच्छेत्। अर्थापत्तिस्वरूप हि—दृष्ट श्रुतो वा अन्यथा नोपपद्यते इति, तदर्थकल्पनमर्थापत्तिरिति। तद्दृष्टा विवृ-णवते— दृष्ट इति। प्रत्यक्षानुमानोपमानार्थापत्त्यभावलक्षण पञ्चमि प्रमाणैरुपलब्ध शब्दस्य च प्राधान्यख्यापनार्थं भेदेन निर्दिशति—श्रुत इति। श्रुत इति शब्दलक्षणेन ज्ञातोऽर्थोऽर्थविशेषोऽन्यथा नोपपद्यत इति। शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यत इति

---

1 'व्याप्तीच्छामुप' (क ग)

किञ्च–वस्त्रविक्रयादौ तर्जनीतोलनेन दशसंख्यादिवत् सूचनाबुद्धिवेद्योप्ययं न भवति, सूचनाबुद्धेरपि संकेतादिलौकिकप्रमाणसापेक्षत्वेनानुमानप्रकारताङ्गीकारात्। (त, उ)

यच्च–"संस्कारजन्यत्वेन रसादिबुद्धिः स्मृति." इति केचित्। तत्रापि प्रत्यभिज्ञायामनैकान्तिकतया हेतोराभासता। (थ, ऊ)

"दुर्गालङ्घित–" इत्यादौ च द्वितीयार्थो नास्त्येव" इति यदुक्तं माहिमभट्टेन तदनुभवसिद्धमपलपतो गजनिमीलिकैव। (द, ऋ)

(वि, त) सूचना नाम कश्चिद् व्यापारः कैश्चिदुच्यते तद्गम्य एव व्यङ्ग्यार्थः इति मतं दूषयितुमाह—किञ्चेति। दशसंख्यादिवदिति–दशसंख्यादिर्यथा तर्जन्यादितोलनाधीनसूचनाबुद्धिगम्यस्तथा व्यङ्ग्यार्थोऽपीत्यर्थः।

सूचनाप्यनुमितावन्तर्भवतीति सिद्धान्तयति–सूचनाबुद्धेरपीति। अनुमानप्रकारता अनुमितिस्वरूपता। तथा च यत्राङ्गुलितोलनादौ व्यभिचारशङ्का न भवति तत्रानुमानम्। चन्दनच्यवनादौ तु व्यभिचारग्रहात् सम्भोगादिबुद्धिव्यञ्जनाधीनैवेति भावः।

(वि, थ) रसादिबुद्धेः स्मृतिरूपत्वं संस्कारजन्यत्वेनानुमन्यमानानां मतं दूषयितुमाह—तत्रापीति। इदं चापातत एव, सर्वांशे संस्कारजन्यत्वस्य हेतोरव्यभिचारात्। किन्तु स्वप्रकाशानन्दस्वरूपस्य रसस्य स्मृतित्वासम्भव एव दोषः।

(वि, द) द्वितीयार्थो महेशरूपो नास्त्येवेति—बुद्धिविषयो नास्त्येवेत्यर्थः। अपलपत इत्यस्य, उपरि, इति शेषः। गजनिमीलिकाऽवज्ञा।

दर्शनात्। 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र रात्रौ भुङ्क्ते इति वाक्यशेषः कल्प्यते। प्रभाकरगुरुस्त्वाह–दृष्टः श्रुतो वेति। लौकिकीयमनास्थोक्तिः। ततो लोकप्रसिद्धयोपलब्धिमात्रे वर्तते, न तु विकल्पप्रतिपादन इति। शब्दो हि कल्प्यतेऽर्थप्रतीत्यै विप्रकृतसाधनं तद्वरम् अर्थ एव कल्प्यतामिति। तेन भट्टमते श्रुतार्थापत्तौ, रात्रौ भुङ्क्ते। इति शब्दः कल्पते। गुरुमते तु अर्थापत्तौ रात्रिभोजनमर्थ एव। एवमत्र वाक्यविशेष कल्प्यताम्, मैवम्। पीनो देवदत्त इत्यादौ रात्रिभोजने, जीवंश्चैतोऽन्न गोष्ठ्या न वियत इत्यत्र कुत्राप्यवस्थाने पूर्वानुभवव्याप्तिमुपजीव्यैवार्थापत्तेः प्रवृत्तिरिति। व्यङ्ग्यानामनुमानाविषयत्वेन नार्थापत्तिविषयत्वमिति भाव। व्याप्तिथ साहचर्यनियमः। व्याप्तिशरीर दर्शयति–यथेति।

(लो, उ) अधुना व्यङ्ग्यानामनुमानाविषयत्वेन चेष्टाप्रमाणाविषयत्वमपीत्याह–किञ्चेति। अयं—व्यङ्ग्य। संकेतादिलौकिकप्रमाणसापेक्षत्वेनेत्यनेन यत्र यत्रोर्ध्वतर्जनी तत्र तत्र दशसंख्येति पुनर्गृहीतव्याप्तिपुरस्कारवचनम्।

(लो, ऊ) स्मृतिर्न च रसादिधी. इतिकरिक्रापदार्थं विशदयति–यच्चेति। अनैकान्तिकत्वं सोऽयं देवदत्त इत्यादिज्ञानरूपायाः प्रत्यभिज्ञाया अपि संस्कारजन्यत्वात्

(लो, ऋ) गजनिमीलिकैवेति–पर्यालोचनं विनापि लोकापवादशङ्या

[1]तदेवमनुभवसिद्धस्य तत्तद्रसादिलक्षणार्थस्य अशक्यापलापतया तत्तच्छब्दाधन्वयव्यतिरेकानुविधायितया च अनुमानादिप्रमाणावेद्यतया च अभिधादिवृत्तित्रयावोध्यतया च तुरीया वृत्तिरपास्यैवेति सिद्धम्। (ऋ)

इयं च व्याप्त्याद्यनुसन्धानं विनापि भवतीत्यखिलं निर्मलम्। * (ऌ)

तत् किन्नामिकेयं वृत्तिरित्युच्यते—

सा चेयं व्यञ्जना नाम वृत्तिरित्युच्यते बुधैः।
रसव्यङ्क्तौ पुनर्वृत्तिः रसनाख्यां परे विदुः ॥ ५ ॥

एतच्च विविच्योक्तं रसनिरूपणप्रस्ताव इति सर्वमवदातम्। (ध, ए)

इति साहित्यदर्पणे व्यञ्जनाव्यापारस्थापनो नाम पञ्चमः परिच्छेदः।

(वि, ध) रसव्यञ्जनाया रसनेत्यपि नाम केचिदाहुरित्याह—**रसव्यङ्क्तौ पुनरिति**। रसवृत्तौ रसबोधकवृत्तावित्यर्थः। इत्थं व्यङ्ग्यार्थबोधस्य मानसबुद्धिरूपत्वमात्रं न दूषितम्। तत्रायमभिप्रायः—मनसस्तावद् बाह्यः स्वातन्त्र्यमेव नास्ति। स्मृत्युपनयसहकारेण बोधनं तु व्यङ्ग्यार्थस्य पूर्वानुभवाभावेन स्मरणासम्भावनयैव निरस्तम्। नह्यक्काननन्दरूपो रसो दूत्यादेः कामुकसम्भोगादिरूपोऽर्थो वा पूर्वमनुभूतः। इति श्रीमहेश्वरन्यायालङ्कारभट्टाचार्यकृतायां साहित्यदर्पणटीकायां पञ्चमपरिच्छेदविवरणम्।

मत्तगजवच्चक्षुषी निमील्य वचनमित्यर्थः।

(लो, ऋ) एतद् विविच्योक्तमत्रैव द्वितीयपरिच्छेदे। उपसंहरति—**तदेवमिति**।

(लो, ऌ) न च शब्दसमर्पितस्य विभावादेर्ज्ञानस्यैव रसादेर्जनकत्वात् काव्यमत्र साक्षान्न हेतुत्वेन व्याप्रियत इति वाच्यम्, स्वाङ्गमव्यवधायकमितिन्यायेन विभावाद् विभावनस्यावान्तरव्यापारीकरणेन काव्यस्यैवास्वादो भावकत्वात् यथा स्वार्थस्य ज्ञानद्वारेण तत्संसर्गं भावयता पदानामेव करणत्वाभ्युपगमो भट्टनैयायिकादीनाम्। किञ्च सद्वारकरणम् इति न्यायेनान्तरालवर्तिव्यापारान्तरविरहादसम्भाव्यं विभावादिसंवलनज्ञानस्यास्वादं प्रति कारणत्वम्। नन्वेवं व्याप्त्याद्यनुसन्धानमन्तरेणाकस्माद् वाच्यार्थस्यावगतौ कथं नातिप्रसङ्ग इत्याशङ्क्याह—**इयं चेति**। उत्पत्तिमन्तरेणापि अनुभवसिद्धाया व्यङ्ग्यार्थप्रतीतिरन्यार्थोपपत्त्यैव।

(लो, ए) व्यञ्जनाव्यापारकल्पन श्रीश्रीमदानन्दवर्धनाचार्यस्येतिभावः। रसस्य रसनव्यापारप्रकाशत्वं स्मारयति—**रसनेति**। रसनिरूपणप्रस्तावे, सत्त्वोद्रेकाद् इत्यादिकारिकाव्याख्यायाम्। सर्वम्—व्यञ्जनाव्यापारस्थापकं प्रमेयजातम्।

इति साहित्यदर्पणलोचने व्यञ्जनाव्यापारस्थापनो नाम पञ्चमः परिच्छेदः।

---

1 *तारकितः पाठो (ज. झ. पु. नास्ति)

षष्ठः परिच्छेदः

एव ध्वनिगुणीभूतव्यङ्ग्यत्वेन काव्यस्य भेदद्वयमुक्त्वा पुनर्दृश्यश्रव्यत्वेन भेदद्वयमाह ।

दृश्यश्रव्यत्वभेदेन पुन काव्य द्विधा मतम् । (क, अ)
दृश्य तत्राभिनेय तद् ॥ १ ॥ (ख, आ)

तस्य रूपकसज्ञाहेतुमाह—

रूपारोपात्तु रूपकम् ॥ २ ॥ (इ)

तद्दृश्य काव्य नटे रामादिस्वरूपारोपाद्रूपकमित्युच्यते (ग)

कोऽसावभिनय इत्याह—

भवेदभिनयोऽवस्थानुकार स चतुर्विध ।
आङ्गिको वाचिकश्चैवमाहार्य्य सात्त्विकस्तथा ॥ ३ ॥ (घ, ई)

नटै[1] रङ्गादिभी रामयुधिष्ठिरादीनामवस्थानुकरणमभिनय । (ङ)

(वि, क) श्रव्य काव्यमुक्त्वा नाट्यात्मक दृश्यकाव्य वक्तुमाह—एव ध्वनीति।

(वि, ख) अभिनेय नाट्यम् ।

(वि, ग) नाट्य रूपकमिति पर्यायाद्रूपकसज्ञाहेतु वक्तुमाह—तस्येति । रामादिस्वरूपारोपणादिति वेशाभिनयाभ्या तदारोपस्थानेन बोधनादित्यर्थ ।

(वि, घ) तदारोपहेतुत्वेन प्राप्तमभिनय पृच्छति—कोऽसाविति । आहार्य इति । आङ्गिकवाचकौ द्वावप्याहार्यौ । सात्विक च तेन चातुर्विध्यम् । तत्र नाट्यस्य सत्त्वानुद्रेकात् रसावेशाभावेन क्रियमाणावाहार्य्यौ । सत्त्वोद्रेकरसावेशेन क्रियमाणौ सात्त्वकौ ।

(वि, ङ) तत्तु साधारणमभिनयलक्षणमाह—नटैरङ्गादिभिरिति । अत्र शरीरम् । आदिपदात् वचनपरिग्रह । अवस्थास्तदीया धर्मा मन वयोवाक्य पाण्डुत्वादिरूपवेशसाधारणा । तस्या अनुकरण तादृश्येण प्रत्यायनम् ।

(लो, अ) परिच्छेदसङ्गतिमाह—एवमिति ।

(लो, आ) दृश्य दर्शनीयप्रधानम् । श्रव्य श्रोतव्यमात्रम् । आभनेय नटैरङ्गादिभिरिति शेष ।

(लो, इ) अन्यस्य रामादे रूपेणान्यान् नरान् रूपयतीति रूपकम् ।

(लो, ई) अङ्गज आङ्गिक । वचसा वाचिक । आहार्य्यं मुकुटकूर्चादि रचना । सात्त्विक स्तम्भस्वेदादि ।

---

1 '-टैर्वेषाङ्गादिभि' (ख घ च छ)

रूपकस्य[1] भेदानाह—

नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः ।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश ॥ ४ ॥

किञ्च—

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् ।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ।
संलापकं श्रीगदितं शिल्पकञ्च विलासिका ।
दुर्म्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ।
अष्टादश प्राहुरुपरूपकाणि मनीषिणः ।
विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् ॥ ५ ॥ (च, ङ)

सर्वेषां प्रकरणादिरूपकाणां नाटिकाद्युपरूपकाणाञ्च ।

[2]नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् । (छ)
विलासर्द्ध्यादिगुणवद् युक्तं नानाविभूतिभिः ।
सुखदुःखसमुद्भूतिनानारसनिरन्तरम् ।
पञ्चादिका[3] दशपरास्तन्नाङ्काः परिकीर्त्तिताः ।
प्रख्यातवंशो राजर्षिर्धीरोदात्तः, प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः । (ज)
एक एव भवेदङ्गी शृङ्गारो वीर एव वा । (झ)
अङ्गमन्ये रसाः सर्वे कार्य्या[4] निर्वहणेऽद्भुतम्[5] ।
चत्वारः पञ्च वा मुख्याः कार्य्यव्यापृतपूरुषाः ।

(वि, च) दशविधं रूपकमुत्कीर्त्याष्टादशविधरूपकमुत्कीर्त्तयति । किञ्च नाटिकेति । नाट्यात्मकमित्येकम् । विना विशेषमिति—तदुक्तस्तत्तद्विशेष एव भेदक. । तं विहाय सर्वेषा लक्ष्म लक्षणं नाटकवदेवेत्यर्थः ।

(वि, छ) नाटकलक्षणमाह । नाटकमिति—ख्यातेतिवृत्तादय. स्वयमेव व्याख्यायन्ते ।

(लो, ङ) लक्ष्म वक्ष्यमाणं लक्षणम् ।

(लो, ऊ) यथोद्देशं लक्षणमाह—नाटकमिति । यदुक्तं कविना । नानाविभूतिसंयुक्तमृद्धिविलासादिभिर्गुणैश्चैवेति । निर्वहणेऽन्तिमसन्धौ चत्वार पञ्च वा

---

1 'रूपकभेदानाह' (ख. ग. ङ) 2 इत. पूर्वं, 'तत्र' इत्यधिकः पाठ. (क ख पु.)
3 'पञ्चाधिका' (क. पु.) 4 'कार्यो' (क. ख. ज. झ. पु.) 5 'अद्भुत.' (क ख. झ. पु.)

गोपुच्छाग्रसमाग्रन्तु[1] बन्धनं तस्य कीर्त्तितम् ॥ ६ ॥ (ऊ)

ख्यातं रामायणादिप्रसिद्धं वृत्तम्—यथा रामचरितादि। सन्धयो वक्ष्यन्ते। नानाविभूतिभिर्युक्तमिति महासहायम्। सुखदु.खसमुद्भवत्वं[2] रामयुधिष्ठिरादिवृत्तान्तेष्वभिव्यक्तम्। राजर्षयो दुष्यन्तादयः। दिव्या. श्रीकृष्णादयः। दिव्यादिव्यो यो दिव्योऽप्यात्मनि नराभिमानी—यथा श्रीरामचन्द्रः। गोपुच्छाग्रसमाग्रमिति[3] क्रमेणाङ्काः सूक्ष्माः कर्त्तव्या इति केचित्। (ऋ)

अन्ये त्वाहुः यथा—गोपुच्छे केचिद् बाला ह्रस्वाः केचिद् दीर्घाः तथेह कानिचित् काव्यांणि मुखसन्धौ समासानि कानिचित् प्रतिमुखे। एवमन्येष्वपि कानिचित् कानिचिदिति।

प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः।
भवेदगूढशब्दार्थः क्षुद्रचूर्णकसंयुतः। (ॠ)

(वि, ऊ) एक एवेति। नाटकेऽवान्तरनानारसमम्भवेऽपि तेऽङ्गान्येव। समस्तरसनिर्वाह एकरसीरयोरेक एव त्वङ्गी प्रधानमित्यर्थः।

(वि, ऋ) ख्यातं रामायणादीति—कार्यं निर्वहणेऽद्भुतमिति यदुक्तं तत्प्रकीर्णार्थसमुच्चयीकरणरूपे निर्वहणेऽद्भुत कार्यमित्यर्थ। निर्वहणसन्धिर्हि नानास्थले प्रकीर्णार्थाना वैशिष्ट्यरूपमैकात्म्यमिति वक्ष्यते। सन्धयो वक्ष्यन्ते। तत्रैकेनैव प्रयोजनेनान्विताना कथाशानामवान्तरैकार्थसंबन्ध इति सन्धिसामान्यलक्षणम्। तत्र च एकेनैकेनेत्यर्थ। तत्र इतिवृत्तस्योत्साहसहितबीजसमुत्पत्तिर्मुखसन्धि.। इतिवृत्तमभिनेतव्यप्रसङ्ग। बीज तदङ्कुरः तस्यैव यत्नयुक्त उद्भेदः प्रतिमुखसन्धि.। हासोन्मेषवानुद्देश्यप्राप्त्याशायुक्त फलप्रधानोपायस्योद्भेदो गर्भसन्धि। गर्भसन्धितोरधिकतया उद्भिन्नो मुख्यफलोपाय शापादिना विघ्नितो विमर्शसन्धिः। बीजवता प्रकीर्णाना सकलसन्ध्युक्तार्थानामेकार्थतापादनं निर्वहणसन्धि। अयमुपसंहृतिसन्धिरित्युच्यते। एते पञ्च सन्धय।

महासहायामिति। रामादे. सुग्रीवादयो महासहाया.। नायकः प्रधानपात्रम्। पञ्चाधिकदशपरास्तस्याङ्का इत्युक्तत्वात् परिच्छेदरूपस्याङ्कस्य स्वरूपमाह—प्रत्यक्षेति। प्रत्यक्षनेत्रेति। अङ्क इति कीर्त्तित इत्यन्वय.।

इत्युपलक्षणमात्रं कार्यव्यापारिणा प्रयत्ने नान्यत्र विधेयम्, बहुत्वेऽभिनयदुःखावहत्वात्।

(लो, ऋ) सूक्ष्माः ह्रस्वा।

(लो, ॠ) कोऽसावङ्क इत्याह—प्रत्यक्ष इति। नेतारौ नायके नायिका च।

---

1 'गमाङ्क तु' (क. पु.) 2 'समुद्भूतत्वं' (क ग. पु.) 3 'समाङ्क-' (क. पु)

विच्छिन्नावान्तरैकार्थः किञ्चित् संलग्नविन्दुकः ।
युक्तो न बहुभिः कार्यैर्बीजसंहतिमाञ्चन ।
नानाविधानसंयुक्तो नातिप्रचुरपद्यवान् । (लृ)
आवश्यकानां कार्याणामविरोधाद् विनिर्मितः ।
नानेकदिननिर्वर्त्यकथया संप्रयोजितः ।
आसन्ननायकः पात्रैर्युतस्त्रिचतुरैस्तथा ।
दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः ।
विवाहो भोजनं शापोत्सर्गौ[1] मृत्यू रतं तथा ।
दन्तच्छेद्यं नखच्छेद्यमन्यद् व्रीडाकरं च यत् ।
शयनाधरपानादि नगराद्युपरोधनम्[2] ।
स्नानानुलेपने चैभिर्वर्जितो नातिविस्तरः । (ञ, ए)
देवीपरिजनादीनाममात्यवणिजामपि ।
प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः[3] । (ट)

नेता नायकः, तच्चरितं प्रत्यक्षे यत्र तादृशः । **रसभावेति** । भावो नायकनायकयोराकूतम् । क्षुद्रचूर्णकमदीर्घसमासं संस्कृतम् । **विच्छिन्नेति** । व्यापकप्रसङ्गस्य एकदेशरूपोऽर्थो विच्छिन्नसमापितो यत्र तादृश । **किञ्चित्संलग्नविन्दुक** इति । अवान्तरार्थविच्छेदेऽपि प्रसङ्गान्तरोक्त्याशङ्क्योत्थापकं वस्तु विन्दुसंज्ञकम् । "अवान्तरार्थविच्छेदे विन्दुर्विच्छेदकारणम्" इति वक्ष्यमाणत्वात् । किंचित्तद्वान् इत्यर्थः । बीजमभिनेतव्यप्रसङ्गस्याङ्कुर इत्यर्थः । न च तत्संहतिमान् तद्विच्छेदवान् । अङ्केऽभिनेतव्यवस्तुना निषेधमाह—**दूराह्वानमिति** । दूरस्थजनस्याह्वानमित्यर्थः । भोजनमन्नभोजनम् । दन्तच्छेद्यनखच्छेद्ययोर्वस्तुनोरपि भक्षणनिषेधः । तदपि नाभिनेतव्यमित्यर्थः । एषामभिनयः सदस्यानाममङ्गलमित्यभिप्रायः ।

(वि, ट) देवीपरिजनादीना प्रत्यक्षचित्रचरितैर्युक्त इत्यन्वयः । **भावरसोद्भ-**

तयोरेकस्य द्वयोर्वा चरितं तत्र प्रत्यक्षे दर्शनीयमिति भावः । चूर्णकानां क्षुद्रत्वं भाटिति बोधफलं विच्छिन्नावान्तरैकार्थत्वादि अन्तिमाङ्कवर्जं न्यायसिद्धम् ।

(लो, लृ) तत्र सर्वार्थविच्छेदात् । पद्यानां प्राचुर्यमभिनयदुःखावहत्वात् हेयम् ।

(लो, ए) नानेकेत्यादिना—एकदिने कथैवाङ्केऽभिनेया इति त्रिचतुरैरिति पूर्ववदुपलक्षणम् । दूराह्वानमित्यादिभिर्वर्जित इति सम्बन्धः । वधयुद्धादिकञ्च यस्य कस्यचित् मुखेनान्येन वा कविप्रतिभोत्थितेन प्रकारेण दर्शनीयम् । तथार्थोपक्षेपकैरिति वक्ष्यते ।

---

1 'शापोत्सर्गौ' (क.ट.पु.) 2 'राद्यवरोधनम्' (क.पु.) 3 'रसोत्तरैः' (ख.घ ठ पु.)

अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः ॥ ७ ॥

विन्दादयो वक्ष्यन्ते । आवश्यक सन्ध्यावन्दनादि । (ढ)

अङ्कप्रस्तावाद्गर्भाङ्कमाह—

अङ्कोदरप्रविष्टो यो रङ्गद्वारामुखादिमान्[2] ।
अङ्कोऽपरः स गर्भाङ्कः सबीजः फलवानपि ॥ ८ ॥ (ड)

यथा बालरामायणे रावण प्रति कञ्चुकी—

श्रवणै पेयमनेकैर्दृश्यं दीर्घैश्च लोचनैर्बहुभि ।
भवदर्थमिव निबद्धं नाट्य सीतास्वयंवरणम् ।

इत्यादिना विरचित सीतास्वयम्वरो नाम गर्भाङ्क ॥ (ढ, ऐ)

तत्र पूर्वं पूर्वरङ्गः सभापूजा तत. परम् ।

वेरिति । भावो लीला रसो वैदग्ध्यम् । तेन रसभावसमुज्ज्वल इत्यनेन न पौनरुक्त्यम् ।

(वि, ठ) **सन्ध्यावन्दनादी**ति । रसान्तरप्रसक्तस्य नायकस्येति बोध्यम् ।

(वि, ड) गर्भाङ्क प्रधानाङ्कमध्येऽवान्तरविच्छेदरूपोऽपरोऽङ्कस्तल्लक्षणमाह—**अङ्कोदरे**ति । प्रथमतोऽभिनयेन नटप्रवेशो रङ्गद्वारम् । तद्वक्ष्यति "यस्मादभिनयात् पूर्वम्" इत्यादिनाऽत्र चाभिनयो नाट्यवस्तुप्रदर्शनम् । गर्भाङ्क प्रथमाङ्क एवेति नियमाभावात् आह—**रङ्गद्वारामुखादी**ति । आमुख प्रस्तावना तल्लक्षणमग्रे वक्ष्यते । रङ्गद्वारामुखे प्रथमाङ्के । आदिपदात् वक्ष्यमाणलक्षणशुद्धसङ्कीर्णविष्कम्भकद्वयस्य प्रवेशकस्य च परिग्रह । वक्ष्यते हि—वृत्तवर्त्तिष्यमाणकथाशप्रदर्शनेऽभिनयो विष्कम्भक । स च मध्यविधजनप्रवर्त्तित शुद्ध । मध्यनीचाभ्या प्रवर्त्तित सङ्कीर्ण । नीचजनमात्रप्रवर्त्तित प्रवेशक । तेषान्तु सकलाङ्क एव सम्भव । **अङ्कोदर** इति । मुख्यनाटकमध्ये केनापि पात्रेण नाटकान्तरप्रदर्शन गर्भाङ्क इत्यर्थ । तत्प्रदर्शनफलमाह—**सबीज** इति तत्प्रदर्शनात्, मुख्यनाटकाभिनेतव्यार्थस्याङ्कुरफलयोर्लाभात् तद् द्वयवानित्यर्थ ।

(वि, ढ) त गर्भाङ्क दर्शयति—**यथा बालरामायण** इत्यादि—तत्र हि केनापि कविना निबद्ध श्रवणैरित्यादिगुणयुक्त सीतास्वयम्वर नाम नाट्य कञ्चुकिना रावणे निवेदितम् । तच्छ्रवणात् सीताहरणस्यैकमृगरामक्रोधरूपबीजस्य सीताहरणरूपकस्य च सूचनात् तद्द्वयवत् । **इत्यादिना विरचित** इति । इत्यादिना दर्शित केनापि विरचित इत्यर्थ । कञ्चुकिवाक्येन तद्विरचनाऽभावात् ।

(वि, ण) प्रसङ्गतो गर्भाङ्कमुक्त्वा प्रकृतनाटके यद्यदभिनेतव्य् तदाह—**तत्र पूर्वमिति**—पूर्वरङ्गश्च नटाभिनयरूपरङ्गद्वारादिसूत्रधारनिष्क्रामणान्त किञ्चिदुक्तलाप ।

(लो, ऐ) नृत्यपात्रभूतोऽपि रावणोऽस्य गर्भाङ्कस्य नटान्तरैरभिनेयस्य द्रष्टा ।

---

1 'सुखादिमान्' (च ज पु) 2 अत परम्, 'अत्र' इत्यधिक पाठ (ट पु)

कथनं कविसंज्ञादेर्नाटकस्याप्यथा[1] मुखम् ॥ ९ ॥ (ण, ओ)

• तत्रेति नाटके—

यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ।
प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि ।
तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नोपशान्तये ॥ १० ॥ (त, औ)

अस्याः[2] स्वरूपमाह—(अ)

आशीर्वचनसंयुक्ता नित्यं[3] यस्मात् प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता । (आ)
मङ्गल्यशङ्खचन्द्राब्जकोकैरवशंसिनी ।
[4]पदैर्युक्ता द्वादशभिरष्टभिर्वा पदैरुत ॥ ११ ॥ (थ, इ)

नाटकस्येति—नाटकसंज्ञाया अपि कथनमित्यर्थः ।

(वि, त) अस्य पूर्वरङ्गरूपसंज्ञाव्युत्पत्तिमाह—यन्नाट्येति । नाट्यवस्तुनो अभिनेतव्येति वृत्तरूपवस्तुनो रामायणादे । कुशीलवाश्च सूत्रधारादिनटा. । प्रत्याहारादीति—सूत्रधारनटादीना क्रियाविशेषा· प्रत्याहारादय ।

(वि, थ) नान्दीसंज्ञाव्युत्पत्तिमाह—आशीर्वचनेति । आशंसानुरूपा समृद्धिर्नान्दी । नान्दिस्वरूपपदव्युत्पत्तौ नान्दी समृद्धिरिति चोच्यते इति स्तुतिवचनसयुक्ता नान्दी यस्मात् प्रवर्त्तते सभासत्सु श्राव्यते । अतस्तद् वचनमेव तत्सम्बन्धान्नान्दी । देवद्विजनृपादीनामाशीर्वचनेत्यन्वय । एतादृशनान्दीकथनञ्च न मुने. तन्मते रङ्गद्वारमेव नान्दी । किन्तु मुनिभिज्ञाना कारिकाकृतामेवेदृशनान्दीकथनमित्यग्रे व्यक्तीभविष्यति । यद् यद् वस्त्वात्मिका सा तत्तदाह—मङ्गल्येति । एषामन्यतरदेव शसनीयमित्यर्थ । पदैः द्वादशभिरिति । अत्र चपदं श्लोकपादो विभक्त्यन्त पदञ्च ।

(लो, ओ) संज्ञादीति—आदिशब्दात् गोत्रादि. । नाटकस्याऽपि संज्ञास्वरूपादिकथनमिति सम्बन्ध ।

(लो, औ) प्रत्याहारादिकान्यङ्गानि रङ्गविघ्नशान्त्यर्थं नटमात्रकर्त्तव्यान्यावरेषु योद्धव्यानि । कविकर्त्तव्यत्वाभावात् नेह लक्ष्यन्ते ।

(लो, अ) अस्या नान्द्या ।

(लो, आ) आशीरिति । देवद्विजनृपादीनामाशीराशसा तत्प्रतिपादकेन वचनेन युक्ता । नाटकादिषु नित्यमवश्यं प्रयुज्यते, नत्वस्या· कदाचिन्कत्वस्थिति. । नान्दीति नदिधातो सिद्धा ।

---

1 'थो' (ट. ड. पु) 2 'तस्या' (क. ख. पु) 3 'स्तुतिः' (क. ख पु)
4 'चक्राब्ज' (ढ. पु),5 'पादै' (ट. ड. पु)

अष्टपदा यथा । अनर्घराघवे । "निष्प्रत्यूहम्" इत्यादि ।

द्वादशपदा यथा मम तातपादानां पुष्पमालायाम्-(द)

शिरसि धृतसुरापगे स्मरारावरणमुखेन्दुरुचिर्गिरीन्द्रपुत्री ।

*अथ चरणयुगानते स्वकान्ते स्मितसरसा भवतोऽस्तु भूतिहेतुः ॥ **

एवमन्यत्र ।

एतन्नान्दीति[1] कस्यचिन्मतानुसारेणोक्तम् ।

वस्तुतस्तु "पूर्वरङ्गस्य रङ्गद्वाराभिधानमङ्गम्[2]" इत्यन्ये । (ध)

यदुक्तम्—यस्मादभिनयो ह्यत्र प्राधान्यादवतार्यते[3] ।

यथारम्भं विवृण्वते । तदन्येतरैर्युक्तेत्यर्थः ।

(वि, द) अष्टपदा अनर्घराघवे इति । अत्र निष्प्रत्यूह इत्यादि विरमति महाकल्प इत्यादि श्लोकद्वयाष्टपादैरष्टपदत्वम् । यच

निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीलक्ष्मणः
कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने ।
याभ्यामर्द्धविलोलमुग्धमधुरश्रीरर्द्धनिद्रायितो
नाभिपल्लवपुण्डरीकमुकुल. कम्बोः सपत्नीकृत. ॥

इत्यत्र विभक्तयन्तपदाना द्वादशत्वमप्यस्ति, तत्कथमष्टपदत्वं दर्शितमिति वाच्यम् । उभयसत्त्वेऽपि अष्टपदत्वानपायात् तद्दर्शनौचित्यात् व्याख्यानम् । अष्टपदत्वासम्भवे विभक्तयन्तपदरूपद्वादशपदवतीं नान्दीमुदाहरति ।

(वि, ध) एतन्नान्दीति । आशीर्वचनरूपा नान्दीत्यर्थः । रङ्गविघ्नोपशान्तये इत्यनेन पूर्वरङ्गस्य रङ्गविघ्नोपशान्तफलत्वस्योक्तत्वात् तथाप्यवश्यं. कर्त्तव्या नान्दी विघ्नोपशान्तये इति तदर्थान्मुनीतरनाट्यकारिकाकृत. कस्यचिन् मताभिप्रायेणोक्तम् । वस्तुतस्तु पूर्वरङ्गस्य रङ्गद्वारमेवाङ्गं नतु नान्दीत्यन्ये आहुरित्यर्थः ।

(वि, न) रङ्गद्वारस्याऽङ्गदर्शिनीं कारिकां दर्शयति-**यस्मादभिनयो ह्यत्रेति** ।

(लो , इ) उनेत्यनेन क्वचित् पदैरष्टभिर्द्वादशभिर्वा युता ।

(लो, ई) एतदिति । एतन्नाटकादे. प्रथमं पादम् । कस्यचित् कौलाहलादेः । नटैरेव नर्त्तकैरेव काव्यत्वान्नाटकपातित्वाभावात् इत्यर्थः ।

---

* शिरसि धृता सुरापगा गङ्गा येन तादृशे स्मरारौ शिवे अरुणा सपत्न्या गङ्गायाः भीदर्शनात् क्रोधेन रक्तवर्णा मुखेन्दुरुचिर्यस्याः सा । अथ स्वकान्ते शिवे चरणयुगे आनते प्रणते सति स्मितेन सरसा अनुरागार्द्रा गिरीन्द्रपुत्री पार्वती भवतः भूतिहेतुः अस्तु ।

1 'एता ना' (ट. ठ. पु) 2 'इति' अस्मात् परम्, 'अपर' (इति घ. पु) 'अभिनुच्यते' (इति ज. झ पु) 3 'गम्यते' (ग. घ. पु.)

रङ्गद्वारमतो ज्ञेय वागङ्गाभिनयात्मकम् ॥ इति

उक्तप्रकारायाश्च नान्द्या, रङ्गद्वारात् प्रथम नटैरेव कर्त्तव्यतया न महर्षिणा निर्देश कृत । (न)

कालिदासादिमहाकविप्रबन्धेषु च— (ई)

वेदान्तेषु यमाहुरेकपुरुष व्याप्य स्थित रोदसी

यस्मिन्नीश्वर इत्यभिन्न[1]विषय शब्दो यथार्थाक्षर ।

अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते ।

स स्थाणु स्थिरभक्तियोगसुलभो नि श्रेयसायास्तु व । (उ)

एवमादिषु नान्दीलक्षणायोगात् । (प)

उक्तञ्च—

रङ्गद्वारमारभ्य कवि कुर्य्यादिति ।

अत एव प्राक्तनपुस्तकेषु "नान्द्यन्ते सूत्रधार"—इत्यनन्तरमेव वेदान्तेषु

प्राथम्यादित्याशार्वचनतोऽपि प्राथम्यादित्यर्थ । **वागङ्गेति** । वागभिनयात्मकमङ्गाभिनयात्मकमित्यर्थ । अत्र प्राथम्यादित्यनेन पूर्वरङ्गाङ्गत्व रङ्गद्वारस्य दर्शितम् । ननु नान्द्या इति भाव । तस्या पूर्वरङ्गानङ्गत्वे महर्षिस्तथात्वाप्रदर्शनमपि साधकमित्याह । **उक्तप्रकारया** इति । द्वादशपदाष्टपदप्रकारया इत्यर्थ । महर्षिणा नान्दीमात्रस्यैवानिर्दिष्टत्वात् । उक्तप्रकारया अपि तस्या अनिर्देश **नटैरेवेति** । नाट्येऽवश्य नान्दी कर्त्तव्या इति महर्षिभिन्नाना मतानुसारिभिर्नटैरेवेत्यर्थ । ननु महर्षिमतानुसारिभिरित्यर्थ । महर्षिणा तदनिर्देशात्तदाह—**न महर्षिणेति**। महर्षिणा तदनिर्देशे तस्या द्वादशपदत्वादिविशेषणव्यभिचारे हेतुरित्याह—**कालिदासादीति** ।

(वि,प) वेदान्तेषु इति । स स्थाणुर्महेशो वा युष्माकं श्रेयसेऽस्तु इति अन्वय । एकपुरुष प्रधान पुरुषम् । रोदसी द्यावापृथिव्यौ । अभिन्नविषयोऽन्यत्राप्रवृत्ति । अनन्यविषय इति क्वचित् पाठ । अक्षरमत्र पदम् । वर्णस्यार्थाभावेन यथार्थाभावात् । अर्थश्च ईश् ऐश्वर्य्ये इति कर्त्तृविहितवरप्रत्ययान्त धात्वर्थ । प्राणादय प्राणापानादय पञ्चवायव इत्यर्थ । अन्तर्नियमितोक्तौ मुमुक्षुभिर्या मृग्यते ध्यायते । **नान्दीलक्षणेति** । द्वादशान्याष्टपदत्वाभावेन तल्लक्षणाभावादित्यर्थ ।

(वि, फ) तथा च रङ्गद्वारमेव नान्दी । सैवावश्य कर्त्तव्येति दर्शयति—**उक्तञ्चेति** । उक्तमत्र महर्षिणेति बोध्यम् । अत एव तत्र रङ्गद्वाररूपैव नान्दी महर्षेरभिमता । तस्या एवादौ सूत्रधारेण कर्त्तव्यत्वादेवेत्यर्थ । अत्र च नान्द्यन्ते रङ्गद्वा

(लो, उ) वेदान्तेति । यथार्थाक्षर ईश्वरशब्द ईशिधातो सिद्धत्वादैश्वर्य्ययोगरूढरूपोऽर्थस्तस्मिन् एव तात्त्विक इत्यर्थ ।

---

1 'त्यनन्य' (क ख पु)

इत्यादिश्लोकलिखन दृश्यते । यच्च पश्चात् नान्द्यन्ते सूत्रधार इति लिखन तस्यायमभिप्राय । नान्द्यन्ते सूत्रधार इद प्रयोजितवान् । इत प्रभृति मया नाटकमुपादीयत इति कवेरभिप्राय सूचित इति । (फ, ऊ)

पूर्वरङ्गं विधायैव सूत्रधारो निवर्त्तते ।
प्रविश्य स्थापकस्तद्वत् काव्यमास्थापयेत्ततः । (ब, ऋ)
दिव्यमर्त्येषु तद्रूपो मिश्रमन्यतरस्तयोः ।
सूचयेद् वस्तु बीजं वा मुखं पात्रमथापि वा ॥ १२ ॥ (भ, ऋ)

काव्यस्यार्थस्य स्थापनात् स्थापक । तद्वदिति । सूत्रधारसदृशगुणाकार । इदानीं पूर्वरङ्गस्य सम्यक् प्रयोगाभावादेक एव सूत्रधार सर्वं प्रयोजयतीति व्यवहार ।

स स्थापको दिव्य वस्तु दिव्यो भूत्वा मर्त्यं मर्त्यो भूत्वा मिश्रञ्च दिव्यमर्त्ययोरन्यतरो भूत्वा सूचयेत् । वस्त्वितिवृत्त यथोदात्तराघवे—

रामो मूर्ध्नि निधाय काननमगान्मालामिवाज्ञा गुरो-
स्तद्भक्त्या भरतेन राज्यमखिल मात्रा सहैवोज्झितम् ।

रूपनान्द्यन्त इत्यर्थ । यच्च पश्चादिति । वेदान्तेषु इत्यादिश्लोकस्य पश्चादित्यर्थ । नान्द्यन्ते रङ्गद्वाररूपनान्द्यन्त सूत्रधार इद वेदान्तेषु इत्यादि प्रयोजितवान् । इत पर मया कविना नाटकमुपादीयते । इत्येव कवेरभिप्रायो नान्द्यन्त इत्यादिना कविनैव सूचित इत्यर्थ ।

(वि, य) पूर्वरङ्गानन्तरकृत्यमाह—पूर्वरङ्गमिति । स्थापक सूत्रधारसदृश नामान्तरम् । तद्वदिति । सूत्रधारवदित्यर्थ । काव्यमत्र नाटकरूपम् ।

(वि, भ) दिव्यमर्त्येषु इत्यादिक स्वयमेव व्याख्यास्यति । दिव्य मर्त्यं चेति क्वचित् पाठ ।

(वि, म) वृत्तमिति—वृत्तमभिनेतव्यवृत्तान्त । रामो मूर्ध्नि इत्यादिना रामो गुरो पितुराज्ञां मूर्ध्नि निधाय काननमगादित्यन्वय । तद्भक्त्या रामभक्त्या

(लो, ऊ) नान्दीलक्षण समनन्तरङ्गप्रकारम् । यच्च पश्चादिति । वेदान्तेषु इत्यादि पदानन्तर तत श्लोकात् ।

(लो, ऋ) पूर्वरङ्ग इति । एव प्रलापारमभ्य कविवक्तव्यरङ्गद्वारप्रवेशान्तमध्यम् इति शेष ।

(लो, ऋ) मिश्रं दिव्यमर्त्याभ्यामिति, वृत्तमभिनेयमर्थं ।

(लो, ऋ) प्रोक्तिलक्षण प्रकरण दर्शितम् ।

---

1 'दिव्यमर्त्य' (क ग) 'दिव्यैर्मर्त्ये' (ट ड. ण)

तौ सुग्रीवविभीषणावनुगतौ नीतौ परां सम्पदम्[1]
प्रोत्सिक्ता[2] दशकन्धरप्रभृतयो ध्वस्ताः समस्ता द्विपः ॥ (म, ल)

बीजं यथा रत्नावल्याम्—

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः । (य)

अत्र हि समुद्रे [3]वहनभङ्गमनोत्थिताया रत्नावल्या अनुकूलदैवलालितो वत्सराजगृहप्रवेशो यौगन्धरायणव्यापारमारभ्य रत्नावलीप्राप्तौ बीजम्। मुखं श्लेषादिना प्रस्तुतवृत्तान्तप्रतिपादको वाग्विशेष । (र, ए) ।

यथा—

आसादितप्रकटनिर्मलचन्द्रहास प्राप्तः शरत्समय एष विशुद्धकान्तः ।
उत्खाय गाढतमस घनकालमुग्र रामो दशास्यमिव सम्भृतबन्धुजीव ॥(ल, ऐ)

मात्रा जनन्या । तौ पुराणे श्रुतौ । प्रोत्सिक्ता उद्धता । दशकन्धरप्रभृतय समस्ता द्विप ध्वस्ताः । तेनेति शेष । अत्राभिनेतव्यस्य समस्तवस्तुसूचकम् ।

(वि, य) **बीजमिति**—अभिनेतव्यार्थमूलमङ्कुर । **द्वीपादन्यस्मादिति**। दूरस्थेनाऽपि वरेण स्वीयकन्यापरिणयस्य भावित्वेन निजपत्नीमाश्वासयत. स्थापकस्य सूत्रधारस्य च उक्तिरियम् । अन्यद्वीपादितोऽप्यानीयाभिमुखीभूतो विधिर्घटयतीत्यर्थ ।

(वि, र) अत्रेति वहन नौका । वहित्रेति क्वचित् पाठ । गृहप्रवेशो बीजमित्यन्वय । श्लेषादिनेत्यत्र आदिपदादन्यापदेशपरिग्रह ।

(वि, ल) तत्र श्लेषेणाह । **आसादितेति**—गाढतमसमतिशयान्धकारमुग्र घनकाल प्रावृट्कालम् उत्साय उन्मील्य शरत्समय एष प्राप्त आगत । रामो दशास्यमिव दशास्योऽपि गाढतमो गाढमोह उद्गीर्य । शरत्समयरामयोर्विशेषणान्याह—**आसादितेत्यादीनि**—शरत्पक्षे प्रकटो व्यक्तीभूतो निर्मलचन्द्र एव हास । **आसादितेति**। रामपक्षे चन्द्रहास खड्ग —रावणवधार्थं काले एव तदाग्रहण बोध्यम् । शरत्पक्षे विशुद्धकान्तः कान्त कमनीयश्चेति विग्रह । रामपक्षे वधूः विशुद्धा कान्ता पत्नी यस्य तादृश । शरत्पक्षे सम्भृत जनित बन्धुजीवपुष्प येन तादृश, रामपक्षे

(लो, ए) यौगन्धरायण अमात्यविशेष ।

(लो, ऐ) **आसादितेति**—चन्द्रहास प्रभारूपखड्ग । कस्य जनस्य । अन्त समीपम् कान्ता वहित्रप्रवेशशुद्धा नौता । तमोऽन्धकार मोहश्च बन्धुजीवपुष्पं बन्धूना जीवा प्राणाश्च ।

---

1 'उत्तमम्' (क पु.) 2 प्रोत्साता' (ग. पु) 'दुर्मा' (ट. ट. पु)
3 'वहित्र' (ग. पु)

। पात्रं यथा शाकुन्तले—

तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥ (व)

रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः ।
रूपकस्य कवेराख्यां गोत्राद्यपि[1] स कीर्त्तयेत् ।
ऋतुञ्च कञ्चित् प्रायेण भारतीं वृत्तिमाश्रितः ॥ १३ ॥

स स्थापकः । प्रायेणेति—क्वचिदतोरकीर्त्तनमपि । यथा रत्नावल्याम् । भारतीवृत्तिस्तु—(श)

भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः[2] ॥ १४ ॥ (ष)

संस्कृतबहुलो वाक्प्रधानो व्यापारो भारती ।

तस्याः प्ररोचना वीथी तथा प्रहसनामुखे ।
अङ्गान्यत्रोन्मुखीकारः प्रशंसातः प्ररोचना ॥ १५ ॥ (स, ओ)

सम्मृतो जनितो बन्धूना रणपतितवानराणा जीवोऽमृतवृष्ट्या येन तादृशः । अत्र चन्द्रहासादिपदश्लेषवान् वाग्विशेषः । आदिपदग्राह्योऽन्यापदेशस्तु नोदाहृतः । तच्च मम तारावतीचन्द्रशेखरनाटके यथा—

"उदयते शशिनि पूर्वभूधरं राजित कल्पचन्द्रशेखरम् ।
एष यास्यति शशी महार्णवं तातपादमिव वन्दनमिच्छुः ॥"

अत्र हि चन्द्रस्य तातमहार्णवगमनान्यापदेशेन प्रस्तुतवस्तुनश्चन्द्रशेखरनृपस्य वने तपःप्रसक्तस्य तातपादवन्दनार्थगमनसूचकम् । एवमन्यत्राप्यनुसन्धेयम् ।

(वि, व) तवास्मीति—तव नट्या । प्रसभं बलात् । हारिणा मनोहारिणा । एष पुराणेषु श्रुतः । अत्र पात्रं राजा ।

(वि, श) रङ्गं प्रसाद्येति—रङ्गमत्र वस्तु, एतत् सूचनरूपं नाट्यैकदेशम् । **यथा रत्नावल्यामि**ति । तत्र वसन्तोत्सवस्य वर्णने वसन्तर्त्तोरपि वर्णनात् ।

(वि, ष) भारतीति—नराश्रय पुंप्रयोज्य । स्त्रीवाचा प्राकृतत्वात् पुसामप्यधनाना वच प्राकृतत्वात् प्राय इत्युक्तम् ।

(वि, स) तस्या इति । भारत्या इत्यर्थ । तत्र प्ररोचनालक्षणमाह—**अत्रोन्मुखीकार** इति ।

(लो, ओ) तस्या भारतीवृत्ते । वीथी वीथ्यङ्गानि । प्रहसनं प्रहसनाङ्गानि वक्ष्यमाणानि ।

---

1 'यमपि' (ख. पु.) 2 'जनाश्रय. (घ. च. पु.)

प्रस्तुताभिनयेषु प्रशंसात श्रोतृणा प्रवृत्त्युन्मुखीकरण प्ररोचना ।

यथा रत्नावल्याम्—

श्रीहर्षो निपुण कवि परिषदप्येषा गुणग्राहिणी
लोके हारि च वत्सराजचरित नाट्ये च दक्षा वयम् ।

वस्त्वेकेकमपीह वाञ्छितफलप्राप्ते पद किं पुन-
र्मद्भाग्योपचयादय समुदित सर्वो गुणाना गण ॥

वीथीप्रहसने वक्ष्येत । (ह)

नटी विदूषको वापि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिता सलापं यत्र कुर्वते ।
चित्रैर्वाक्यै स्वकार्य्योत्थै प्रस्तुताक्षेपिभिर्मिथ ।
आमुख तत्तु विज्ञेय नाम्ना प्रस्तावनापि सा ॥ १६ ॥ (क)

सूत्रधारसदृशत्वात् स्थापकोऽपि सूत्रधार उच्यते । तस्यानुचर पारिपार्श्विक स्तस्मात् किञ्चिदूनो नट ।

उद्घात्यक[1] कथोद्घात प्रयोगातिशयस्तथा ।
प्रवर्त्तकावलगिते पञ्च प्रस्तावनाभिदा ॥ १७ ॥ (ख)

तत्र—

पदानि त्वगतार्थानि तदर्थगतये नरा ।

(वि, ह) श्रीहर्ष इति । धावक एवात्र यद्यपि कवि तथापि राज्ञ श्रीहर्षस्य प्रीतय तत्रैव कविव्यारोप कृत । वस्त्वेकेकमपीहेति । इह एषु । निपुण-कवि परिषत्स्वायनाट्यदक्षत्वात्तेषु वस्तुषु मध्ये । एकैक वस्तु इत्यर्थ । किं पुनरिति । किं पुनर्वक्तव्यमित्यर्थ । गुणाना फलप्राप्तिहेतुत्वात् उपादेयानाम् । अत्राभिनेतव्यस्य वत्सराजचरितस्याऽभिनेतृणा नटाना परिषदश्च प्रशसा । सस्कृते नेति । तदुक्ता । वीथीप्रहसने इति । तदुद्वयमुद्देशक्रमविशेषौ नामप्रभेदौ वक्ष्यते । तौ च सस्कृतेनैवेति तदुद्वय भारत्या अङ्गम् ।

(वि, क) आमुखस्वरूपमाह—नटीति ।

(वि, ख) ईदृशा प्रस्तावनामुक्त्वा तस्या पञ्चभेदानाह—उद्घात्यक इति ।

(वि, ग) तत्र उद्घात्यकलक्षणमाह—पदानीति । अगतार्थानि इत्यत्रार्थो योजकस्य हृदयास्थितोऽर्थ । तदर्थगतय इति । पदद्वयेऽवगतिपरोऽगमि । तथा च वक्त्रा स्थापकेनानवगततदर्थानि स्वोच्चरितपदानि, तदर्थस्य योजकस्य हृदय स्थितस्यार्थस्यावगतयेऽन्यै स्थापकोच्चारितभिन्नै पदैर्योजयन्ति । स्वहृदयस्थितार्थता प्रतिपादयन्तीत्यर्थ ।

---

1 '–घात–' इति (ग घ ङ)

योजयन्ति पदैरन्यै' स उद्घात्यक उच्यते ॥ १८ ॥ (ग)

यथा मुद्राराक्षसे सूत्रधार—"क्रूरग्रह सकेतुश्चन्द्रमसपूर्णमण्डलमिदानीम्। अभिभवितुमिच्छति बलात्" (औ)

इत्यनन्तर नेपथ्ये, "आ ' क एष मयि जीवति[1] चन्द्रगुप्तमभिभवितुमि[2] च्छती"ति। अत्रान्यार्थवन्त्यपि पदानि हृदिस्थार्थाऽगत्या अर्थान्तरे सक्रमय्य पात्रप्रवेश । (घ, अ)

सूत्रधारस्य वाक्यं वा समादायार्थमस्य वा।
भवेत् पात्रप्रवेशश्चेत् कथोद्घात स उच्यते ॥ १९ ॥ (ङ)

(वि, घ) क्रूरग्रहेति—चन्द्रग्रहण भविष्यति इति प्रतिपादयत स्थापकस्योक्तिरियम्। स क्रूरग्रह केतू राहुरित्यर्थ । एषा पदाना चन्द्रगुप्तनृपतिमन्त्रिणा चाणक्यब्राह्मणरूपनरेण राक्षसरूपात् क्रूरग्रहात् क्रूरो ग्रहो यस्य तस्मात् । चन्द्रगुप्तनृपस्याभिभवरूपे स्वहृदयस्थितेऽर्थे सक्रम कृत । तादृशार्थता दर्शितेत्यर्थ । तदाह—**अन्यार्थवन्त्यपी**ति । राहुचन्द्ररूपार्थवन्त्यपीत्यर्थ । हृदिस्थोऽर्थो राक्षसचन्द्रगुप्तरूप । पात्र चाणक्य ।

(वि, ङ) कथोद्घातलक्षणमाह—**सूत्रधारस्ये**ति । इदानीं स्थापककृत्याभावात् सूत्रधार एव स्थापककृत्य करोतीत्यभिप्रायेणाह—**सूत्रधारस्ये**ति । वाक्यादान वाक्यानुस्मरणम्। अर्थादान वाक्यानुकरण विना तदर्थानुशीलनम्।

(लो,औ) क्रूरग्रहेति—क्रूरो दारुणग्रहो राहु, पक्षे क्रूरो दारुणो ग्रह आग्रह चन्द्रगुप्ताभिभवरूप यस्य। चन्द्र शशिन चन्द्रगुप्ताख्य राजानञ्च।

(लो, अ) पदानि क्रूरग्रह इत्यादानि। हृदिस्थ सूत्रधारस्येत्यर्थ । प्रकृतश्चन्द्रोपरागरूपस्तस्यागत्याऽबोधेन । अर्थान्तरे प्रकृतग्रन्थाभिधेये। अत्राह भारिड—

विस्मृत न प्रतीत वा यत्र वाक्य प्रकाश्यते।
प्रश्नोत्तरमनोहारी स उद्घात्यक उच्यते ॥

यथा पाण्डवाभ्युदये—

का श्लाघा गुणिना क्षमापरिभव कोऽद्य सुदुर्वचै कृत
किं दु ख परसश्रयो जगति क श्लाघ्यो य आश्रीयते ।
को मृत्युर्व्यसन गुण दधति के यैर्निश्चिता शत्रव
केन ज्ञातमिद विराटनगरे छद्मस्थितै पाण्डवै ॥

अत सूत्रधारनिष्क्रान्तौ पाण्डवप्रवेश ।

---

1 'जीवति सति' इत्यस्य स्थाने 'स्थिते' इति (ङ, ढ पु)
2 'मभियोक्तु' इति (ख पु) 3 'हृदयस्था–' (क पु)

वाक्य यथा रत्नावल्यां–'द्वीपादन्यस्मादपि' इत्यादि सूत्रधारेण पठिते–(नेपथ्ये) एवमेतत्। क सन्देह। 'द्वीपादन्यस्मादपि' इत्यादि पाठित्वा यौगन्धरायणस्य प्रवेश। वाक्यार्थो यथा वेण्याम्—

निर्वाणवैरदहना प्रशमादरीणा
नन्दन्तु पाण्डुतनया सह माधवेन।
रक्तप्रसाधितभुव धृतविग्रहाश्च
स्वस्था भवन्तु कुरराजसुता समृत्या॥ (आ)

इति सूत्रधारेण पठितस्य वाक्यस्यार्थं गृहीत्वा—'(नेपथ्ये।) आ दुरात्मन् वृथा मङ्गलपाठक! कथ स्वस्था भवन्तु मयि जीवति धार्त्तराष्ट्रा।' तत सूत्रधारो[1] निष्क्रान्त। भीमसेनस्य प्रवेश.। (छ, इ)

यदि प्रयोग एकस्मिन् भूयो[2]ऽप्यन्यः प्रयुज्यते।
तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा॥ २०॥ (ज)

यथा कुन्दमालायाम्–'(नेपथ्ये।) इत इतोऽवतरत्वार्य्या।

सूत्रधार –कोऽय खल्वार्य्याह्वानेन साहायक मे सम्पादयति। (विलोक्य।) कष्टमतिकरण वर्त्तते।

लङ्केश्वरस्य भवने सुचिर स्थितेति
रामेण लोकपरिवादभयाकुलेन।

(वि, च) द्वीपादिति—अत्र यौगन्धरायणमन्त्रिरूपपात्रस्य तद्वाक्य पुन रचनेत्य प्रवेश।

(वि, छ) निर्वाणेति—पाण्डुतनया निर्वाणवैरामय सन्तो माधवेन सह नन्दन्तु। कुरराजसुताश्च दुर्योधनादयोऽनुरक्तप्रजागृहीतभूमिष्टलोका त्यक्तयुद्धाश्च सन्त समृत्या। स्वस्था भवन्तु इत्यर्थ। अर्थं गृहीत्वेति। एतद् वाक्यानुकरण विना तदर्थानुशीलनेनैव आ इत्यादियुक्तवत भीमस्य प्रवेश।

(वि, ज) प्रयोगातिशयलक्षणमाह—यदि प्रयोग इत। भूय इति। पुनरप्यन्य इत्यर्थ। प्रयोगोऽन्य इति क्वचित् पाठ।

(वि, झ) इत इतोऽवतरत्विति। सूत्रधारपत्न्या आह्वानेनागमनोपदेश कृत। लङ्केश्वरस्येति। जनपदात् अयोध्यातो निर्वासितां निष्कासितां गर्भगुर्वी-

---

(लो, आ) निर्वाणेति—राम कोपाद्यभाव विनाशय। रक्षा रक्षिता प्रग विना प्रयत्न साधिता, रक्षेन शरीरेण प्रगाधिता मनिष्टलाभ। विग्रहो युद्ध देहश्च। स्वस्था कुशलिन स्वर्गस्थाश्च।

(लो, इ) भीमसेनस्य प्रवेश इत्यनन्तर प्रयनार्थमादाय इति शेष।

---

1 'सूत्रधारानन्तरं' (क पु) 2 'प्रयोगोऽन्य' (ग. घ. पु.)

निर्वासितां जनपदादपि गर्भगुर्वीं
सीता वनाय परिकर्षति लक्ष्मणोऽयम् ॥

अत्र नृत्यप्रयोगार्थं स्वभार्य्याह्वानमिच्छता सूत्रधारेण 'सीता वनाय परिकर्षति लक्ष्मणोऽयम्' इति सीतालक्ष्मणयो प्रवेश सूचयित्वा निष्क्रान्तेन स्वप्रयोगमतिशयान एव प्रयोग सूचितः। (झ, ई)

कालं प्रवृत्तमाश्रित्य सूत्रधृग् यत्र वर्णयेत्।
तदाश्रयस्य[1] पात्रस्य प्रवेशस्तत्प्रवर्त्तकम् ॥ २१ ॥ (ञ)

यथा "आसादिते"त्यादि। 'तत प्रविशति यथानिर्दिष्टो राम'।

यत्रैकत्र समावेशात् कार्य्यमन्यत् प्रसाध्यते।
प्रयोगे खलु तज्ज्ञेयं नाम्नाऽवलगितं बुधैः ॥ २२ ॥ (ट)

यथा शाकुन्तले—सूत्रधारो नटीं प्रति। तवास्मि गीतरागेणेत्यादि। ततो राज्ञ प्रवेश।

योज्यान्यत्र यथालाभं वीथ्यङ्गानीतराण्यपि ॥ २३ ॥

अत्र आमुखे। उद्घात्यकावलगितयोरितराणि। वीथ्यङ्गानि वक्ष्यमाणानि। (ठ)

मित्यन्वय। प्रयोगातिशयपदयोगार्थं घटयन् व्याचष्टे—**स्वप्रयोगमतिशयान** इति। **एव प्रयोग' सूचित** इति—सीतालक्ष्मणयो प्रवेशरूपोऽन्य प्रयोग सूचित इत्यर्थ। सूचित इत्यत्र प्रयोजित इति क्वचित् पाठ।

(वि, ञ) प्रवर्त्तके कालाश्रयेणाह—**कालमिति**। तदाश्रयस्य तत्सूचितस्य।

(वि, ट) अवलगितलक्षणमाह—**यत्रैकत्रेति**। यत्रैकत्र प्रयोगे सतीत्यन्वय। समावेशात् तत्प्रयोगस्य समानिर्दिष्टत्वात् अन्यत्कार्य्यं प्रसाध्यते इत्यर्थ।

(वि, ठ) **तवास्मीति**। अत्र गीतप्रशंसारूपप्रयोगे सति राज्ञ प्रवेशरूपमन्यत्कार्य्यं साधितम्। प्रवर्त्तके कालाश्रयणमतो भेदक बोध्यम्। इत्थ प्रस्तावनारूपस्य उद्घातकादिपञ्चभेदमुक्त्वा तत्रैव प्रयोगे यथालाभ वीथ्यङ्गान्यपि प्रयोजनीयानीत्याह—**योज्यान्यत्रेति**। वाक्याख्योपरूपात्मकनाटकप्रभेदस्य वक्ष्यमाणस्याङ्गम्। उद्घात्यकावलगितादानि तयोर्दशाङ्गानि वक्ष्यन्ते। आमुखप्रभेदतयापि उद्घात्यकावलगिते उक्ते। अतस्तद् भिन्नैकदेशे तदङ्गान्यप्यत्र योजनीयानीत्याह—**उद्घात्यकावलगितयोरितराणी**ति।

(लो, ई) **इत** इति। अत्रार्य्यपदार्थ. सीतारूपो नेपथ्ये पात्राभिमत। नटीरूपस्तु सूत्रधारेणाङ्गत *स्वप्रयोगमतिशयान प्रकृतार्थप्रतिपादनात्*।

---

1 'तदाश्रयश्च' (क ख पु)

नखकुट्टस्तु (ङ)

नेपथ्योक्त श्रुत यत्र त्वाकाशवचन तथा ।
समाश्रित्याऽपि कर्त्तव्यमामुख नाटकादिषु ।
एषामामुखभेदानामेक किञ्चित् प्रयोजयेत् । (ङ)
तेनार्थमथ पात्र वा समाक्षिप्यैव सूत्रधृक् ।
प्रस्तावनान्ते निर्गच्छेत् ततो वस्तु प्रयोजयेत् ॥ (ण)

वस्त्विति वृत्तम् । (ङ)

इदं पुनर्वस्तु बुधैर्द्विविधं परिकल्प्यते । (ऊ)
आधिकारिकमेक स्यात् प्रासङ्गिकमथापरम् ।
अधिकार· फले स्वाम्यमधिकारी च तत्प्रभु ।
तस्येतिवृत्त कविभिराधिकारिकमुच्यते ॥ २४ ॥

फले प्रधानफले । यथा बालरामायणे रामचरितम् । (त)

अस्योपकरणार्थन्तु प्रासङ्गिकमितीष्यते ॥ २५ ॥

अस्याधिकारिकेतिवृत्तस्य उपकरणनिमित्त यच्चरित तत्प्रासङ्गिकम् । यथा सुग्रीवादिचरितम् ।

(वि, ङ) पञ्चप्रभेदा आमुखस्यामी प्रविष्टपात्रसूचितपात्रान्तरप्रवेशघटिता उक्ता । अप्रविष्टसूचितपात्रघटितोऽपि नखकुट्टाख्य षष्ठप्रभेद इत्याह—**नखकुट्टस्तु** इति ।

(वि, ढ) तल्लक्षणमाह—**नेपथ्येति** । नेपथ्ये वेशरचनास्थले उक्त पात्र आकाशे वचन यस्य तादृश वा पात्रमाश्रित्य आमुख कर्त्तव्यमित्यर्थ । इत्थमामुखस्य षड् भेदा ।

(वि, ण) **तेनार्थमिति** । सूत्रधृक् पात्र तद्भिक्षमर्थं वा रामाक्षिप्यैव सूचयित्वैव तादृशप्रस्तावनान्ते निर्गच्छेदित्यर्थ ।

(वि, त) **बालरामायणे रामचरितमिति** । रामोऽत्र रावणादिवधफले स्वामी, तस्य चरितमाधिकारिकमित्यर्थ ।

(लो उ) श्रुत कस्यापि सम्मुखीनस्य मुखादनिवृत्त प्रकृतग्रन्थाभिधेयम् । अस्य च प्रयोगनमर्थात् पत्रद्वारेणैव । यद्यपि नासूचितस्य पात्रस्य रङ्गभूमिषु प्रवेश इति वचनात् सर्वेषामपि पात्राणां सूचितानामेव रङ्गे प्रवेशस्तथापि प्रस्तावनानन्तर प्रवेश्य पात्राणामुत्पत्तिस्थानेन निर्दिष्टतिभि सूचनमिति शेष । क्वचित्तु सम्भ्रमादियुक्तानां पात्राणां प्रवेशन सूचन न कर्त्तव्येऽपि । यथा चन्द्रकेतोया प्रवेश्याऽपदोषेण सम्भ्रान्त शबर इत्यादि ।

(लो, ऊ) बुधैर्ग्रन्थकरै ।

पताकास्थानकं योज्यं सुविचार्य्येह वस्तुनि ॥ २६ ॥

इह नाट्ये । (ध)

यत्रार्थे चिन्तितेऽन्यस्मिन् तल्लिङ्गोऽन्यः प्रयुज्यते ।

आगन्तुकेन भावेन पताकास्थानकन्तु तत् ॥ २७ ॥ (द, ऋ)

तद्भेदानाह ।

सहसैवार्थसम्पत्तिर्गुणवत्युपचारतः ।

पताकास्थानकमिदं प्रथमं परिकीर्त्तितम् ॥ २८ ॥ (ध)

यथा रत्नावल्याम्—वासवदत्तेयमिति राजा यदा तत्कण्ठपाश मोचयति । तदा तदुक्तया सागरिकेयमिति प्रत्यभिज्ञाय कथ प्रिया मे सागरिका । 'अलमलमतिमात्र'मित्यादि फलरूपार्थसपत्ति पूर्वापेक्षयोपचारातिशयाद् गुणवती उत्कृष्टा' (न, ऋ)

वच. सातिशयश्लिष्टं नानाबन्धसमाश्रयम् ।

(वि, थ) **उपकरणनिमित्तमिति** । उपकरणमुपसर्ग माहात्म्यमित्यर्थ । *नाटकस्थान्तरङ्गमाह—पताकास्थानकमिति । इह नाट्ये* इति । *आमुखे* इति—उक्तसाधारणे नाट्ये इत्यर्थ । तेनास्य आमुखे इतिवृत्ते च सम्भव इत्यग्रे व्यक्तीभविष्यति ।

(वि, द) **तल्लिङ्ग** इति । चिन्तितार्थसमानचिह्न इत्यर्थ ।

(वि, ध) **सहसैवेति** । उपचारत क्रियातो गुणवती । अर्थसंपत्तिरुद्देश्य संपत्ति । सहसैवेत्यर्थ ।

(वि, न) **वासवदत्तेयमिति** । वासवदत्ता राजपत्नी । तद्वेशेन सागरिका आयास्यतीति कृतसङ्केते राज्ञि स्थिते तज्ज्ञात्वा वासवदत्तैव सागरिकाया आगमनात् पूर्वमागत्य सङ्केतभङ्ग कृत्वा राजान हेपयित्वा गता । राजा च तामनुनेतु पश्चाद् चलित । ततस्तद्वेशा सागरिका आगत्य राजानमनासाद्य निर्वेदाद्गलतापाशेनात्मान बद्ध्वा मर्त्तुमुद्यता । राजा च वासवदत्तामनुनेतु चलित । पथि ता दृष्ट्वा वासवदत्तै. वाय म्रियत इति ज्ञात्वा पाश मोचयन् सागरिकाया उक्तया सागरिकेयमिति ज्ञात्वा गुणवतीमुद्देश्यफलसम्पत्तिमाप्तवान् । अत्र वासवदत्तामरणरूपेऽन्यस्मिन्नर्थ चिन्तिते आगन्तुकेन लतापाशेन वासवदत्तामरणचिह्नायङ्कितम्रियमाणसागरिकारूपार्थप्रयोग इति पताकास्थानसामान्यलक्षण बोध्यम् ।

(वि, प) द्वितीयपताकास्थानमाह—**वचः सातिशयमिति** । नानाबन्धो बीजप्रकाशननायकमङ्गलसूचनादिरूप ।

(लो, ऋ) आगन्तुकेन प्रकृतादितरेण ।

(लो, ऋ) पूर्वापेक्षया पूर्वस्य वासवदत्ताज्ञानस्यापेक्षया ।

---

1 'उत्कण्ठा' (प व ब)

पताकास्थानकमिदं द्वितीयं परिकीर्त्तितम् ॥ २९ ॥ (प)।

यथा वेण्या सूत्रधार —

रक्तप्रसाधितभुव क्षतविग्रहाश्च ।
स्वस्था भवन्तु कुरराजसुता सभृत्या ॥

अत्र रक्तादीना रुधिरशरीरार्थहेतुकश्लेषवशेन बीजार्थप्रतिपादनाद्धेतुमद्बल[1] प्रतिपत्तौ सत्या द्वितीय पताकास्थानम् । (फ)

अर्थोपक्षेपक यत्तु लीन सविनय भवेत् ।
श्लिष्टप्रत्युत्तरोपेत तृतीयमिदमुच्यते ॥ ३० ॥ (ब)

लीनमव्यक्तार्थम् , श्लिष्टेन सम्बन्धयोग्येनाभिप्रायान्तरयुक्तेन प्रत्युत्तरेणोपेत सविनय विशेषनिश्चयप्राप्त्या सहित सम्पाद्यते यत्तत्तृतीय पताकास्थानम् । यथा वेण्या द्वितीयेऽङ्के (कञ्चुकी) देव ! भग्न भग्नम् । (राजा) केन । (कञ्चु) भीमेन । (राजा) कस्य (कञ्चु) भवत । (राजा) आ , किं प्रलपसि (कञ्चु) (सभयम्) देव ! ननु ब्रवीमि । भग्न भीमेन भवत । (राजा) धिक् वृद्धापसद[2] कोऽयमद्य ते व्यामोह ? (कञ्चु) देव ! न व्यामोह सत्यमेव ब्रवीमि ।

भग्न भीमेन भवतो मरुता रथकेतनम् ।
पतित किङ्किणीजाल[3] बद्धाक्रन्दमिव क्षितौ ॥ (भ)

(वि, फ) रक्तप्रसाधितेति । रक्तेन रुधिरेण मण्डितभूमय । क्षतशरीरा स्वर्गस्था भवन्त्विति श्लेषलभ्योऽर्थ । तदाह—अत्र रक्तादीनामिति । अत्रानु रक्तमथ चिन्तिते शब्दरूपतल्लिङ्गोऽन्यो रुधिरादथ आगन्तुकेन शब्देन प्रयोगात् पताकास्थानसामान्यलक्षणसत्त्वम् । इद पताकास्थानमामुखान्तर्गत वक्ष्यमाण च वृत्तान्तर्गत बोध्यम् ।

(वि, ब) तृतीयमाह—अर्थोपक्षेपकमिति । अर्थापक्षेपक प्रस्तुतवस्तु सूचक यत्तु वच इत्यर्थ । श्लिष्टेति व्याचष्टे । सम्बन्धयोग्येन इति उक्त्वाऽन्यान्वय सविनयमित्यत्र विनयो विशेषेण नय निश्चय तद् व्याचष्ट—विशेषेति ।

(वि, भ) भग्नमिति—

भग्न भीमेन मरुता भवतो रथकेतनम् ।
पतित किङ्किणीजाल बद्धाक्रन्दमिव क्षितौ ॥

इति कञ्चुकिना यत्काव्ये सम्भ्रमात् सगदश उक्तम् । दुर्योधनोरुभङ्गरूपार्थोपक्षेपक भीमेनेत्यत्र भीमगमनरूपेण स्वानुज्ञानयोग्येन वचनभङ्गातिरिक्ताभिप्रायमुक्तेन दुर्योधनस्य प्रत्युत्तरेणोपेतम् । अत्र लीनादिक स्पष्टार्थमवधेयम् ।

---

1 'र्जनार्थप्रतिपादनादमङ्गलप्र–' (न प पु) 2 '–पद (ग घ पु)
3 'जाल' (क ग पु)

अत्र दुर्योधनोरुभङ्गरूपप्रस्तुतसङ्क्रान्तमर्थोपक्षेपणम् । (म)

द्यर्थो वचनविन्यासः सुश्लिष्ट काव्ययोजित ।
प्रधानार्थान्तरक्षेपी पताकास्थानकं परम् ॥ ३१ ॥ (य)

यथा रत्नावल्याम्—

उद्दामोत्कलिका[1] विपाण्डुरसचि[2] प्रारब्धजृम्भा क्षण-
दायास श्वसनो[3]द्गमाऽविरलैरातन्वतीमात्मन ।
अद्योद्यानलतामिमा समदना नारीमिवान्या ध्रुव
पश्यन् कोपविपाटलद्युति मुख देव्या करिष्याम्यहम् ॥ (र,ल)

अत्र भाव्यर्थ सूचित । (ल)

(वि, म) अथापक्षेपत्व व्याचष्टे—**अत्रे**ति । अत्र केतुभङ्गरूपेऽन्यस्मिन् चिन्तिते ऊरुभङ्गरूपार्थप्रयोग आगन्तुकेन श्लिष्टशब्देनेत्यत पताकास्थानसामान्य-लक्षणसत्त्वम् ।

(वि, य) चतुर्थमाह—**द्यर्थो वचने**ति । सुश्लिष्ट अर्थद्वये शोभनश्लिष्ट । काव्य श्लोकस्तत्र योजित । प्रधानार्थान्तरस्य मुख्यतया प्रतिपाद्यार्थान्तरस्य सूचक इत्यर्थ ।

(वि, र) **उद्दामे**ति—राज्ञा परिगृहीता माधवीलतामकालकुसुमिता वासव दत्ताया पराजयशसिना तस्यैव दर्शयतो राज्ञ उक्तिरियम् । समदना विरहिणीम् अन्या नारीमिव । इमामुद्यानलता पश्यन्नह देव्या वासवदत्ताया मुख कोपविपाट लद्युतिं करिष्यामीत्यन्वय । ममान्यनारीदर्शनेन इव तत्पराजयहेतुकुसुमितमाधवी-लतादर्शनेनापि तस्या कोपो भावीत्यर्थ । उद्यानलताया विरहिण्यार्थश्च विशेषणा-न्याह—**उद्दामे**त्यादानि । उत्कलिका उद्गतकलिका उत्कण्ठा च । तयोरुद्दामत्व-मतिशय । विपाण्डुर स्वभावाद् विरहाच्च । जृम्भा विकाश श्वासविशेषश्च । श्वसनस्य बहिर्वायोर्निं श्वासस्य चोद्गमात् आयास व्याकुलता खेदश्च आतन्वतीं कुर्वतीम् ।

(वि, ल) **अत्र भाव्यर्थ** इति । राज्ञा सागरिकादर्शनात् वासवदत्ताया भावी कोपो मुख्यतया प्रतिपाद्य इति प्रधान सूचितम् । अत्र कुसुमितलतादर्शनाद् भाविनि कोपे चिन्तिते सागरिकादर्शनात् तत्कोप आगन्तुकेन श्लिष्टशब्देन प्रति-पादित । अत पताकास्थानसामान्यलक्षणसत्त्वम् ।

(लो, ल) **उद्दामे**ति—उद्गता कलिका कोरक उत्कण्ठा च । जृम्भा विकाश सुखनि श्वासविशेषश्च । श्वसनो नि श्वास बाह्यपवनश्च ।

---

1 'उद्दामोत्कलिकाविपाण्डुरत्वम्' (क ख पु) 2 'श्च' (ख पु)
3 '–र्धम' (च ज पु)

एतानि चत्वारि पताकास्थानकानि क्वचिन्मङ्गलार्थं क्वचिदमङ्गलार्थमपि सर्वसन्धिषु भवन्ति। काव्यकर्तुरिच्छावशाद् भूयो भूयोऽपि भवन्ति। यत्पुनः केनचिदुक्तं—'मुखसन्धिमारभ्य सन्धिचतुष्टये क्रमेण भवन्ती'ति तदन्ये न मन्यन्ते, एषामत्यन्तमुपादेयानामनियमेन सर्वत्रापि सर्वेषामपि भवितुं युक्तत्वात्। (च.)

यत्स्यादनुचितं वस्तु नायकस्य रसस्य वा।
विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत्॥ ३२॥ (ए)

अनुचितमिति वृत्तं यथा—रामस्य च्छद्मना वालिवधः। तच्च उदात्तराघवे नोक्तमेव। वीरचरिते तु वाली रामवधार्थमागतो रामेण हृत इत्यन्यथा कृतः।

अङ्केष्वदर्शनीया या वक्तव्यैव च सम्मता।
या च स्याद् वर्षपर्यन्तं कथा दिनद्वयादिजा। (श, ऐ)
अन्या च विस्तरा सूच्या सार्थोपक्षेपकैर्बुधैः॥ ३३॥

अङ्केष्वदर्शनीया कथा युद्धादिकथा।

(वि, च) क्वचिन्मङ्गलार्थमिति। प्रथमे मर्तुं प्रवृत्तवासवदत्ताज्ञानादभिलषितसागरिकाप्राप्तेरुद्दामोत्कलिकामित्यत्र भाविन्याः सागरिकाप्राप्तेश्च बोधनान् मङ्गलार्थता। रक्तप्रसाधितेत्यादौ वृत्तेण मरणस्य भग्नं भीमेनेत्यादौ दुर्योधनोरुभङ्गस्य च बोधनात् तेषाममङ्गलार्थता। **भूयो भूयोऽपि** इति। स्थाने स्थाने इत्यर्थः। **सन्धिचतुष्टये** इति। पताकास्थानस्य चतुष्पत्वात् प्रथमोपस्थितसन्धिचतुष्टये इत्यर्थः। **सर्वत्राऽपीति**। पञ्चसन्धिष्वपि इत्यर्थः। सर्वेषामिति सर्वपताकास्थानानामित्यर्थः।

(वि, श) **या च स्याद्वर्षपर्यन्तमिति**। तादृशी कथा दिनद्वयादिनाभिनेतव्या इत्यर्थः। **अन्या चेति**—अन्या विस्तरा बाहुल्यादभिनेतुमशक्या। सा कथा यथोपक्षेपकैर्वक्ष्यमाणैऽर्थोपक्षेपकपरिभावितैर्विष्कम्भकादिपञ्चभिर्बुधैः सूच्येत्यर्थः। सूच्या इत्यत्र क्षेप्या इति क्वचित् पाठः। अङ्केष्वदर्शनीयेत्यादिकं पूर्वत्र अन्या इत्यत्रान्वितम्। तेन साप्यर्थोपक्षेपकैः सूच्येत्यर्थः।

(लो, ए) **यत्स्यादिति**। रामादेर्हि छद्मना वालिवधादेरभिधाने गूढतरतदभिप्रायपरिज्ञाननिपुणानां नाटकाव्यादिभिः रसास्वादमुखपिण्डद्वारेण कृत्याकृत्यप्रवृत्तिनिवृत्तियोज्यानां सुकुमारमतीनां राजपुत्रप्रभृतीनां श्रीरामचन्द्रादिमहापुरुषचरितमालोच्यानुचितासु कथासु प्रवृत्तिप्रसङ्ग स्यादिति। महापुरुषचरितमप्यनुचितमिति वृत्तम्। नाटकादौ परिहार्यमिति भावः। रसस्यानुचितत्वं वक्ष्यमाणव्यभिचारिभावादेः स्वशब्दवाच्यत्वम्।

(लो, ऐ) ननु यदि दूराह्वानादयोऽङ्केष्वदर्शनीयास्तत्कथं नाटकादावुपक्षेपणीया। एकदिनमात्रस्य च कथाया अङ्कदर्शनीयत्वेन दिनद्वयादिकथायाः कथं परिग्रहः कथाविस्तारो वा रसविग्रहेतुत्वात्कथमङ्के दर्शनीय इत्यत आह—**अङ्केष्विति**।

वर्षादूर्ध्वन्तु यद् वस्तु तत् स्याद् वर्षादधोभवम् ॥३४॥ (प,ओ)

उक्तं हि मुनिना—

अङ्कच्छेदे कार्य्यं मासकृत वर्षसञ्चित वाऽपि।
तत् सर्वं कर्त्तव्य वर्षादूर्ध्वं न तु कदाचित् ॥ (औ)

एवञ्च चतुर्दशवर्षव्यापिन्यपि रामवनवासे ये ये विराधवधादय कथा शास्ते ते वर्षवर्षावयवदिनयुग्मादीनामेकतमेन सूचनीया न विरुद्धा ।

दिनावसाने कार्य्यं यद्दिनेनैवोपपद्यते ।
अर्थोपक्षेपकैर्वाच्यमङ्कच्छेदं विधाय तत् ॥ ३५ ॥ (स)

के ते अर्थोपक्षेपका इत्याकाङ्क्षायामाह—

अर्थोपक्षेपका· पञ्च विष्कम्भकप्रवेशकौ ।
चूलिकाङ्कावतारोऽथ स्यादङ्कमुखमित्यपि ॥ ३६ ॥
वृत्तवर्त्तिष्यमाणानां कथांशाना निदर्शक ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शित ।
मध्येन मध्यमाभ्यां वा पात्राभ्या सप्रयोजित· ।
शुद्ध स्यात् सतु सकीर्णो नीचमध्यमकल्पित· ॥३७॥ (ह,अ)

(वि, प) वर्षादधोभवमुत्तरभव द्वितीयवर्षादिनाऽपि निष्पाद्यम् । पूर्वत्र वर्षपर्यन्तत्वमिह तु वर्षादूर्ध्वत्वमिति भेदान्न पौनरुक्त्यम् । **वर्षादूर्ध्वमिति** । तत् सर्वं वर्षादूर्ध्वं न कर्तव्यम् । इदमुपलक्षणम् । किन्तु मासपर्यन्तमपि न कर्त्तव्यम् । किन्तु अङ्कविच्छेदे एव कार्यमित्यर्थ ।

(वि,स) दिनावसाने इति । दिनावसानकार्यं यद्वस्तु दिनेनैवोपपद्यते क्रिया बाहुल्याभावात् । दिनेनैवाभिनेतु शक्यत इत्यर्थ । दिनैकोपपादनीय वस्तु कथ वाच्यमित्यत्राह—**अर्थोपक्षेपकैरिति** ।

(वि, ह) विष्कम्भस्य द्वैविध्यमाह—**मध्येनेति** । उत्कृष्टाधमपात्राभिन

(लो, ओ) ननु एकवर्षकथैव यद्यथापक्षेपेण वाच्या तदूर्ध्वं कथा किं परित्याज्या इत्यत आह—**वर्षादिति** ।

(लो, औ) **अङ्कच्छेद** इति । तादिति, प्रसिद्धम् । सर्वं मासमाश्रित वर्षमश्रित वाऽपि कार्यं कृत्यम् अङ्कच्छेदेऽपि कर्त्तव्यम् । अर्थादर्थापक्षेपैः सूच्यमित्यर्थ· ।

(लो, अ) यथोद्देशलक्षणमाह—**वृत्तेति** । पात्रस्य मध्यत्वम् अतिमहत श्रीरामचन्द्रादेर्न्यूनत्वेन । विष्कम्भके पात्राणा सस्कृतभाषित्वस्य लक्ष्येषु दर्शनात् । मध्यमपात्राणा हि प्राकृतभाषित्वम् । तदुक्तं भाषार्णवे—

(भाषामध्यमपात्राणा नानादा विशेषत ।
महाराष्ट्री सौरसेनीत्युक्ता भाषा द्विधा बुधै ॥ इति ।)

तत्र शुद्धो यथा—मालतीमाधवे श्मशाने कपालकुण्डला । संकीर्णो यथा रामाभिनन्दे रूपणककापालिकौ ॥

अथ प्रवेशकः—

प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः ।
अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा ॥ ३८ ॥ (क, आ)

अङ्कद्वयस्यान्तरिति प्रथमाङ्केऽस्य प्रतिषेधः । यथा वेण्याम् अश्वत्थामाङ्के राक्षसमिथुनम् । अथ चूलिका—

अन्तर्जवनिकासंस्थैः सूचनार्थस्य चूलिका ॥ ३९ ॥ (ख)

यथा वीरचरिते चतुर्थाङ्कस्यादौ (नेपथ्ये) भो भो वैमानिका ! प्रवर्तन्तां रङ्गमङ्गलानीत्यादि । रामेण परशुरामो जित इति नेपथ्ये पात्रैः सूचितम् । अथाङ्कावतारः—

अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः ।
यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः ॥ ४० ॥ (ग)

यथाभिज्ञाने पञ्चमाङ्के, पात्रैः सूचित षष्ठाङ्कस्तदङ्कस्याङ्कविशेष इवाऽवतीर्णः । अथाऽङ्कमुखम्—

यत्र स्यादङ्क एकस्मिन्नङ्कानां सूचनाऽखिला ।
तदङ्कमुखमित्याहुर्बीजार्थख्यापकञ्च तत् ॥ ४१ ॥ (घ)

यथा मालतीमाधवे—प्रथमाङ्कादौ कामन्दक्यवलोकिते भूरिवसुप्रभृतीना

पात्रमध्यम् । कपालकुण्डलेति । तत्कृत्यमित्यर्थः । एवमुत्तरत्रापि ।

(वि, क) अङ्कद्वयेति । अङ्कद्वयपदस्य द्वितीयाद्यङ्कपरत्वमित्यभिप्रायः । शेषमिति । उक्तवर्त्तिष्यमाणेतरादिरूपम् ।

(वि, ख) अन्तर्जवनिका । वेशरचनास्थानवेष्टनपटः । अर्थस्य सूचनेत्यन्वयः ।

(वि, ग) अङ्कान्त इति । अङ्कान्ते पात्रैः सूचितोऽर्थादपर अङ्क यदवतरति इत्यर्थः । तदङ्कस्याऽविभागत इति । विभागस्तद्भेदः, तदभिन्नत्वेन प्रयोजित इत्यर्थः । अत्र द्वितीयान्तात् तसु । अङ्कविच्छेदेऽपि तदङ्कोत्थापिताऽऽमाङ्क्यैवाऽवतीर्णोऽपराङ्क इत्यर्थः । तदाह—तदङ्कस्याङ्कविशेष इवेति ।

(वि, घ) यत्र स्यादङ्क इति । अङ्काना समस्ताङ्कवक्ष्यमाणानामर्थानामखिला सूचनेत्यर्थः । अङ्कावतारे तदङ्कमात्रसूचनम् अङ्कमुखे तु समस्ताङ्कसूचनेति भेदः । बीजार्थानि बीजभूतार्थख्यापनात् । बीजार्थख्यापकमङ्गमस्य तदित्यर्थः ।

(लो, आ) नीचपात्रप्रयोजित इत्यत्र नीचत्वं हि अप्रसङ्गभाषित्वादेव । तेन सख्यादिभिश्च प्रवेशकस्य प्रयोजितत्वम् ।

भाविभूमिकानां परिक्षिप्तकथाप्रबन्धस्य च प्रसङ्गात्सन्निवेश सूचितवत्यौ । (ङ)

अङ्कान्तपात्रैर्वाङ्कास्यं छिन्नाङ्कस्यार्थसूचनात् ॥४२॥

अङ्कान्तपात्रैरङ्कान्त प्रविष्टै पात्रै । (च)

यथा वीरचरिते द्वितीयाङ्कान्ते (प्रविश्य) (सुमन्त्र)। भगवन्तौ वशिष्टविश्वामित्रौ भवतः सभार्गवानाह्वयत । (इतरे)। क भगवन्तौ । (सुमन्त्र)। महाराज-दशरथस्याऽन्तिके । (इतरे) तत्तत्रैव गच्छाम , इत्यङ्कपरिसमाप्तौ। (तत प्रविशन्त्युपविष्टा वशिष्टविश्वामित्रपरशुरामा) इत्यत्र पूर्वाङ्कान्त एव प्रविष्टेन सुमन्त्रपात्रेण शतानन्दजनककथाविच्छेदे उत्तराङ्कमुखसूचनादङ्कास्यमिति । एतच्च धनिकमतानुसारेणोक्तम्। अन्ये तु अङ्कावतारेणैव इद गतार्थम् इत्याहु ।(छ)

अपेक्षित परित्यज्य नीरसं वस्तु विस्तरम् ।
यदा सदर्शयेच्छेषमामुखानन्तर तदा । (ज)
कार्य्यो विष्कम्भको नाट्य आमुखाक्षिप्तपात्रक. ॥ ४३ ॥

यथा रत्नावल्या यौगन्धरायणप्रयोजित ।

यदा तु सरस वस्तु मूलादेव प्रवर्त्तते ।
आदावेव तदाङ्के स्यादामुखाक्षेपसश्रय ॥ ४४ ॥ (झ)

(वि, ङ) भाविभूमिकाना भाविप्रसङ्गाना परिक्षिप्त सक्षिप्त । सन्निवेश स्थानेऽभिनेयम् ।

(वि, च) अङ्कमुखस्य धनिकेनोक्त लक्षणान्तरमाह—**अङ्कान्तपात्रैरिति** । छिन्नाङ्कस्य समाप्यमानाङ्कस्य सम्बन्धिभिस्तदङ्कान्ते प्रविष्टै पात्रैरपराङ्कसूचनमित्यर्थ । पूर्वलक्षणे पूर्वप्रविष्टपात्रै समस्ताङ्कार्थसूचनमत्र तु अङ्कान्त प्रविष्टपात्रैस्तदुत्तराङ्कार्थ मात्रसूचनमिति भेद ।

(वि, छ) इद लक्षण धनिकमत एव इत्याह—**एतच्चेति**। **अङ्कावतारेणेवेति**। तल्लक्षणाक्रान्तत्वादेतस्य **आदावङ्कस्य दर्शित** इत्यनेन ।

(वि, ज) विष्कम्भकरणमङ्कादावेवेति प्राग्दर्शितमिदानी तस्यैव विशेषशादामुखस्यान्तेऽपि करणमित्याह—**अपेक्षितमिति** । शेषमपेक्षितकाव्यत । शेष नीरसभिन्न वस्तुविस्तरमित्यन्वय । आमुखानन्तर कार्यमित्यन्वय । **योगन्धरायणप्रयोजित** इति—विष्कम्भक इति शेष । तत्र हि अपेक्षितो वत्सराजसागरिकयोर्वृत्तान्त । त परित्यज्यामुखानन्तर स्वच्छाचारी भीत एवाग्नि भर्त्तुरिति नीरस स्वभय यौगन्धरायणेन दर्शितम् ।

(वि, झ) आदावङ्कस्य दर्शित इति यदुक्त तद्विषय दर्शयति—**यदा**

यथा शाकुन्तले—

विष्कम्भकाद्यैरपि नो वधो वाच्योऽधिकारिणः ।
अन्योऽन्येन तिरोधानं न कुर्य्याद्रसवस्तुनोः ॥ ४५ ॥ (ञ)

रसः शृङ्गारादिः । यदुक्तं धनिकेन—

न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत् ।
रसं वा न तिरोदध्याद्वस्वलङ्कारलक्षणैः ॥ इति (ट)

बीजं बिन्दु पताका च प्रकरी कार्य्यमेव वा ।
अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथाविधि ॥ ४६ ॥

अर्थप्रकृतयः प्रयोजनसिद्धिहेतवः । तत्र बीजम्—

[1]स्वल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति ।
फलस्य प्रथमो हेतुर्बीजं तदभिधीयते ॥ ४७ ॥ (ठ)

यथा रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुर्दैवानुकूल्यलालितो यौगन्धरायणव्यापारः । यथा वा वेण्यां द्रौपदीकेशसंयमनहेतुर्भीमसेनक्रोधोपचितो युधिष्ठिरोत्साहः ।

अवान्तरार्थविच्छेदे बिन्दुविच्छेदकारणम् ॥ ४८ ॥ (ड) *

यथा रत्नावल्यामनङ्गपूजापरिसमाप्तौ कथार्थविच्छेदे सति उदयनस्येन्दोरिवोदीक्ष्यते इति सागरिका श्रुत्वा (सहर्षम्) कथं एसो सो उदअणएरिन्दो । इत्यादिरवान्तरार्थहेतुः । (ढ, ण)

त्विति । मूलादेव नीरसवस्त्वभिश्रणादेव । **आमुखाक्षेपसंश्रय** इति । आमुखेन य आक्षेपस्तमाश्रित्य प्रवृत्त इत्यर्थः । **शाकुन्तलेति** । तत्र हि मूलादेवानसूयया प्रवर्तितः स रस एव शकुन्तलाया विरहः ।

(वि, ञ) **अधिकारिण** इति । मुख्यफलस्वामिन इत्यर्थः । तेन नायकवधः क्वापि न वर्णनीय इत्यर्थः ।

(वि, ट) **रसवस्तुनोरिति** । वस्तु अलङ्कारभिन्नपदार्थः । लक्षणैर्व्यापकैः ।

(वि, ठ) नाट्ये कर्त्तव्यान्तरमाह—**स्वल्पमात्रमिति** । युधिष्ठिरोत्साह इति तस्य बलोत्साह इत्यर्थः ।

(वि, ड) बिन्दुरूपामर्थप्रकृतिमाह—**अवान्तरेति** । बिन्दुविच्छेदेति परिभाषारूपमिदम् । बिन्दुपद नपुंसकलिङ्गमिति ।

(वि, ढ) **उदयनस्येन्दोरिव** इत्यादिक वन्दिवाक्यम् । **कथमिति** ।

---

* अवान्तरार्थस्य विच्छेदे विरामे सति अविच्छेदस्य अविरामस्य कारणमेव बिन्दु । जले तैलबिन्दुवत् प्रसारित्वात् बिन्दु भवति ।

1 'अल्प' (क. ख पु) 1 'बिन्दुरुच्छेदकारणम्' (स. घ. पु)

व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते ॥ ४९ ॥ (ण) *

यथा रामचरिते सुग्रीवादे, वेण्या भीमादे, शाकुन्तले विदूषकस्य चरितम्।

[1]पताकानायकस्यापि स्यात्स्वकीयफलान्तरम्।
गर्भे सन्धौ विमर्शे वा निर्वाहस्तस्य जायते ॥ ५० ॥ (त)

यथा सुग्रीवादे राज्यप्राप्त्यादि।

यत्तु मुनिनोक्तम्–'आगर्भादाविमर्षाद्वा पताका विनिवर्त्तते' इति। तत्र पताकेति

कथ स एव उदयननरेन्द्र इति सस्कृतम्। वत्सराज एव उदयननामा। अवान्तराथ सागरिकाविरहे उदयनन्पत्वेन ज्ञानात् हि तस्य विरहवर्णनप्रवृत्याऽविच्छेद। किन्तु तत्सूचक विनैव नृपदर्शनरूपकारणसत्त्वात् प्रवर्त्तते इत्यतोऽङ्कावतारादिभेद। अङ्कावतारे तु पूर्वप्रविष्टपात्रै सूचनेति।

(वि, ण) पताकारूपामर्थप्रकृतिमाह—**व्यापी**ति। वृत्त नायकसहायस्या तच्च व्यापि अनेकालव्यापि। प्रासङ्गिक नायकप्रसङ्गवृत्तम्।

(वि, त) प्रकारान्तरमाह—**पताकानायकस्यापी**ति। अनायकस्या पालकारप्रश्लेष। तथा चाऽनायकस्य सुग्रीवादेरपि स्वकीयराज्यलाभादिफलान्तर यत्तदपि पताकान्तरमित्यर्थ। अपिशब्दात् नायकस्य रामस्य सेतुबन्धादि फलान्तर मपि पताकान्तरमिति बोध्यम्। **गर्भे सन्धाविति**। गर्भ विमर्ष वा सन्धौ इत्युभय न सन्धावित्यस्यान्वय। गर्भविमर्शापसहृतिरूपा हि पञ्चसन्धयो वक्ष्यन्ते। तत्र गर्भ विमर्शरूपसन्धिद्वये तस्य पताकासज्ञस्याऽनायकनायकद्वयफलान्तरस्य निर्वाहो निष्पत्तिरित्यथ।

(वि, थ) आगर्भादिति। मुनिवाक्ये पताकेत्युक्तीर्त्य व्याचष्टे–**पताकाना यकेति**। अत्रापि अलारप्रश्लेष। अनायकफलरूपा पताकैव आगर्भाद् आविमर्षाद्

(लो, इ) कथमिति। कथमेष स उदयननरेन्द्र। रत्नावल्यामेव द्वितीय-विन्दुर्यथा देवीगमनानन्तरमेवान्तराविच्छेदे विदूषक प्रति राज्ञा वचनम्। धिङ् मूर्ख! अल परिहासेन आभिनाशेन गूढो देव्यास्वया न लक्षित कोप। तथा हि देवीमेव प्रसादयितु गच्छाव इति।

---

* प्रासङ्गिक परार्थस्य स्वार्थो यस्य प्रसङ्गत।
सानुबन्ध पताकाख्य प्रकरी च प्रदेशभाक ॥
यद वृत्तञ्च परार्थं स्यात् प्रधानस्योपकारकम्।
प्रधानवच्च कल्प्येत सा पताकेति कीर्त्तिता ॥
फल प्रकल्प्यते यस्या परार्थं केवल बुधै।
अनुबन्धविहीन स्यात् प्रकरीमिति निर्दिशेत् ॥ (नाट्यसू)

1. 'पताका नायकस्य स्याच्च स्वकीय' (क ख पु)

पताकानायकफलं निर्वहणपर्यन्तमपि पताकाया प्रवृत्तिदर्शनादिति व्याख्यातमभिनवगुप्तपादैः । (ध)

प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता ॥ ५१ ॥ (द)

यथा कुलपर्यङ्के रावणजटायुसंवाद (ध)

प्रकरी नायकस्य स्यान्न स्वकीयं फलान्तरम् ॥ ५२ ॥ (न)

अपेक्षितन्तु यत्साध्यमारम्भो यन्नियन्धनः ।

समापनन्तु यत्सिद्धौ तत्कार्य्यमिति सम्मतम् ॥ ५३ ॥ (प)

यथा रामचरिते रावणवध ।

अवस्थाः पञ्च कार्य्यस्य प्रारब्धस्य फलार्थिभिः ।

आरम्भयत्नप्राप्त्याशानियताऽप्तिफलागमाः ॥ ५४ ॥ (फ)

तत्र—

भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये ॥ ५५ ॥

यथा रत्नावल्याम्—रत्नावल्यन्तःपुरनिवेशार्थं यौगन्धरायणस्यौत्सुक्यम् । एवं नायकनायिकादीनामप्यौत्सुक्यमाकरेषु बोद्धव्यम् । (य)

प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः ॥ ५६ ॥

यथा रत्नावल्यां "तह वि ण अत्थि अण्णो दंसणोवाओ त्ति जधा तधा

वा निवर्त्तते इत्यर्थः । अस्मिन्नभिनवगुप्तपादव्याख्याने हेतुमाह—**निर्वाहपर्य्यन्तमपीति** । पताराव्यापि प्रागङ्गिकरूपाया । अनायकस्य फलान्तररूपाया एव पताकाया आगमाद् वा आविमर्शाद्वा निवृत्तिरित्यर्थः ।

(वि, द) प्रकरीरूपार्थप्रकृतिमाह—**प्रासङ्गिकमिति** । प्रसङ्गादुपस्थितं प्रदेशास्थं प्रदेशविशेषे निष्पन्नमित्यर्थः ।

(वि, ध) **रावणजटायुसंवाद** इति । तस्याऽर्थप्रकृतित्वं तु रावणहृतसीतावर्णनप्राप्तिद्वारा ।

(वि, न) नायकस्यापि फलान्तरं पताका । प्रकरी तु न नायकस्य फलान्तरमित्यर्थः । नच रावणस्याऽनायकत्वात् फलं तत्फलकत्वात् अस्य पताप्रत्वप्रसक्तिरिति वाच्यम् । अनायकत्वेन नायकसहायस्यैव विवक्षितत्वात्, नन सदृशार्थकत्वात् ।

(वि, प) कार्य्यरूपार्थप्रकृतिमाह—**अपेक्षितमिति** । आरम्भो नाटकारम्भः । समापनमपि नाटकस्यैव । **रावणवध** इति । तत्सिद्धौ सत्यां हि नाटकसमापनम् ।

(वि फ) अस्य कार्य्यस्य पञ्चावस्था आह—**अवस्था** इति । निष्पादकनिष्पाद्यरूपा अवस्था इत्यर्थः । तत्रारम्भयत्नप्राप्त्याशानियताप्तिरूपा चतस्रोऽवस्था निष्पादिका । फलागमरूपा तु निष्पाद्या इत्यवधेयम् ।

(वि, व) तत्रारम्भलक्षणमाह—**भवेदिति** । आकर इति तत्तन्नाटके इत्यर्थः ।

(वि, भ) **तह वि** इति । तथापि नास्त्यन्यो दर्शनोपाय इति यथा तथा

आलिहिअ जधासमीहिदं करइस्सं । (भ, ई)

इत्यादिना प्रतिपादितो रत्नावल्याश्चित्रलेखनादिर्वत्सराजसङ्गमोपाय. । तथा च रामचरिते समुद्रबन्धनादिः ।

उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः ॥ ५७ ॥ (म)

यथा रत्नावल्यां तृतीयेङ्के वेशपरिवर्त्तनाभिसरणादे. [1]सङ्गमोपायाद् वासवदत्तालक्षणापायशङ्कया च अनिर्द्धारितैकान्तसङ्गमरूपफलप्राप्तिप्रत्याशा[2]। एवमन्यत्र । (य)

अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता ॥ ५८ ॥

अपायाभावान्निर्द्धारितैकान्तफलप्राप्तिर्नियताप्ति. ।

यथा–रत्नावल्याम्,(राजा) देवीप्रसादनं त्यक्त्वा नान्यमत्रोपायं पश्यामीति देवीलक्षणापायस्य प्रसादनेन निवारणान्नियतफलप्राप्तिः सूचिता। (र)

सावस्था फलयोगः स्याद् यः समग्रफलोदयः ॥ ५९ ॥ (ल)

यथा रत्नावल्यां रत्नावलीलाभश्चक्रवर्त्तित्वलक्षणफलान्तरलाभसहितः । एवमन्यत्र ।

आलिख्य यथासमीहितं करिष्यामीति संस्कृतम् । अङ्गुलिकम्पनानन्तरं तथाप्युक्तिः । सङ्गमोपाय· तदङ्गभूतो व्यापार । व्यापारस्यैव यत्नत्वेनोक्तत्वात् ।

(वि, म) प्राप्त्याशामाह—**उपाये**ति । उपायापायशङ्काभ्या प्राप्तिसम्भव. । उद्देश्यप्राप्तिसम्भावना प्राप्त्याशा ।

(वि, य) वेशपरिवर्त्तनं सागरिकाया वासवदत्तावेशकरणम् । तेन राज्ञः समीपे तस्या अभिसार । सङ्गमोपायस्य राज्ञ. सागरिकासङ्गमोपायस्य । वासवदत्ताया आगमनरूपापायस्य शङ्केत्यर्थ. ।

(वि, र) ***नियतफलप्राप्तिः सूचिते***ति । अत्र देव्या कोपशान्तिरूप-फलस्य नियताप्ति. । नचास्य कथ कार्यावस्थात्वं सागरिकासङ्गमनरूपकार्यस्य तेना-ऽनिष्पादनात् इति वाच्यम् । तत्कोपस्य तत्प्रतिबन्धकत्वेन तदभावस्य तत्कारणत्वात् ।

(वि, ल) फलागममाह—**सावस्थे**ति । फलयोग फलागमः । समग्र-फलोदयः समस्तोद्देश्यफलसिद्धिः । सामग्र्यञ्च मुख्योद्देश्यफलस्य उद्देश्यफलान्तरसाहि-त्यम् । तद्वक्ष्यति फलान्तरसहित इति । इयमवस्था पूर्वोक्तचतुरवस्थाभिर्निष्पाद्या ।

(लो, ई) **तथापि** इति । तथापि नास्ति अन्यो दर्शनोपाय इति । यथा तथालिख्य *यथासमीहितं करिष्यामि । यथा चन्द्रकलाया लक्ष्मीवरप्रदानरूपफलप्राप्ति-सहितो राज्ञश्चन्द्रकलालाभ ।*

---

1 'सङ्गोपायाद्' (ट. ड. पु) 2 रूपेति नास्ति (ज. झ. पु.)

यथासंख्यमवस्थाभिराभिर्योगात्तु पञ्चभिः।
पञ्चधैवेतिवृत्तस्य भागाः स्युः पञ्च सन्धयः ॥ ६० ॥ (ब, उ)

तल्लक्षणमाह—

अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति ॥ ६१ ॥

एकेन प्रयोजनेनान्वितानां कथांशानामवान्तरैकप्रयोजनसम्बन्धः सन्धिः।(श)

तद्भेदानाह—

मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः। (ऊ)
इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते ॥ ६२ ॥ (ष)

यथोद्देशं लक्षणमाह—

यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा। (ऋ)
प्रारम्भेण समायुक्ता तन्मुखं परिकीर्त्तितम् ॥ ६३ ॥ (स)

यथा रत्नावल्यां प्रथमेऽङ्के।

फलप्रधानोपायस्य मुखसन्धिनिवेशिनः।
लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखञ्च तत् ॥ ६४ ॥ (ह)

(वि, ब) **यथासंख्यमिति**। आभिः पञ्चावस्थाभिर्योगादिति वृत्तस्य पञ्चविधैव भागाः। पञ्चसन्धयो भवन्तीत्यर्थः।

(वि, श) तल्लक्षणं सन्धिसामान्यलक्षणम्। कथांशानामित्यत्र एकान्वये सतीत्यस्य व्याख्या। **एकेनेति**। एकैकेन प्रयोजनेनेत्यर्थः। अवान्तरेत्यादेर्व्याख्या **अवान्तरेति**।

(वि, ष) तद्भेदान् सन्धिभेदान्। **क्रमादिति**—उक्तपञ्चावस्थासाहित्येनैव सन्धिपञ्चकसिद्धेरुक्तत्वात्। तत्साहितमुखसन्ध्यादिक्रमेण इत्यर्थः। तथा चारम्भावस्थायुक्त इति। वृत्ताद्याभासो मुखसन्धिः। यत्नयुक्त प्रतिमुखसन्धिः। प्राप्त्याशायुक्तो गर्भसन्धिः। नियताप्तियुक्तो विमर्शसन्धिः। फलागमयुक्तः उपसंहृतिः।

(वि, स) **यत्र बीजेति**। बीजमितिवृत्तस्य। **प्रारम्भेणेति**। उत्साहरूपप्रारम्भावस्थायुक्ता इत्यर्थः। प्रथमेऽङ्के इति तत्र कन्दर्पपूजाया सागरिकाया राज्ञो दर्शनं विधिना आनीय घटितं बीजम्। तच्च सागरिकायास्तत्सङ्गमोत्साहसहितम्।

(वि, ह) **मुखसन्धिनिवेशिन इति**। बीजसमुत्पत्तिरूपमुखसन्धावुद्दिष्टस्य इत्यर्थः।

(लो, उ) आभिरवस्थाभिरारम्भादिभिः।

(लो, ऊ) उपसंहृतिः निर्वहणापरपर्यायः।

(लो, ऋ) **नानार्थेति**। नानाविधानामर्थानां वाच्यरूपाणां रसानाञ्च सम्भवो यस्यामित्यर्थः।

यथा रत्नावल्यां द्वितीयेऽङ्के वत्सराजसागरिकासमागमहेतोरनुरागबीजस्य प्रथमाङ्कोपक्षिप्तस्य सुसङ्गतावितूषकाभ्यां ज्ञानमानतया किञ्चिल्लक्ष्यस्य वासवदत्तया चित्रफलकवृत्तान्तेन किञ्चिदुन्नीयमानस्योद्देशरूप उद्भेद । (क)

फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन ।
गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान् मुहु ॥ ६५ ॥ (ख)

फलस्य गर्भीकरणाद्गर्भ ।

यथा रत्नावल्या द्वितीयेऽङ्के, (सुसङ्गता) "सहि अदक्खिणा दाणिं सि तुम जा एव भट्टिणा हत्थेण गहिदा वि कोव ण मुञ्चसीत्यादौ समुद्भेद । पुनर्वा सवदत्ताप्रवेशे ह्रास । तृतीयेऽङ्के तद्वार्त्तान्वेषणाय गत कथं चिरयति वसन्तक ।" इत्यन्वेषणम् । (विदू) 'ही ही भो कोसम्बीरज्जलम्भेणावि ण तादिसो पिअवअस्सस्स परितोसो जादिसो मम सआसादो पिअवअण सुणिअ भविस्सदि' इत्यादौ उद्भेद । पुनरपि वासवदत्ताप्रत्यभिज्ञानाद् ह्रास । पुन सागरिकाया सङ्केतस्थानगमने अन्वेषणम् । पुनर्लतापाशकरणे उद्भेद । (ग, ङ) ।

(वि, क) **वासवदत्तया चित्रफलकेति** । सागरिकालिखितेन राज्ञा स्वेन च युक्त चित्रफलक राज्ञा प्राप्तम् । वसन्तकहस्तात् स्खलित वासवदत्तया तत् प्राप्य तत्र लिखितस्य तदुभयानुरागबीजमुन्नीतम् । तादृशो भेदरूप प्रतिमुखसन्धिश्च वासवदत्तायामागतायां सुसङ्गतावसन्तकयोर्व्यापाररूपो यत्नसाहित ।

(वि, ख) **प्रागुद्भिन्नस्येति** । प्रतिमुखसन्ध्यावुद्भिन्नस्येत्यर्थ । मुहुर्ह्रासान्वेषणवान् समुद्भेद इत्यन्वय । ह्रासेत्यत्र त्रासेत्यपि क्वचित् पाठ ।

(वि, ग) **सहीति** । सखि ! अदक्षिणा इदानीमसि त्वम् । या एव भर्त्रा हस्ते गृहीताऽपि कोपं न मुञ्चसीति सस्कृतम् । ही हीति । ही हीत्याश्चर्ये । भो भो कौशाम्बीराज्यलाभेनापि न तादृश प्रियवयस्यस्य परितोष यादृशो मम सकाशात् प्रियवचन श्रुत्वा भविष्यतीति सस्कृतम् । उद्भेद सागरिकासङ्गमोपायस्य । **वासवदत्ताप्रत्यभिज्ञानादिति** सङ्केतभङ्गार्थमागता ता द्रष्टुमित्यर्थ । पुन सागरिकार्कृष्टम् । उद्भेद फलप्रधानोपायस्य । लतापाशकरणादि राज्ञ सागरिकादर्शन ततो गर्भ सन्धे प्राप्त्याशायोगरूपावस्थायोग ।

(लो, ङ) **सहीति** । सखि ! अदक्षिणेदानीमसि त्वम् । या एव भर्त्रा हस्तेऽपि गृहीताऽपि कोप न मुञ्चसि । ही ही भो परितोषे । कौशाम्बीराज्यलाभेनापि न तादृश प्रियवयस्यस्य परितोष यादृश मम सकाशात् प्रियवचन श्रुत्वा भविष्यति ।

यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः ।
शापाद्यैः सान्तरायश्च स विमर्श इति स्मृतः ॥ ६६ ॥ (घ)

अथ शाकुन्तले चतुर्थाङ्कादौ (अनसूया) पियंवदे जइवि गान्धव्वेण विवाहेण णिव्वुत्तकल्लाणा पिअसही सउन्तला अणुरूअभत्तुभाइणी सम्वुत्तेति णिव्वुद मे हिअअ इत्यत आरभ्य षष्ठाङ्कोपक्षिप्तात् शकुन्तलाप्रत्यभिज्ञानात् प्रागर्थसञ्चय शकुन्तलाविस्मरणरूपविघ्नालिङ्गित । अथ निर्वहणम्—(ङ, छ)

बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ।
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ॥ ६७ ॥ (च)

यथा वेण्याम् (कञ्चुकी) (उपसृत्य सहर्षम्) "महाराज ! वर्द्धसे । अथ खलु भीमसेनो दुर्योधनरुधिरजारुणीकृतसर्वशरीरो दुर्लक्षयव्यक्ति ।" इत्यादिना द्रौपदीकेशसंयमनादिमुखसन्ध्यादिबीजानां निजनिजस्थानोपक्षिप्तानामेकार्थयोजनम् । यथा वा शाकुन्तले सप्तमाङ्के शकुन्तलाभिज्ञानादुत्तरोऽर्थराशि । एषामङ्गान्याह—(छ)

उपक्षेप परिकरः परिन्यासो विलोभनम् ।
युक्ति प्राप्ति समाधानं विधानं परिभावना ।
उद्भेदः करण भेद एतान्यङ्गानि वै मुखे ॥ ६८ ॥

(वि, घ) **गर्भतोऽधिक** इति । गर्भसन्धौ किंचिदुद्भिन्नो हासान्वेषणयोश्च उद्भेद । अत्र ततोऽधिको हासराहित्यात् । सान्तराय सविघ्न ।

(वि, ङ) **अनसूयेति** । वक्त्र्या उत्कीर्तनम् । प्रियंवदे । इत्यादिकम् उक्ति । "प्रियंवदे ! यद्यपि गान्धर्वेण विवाहेन निर्वृत्तकल्याणा प्रियसखी शकुन्तला अनुरूपभर्तृगामिनी सम्वृत्ता इति निर्वृत्तं मम हृदयम्" इति संस्कृतम् । **षष्ठाङ्क** इति । तत्पूर्वं दुर्वासस शापेन राज्ञ शकुन्तलासमागमरूपप्रधानफलस्य उपाय प्रतिरुद्ध । **विस्मरणरूपेति** ।

"विचिन्तयन्ती यमनन्यमानसा तपोधन वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वा न स बोधितोऽपि सन् कथा प्रमत्त प्रथमोदितामिव । इति ।

दुर्वासस शापेन विस्मरणम् । अथ शापप्रतिबन्धकप्रधानफलोपायरूप विमर्शसन्धि शकुन्तलाया राजसमागमप्रत्याशारूपावस्थासहित ।

(वि, च) **ऐकार्थ्यमुपनीयन्त** इति । एकोद्देश्यनिर्वाहादैकार्थता । स्पष्टमपरम् ।

(वि, छ) अथ प्रकीर्णार्थैकात्मतोपनयनरूपो निर्वहणसन्धि । उद्देश्यशकुन्तलासमागमरूपफलागमावस्थासहित । **एषामिति** पञ्चसन्धीनामित्यर्थ ।

(वि, ज) तत्र मुखसन्धेर्द्वादशाङ्गान्याह—**उपक्षेप** इत्यादि ।

(लो, लृ) पियंवदे इति । प्रियंवदे यद्यपि गान्धर्वेण विधिना निर्वृत्तकल्याणा प्रियसखी शकुन्तला अनुरूपभर्तृगामिनी सम्वृत्तेति निर्वृत्तं मे हृदयम् ।

यथोद्देश लक्षणमाह—

काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृत. ॥ ६६ ॥ (ए)

काव्यार्थ इतिवृत्तलक्षणप्रस्तुताभिधेय । यथा वेण्या भीम—

लाक्षागृहानलविषान्नसभाप्रवेशै
प्राणेषु वित्तनिचयेषु च न प्रहृत्य ।
आकृष्य पाण्डववधूपरिधानकेशान्
स्वस्था भवन्ति मयि जीवति धार्तराष्ट्रा ॥(ऋ)

समुत्पन्नार्थबाहुल्यं ज्ञेयः परिकरः पुन. ॥ ७० ॥

यथा तत्रैव—

प्रवृद्ध यद्वैर मम खलु शिशोरेव कुरुभि-
र्न तन्नार्यो हेतुर्न भवति किरीटी न च युवाम् ।
जरासन्धस्योर स्थलमिव विरूढ पुनरपि
क्रुधा भीम सन्धि विघटयति यूय घटयत ॥ (ऋ)

तन्निष्पत्ति. परिन्यास. ॥ ७१ ॥

यथा तत्रैव—

चञ्चद्भुजभ्रमितचण्डगदाभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।

(वि,भ)लाक्षागृहानलेति—"स्वस्था भवन्तु कुरुराजसुता समृत्या "इति सूत्रधारस्योक्तिं श्रुत्वा प्रविष्टस्य भीमस्योक्तिरियम् । लाक्षेत्यादिभि प्राणेषु वित्तनिचयेषु च येऽस्मान् प्रहृत्य धार्तराष्ट्रा मयि जीवति सति स्वस्था भवन्ति इति । अत्र काकुध्वनिना न स्वस्था भविष्यन्तीत्यर्थ । लाक्षेत्यादिना प्राणेषु प्रहारप्रवेशेन वित्तनिचयेषु च प्रहार । परिधानकेशानित्यत्र द्वन्द्व । अत्र काव्यार्थस्य कुरुकुलवधप्रतिपादनस्योत्पत्ति ।

(वि,ञ) परिकरलक्षणमाह—**समुत्पन्नेति** ।

प्रवृद्धं यद्वैरमिति—सन्धिकरणविमुखस्य भीमस्य सहदेव प्रत्युक्तिरियम् । **शिशोरेवेति**—मम यौवनापेक्षापि तैर्न कृता, शिशुकाल एव विपदानात् । आर्या युधिष्ठिर । किरीटी अर्जुन । युवा नकुलसहदेवौ । विरूढ कृष्णदौत्येन जात, सन्धिमित्यन्वय । अत्र समुत्पन्नलाक्षागृहादिकथनरूपार्थबाहुल्यम् ।

(वि,ट)परिन्यासलक्षणमाह—**तन्निष्पत्तिरिति** । काव्याभिधेयरूपस्येतिवृत्तस्य निष्पत्ति —भावनिष्पत्तिकथनमित्यर्थ । **चञ्चदिति**—द्रौपदीं प्रति भीमस्योक्तिरियम् । हे देवि द्रौपदि ! तव कचान् केशान् वेणीबद्धान् कुर्वन् भीम उत्तम

(लो, प) समुपत्ति समुत्पत्तिभावम् ।

स्त्यानावनद्धघनशोणितशोणपाणि-
रक्तसयिष्यति कचास्तव देवि ! भीम ॥ (ट,ऐ)

अत्र उपक्षेपो नाम इतिवृत्तलक्षणस्य काव्याभिधेयस्य सक्षेपेणोपक्षेपण-मात्रम्। परिकरस्तस्यैव बहुलीकरणम्। परिन्यासस्ततोऽपि निश्चयापत्तिरूपतया परितो हृदये न्यसनमित्येषा भेदः। एतानि चाङ्गानि उक्तेनैव पौर्वापर्य्येण भवन्ति अङ्गान्तराणि त्वन्यथापि। (ठ)

गुणाख्यानं विलोभनम् ॥ ७२ ॥

यथा तत्रैव (द्रौपदी) "नाथ ! किं दुक्कर तुए परिकुविदेण"।

यथा वा मम चन्द्रकलाया चन्द्रकलावर्णने—सेय तारुण्यस्य विलास इत्यादि। यत्तु शाकुन्तलादिषु, ग्रीवाभङ्गाभिरामम् इत्यादि मृगादिगुणवर्णन तद्बीजार्थसम्बन्धाभावान्न सन्ध्यङ्गम्। एवमङ्गान्तराणामप्यूह्यम्। (ड)

सम्प्रधारणमर्थानां युक्तिः ॥ ७३ ॥ (ढ)

यथा वेण्या सहदेवो भीम प्रति, "आर्य ! किं महाराजसन्देशोऽयमन्यु त्पन्न एवार्य्येण गृहीत" इत्यत प्रभृति यावद्भीमवचनम्।

युष्मान् हेपयति क्रोधाल्लोके शत्रुकुलक्षय।
न लज्जयति दाराणा सभाया केशकर्षणम् ॥ इति।

विष्यति। उक्तसनेन दुर्याधनोरुरूपालङ्कारेण विशिष्टान् करिष्यतीत्यर्थ। भीम कीदृश? सुयोधनस्य स्त्यानावनद्धेन प्रवृद्धसम्बद्धेन घनशोणितेन शोणपाणि। सुयोधनस्य कीदृशस्य? चञ्चता चलता भुजेन भ्रमितया गदयाभिघातेन सचूर्णितमूरुयुगल यस्य तादृशस्य। अत्र भाविन्या ऊरुभङ्गनिष्पत्ते कथनम्।

(वि, ठ) उक्तत्रयाणा भेद विचिन्त्य दर्शयति—अत्रेति। ततोऽपि निश्चया-पत्तिरूपतया इति निश्चयस्य भाविकर्त्तव्यनिश्चयस्यापत्तिरपादान बोधनमिति यावत्। हृदये बोद्धृहृदये।

(वि, ड) विलाभनलक्षणमाह—**गुणाख्यानमिति**। **किमिति**। किं दुष्कर त्वया कुपितेन इति सस्कृतम्। इद भीमस्य बलाधिक्यरूपगुणकथनम्। **तारुण्य स्येति**। अत्र विलासहासपदे तज्जनकपरे सारोपया लक्षणया प्रयुक्ते। अत्र चन्द्रकला सौन्दर्य्यख्यानम्। **मृगादिगुणवर्णनमिति**। गुण—स्पृहणीयो धर्म्म, अत्र क्रियारूप। बीजार्थ—शकुन्तलाप्राप्तिबीजरूपोऽर्थ। मृगक्रियावर्णनस्य तदसम्बन्धत्वात्।

(वि, ढ) युक्तिलक्षणमाह—**सम्प्रधारणमिति**। उद्देश्यार्थोपपादकयुक्तिप्रदर्शनम्

(लो, ऐ) **स्त्यानेति**—स्त्यान सन् अवनद्ध दृढीभूत इत्यर्थ।

प्राप्तिः सुखागमः ॥ ७४ ॥

यथा तत्रैव, मक्षामि कौरवशतं समरे न कोपाद् इत्यादि । (द्रौपदी) (श्रुत्वा, सहर्षम्)

"णाध अस्सुदपुव्वं खलु एदं वअणं ता पुणो पुणो भण ।" (ण)

बीजस्यागमनं यत्तु तत्समाधानमुच्यते ॥ ७५ ॥ (त)

यथा तत्रैव, (नेपथ्ये) भो भो विराटद्रुपदप्रभृतयः ! श्रूयताम्—

यत्सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृतं
यद्विस्मर्त्तुमपीहितं शमवता शान्तिं कुलस्येच्छता ।
तद् द्यूतारणिसम्भृतं नृपसुताकेशाम्बराकर्षणैः
क्रोधज्योतिरिदं महत् कुरवने[1] यौधिष्ठिरं जृम्भते ॥ (थ)

अत्र, 'स्वस्था भवन्ति मयि जीवती'त्यादिबीजस्य प्रधाननायकाभिमतत्वेन सम्यगाहितत्वात् समाधानम् । (द)

सुखदुःखकृतो योऽर्थस्तद्विधानमिति स्मृतम् ॥ ७६ ॥

यथा बालचरिते—

उत्साहातिशयं वत्स ! तव बाल्यञ्च पश्यतः ।
मम हर्षविषादाभ्यामाक्रान्तं युगपन्मनः ॥

यथा वा मम प्रभावत्याम्, नयनयुगमेचनकमित्यादि । (ध)

(वि, ण) प्राप्तिलक्षणमाह—प्राप्तिरिति । णाधेति । नाथ ! अश्रुतपूर्वं खलु ईदृशं वचनम्, तत्पुनः पुनर्भण इति संस्कृतम् ।

(वि, त) समाधानलक्षणमाह—बीजस्येति । उक्तस्य उद्देश्यबीजस्य प्रधाननायकसम्मतत्वेन कथनं तत् ।

(वि, थ) यत्सत्येति । यत् यौधिष्ठिरं क्रोधज्योतिः इति सर्वत्र विशेषणम् । द्यूतारणीति । द्यूतरूपायामरण्या मन्थनकाष्ठे नृपसुतायाः द्रुपदसुतायाः द्रौपद्याः केशस्याऽम्बरस्य चाकर्षणात् सम्भृतक्रोधज्योतिरग्निः । अन्यदापि हि ज्योतिररण्यामाकर्षणात्सम्भृतं भवति ।

(वि, द) समाधानपदस्य योगार्थमनोपपादयति—अत्रेति । अत्र भीमोक्त बीजस्य प्रधाननायकयुधिष्ठिरसम्मतत्वकथनम् ।

(वि, ध) विधानरूपाङ्गलक्षणमाह—सुखदुःखाभ्यां कृतोऽर्थ इत्यर्थः । उत्साहेति । इदं रामं प्रति जनकस्य वाक्यम् । अत्र उत्साहेन सुखम् । बाल्येन च दुःखम् । नयनयुगेत्यत्र यथोक्तार्थेन सुखम् । तद्विरहाद् दुःखम् ।

---

1 'कुरुते' (च. ड. पु) 'कलते' (ङ. ट. ण)

कुतूहलोत्तरा[1] वाचः प्रोक्ता तु परिभावना ॥ ७७ ॥

यथा वेण्यां द्रौपदी युद्ध स्याद्यवेति सशयाना तूर्य्यशब्दानन्तरम्, "णाध किं दाणिं एसो पलअजलहरत्थणिदमसलो[2] खणे खणे समरदुन्दुभी ताडीअदि।" (न, अ)

बीजार्थस्य प्ररोहः स्यादुद्भेद. ॥ ७८ ॥

यथा तत्रैव, (द्रौपदी) "णाध[3] पुणो वि तुए समासासइदव्वा हम्। (भीम)।

भूय परिभवभ्रान्ति[4]लज्जाविधुरिताननम्[5]।
अनि शेषितकौरव्य न पश्यसि वृकोदरम्। (प, आ,)

करणं[6] पुन.[7] प्रकृतार्थसमारम्भ ॥ ७९ ॥ (फ)

यथा तत्रैव,

"देवि, गच्छामो वयमिदानीं कुरुकुलक्षयाय इति।

भेद संहतभेदनम्[8] ॥ ८० ॥

यथा तत्रैव।

'अत एवाद्यप्रभृति भिन्नोऽह भवद्भय'।

केचित्तु, भेद. प्रोत्साहनेति वदन्ति। (ब)

(वि, न) भावनालक्षणमाह—कुतूहलेति। णाधेति। नाथ किमिदानीम् एष प्रलयजलधरस्तनितमासल क्षणे क्षणे समरदुन्दुभिस्ताड्यते। इति सस्कृतम्। अत्र युद्धेच्छा द्रौपद्या कुतूहलोत्तरा एता वाच।

(वि, प) उद्भेदलक्षणमाह—बीजार्थस्येति। प्ररोह उत्पाद्यतानिश्चय। णाधेति। नाथ पुनरपि समाश्वासयितव्याऽहम् इति सस्कृतम्। अहमिति द्रौपद्या आत्मनिर्देश। भूय इति। बन्धुरित नामितं भूयो न पश्यसीत्यन्वय। भविष्यत् सामीप्ये वर्त्तमाना अत्र भीमस्य कौरववधोत्पाद्यतानिश्चय।

(वि, फ) करणलक्षणमाह—करणमिति। स्पष्टम्।

(वि, ब) भेदलक्षणमाह—भेद इति। अय प्रभृतीति सहदेवे भीमस्योक्ति।

(लो, अ) णाधेति। नाथ किमिदानीम् एष प्रलयजलधर स्तनितमांसल क्षणे क्षणे समरदुन्दुभिस्ताड्यते।

(लो, आ) णाधेति। नाथ पुनरपि त्वया समाश्वासयितव्याहम्।

---

1 'लोद्भवा' (ख पु) 2 'मत्थरो' (क ख पु)
3 'वाल्लान्ति' (इति ङ ढ पु) 4 'बन्धुरिताननम्' (ङ ढ पु) 5 'कारण' (ज झ पु) 6 'मतम्' (ज झ पु) 7 'सहतिभेदनम्' (ग ट पु)

अथ प्रतिमुखाङ्गानि–

विलासः परिसर्पश्च विधूतं[1] तापनं[2] तथा ।
नर्म्म नर्म्मद्युतिश्चैव तथा प्रशंसनं[3] पुनः ।
विरोधश्च[4] प्रतिमुखे तथा स्यात् पर्य्युपासनम् ।
पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि ॥ ८१ ॥ (भ)

तत्र—

समीहा रतिभोगार्था विलास इति कथ्यते ॥ ८२ ॥ (म)

रतिलक्षणस्य भावस्य यो हेतुभूतो भोगो विषय प्रमदा पुरुषो वा तदर्था समीहा विलास ।

यथा शाकुन्तले–

कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि ।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते ॥ (य, इ)
[5]दृष्टनष्टानुसरणं परिसर्पश्च कथ्यते ॥ ८३ ॥ (र)

(वि, भ) प्रतिमुखसन्धेस्त्रयोदशाङ्गान्याह–विलास इति ।

(वि, म) रतिभोगार्थेति । रतिरनुरागः, तद्भोगस्तद्विषयो नायिकादिः, तत्र समीहा इच्छा । यद्यपि रतिनिधूवनम् तद्भोगाय इच्छेत्येवमर्थ एव उदाहरणानुगारी युज्यते । तथापि ग्रन्थकृद्व्याख्यानुरोधादित्थं व्याख्यातम् ।

(वि, य) कामं प्रियेति । शकुन्तलालिप्सोर्दुष्मन्तस्य उक्तिरियम्—अकृतार्थेऽपीति । कामिन उद्देश्यसिद्धिरेव मनसिजस्य कृतार्थता, तद्रहितेऽपि मनसिजे इत्यर्थ । उभयप्रार्थना उभयस्य रतिमनुरागाधिक्यम् कुरुत इत्यर्थः । प्रकृते च शकुन्तलाया भावदर्शनात् तत्प्रार्थनाप्रार्थितस्य दुष्मन्तस्य रतिं कुरुत इत्यर्थ ।

(वि, र) परिसर्पलक्षणमाह—दृष्टनष्टेति । नष्टेति णश अदर्शने इति धात्वर्थानुसारात् दृष्टस्यानर्थक्यम् । तथा च पूर्वदृष्टस्य पश्चाददृष्टस्य वस्तुनोऽनुसरणमित्यर्थः ।

(लो, इ) काममिति । मनसिजेऽकृतार्थेऽपि स्त्रीपुंसयुगलस्य सम्भोग विनाऽपि उभयप्रार्थना अन्योऽन्यप्रार्थना रतिं प्रीतिं कुरुते इत्यर्थ । नायिकाया नायके नायकस्य नायिकया यदि प्रार्थना दृश्यते तदा उपभोगाभावेऽपि तयो प्रीतिर्भवति तेन तस्या भावदर्शनेन प्रार्थना मयि अभिव्यक्तेति मन समाश्वासि इति ।

---

1 'विधूतम्' (ग. पु) 2 'तपनम्' (ग. पु) 3 'प्रगमनम्' (क ख.पु)
4 'निरोध' (ज. झ पु) 5 'इष्ट' (क पु)

यथा शाकुन्तले (राजा) "भवितव्यमत्र तया" तथा हि—

अभ्युन्नता पुरस्तादवगाढा जघनगौरवात् पश्चात् ।
द्वारेऽस्य पाण्डुसिकते पदपद्धतिर्दृश्यतेऽभिनवा ॥ (ल)

कृतस्यानुनयस्यादौ विधूतं[1] त्वपरिग्रहः ॥ ८४ ॥ (व)

यथा तत्रैव "अलं वो अन्तेउरिआविरहपज्जुस्सुएण राएसिणा उवरुद्धेण। केचित्तु "विधूतं स्यादरति."इति यदन्ति । (श)

उपायादर्शनं यत्तु तापनं नाम तद् भवेत् ॥ ८५ ॥ (ष)

यथा रत्नावल्याम्—(सागरिका)

दुल्लहजणाणुराओ लज्जा गुरुई परवसो अप्पा ।
पियसहि ! विसमं पेम्मं मरणं सरणं णवरि एक्कम् ॥ (स)

परिहासवचो नर्म्म ॥ ८६ ॥

यथा रत्नावल्याम्—(सुसङ्गता) सहि ! जस्स किदे तुमं आआदा सो अअं दे पुरदो चिट्ठदि । (सागरिका) (साम्यसूयम्) "कस्स किदे अहं आअदा" (सुसङ्गता) अइ अप्पसकिदे ! णं चित्तफलअस्स । (ह)

(वि, ल) भवितव्यमत्र तयेति राज्ञ उक्तिरियम् । तया शाकुन्तलया भवितव्यं स्यातव्यमिति । तत्र हेतुमाह—अभ्युन्नतेति । यतोऽस्य लतागृहस्य पाण्डुसिकते द्वारेऽभिनवा पदपद्धतिर्दृश्यते । कीदृशी पुरस्तात् पदस्य पूर्वभागेऽभ्युन्नता । पश्चाद्भागे जघनगौरवादवगाढा । अत्र पूर्वदृष्टशाकुन्तलानुसरणम्।

(वि, व) विधूतलक्षणमाह—कृतस्येति । आदौ कृतस्यानुनयस्य प्रीतेः पश्चादपरिग्रह आहार्य्य इत्यर्थ ।

(वि, श) तत्रैवेति । शाकुन्तल एव इत्यर्थः । अलमिति—अल वोन्तःपुरिकाविरहपर्युत्सुकेन राजर्षिणा उपरुद्धेनेति संस्कृतम् । अत्र सख्या उपरोधवशात् शाकुन्तलाया आदौ प्रीतिर्लभ्यते । उपरोधनिषेधाच्चाहार्यस्तदपरिग्रह । केचिदिति—आहार्यादीदृशनिषेधादरत्यवगमादत्र अस्वरस ।

(वि, ष) तापनलक्षणमाह—उपायेति । उद्देश्याऽर्थोपाय ।

(वि, स) दुल्लहेति—

"दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा ।
प्रियसखि ! विषम प्रेम मरणं शरण केवलमेकम् ॥" इति संस्कृतम् ।
दुर्लभजनो राजा । णवरीति केवले देशी, एव प्रधान शरणमित्यन्वय ।

(वि, ह) नर्मलक्षणमाह—परिहासेति । सहीति । "सखि ! यस्य कृते त्वमायाता सोऽयं ते पुरतस्तिष्ठती"ति संस्कृतम् । कस्सेति । "कस्य कृतेऽहमागता"

---

1 'विधूत' (ग. पु)

[1]धृतिस्तु परिहासजा

नर्म्मद्युतिः ॥ ८७ ॥

यथा तत्रैव, (सुसङ्गता) सहि अदक्खिणा दाणिं सि तुमं जा एवं भट्टिणा हत्थावलम्बिदावि कोवं ण मुञ्चसि । (सागं०) (सभ्रूभङ्गमीषद् विहस्य) सुसङ्गदे ! दाणिं वि ण विरमसि । केचित्तु दोषस्याच्छादनं हास्यं नर्म्मद्युतिरिति वदन्ति । (क)

प्रशंसनं वाक्यं स्यादुत्तरोत्तरम् ॥ ८८ ॥ (ख)

यथा विक्रमोर्वश्याम्—(उर्वशी) जअदु जअदु महाराओ (राजा) मया नाम जितं यस्य त्वया जय उदीर्य्यते इत्यादि ।

विरोधो व्यसनप्राप्तिः ॥ ८९ ॥

यथा चण्डकौशिके—(राजा) नूनमसमीक्ष्यकारिणा मयाऽन्धेनेव स्फुरच्छिखाकलापो ज्वलन पद्भ्यां समाक्रान्तः । ग)

कृतस्यानुनयः पुनः ।

स्यात् पर्य्युपासनम् ॥ ९० ॥

यथा [1]रत्नावल्याम्, (विदू०) भो मा कुप्प । एसा हि कदलीघरान्तरं गदेत्यादि । (घ)

पुष्पं विशेषवचनं मतम् ॥ ९१ ॥ (ङ)

इति संस्कृतम् । अर्यीति । "अयि अन्यशङ्किते ननु चित्रफलकस्य" इति संस्कृतम् ।

(वि, क) नर्मद्युतिलक्षणमाह—धृतिरिति । परिहाससहिष्णुता इत्यर्थः । सहीति । सखि अदक्षिणा इदानीमसि त्वम् । या एवं भर्त्रा हस्तावलम्बिताऽपि कोपं न मुञ्चसीति । सुसङ्गते ! इदानीमपि न विरमसि । अत्र सागरिकाया सुसङ्गताकृत-परिहाससहिष्णुता । नर्मणि तस्याऽसूयताप्रदर्शनाद् असहिष्णुता इति भेदः । केचिदिति । अत्र दोषाच्छादनाप्रतीत्या अस्वरसः ।

(वि, ख) प्रशसनरूपाङ्गस्य लक्षणमाह—प्रशंसनमिति । प्रशस्यतेऽनेन इति प्रशसनम्, उत्तरोत्तर तादृश वाक्यमेव प्रशंसननामाङ्गमित्यर्थः ।

(वि, ग) विरोधलक्षणमाह—विरोध इति । राजा हरिश्चन्द्रः । स्फुरदार्चि-रामूहोज्ज्वलनो विश्वामित्र ।

(वि, घ) पर्युपासनाङ्गलक्षणमाह—कृतस्येति । कृतस्य कोपहेतोरित्यर्थः । पुनरनुनयः कोपाऽपनयनहेतुप्रदर्शनमित्यर्थः । भो इति । भो वयस्य मा कुप्य । एषा हि कदलीगृहान्तरं गतेति संस्कृतम् । एषेति—कदलीगृहान्तरप्रवेशस्य प्रदर्शनम् ।

(वि, ङ) पुष्पनामाङ्गलक्षणमाह—पुष्पमिति । अयं विशेषो विलक्षण-पदार्थ इत्येवमर्थकं वचनमित्यर्थः ।

---

1 'धृतिस्तु' (क. पु.)

यथा तत्रैव, (राजा हस्ते गृहीत्वा स्पर्शं नाटयति ।)

(विदू०) भो वअस्स एसा अपुव्वा सिरी तुए समासादिदा ।

(राजा ।) वयस्य ! सत्यम् ।

श्रीरेषा पाणिरप्यस्या पारिजातस्य पल्लव ।
कुतोऽन्यथा स्रवत्येष[1] स्वेदच्छद्मामृतद्रव ॥ (च)

प्रत्यक्षनिष्ठुरं वज्रम् ॥ ६२ ॥

यथा तत्रैव, (राजा) कथमिहस्थोऽहं त्वया ज्ञात ? (सुसगदा) ण केवल तुम सम चित्तफलएण । ता जाव गदुअ देवीए णिवेदइस्सम् । (छ)

उपन्यास प्रसादनम् ॥ ६३ ॥ (ज)

यथा तत्रैव, (सुसगदा) भट्टा ! अल सङ्काए । मएवि भट्टिणीए पसादेण कीलिद ज्जेव एदिहिं । ता किं कण्णाभरणेण । अदोवि मे गरुअरो पसादो एसो ज तुए अह एत्थ आलिहिदत्ति कुविदा मे पिअसही सागरिआ । एसा जेव पसादीअदु । केचित्—उपपत्तिकृतो योऽर्थ उपन्यास स कीर्त्तित इति वदन्ति, उदाहरन्ति च तत्रैव, अदिमुहरा क्खु सा गन्भदासीति । (झ)

चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते ॥ ६४ ॥ (ञ)

(वि, च) भो इति । 'भो वयस्य एषाऽपूर्वा श्रीस्त्वया समासादिता" इति संस्कृतम् । श्रीरेषेति । स्वेदच्छद्म घर्मव्याज । पारिजातपल्लवाद् अमृतद्रवस्रवणात् ।

(वि, छ) वज्रस्वाङ्गलक्षणमाह—प्रत्यक्षेति । न केवलमिति । न केवल त्व सम चित्रफलकेन । तथावदत्वा देव्यै निवेदयिष्यामि । इति संस्कृतम् । इद सुभद्रतावाक्य राज्ञ साक्षान्निष्ठुरम् ।

(वि, ज) उपन्यासलक्षणमाह—उपन्यास इति । प्रसादन प्रसादन-प्रार्थना ।

(वि, झ) भर्त ! अल शङ्कया मयापि भर्त्र्या प्रसादेन क्रीडितमेव एतं । तन् किं कर्णाभरणेन ? अतोऽपि मे गुरुतर प्रसाद एष यत्त्वयाऽहमभ्रालिखितेति कुपिता मे प्रियसखी सागरिका । एषैव प्रसादनामिति संस्कृतम् । तं कर्णाभरणं किं त्वयेत्यादि सागरिकोक्तेरनुवाद । अत्र सागरिकाप्रसादनप्रार्थना उपपत्तिरूप इति युक्त्युपपादसत्वादुक्त्यर्थ । अदीति । अतिमुखरा खल्वेषा गर्भदासीति संस्कृतम् । गर्भदासी अन्त पुरदासी । अत्र मम चित्रफलकेनेत्यादि निष्ठुर सुभद्रतया पूर्वमुक्त वचन विदूषकेत्युपपादकम् ।

(वि, ञ) वर्णसंहाराङ्गलक्षणमाह—चातुर्वर्ण्येति । ब्राह्मणादीनां चतुर्वर्णानां मेलनकथनमित्यर्थ ।

---

1 'पतत्येष' (ट. ढ ध)

6196

यथा वीरचरिते तृतीयेऽङ्के—

परिषदियमृषीणामेष वीरो युधाजित्
[1]समसृषिभिरमात्यैर्लोमपादश्च वृद्धः ।
अयमविरतयज्ञो ब्रह्मवादी पुराण
प्रभुरपि जनकानामद्रुहो याजकास्ते[2] ॥ (ट)

इत्यत्र ऋषिक्षत्रादीनां वर्णानां मेलनम् । अभिनवगुप्तपादास्तु, वर्णशब्देन पात्राण्युपलक्षयन्ते । संहारो मेलनमिति व्याचक्षते उदाहरन्ति च रत्नावल्यां द्वितीयेऽङ्के—अदोवि मे अअं गरुअरो पसादो इत्यादेरारभ्य, णं हत्थे गेण्हिअ पसादेहि णं । (राजा) कासौ कासाविति आदि ।

अथ गर्भाङ्गानि–(ठ)

अभूताहरणं मार्गो रूपोदाहरणे क्रमः ।
सँग्रहश्चानुमानं च प्रार्थना सिद्धिरेव च ।
[3]त्रोटकाधि[4]बलोद्वेगा गर्भे स्युर्विद्रवस्तथा ॥ ९५ ॥
तत्र व्याजाश्रयं वाक्यमभूताहरणं मतम् ॥ ९६ ॥

यथा अश्वत्थामाङ्के—

"अश्वत्थामा हत इति पृथासूनुना स्पष्टमुक्त्वा ।

(वि, ट) परिषदियमिति । मिलितब्राह्मणाद्यनेकवर्णसभाप्रदर्शनमिदम् । इयमृषीणा परिषद् सभा । युधाजित् । केकयदेशपतिरपि ऋषिभिरमात्यैश्च समम् एष वृद्धो राजा लोमपादः । अयमपि जनकाना जनकवशस्य प्रभु सीरध्वज. अविरतयज्ञो ब्रह्मवादी च । अद्रुह द्रोहशून्यास्ते प्रसिद्धा याजका एते इति शेष ।

(वि, ठ) पात्राणीति । नाट्यपात्राणीत्यर्थ । अदोवीति । अतोऽपि मे अयं गुरुतर प्रसाद इत्यादेरारभ्य इत्यर्थ । इत्यादेरित्यवधौ पञ्चमी । ज किण अहं तत एत्थ आलिहि देत्यादिकमादत्वित्यावधिरूपेत्यर्थ । णं हत्थेति । ननु हस्ते गृहीत्वा प्रसादय एनामित्यर्थ । कासौ कासाविति द्वे वीप्सा । अत्र राजा गुरुतरा सागरिकाश्च पात्राणि, एषा मेलनम् ।

(वि, ड) गर्भसन्धेर्द्वादशाङ्गान्याह—अभूतेति । अभूताहरणलक्षणमाह—तत्र व्याजेति । अश्वत्थामा हत इति युधिष्ठिरस्य व्याजाश्रयवाक्यम् ।

---

1 'सह नृपतिरमात्यै' (क. पु.) 2 'मत्त भो याचकस्ते' (क. पु.)
3 'तोद-' (ग. पु.) 4 'दि' (क. पु.)

6196

स्वैरं शेषे गज इति किल[1] व्याहृत सत्यवाचा[2]" ॥ (ड)

तत्त्वार्थकथनं मार्गः ॥ ९७ ॥

यथा चण्डकौशिके-(राजा) भगवन्!

गृह्यतामर्जितमिद भार्य्यातनयविक्रयात् ।
शेषस्यार्थे करिष्यामि चाण्डालेऽप्यात्मविक्रयम् ॥ (ढ)

रूपं वाक्यं वितर्कवत् ॥ ९८ ॥

यथा रत्नावल्याम् । (राजा)

मन प्रकृत्यैव चल दुर्लक्ष्यञ्च तथापि मे ।
कामेनेतत्कथ विद्ध सम सर्वै शिलीमुखै ॥ (ण)

उदाहरणमुत्कर्षयुक्त वचनमुच्यते ॥ ९९ ॥ (त)

यथा अश्वत्थामाङ्के—

यो य शस्त्र बिभर्त्ति स्वभुजगुरुमद पाण्डवीना चमूना
यो य पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्या गतो वा ।
यो यस्तत्कर्म्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीप
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम् ॥ (थ)

(वि, ढ) मार्गरूपाङ्गलक्षणमाह—**तत्त्वार्थेति** । अव्याजकथनमित्यर्थ । **गृह्यतामिति**-विश्वामित्र प्रति हरिश्चन्द्रनृपतेरुक्तिरियम् । भार्य्यायास्तनयस्य विक्रयणादर्जितमिद वित्त गृह्यतामित्यन्वय । शेषस्य वित्तस्याप्यर्थे निमित्तमात्मविक्रय करिष्यामि । तत्र राज्ञ आपद्यपि अव्याजकथनम् ।

(वि, ण) रूपात्मकमङ्गमाह—**रूपमिति** । वितर्कोऽसम्भाविवस्तुहेत्वनुसन्धानम् । **मन प्रकृत्यैवेति**—सागरिकाविरहिणो राज्ञोऽय वितर्क । दुर्लक्ष्य लक्षितु द्रष्टुमशक्यम् ।

(वि, त) उदाहरणरूपस्याङ्गस्य लक्षणमाह—**उदाहरणमिति** । उत्कर्षयुक्त स्वाहङ्कारयुक्तम् ।

(वि, थ) **यो य शस्त्रमिति** । क्रुद्धस्याश्वत्थाम्न उक्तिरियम् । मयि रणे चरति सति पाण्डवीना चमूना मध्ये स्वभुजगुरुमद सन् यो य शस्त्र बिभर्ति एव यो य पाञ्चालगोत्र इत्यादि । एव यो यस्तत्कर्म इत्यादि । तत्कर्म मृतस्य मम पितु शिरश्छेदनरूपम् । एव यश्च यश्च मम प्रतीप क्रोधान्धोऽह जगतामन्तकस्य तस्य तस्यान्तक इत्यर्थ । तेजोगदन्तकस्य क्रोधोद्दीपनाद् एव जगदन्तक इत्यर्थ ।

---

1 'पुनर' (क ग) 2 'तच्छ्रुत्वागौ दमितनय प्रत्ययात्तस्य राज्ञ । शस्त्रा ण्यागौ नयनसलिल चापि तुल्य मुमोच ॥" इत्युत्तरार्धस्वाधिक (क. ग)

भावतत्त्वोपलब्धिस्तु क्रम' स्यात् ॥ १०० ॥

यथा शाकुन्तले, (राजा) " स्थाने खलु विस्मितनिमेषेण चक्षुषा प्रियामवलोकयामि। तथा हि–

उन्नमितैकभ्रूलतमाननमस्या पदानि रचयन्त्या ।
पुलकाञ्चितेन कथयति मय्यनुराग कपोलेन ॥ (द)

संग्रह' पुन । सामदानार्थसपन्न. ॥ १०१ ॥

यथा रत्नावल्याम्-(राजा) साधु वयस्य ! इद ते पारितोषिकम्। (इति कटक ददाति)। (ध)

लिङ्गादूहोऽनुमानता ॥ १०२ ॥

यथा जानकीराघवे नाटके (राम)।

लीलागतैरपि तरङ्गयतो धरित्री-
मालोकनैर्नमयतो जगतां शिरांसि ।
तस्यानुमापयति काञ्चनकान्तिगौर-
कायस्य सूर्य्यतनयत्वमदृश्यताञ्च ॥ (न)

रतिहर्षोत्सवानान्तु प्रार्थन प्रार्थना भवेत् ॥ १०३ ॥

यथा रत्नावल्याम्—प्रिये सागरिके !

शीताशुर्मुखमुत्पले तव दृशौ पद्मानुकारौ करौ
रम्भास्तम्भनिभ 'तथोरयुगल बाहू मृणालोपमौ ।

(वि, द) क्रमरूपाङ्गलक्षणमाह–भावेति । भावस्यानुरागस्य तत्त्वनोपलब्धि रित्यर्थ उन्नमितेति–पदानि श्लोकषट्कपदानि रचयन्त्या अस्या आनन कर्तृ पुलकाञ्चितेन कपोलेन मयि अनुराग कथयति इत्यर्थ । कीदृशमाननम् ? उन्नमितमेकभ्रूलतम् ।

(वि, ध) सामदानेति । साम्ना प्रीत्या दानेन च सम्प्रदानस्य दीयमानधन-स्यप्तिरित्यर्थ । साध्वीति–अत्र दीयमानरत्नरूपधनसम्पत्तिर्विदूषकस्य ।

(वि, न) अनुमानरूपाङ्गलक्षणमाह–लिङ्गादिति । अनुमानता अनुमानम् । लीलेति । परशुरामवर्णनमिदम् । तस्य लीला व्यवगाय । सूर्य्यतनयत्व सूर्य्यतुल्यतेज स्वित्वन सूर्य्यपुत्रत्वमदृश्यत्व चानुमापयति । तस्य कीदृशस्य गतैर्गमनैरपि धरित्री तरङ्गयत चालयत । आलोकनैर्जगतां शिरांसि नमयतस्तद्दृष्टमात्रं गौं प्रणम्य मानत्वात्। काञ्चनकान्तिवद् गौरकायस्य ।

(वि, प) प्रार्थनाङ्गरूपाङ्गलक्षणमाह–रतीति । स्वयं या नायिकाया हर्षो त्सवस्य तादृशोत्सवानां प्रार्थनत्वार्थ । शीताशुरित्यादि । शीताशुरुत्पत्त्यादिना

---

1 'तवो' (ज. भ. पु)

इत्याह्लादकरास्पिलाङ्गि ! रभसान्नि.शङ्कमालिङ्ग्य मा-
मङ्गानि त्वमनङ्गतापविधुराण्येह्येहि निर्वापय ॥ (प)

इदञ्च प्रार्थनाख्यमङ्गम्। यन्मते निर्वहणे इह भूतावसरत्वाभावात्[1] प्रशस्ति नामाङ्ग नास्ति तन्मतानुसारेणोदाहृतम्। अन्यथाङ्गानां पञ्चषष्टिसंख्यकत्वप्रसङ्गात्।(फ)

रहस्यार्थस्य तूद्भेदः क्षिप्तिः स्यात् ॥ १०४ ॥

यथा अश्वत्थामाङ्के—

एकस्यैव विपाकोऽस्य दारुणो भुवि वर्त्तते।
केशग्रहे द्वितीयेऽस्मिन् नून निःशेषिता. प्रजा. ॥ (ब)

त्रोटकं पुनः। संरब्धवाक् ॥ १०५ ॥

यथा चण्डकौशिके—(कौशिक)।

आः पुन कथमद्यापि न सम्भृता[2] स्वर्णदक्षिणा । (भ)

अभिबलमभिसन्धिश्छलेन यः ॥ १०६ ॥ (म)

आह्लादकरास्पिलाङ्गि ! एहि एहि रभसात् बलात् मदङ्गानि नि शङ्कमालिङ्ग्य अनङ्ग तापविधुराणि तानि निर्वापय । तापशून्यानि कुरु इत्यर्थ ।

अत्रालङ्गनाधीनोत्सवप्रार्थना ।

(वि, फ) अत्रेतदङ्गस्य निर्वहणसन्धे प्रशस्तिनामाङ्गस्य वैकल्पिकी स्थिति । अनयोर्मिलितस्थितसत्त्वे तु वक्ष्यमाणचतुःषष्टिसंख्यासन्ध्यङ्गाना न भवति । पञ्चषष्टित्वापत्ते । तथा हि अत्र गर्भसन्धौ एतदङ्गसत्त्वे एतान्यङ्गानि त्रयोदश भवन्ति, मुखसन्ध्यङ्गानि च द्वादशोक्तानि, अन्यसन्धित्रयाङ्गानि च त्रयोदश त्रयोदश । निर्वहणसन्ध्यङ्गानि चतुर्दशेति । पञ्चषष्टित्व प्रसजति । अतो यन्मते निर्वहणसन्धौ प्रशस्तिनामक चरमाङ्ग नास्ति तन्मते एवात्रेदम् अङ्गमन्यथा तु नेत्याह—इदञ्चेति । तत्र प्रशस्तिनामाङ्गसत्त्वे हेतुमाह—भूतावसरत्वाभावादिति । भूतानि प्राणिनो नाट्यपात्राणि तदवसरत्व तद्वत्त्वम् । अङ्गानाम् इत्यङ्गानि भूतावसराण्युच्यन्ते । प्रशस्त्यङ्गस्य सदस्यार्शीर्वादत्वेन तथात्वाभावादित्यर्थ ।

(वि, व) क्षिप्तिरूपमङ्गमाह—रहस्यार्थस्येति । रहस्यार्थोऽभिनेतव्यार्थ इतिवृत्तसन्धेऽर्थस्यस्य भेद उत्पत्तिसूचनम् । एकस्येति । एकस्य द्रौपदीकेशग्रहणस्य । द्वितीये मृतद्रोणस्य धृष्टद्युम्नेन केशग्रहेऽत्र सर्वसंहाररूपस्य रहस्यस्य उत्पत्तिसूचनम् ।

(वि, भ) त्रोटकाख्याङ्गलक्षणमाह—त्रोटकं पुनरिति । संरब्धवाक् सक्रोधवाक् । आः पापेति । हरिश्चन्द्र नृप प्रति पृथिवीदानदक्षिणादानार्थं विश्वामित्रस्य सक्रोधवाक् ।

(वि, म) अभिबलाङ्गलक्षणमाह—अभिबलमिति । अभिसन्धिरतेरार्थटनार्थं छलेनानुसन्धानम्।

---

1 'भूतावसरत्वात्' (इति क. स पु) 2 'सम्भृता' (क. पु)

यथा रत्नावल्यां (काञ्चनमाला) 'भट्टिणि ! इअं सा चित्तसालिआ, दाव वसन्तअस्स सण्णं करोमि' इत्यादि। (य)

नृपादिजनिता भीतिरुद्वेगः परिकीर्त्तितः ॥ १०७ ॥

यथा वेण्याम्—

प्राप्तावेकरथारूढौ पृच्छन्तौ त्वामितस्तत ।
स कर्णारि स च क्रूर क्रूरकर्मा वृकोदर. ॥ (र)

शङ्काभयत्रासकृतः संभ्रमो विद्रवो मतः ॥ १०८ ॥ (ल)

यथा—

कालान्तककरालास्यं क्रोधोद्भूत दशाननम्।
विलोक्य वानरानीके सभ्रम कोऽप्यजायत ॥ (व)

अथ विमर्शाङ्गानि—

अपवादोऽथ सम्फेटो व्यवसायो द्रवो द्युतिः ।
शक्ति. प्रसङ्ग. खेदश्च प्रतिषेधो विरोधनम् ।
प्ररोचना विमर्शे स्यादादानं छादनं तथा ॥ १०९ ॥ (श)
दोषख्याऽपवादः स्यात् ॥ ११० ॥

(वि, य) भट्टिणि इति। हे भर्त्रि ! इय चित्रशालिका। तावद् वसन्तकस्य सज्ञा करोमीति सस्कृतम्। चित्रशालिकाया राज्ञ समीपे वासवदत्तावेशेन सागरिका-मानेतु तया सह वसन्तकेन सकेते कृते काञ्चनमालया तज्ज्ञात्वा वासवदत्तामेवानीय वसन्तकस्थाने सागरिकाऽऽगता इत्यङ्गलिसज्ञा कर्तुं वासवदत्तायामुक्तिरिय तस्या।

(वि, र) **नृपादिजनितेति**। नृपादौ केनापि जनिता भीतिरित्यर्थ। **प्राप्तावेकरथेति**। स कर्णारिर्जुन स च क्रूरकर्म्मा क्रूरो वृकोदरो भीम। एतावे करथारूढौ भ्रातरौ प्राप्तावागतावित्यर्थ। कर्णारित्वेन क्रूरकर्म्मत्वेन च दुर्य्योधनस्य भीतिजननम्।

(वि, ल) विद्रवरूपाङ्गमाह—**शङ्काभयेति**। शङ्कया अनिष्टशङ्कया भयत्रासौ तत्कृतो य सभ्रम व्याकुलता विद्रवो मत इत्यर्थ। भाव्यनिष्टद्वेषो भयम्। आक-स्मिकानिष्टोत्पत्त्या कर्त्तव्यमूढता तु त्रास।

(वि, व) **कालान्तकेति**। क्रोधोद्भूत क्रोधकम्पित दशानन विलोक्य वान-रानीके कोऽपि सभ्रमोऽजायत इत्यर्थ।

(वि, श) विमर्शसन्धेस्त्रयोदशाङ्गान्याह—**अपवाद** इत्यादि।

(वि, ष) दोषख्या दोषख्यापनम्। वीरवधगदस्य वीरवधमस्य पदवी

यथा वेण्यां—(युधिष्ठिरः)। पाञ्चालक ! क्वचिदासादिता वस्य दुरात्मनः कौरवापसदस्य पदवी ? (पाञ्चालक)। न केवलं पदवीं, स एव दुरात्मा देवीं केशपाशस्पर्शपातकप्रधानहेतुरुपलब्धः। (घ)

सम्फेटो रोषभाषणम् ॥ १११ ॥

यथा तत्रैव (राजा)। अरे रे मरुत्तनय ! वृद्धस्य राज्ञः पुरतो निन्दितमप्यात्मकर्म श्लाघसे। शृणु रे !

कृष्टा केशेषु भार्या तव तव च पशोस्तस्य राज्ञस्तयोर्वा
प्रत्यक्षं भूपतीनां मम भुवनपतेराज्ञया द्यूतदासी।
तस्मिन् वैरानुबन्धे वद किमपकृतं तैर्हता ये नरेन्द्रा
बाह्वोर्वीर्य्यातिभारद्रविणगुरुमदं मामजित्वैव दर्पः ॥

(भीमः) (सक्रोधम्) आः पाप ! (राजा) आः पाप ! इत्यादि। (ङ)

व्यवसायश्च विज्ञेयः प्रतिज्ञाहेतुसम्भवः ॥ ११२ ॥

यथा तत्रैव, (भीमः)

निहताशेषकौरव्य क्षीवो दुःशासनासृजा।
भङ्क्त्वा दुर्य्योधनस्योर्वोर्भीमोऽयं शिरसा नतः ॥ (च)

द्रवो गुरुव्यतिक्रान्तिः शोकावेगादिसम्भवा ॥ ११३ ॥

यथा तत्रैव—(युधिष्ठिर) भगवन् ! कृष्णाग्रज ! सुभद्राभ्रात !

पादचिह्नम्। सोऽपि दुरात्मा दुर्योधनः। अत्रोक्तयामेव दोषप्रख्यापनम्।

(वि, ङ) सम्फेटस्वरूपमङ्गमाह—अरे रे इत्यादि। दुर्योधनस्य भीमं सरोष्यं उक्तिरियम्। वृद्धस्य राज्ञ धृतराष्ट्रस्य। कृष्टा इति—तव भीमस्य तव अर्जुनस्य तस्य राज्ञो युधिष्ठिरस्य वा पशोस्तयोर्नकुलसहदेवयोर्वा पशोर्भार्या, भुवनपतेर्मम आज्ञया नृपतीना समक्ष द्यूतदासी केशेषु कृष्टा। ये नरेन्द्रा युष्माभिर्हतास्तैस्तादृशे वैरानुबन्धे किमपकृतं तद्वद। तान् जित्वा यो दर्प स किं मामजित्वेति बाहुल्यनिर्विशेषवशान जित्वैव दर्प इति गम्यते। मा वीदृशम् ? बाह्वोर्वीर्यातिभारस्वरूपेण द्रविणेन धनेन गुरुमदम्। आः पापेति। भीमदुर्योधनयो. परस्पर प्रति उक्ति। राजा दुर्योधनः। अत्र द्वयोरेव रोषभाषणम्।

(वि, च) व्यवसायस्वरूपमङ्गमाह—व्यवसायश्च इति। प्रतिज्ञाहेतो. प्रतिज्ञार्थस्य गर्भो निष्पत्ति., तत्कथनमित्यर्थः। निहतेति। क्षीवो मत्त। असृजा शोणितेन.। भङ्क्त्वा, भङ्क्त्वा.।

(वि, छ) द्रवस्वरूपमङ्गमाह—द्रव इति। गुरोर्व्यतिक्रान्ति भर्त्सनमित्यर्थः। भगवन् इत्यादि। युधिष्ठिरस्य दुर्योधनानुरागकृद्वत्तभद्रभर्त्सनमिदम्। कृष्णाग्र-

ज्ञातिप्रीतिर्मनसि न कृता क्षत्रियाणां न धर्मो
रूढं सख्यं तदपि गणितं नानुजस्यार्जुनेन ।
तुल्यः कामं भवतु भवतः शिष्ययो. स्नेहबन्धः
कोऽयं पन्था यदसि विमुखो मन्दभाग्ये मयि त्वम् ॥ (क)

तर्जनोद्वेजने प्रोक्ता द्युतिः ॥ ११४ ॥

तथा तत्रैव दुर्योधनं प्रति [1]कुमारेणोक्तम्—

जन्मेन्दोर्विमले कुले व्यपदिशस्यद्यापि धन्से गदां
मां दुःशासनकोष्णशोणितमधुक्षीवं रिपुं [2]भाषसे ।
दर्पान्धो मधुकैटभद्विषि हरावप्युद्धतं चेष्टसे
त्रासान्मे नृपशो विहाय समरं पङ्केऽधुना लीयसे ॥ (ख)

शक्तिः पुनर्भवेत् ।

विरोधस्य प्रशमनम् ॥११५॥

यथा तत्रैव—

कुर्वन्त्वाप्ता हतानां रणशिरसि नरा वह्निमादेहभारान्
असौ मिथ्रं कथञ्चिद्ददतु जलममी बान्धवा बान्धवेभ्यः ।

जेति सुभद्राभ्रातरिति च द्वयं स्वपक्षानुरागौचित्याय सम्बन्धप्रदर्शनम् । ज्ञाति-प्रीतिरिति । ज्ञातयो वयम् । क्षत्रियाणा धर्मोऽपि मनसि न कृत इत्यर्थः । *अयुध्यमानवधर्मस्य मुख्यं हि क्षत्रियाणा धर्म । वयं त्वयुध्यमाना. । तथानुजस्य* श्रीकृष्णस्य अर्जुनेन सह रूढ तत्सख्यमपि न गणितम् । शिष्ययोर्भीमदुर्योधनयो-स्तुल्य स्नेहानुबन्ध । कामं यथेष्टम् । भवतु वरम् । यन्मन्दभाग्ये मयि त्व विमुख ई कोऽय पन्था इत्यर्थ । अत्र गुरोर्बलभद्रस्य युधिष्ठिरेण भर्त्सनम् ।

(वि, ग) द्युतिरूपाङ्गलक्षणमाह—तर्जनेति । कुमारेणेति । भीमेनेत्यर्थ । क्वचित् कुमारस्योदरेणेत्येव पाठ । जन्मेति । विमलेन्दो. कुले जन्म व्यपदिशसि । अद्यापि गदा धन्से दधासि । दु शासनस्य कोष्णेनाऽत्युष्णेन शोणितमधुना क्षीवं मत्तं मां रिपुं भाषसे । न तु कार्यत्वेन प्राणदातारं भाषस इत्यर्थ । मधुकैटभद्विषि श्रीकृष्णेऽपि दर्पान्ध. उद्धत गाढहार चेष्टसे । हे नृपशो ! मे सत्त्वासात् समरं विहायाधुना स त्वं कथं पङ्के लीयसे इत्यर्थ । अत्र कथमिति वक्तुमभ्यम् ।

(वि, ग) शक्तिरूपमङ्गमाह—शक्तिरिति । विरोधस्य प्रशमन समापन-कथनमित्यर्थः । कुर्वन्त्वाप्ता इति । रणशिरसि हतानां देहभारान् । आप्ता बान्धवाः वह्निमाद् कुर्वन्त्वित्यर्थः । तथा अमी बान्धवा कथञ्चित् असौ मिथ्र जनं बान्धवेभ्यो ददतु । तथा हतनरग्रहणे गृध्रगणै खण्डितान् शक्तिदेहान् मार्गन्ताम् । रिपुभि सहायं भास्वानस्तं प्रयात, बलानि गोहियन्तामित्यर्थ ।

---

1 'भीमेन' (क. पु.) 2 'मन्यसे' (ख. पु.)

मार्गन्ता ज्ञातिदेहान् हतनरगहने खण्डितान् गृध्रकाकै
अस्त भास्वान् प्रयात सह रिपुभिरय सहियन्ता बलानि ॥ (ग)

प्रसङ्गो गुरुकीर्त्तनम् ॥ ११६ ॥

यथा मृच्छकटिके (चाण्डालक) । "एसो सागलदत्तस्स सुओ अज्ज विस्सदत्तस्स णत्तिओ चालुदत्तो वावादितु वज्झट्ठाण णिज्जइ । एदेण किल गणिआ वसन्तसेणा सुअणलोहेण वावादिदेत्ति ।"

(चारुदत्त)—

मखशतपरिपूत गोत्रमुद्भासित यत्
सदसि निविडचैत्यब्रह्मघोषै पुरस्तात् ।
मम निधनदशाया वर्त्तमानस्य पापै
स्तदसदृशमनुष्यैर्घुष्यते घोषणायाम् ॥

इत्यनेन चारुदत्तवधाभ्युदयानुकूल प्रसङ्गाद् गुरुकीर्त्तनमिति प्रसङ्ग । (घ)

मनश्चेष्टासमुत्पन्न श्रम· खेद इति स्मृत ॥ ११७ ॥

मन समुत्पन्नो यथा मालतीमाधवे—

दलति हृदय [1]गाढोद्वेगो द्विधा न तु भिद्यते
वहति विकल कायो मोह न मुञ्चति चेतनाम् ।

(वि, घ) प्रसङ्गरूपाङ्गमाह—**प्रसङ्ग** इति । **चाण्डालक** इति । हन्तु नीयमान चारुदत्त दृष्ट्वा चाण्डालक आह इत्यर्थ । **एष** इति । एष सागरदत्तस्य सुत आर्यविश्वदत्तस्य नप्ता चारुदत्त व्यापादयितु वध्यस्थान नीयते । एतेन किल गणिका वसन्तसेना सुवर्णलोभेन व्यापादितेति (सस्कृतम्) । एतच्छ्रुत्वा चारुदत्त स्वायप्रशस्तकुलकीर्त्तनात् लज्जया आह—**मखशतेति** । यन्मम गोत्र परिपूत तथा पुरस्तात् पूर्वकाले निविडैश्चैत्यैरुद्भटैर्ब्रह्मघोषै सदसि उद्भासित सभायामुच्चै स्वरेण ब्राह्मणै प्रशस्तमित्यर्थ । निधनदशाया वर्त्तमानस्य मम तद्गोत्र पापै असदृशमनुष्यैश्चाण्डालै वध्यघोषणायामुद्घाष्यत इत्यर्थ । **इत्यनेन** इति । चारुदत्तस्य वधरूपो यो घातकानामभ्युदयस्तदनुकूल इत्यर्थ । तत्कुलघातकस्यैव घातकानाम् इष्टत्वात् गुरुकीर्त्तनम् । वध्यस्य पितृपितामहादिकीर्त्तनम् ।

(वि, ङ) खेदरूपमङ्गमाह—**मनश्चेष्टेति** । **दलतीति** । कपालकुण्डलाप हृतमालतीशोकान् माधवस्योक्तिरियम् । न विदीर्यते न तु द्विखण्ड भवतीत्यर्थ । विकल काय मोह वहतीत्यन्वय । न मुञ्चति न त्यजति । **एव चेष्टेति** ।

सस्तारावीतमात्रलोहिततलौ बाहू घनोच्छ्वेषणा
दद्यापि स्तनवर्षु जनयति श्वास प्रमाणाधिक ।

---

1 'गाढोत्कण्ठ' (ज ट पु)

ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥
एवं चेष्टासमुत्पन्नोऽपि । (ङ)
ईप्सितार्थप्रतीघातः प्रतिषेध इतीष्यते ॥ ११८ ॥

यथा मम प्रभावत्यां विदूषकं प्रति प्रद्युम्नः—सखे ! कथमिह त्वमेकाकी वर्त्तसे ? क्व नु पुनः प्रियसखीजनानुगम्यमाना प्रियतमा मे प्रभावती ? (विदू०) असुरवइणा आआरिअ कहिं वि णीदा ।

(प्रद्युम्न·) (दीर्घं निःश्वस्य)—

हा पूर्णचन्द्रमुखि ! मत्तचकोरनेत्रे !
मामानताङ्गि ! परिहाय कुतो गतासि ?
गच्छ त्वमद्य ननु जीवित ! तूर्णमेव
दैवं कदर्थनपरं कृतकृत्यमस्तु ॥ (च)

कार्यात्ययोपगमनं विरोधनमिति स्मृतम् ॥ ११९ ॥

यथा वेण्यां—(युधिष्ठिरः)

तीर्णे भीष्ममहोदधौ कथमपि द्रोणानले निर्वृते
कर्णाशीविषभोगिनि प्रशमिते शल्ये च याते दिवम् ।
भीमेन प्रियसाहसेन रभसादल्पावशेषे जये
सर्वे जीवितसंशयं वयममी बाचा समारोपिता ॥ (छ)

बद्धं कर्णशिरीषरोधिवदने घर्माम्भसा जालकम्
बन्धे स्रंसिनि चैकहस्तयमिता पर्याकुला मूर्द्धजा ॥
इति घटोत्क्षेपणचेष्टया शकुन्तलायाः श्रमः ।

(वि, च) प्रतिषेधरूपमङ्गमाह—ईप्सितेति । असुरवइणेति—असुरपतिना आकृष्य बलादपि नीता इति संस्कृतम् । हा पूर्णचन्द्र इति पूर्वार्धं प्रिया सम्बोध्य शोचित्वापरार्द्धं जीवितं सम्बोध्य आह गच्छ त्वमद्येति । तत्र एव कदर्थनपरं दैव कृतकृत्यमस्तु इत्यर्थः । अत्रेप्सितस्य प्रभावतीसमागमस्य प्रतिघातः ।

(वि, छ) निरोधरूपमङ्गमाह—कार्य्यात्ययेति । उद्देश्यकार्य्यस्यात्ययोपगमनं भावनमित्यर्थः । तीर्णे इति । दुर्योधनेन समं गदायुद्धे भीमेनोक्तम् । मत्स्यराजये सर्वेषां भ्रातॄणां पराजय इति । इदं श्रुत्वा युधिष्ठिरस्य स्वत्वयरूपकार्य्यस्यात्ययोभावनमिदम् । अल्पावशेषे जये प्रियसाहसेन भीमेन सर्वे वयं जीवितसंशयं प्रापिता इत्यन्वयः । जयस्याल्पावशेषत्वं दर्शयति—तीर्णे इति । निर्वृते शान्ते । कर्णाशीविषेति । आशीदन्तस्तत्र विषं यस्य । कर्णरूपे तादृशे भोगिनि सर्पे इत्यर्थः ।

प्ररोचना तु विज्ञेया संहारार्थप्रदर्शिनी ॥ १२० ॥

यथा वेण्याम्-(पाञ्चालक) अह देवेन चक्रपाणिना सहित । (इत्युपक्रम्य) कृत सन्देहेन ।

पूर्यन्तां सलिलेन रक्तकलशा राज्याभिषेकाय ते
कृष्णात्यन्तचिरोज्झिते तु कबरीबन्धे करोतु क्षणम् ।
रामे शातकुठार [1]भासुरकरे क्षत्रद्रुमोच्छेदिनि
क्रोधान्धे च वृकोदरे परिपतत्याजौ कुत संशय ? ॥ (ज)

कार्यसग्रह आदानम् ॥ १२१ ॥

यथा वेण्याम्—ननु भो समन्तपञ्चकचारिण !

नाहं रक्षो न भूतो रिपुरुधिरजलाग्रेदिताङ्ग [2]प्रकाम
निस्तीर्णोऽस्मीक्षितानलनिधिगहन क्रोधन क्षत्रियोऽस्मि ।
भो भो राजन्यवीरा. समरशिखिशिखाभुक्तशेषा ! कृत व-
स्त्रासेनानेन लीनैर्हतकरितुरगान्तर्हितैरास्यते यत् ॥

अत्र समस्तरिपुवधकार्यस्य सगृहीतत्वादादानम् । (झ)

(वि, ज) प्ररोचनारूपमङ्गमाह—**प्ररोचना त्विति** । **संहारार्थप्रदर्शिनीति** । कार्योपसंहारप्रदर्शनी वाक् इत्यर्थ । **पूर्यन्तामिति** । गदायुद्ध भीमस्य निशामार्थं कृष्णा प्रहितस्य पाञ्चालकस्य युधिष्ठिर प्रति उक्तिरियम् । ते तव राज्याभिषेकाय पूर्यन्तामित्यन्वय । अत्यन्तचिरोज्झितेऽपि कबरीबन्धे कृष्णा द्रौपदी क्षणमुन्मुक्त करोतु इत्यन्वय । भीमस्य जयसशये कथमेतत् स्यादित्याह । **राम** इति । शातकुठारेण भासुरकरे क्षत्ररूपद्रुमोच्छेदिनि रामे परशुरामे वृकोदरे च क्रोधान्धे आजौ परिपतति गच्छति सति कुतो जयसशय इत्यर्थ ।

(वि, झ) आदानरूपाङ्गलक्षणमाह—**कार्यसग्रह** इति । उद्देश्यकार्यस्य सग्रह प्राप्तिरित्यर्थ । **नाहं भूत** इति । देवयोनिप्राणिविशेषो भूतो नाहमित्यर्थ । अत एव पुलिङ्गता । भूतोऽमी देवयोनय इति कोषात् । तर्हि कस्त्वमिति अत्राह—**रिपुरुधिरेति** । क्रोधन सन् रिपुरुधिरजलेन ह्लादिताङ्ग प्रीणिताङ्ग सन् प्रकाम यथेष्ट निस्तीर्ण महाप्रतिज्ञारूपे जलनिधित्व वनत्व च रूपित बोध्यम् । भो भो समररूपाग्निशिखया भुक्तशेषा राजन्यवीरा ! वो युष्माकमनेन त्रासेन कृतमलम् । अय त्रासो व्यर्थ । मया यूय न हन्तव्या इत्यर्थ । त्रास कथ ज्ञात इत्यत्राह—**हतेति**। यद् यद् हतकरितुरगान्तर्हितैर्युष्माभिरास्यते स्थीयते । **अत्रेति** । समस्तरिपुवधरूपस्य कार्यस्य सगृहीतत्वात् प्राप्तत्वादित्यर्थ ।

---

1 'भास्वर' (इति क पु) 2 'लाह्लादिताङ्ग' (क पु)

तदाहुश्छादनं पुनः
कार्यार्थमपमानादेः सहनं खलु यद्भवेत् ॥ १२२ ॥
यथा तत्रैव—(अर्जुन·) आर्य !

अप्रियाणि करोत्येष वाचा शत्रो न कर्मणा ।
हतभ्रातृशतो दु.खी प्रलापैरस्य का व्यथा ॥ (ञ)

अथ निर्वहणाङ्गानि—

सन्धिर्विबोधो ग्रथनं निर्णयः परिभाषणम् ।
कृतिः प्रसाद आनन्दः समयोऽप्युपगूहनम् ।
भाषणं पूर्ववाक्यञ्च काव्यसंहार एव च ।
प्रशस्तिरिति संहारे ज्ञेयान्यङ्गानि नामतः ॥ १२३ ॥ (ट)

तत्र—

बीजोपगमनं सन्धिः ॥ १२४ ॥ (ठ)

यथा वेण्यां, (भीमः) । भवति ! यज्ञवेदिसम्भवे ! स्मरति भवती यन्मयोक्तम् । चञ्चद्भुज "इत्यादि" । अनेन मुखे क्षिप्तबीजस्य पुनरुपगत[1]-मिति सन्धिः । (ड)

विबोधः कार्यमार्गणम् ॥ १२५ ॥

यथा तत्रैव, (भीमः) "मुञ्चतु मामार्यः क्षणमेकम् । (युधिष्ठिरः) । किमपरमवशिष्टम् ? (भीम.) सुमहदवशिष्टम् । संयमयामि[2] तावदनेन सुयोधनशोणितोक्षितेन पाणिना पाञ्चाल्या दुःशासनावकृष्टं केशहस्तम् । (युधिष्ठिर) । गच्छतु । भवाननुभवतु तपस्विनी वेणिसंहारमिति । अनेन

(वि, ञ) अपमानादेरित्यादि पदाद् व्युत्क्रमपरिग्रह । अप्रियाणीति । एष दुर्योधन ।

(वि, ट) निर्वहणसन्धेश्चतुर्दशाङ्गान्याह—सन्धिर्विबोध इत्यादि ।

(वि, ठ) तत्र सन्धिरूपाङ्गमाह—बीजोपगमनमिति । प्रतिज्ञातार्थरूपस्य बीजस्य सिद्धया तत्स्मरणमित्यर्थः ।

(वि, ड) कौरवशतं हत्वा भवति यज्ञेत्यादिकं भीमस्योक्तम् । चञ्चद्भुजेत्यादिकं प्राग् व्याख्यातम् । अनेनेति । मुखे प्रथमत क्षिप्तमुपन्यस्तं प्रतिज्ञया बोधितं बीजं प्रतिज्ञातार्थरूपं पुनरुपगतं ज्ञापितमित्यर्थ. ।

(वि, ढ) विबोधरूपमङ्गमाह—विबोध इति । कार्यमार्गणं कार्यस्यान्वेषणम् । केशहस्तमिति । केशकलापं "पाशश्च पक्षश्च हस्तश्च कलापार्थाः । कचात् पक्षे ।" इति कोषः ।

1 'उपगमनम्' (क. ख. पु) 2 'समापयामि' (क. ग. पु.)

केशसंयमनकार्यस्यान्वेषणाद् विबोधः । (ढ)

उपन्यासस्तु कार्याणां ग्रथनं ॥ १२६ ॥

यथा तत्रैव, (भीम) "पाञ्चालि ! न खलु मयि जीवति संहर्त्तव्या दुःशासनविलुलिता वेणिरात्मपाणिभ्याम् । तिष्ठ स्वयमेवाहं संहरामीति । अनेन कार्यस्योपक्षेपाद् ग्रथनम् । (ण)

निर्णयः पुनः ।

अनुभूतार्थकथनम् ॥ १२७ ॥

यथा तत्रैव, (भीमः) "देव ! अजातशत्रो ! अद्यापि दुर्योधनहतकः । मयापि तस्य दुरात्मनः—

भूमौ क्षिप्तं शरीरं निहितमिदमसृक् चन्दनाभं निजाङ्गे
लक्ष्मीरार्ये निपित्रा चतुरदधिपय-सीमया सार्द्धमुर्व्या ।
भृत्या मित्राणि योधाः कुरुकुलमनुजा दग्धमेतद्रणाग्नौ
नामैकं यद्भवीषि क्षितिप ! तदधुना धार्त्तराष्ट्रस्य शेषम् ॥ (त)

वदन्ति परिभाषणम् ।

[1]परिवादार्थकं वाक्यम् ॥ १२० ॥

यथा शाकुन्तले—(राजा) आर्ये ! अथ सा तत्र भवती किमाख्यस्य राजर्षेः पत्नी ? (तापसी) को तस्स धम्मदारपरिट्ठाइणो णामं गेण्हिस्सदि । (थ)

[2]लब्धानुगमनं कृतिः ॥ १२९ ॥

(वि, ण) उपन्यासरूपमङ्गमाह—**उपन्यास** इति । ग्रथनं करिष्यमाणकार्य्यकथनम् । विलुलिता विशकलीकृता । उपक्षेपात् करिष्यमाणतयोपन्यासात् ।

(वि, त) निर्णयरूपमङ्गमाह—**निर्णय** इति । अजातशत्रो इति युधिष्ठिरस्यापरं नाम । **भूमौ क्षिप्तमिति** । तस्य दुरात्मनो दुर्य्योधनस्य शरीरं मया भूमौ क्षिप्तं पातितम् । तस्येदमसृक् निजाङ्गं चन्दनाभं चन्दनवन्निहितम् । चतुरुदधिपयःसीमया उर्व्या सार्द्धम् । आर्य्ये ! त्वयि लक्ष्मीर्निर्युक्ता । रणाग्नावेतद्दग्धम् । तदेव किमितीत्याह—**भृत्या** इत्यादि । भृत्याद्या कुरुकुलमनुजाः इत्यन्वयः । हे क्षितिप ! धार्त्तराष्ट्रस्य यन्नाम ब्रवीषि अधुना तदेव शेषमित्यर्थः ।

(वि, थ) परिभाषणरूपमङ्गमाह—**वदन्तीति** । परिवादेति परिवादेनार्थेन कृतं वाक्यं परिवादार्थकं वाक्यमित्यर्थः । आर्य्ये ! अथ सेत्यादिपृच्छा दुर्वाससः शापाधीनविस्मरणकृतशकुन्तलापरित्यागस्य पश्चात्ता स्मृत्वा तामनासाद्य विरहिणः स्वर्गादागच्छतस्तापसीमुखात् तत्प्रसङ्गं श्रुत्वा दुष्मन्तस्य । **को तस्सेति** । कस्तस्य धर्मदारपरित्यागिनो नाम ग्रहीष्यतीति ।

---

1 'परिवादकृतं' (ग. पु.) 2 'लब्धार्थगमनम्' (क. पु.) 'लब्धार्थगमनम्' (ण. त. पु.)

यथा वेण्या, (कृष्ण)—"एते भगवन्तो व्यासवाल्मीकिप्रभृतयोऽभिषेक धारयन्तस्तिष्ठन्ति" । इति । अनेन प्राप्तराज्यस्याभिषेकमङ्गले स्थिरीकरण कृति । (द)

शुश्रूषादिः प्रसाद' स्यात् ॥ १३० ॥

यथा तत्रैव–भीमेन द्रौपद्याः केशसयमनम् ।

आनन्दो वाञ्छितागम' ॥ १३१ ॥

यथा तत्रैव, (द्रौपदी) "विसुमरिद एदं वावार णाधस्स पसादेण पुणोवि सिक्खिस्सम् ।" (ध)

समयो दु'खनिर्य्याणम् ॥ १३२ ॥

यथा रत्नावल्याम्—वासवदत्ता (रत्नावलीमालिङ्ग्य) "समस्सस बहीणिए समस्सस ।" (न)

तद्भवेदुपगूहनम्

यत् स्याददभुतसंप्राप्ति' ॥ १३३ ॥

यथा मम प्रभावत्या नारददर्शनात् प्रद्युम्न ऊर्ध्वमवलोक्य—

दधद्विघट्टेरगामिव कुसुममालां परिमल-
भ्रमद्भृङ्गश्रेणीध्वनिभिरुपगीतां तत इत ।
दिगन्त ज्योतिर्भिस्तुहिनकरगौरै शबलय'
श्रित कैलासाद्रे पतति वियत किं पुनरिदम् ?॥ (प)

(वि, द) कृतिरूपमङ्गमाह—लब्धानुगमनामिति । अनुगमन स्थिरीकरणम् । अभिषेक धारयन्त प्रापयन्त । धारयन्तीति क्वचित् पाठ ।

(वि, ध) आनन्दरूपाङ्गमाह—आनन्द इति । विसुमरिद इति । विस्मृतमिन व्यापार नाथस्य प्रसादेन पुनरपि शिक्षिष्ये इति संस्कृतम् । व्यापार केशसयमनरूप ।

(वि, न) समयरूपमङ्गमाह—समय इति । समस्सस इति । समाश्वसिहि भगिनि । समाश्वसिहीति संस्कृतम् । इयं सागरिकाया मातुलकन्यकात्वेन परिचये सति वासवदत्ताया उक्ति ।

(वि, प) उपगूहनरूपमङ्गमाह—तद्भवेदिति । अद्भुतसंप्राप्ति अद्भुतदर्शनम् । दधदित्यादि । कैलासाद्रेरित्यपाये पञ्चमी । तथा च कैलासाद्रेरेतो वियतो विप्रकोऽयमे पाति कश्चिद् पदार्थ इति शेष । कैलासाद्रिरिति क्वचित् पाठ । तस्य कुसुममालाधारणाभावात् । कीदृश पदार्थ ? विद्युद्वेगामिव कुसुममालां

---

1 'धरनयन्' (क. पु)

सामदानादि भाषणम् ॥ १३४ ॥

यथा चण्डकौशिके—(धर्म्म) "तदेहि । धर्मलोकमधितिष्ठ ।" (फ)

पूर्ववाक्यन्तु विज्ञेयं यथोक्तार्थोपदर्शनम् ॥ १३५ ॥

यथा वेण्या—(भीमः) "बुद्धिमतिके ! क्व सा भानुमती परिभवतु सम्प्रति पाण्डवदारान्"। (ब)

वरप्रदानसंप्राप्ति. काव्यसंहार इष्यते ॥ १३६ ॥

यथा सर्वत्र—"किन्ते भूय प्रियमुपकरोमी"ति । (भ)

नृपदेशादिशान्तिस्तु प्रशस्तिरभिधीयते ॥ १३७ ॥

यथा प्रभावत्याम्—

राजान सुतनिर्विशेषमधुना पश्यन्तु नित्य प्रजा
जीयासु सदसद्विवेकपटव सन्तो गुणग्राहिण ।
शस्यस्वर्णसमृद्धय समधिका सन्तु क्षमामण्डले
भूयादव्यभिचारिणी त्रिजगतो भक्तिश्च नारायणे ॥

अत्र च उपसहारप्रशस्त्योरन्ते एकेन क्रमेणैव स्थिति । (म)

दधत्। माला कीदृशा? परिमलेन तत इतो भ्रमन्तीना मृङ्गश्रेणाना ध्वनिभिरुपगाताम्। पदार्थश्च कीदृश ? तुहिनकरगौरैर्ज्योतिर्भिर्दिगन्त शवलयन्। दिगन्तस्यापि श्याम त्वेन धवलज्योतिर्मिश्रणात् शवलता। अत किं पुनरिदमित्यर्थ ।

(वि, फ) भाषणरूपमङ्गमाह—**सामदानेति** । सम्प्रदानस्य शान्तत्व साम तेन दानम्। आदिपदाद् दातुर्मुक्तिर्वा इति । यत्तु सग्रहरूपस्य गर्भसन्ध्यङ्गस्य सामदानार्थसम्पत्तिरिति लक्षणम्, तत्र दातुरेव सामप्रीतिरर्थश्च धनमिति भेद । धर्म लोक धर्म्मार्जित लोकम्।

(वि, ब) पूर्ववाक्यरूपमङ्गमाह—**पूर्ववाक्य त्विति** । यथोक्तार्थापदर्शनम् परेण यथोक्तस्तुवाक्यस्य स्मरणमित्यर्थ । भानुमती दुर्य्योधनस्य पत्नी तया दासी द्वारा प्राक् कटाक्षि कृता।

(वि, भ) काव्यसहाररूपमङ्गमाह—**वरप्रदानेति** । वरप्रदानार्थं सम्प्राप्तिस्तत्या लोपस्थितिरित्यर्थ । **सर्वत्रेति**। सर्वनाटकान्ते इत्यर्थ । किन्ते इत्यादिना हि वर-प्रदानार्थं तत्कालोपस्थितिर्लभ्यते ।

(वि, म) प्रशस्तिरूपमङ्गमाह—**नृपदेशादीति** । नृपस्य देशादे शान्ति स्वस्ययनमाशीर्वाद इत्यर्थ । **राजान** इत्यादि । अधुना सुतनिर्विशेष यथा स्यात् तथा राजान प्रजा पश्यन्तु । गुणग्राहिण सन्त शिष्टा जीयासु उत्कर्षभाजो भवन्तु, यतस्ते सदसद्विवेकपटव । क्षमामण्डले शस्याना सुवर्णानाच समृद्धय समधिका सन्तु । नारायणे चाव्यभिचारिणी अकादाचित्की भक्ति त्रिजगतो

इह च मुखसन्धौ उपक्षेपपरिकरपरिन्यासयुक्तयुद्भेदसमाधानानां, प्रतिमुखे च परिसर्पणप्रगमनवज्रोपन्यासपुष्पाणां, गर्भे अभूताहरणमार्गग्रोटकाधिबलावक्षेपाणा, विमर्शे अपवादशक्तिव्यवसायप्ररोचनादानाना प्राधान्यम् । "अन्येषाम्र यथासम्भवं स्थिति"रिति केचित् । (य)

चतुःषष्टिविधं ह्येतदङ्गं प्रोक्तं मनीषिभिः ।
कुर्यादनियते तस्य सन्धावपि प्रवेशनम् ।
रसानुगुणतां वीक्ष्य रसस्यैव हि मुख्यता ॥ १३८ ॥

यथा वेणीसंहारे तृतीयाङ्के दुर्योधनकर्णयोर्महत् संप्रधारणम् । एव[1]मन्यत्राऽपि । यत्तु रुद्रटादिभिर्नियम एवेति उक्त तल्लक्ष्यविरुद्धम् । (र)

इष्टानुसरणाश्चर्य्यलाभो वृत्तान्तविस्तरः ।
रागप्राप्तिः प्रयोगस्य गोप्यानां गोपनं तथा ।
प्रकाशनं प्रकाश्यानामङ्गानां षड्विधं फलम् । (ल, ई)

भूयादिति नृपदेशादिशान्ति । अत्र चेति—काव्यमहारूपमङ्गोपमहार । अन्ते नाटकान्ते उपसहारप्रशस्त्योर्निर्दिष्टक्रमणैवोपस्थितिरित्यर्थ ।

(वि, य) सन्धिषु यान्यङ्गान्युक्तानि तेषु कतिचित् अङ्गान्येव आवश्यकत्वेन प्रधानानीति केचिदाहु । सन्धौ सन्धौ च तानि दर्शयति । इह चेति । केचिदिति अस्वरस । सर्वेषामङ्गानामनियमे नानावश्यकत्वदर्शनादुपसहारप्रशस्त्योरेवावश्यकत्वदर्शनात् ।

(वि, र) चतुःषष्टिरिति । प्रार्थनाप्रशस्त्योर्मतभेदेन वैकल्पिकत्वस्योक्तत्वात् । समुच्चये तु षष्यधिकत्वापत्तेरित्युक्त प्रागेव । सन्धीनामुक्तान्यङ्गानि । प्रायिकत्वाभिप्रायेणैवोक्तानि । रसानुगुणानुरोधेन तु एकसन्धेरङ्गानि अन्यसन्धावपि कुर्य्यादित्याह—कुर्य्यादनियते इति । अनियते सन्धावपि तस्याङ्गस्य निवेशन कुर्य्यात् इत्यन्वय । सम्प्रधारणमिति । मुखसन्ध्युक्तिरूपमङ्गसम्प्रधारण तच्च गर्भसन्धावपि कृत मित्यर्थ । तत्र दुर्य्योधनकर्णाभ्या युक्तिकरणात् । तल्लक्ष्यविरुद्धमिति । लक्ष्येषु उदाहरणनाटकेषु अनियमदर्शनात् विरुद्धमित्यर्थ ।

(वि, ल) इदानीमुक्ताङ्गानां यथासम्भव षट् फलान्याह । इष्टानुसरणेति । इष्टस्यार्थस्यानुसरणमित्यर्थ । इष्टार्थरचनेति । इष्टानुहरणेति क्वचित् पाठ । आश्चर्य्यलाभोऽद्भुतवस्तुलाभ इत्यर्थ । वृत्तान्तस्य विस्तरेण ज्ञानम् । रागप्राप्तिरनुरागलाभ । गोप्यानामर्थाना सगोपनम् । प्रकाश्यानामर्थाना प्रकाशनमेति प्रयोगस्य मुखसन्ध्यादि-

---

(लो, ई) यद्वस्तु गोपयितुमिष्ट तदङ्गस्वरूपविज्ञापनेन मुखेन गोपयितु एव प्रकाश्याना प्रकाशनमित्यर्थ ।

---

1 'मन्यदपि' (क पु)

अङ्गहीनो नरो यद्वन्नेवारम्भक्षमो भवेत् ।
अङ्गहीनं तथा काव्यं न प्रयोगाय युज्यते ॥ १३९ ॥
सम्पादयेतां सन्ध्यङ्गं नायकप्रतिनायकौ ।
तदभावे पताकाद्यास्तदभावे तथेतरः ॥ १४० ॥ (व)

प्रायेण प्रधानपुरुषप्रयोज्यानि सन्ध्यङ्गानि भवन्ति । [1]किन्तूपक्षेपादित्रय बीजस्याल्पमात्रसमुद्दिष्टत्वादप्रधानपुरुषप्रयोजितमेव साधु । (श)

रसव्यञ्जिकमपेक्ष्यैषामङ्गानां सन्निवेशनम् ।

प्रयोगस्य अङ्गानामुपक्षेपाद्यङ्गाना पद् फलानीत्यर्थ । यथा काव्याथात्पत्तिरूपस्य उपक्षेपरूपस्य मुखसन्ध्यङ्गस्य इष्टानुसरण फलम् । एवमन्याङ्गानामन्यानि यथाफलानि यथासम्भव नाटकेषु अनुसन्धेयानि ।

(वि, व) नाट्ये प्रयोगेऽङ्गानामावश्यकत्वमाह—**अङ्गहीन** इति । नारम्भक्षम न कार्य्यारम्भक्षम । **सम्पादयेतामिति** । अनेन सन्ध्यङ्गनिर्वाहको प्रथमतो नायकप्रतिनायकावेवेति उक्तम् । तदभावे क्वचित् ताभ्यामनिर्वाहे पताकाद्या स्तन्निर्वाहका । पताका च 'व्यापि प्रासङ्गिक वृत्त पताकेत्यभिधीयते ।' इत्यनेन नायकस्य वृत्त पताकेत्युक्तम् । अत्र च तत्सम्बन्धात् नायकसहाय एव तत्त्वेनोक्त । तदाद्या स्तन्निर्वाहकाः । आद्यपदात् नायिकासहाया, तैरप्यनिर्वाह्य यत् । इतरोऽपि तन्निर्वाहक इत्यर्थ ।

(वि, श) उपक्षेपाद्यङ्गत्रयस्य च प्रधाननायकेतरेण समुद्दिष्टत्वे एव साधुता इत्याह—**किन्तूपक्षेपेति** । तत्र हेतुमाह—**बीजस्येति** । प्रधानेतिवृत्तरूपस्य काव्यार्थस्य यन्मूल तद्बीज तस्याल्पमात्रसमुद्देशस्योपक्षेपकाद्यङ्गत्रयेण वृतत्वादप्रधानपुरुष भीमसेनादिसमुद्दिष्टत्वमेव साध्वित्यर्थ । प्रधानपुरुषस्य धीरोदात्तत्वेन कर्त्तव्येतिवृत्तबीजसमुद्देशस्य अल्पस्यापि तेन करणानौचित्याद् इति भाव । तथा हि काव्यार्थस्य समुत्पत्तिरूप यदुपक्षेपरूपमङ्ग तेन वेण्या लाक्षगृहानलेत्यादि भीमोक्त्या कुरुकुलवधरूपकाव्यार्थस्य तस्य बीजसमुत्पत्ति प्रतिपादिता । समुत्पन्नार्थबाहुल्य यत्परिकरात्मकमङ्ग तेन 'प्रशृद्ध यद्वैर मम' इत्यादि भीमोक्त्या तद् बाहुल्य प्रतिपादितम् । काव्यार्थनिष्पत्तिकथनरूप यत परिन्यासात्मकमङ्ग तेन 'चञ्चद् भुजे'त्यादि भीमोक्त्या निष्पत्ति प्रतिपादिता । एतत् त्रयञ्च प्रधाननायकोक्त तदधीरतापादक स्यात् । नच समुत्पन्नार्थबाहुल्यकाव्यार्थनिष्पत्त्यो कथ बीजस्याल्पसमुद्दिष्टत्वमिति वाच्यम् । असमस्तोद्दिष्टस्यैवाल्पोद्दिष्टत्वमित्यभिप्रायात् । बीजोद्देशमात्रादेव नायकस्य धीरोदात्तत्वभङ्ग इत्यत्र एव तात्पर्य्यात् ।

(वि, ष) **रसव्यञ्जिकमिति** । तत्सन्धीना यान्यङ्गान्युक्तानि । तानि तत्र

---

1 'किन्तु प्रक्षेपादि' (क पु) 'किन्तु प्रक्षेपाद्यङ्गत्रय' (ग घ. पु)

नतु केवलया शास्त्रस्थितिसम्पादनेच्छया ॥ १४१ ॥

तथा च यद्वेणया दुर्योधनस्य भानुमत्या सह विप्रलम्भो दर्शितस्तत्तादृशेऽवसरेऽत्यन्तमनुचितम् । (ष)

स्वविरुद्धं तु यद् वृत्तं रसादिव्यक्तयेऽधिकम् ।
तदप्यन्यथयेद् धीमान् न यदेद्वा कदाचन ॥ १४२ ॥

अनयोरुदाहरणं सम्बन्धेष्वभिव्यक्तमेव । (स)

अथ वृत्तय —*

शृङ्गारे कौशिकी वीरे सात्वत्यारभटी पुनः ।
रसे रौद्रे च बीभत्से वृत्तिः सर्वत्र भारती ।
चतस्रो वृत्तयो ह्येताः सर्वनाट्यस्य मातृकाः ।
स्युर्नायकादिव्यापारविशेषा नाटकादिषु ॥ १४३ ॥ (ह)

वेति नियम । किन्तु रसव्यक्तनापेक्षया एव एषा निवेशना न तु नाट्यशास्त्रोक्तस्थितिसम्पादनेच्छया इत्यर्थः । यद्यपीदं प्रागप्युक्तं तथापि रसव्यक्त्यनपेक्षया क्वचिदेव दोषत्वप्रतिपादनाय पुनरुक्तम् । तदाह—**तथा चेति** । रसव्यक्त्यनपेक्षया निवेशनं तु नोचितमेवेत्यर्थः । **तादृशेऽवसरे** इति । वीररसे इत्यर्थः । न चाङ्गसन्निवेशनानौचित्ये दर्शयितव्ये रसनिवेशनानौचित्यप्रदर्शनमिदमसम्बद्धमिति वाच्यम् । अङ्गहीनरसाभावेन विप्रलम्भप्रदर्शनादेव तदङ्गस्यापि प्रदर्शनात् ।

(वि, स) स्वविरुद्धमिति । स्वस्यापकान्तवृत्तस्य विरुद्धमधिकं यद् वृत्तं वृत्तान्तं तदपि रसाभिव्यक्तयेऽन्यथयेदुपकान्तरसाविरुद्धतया प्रतिपादयेत् । तदसम्भवे तु न वदेदित्यर्थः ।

(वि, ह) अथ वृत्तय इति । शृङ्गार इति । नायकादीनां व्यापारविशेषाश्च तस्रो वृत्तयो नाटकादिषु नाटकप्रकरणादिदशरूपकेषु नाटिकाद्यष्टादशोपरूपकेषु च सर्वनाट्यस्य मातृका मूलभूता जनन्य इत्यर्थः । नायकादित्यादिपदात् समस्तव्यापारपरिग्रहः । तेन वक्ष्यमाणोदाहरणेषु पात्रान्तरकृत्यं नानुपपन्नम् । तत्र रसविशेषेषु वृत्तिविशेषानाह—**शृङ्गार** इत्यादि । वीरे सात्वतीत्यन्वयः ।

---

* वृत्तय —वर्तन्ते अनुप्रासभेदा आसु इति वृत्तयः ।

सरूपव्यञ्जनन्यास तिसृष्वेतासु वृत्तिषु ।
पृथक् पृथगनुप्रासमुशन्ति कवयस्तथा ॥

पृथक् पृथगिति परुषानुप्रासः । उपनागरिकानुप्रासः । कोमलानुप्रास इति वृत्तयोऽनुप्रासजातय एव । (इत्यभिनवगुप्तो ध्वन्यालोके)

या विक्षेपेऽथ विक्षेपे सङ्क्षेपे विस्तरे तथा ।
चेतसो वर्तयित्री स्यात् सा वृत्तिः सापि षड्विधा ॥

तत्र कौशिकी—

या 'श्लक्ष्णनेपथ्यविशेष'चित्रा
स्त्रीसङ्कुला पुष्कलनृत्यगीता ।
कामोपभोगप्रभवो'पचारा—(उ)
सा 'कौशिकी चारुविलासयुक्ता ॥ १४४ ॥ *

नर्म च नर्मस्फूर्ज्जो नर्मस्फोटोऽथ नर्मगर्भश्च ।
चत्वार्य्यङ्गान्यस्याः ॥ १४५ ॥ (क)

तत्र—

वैदग्ध्यक्रीडितं नर्म्म ।
इष्टजनावर्ज्जनकृत्तच्चापि त्रिविधं मतम् ।

(वि, क) या श्लक्ष्णेति—श्लक्ष्णमुत्तमम् । नेपथ्यं वेश· । स्त्रीसंकुला स्त्रीव्यापारविमिश्रिता । पुष्कलं बहुलम् । अस्या अङ्गानि चत्वारि इत्याह—नर्म चेति ।

(वि, ख) अत्र नर्मलक्षणमाह—वैदग्ध्येति । वैदग्ध्येन क्रीडितमित्यर्थः । तत्फलमाह—इष्टेति । इष्टजनस्यावर्जनमनुरागेण नम्रता तत्कृद् इत्यर्थ· । तच्च नर्म

(लो, उ) कामेन मदनेन हेतुना य उपभोगः सम्भोगस्तत्कारणानि उपचाराश्चन्द्रचन्दनघनसारादयो यस्याम् ।

कौशिक्यारभटी चैव सात्त्वती भारती तथा
मध्यमारभटी चैव तथा मध्यमकौशिकी ॥
(सरस्वतीकण्ठाभरणे)

* या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसंयुता वा बहुनृत्तगीता ।
कामोपभोगप्रभवोपचारा तां कौशिकीं वृत्तिमुदाहरन्ति ॥ १ ॥
प्रस्तावपातच्छुतलक्षितानि च्छेद्यानि मायाकृतभिन्द्रजालम् ।
चित्राणि युद्धानि च यत्र नित्यं ता तादृशीमारभटीं वदन्ति ॥ २ ॥
आरभटप्रायगुणा तथैव बहुकपटवञ्चनोपेता ।
दम्भाकृतवचनवती त्वारभटी नाम विज्ञेया ॥ ३ ॥
या स्यात्तु तेनेह गुणेन युक्ता न्यायेन वृत्तेन समन्विता च ।
हर्षोत्कटा संहृतशोकभावा सा सात्त्वती नाम भवेत्तु वृत्ति ॥४॥ (नाट्यसूत्रे)
ऋग्वेदात् भारतीवृत्तिर्यजुर्वेदात्तु सात्त्विकी ।
कौशिकी सामवेदात्तु शेषा चार्थवणात्तथा ॥ ५ ॥

1 'सूक्ष्म' (ङ. पु.) 2 'विधान' (ज. पु)
3 'प्रचुरो–' (प. पु.) 4 'कैशिकी' (ज. झ. पु.)

विहितं शुद्धहास्येन सश्रृङ्गारभयेन च ॥ १४६ ॥ (ख)

तत्र केवलहास्येन विहितं यथा रत्नावल्याम्—

(वासवदत्ता) (फलकमुद्दिश्य, सहासम्) " एसावि अवरा तव समीवे जा आलिहिदा एदं किं अज्जवसन्तस्स विण्णाणम् ?" (ग)

सश्रृङ्गारहास्येन यथा शाकुन्तले, राजानं प्रति (शकुन्तला) असंतुट्ठो उण किं करिस्सदि (राजा) इदम्, (इति व्यवसितः। शकुन्तला वक्त्रं ढौकते)। (घ)

सभयहास्येन यथा रत्नावल्याम् । आलेख्यदर्शनावसरे (सुसङ्गता) "जाणिदो मए एसो वुत्तन्तो समं चित्तफलएण, ता देविए गदुअ णिवेदइस्सम् ।"

एतद् वाक्यसम्बन्धि नर्म्मोदाहृतम् । (ङ) एवं वेशचेष्टाभ्यामप्यन्वेयम् । (च)

नर्मस्फूर्जः सुखारम्भो भयान्तो नवसङ्गमः ॥ १४७ ॥

यथा मालविकायाम्—सङ्केतनायकमभिसृतायाम्-(नायकः)

निविधम् इत्याह । **तच्चेति** । त्रैविध्यमाह—**शुद्धहास्येनेति** । शुद्धेन सश्रृङ्गारेण सभयेन च हास्येन विहितमिति त्रैविध्यम् । भयञ्च हास्यविषयं बोध्यम् ।

(वि, ग) एसावीति । एषाप्यपरा तव समीपे या आलिखिता एतत् किमार्यवसन्तस्य विज्ञानम् ? (संस्कृतम्) । चित्रफलके सागरिकया लिखितं राजानं दृष्ट्वा सुसङ्गतया तत्समीपे सागरिकाऽपि लिखिता । तत्र लिखितं राजानं दृष्ट्वा वासवदत्तया पृष्टं केन त्वमत्र लिखिता इति । ततो राज्ञोक्तं शिल्पविज्ञानार्थं समुल्लिखितमिदमिति । ततस्तदन्तिके सागरिका लिखिता दृष्ट्वा "एषा सा अवरे"त्यादि वासवदत्तायाः पृच्छा । अत्र शुद्धहास्येन विहितं नर्म, अन्तः कोपेन तस्याः शृङ्गाराभावात् । प्रबन्धरसस्तु शृङ्गार इति तत्रेयं वृत्तिः ।

(वि, घ) असंतुट्ठो उणेति । असंतुष्टः पुनः किं करिष्यति ? इति (संस्कृतम्) ननु कमलस्य मधुकरः सन्तुष्यति गन्धमात्रेण इति राज्ञ उत्तरानन्तरं शकुन्तलाया इयं पृच्छा । ढौकते चुम्बनार्थम् । वक्त्रमाननम् आच्छादयति ।

(वि, ङ) जाणिदो इति । ज्ञातो मयैष वृत्तान्तः । समं चित्रफलकेन । तदैव्यै गत्वा निवेदयिष्यामीति (संस्कृतम्) । अत्र राज्ञो भीतियुक्तेन सुसङ्गतायाः हासेन विहितं नर्म वैदग्ध्यक्रीडितम् ।

(वि, च) वाचा इव वेशचेष्टाभ्यामपि संभवतीत्याह—**एवमिति** । तत्र सागरिकायाः सङ्केतभङ्गार्थं तद्वेशायाः वासवदत्तायाः आगमने वेशेन बोध्यम् । क्वचित् नायिकायाश्च पलायमानादिचेष्टया अपि तद्बोध्यम् ।

(वि, छ) नर्मस्फूर्जमाह—**नर्मस्फूर्ज इति** । **मालविकायामिति** । मालविकानामनाटिकायामित्यर्थः । सङ्केतनायकं सङ्केतस्थलगतं नायकम्, नायिकायाः

विसृज सुन्दरि ! सङ्गमसाध्वसं
ननु चिरात् प्रभृति प्रणयोन्मुखे ।
[1]प्रतिगृहाण गते सहकारतां
स्वमतिमुक्तलताचरितं मयि ॥

(मालविका) भट्टा ! देवीए भएण अप्पणो वि पिअं कादुं ण पारेमि इत्यादि । (घ)

अथ नर्मस्फोटः ।

नर्मस्फोटो भावलेशैः सूचितोऽल्परसो मतः ॥ १४८ ॥

यथा मालतीमाधवे—

गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं
श्वसितमधिकं किं न्वेतत्स्यात् किमन्यदितोऽथवा ।
भ्रमति भुवने कन्दर्पाज्ञा विकारि च यौवनं
ललितमधुरास्ते ते भावा लिपन्ति च धीरताम् ॥

अलसगमनादिभिर्भावलेशैर्माधवस्य मालत्यामनुरागः स्तोकः प्रकाशितः।(ङ)

नर्मगर्भो व्यवहृतिर्नेतुः प्रच्छन्नवर्त्तिनः ॥ १४९ ॥

यथा तत्रैव सखीरूपधारिणा माधवेन मालत्या मरणव्यवसायवारणम्। (च)

मालविकायाम्। **विसृजेति** । सुन्दरि ! सङ्गमे साध्वसं भयं विसृज । ननु भोश्चिरात् प्रणयोन्मुखे मयि अतिमुक्तलतायाः माधवीलतायाश्चरितं गृहाण । मयि कीदृशे ? सहकारता चूतवृक्षता गते, माधविकया चूतालिङ्गनात्, तद्वत् मामालिङ्गेत्यर्थः । **भट्टा** इति । हे भर्त्तः ! देव्या भयेन आत्मनोऽपि प्रियं कर्त्तुं न पारयामि (संस्कृतम्)। आत्मनः प्रियमपीत्यन्वयः । अत्र मुखेन सङ्गमरूपनर्मारम्भो भयान्तः ।

(वि,ज) नर्मस्फोटमाह—**नर्मस्फोट** इति । **गमनमलसमित्यादि** । माधवस्य मालत्या भावसूचिनेयमुक्तिः । अलसगमनादिकम् एतत् किन्तु तस्याः, ननु भोः किं स्यात् इतोऽन्यत्, अथ वा कियत्स्यादित्यर्थः । अधिकाधिकस्यापि सम्भावनीयत्वादिति भावः । अधिकाधिकस्य सम्भावनीयं हेतुमाह—**भ्रमति भुवन** इति । ते ते भावा वसन्तनवेन्द्वादयः । अनोत्तरोत्तराधिकाधिकसम्भावनाया पूर्वोक्तैः सूचितस्य भावस्य लेश एवेत्याह—**अलसे**त्यादि । अलसगमनादिभिरित्यत्र अलसगमनादिभिः सूचितैरित्यर्थः । अनुरागो विप्रलम्भरसः । सम्भोगरूपनर्मेच्छावत्त्वात् अत्र नर्म ।

(वि, झ) नर्मगर्भमाह—**नर्मगर्भ** इति । प्रच्छन्नवर्त्तिनः प्रच्छन्नीभूय स्थितः नेतुर्नायकस्य इत्यर्थः । व्यवहृतिर्व्यवसायः । **सखीरूपे**ति । मालत्याः सखी सम्पन्निता । पित्रा राजाज्ञया जरते नन्दनाय दातुं कृतनिश्चया मालतीति देवतागृहे

---

1 'परि' (क. पु)

अथ सात्वती—

सात्त्वती बहुला सत्त्वशौर्य्यत्यागदयार्जवैः ।
सहर्षा क्षुद्रशृङ्गारा विशोका सान्द्रता तथा ।
उत्थापकोऽथ संहार्य्यः संलापः परिवर्त्तकः ।
विशेषा इति चत्वारः सात्त्वत्याः परिकीर्त्तिताः ॥ १५० ॥ (ञ)*
उत्तेजनकरी शत्रोर्वाग्युत्थापक उच्यते ॥ १५१ ॥ (ट)

यथा वीरचरिते—

आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा
वैतृष्ण्यन्तु कुतोऽस्य सम्प्रति मम त्वद्दर्शने चक्षुषः ।
यन्माङ्गल्यसुखस्य नास्मि विषयस्तत्किं बहु व्याहृतै-
रस्मिन् विस्मृतजामदग्न्यविजये पाणौ धनुर्जृम्भताम् ॥ (ठ)

स्वमरणं प्रार्थयन्ती लवङ्गिकायाः पादे पतिता मालती । स्तम्भान्तरितस्थितो माधवश्च लवङ्गिकावेशेन आगत्य लवङ्गिकाम् अपसार्य तत्स्थाने स्वपादं दत्त्वा स्थितः । ततो मालती उत्थाय लवङ्गिकाबुद्ध्या तमालिङ्ग्य पश्चाद् दृष्ट्वा परिचीयमाना व्यवसायात् निवर्त्तते इत्यर्थः ।

(वि, ञ) सात्त्वतीं वृत्तिमाह—**अथेति** । सत्त्वादिभिः समस्तव्यस्तैरुपकरैः बहुला तद्वैशिष्ट्यात् बाहुल्यवती हर्षाद्यन्यतरयुक्ता वृत्तिश्च सात्त्वतीत्यर्थः । विशोका विगतशोका । वीरे रसे शृङ्गारस्यानुषङ्गिकत्वेन क्षुद्रत्वम् । अत्र क्षुद्रशृङ्गारत्वेन स्त्रीसंकुलत्वकामोपभोगराहित्येन वीररसत्वेन च कौशिकीतो विशेषः । अस्याः प्रभेदचतुष्टयमाह—**उत्थापक** इत्यादि ।

(वि, ट) **उत्तेजने**ति—शत्रुं जेतुं मित्रस्य उत्तेजनम् ।

(वि, ठ) **आनन्दाय चे**ति—परशुरामागमे रामं प्रति जनकस्य वाक्यमिदम् । धनुर्भङ्गेन प्रतिज्ञातार्थसिद्धया योग्यवरप्राप्त्या चानन्दः । वीर्यातिशयदर्शनाद् विस्मयः । रामं हन्तु परशुरामागमनात् दुःखम् । अतोऽस्य त्वद्दर्शने सम्प्रति एतत् क्षणे चक्षुषः कुतो वैतृष्ण्यम् । उत्कण्ठाबाहुल्यात् क्षणान्तरेऽनिष्टनिवृत्तौ तु उत्कण्ठानिवृत्त्या वैतृष्ण्यं स्यादिति सम्प्रति पदभावार्थः । बहुव्याहृतैर्वा किं, यतो वैवाहिकमाङ्गल्यसुखस्य न विषयोऽस्मि । अतोऽस्मिन् विस्मृतस्य जामदग्न्यस्य विजयनिमित्तं

---

* "या सत्त्वजेनेह गुणेन युक्ता न्यायेन वृत्तेन समन्विता च ।
हर्षोत्कटा संहृतसोष्मभावा सा सात्त्वती नाम भवेत् प्रवृत्तिः ॥" (भरतमुनिः)

मन्त्रार्थदैवशक्त्यादेः संहत्यः संघभेदनम् ॥ १५२ ॥

मन्त्रशक्त्या यथा मुद्राराक्षसे राक्षससहायानां चाणक्येन स्वबुद्ध्या भेदनम्। अर्थशक्त्यापि तत्रैव। दैवशक्त्या यथा—रामायणे रावणाद् विभीषणस्य भेद.। (ढ)

संलापः स्याद् गभीरोक्तिर्नानाभावसमाश्रयः ॥ १५३ ॥

यथा वीरचरिते—(राम) "अयं स य. किल सपरिवारकार्त्तिकेयविजयावर्जितेन भगवता नीललोहितेन परिवत्सरसहस्रान्तेवासिने तुभ्यं प्रसादीकृत परशुः"। (परशुराम·) "राम! दाशरथे! स एवायमार्यपादानां प्रिय परशुः" इत्यादि। (ढ)

प्रारब्धादन्यकार्याणां करणं परिवर्त्तकः ॥ १५४ ॥

यथा वेण्याम्—(भीमः) "सहदेव! गच्छ त्वं गुरमनुवर्त्तस्व। अहमप्यस्त्रागारं प्रविश्यायुधसहायो भवामीति यावत्। अथवा आमन्त्रयितव्यैव मया पाञ्चाली" इति। (ण)

अथारभटी—

मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।
संयुक्ता वधबन्धाद्यैरुद्धतारभटी मता ॥ १५५ ॥ (त)
वस्तूत्थापनसम्फेटौ सङ्क्षिप्तिरवपातनम्
इति भेदास्तु चत्वार आरभट्याः प्रकीर्त्तिताः।

तव बाहौ धनुर्ज्यम्भतामित्यर्थ.। अत्र परशुराम जेतुमुत्तेजनम्। अत्र विस्मयवशाद् रामशाम्येणानन्दादिना च वैशिष्ट्यं वीरो रस।

(वि, ड) सहायमाह—**मन्त्रार्थेति**। मन्त्रस्य मन्त्रणार्थस्य धनस्य दैवस्याद्दष्टस्य वा शक्ते. शक्तिहेतो. संघस्य सैन्यसमूहस्य भेदनमित्यर्थः। राक्षस. शत्रुमन्त्री, चाणक्यो राजमन्त्री; स्वबुद्ध्या स्वमन्त्रणया। अत्र चाणक्यस्य सत्त्वदानानेकसत्त्वं संघभेदनवशाद् वीरो रस।

(वि, ढ) सलापमाह—**संलाप इति**। **कार्त्तिकेयविजयावर्जितेनेति**। तद् विजये नम्रीभूतेनेत्यर्थः। अत्र कौतुकेनैव विजयो न तु वास्तव इति तत्पितृप्रसादगम्यम्। तथापरप्रसादलब्धेन परशुना क्रोड्य गर्व इति रामस्य गभीरात्मिका उक्ति। परशुरामोक्तौ तत्प्रियवस्त्वपि मह्य दत्तमिति स्वमहत्त्वख्यापनमेव गभीरता।

(वि, ण) परिवर्त्तकमाह—**प्रारब्धादिति**। **सहदेवेति**—अत्र प्रारब्धं कार्य्यं युद्धम्। ततोऽन्यत् पाञ्चाल्यामन्त्रणम्।

(वि, त) **अथारभटीति**। **मायेति**। माया विद्याविशेषस्तया इन्द्रजाल परस्परविरुद्धनानावस्तुप्रदर्शनम्, सग्रामो युद्धम्, क्रोधेन उद्भ्रान्तचेष्टितम्—स्वपरज्ञानराहित्येन चेष्टा। एतैर्युक्ता इत्यर्थ। अस्या. प्रभेदचतुष्टयमाह—

मायाद्युत्थापितं वस्तु वस्तूत्थापनमुच्यते ॥ १५६ ॥

यथोदात्तराघवे—

"जीयन्ते जयिनो[1] निशीथतिमिरव्रातैर्वियद्व्यापिभि-
र्भास्वन्त सकला रवेरपि करा अस्मादकस्मादमी ।
एते चोग्रमबन्धकण्ठरधिरैराध्मायमानोदरा
मुह्यत्याननकन्दरानलमुचस्तीव्रान्प्रवान् फेरवा ॥" इत्यादि । (थ)

सम्फेटस्तु समाघातः क्रुद्धसत्वरयोर्द्वयोः ॥ १५७ ॥

यथा मालत्या माधवाघोरघण्टयो । (द)

[2]संक्षिप्तवस्तुरचना शिल्पैरितरथापि वा
संक्षिप्तिः[3] स्यान्निवृत्तौ च नेतुर्नेत्रान्तरग्रह ॥ १५८ ॥ *

यथा उदयनचरिते किलिञ्जहस्तिप्रयोग । द्वितीय यथा—वालिनिवृत्त्या सुग्रीव । यथा वा—परशुरामस्योद्धत्यनिवृत्त्या शान्तत्वापादनम् । "पुण्या

(वि, थ) वस्तूत्थापनलक्षणमाह—मायेति । जीयन्त इत्यादि । जयिनोऽपि वीरा वियद्व्यापिभिर्निशीथतिमिरैः समूहैर्नीयन्ते आच्छाद्यन्ते । रवेरपि अमी भास्वन्त सकला करा अकस्मादकाले कस्मादाच्छाद्यन्ते । उग्रमबन्धकण्ठरधिरैराध्मायमानम् उत्फुल्लमानमुदर येषा तादृशा । आननरूपाभ्य कन्दराभ्योऽनलमुच एते फेरवा शृगालाश्च तीव्रान् स्वान् मुह्यन्तीत्यर्थ । अत्र परस्परविरुद्धालीकनिमिररविरश्म्यादि-प्रदर्शनरूपमिन्द्रजालरूपवस्तु माययोत्थापितम् । रौद्रो रस ।

(वि, द) सम्फेटलक्षणमाह—सम्फेटस्त्विति । समाघात प्रहारोक्ति । क्रुद्धेति । क्रुद्धौ च तौ सत्वरौ चेति कर्मधारय । माधवाघोरेति । तत्र द्वयो क्रुद्धता । सत्वरता परस्परप्रहारोद्यम ।

(वि, ध) सक्षिप्तिलक्षणमाह—संक्षिप्तेति । नेतुर्नेतव्यपात्रस्य एकस्य निवृत्तौ नेत्रान्तरस्य ग्रह एव सक्षिप्तवस्तुरचना । सा च शिल्पैरशिल्पैर्वेत्यर्थ । शिल्प क्रियत्व वस्तु निर्माणमशेषम् । किलिञ्जहस्तिप्रयोग इति । तत्र वास्तवहस्तिरूपपात्र नास्ति शिल्पेन किलिञ्जनामहस्तिरूपपात्रप्रदर्शनम् । अशिल्पैरह—द्वितीयामिति ।

* मुद्गरादलनमादिद्रव्यप्रयोगेण वस्तूत्थापनम् साहि । यथा—उदयनचरिते किलिञ्जहस्तिप्रयोग । पूर्वनायकस्थानान्निवृत्त्या अन्यस्थान्तरपरिग्रहमन्ये सक्षिप्तिं मन्यन्ते । यथा—वालिनिवृत्त्या सुग्रीव । (दशरूपक)

1 'नीयन्ते तान्निमिर' इति (क घ ङ)

2 'क्षिप्त' (ट ठ ड) 'क्षिप्त वस्तु' (क घ ङ)

राजन्नित्यृषिभिर्वाच्यः सोऽपत्यप्रत्ययेन च। (ऊ)
स्वेच्छया नामभिर्विप्रैर्विप्र आर्य्येति चेतरैः। (श)
वयस्येत्यथवा नाम्ना वाच्यो राज्ञा विदूषकः।
वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परम्। (ष)
सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः।
सूत्रधारो मारिषेति हरण्डे इत्यधमैः समाः। (स)
वयस्येत्युत्तमैर्हहो मध्यैरार्य्येति चाग्रजः।
भगवन्निति वक्तव्याः सर्वैर्देवर्षिलिङ्गिनः। (ह)
वदेद्राज्ञीश्च चेटीश्च भवतीति विदूषकः।
आयुष्मन्नार्थिनं[1] वृद्धसूतस्तातेति चेतरः। (क)
वत्स पुत्रक तातेति नाम्ना गोत्रेण वा सुतः। (ऋ)
शिष्योनुजश्च वक्तव्योऽमात्य आर्य्येति चाधमैः। (ख)
विप्रैरयममात्येति सचिवेति च भण्यते।
साधो इति तपस्वी च प्रशान्तश्चोच्यते बुधै.[2]। (ग)

(वि, श) राजन्निति। स राजा ऋषिभि राजन्निति अपत्यप्रत्ययेन च वाच्य इत्यर्थ। यथानर्घराघवे ऐन्दुमतेयेति विश्वामित्रेण दशरथ। विप्रस्तु विप्रै स्वेच्छया नामभिर्वाच्य। इतरैस्तु आर्य्यति।

(वि, ष) वयस्येत्यथवेति। विदूषको राज्ञा वयस्येति वाच्य, अथवा नाम्नैव इति। वाच्यौ नटीसूत्रधाराविति। आर्य्यनाम्ना इति। एकदेशे समस्तद्वयवृत्तिनम्। तेन नव्या आर्य्यपुत्र इति। सूत्रधारेणार्य्येति वाच्यावित्यर्थ।

(वि, स) मारिषेति पारिपार्श्विक वदेत्। हरण्डे इति समास्तुल्यजना। अधमैर्हरण्डेति वाच्या।

(वि, ह) समा उत्तमैस्तु वयस्येति। मध्यमैस्तु हहो इति वाच्या इत्यर्थ। अग्रज सानुनैरार्य्येत्यर्थ। भगवन्निति। देवर्षयो लिङ्गिन परिव्राजकाश्च गर्वरहे भगवन्निति वाच्या।

(वि क) रधिन वृद्धसूत आयुष्मन्निति इतरस्तु तातेति वदेदित्यर्थ।
(वि, ख) वत्स पुत्रकेति। सुत शिष्योऽनुजश्च वत्सेत्यादिभिर्वक्तव्य इत्यर्थ
(वि, ग) प्रशान्तश्चेति—शान्तो जन इत्यर्थ।

(लो, ऊ) अपत्यप्रत्ययेन यथा—हे राघव! हे दाशरथे! इत्यादि।
(लो, ऋ) गोत्रेण यथा—हे काश्यप! हे आत्रेय! इत्यादि।

---

1 'न सूनो वृद्ध तातेति' (क ग. पु) 2 'परै' (व भ पु)

[1]अगृहीताभिधः पूज्यः शिष्याद्यैर्विनिगद्यते ।
उपाध्यायेति चाचार्य्यो महाराजेति भूपतिः ।
स्वामीति युवराजस्तु कुमारो भर्तृदारकः ।
सौम्य भद्रमुखेत्येवमधमैस्तु कुमारकः । (घ)
वाच्या प्रकृतिभी राज्ञः कुमारी भर्तृदारिका ।
पतिर्यथा तथा वाच्या ज्येष्ठमध्याधमैः स्त्रियः । (ङ, ऋ)
हलेति सदृशी प्रेष्या हले वेश्याज्जुका तथा ।
भट्टिन्यम्बेत्यनुगतैः पूज्या च जरती जनैः । (च)
आमन्त्रणैश्च पाषण्डा वाच्याः स्वसमयागतैः । (ल)
शाक्यादयश्च सम्भाष्या भदन्तेत्यादिनामभिः । (छ)
यस्य यत् कर्म शिल्पं वा विद्या वा जातिरेव वा ।
तेनैव नाम्ना वाच्योऽसौ ज्ञेयाश्चान्ये यथोचितम् ॥ १६७ ॥

अथ भाषाविभाग.—

पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम् ।
शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम् । (ज)

(वि, घ) भूपतिर्महाराजेति । युवराजस्तु स्वामीति सम्बोधने वाच्य इत्यर्थ । एवमुत्तरत्रापि । कुमारो युवराजेतर ।

(वि, ङ) पतिर्यथेति । ज्येष्ठ उत्तमस्तथा चोत्तममध्याधमै स्त्रिय स्त्रीभि पतिर्यथा तथा वाच्य इत्यर्थ । तथा चार्यपुत्रेति पत्युच्यमानत्वात् आर्य्यात्व या स्त्रियो वाच्या इत्यर्थ ।

(वि, च) वेश्या सम्बोधने अज्जुकेत्युच्यते इत्यर्थ । भट्टिन्यम्बेति । अनु गन्तृभिर्नरैरर्थादनुगम्यमानत्वाभिभट्टिनीत्यम्बेति चोच्यते । इतरैर्जनै पूज्या वृद्धा जरन्तीति वाच्येत्यर्थ ।

(वि, छ) पाषण्डाश्च स्वसमयागतैरमन्त्रणैश्च वाच्या इत्यर्थ । शाक्यादया बौद्धादय ।

(वि, ज) अथ भाषेति । वक्तृविशेषस्य भाषाविशेष इत्यर्थ । पुरुषाणा मिति । नीचेतरेषां कृतात्मना शुद्धानां पुरुषाणामित्यन्वय । शौरसेन्यादयो चतस्रो भाषा प्राकृतविशेषा प्राकृतसंज्ञा अनुगन्तव्या ।

(लो, झ) पतिर्यथेति । पतिर्येन स्वामिशब्दोच्यते तेन तद्वाच्या स्वामिनीति । येन भणति तेन भट्टिणीति ।

(लो, ट) हे चार्वाक ! हे बौद्धिकेय ! इत्यादि ।

1 'स्मृ' (ट. ठ पु)

ब्राह्मणजाति·"इति । (ध)

प्रवेशत्रासनिष्क्रान्तिहर्षविद्रवसम्भवः ॥ १५९ ॥
अवपातनमित्युक्तं

यथा कृत्यरावणे षष्ठेऽङ्के । ("प्रविश्य खड्गहस्त पुरुष.") इत्यत प्रभृति निष्क्रमणपर्यन्तम् । (न)

पूर्वमुक्तेव भारती ॥ १६० ॥ (प)

अथ नाट्योक्तय —

अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् ।
सर्वश्राव्यं प्रकाशं स्यात् तद्भवेदपवारितम् ।
रहस्यन्तु यदन्यस्य परावृत्त्य प्रकाश्यते ।
[1]निपताककरेणान्यानपवार्य्यान्तरा कथाम् ।
अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम् । (फ)
किं ब्रवीपीति यन्नाट्ये विना पात्रं प्रयुज्यते ।
श्रुत्वेवानुक्तमप्यर्थं तत्स्यादाकाशभाषितम् ॥ १६१ ॥

य कश्चिदर्थो यस्माद्गोपनीयस्तस्यान्तरत ऊर्द्ध्वं सर्वाङ्गुलिनामितानामिक निपताकलक्षणं कर कृत्वाऽन्येन सह यन्मन्त्र्यते तज्जनान्तिकम् । परावृत्त्यान्यस्य

औद्धत्यनिवृत्त्येति । अत्र धर्मनिवृत्त्या धर्मिणि निवृत्तिबोध्या । औद्धत्यकालीनश्च रौद्रो रस । एव सुग्रीवकिलिञ्जहस्तिनो पूर्वं रौद्रो रसो बोध्य ।

(वि, न) अवपातलक्षणमाह—**प्रवेशेति** । प्रवेशादिविद्रवान्ताना सम्भव उत्पादनमवपातनमित्यर्थ । विद्रव पलायनम् । मिलितानामेषामुत्पादनम् । **प्रविश्येति** । तेन पुरुषेण सर्वमिद कृतम् । क्रोधवशात् एतत् कारणात् रौद्रो रस ।

(वि, प) भारतीवृत्तिस्तु **पूर्वमुक्तेवेत्याह—पूर्वमिति** । भारती संस्कृतप्रायो वाग्व्यापारो नराश्रय इति । स्थापकवृत्यप्रसङ्गेन प्रागुक्तेत्यर्थ । सा च सर्वसाधारणेनेत्युक्तम् । रसे सर्वत्र भारती ।

(वि, फ) **नाट्योक्तय** इति । 'नाट्ये परिभाषाविशेषा इत्यर्थ । **तद्भवेदि**त्यादे परत्रान्वय. । निपताकेत्यादिक जनान्तिकलक्षणम् । निपताकलक्षणमग्र वक्ष्यति । अन्तरा कथा कथामध्ये । तादृशेन करेणान्यमपवार्य्यच्छाद्य जनस्यान्ते अन्तिके यद् अन्योन्यामन्त्रण कथन, तज्जनान्तिकमित्यर्थ ।

(वि, ब) **विना पात्रमिति** । रङ्गप्रविष्टमुद्दिश्य इत्यर्थ । निपतावेला-दिवं व्याचष्टे—**य· कश्चिदिति** । **तस्यान्तरत** इति । तद्भिन्ने जने इत्यर्थ । इद जनान्ते इतस्य व्याख्या । **ऊर्द्ध्वं सर्वेति** निपताव्याख्यानम् । अपवारितं व्याचष्टे—**परावृत्त्येति** ।

---

1 'निपताका' (घ. पु.)

रहस्यकथनमपवारितम् । शेषं स्पष्टम् । (व) *

दत्तां सिद्धाश्च सेनाश्च वेश्यानां नाम दर्शयेत् ।
दत्तप्रायाणि वणिजां चेटचेट्योस्तथा पुनः ।
वसन्तादिषु वर्ण्यस्य वस्तुनो नाम यद्भवेत् ॥ १६२ ॥ (भ)

वेश्या यथा वसन्तसेनादि । वणिग् विष्णुदत्तादि । चेट कलहसादि । चेटी मन्दारिकादि ।

नाम कार्य्यं नाटकस्य गर्भितार्थप्रकाशकम् ॥ १६३ ॥ (म)

यथा रामाभ्युदयादि ।

नायिकानायकाख्यानं संज्ञा प्रकरणादिषु ॥ १६४ ॥ (य)

यथा मालतीमाधवादि ।

नाटिकासट्टकादीनां नायिकाभिर्विशेषणम् ॥ १६५ ॥ (र)

यथा रत्नावलीकर्पूरमञ्जर्यादि ।

प्रायेण णयन्तकः साधिर्गमे स्थाने प्रयुज्यते ॥ १६६ ॥

यथा शाकुन्तले । (ऋषी) गच्छाव इत्यर्थे साधयावस्तावत् । (ल)

राजा स्वामीति देवेति भृत्यैर्भट्टेति चाधमैः ।
राजर्षिभिर्वयस्येति तथा विदूषकेण च । (व)

(वि, भ) पात्राणां नामान्याह—दत्तामिति । वसन्तादिषु वर्णनीयस्य वस्तुनो यन्नाम भवेत् चेटचेट्योस्तथा नाम इत्यर्थः ।

(वि, म) गर्भितार्थ इति । नाटके गर्भित प्रतिपाद्यो योऽर्थस्तत्प्रकाशकं नाटकस्य नाम कार्य्यमित्यर्थः । सूचिताथेति क्वचित् पाठः ।

(वि, य) नायिकानायकेति । प्रकरणभाणादयो ये रूपकप्रभेदास्तेषु । संज्ञा नायकनायिकयोराख्यानं संज्ञानामैवेत्यर्थः । नाटिकासट्टकादीनामिति ।

(वि, र) नाटिकादीन्यष्टादशोपरूपकाणि यान्युक्तानि तेषां विशेषणं नाम नायिकाभिर्नायिकानामैवेत्यर्थः ।

(वि, ल) प्रायेणेति—कलापमते कारितम्, पाणिनिमते णिच् । तदन्तं साधधातु गमे स्थाने प्रायेण प्रयुज्यते इत्यर्थः । ऋषी इति । शार्ङ्गरवशारद्वतयोर्वक्तृत्वेनैवेदं निर्देशः ।

(वि, व) राजर्षिभिरिति । विदूषकेण च वयस्येति राजर्षिभ्यः इत्यर्थः ।

---

* "प्रगारिता गुणा गर्वा यस्याग्रण्यो भवन्ति हि ।
पताकेति च तत्प्राहुः स पताक इति स्मृतः ॥
पताके तु यदा वक्राङ्गुलिमग्रं त्वदङ्गुलिर्भवेत्
त्रिपताकः स विज्ञेयः" (नाट्यसूत्रे)

आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत् ।
अन्त्रोक्ता मागधी भाषा राजान्तःपुरचारिणाम् । (क)
चेटानां राजपुत्राणां श्रेष्ठिनां[1] चार्द्धमागधी ।
प्राच्या विदूषकादीनां धूर्त्तानां स्यादवन्तिका[2] । (ग)
योधनागरिकादीनां दाक्षिणात्याऽहिदीव्यताम् ।
शकाराणां[3] शकादीनां शावरीं[4] सम्प्रयोजयेत् । (घ)
वाह्लीकभाषोदीच्यानां द्राविडी द्रविडादिषु ।
आभीरेषु तथाभीरी चाण्डाली पुक्कसादिषु । (ङ)
आभीरी शावरी चापि काष्ठपत्रोपजीविषु ।
तथवाङ्गारकारादौ पैशाची स्यात् पिशाचवाक् ।
चेटीनामप्यनीचानामपि स्यात् शौरसेनिका ।
बालानां षण्ढकानां च नीचप्रहविचारिणाम् ।
उन्मत्तानामातुराणां सैव स्यात् संस्कृतं क्वचित् । (च)
ऐश्वर्य्येण प्रमत्तस्य दारिद्र्योपहतस्य[5] च ।
भिक्षुवल्कधरादीनां प्राकृतं सम्प्रयोजयेत् ।
संस्कृतं सम्प्रयोक्तव्यं लिङ्गिनीपूत्तमासु च ।
देवीमन्त्रिसुतावेश्यास्वपि कैश्चित्तथोदितम् । (छ)
यद्देश्यं नीचपात्रन्तु तद्देश्यं तस्य भाषितम् । (ज)
कार्य्यतश्चोत्तमादीनां कार्य्यो भाषाविपर्य्ययः ।
योषित्सखीबालवेश्याकितवाप्सरसां तथा ।
वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चान्तरान्तरा ॥ १६८ ॥

(वि, क) तादृशानामनीचानाम् । गाथा गीतय. । अत्रेति । गाथासु विषये ।

(वि, ग) चेटानामिति । श्रेष्ठिनां राजपुत्रचेटानामित्यर्थः ।

(वि, घ) अहिदीव्यतां सर्पमिलघना तेषा चेत्यन्वय । शकारो राजशालकः । शकाराणां पौरोगवस्त्रीणामित्यर्थः ।

(वि, ङ) पुक्कसश्चण्डालविशेष ।

(वि, च) षण्ढका नपुसका । नीचानां प्रहविचारकाणां चेत्यन्वयः । सैव संस्कृतमेव । क्वचिदेषा संस्कृतमेवेत्यर्थः ।

(वि, छ) तथोदितं संस्कृतेन ।

(वि, ज) यद्देश्यं देशोचितम् ।

1 'श्रेष्ठिना' (क ग) 2 'ज' (क. ग) 3 'शकारान्' (क ग)
4 शाकारी' (ग घ ङ) 5 'दुःखस्य' (क. ग)

एषामुदाहरणान्याकरेषु[1] बोद्धव्यानि। भाषालक्षणानि मम तातपादाना भाषार्णवे—

पदत्रिंशल्लक्षणान्यत्र नाट्यालङ्कृतयस्तथा।
त्रयस्त्रिंशत् प्रयोज्यानि वीथ्यङ्गानि त्रयोदश।
लास्याङ्गानि दश यथालाभं रसव्यपेक्षया ॥ १६९ ॥ (त)

यथालाभं प्रयोज्यानीति सम्बन्धः। अत्रेति नाटके। तत्र लक्षणानि—

भूषणाक्षरसङ्घातौ शोभोदाहरणं तथा।
हेतुसंशयदृष्टान्तास्तुल्यतर्कः पदोच्चयः।
निदर्शनाभिप्रायौ च प्राप्तिर्विचार एव च।
दिष्टोपदिष्टे च गुणातिपातातिशयौ तथा।
विशेषणनिरुक्ती च सिद्धिर्भ्रंशविपर्ययौ।
दाक्षिण्यानुनयौ मालाऽर्थापत्तिर्गर्हणं तथा।
पृच्छा प्रसिद्धिः सारूप्यं संक्षेपो गुणकीर्त्तनम्।
लेशो मनोरथोऽनुक्तसिद्धिः प्रियवचस्तथा ॥ १७० ॥

तत्र—

लक्षणानि गुणैः सालङ्कारैर्योगस्तु भूषणम् ॥ १७१ ॥ (थ)

यथा—

आक्षिपन्त्यरविन्दानि मुग्धे तव मुखश्रियम्।
कोषदण्डसमग्राणा किमेषामस्ति दुष्करम् ? ॥" (द, ए)

(वि, त) पदत्रिंशदिति। अत्र नाटकलक्षणानि सकलानि पदत्रिंशद्धर्माणि प्रयोज्यानि इत्यर्थः। तथा च त्रय त्रिंशत् नाट्यालङ्कृतयः। त्रयोदश वीथ्यङ्गानि, दश लास्याङ्गानि यथालाभ प्रयोज्यानि। तत्र पदत्रिंशल्लक्षणानि उद्दिशति—भूषणेति।

(वि, थ) लक्षणानीति। एतानि लक्षणसञ्ज्ञकानि पदत्रिंशत् इत्यर्थः।

(वि, द) अत्र भूषणसञ्ज्ञकस्य लक्षणस्य लक्षणमाह—तत्र गुणैरिति। आक्षिपन्तीति। अरविन्दानि कर्त्तृणि। आक्षिपन्ति अधिक्षिपन्ति स्पर्द्धन्ते वा। कोष कुड्मल एव कोषो धनम्। दण्डो नालमेव दण्ड शास्ति। अर्थश्लेषमूलोऽर्थान्तरन्यासोऽलङ्कारः। माधुर्यं च गुणः।

(लो, ए) आक्षिपन्तीति—कोष कुड्मल द्रव्यार्थश। दण्डो नाल दुष्टनिग्रहश।

---

1 'नाटकेषु' (ब पु)

वर्णनाक्षरसङ्घातश्चित्रार्थैरक्षरैर्मितेः ॥ १७२ ॥

यथा शाकुन्तले (राजा) "कच्चित् सखीं वो नातिबाधते शरीरसन्ताप ।
(प्रियंवदा)—सम्पद लब्धोसहो उअसम गमिस्सदि" । (ध)

सिद्धैरर्थैः समं यत्राप्रसिद्धोऽर्थः प्रकाशते ।
श्लिष्टलक्षणचित्रार्था सा शोभेत्यभिधीयते ॥ १७३ ॥ (न)

यथा—

सद्वंशसम्भव शुद्ध कोटिदोऽपि गुणान्वित ।
काम धनुरिव क्रूरो वर्जनीय सता प्रभु ॥ (प, ऐ)

यत्र तुल्यार्थयुक्तेन वाक्येनातिप्रदर्शनात् ।
साध्यतेऽभिमतश्चार्थस्तदुदाहरणं मतम् ॥ १७४ ॥ (फ)

यथा—अनुयान्त्या जनातीत कान्त साधु त्वया कृतम् ।
का दिनश्रीर्विनार्केण का निशा शशिना विना ॥ (ब)

(वि, ध) **अक्षरसङ्घातमिति** । **वर्णनेति** । चित्रार्थैर्मितैरक्षरैर्वर्णनेत्यर्थ । **सम्पदमिति** । साम्प्रत लब्धौषध उपशम गमिष्यतीति (संस्कृतम्)। अत्र त्वत्प्राप्तिरेवौषधप्राप्तिरिति भङ्ग्या कथ्यमानोऽर्थश्चित्र । अक्षराणि चाल्पानि ।

(वि, न) शोभालक्षणमाह—**सिद्धैरिति** । सिद्धैरुपमानभूतैरर्थै सममेकवाक्येनैव अप्रसिद्ध उपमेयभूतोऽर्थो विधेयान्वयार्थं प्रकाशते । सा शोभा कीदृशी, श्लिष्टशब्दचिह्नचित्रार्थेत्यर्थ ।

(वि, प) **सद्वंशेति** । धनुरिव क्रूर प्रभु काम यथेष्ट सता वर्जनीय । आवर्जनहेतुमत्त्वेऽपि क्रौर्यान् वर्जनीय इत्यर्थ । द्वयोरेवावर्जनहेतून् श्लेषादाह—**सद्वंशेति** । सद्वश सद्वेणु सत्कुल च । शुद्ध कीटादिदोषो निष्पापश्च । कोटिं कोटिसख्यक धन ददाति तथा कोट्यायतिगुणो ज्या शौर्यादिश्च । अत्र सिद्धेन धनुषा सम प्रसिद्ध क्रूर प्रभु विधेयवर्जनान्वयार्थं प्रकाश्यते । श्लिष्टशब्देन च चित्रोऽर्थ ।

(वि, फ) उदाहरणलक्षणमाह—**यत्र तुल्यार्थेति** । प्रक्रान्तार्थतुल्यावबोधकेन वाक्येन प्रक्रान्तार्थस्यातिशयित्वप्रदर्शनात् अभिमतोऽतिशयितत्वरूपोऽर्थ साध्यते इत्यर्थ ।

(वि, ब) **अनुयान्त्येति** । राममनुयान्ती सीता प्रति अनसूयाया उक्तिरियम्। जनातीत जनभ्यो निर्गत वनगमनोन्मुखम् इत्यर्थ । **विनार्केण इति** । मेघाच्छन्नदिन-

---

(लो, ऐ) **सद्वंशेति** । वशोऽन्वय वेणुश्च । शुद्धो निष्पाप कीटवेधादिरहितश्च । कोटि सख्याविशेष अटनी च । गुण शौर्यादि मौर्वी च । क्रूरो दारुण कर्कशश्च ।

हेतुर्वाक्यं समासोक्तमिष्टकृद्धेतुदर्शनात् ॥ १७५ ॥ (भ)

यथा वेण्यां भीम प्रति (चेटी)—"एव मए भणिदम् । भाणुमदि ! तुह्माणं अमुक्केसु केसहत्थेसु कध अह्माण देवीए केसा सयमीअन्तित्ति ।" (म)

संशयोऽज्ञाततत्त्वस्य वाक्ये स्याद् यदनिश्चयः ॥ १७६ ॥

यथा ययातिविजये—

इय स्वर्गादिनाथस्य लक्ष्मी किं यत्तकन्यका ।
किं चास्य विषयस्यैव देवता किमु पार्वती ॥ (य)

दृष्टान्तो यस्तु [1]पदार्थसाधनाय निदर्शनम् ॥ १७७ ॥

यथा वेण्या (भीम)—"आर्य ! उचितमेवैतत् तस्या, यतो दुर्योधन कलत्र हि सा" इत्यादि । (र)

तुल्यतर्को [2]यदर्थेन तर्कः प्रकृतगामिना ॥ १७८ ॥

यथा तत्रैव—

प्रायेणैव हि दृश्यन्ते काम स्वप्ना शुभाशुभा ।

श्रियोऽर्कोभावो बोध्य । अत्र सीतातुल्यार्थ दिनश्रीनिशे । सीतायाश्च प्रशसारूपो-तिशयोऽभिमतस्तदुक्तवाक्येन साधित । अत्र वाक्यभेदात् उपमानोपमेययो सम प्रकाशनाभावात् श्लेषाभावाच्च पूर्वस्माद् भेद ।

(वि, भ) हेतुसज्ञकलक्षणमाह—**हेतुरिति** । समास. सक्षेप । इष्टकृत् प्रतिपाद्यस्याभिमतकृद् । हेतुप्रदर्शनात् पृष्टार्थस्य हेतुदर्शनात् ।

(वि,म) एवं मए इति । "एव मया भणितम् । भानुमति ! युष्माकममुक्तेषु केशहस्तेषु कथ देव्या केशा सयम्यन्ते इति" (सस्कृतम्) । अत्र द्रौपद्या केशासयमनहेतौ भानुमत्या पृष्टे सभ्रातृकदुर्योधनवधाभावे हेतौ प्रदर्शयितव्ये वैधव्यचिह्नस्य भानुमत्या केशमोचनस्य अभावो हेतु सक्षेपेण प्रदर्शित, स एव च भीमस्याभिमतकृत् ।

(वि, य) सशयाख्य लक्षणमाह—**संशयेति** । अज्ञाततत्त्वस्य जनस्य वाक्ये श्रवता यदनिश्चय स इत्यर्थ । यदित्यनिश्चयक्रियाविशेषणमव्ययम् । **इयमिति** । काचिद् दिव्यकन्यका दृष्ट्वा तत्त्वमजानतो वितर्कोऽयम् । स्वर्गाधिनाथस्य इन्द्रस्य लक्ष्मी सम्पत् किम्[2] किं यत्तकन्यकेत्युभयत्र पिपदार्थान्वय । अस्य विषयस्य ससारस्य । अत्र श्रोतुरनिश्चय ।

(वि, र) दृष्टान्ताख्य लक्षणमाह—**दृष्टान्त** इति । पदार्थस्योपन्यस्तार्थस्य साधनाय निदर्शनं हेतुप्रदर्शनम् । **आर्य** इत्यादि । अत्र द्रौपद्या उपन्यस्तस्य भानुमत्या दौर्भाग्यस्य दुर्योधनकलत्रत्व हेतु ।

(वि, ल) तुल्यतर्काख्य लक्षणमाह—**तुल्यतर्क** इति । प्रकृतोऽत्र वक्ता

---

1 'पदार्थ' (क. पु) 2 'यम-'

शतसख्या पुनरिय सानुज स्पृशतीव माम् ॥ (ल)

सञ्चयोऽर्थानुरूपो यः पदानां स पदोच्चयः ॥ १७६ ॥

शाकुन्तले यथा—

अधर किसलयराग कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीय यौवनमङ्गेषु सन्नद्धम् ॥

अत्र पदपदार्थयो सौकुमार्य सदृशमेव । (व)

यत्रार्थानां प्रसिद्धानां क्रियते परिकीर्त्तनम् ।
परपक्षव्युदासार्थं तन्निदर्शनमुच्यते ॥ १८० ॥

यथा—क्षात्रधर्मोचितैर्धर्मैरल शत्रुवधे [1]नृपा ।
किन्तु वालिनि रामेण मुक्तो बाण पराङ्मुखे ॥ (श)

अभिप्रायस्तु सादृश्यादभूतार्थस्य कल्पना ॥ १८१ ॥

यथा शाकुन्तले—

इद किलाव्याजमनोहर वपु-
स्तप क्षम[2] साधयितु य इच्छति ।
ध्रुव स नीलोत्पलपत्रधारया
शमीलता छेत्तुमृषिर्व्यवस्यति ॥ (ष)

तद्गमिनाथन यत्तर्क आशङ्क्येत्यर्थ । अत्रापि यदित्यव्ययम् । **प्रायेणैव हीति** । नकुलेनाहिशत हत्वा भानुमत्या स्तने क्षत इति भानुमत्या दृष्टे स्वप्ने कथिते तुना धनस्येयमाशङ्का ।

(वि, व) पदोच्चयाख्य लक्षणमाह—**सञ्चय** इति । पदाना सचय इति । पदाना सचय समूहो योऽर्थानुरूप स इत्यर्थ । अनुरूप चार्थस्य कोमलत्वे पदानामपि तथात्वम् । अधर इत्यादि राज्ञ शाकुन्तलावर्णनमिदम् । अथा यथा कोमलस्तथा शब्दोच्चयोऽपि कटुवर्णविरहात् कोमल इत्याह—**अत्र पदपदार्थयोरिति** ।

(वि, श) निदर्शनाख्य लक्षणमाह—**यत्रार्थानामिति** सूत्राथ स्पष्ट । **क्षात्रे** ति । अत्राधर्मयुद्धेन शत्रुमारणार्थं प्रसद्धस्य रामेणाऽन्यायेन वालिवधस्य निदर्शनम् ।

(वि, ष) अभिप्रायाख्य लक्षणमाह—**अभिप्रायस्त्विति** । अभूतार्थस्य असम्भाविनोऽर्थस्य कल्पना आपादनम् । **इद किलेति** । तपस्योचितवेशा शाकुन्तला दृष्ट्वा दुष्यन्तस्योक्तिरियम् । किल निश्चितमिदम् । अव्याजमनोहरम् अकृत्रिमरम्य वपु य ऋषि कण्व तप क्षम साधयितुमिच्छति । ध्रुवमुत्प्रेक्षते । स ऋषिर्नील्यो त्पलपत्रधारया शमीलता छेत्तु व्यवस्यतीत्यर्थ । अत्र लतारूपसादृश्यात् असम्भाविनो नीलोत्पलपत्रधारया शमीलताछेदनस्यापादनम् ।

---

1 बुधा' (ब भ पु) 2 क्ष्म' (स पु)

प्राप्तिः केनचिदंशेन किञ्चिद्यत्रानुमीयते ॥ १८२ ॥

यथा मम प्रभावत्याम्—

अनेन खलु सर्वतश्चरता चञ्चरीकेणावश्य विदिता भविष्यति प्रियतमा मे प्रभावती । (स)

विचारो युक्तिवाक्यैर्यदप्रत्यक्षार्थसाधनम् ॥ १८३ ॥

यथा मम चन्द्रकलायाम्—

(राजा)—नूनमियमन्त पिहितमदनविकारा वर्त्तते, यत —

हसति परिलोपरहित निरीक्ष्यमाणापि नेक्षते किञ्चित् ।
सख्यामुदाहरन्त्यामसमञ्जसमुत्तर दत्ते ॥ (ह)

देशकालस्वरूपेण वर्णना दिष्टमुच्यते ॥ १८४ ॥

यथा वेण्या, (सहदेव)—

यद् वैद्युतमिव ज्योतिरार्य्ये क्रुद्धेऽद्य सम्भृतम् ।
तत् प्रावृडिव कृष्णेयं नूनं सवर्द्धयिष्यति ॥ (क)

उपदिष्टं मनोहारि वाक्यं शास्त्रानुसारतः ॥ १८५ ॥

यथा शाकुन्तले—

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीप गम ।

(वि, स) प्राप्त्याख्य लक्षणमाह—**प्राप्तिरिति** । **अनेनेति**—चञ्चरीको भ्रमर । अत्र सर्वतश्चरणादिना प्रभावतीदर्शनानुमानम् ।

(वि, ह) विचारलक्षणमाह—**विचार** इति । **हसतीति**—अन्येन निरीक्ष्यमाणापि किञ्चिन्नेक्षते । असमञ्जस सख्या आत्माज्ञानिवर्त्तनम् । सर्वमिद मदनाकुलमनस्त्वात् । अत्र समस्तयुक्तिवाक्यैरप्रत्यक्षमदनविकारसाधनम् । पूर्वाक्तम नुमान स्वरूपेण इति भेद ।

(वि, क) दिष्टाख्य लक्षणमाह—**देशेति** । **यद्वैद्युतमिति** । आर्य स्वयि मैत्रे ज्योति क्रोधजनित स्वतेन सम्भृतमाविष्कृतम् । वैद्युत विद्युत्सम्बन्धि । **तत्प्रावृडिवेति** । प्रावृषा वैद्युततेजस सम्बर्द्धनात् । अत्र क्रोधोचितकाले तद्वर्णनम् ।

(वि, उ) उपदिष्टाख्य लक्षणमाह—**उपदिष्टमिति** । शास्त्रमत्र नीतिशास्त्रम् **शुश्रूषस्व** इति । पतिगृहे त्यज्यमाणा शकुन्तला प्रति कण्वस्योक्तिरियम् । विप्रकृता तिरस्कृतापि रोषणतया भर्तु. प्रताप मा स्म गम । भूयिष्ठमतिशय दाक्षिण्या यथोचितव्यवहारिणी । वामा उपदिष्टे तद् विपरीतकारिण्य कुलस्याधयो मनस व्यथाकारिण्य । शुद्धसारोपालक्षणा । कुलस्याधमा इति क्वचित् पाठ । इद नीतिशास्त्रानुसारि वाक्यम् ।

भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामा कुलस्याधय ॥ (ख)

गुणातिपातः कार्य्यं यद् विपरीतं गुणान् प्रति ॥ १८६ ॥

यथा मम चन्द्रकलायां चन्द्रं प्रति

तह सहरिज्जइ तमो घेप्पइ सयलेहि ते पाओ ।
वससि सिरे पसुवइणो तहवि इत्थीअ जीअएण हरसि ॥ (ग, ओ)

योऽसामान्यगुणोद्रेकः स गुणातिशयो मतः ॥१८७॥ (घ)

यथा तत्रैव (राजा) (चन्द्रकलाया मुखं निर्दिश्य)—

असावन्तश्चञ्चद्विकचनवनीलाब्जयुगल-
स्तलस्फूर्जत्कम्बुर्विलसदलिसङ्घात उपरि ।
विना दोषासङ्गं सततपरिपूर्णाखिलकल
कुतः प्राप्तश्चन्द्रो विगलितकलङ्कः सुमुखि ते ॥" (ङ)

अर्थान् सिद्धान् बहूनुक्त्वा विशेषोक्तिर्विशेषणम् ॥ १८८ ॥ (च)

(वि, ग) गुणातिपाताख्यं लक्षणमाह—**गुणातिपात** इति । गुणा स्वनिष्ठगुणाः । तान् प्रति इति तेषामित्यर्थः । तथा च स्वनिष्ठगुणानां विरोधि यत् स्वकार्य्यं तादित्यर्थः । **तह सहरिज्जइ** इति ।

त्वया सह्रियते तमो गृह्यते सकलैस्तव पादः ।
वससि शिरसि पशुपतेस्तथापि स्त्रीणां जीवनं हरसि ॥ (इति संस्कृतम्)।

तम तिमिरमेव तमोगुणः । पादो रश्मिरेव चरणः । अत्र एतादृशगुणविरुद्धमुक्तकार्य्यम् ।

(वि, घ) गुणातिशयाख्यं लक्षणमाह—**योऽसामान्येति** । असामान्यस्य अन्यावृत्तेर्गुणस्य यो निर्दिश्यमाने वस्तुनि उद्रेकः इत्यर्थः ।

(वि, ङ) **असाविति** । हे सुमुखि ! निर्दिश्यमानमुखरूपश्चन्द्रः कुतः प्राप्तः । त्वया प्राप्तः इत्यर्थः । सम्बन्धविवक्षया निष्ठायोगेऽपि षष्ठी । यद्वा ते तुभ्यं त्वत्स्थाने वा कुतः प्राप्तः कुतः आगतः इत्यर्थः । कीदृशः । अन्तर्मध्ये चञ्चत् चपलं विकचनवनीलाब्जयुगलं यस्य तादृशः । नयनद्वयमत्र नीलाब्जम् । तथा तलेऽधो भागे स्फूर्जत् दृश्यमानं कम्बुः रेखात्रयं यस्य तादृशः । रेखात्रयं कम्बुः । ग्रीवायां स एव कम्बुः शङ्खः । तथा उपरि विलसन् अलिसङ्घातो यस्य तादृशः । अत्र केशा एव अलिसङ्घातः । तथा दोषाभ्रेरासङ्गः एव दोषाणामागन्तूनां विना सततमेव परिपूर्णोऽखिलः कलो विगलितः कलङ्कश्च । अत्रैषामन्यचन्द्रादासाधारणानां मुखात्मकचन्द्रे उद्रेकः ।

(वि, च) विशेषणाख्यलक्षणमाह—**अर्थानिति** । सिद्धान् उपमानोपमेय-

---

(सं, ओ) अस्याथ —तमोऽन्धकार अज्ञान च । पादो रश्मिश्चरणश्च ।

यथा—

तृष्णापहारी विमलो द्विजावासो जनप्रिय ।
ह्रद पद्माकर किन्तु बुधस्त्व स जलाशय ॥ (छ, औ)

पूर्वसिद्धार्थकथनं निरुक्तिरिति कीर्त्यते ॥ १८९ ॥

यथा वेण्या—"निहताशेषकौरव्य" इत्यादि । (ज)

बहूनां कीर्त्तनं सिद्धिरभिप्रेतार्थसिद्धये ॥ १९० ॥

यथा—

यद्वीर्य्यं कूर्मराजस्य यश्च शेषस्य विक्रमः ।
पृथिव्या रक्षणे राजन्नेकत्र त्वयि तत्स्थितम् ॥ (झ)

दृष्टादीनां भवेद्धंशो वाच्यादन्यच्च यद्वच. ॥ १९१ ॥

यथा वेण्या कञ्चुकिन प्रति दुर्य्योधन —

सहभृत्यगण सबान्धव सहामित्र ससुत सहानुजम् ।

साधारणान् बहून् उत्कर्षहेतूनर्थान् धर्मान् इत्यर्थ । विशेषोक्तौ उपमेये उपमान व्यावर्त्तकधर्मोक्तिरित्यर्थ ।

(वि, छ) **तृष्णापहारी**ति—अत्र त्व चेत्यर्थवशात् लभ्यम् । तथा च ह्रद सर त्व च तृष्णापहारी तृष्णा पिपासा धनाकाङ्क्षा च । विमल स्वच्छजल निष्पापश्च । द्विजानामावासोऽधिकरणम्, द्विजाना विप्राणामाश्रयश्च । जनाना प्रिय हितकारित्वात् । पद्माना पद्मायाश्च आकरो निवासस्थानम् । इत्थमुभयसाधारणानुकूल धर्मान् उक्त्वा व्यावर्त्तकधर्ममाह—**किन्त्विति** । बुध पण्डित त्व स तु ह्रदो जला शयो जलयुक्त एवात एव । जडाशय निर्बुद्धिचित्त डलयोरैक्यत्व, जलाशय शीतल ख्यात इति वा ।

(वि, ज) निरुक्त्याख्य लक्षणमाह—**पूर्वसिद्धे**ति । स्वय पूर्वकृतार्थकथन मित्यर्थ । **निहते**ति । प्रतिज्ञाहेतुसम्भवरूपस्य विमर्शसन्ध्यङ्गस्य अपीदमुदाहरण मुपाधिभेदात् अविरुद्धम् ।

(वि, झ) सिद्धयाख्य लक्षणमाह—**बहूनामि**ति । अभिप्रेतार्थ स्तुति स्तुत्यर्थं बहुधर्मिकीर्त्तनमित्यर्थ । **यद्वीर्य्यमि**ति । अत्र कूर्मराजशेषयोरेकधर्मिकीर्त्तनम् ।

(वि, ञ) प्रशाख्यलक्षणमाह—**दृष्टादीनामि**ति । वाच्याद् वक्तुमिष्टाद न्यद् यत् द्वयाना वचो भवेदित्यर्थ । वाच्यादन्यतरद् वच इति अप्रामाणिक पाठ । **सहभृत्यगणमि**ति । अत्र वक्ता दुर्य्योधनो दृष्ट । पाण्डुसुत सुयोधन इति वक्तव्ये वैपरीत्येन अन्यदभिहित ।

(लो, औ) **तृष्णे**ति—द्विजा ब्राह्मणा सक्षिणश्च । पद्माकरो लक्ष्मीविधाता पद्मानामाकरश्च । जलाशयो जलस्याशयो जडाशयश्च ।

स्वबलेन निहन्ति संयुगे न चिरात् पाण्डुसुतः सुयोधनम् ॥ (ञ,अ)

विचारस्यान्यथाभावः सन्देहात्तु विपर्य्ययः ॥ १९२ ॥

यथा—मत्वा लोकमदातारं सन्तोषे यैः कृता मतिः ।
त्वयि राजनि ते राजन्न तथा व्यवसायिनः ॥ (ट)

दाक्षिण्यं चेष्टया वाचा परचित्तानुवर्त्तनम् ॥ १९३ ॥

वाचा यथा—

प्रसाधय पुरीं लङ्कां राजा त्वं हि विभीषण ।
आर्य्येणानुगृहीतस्य न विघ्नः सिद्धिमन्तरा ॥ (ठ)

एवं चेष्टयापि ।

वाक्यैः स्निग्धैरनुनयो भवेदर्थस्य साधनम् ॥ १९४ ॥

यथा वेण्याम्, अश्वत्थामानं प्रति कृपः—"दिव्यास्त्रग्रामकोविदे भारद्वाजतुल्यपराक्रमे किं न सम्भाव्यते त्वयि ?" । (ड)

माला स्यादर्थसंष्टार्थं नैकार्थप्रतिपादनम् ॥ १९५ ॥

यथा शाकुन्तले—(राजा)

किं शीकरैः श्रमविरोधिभिरार्द्रवातं
सञ्चारयामि नलिनीदलतालवृन्तम्[1] । ग

(वि, ट) विपर्य्ययाख्यलक्षणमाह—**विचारस्येति** । सन्देहानन्तरं यो विचारो निर्णयस्तस्यान्यथात्वमित्यर्थः । **मत्वा लोकमिति** । अयाचनेनापि सन्तुष्टत्वे त्वयि अन्यथा व्यवसायिनो याचन्ते इत्यर्थ । अत्रार्थप्राप्त्यप्राप्तिसन्देहादनन्तरं याचनवैमुख्यनिर्णयस्य उपभोग्ये राजनि अन्यथाभाव ।

(वि, ठ) दाक्षिण्याख्यं लक्षणमाह—**दाक्षिण्यमिति** । परचित्तानुवर्त्तनं परचित्तप्रीणनम् । **प्रसाधयेति** । विभीषणचित्तप्रीणनमिति लक्ष्मणस्य वाक्यम् । सिद्धिमन्तरा सिद्धेर्मध्ये । **एवं चेष्टयापीति** ।

दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे तन्वी स्थिता कतिचिदेव पदानि गत्वा ।
आभाषते विवृतवदना च विमोचयन्ती शाखासु वल्कलमगस्तरुमाणाम् ॥
इति शाकुन्तलायां चेष्टया दुष्मन्तस्य चित्तप्रीणनम् ।

(वि,ड) अनुनयाख्यं लक्षणमाह—**वाक्यैः स्निग्धैरिति** । अर्थं स्वार्थीष्टम् । **दिव्यास्त्रेति**, अत्र युद्धप्रवर्त्तनमेव स्वार्थीष्टम् ।

(वि, ढ) मालाख्यं लक्षणमाह—**माला स्यादिति** । नैकार्थस्य नानाविधार्थस्य प्रतिपादनमित्यर्थः । नञर्थस्यात्र नशब्दस्य नाशरूपिपर्यवः । **किं शीकरैरिति** ।

(लो, अ) पाण्डुसुत सुयोधन इति वक्तव्ये पाण्डुसुतः सुयोधनमिति वचनम् ।

---

1 'तालवृन्तं' (ब स. पु.)

अङ्के निवेश्य चरणावुत पद्मताम्रौ
सवाहयामि करभोरु ! यथा सुखं ते ॥ (ङ)

अर्थापत्तिर्यदन्योऽर्थोऽर्थान्तरोक्तेः प्रतीयते ॥ १९६ ॥

दत्त्वाभयं सोऽतिरथो वध्यमानं किरीटिना ।
सिन्धुराजमुपेक्षेत नैव चेत्कथमन्यथा ॥ (ण)

दूषणोद्घोषणायां तु भर्त्सना गर्हणं तु तत् ॥ १९७ ॥

यथा तत्रैव कर्णं प्रति (अश्वत्थामा)—निर्वीर्यं गुरुशापभाषितवशात् किं मे तवैवायुधमित्यादि । (त)

अभ्यर्थनापरैर्वाक्यैः पृच्छार्थान्वेषणं मतम् ॥ १९८ ॥

यथा तत्रैव, (सुन्दरक) । अज्ज ! अज्ज ! अवि णाम सारधिदुदिओ दिट्ठो तुहेहिं महाराओ दुज्जोधणो ण वेत्ति ।" (थ,)

प्रसिद्धिर्लोकसिद्धार्थैरुत्कृष्टैरर्थसाधनम् ॥ १९९ ॥

यथा विक्रमोर्वश्याम्—(राजा)

सूर्य्याचन्द्रमसौ यस्य मातामहपितामहौ ।

शकुन्तला प्रति दुष्मन्तस्य वाक्यमिदम् । तालवृन्त व्यजनम् । शीकरैरार्द्रवातमित्यन्वय । सवाहयामि पीडयामि । अत्र शकुन्तलासम्भोगरूपस्वाभीष्टार्थं तालवृन्तचालनाद्यनेकप्रतिपादनम् ।

(वि, ण) **दत्त्वाभयमिति** । किरीटिनार्जुनेन सिन्धुराजम् । **नैवं चेदिति** । राज्ये स्वपुत्राभिषेकेच्छा न चेदित्यर्थ । अत्र सिन्धुराजोपेक्षारूपान्यार्थाक्षिवशात् निर्दिष्टाया द्रोणस्य तादृशेच्छाया निश्चय इत्यर्थ ।

(वि, त) गर्हणाख्य लक्षणमाह—**दूषणेति** । दूषणोद्घोषणाया सत्या तयैव उद्घोषणया दूष्यमाणस्य भर्त्सनेत्यर्थ । **निर्वीर्यमिति** । कर्णस्य गुरु परशुराम । तस्य शापरूप भाषित तद्वशात् निर्वीर्यमेव तवायुध किं मे करिष्यतीत्यर्थ । एव कारश्चात्र दर्शितक्रमेण योज्य । अत्र शस्त्रस्य निर्वीर्यत्वरूपदूषणोद्घोषणया दूष्यमाणस्य कर्णस्य भर्त्सनाप्रतीति ।

(वि, थ) पृच्छाख्य लक्षणमाह—**अभ्यर्थनेति** । अभ्यर्थनापरैर्वाक्यैरर्थस्यानुसन्धीयमानस्यार्थस्यान्वेषण पृच्छेत्यर्थ । सुन्दरको दुर्योधनस्यानुचर । **अज्ज इति** । आर्य, आर्य, अपि नाम सारथिद्वितीयो दृष्टो युष्माभिर्महाराजो दुर्य्योधनो न वेत्ति । (इति सस्कृतम्)

(वि, द) प्रसिद्धाख्य लक्षणमाह—**प्रसिद्धिरिति** । लोकसिद्धार्थैरुत्कृष्टैरर्थ्यमाणैरर्थस्य स्वाभीष्टार्थस्य साधनमित्यर्थ । **सूर्य्याचन्द्रमसौ इति**। द्वाभ्याम् उर्वश्या

स्वय कृत पतिद्वाभ्यामुर्वरया च भुवा च य ॥ (द)

सारूप्यमनुभूतस्य[1] सारूप्यात् क्षोभवर्धनम्[2]॥ २००॥

यथा वेण्या—दुर्योधनभ्रान्त्या भीम प्रति (युधिष्ठिर) "दुरात्मन्! दुर्योधनहतक" इत्यादि। (घ)

संक्षेपो [3]यत्तु सक्षेपादात्मान्यार्थं प्रयुज्यते ॥ २०१ ॥

यथा मम चन्द्रकलाया—(राजा) प्रिये!

अङ्गानि खेदयसि किं शिरीषकुसुमपरिपेलवानि मुधा?।

(आत्मान निर्दिश्य)

अयमीहितकुसुमाना सम्पादयिता तवास्ति दासजन ॥ (ङ)

गुणानां कीर्त्तन यत्तु तदेव गुणकीर्त्तनम् ॥ २०२ ॥

यथा तत्रैव—"नेत्रे सज्जनगञ्जने" इत्यादि। (च)

स लेशो भण्यते वाक्यं यत्सादृश्यपुर सरम् ॥ २०३ ॥

यथा वेण्या—(राजा)

हते जरति गाङ्गेये पुरस्कृत्य शिखण्डिनम्।

या श्रद्धा पाण्डुपुत्राणा सैवास्माक भविष्यति ॥ (छ)

मनोरथस्त्वभिप्रायस्योक्तिर्भङ्ग्यन्तरेण यत् ॥ २०४ ॥

भुवा चेत्यन्वय। सोऽहं पृच्छामीति शेष। अत्र लोकसिद्धार्थसूर्यादिकुलोद्भवत्वादि तदुक्त्या स्वाभीष्टार्थस्य पुष्ट्यर्थकथनरूपस्य साधनम्।

(वि, घ) सारूप्याख्य लक्षणमाह—**सारूप्यमिति**। अनुभूतविशेषभिन्ने ऽनुभूतार्थसादृश्यात् आत्मन क्षोभवर्द्धनमित्यर्थः। **दुरात्मन्** इत्यादि। अत्रानुभूत दुर्योधनसाम्यात् भीमदर्शने क्षोभवृद्धि।

(वि, न) सक्षेपाख्य लक्षणमाह—**सक्षेपेति**। अन्यजनस्यार्थे प्रयोजन निमित्तम् आत्मा प्रयुज्यते नियुज्यते इत्यर्थ। **अङ्गानि खेदयसीति**—कुसुमापचयार्थ मिति शेष। अत्र प्रियाया कुसुमापचयनिमित्त राज्ञा आत्मा नियुक्त।

(वि, ङ) गुणकीर्त्तनाख्य लक्षणमाह—**गुणानामिति**। नेत्रे सज्जनगञ्जने इत्यादि प्रागुक्तम्।

(वि, च) लेशाख्य लक्षणमाह—**श्लेश इति**। सादृश्यपुर सर सादृश्याश्रित-पूर्वकम्। **हते जरतीति**। गा श्रद्धा अभिमन्युवधात् इति शेष।

(वि, छ) मनोरथाख्य लक्षणमाह—**मनोरथस्त्विति**। स्वाभिप्रायस्य वृत्तान्त-

---

1 'अनुरूपस्य' (ग पु) 2 'वर्द्धनम्' (क पु)
3 अपि' (ङ च ज)

यथा—रतिकेलिकल किञ्चिदेपो मन्मथमन्थर ।
परय सुभ्रु [1] समाश्वस्ता[1] कादम्बश्चुम्बति प्रियाम् ॥ (ब)

[2]विशेषार्थोह. प्रस्तावेऽनुक्तसिद्धिरुदीर्य्यते ॥ २०५ ॥

यथा गृहवृक्षवाटिकायाम्—
दृश्येते तन्वि [1] यावेतौ चारू चन्द्रमस प्रति ।
प्राच्ये कल्याणनामानावुभौ तिष्यपुनर्वसू ॥ (भ)

स्यात्प्रमाणयितुं पूज्यं प्रियोक्तिर्हर्षभाषणम् ॥ २०६ ॥

यथा शाकुन्तले—
उदेति पूर्वं कुसुम तत फल
घनोदय प्राक् तदनन्तरं पय ।
निमित्तनैमित्तिकयोरय क्रम-
स्तव प्रसादस्य पुरस्तु सम्पद ॥ (म)

अथ नाट्यालङ्कारा —

आर्शीराक्रन्दकपटाक्षमागर्वोद्यमाश्रया. ।
उत्प्रासनस्पृहाक्षोभपश्चात्तापोपपत्तय. ।
आशंसान्यवसायौ[3] च विसर्पोल्लेशसंज्ञितौ ।

तुल्यस्य अन्यदीयवृत्तान्तस्य प्रदर्शन भवति । **रतिकेलीति**, रति-केल्यर्थं विधित् कल मधुरास्फुटालापध्वनि । मन्मथेन मन्थर । अन्यत्र उद्यायागच्छन् । आश्वस्ता-मनुद्विग्नाम् । अत्र स्वाभिप्रायस्थाया रतेस्तुल्याया कादम्बरते प्रदर्शनभङ्गया उक्ति ।

(**वि, भ**) अनुक्तसिद्ध्याख्य लक्षणमाह—**विशेषेति** । प्रस्तावे प्रकरण सति विशेषार्थस्य ऊह प्रणिधानेन गम्यत्वम् । प्रकरणाभावे तु तादृशोहाऽसम्भव एवेति भाव । **दृश्येत** इति । हे तन्वि ! हे प्राच्ये ! चन्द्रमस प्रति चन्द्रमसि यावेतौ चारू दृश्येते तावुभौ कल्याणनामानौ तिष्यपुनर्वसू इत्यर्थ । अत्र तद्द्वयविशिष्टचन्द्र तुल्यता प्राकरणिकेनेद्वयविशिष्टे मुखे ऊह्यते ।

(**वि, म**) प्रियवचनजन्य लक्षणमाह—**स्यादिति** । पूज्य जन प्रमाणयितु मिति प्रमाणत्वेन उत्कृष्टत्वेन ज्ञापयितु हर्षेण भाषण प्रियोक्ति प्रियवच इत्यर्थ । **उदेतीति** । **तव प्रसादस्येति** । प्रसादजन्यानां सम्पदां शीघ्रोत्पत्त्या पुरस्कारोप । अत्र मुने प्रकृष्टत्वप्रतिपादनार्थमिद हर्षभाषणम् ।

(**वि, य**) नाट्यालङ्कारयन्त्रयन्थिशार्दति यदुक्त तत्र वक्तुमाह—**अथेति** । तत्र अवङ्कनीयानिर्देशति—**आर्शीरित्यादि** ।

---

1 'समालम्भात्' (क पु) 2 'विशेषार्थाहविम्नो' (क. पु) 'विशेषार्थाहप्रस्तावे' (ङ पु) 'विशेषार्थेप्रस्तावो (ब पु) 3 '-ध्यवसायौ (क.पु)

उत्तेजनं परीवादो नीतिरर्थविशेषणम् ।
प्रोत्साहनं च साहाय्यमभिमानोऽनुवर्त्तनम् ।
उत्कीर्त्तनं यथा याच्ञा परिहारो निवेदनम् ।
प्रवर्तनाख्यानयुक्तिप्रहर्षाश्चोपदेशनम् ।
इति नाट्यालङ्कृतयो नाट्यभूषणहेतवः ॥ २०७ ॥ (य)

आशीरिष्टजनाशंसा ॥ २०८ ॥

यथा शाकुन्तले—

ययातेरिव शर्मिष्ठा पत्युर्बहुमता भव ।
पुत्र त्वमपि सम्राज सैव पूरुमवाप्नुहि ॥ (र)

आक्रन्दः प्रलपितं शुचा ॥ २०९ ॥

यथा वेण्या (कञ्चुकी) हा देवि कुन्ति ! राजभवनपताके ! इत्यादि । (ल)

कपटं मायया यत्र रूपमन्यद् विभाव्यते ॥ २१० ॥

यथा कुलपत्यङ्के—

मृगरूप परित्यज्य विधाय कपट वपु ।
नीयते रक्षसा तेन लक्ष्मणो युधि संशयम् ॥ (व)

अक्षमा सा परिभव स्वरूपोऽपि न विषह्यते ॥ २११ ॥

यथा शाकुन्तले—(राजा) भो सत्यवादिन् ! अभ्युपगत तावदस्माभिः । किं पुनरिमामभिसन्धाय लभ्यते ? (शार्ङ्गरव) विनिपात इत्यादि । (श)

गर्वोऽपलेपजं वाक्यं ॥ २१२ ॥

यथा तत्रैव, राजा—ममापि नाम सत्त्वैरभिभूयन्ते गृहा ? । (ष)

(वि, र) आशीराख्यानमलङ्कृतिमाह—आशीरिष्टजनेति । इष्टजने आशा वादि इत्यर्थः । शर्मिष्ठा पुरं पुत्र यथा प्राप तथा त्वमप्येव पुत्र प्राप्नुहीत्यन्वयः ।

(वि, ल) आक्रन्दाख्यालङ्कृतिमाह—आक्रन्द इति । स्पष्टम् ।

(वि, व) कपटाख्यालङ्कृतिमाह—कपटमिति । विभाव्यते दर्श्यते । मृगरूपमिति । तेन मायामृगरूपेण मारीचराक्षसो मृगरूप मृगधर्मं स्वरविशेष परित्यज्य । अर्थादमर्षोचितस्वरविशेषमुच्चार्य्य इत्यर्थः ।

(वि, श) अक्षमाख्यालङ्कृतिमाह—अक्षमेति । स्वल्पोऽपि परिभवो यत्र विषह्यत इत्यर्थः । भो भो इत्यादि । शकुन्तलापरिणयमस्मरन्नुपान्त प्रति तवेयं चोरीति शार्ङ्गरवेण वनवशिष्येण उक्ते भो भो इति राज्ञ उक्तिः । इमां जायाम् । अत्र भो भो सत्यवादिन्नित्याचेपोक्तया कृतस्य परिभवस्य विनिपात इत्युक्तया शार्ङ्गरवेण न विषेहे ।

(वि, ष) गर्वाख्यालङ्कृतिमाह—गर्व इति । अपलेपोऽपह्नवः ।

कार्य्यस्यारम्भ उद्यमः ॥ २१३ ॥

यथा कुम्भे-(रावण·) पश्यामि शोकविवशोऽन्तकमेव तावत् । (स)

ग्रहणं गुणवत् कार्य्यहेतोराश्रय उच्यते ॥ २१४ ॥

यथा विभीषणनिर्भर्त्सनाङ्के—(विभीषण.)-राममेवाश्रयिष्यामीति । (ङ)

उत्प्रासनन्तूपहासो योऽसाधौ साधुमानिनि ॥ २१५ ॥

यथा शाकुन्तले—(शार्ङ्गरवः) राजन्! अथ पुन. पूर्ववृत्तान्तमन्यसङ्गाद् विस्मृतो भवान्, तत् कथमधर्मभीरोर्दारपरित्याग इत्यादि । (क)

आकाङ्क्षा रमणीयत्वाद् वस्तुनो या स्पृहा तु सा ॥२१६॥

यथा तत्रैव-(राजा)

चारुणा स्फुरितेनायमपरिक्षतकोमल. ।
पिपासतो ममानुज्ञां ददातीव प्रियाधर· ॥ (ख)

अधिक्षेपवच·कारी क्षोभः प्रोक्तः स एव तु ॥ २१७ ॥

यथा—त्वया तपस्विचाण्डाल ! प्रच्छन्नवधवर्त्तिन· ।
न केवल हतो वाली स्वामी च परलोकत. ॥

मोहावधीरितार्थस्य पश्चात्तापः स एव तु ॥ २१८ ॥

यथानुतापाङ्के-(राम)

किं देव्या न विचुम्बितोऽसि बहुशो मिथ्याभिशप्तस्तदा। इति । (घ)

(वि, स) उद्यमाख्यामलङ्कृतिमाह—**कार्य्यस्येति** । कुम्भे कुम्भनाम्नि नाटके पश्यामीति इन्द्रजिच्छोकार्त्तस्य रावणस्य स्वयं युद्धारम्भे आत्मनोऽन्तकत्वकथनमिदम् ।

(वि, ङ) आश्रयाख्यामलङ्कृतिमाह—**ग्रहणमिति** । **राममेवेति** । अत्रात्मनो लङ्काधिपत्यस्य गुणवत्कार्य्यस्य हेतो रामाश्रयणस्य ग्रहणम् ।

(वि, क) उत्प्रासनाख्यामलङ्कृतिमाह—**उत्प्रासनमिति** । साधुमानिनि, आत्मानि साधुत्वमानिनि । राजनित्यादिरुपहास. । कृतविस्मरणात् राज्ञोऽसाधुत्वम् ।

(वि, ख) स्पृहाख्यामलङ्कृतिमाह—**आकाङ्क्षा इति** । **चारुणेति**—शकुन्तलाया स्फुरदधरदर्शनात् तत्पानेच्छो राज उक्तिरियम् । अपरिक्षतकोमलोऽयमधरधारण स्फुरतेन मम पानानुज्ञा ददातीव इत्यर्थ ।

(वि, ग) क्षोभाख्यामलङ्कृतिमाह—**अधिक्षेपेति** । अधिक्षेप तिरस्कार. तदर्थकवचोजनको य क्षोभ क्रोधाकुलचित्तता स क्षोभाख्योऽलङ्कार इत्यर्थ । त्वयेत्यादिकं रामं प्रति रावणस्य वाक्यम् ।

(वि, घ) पश्चात्तापाख्यामलङ्कृतिमाह-**मोहावधीरितार्थस्येति** । गोत्रस्खलितादेतो रामे मिथ्याभिशापं दत्त्वा मानिन्यां सीतायां तामनुनीय कार्यान्तरादुद्दिगतस्य रामस्य तदा तत्कर्तृकचुम्बनवरणानुतापोऽयम् ।

उपपत्तिर्मता हेतोरपन्यासोऽर्थसिद्धये ॥ २१९ ॥

यथा वध्यशिलायाम्-

म्रियते म्रियमाणे या त्वयि जीवति जीवति ।
तां यदिच्छसि जीवन्तीं रक्षात्मानं ममासुभिः ॥ (ङ)

आशंसनं स्यादाशंसा ॥ २२० ॥

यथा श्मशाने, (माधवः) तत्पश्येयमनङ्गमङ्गलगृहं भूयोऽपि तस्या मुख-मिति । (च)

प्रतिज्ञा व्यवसायकः ॥ २२१ ॥

यथा मम प्रभावत्यां—(वज्रनाभ.)-

अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया ।
लीलयोन्मूलयाम्येव भुवनद्वयमप्य वः ॥ (छ)

विसर्पो यत्समारब्धं कर्मानिष्टफलप्रदम् ॥ २२२ ॥

यथा वेण्याम्—एकस्य तावत् पाकोऽयमित्यादि ।

कार्य्यदर्शनमुल्लेखः । २२३ ॥

(वि, ङ) उपपत्त्याख्यामलङ्कृतिमाह—**उपपत्तिरिति** । अर्थस्याभिमतार्थस्य सिद्धये तद्धेतोरुपन्यास इत्यर्थ । वध्यशिला नाटकविशेष । म्रियत इति वध्यशिलाया हन्तुमानीत स्वमरणेन मरिष्यमाणा स्वप्रियामनुशोचन्तं कञ्चित् प्रति महादयालोरुक्तिरियम् । पूर्वार्द्धोक्तरूपां प्रिया जीवन्तीं यदीच्छसि तदा ममासुभिरात्मान रक्ष । त्वत्परित्यक्तमहं म्रिये । अत्र वध्यत्राणं वक्तुरभिप्रेतं तत्सिद्धये वध्यप्रियाजीवनेच्छारूपहेतोरुपन्यास ।

(वि, च) आशंसाख्यामलङ्कृतिमाह—**आशंसनमिति** । आशंसनम् अर्थसिद्धये प्रार्थनम् । आशीर्नामालङ्कृतिस्तु परार्थस्य सिद्धये आशीर्वाद । **तत्पश्येयमिति** । तस्या मालत्या मुखम् ।

(वि, छ) व्यवसायाख्यामलङ्कृतिमाह—**प्रतिज्ञेति** व्यवसायक इति स्वार्थे क । **अस्य वक्ष** इति । वो युष्माकं श्रीकृष्णादीना सम्बन्धिनोऽस्य प्रद्युम्नस्य वक्ष इत्यर्थः । भुवनद्वय स्वर्गमर्त्यरूपम् ।

(वि, ज) विसर्परूपामलङ्कृतिमाह—**विसर्प इति** । **समारब्धमिति** । अतीतारम्भप्रदर्शनम् । अनिष्टफलदं कथितमिति शेष । तच्च समारब्धम् । **एकस्येति** । केशेषु गृहीत्वा धृष्टद्युम्नेन हतस्य द्रोणस्य शिरसि छिन्ने क्रुद्धस्य अश्वत्थाम्न उक्तिरियम् । एकस्य दुःशासनेन द्रौपद्या केशग्रहणस्यायं विपाक अखिलक्षत्रिय क्षयकृत्संगर. । द्वितीये मतिपतु. केशग्रह । अत्र केशग्रहारम्भणमनिष्टफलयुक्तम् ।

(वि, झ) उल्लेखाख्यामलङ्कृतिमाह—**कार्य्यदर्शनमिति** । संबोध्यस्य

यथा शाकुन्तले-राजानं प्रति (तापसौ) समिदाहरणाय प्रस्थितावावाम्। इह चास्मद्गुरो कण्वस्य साधिदैवत इव शकुन्तलयानुमालिनीतीरमाश्रमो दृश्यते, न चेदन्यकार्य्यातिपातः प्रविश्य गृह्यतामतिथिसत्कार इति।

उत्तेजनमितीष्यते

स्वकार्य्यसिद्धयेऽन्यस्य प्रेरणाय कठोरवाक् ॥ २२४ ॥

यथा— इन्द्रजिच्चण्डवीर्य्योऽसि नान्यैव बलवानसि।

धिक् धिक् प्रच्छन्नरूपेण युध्यसेऽस्मद्भयाकुल ॥ (ञ)

भर्त्सना तु परीवादः ॥ २२५ ॥

यथा सुन्दराङ्के, (दुर्य्योधन) "धिक् धिक् सूत' किं कृत्वानसि। वत्सस्य मे प्रकृतिदुर्ललितस्य पाप पाप विधास्यति" इत्यादि। (ट)

नीतिः शास्त्रेण वर्त्तनम् ॥ २२६ ॥

यथा शाकुन्तले-(दुष्मन्त) विनीतवेशप्रवेश्यानि तपोवनानीति (ठ)

उक्तस्यार्थस्य यत्तु स्यादुत्कीर्त्तनमनेकधा।

उपालम्भस्वरूपेण तत्स्यादर्थविशेषणम् ॥ २२७ ॥

यथा शाकुन्तले-राजानं प्रति (शार्ङ्गरव) "अहो कथमिदं नाम। किमिदमुपन्यस्तमिति। ननु भवानेव नितरां लोकवृत्तान्तनिष्णात"।

सतीमपि ज्ञातिकुलैकसंश्रया

जनोऽन्यथा भर्तृमतीं विशङ्कते।

कार्य्यप्रदर्शनमित्यर्थः। तापसाविति राज्ञो मृगहननं निर्वार्य्य समिदाहरणाय इत्यूचतुरित्यर्थः। अत्र राज्ञः शकुन्तलाविशिष्टाश्रमप्रवेशरूपकार्य्यप्रदर्शनम्।

(वि, ञ) उत्तेजनाख्यामलङ्कृतिमाह—उत्तेजनमिति। कठोरा परुषा। इन्द्रजित् इत्यादिकम् इन्द्रजितं सम्बोध्य लक्ष्मणस्य परुषवाक्यमिदम्। प्रच्छन्नरूपेण मेघान्तरितवपुषा। अत्र दर्शनरूपस्वकार्य्यसिद्धये इन्द्रजित्प्रेरणाय इयं वाक्।

(वि, ट) परीवादाख्यामलङ्कृतिमाह—भर्त्सनेति। सुन्दरो वेणीसंहारस्थो भीमः। वत्सस्य कर्णपुत्रस्य वृषसेनस्य पाप पापवद्व पाप वधम्। अत्र रथमादाय पलायितस्य सारथेर्भर्त्सना।

(वि, ठ) नीत्याख्यामलङ्कृतिमाह—नीतिरिति। स्पष्टमिदम्

(वि, ड) अर्थविशेषाख्यामलङ्कृतिमाह—उक्तस्यार्थस्येति। पूर्वोक्तस्यार्थस्य उपालम्भविधया यत् अनेकधा उत्कीर्त्तनमित्यर्थः। उत्कीर्त्तनमनुवादः। अहो कथमिदमिति। शकुन्तलां स्वीकर्तुं बहुशो शार्ङ्गरवेणाङ्के राज्ञैव किमिदमुपन्यस्तमिति। उपालम्भविधया शार्ङ्गरवेणैवकथा तदनुवादः क्रियते। किमिदमितीति। अत्र वाच्या बोध्या तदेव अनेकधात्वात्। सतीमपीति। ज्ञाति पितृपक्ष। अन्यथा भागतीं। स्वकुलमिति पितृपक्षे।

अत समीपे परिणेतुरिष्यते
प्रियाप्रिया वा प्रमदा स्वबन्धुभि ॥ (ङ)
प्रोत्साहनं स्यादुत्साहगिरा कस्यापि योजनम् ॥ २२८ ॥

यथा बालरामायणे—

कालरात्रिकरालेयं स्त्रीति किं विचिकित्ससि ।
तज्जगत्त्रितय त्रातु तात ताड्य ताडकाम् ॥ (ढ)
साहाय्यं सङ्कटे यत्स्यात् सानुकूल्यं परस्य च ॥ २२९ ॥

यथा वेण्या कृप प्रति (अश्वत्थामा) त्वमपि तावद्राज्ञ पार्श्ववर्त्ती भव ।
(कृपः) वाञ्छाम्यहमथ प्रतिकर्त्तुमित्यादि । (ण)
अभिमानः स एव स्यात् ॥ २३० ॥ (आ)

यथा तत्रैव (दुर्य्योधन) "मात किमप्यसदृश कृपण वचस्ते" इत्यादि(त)

प्रश्रयादनुवर्त्तनम् ।

अनुवृत्तिः॥ २३१ ॥

यथा शाकुन्तले-राजा (शकुन्तलां प्रति।) अयि तपो वर्द्धते । अनसूया । दाणिं अदिधिविसेसलाहेणेत्यादि । (थ)
भूतकार्याख्यानमुत्कीर्त्तनं मतम् ॥ २३२ ॥

(वि, ढ) प्रोत्साहनाख्यामलङ्कृतिमाह—**प्रोत्साहनमिति**। योजन नियोजन प्रवर्त्तनमित्यर्थ । **कालरात्रीति** । राम प्रति विश्वामित्रस्य वाक्यमिदम् । कालरात्रिवत् कराला भीषणा इय ताडका । विचिकित्ससि त्यजसि ।

(वि, ण) साहाय्याख्यामलङ्कृतिमाह—**साहाय्यमिति** स्पष्टम् ।

(वि, त) अभिमानाख्यामलङ्कृतिमाह-**अभिमान** इति । वाक्यात् योऽभिमान प्रतीयते स एवाभिमानाख्यालङ्कार एव । **मातरिति** । पाण्डवेभ्यो राज्य दातु गान्धार्या उक्ते दुर्योधनस्याभिमानमूलेयमुक्ति ।

(वि, थ) अनुवृत्त्याख्यामलङ्कृतिमाह—**प्रश्रयादिति** । प्रश्रयो विनय । अनुवर्त्तन प्रणयनम् । **अयीति** । अत्र राज्ञोऽनसूयाया परस्पर प्रीणनम् ।

(वि, द) उत्कीर्त्तनाख्यामलङ्कृतिमाह—**भूतेति** । भूतकार्य पूर्ववृत्तम् । न च पूर्वसिद्धार्थकथनात्मक यत् निरुक्तिरूप नाट्यलक्षणमुक्त तद्भेद इति वाच्यम् । तत्र स्वकृतिरूपस्य पूर्वसिद्धार्थस्य निहताशेषकौरव्य इत्यादिना कथनमत्र तु स्वपर साधारणकृतपूर्ववृत्तस्य इति तद्भेद । अत्र आसीदिति पुष्पकेणागमने रणस्थल

(लो, आ) स एव यो भाषित स एवाभिमान एव ।

यथा बालरामायणे—

अत्रासीत् फणिपाशबन्धनविधि शक्त्या भवद्देवरे
गाढ वक्षसि ताडिते हनुमता द्रोणादिरत्राहृत । इत्यादि (द)

याच्ञा तु क्वापि याच्ञा या स्वयं दूतमुखेन वा ॥ २३३ ॥

यथा—अद्यापि देहि वैदेहीं दयालुस्त्वयि राघव ।
शिरोभि कन्दुकक्रीडा किं कारयसि वानरान् ॥ (ध)

परिहार इति प्रोक्त कृतानुचितमार्जनम् ॥ २३४ ॥

यथा—प्राणप्रयाणदु खार्त्त उक्तवानस्म्यनक्षरम् ।
तत् क्षमस्व विभो ! किञ्च सुग्रीवस्ते समर्पित ॥ (न)

अवधीरितकर्त्तव्यकथनं तु निवेदनम् ॥ २३५ ॥

यथा राघवाभ्युदये—(लक्ष्मण) आर्य्य ! समुद्राभ्यर्थनया गन्तुमुद्यतोऽसि, तत्किमेतत् ? (प)

प्रवर्त्तनं तु कार्य्यस्य यत्स्यात् साधुप्रवर्त्तनम् ॥ २३६ ॥

यथा वेण्या—(राजा) कञ्चुकिन् ! देवस्य देवकीनन्दनस्य बहुमानाद् वत्सस्य भीमसेनस्य विजयमङ्गल्याय प्रवर्त्तन्ता तत्रोपचिता समारम्भा ।

आख्यान पूर्ववृत्तोक्तिः ॥ २३७ ॥

सीता दर्शयतो रामस्य वाक्यमिदम् । भवद्देवरे लक्ष्मणे वक्षसि रावणेन शक्त्या गाढ ताडिते सति द्रोणादि गन्धमादनादि अत्र हनुमता आहृत । देवरत्वकथनम् अनुरागोत्पादनाय । दिव्यै लक्ष्मणशरै इन्द्रजित् लोकान्तर प्रापित । हे मृगाक्षि ! राक्षसपते रावणस्य करण्डाटवी केनाप्यत्र कृता अर्थात् मया ।

(वि, ध) याच्ञारूपामलङ्कृतिमाह—**याच्ञेति** । दूतमुखेन वा इत्युक्ते दूत मुखेन याचनोचितवस्तुयाच्ञा लभ्यते । तेन तत् पश्येयमनङ्गमङ्गलगृहमित्यादौ उदाहरणके आशासनाख्यालङ्कारेणैव भेद । अद्यापीत्यादिक रावणेऽङ्गदस्य वाक्यम् । **शिरोभिरिति** । रामच्छिन्नत्वच्छिरोभिरित्यर्थ ।

(वि, न) परिहाररूपामलङ्कृतिमाह—**परिहार इतीति** । **प्राणप्रयाणमिति** । राम प्रति म्रियमाणस्य वालिन उक्तिरियम् ।

(वि, प) निवेदनाख्यामलङ्कृतिमाह—**अवधीरितेति** । अवधीरितम् अवधारणा । तत्र किमेतदित्यर्थ । अवधीरणीयात्र कर्त्तव्यमित्यर्थ ।

(वि, फ) प्रवर्त्तनाख्यामलङ्कृतिमाह—**प्रवर्त्तनं तु** इति । कार्यस्य सम्बन्धि यत् साधुनो मङ्गलस्य प्रवर्त्तन तत् इत्यर्थ । आख्यानरूपामलङ्कृतिमाह—पूर्ववृत्तेत्यिरत्र बोधमूलकत्वेन विशेषणीया । तेन भूतकार्य्याख्यानरूपात् उत्कीर्तनालङ्कारात् भेद

यथा तत्रैव—देश' सोऽयमरातिशोणितजलैर्यस्मिन् हृदाः पूरिता , इत्यादि(फ)

युक्तिरर्थावधारणम् ॥ २३८ ॥

यथा तत्रैव—

यदि समरमपास्य नास्ति मृत्यो-
र्भयमिति युक्तमितोऽन्यत प्रयातुम् ।
अथ मरणमवश्यमेव जन्तो
र्किमिति मुधा मलिन यश वुरध्वम् ॥ (ब)

प्रहर्षः प्रमदाधिक्यं ॥ २३९ ॥

यथा शाकुन्तले—(राजा) तत्किमिदानीमात्मान पूर्णमनोरथ नाभिनन्दामि ? (भ)

शिक्षा स्यादुपदेशनम् ॥ २४० ॥

यथा तत्रैव—"सहि ण उत्त अस्समवासिणो जणस्स अकिदसक्कार अतिथिविसेस उज्झिअ सच्छन्ददो गमण" । (म)

एषा च लक्षण नाट्यालङ्काराणा सामान्यत एकरूपत्वेऽपि भेदेन व्यपदेशो गड्डलिकाप्रवाहेण । (य,इ)

एषु च केषाञ्चित् गुणालङ्कारभावसन्ध्यङ्गविशेषान्तर्भावेऽपि नाटके प्रयत

देशः सोऽयमित्यादि । अथत्यात्र' क्रोधात् पूर्ववृत्तोक्ति ।

(वि, ब) युक्तिरूपामलक्षणमाह—**युक्तिरिति** । हेतुप्रदर्शनेन परेषा कार्यार्थनिश्चायनमित्यर्थ । **यदि समरमिति** । द्रोणस्य मरणेन पलायमानान् वारान् प्रति अश्वत्थाम्न उक्तिरियम् । अत्रोक्तहेतुप्रदर्शनेन युद्धकर्त्तव्यतानिश्चायनम् ।

(वि, भ) प्रहर्षाख्यामलक्षणमाह—**प्रहर्ष** इति स्पष्टम् ।

(वि, म) उपदेशनरूपामलक्षणमाह— **शिक्षेति** । **सहीति** । सखि न युक्तमाश्रमवासिनो जनस्याऽकृतसत्कारमतिथिविशेषमुक्त्वा स्वच्छन्दतो गमनम् ।

(वि, य) **एषां चेति** । लक्षणानि उक्तानि षट्त्रिंशत्, नाट्यालङ्कारा उक्तास्त्रयस्त्रिंशत् । **एकरूपत्वेऽपीति** । लक्षणत्वालङ्कारत्वयोर्विनिगमकाभावाल्लक्षणानामप्यलङ्कारत्वम् अलङ्काराणामपि लक्षणत्वम् इत्येवम् एकरूपत्वसम्भवेऽपीत्यर्थ । **भेदेनेति** । एतानि लक्षणानि, एता अलङ्कृतय इत्येव भेदेन इत्यर्थ । गड्डलिकाप्रवाहोऽनादिरूढो निर्मलो व्यवहार ।

(वि, र) **एषु चेति** । केषाञ्चित् वक्ष्यमाणोपमाव्यतिरेकालङ्कारादिरूपत्वेन तेषु काव्याङ्गेषु केषाञ्चिच्च गुणभावतत्सम्बन्धिव्यञ्यत्वेन तेषु काव्याङ्गेषु अन्तर्भाव-

---

(लो, इ) गड्डरिकाप्रवाहेणेति—यथा गड्डरिका एका अपरा ता चेतरानुवर्त्तन्ते, तासा गतानुगतिकत्वमात्रेण भेद तथा लक्षणनाट्यालङ्कारयोरपीति भाव ।

कर्त्तव्यत्वात्तद्विशेषोक्तिः। (र) एतानि च—

पञ्चसन्धि चतुर्वृत्ति चतु षष्टयङ्गसंयुतम्।
षट्त्रिंशल्लक्षणोपेतमलङ्कारोपशोभितम्।
महारसं (ई) महाभोगमुदात्तरचनान्वितम्।
महापुरुषसञ्चारं साध्वाचारं जनप्रियम्।
सुश्लिष्टसन्धियोगं च सुप्रयोगं सुखाश्रयम्।
मृदुशब्दातिपातं च कविः कुर्यात्तु नाटकम्॥

इति मुनिनोक्तत्वात् नाटकेऽवश्यं कर्त्तव्यान्येव वीथ्यङ्गानि वक्ष्यन्ते। (ल) लास्याङ्गान्याह—

गेयपदं स्थितपाठ्यमासीनं पुष्पगण्डिका।
प्रच्छेदकस्त्रिगूढं च सैन्धवाख्यं द्विगूढकम्।
उत्तमोत्तमकं चान्यदुक्तप्रत्युक्तमेव च।
लास्ये दशविधं ह्येतदङ्गमुक्तं मनीषिभिः॥ २४१॥ (व)

तत्र—

तन्त्रीभाण्डं पुरस्कृत्योपविष्टस्यासने पुरः।
शुष्कं (उ) गानं गेयपदम्॥ २४२॥

यथा गौरीगृहे वीणा वादयन्ती मलयवती—

उत्फुल्लकमलकेसरपरागगौरद्युते! मम हि गौरि!

सम्भवेऽपि इत्यर्थः। **प्रयत्नतः कर्त्तव्यत्वादिति**—कर्त्तव्यता च तत्तत्प्रबन्धौचित्यानुसारेण यथायोग्यमेव न तु सर्वत्रैव सर्वेषामित्यवधेयम्।

(वि, ल) मुक्त्वेति तु एतत् सकलविशिष्टमपि नाटकं कर्तव्यमिति मुनिनोक्तत्वात् तेन सर्वमिदं कर्त्तव्यमित्याह—**पञ्चसन्धि चतुर्वृत्तीत्यादि कुर्यात्तु नाटकमित्यन्तम्**। पञ्चसन्धयो मुखसन्ध्याद्या प्रागुक्ता एव। चतु षष्टयङ्गानि च सन्धीनां प्रागुक्तानि। षट्त्रिंशत् लक्षणानि च नाट्यानां प्रागुक्तानि। अलङ्कारास्त्रयस्त्रिंशत् सम्प्रत्युक्ताः। 'त्रयस्त्रिंशत् प्रयोज्यानि वीथ्यङ्गानि त्रयोदश' इत्युक्तत्वात् त्रयस्त्रिंशदलङ्कारोक्त्यनन्तरं वीथ्यङ्गानां वक्तव्यत्वे प्राप्ते वाथिरूपकनाटकविशेषस्य विशिष्य दर्शितत्वात् दर्शयिष्यमाणतदवसरे वीथ्यङ्गानि वक्ष्यन्ते इत्याह—**वीथ्यङ्गानीति**।

(वि, व) दश लास्याङ्गानि वक्तुमाह—**लास्याङ्गानीति**।

(वि, श) तत्र गेयपदरूपं लास्याङ्गमाह—**तन्त्रीभाण्डेति**। तन्त्रीभाण्डम्

(लो, ई) महारसमिति—रसभावनिरन्तरम्।

(लो, उ) शुष्कम् अनुकरणात्मकम्।

अभिवाञ्छितं प्रसिध्यतु भगवति युष्मत्प्रसादेन ॥ (श)

• स्थितपाठ्यं तदुच्यते ।

मदनोत्तापिता यत्र पठति प्राकृतं स्थिता ॥ २४३ ॥

• अभिनवगुप्तपादास्त्वाहु.—"उपलक्षणं चैतत् । क्रोधोद्भ्रान्तस्यापि प्राकृत-पठनं स्थितपाठ्यमिति ।"

निखिलातोद्यरहितं शोकचिन्तान्विताऽचला ।
सुप्रसारितगात्रं यदासीनासीनमेव च ॥ २४४ ॥ (प)
आतोद्यमिश्रितं गेयं छन्दांसि विविधानि च ।
स्त्रीपुंसयोर्विपर्य्यासचेष्टितं पुष्पगण्डिका ॥ २४५ ॥ (स, ऊ)
अन्यासक्तं पतिं मत्वा प्रेमविच्छेदमन्युना ।
वीणापुरस्सरं गानं स्त्रियाः प्रच्छेदको मतः ॥ २४६ ॥ (ह)
स्त्रीवेशधारिणां पुंसां नाट्यं श्लक्ष्णं त्रिगूढकम् ॥ २४७ ॥ (क)

यथा मालत्यां (मकरन्द.)—एषोऽस्मि मालती संवृत्तः ।

कश्चन भ्रष्टसङ्केतः सुव्यक्तकरणान्वितः ।
प्राकृतं वचनं वक्ति यत्र तत्सैन्धवं विदुः ॥ २४८ ॥

करणं वीणादिक्रिया ।

चतुरस्रपदं (ऋ) गीतं मुखप्रतिमुखान्वितम् ।
द्विगूढं रसभावाढ्यम् ॥ २४९ ॥

उत्तमोत्तमकं पुनः ।

तन्त्र्याश्रया वीणा पुरस्कृत्य प्रधानीकृत्य शुष्कं गान नृत्यहीनगानम् । उत्फुल्लेति—ममाभिवाञ्छितमित्यन्वयः ।

(वि, प) आसीनमङ्गमाह—निखिलातोद्येति । मृदङ्गादिवाद्यरहितम् । शोकयुक्ता वस्त्राच्छादितगात्री यत्तिष्ठति तदासीनमित्यर्थः ।

(वि, स) पुष्पगण्डिकाख्यमङ्गमाह—आतोद्येति । छन्दांसि गद्यपद्यरागाणम् विपर्यासचेष्टाव्यत्यास ।

• (वि, ह) प्रच्छेदाख्यमङ्गमाह—अन्यासक्तमिति । उक्तमन्युना पतिमवज्ञाय वीणापुरस्सरं गानमित्यर्थः ।

(वि, क) त्रिगूढाख्यमङ्गमाह—स्त्रीवेशेति । श्लक्ष्णं मनोहरम् । मकरन्द इति । तेन मालतीप्रतारणाय तद्वल्लभवेशस्य नन्दनप्रतारणाय मालतीवेशधारणात् ।

(वि, ग) द्विगूढाङ्गमाह—चतुरस्रपदमिति । पादचतुष्टयान्वितं गीत-

---

(लो, ऊ) विपर्यासचेष्टितं स्त्रिया· पुरुषस्य चेष्टितं, पुरुषस्य स्त्रीचेष्टितम् ।

(लो, ऋ) चतुरस्रपदं भरतादि प्रसिद्धम् ।

कोपप्रसादजमधिक्षेपयुक्तं रसोत्तरम् ॥ २५० ॥ (ख)
हावहेलान्वितं चित्रश्लोकबन्धमनोहरम् ।
उक्तिप्रत्युक्तिसंयुक्तं सोपालम्भमलीकवत् ।
विलासान्वितगीतार्थमुक्तप्रत्युक्तमुच्यते ॥ २५१ ॥ (ग)

स्पष्टान्युदाहरणानि-

एतदेव यदा सर्वैः पताकास्थानकैर्युतम् ।
अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे ॥ २५२ ॥ (घ, ङ)

एतदेव नाटकम् । यथा बालरामायणम् । अथ प्रकरणम्—

भवेत्प्रकरणे वृत्तं लौकिकं कविकल्पितम् ।
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक् ।
सापायधर्मकामार्थपरो धीरप्रशान्तकः ॥ २५३ ॥ (च)

विप्रनायक यथा मृच्छकटिकम् । अमात्यनायक मालतीमाधवम् । वणिङ्-

मित्यर्थ । तच्च गीत मुखप्रतिमुखसन्ध्योर्गेयमित्यर्थ । उत्तमोत्तमकमङ्गमाह—**उत्तमोत्तमकं पुनरिति** । **कोपेति** । लास्य कदाचित्कोपजत्वात् अधिक्षेपयुक्तम् । कदाचित् प्रसादजत्वात् रसोत्तरमित्यर्थ । **हावहेलेति** । हेलाभिन्नोऽत्र हावो गोवृषन्यायात् हेलाबाहुल्यार्थं तत् ।

(**वि, ग**) उक्तप्रत्युक्तमङ्गमाह—**उक्तिप्रत्युक्तीति** । उपालम्भ उपहास' । स चालीकार्थमुपन्यसेत्याह-**अलीकवदिति** ।

(**वि, घ**) महानाटकाख्य नाटकप्रभेदमाह—**एतदेवेति** । नाटकमेवेत्यर्थ । **सर्वैः पताकास्थानकैरिति** ।

सहसैवार्थसम्पत्तिर्गुणवत्युपचारतः ।
पताकास्थानकमिदं प्रथमं परिकीर्तितम् ॥

इत्यादिभिरुक्तैश्चतुर्भिः पताकास्थानकैरित्यर्थ ।

(**वि, ङ**) नाटकप्रकरणभाणादयो ये रूपकोपरूपकप्रभेदा उत्कीर्तिता "विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्" । इत्युक्तत्वादित्य साङ्गोपाङ्गनाटकलक्षणमुक्त्वा प्रकरणाख्य द्वितीयरूपकमाह—**अथ प्रकरणमिति** । इत्त तज्ज्ञात्व वर्णनीयप्रसङ्ग । तच्च कविनैव कल्पितत्वेन पुराणेषु अदृष्टत्वाल्लौकिकम् । **सापायेति** । शृङ्गारित्वेन कदाचिद्धर्मस्य नायिकाया मानात् कदाचित्कामस्य कामार्थव्यवसायात् अर्थस्य चापायवानित्यर्थ । **धीरप्रशान्त इति** । सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्त" इति । तल्लक्षण प्रागुक्तम् । पुष्पभूषित प्रकरणविशेष ।

(**लो, ङ**) एव नाटकलक्षण गोवलीवर्दन्यायेन भिन्न महानाटकलक्षणम् ।

(**लो, च**) अथ उद्देश्यक्रमेण प्रकरणादीनिरूपयति—**भवेदिति** । लौकिक न तु दिव्य मिश्र वा ।

नायकं पुष्पभूषितम्। (ट)

नायिका कुलजा कापि वेश्या कापि द्वयं क्वचित्।
तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः।
कितवद्यूतकारादिविटचेटकसङ्कुलः ॥ २५४ ॥ (च)

कुलस्त्री पुष्पभूषिते। वेश्या तु रङ्गदत्ते। द्वेऽपि मृच्छकटिके। अस्य नाटकप्रकृतित्वात् शेषं नाटकवत्। अथ भाणः—

भाणः स्याद्धूर्त्तचरितो नानावस्थान्तरात्मकः।
एकाङ्क एक एवात्र निपुणः पण्डितो विटः।
रङ्गे प्रकाशयेत् स्वेनानुभूतमितरेण वा।
सम्बोधनोक्तिप्रत्युक्ती कुर्य्यादाकाशभाषितैः।
सूचयेद् वीरशृङ्गारौ शौर्य्यसौभाग्यवर्णनैः।
तत्रेतिवृत्तमुत्पाद्यं वृत्तिः प्रायेण भारती।
मुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च ॥ २५५ ॥ (छ)

अत्र आकाशभाषितरूपं परवचनमपि स्वयमेवानुवदन्नुत्तरमत्युत्तरे कुर्य्यात्। शृङ्गारवीररसौ च सौभाग्यशौर्य्यवर्णनया सूचयेत्। प्रायेण भारती क्वापि कौशिक्यपि वृत्तिर्भवति। लास्याङ्गानि गेयपदादीनि। उदाहरणं—लीलामधुकरः। (ज) अथ व्यायोगः

ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः।
हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः। (झ)
एकाङ्कश्च भवेदस्त्रीनिमित्तसमरोदयः।
कौशिकीवृत्तिरहितः प्रख्यातस्तत्र नायकः।
राजर्षिरथ दिव्यो वा भवेद्धीरोद्धतश्च सः।
हास्यशृङ्गारशान्तेभ्य इतरेऽत्राङ्गिनो रसाः ॥ २५६ ॥

(वि, च) तेन भेदास्त्रयस्तस्येति। तस्य प्रकरणस्य कुलजा वेश्या तदुभयनायिकाभेदात् भेदत्रयम्। तत्रोभयनायकत्वे तृतीयभेदप्राप्तिमाह—कितवेति।

(वि, छ) भाणाख्यं रूपकमाह—अथेति। नानावस्थेति। नाटकस्यान्तरात्मा नायकः स नानावस्थो यत्र तादृशः। पण्डित एव धूर्त्तो बोध्यः। स्वेन इतरेण वाऽनुभूतार्थमित्यन्वयः। सूचयेदिति। शौर्य्येण वीरम्, सौभाग्येन शृङ्गारम्। सूचयेदित्यर्थः। उत्पाद्यं कविनैव।

(वि, ज) व्याचष्टे—अत्रेति। लीलामधुकरो भाणाख्यरूपकविशेषः।

(लो, झ) प्रकरणाद् भेदो गर्भविमर्शाभावेन।

यथा सौगन्धिकाहरणम्। अथ समवकार —

वृत्तं समवकारे तु ख्यातं देवासुराश्रयम्।
सन्धयो निर्विमर्शास्तु त्रयोङ्कास्तत्र चादिमे।
सन्धी द्वावन्त्ययोस्तद्वदेक एव भवेत्पुनः।
नायका द्वादशोदात्ताः प्रख्याता देवदानवाः।
फलं पृथक् पृथक् तेषां वीरमुख्योऽखिलो रसः।
वृत्तयो मन्दकौशिक्यो नात्र विन्दुप्रवेशकौ।
वीथ्यङ्गानि च तत्र स्युर्यथालाभं त्रयोदश।
गायत्र्युष्णिङ्मुखान्यत्र छन्दांसि विविधानि च। (ऐ)
निश्शृङ्कारस्त्रिकपटः कार्य्यश्चायं त्रिविद्रवः।
वस्तु द्वादशनाडीभिर्निष्पाद्यं प्रथमाङ्कगम्।
द्वितीयेऽङ्के च तिसृभिर्द्वाभ्यामङ्के तृतीयके ॥ २५७ ॥ (ऋ)

नाडिका घटिकाद्वयमुच्यते। विन्दुप्रवेशकौ च नाटकोक्तावपि नेह विधातव्यौ। (ऋ)

तत्र—

धर्मार्थकामैस्त्रिविधः शृङ्गारः कपटः पुनः।
स्वाभाविकः कृत्रिमश्च दैवजो विद्रवः पुनः।
अचेतनैश्चेतनैश्च चेतनाचेतनैः कृतः ॥ २५८ ॥ (ट)

अत्र शास्त्राविरोधेन कृतो धर्मशृङ्गारः। अर्थलाभार्थकल्पित अर्थशृङ्गारः।

(वि, ऋ) व्यायोगाख्य रूपकमाह—**अथे**ति। सौगन्धिकाहरण व्यायोगाख्य-रूपकविशेषः। समवकाराख्य रूपकमाह—**अथे**ति। आदिमेऽङ्के अन्त्ययोरङ्कयोरेक सन्धिरित्यर्थः। मन्दकौशिक्य कौशिक्या एवान्तरविशेषाः। निश्शृङ्कारादिक स्वयमेव व्याख्यास्यति—**वस्तु** इति। प्रथमाङ्कग प्रथमाङ्कबोधनीय वस्तु। घटिकाद्वयात्मक-नाडीद्वादशकैरष्टचत्वारिंशद्गणैर्निष्पाद्य कार्यमित्यर्थः।

(वि, ऋ) व्याचष्टे—**नाडिका** चेति घटिका दण्डद्वयम्।

(वि, ट) तत्र शृङ्गारादिक कारिकया आह—**धर्मार्थे**ति। त्रिकपत्व व्याख्यातु कपटत्रैविध्यमाह—**कपटः पुनरि**ति। त्रिविद्रवत्व व्याख्यातुमाह—**विद्रवः पुनः** इति। कौतुकेन प्रतारणादिविशेषो विद्रवः। स चाचेतनै काष्ठपुत्तलिकादिभिश्चे-तनै प्रहसनकरैश्चेतनाचेतनैश्चेतनत्वेऽपि प्रकृष्टचेतनारहितै पश्वादिभि तद्वच्चयति। गजादिभिरिति तत्र धर्मशृङ्गारादिकमिन्द्रया व्युत्क्रमेण दर्शयति।

(वि, ट) तत्र नायिकानायकयो अर्थलाभार्थ शृङ्गारो वेश्याना धर्माविरोधी

(लो, ऐ) गायत्र्यादीना छन्दसा लक्षणान्याकरेषु बोद्धव्यानि।

प्रहसनशृङ्गार. कामशृङ्गारः । तत्र कामशृङ्गारः प्रथमाङ्क एव । अन्ययोस्त न नियम इत्याहु' । चेतनाचेतना गजादय समवकीर्यन्ते यहवोऽर्थ अस्मिन्निति समवकार । यथा समुद्रमन्थनम् । (ट, ओ)

अथ डिमः—

मायेन्द्रजालसङ्ग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ।
उपरागैश्च भूयिष्ठो डिमः ख्यातेतिवृत्तकः । (ड)
अङ्गी रौद्ररसस्तत्र सर्वेऽङ्गानि रसाः पुनः ।
चत्वारोऽङ्का मता नेह विष्कम्भकप्रवेशकौ ।
नायका देवगन्धर्वयक्षरक्षोमहोरगाः ।
भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः ।
वृत्तयः कैशिकीहीना निर्विमर्शाश्च सन्धयः ।
दीप्ताः स्युः षड्रसाः शान्तहास्यशृङ्गारवर्जिताः ॥ २५६ ॥

अत्रोदाहरणम् "त्रिपुरदाह" इति महर्षि । अथेहामृग —

ईहामृगो मिश्रवृत्तश्चतुरङ्कः प्रकीर्तितः ।
मुखप्रतिमुखे सन्धी तत्र निर्वहणं तथा ।
नरदिव्यावनियमौ नायकप्रतिनायकौ ।
ख्यातौ धीरोद्धतावन्त्यो गूढभावादयुक्तकृत् । (ढ)
दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः ।
शृङ्गाराभासमप्यस्य किञ्चित्किञ्चित्प्रदर्शयेत् ।
पताकानायका दिव्या मर्त्या वापि दशोद्धताः ।

शृङ्गार स्वदारेषु पुस । समवकारपदव्युत्पत्तिमाह–**समवकीर्यन्त** इति ।

(वि, ड) डिमसज्ञक रूपकमाह–**अथेति** । **मायेति** । मायात्मकत्वात् अदृश्यता । इन्द्रजालमलीकनानावस्तुप्रदर्शनम् । सङ्ग्रामक्रोधोद्भ्रान्तादिचेष्टितमिति तत्ततो विशेष । उपराग उपद्रव ।

(वि, ढ) ईहामृगाख्य रूपकमाह–**अथेहेति** । मिश्रवृत्त ख्याताख्यातवृत्तान्तः निर्वहणोपसहृतिरूपसिद्धिरपि तत्रेत्यर्थ । **नरदिव्याविति** । नरौ वा दिव्यौ वा नर दिव्यौ वा नायकप्रतिनायकावित्यर्थ । तयोराद्यो धीर । अन्त्य उद्धत । स च मूढभावात् अयुक्तकारी ।

(वि, ण) दिव्यस्त्रियमनिच्छन्तामिच्छतः शृङ्गाराभासमर्पीत्यन्वय । पताका-

---

(लो, ओ) प्रहसनो हास्ययुक्त प्रथमोद्दिष्टोऽपि धर्मशृङ्गार पश्चाद् विधेयत्वेन पश्चाद् व्याख्यात । अनियमादिति क्वचिद्दिव्य क्वचिन्नरो वा नायक अर्थ-कृतय आरम्भयत्नाद्या ।

युद्धमानीय संरम्भं परं व्याजान्निवर्त्तते ।
महात्मानो वधप्राप्ता अपि वध्या. स्युरत्र नो । (ण)
एकाङ्को दिव्य एवात्र नेतेत्याहुः परे पुनः ।
दिव्यस्त्रीहेतुकं युद्धं नायकाः पण्डितीतरे ॥ २६० ॥

मिश्र रयाताख्यातम् । अन्य प्रतिनायक । पताकानायकास्तु नायकप्रतिनायकयोर्मिलित्वा ता दश । नायको मृगवदलभ्या नायिकामत्र ईहते वान्छतीतीहामृग । यथा कुसुमशेखरविजयादि । (त)

अथाङ्क —

उत्सृष्टिकाङ्क एकोऽङ्को नेतारः प्राकृता नरः ।
रसोऽत्र करुणः स्थायी बहुस्त्रीपरिदेवितम् ।
प्रख्यातमितिवृत्तञ्च कविर्बुद्धया प्रपञ्चयेत् ।
भाणवत् सन्धिवृत्त्यङ्गान्यस्मिन् जयपराजयौ ।
युद्धं च वाचा कर्त्तव्य निर्वेदवचनं बहु ॥ २६१ ॥

इमञ्च केचित् " नाटकान्त पात्यङ्कपरिच्छेदार्थम् उत्सृष्टिकाङ्कनामानम् ।" आहु. । अन्ये तु "उत्क्रान्ता विलोमरूपा सृष्टिर्यत्र" इति उत्सृष्टिकाङ्क । यथा-शर्मिष्ठाययाति । (थ)

नायकव्यापिप्रासङ्गिकवृत्तप्रवर्त्तना नायिका "व्यापि प्रासङ्गिकं वृत्त पताकेत्यभिधीयते" इत्युक्तत्वात् । ते तु दिव्यमर्त्या द्वादश इत्यर्थ । तथा च नायकप्रतिनायकौ द्वौ, पताकानायका दश इति द्वादश । **युद्धमिति** युद्धरूप सरम्भ विक्रम परबलमानीय प्रापय्य व्याजात् निवर्त्तयेत् इत्यर्थ । तत्र हेतुमाह—**महात्मान** इति । तेषा वधानर्हत्वादित्यर्थ । इत्थ नायकप्रतिनायकयोर्दिव्यमर्त्यादित्वात् नियम उक्त ।

(वि, त) अन्ये तु दिव्यैकनायकनियममाहु । अन्ये तु षड्नायकमाहुरित्याह—**एकाङ्को दिव्य** इत्यादि च । पताकानायक इत्यादिक व्याचष्टे—**पताकास्था** इति नायकप्रतिनायकयो सम्बन्धिन पताकास्था नायका मिलिता सङ्गता दश इत्यर्थ ईहामृगव्युत्पत्तिमाह—**नायको मृगवदिति** ।

(वि, थ) उत्सृष्टिकाङ्काख्य रूपकमाह—**अथेति** । बहुस्त्रीणा परिदेवित शोक स्थायिभाव इत्यर्थ । उत्सृष्टिकाङ्कपदार्थं व्याचष्टे—**इमं चेति** । नाटकान्तपातीति नाटकान्तरे द्विन्यायङ्का । अस्य च एकाङ्कत्वेन अङ्कान्तरोत्सङ्गात् अमुम् उत्सृष्टिकाङ्कनामान केचिदाहुरित्यर्थ । अन्ये तु वक्ष्यमाणवीथ्यामपि एकाङ्कसत्त्वात् तस्या अपि उत्सृष्टिकाङ्कत्वापत्ते । तत्पदार्थमन्यथाहुस्तदाह—**अन्ये त्विति** । विलोमेति प्राकृतनायकत्वेन विलोमता ।

अथ वीथी—

वीथ्यामेको भवेदङ्कः कश्चिदेकोऽत्र कल्प्यते ।
आकाशभाषितैरन्यैश्चित्रां प्रत्युक्तिमाश्रितः ।
सूचयेद् भूरिशृङ्गारं किञ्चिदन्यान् रसानपि
मुखनिर्वहणे सन्धी अर्थप्रकृतयोऽखिलाः ॥ २६२ ॥ (द)

कश्चिदित्युत्तमो मध्यमोऽधमो वा । शृङ्गारबहुलत्वाच्चास्या कौशिकीवृत्ति-बहुलत्वम् । (ध)

अस्याख्त्रयोदशाङ्गानि निर्दिशन्ति मनीषिणः ।
उद्घात्यकावलगिते प्रपञ्चस्त्रिगतं छलम् ।
वाक्केल्यधिबले गण्डमवस्यन्दितनालिके ।
असत्प्रलापव्याहारमृदवानि च तानि तु ॥ २६३ ॥

तत्रोद्घात्यकावलगिते प्रस्तावनाप्रस्तावे सोदाहरणे लक्षिते । (न)

मिथो वाक्यमसद्भूतः प्रपञ्चो हास्यकृन्मतः ॥ २६४ ॥ (प,औ)

यथा विक्रमोर्वश्याम्—वडभीस्थविदूषकचेट्योरन्योन्यवचनम् ।

त्रिगतं स्यादनेकार्थयोजनं श्रुतिसाम्यतः ॥ २६५ ॥ (फ)

यथा तत्रैव राजा—

सर्वक्षितिभृतां नाथ ! दृष्टा सर्वाङ्गसुन्दरी ।

(वि, द) वाक्याख्य रूपकमाह—अथेति । कश्चिदेक इत्यत्र नायक इति शेष । अर्थप्रकृतय इति बीज बिन्दु पताका च प्रकरी कार्यमेव इति या पञ्च प्रकृतय प्रागुक्तास्ता अखिला अपि अत्रेत्यर्थः ।

(वि, ध) व्याचष्टे—कश्चिदिति । उत्तमादन्यतरो नायक इत्यर्थ । कौशिक्या वृत्तेरत्र अनुक्तत्वेऽपि भूरिशृङ्गारत्वात् तल्लाभ इत्याह—शृङ्गारबहुलत्वादिति ।

(वि,न) प्रस्तावनाप्रस्तावे इति । "पदानि त्वगतार्थानि तदर्थगतये नरा । योजयन्ति पदैरन्यै स उद्घात्यक उच्यते ॥" इत्युद्घातकलक्षणस्य "यत्रैकत्र समावेशात् कार्यमन्यत् प्रसाध्यते । प्रयोगे सति तद्ज्ञेय नाम्नाऽवलगित बुधै ॥" इति अवलगित-लक्षणस्य च प्रस्तावनाप्रस्तावे उक्तत्वात् ।

(वि, प) प्रपञ्चाख्यमङ्गमाह—मिथ इति—असद्भूतम् अलीकार्थम् अत एव हास्यकृत् ।

(वि, फ) त्रिगताख्यमङ्गमाह—त्रिगतमिति । श्रुतिसाम्यत श्रूयमाणशब्दद्वयसाम्यात् तयोर्वस्तुत एकार्थत्वेऽपि अनेकार्थपरेणाभिनयेनार्थयोर्भेदात् प्रस्तावनेत्यर्थः ।

(वि, च) सर्वक्षितीति—इद हिमालयस्य सम्बोधनम् । मया विरहिता सर्वा-

---

(रो, औ) मिथ असद्भूत वाक्यमिति सम्बन्ध ।

रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया ॥

नेपथ्ये तत्रैव प्रतिशब्द । राजा—कथ दृष्टेत्याह । अत्र प्रश्नवाक्यमेवोत्तरत्वेन योजितम् । नटादित्रितयविषयमेवेदमिति कश्चित् । (ब, अ)

प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य च्छलना च्छलम् ॥ २६६ ॥

यथा वेण्या—भीमार्जुनौ—

कर्त्ता द्यूतच्छलाना जतुमयशरणोद्दीपन (आ)सोऽभिमानी
कृष्णाकेशोत्तरीयव्यपनयनपटु पाण्डवा यस्य दासा ।
राजा दु शासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्र
क्वास्ते दुर्योधनोऽसौ कथयत न रुषा द्रष्टुमभ्यागतौ स्व ॥ (भ)

अन्ये त्वाहुश्छलं किञ्चित् कार्यमुद्दिश्य कस्यचित् ॥ २६७ ॥
उदीर्यते यद्वचनं वञ्चनाहास्यरोषकृत् ।
वाक्केलिहास्यसम्बन्धो द्विर्निप्रत्युक्तितो भवेत् ॥ २६८ ॥ (म)

द्विर्नीत्युपलक्षण यथा—

भिक्षो ! मांसनिवेपण प्रकुरुषे, किं तेन मद्य विना
मद्य चापि तव प्रिय प्रियमहो वाराङ्गनाभि सह ।

ङसुन्दरी रामा उर्वशी रम्येऽस्मिन् वनान्ते त्वया दृष्टा इति प्रश्न । कथ दृष्टा इत्याह—त्वया विरहिता मया दृष्टेति प्रतिशब्दार्थस्य योजनादर्शनोत्तरणशब्दयोरेकार्थत्वेऽपि दर्शितरीत्या प्रश्नोत्तरभावेन योजनादनेकार्थता, तद् व्याचष्टे—**अत्र प्रश्नेति** । नटनटी-सूत्रधारत्रयप्रयोज्यत्वेनाऽस्य त्रिगतत्व केचित् व्याचक्षते, तदाह—**नटादीति** ।

(**वि, भ**) छलाख्यमङ्गमाह—**प्रियाभैरिति** । विलोभ्य प्रतार्य छलनादुपहसनात् । **कर्त्तेति**—पलायितु दुर्योधनमन्विष्यतो भीमार्जुनयोर्वाक्यमिदम् । द्यूतच्छलादिकर्तृत्वविशिष्टो यस्त द्रष्टुमागतौ स्व न तु रुषा इत्यन्वय । शरण गृहम् । दु शासनादेरनुजशतस्य गुरुरित्यन्वय । अङ्गराजस्य कर्णस्य । अत्र द्रष्टुमेव न रुषेति प्रियाभेन वाक्येन प्रतार्य उपहसनम् ।

(**वि, म**) **अन्ये** इति । कस्यचित् किञ्चित् कार्यमुद्दिश्य इत्यन्वय । वाक्केलिरूपम् अङ्गमाह—**वाक्केलीति** ।

(**वि, य**) **भिक्षो** इति । परिहासाय मास भक्षन्त भिक्षु प्रति भिक्षो इत्यादिर्गृहिण प्रश्न । किं तेन इति भिक्षो प्रयुत्तरम् । मद्य चापि इत्यादिक

(**लो, अ**) क्षितिभृता पर्वतानां राज्ञाच । मया विरहिता त्वया दृष्टा, पक्षे त्वया विरहिता मया दृष्टा । अत्र राज्ञा प्रथमार्थाभिप्रायेण प्रश्नरूपार्थं वाक्यमिदमुक्त्वा पर्वते प्रतिध्वनिमात्रमेवार्थे द्वितीयार्थे पर्वतस्योत्तरत्वेनावगतो विरहोन्मादात् ।

(**लो, आ**) शरण गृहम् ।

वेश्याप्यवोचि कुतस्तव धन द्यूतेन चौर्येण वा
चौर्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य कान्या गति ॥ (य)

केचित् प्रकान्तवाक्यस्य साकाङ्क्षस्यैव निर्वृत्तिर्वाक्येतिरित्याहु, अन्ये च अनेकस्य प्रश्नस्यैकमुत्तरम्। (र)

अन्योन्यवाक्याधिक्योक्ति स्पर्द्धयाधिबलं मतम् ॥ २६९ ॥

यथा मम प्रभावत्यां यज्ञनाम.—

अस्य वक्ष क्षणेनैव निर्मथ्य गदयानया
लीलयोन्मूलयिष्यामि भुवनद्वयमद्य च ।

प्रद्युम्न ! अरे रे असुरापसद ! अलममुना बहुप्रलापेन, मम खलु—

अद्य प्रचण्डभुजदण्डसमर्पितोरु-
कोदण्डनिर्गलितकाण्डसमूहपातै ।
आस्ता समस्तदितिजक्षतजोक्षितेयं
क्षौणि क्षणेन पिशिताशनलोभनीया ॥ (ल)

गण्डं प्रस्तुतसम्बन्धि भिन्नार्थं सत्वर वच. ॥ २७० ॥

यथा वेण्या, राजा—

अध्यासितु तव चिराज्जघनस्थलस्य
पर्याप्तमेव करभोरु ! ममोरुयुग्मम् ।

अनन्तर प्रविश्य 'कञ्चुकी' देव ! भग्न भग्नमित्यादि "। अत्र रथकेतन-

---

गृह्यते । प्रियमहो वेश्याङ्गनाभिरित्यादिक भिक्षो । अन्याधिक्यस्याप्यकार्यस्य सत्वे अल्पकार्यप्रश्नात् अहो इत्युक्तम् । वेश्यापात्यादि धनमित्यन्त गृह्यते । द्यूतेनेत्यादिक भिक्षो । चौर्यत्यादिक गृह्यते । नष्टस्येत्यादिक भिक्षो प्रयुक्ति ।

(वि, र) केचिदिति—आकाङ्क्षोत्थापकप्रकान्तवाक्यस्य तदानिवृत्तौ तन्निव र्तकवाक्यायुक्ति ।

(वि, ल) अधिकत्वस्यमङ्गमाह—अन्योन्येति । अस्य वक्ष इत्यादिक प्राग व्याख्यातम् । अद्य प्रचण्डेति । अद्य मम प्रचण्डे भुजदण्डे समर्पितो य उरु कोदण्डस्ततो निर्गलिताना काण्डाना बाणाना समूहस्य (सहस्रस्य वा पाठ-भेदात्) पातैरियं क्षौणी क्षणेन समस्तदैत्यक्षतजै उक्षिता सती पिशिताशनाना लोभनीया आस्तामित्यन्वय ।

(वि, च) गण्डाख्यमङ्गमाह—गण्डमिति । सत्वरेणोक्तत्वात् सत्वर भिन्नार्थं वचो यत् प्रस्तुतस्य प्रकान्तस्य वर्णन तत् सम्बन्धितया प्रतीयते, यथा । राजा दुर्योधन । करभोरु इति भानुमत्या सम्बोधनम् । जघनस्थलस्याध्यासितुम् अध्यासनाय इत्यर्थ । भावे तुम् योगात् षष्ठी । पर्याप्त योग्यम् । अत्र प्रकान्तस्य ऊरोर्भङ्गप्रतीति-रित्याह—अत्रेति ।

भङ्गार्थं वचनमूरभङ्गार्थे सम्बन्धे सम्बद्धम्। (च)

व्याख्यानं स्वरसोक्तस्यान्यथावस्यन्दितं भवेत् ॥ २७१ ॥

यथा ढलितरामे-सीता-जाद कल्ल क्खु अम्होज्झा पुण गन्तव्व तहि सो राआ विणएण पणइदव्वो। लव। अथ किमावाभ्यां राजोपजीविभ्यां भवितव्यम्? सीता। जाद सो क्खु तुह्माण पिदा। लव। किमावयो रघुपतिः पिता। सीता। (सातङ्कम्) मा अण्णधा सङ्कध। ण क्खु तुह्माण सअलाए ज्जेव पुहवीए त्ति।" (श)

प्रहेलिकैव हास्येन युक्ता भवति नालिका ॥ २७२ ॥

सवरणकार्य्युत्तर प्रहेलिका। यथा रत्नावल्या सुसङ्गता। सहि! जस्स किदे तुम आअदा सो इध जेव चिट्ठदि। सागरिका। कस्स किदे अह आअदा? सुस। ण चित्तफलअस्स। अत्र त्व राज्ञ कृते आगतेत्यर्थे सवृत्त। (प)

असत्प्रलापो यद्वाक्यमसम्बद्धं तथोत्तरम्।
अगृह्णतोऽपि मूर्खस्य पुरो यच्च हितं वचः ॥ २७३ ॥ (स)

तत्राद्य यथा मम प्रभावत्या-प्रद्युम्न-(सहकारवल्लीमवलोक्य सानन्दम्।) अहो कथमिहैव।

अलिकुलमञ्जुलकेशी परिमलबहुला रसावहा तन्वी।

(वि, श) अवस्यन्दिताख्यमङ्गमाह—व्याख्यानमिति। स्वरसोक्तस्य वक्तृभावेन उक्तस्य धातुरस्वरसात् यदन्यथा व्याख्यान तदवस्यन्दितमित्यर्थ। जादेत्यादि। लवकुशौ प्रति सीताया उक्ति। जात! कल्य खलु युवाभ्यामयोध्याया गन्तव्यम्। तत्र स राजा विनयेन प्रणमितव्य (इति सस्कृतम्)। जादेति। जात स खलु युवयो पिता (इति सस्कृतम्)। सातङ्कमिति। वाल्मीकिनिषेधात् आतङ्क। मा अरण्य धा इति, मा अन्यथा शङ्केथाम्। न खलु युवयो किं तु सकलाया एव पृथिव्या इति (इति सस्कृतम्) पृथिव्या इत्यत्र पृथिवीस्थलोकस्य इत्यर्थ। अत्र पितेति जनकपरतया सीतया स्वरसोक्तस्य लब्धावस्यन्दनात् तया एव बालकतया व्याख्यान कृतम्।

(वि, प) नालिकाख्यमङ्गमाह—प्रहेलिकेति। सवरणमारीति व्याख्यानस्पाङ्गेऽपि सवरणरूपस्य मुख्येऽप्यत्र हास्ययुक्तत्व विशेष। सहि जस्सेति—सखि यस्य कृते त्वमागता सोऽत्रैव तिष्ठतीति सस्कृतम्। कस्सेति। कस्य कृते अहमागता (इति सस्कृतम्) ण चित्तेति। ननु चित्रफलस्य (इति सस्कृतम्)

(वि, स) त्रिविधमसत्प्रलापाख्यमङ्गमाह—असदिति। असम्बद्धमलीकारोप्यमाणार्थकं वाक्यमुत्तरञ्च तादृशमित्यर्थ। तृतीयमसत्प्रलापाख्यमङ्गमाह—अगृह्णतोऽपीति। हित वचोऽगृह्णतोऽपि मूर्खस्येत्यन्वय।

(वि, ह) अलिकुलेति—चूतलतिकाया प्रभावतीभ्रमादियमुक्ति। इहैव

किसलयपेशलपाणि कोकिलकलभाषिणी प्रियतमा मे ॥

एवमसम्बद्धोत्तरेऽपि । तृतीय यथा वेण्या-दुर्योधन प्रति गान्धारीवाक्यम् (ङ)

व्याहारो यत् परस्यार्थे हास्यलोभकरं वचः ॥ २७४ ॥

यथा मालविकाग्निमित्रे-(लास्यप्रयोगावसाने मालविका निर्गन्तुमिच्छति।) विदूषक । मा दाव उपदेशमुद्धा गमिस्ससि (इत्युपक्रमेण) गणदास । (विदूषक प्रति) आर्य्य ! उच्यता यस्त्वया क्रमभेदो लक्षित । विदूषक । पढम बम्हणपूआ भोदि, सा इमाए लङ्घिदा । (मालविका स्मयते) इत्यादिना नायकस्य विशुद्धनायिकादर्शनप्रयुक्तेन हासलोभकारिणा वचसा व्याहार । (क)

दोषा गुणा गुणा दोषा यत्र स्युर्मूढवं हि तत् ॥ २७५ ॥

क्रमेण यथा—

प्रियजीवितता क्रौर्यं नि स्नेहत्व कृतघ्नता ।

चूतलतिकेति । कैव प्रभावती कीदृशी ? अलिकुलम् एव मञ्जुला केशा यस्यास्तादृशी, किसलयमेव पेशलपाणिर्यस्यास्तादृशी । कोकिलपदमत्र तद्भाषापरम् । तथा च तद्भाषारूपविभाषावतीत्यर्थ । न तु कोकिलवद्भाषणशाला इत्यर्थ । तदाभेद-भाषणात् अभेदारोपानुपपत्ते । अत्र च आहार्यारोपाभावात् न रूपक किन्तु वास्तवभ्रमात् भ्रान्तिमदलङ्कार एव । **एवमसम्बद्धोत्तरेष्वपी**ति । तत्र यथा मम—

द्विज. शाखायुक्तस्त्वयि कृतकथ कोकिल इति
त्वयाख्येय मन्दे मयि विरहिपाते कियदघम् ।
इति प्रश्ने वायोर्मुकुलपुलका चूतलतिका
धुव धृत्वा मौलिं न खलु कियदित्युत्तरयति ॥

अत्र हि वातधूतमौलिकाया चूतलतिकाया मन्दवायोः कति पापप्रश्ने मौलि धूननेन पापभावोत्तरारोप । वायो प्रश्नप्रकार पूर्वार्द्धार्थ । पूर्वप्राप्तपापव्यवस्थके जने एव तादृशप्रश्नौचित्यादित्याह—द्विज इति । शाखायुक्तविटपस्थितो द्विज पक्षी । कोकिल एव दृपदामन्त्रस्य ऋषि कोकिलनाम वेदशाखायुक्तो द्विज स त्वयि कृतकथ इत्यतस्त्वया मन्दे वेदरहिते इदमप्याख्येयम् । विरहिवधे कियत् पापमिति प्रश्न । मन्दवायो कामोद्दीपकत्वेन विरहिहन्तृत्वात् अय प्रश्न । व्यवस्थाकथने हर्षात्पुलक । तृतीय यथा वेण्या दुर्योधन प्रति गान्धार्या हितवाक्यम् । अथवा प्रदीयता दाशरथये मैथिलीति रावण प्रति विभीषणस्य वाक्यभेदमपि बोध्यम् ।

(वि, क) व्याहाररूपक्रमकमाह—**व्याहार** इति । लास्यावसाने नृत्यसमाप्तौ । **मा दाव** इति । मा तावदुपदेशमुग्धा गमिष्यसीति (संस्कृतम्) । उपदेश शास्त्रोप देश । तद्विसमुग्धा तत्रैरुद्धकारिणी भूत्वा इति शेष । **पढममिति** । प्रथम ब्राह्मणपूजा भवति सा अनया लङ्घिता । (इति सं०)। अत्र परस्य राज्ञो लाभार्थं हास्यकर विदूषकस्य वाक्यमाह—

भूयस्त्वदर्शनादेव ममैते गुणता गता ॥
तस्यास्तद्रूपसौन्दर्य्यं भूषित यौवनश्रिया।
सुखकायतन जात दु खायेव ममाधुना ॥

इति चाङ्गानि नाटकादिषु सम्भवन्त्यपि वीथ्यामवश्य विधेयानि। निस्पष्टतया नाटकादिषु विनिविष्टान्यपीहोदाहृतानि। वीथीव नानारसाना चात्र मालारूपतया स्थितत्वाद्वीथीयम्। यथा मालविका।

अथ प्रहसनम्—

भाणवत्सन्धिसन्ध्यङ्गलास्याङ्गाङ्कैर्विनिर्मितम्।
भवेत्प्रहसन वृत्त निन्द्याना कविकल्पितम्।
अत्र नारभटी नापि विष्कम्भकप्रवेशकौ।
अङ्गी हास्यरसस्तत्र वीथ्यङ्गाना स्थितिर्न वा ॥ २७६ ॥

तत्र—

तपस्विभगवद्विप्रप्रभृतिष्वत्र नायक।
एको यत्र भवेद्धृष्टो हास्य तच्छुद्धमुच्यते ॥ २७७ ॥

यथा कन्दर्पकेलि।

आश्रित्य कञ्चन जन सङ्कीर्णमिति तद्विदु ॥ २७८ ॥

यथा धूर्तचरितम्।

वृत्त बहूना धृष्टाना सङ्कीर्ण केचिदूचिरे।
तत्पुनर्भवति द्यङ्कमथवैकाङ्कनिर्मितम् ॥ २७९ ॥

यथा लटकमेलकादि। मुनिस्त्वाह—

"वेश्याचेटनपुसकविटधूर्ता वन्धकी च यत्र स्यु।
अविकृतवशपरिच्छदचेष्टितकरणन्तु सङ्कीर्णम्॥" इति।

विकृतन्तु विदुर्यत्र पण्डकञ्चुकितापसा।
भुजङ्गचारणभटप्रभृतेर्वेशवाग्युता ॥ २८० ॥

इद तु सङ्कीर्णेनैव गतार्थमिति मुनिना पृथग् नोक्तम्।

अथोपरूपकाणि। तत्र—

नाटिका कल्पितवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृप।
स्यादन्त पुरसम्बन्धा सङ्गीतव्यापृताऽथवा।
नवानुरागा कन्यात्र नायिका नृपवशजा।
सम्प्रवर्त्तेत नेतास्या देव्यास्त्रासेन शङ्कित।
देवी पुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवशजा।

पदे पदे मानवती तदृशः सङ्गमो द्वयोः ।
वृत्तिः स्यात् कौशिकी स्वल्पविमर्शाः सन्धयः पुनः ॥ २८१ ॥

द्वयोर्नायिकानायकयोः । यथा रत्नावलीविद्धशालभञ्जिकादि ।

अत्र त्रोटकम्—

सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम् ।
त्रोटकं नाम तत्प्राहुः प्रत्यङ्कं सविदूषकम् ॥ २८२ ॥

प्रत्यङ्कसविदूषकत्वादेवात्र शृङ्गारोऽङ्गी । सप्ताङ्कं यथा स्तम्भितरम्भम् । पञ्चाङ्कं यथा-विक्रमोर्वशी । अथ गोष्ठी—

प्राकृतैर्नवभिः पुंभिर्देशभिर्वाप्यलङ्कृता ।
नोदात्तवचना गोष्ठी कौशिकीवृत्तिशालिनी ।
हीना गर्भविमर्शाभ्यां पञ्चषड्योपिदन्विता ।
कामशृङ्गारसंयुक्ता स्यादेकाङ्कविनिर्मिता ॥ २८३ ॥

यथा रैवतमदनिका । अथ सट्टकम्—

सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकम् ।
न च विष्कम्भकोप्यत्र प्रचुरश्चाद्भुतो रसः ।
अङ्का जवनिकाख्याः स्युः स्यादन्यन्नाटिकासमम् ॥ २८४ ॥

यथा कर्पूरमञ्जरी । अथ नाट्यरासकम्—

नाट्यरासकमेकाङ्कं बहुताललयस्थिति ।
उदात्तनायकं तद्वत् पीठमर्दोपनायकम् ।
हास्योऽङ्गं यत्र सशृङ्गारो नारी वासकसज्जिका ।
मुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च ।
केचित् प्रतिमुखं सन्धिमिह नेच्छन्ति केवलम् ॥ २८५ ॥ (ङ)

तत्र सन्धिद्वयवती यथा-नर्मवती । सन्धिचतुष्टयवती यथा-विलासवती । अथ प्रस्थानम् ।

प्रस्थाने नायको दासो हीनः स्यादुपनायकः ।
दासी च नायिका वृत्तिः कौशिकी भारती तथा ।
सुरापानसमायोगादुद्दिष्टार्थस्य संहृतिः ।
अङ्गौ द्वौ लयतालादिर्विलासो बहुलस्तथा ॥ २८६ ॥

यथा शृङ्गारतिलकम् । अथोल्लाप्यम्—

उदात्तनायकं दिव्यवृत्तमेकाङ्कभूषितम् ।

(ङ, ङ) ताल चच्चत्पुटादि । पीठमर्दोऽनेनोक्तप्रकार. । गीत भरतादि प्रसिद्धम् ।

शिल्पकाङ्गैर्युतं हास्यशृङ्गारकरुणै रसैः ।
उल्लाप्यं बहुसङ्ग्राममस्त्रगीतिमनोहरम् ।
चतस्रो नायिकास्तत्र त्रयोऽङ्का इति केचन ॥ २८७ ॥

शिल्पकाङ्गानि वक्ष्यमाणानि । यथा देवीमहादेवम् । अथ काव्यम् ।

काव्यमारभटीहीनमेकाङ्कं हास्यसङ्कुलम् ।
खण्डमात्रा (ई) द्विपदिकाभग्नतालैरलङ्कृतम् ॥ २८८ ॥
वर्णमात्राच्छलिकायुतं शृङ्गारभाषितम् ।
नेता स्त्री चाप्युदात्तात्र सन्धी आद्यौ तथान्तिमः ॥ २८९ ॥

यथा—यादवोदयः । अथ प्रेङ्खणम्—

गर्भविमर्शरहितं प्रेङ्खणं हीननायकम् ।
असूत्रधारमेकाङ्कमविष्कम्भप्रवेशकम् ।
नियुद्धसम्फेटयुतं सर्ववृत्तिसमाश्रितम् । (ङ)
नेपथ्ये गीयते नान्दी तथा तत्र प्ररोचना ॥ २९० ॥

यथा वालिवधः । अथ रासकम्—

रासकं पञ्चपात्रं स्यान्मुखनिर्वहणान्वितम् ।
भाषाविभाषाभूयिष्ठं (ऊ) भारतीकौशिकीयुतम् ।
असूत्रधारमेकाङ्कं सवीथ्यङ्ककलान्वितम् ।
श्लिष्टनान्दीयुतं ख्यातनायिकं मूर्खनायकम् ।
उदात्तभावविन्याससंश्रितं चोत्तरोत्तरम् ।
इह प्रतिमुखं सन्धिमपि केचित् प्रचक्षते ॥ २९१ ॥

यथा मेनकाहितम् । अथ संलापकम्—

संलापकेऽङ्काश्चत्वारस्त्रयो वा नायकः पुनः ।

(लो, ई)खण्डमात्रादय आकरेषु बोद्धव्या । आद्यौ मुखप्रतिमुखे । अन्तिमो निर्वहणम् ।

(लो, उ) नियुद्धं बाहुयुद्धम् । सम्फेटो रोषभाषणम् ।

(लो, ऊ) भाषेति—भाषाविभागे यथा—भाषार्णवे—

"भाषा मध्यमपात्राणां नाटकादौ विशेषतः ।
महाराष्ट्री सौरसेनीयुक्ता भाषा द्विधा बुधैः ।
हीनैर्भाष्या विभाषा स्यात् सा च सप्तविधा स्मृता ।
प्राच्यावन्ती मागधी च शाकारी च तथापरा ।
चाण्डाली शाबरी चैव तथा भीरीति भेदतः ॥"

पाषण्डः स्याद्रसस्तत्र शृङ्गारकरुणेतरः ।
भवेयुः पुरसंरोधच्छलसंग्रामविद्रवाः ।
न तत्र वृत्तिर्भवति भारती न च कौशिकी ॥ २६२ ॥

यथा मायाकापालिकम् । अथ श्रीगदितम्—

प्रख्यातवृत्तमेकाङ्कं प्रख्यातोदात्तनायकम् ।
प्रसिद्धनायिकं गर्भविमर्शाभ्यां विवर्जितम् ।
भारतीवृत्तिबहुलं प्रीतिशब्देन संयुतम् ।
मतं श्रीगदितं नाम विद्वद्भिरुपरूपकम् ॥ २६३ ॥

यथा क्रीडारसातलम्—

श्रीरासीना श्रीगदिते गायेत्किञ्चित्पठेदपि ।
एकाङ्को भारतीप्राय इति केचित्प्रचक्षते ॥ २६४ ॥ (ख)

उक्तमुदाहरणम्

अथ शिल्पकम्—

चत्वारः शिल्पकेऽङ्काः स्युश्चतस्रो वृत्तयस्तथा ।
अशान्तहास्याश्च रसा नायको ब्राह्मणो मतः ।
वर्णनात्र श्मशानादेर्हीनः स्यादुपनायकः ।
सप्तविंशतिरङ्गानि भवन्त्येतस्य तानि तु ।
आशंसा-तर्क-संदेह-तापोद्वेगप्रसक्तयः ।
प्रयत्नग्रथनोत्कण्ठावहित्थाप्रतिपत्तयः ।
विलासालस्यवाष्पाणि प्रहर्षाश्वासमूढताः ।
साधनानुगमोच्छ्वासविस्मयप्राप्तयस्तथा ।
लाभविस्मृतिसम्फेटा वैशारद्यं प्रबोधनम् ।
चमत्कृतिश्चेत्यमीषां स्पष्टत्वाल्लक्ष्म नोच्यते ॥ २६५ ॥ (ग)

सम्फेटग्रथनयोः पूर्वमुक्तत्वादेव लक्ष्म सिद्धम् । यथा कनकावतीमाधवः ।

अथ विलासिका—

शृङ्गारबहुलैकाङ्का दशलास्याङ्गसंयुता ।
विदूषकविटाभ्याञ्च पीठमर्देन भूषिता ।
हीना गर्भविमर्शाभ्यां सन्धिभ्यां हीननायका ।

(वि, घ) श्रीगदिताख्यमुपरूपकमाह—अथेति । प्रीतिशब्देन प्रीतिजनकशब्देन । श्रीरासीनेति । श्रीः लक्ष्मीः । आसीना प्रविष्टा ।

(वि, ग) शिल्पकाख्यमुपरूपकमाह—अथेति । हीन इति । निकृष्टजनोऽत्र सहायः । अस्याशंसादयङ्गान्युद्दिश्य तल्लक्षणोदाहरणे स्पष्टत्वादुपेक्षिते ।

(वि, घ) विलासिकाख्यमुपरूपकमाह—अथेति ।

स्वल्पवृत्ता सुनेपथ्या विख्याता सा विलासिका ॥ २६६ ॥

केचित्त्वत्र विलासिकास्थाने "लासिका" इति पठन्ति । तस्यास्तु, "दुर्मल्लिकायामन्तर्भाव" इत्यन्ये ॥ (घ)

अथ दुर्मल्लिका—

दुर्मल्ली चतुरङ्का स्यात् कौशिकी भारती तथा ।
अगर्भा नागरनरा न्यूननायकभूषिता ॥
त्रिनालिः प्रथमोऽङ्कोऽस्यां विटक्रीडामयो भवेत् ।
पञ्चनालिर्द्वितीयोङ्को विदूषकविलासवान् ॥
षण्णालिकस्तृतीयस्तु पीठमर्दविलासवान् ।
चतुर्थो दशनालि. स्यादङ्क. क्रीडितनायक. ॥ २६७ ॥ (ङ)

यथा—विन्दुमती ।

अथ प्रकरणिका—

नाटिकैव प्रकरणी सार्थवाहादिनायका ।
समानवंशजा नेतुर्भवेद् यत्र च नायिका ॥ २६८ ॥ (च)

मृग्यमुदाहरणम् ।

अथ हल्लीश —

हल्लीश एक एवाङ्कः सप्ताष्टौ दश वा स्त्रिय ।
वागुदात्तैकपुरुष. कौशिकीवृत्तिसङ्कुल. ॥
मुखान्तिमौ तथा सन्धी बहुतालल्यस्थिति. ॥२६६॥ (छ)

यथा केलिरैवतकम् ।

अथ भाणिका—

भाणिका रूक्षणनेपथ्या मुखनिर्वहणान्विता ।
कौशिकीभारतीवृत्तियुक्तैकाङ्कविनिर्मिता ॥
उदात्तनायिका मन्दपुरुषाऽत्राङ्कसप्तकम् ।
उपन्यासोऽथ विन्यासो विबोधः साध्वसं तथा ।

(वि, ङ) दुर्मल्लिकाख्यमुपरूपकमाह—अथेति । अगर्भा गर्भसन्धिरहिता । नागरनरा नागरपात्राणि । नायको निकृष्ट । त्रिनालि नालिकात्रयसाध्य । एव मुत्तरत्र । विटक्रीडा, धूर्तक्रीडा ।

(वि, च) प्रकरणिकाख्यमुपरूपकमाह—अथेति । नाटिकैवेति । नाटिका-लक्षणाक्रान्तैवेत्यर्थ । सार्थवाहा पथिका । आदिशब्दात् प्रवासिनश्च ।

(वि, छ) हल्लीशाख्यमुपरूपकमाह—अथेति । मुखेति—मुखनिर्वहण सन्धिद्वयवती ।

(वि, ज) भाणिकाख्यमुपरूपकमाह—अथेति । मन्दो निकृष्ट । अस्य

समर्पणं निवृत्तिश्च संहार इति सप्तमः ॥
उपन्यासः प्रसङ्गेन भवेत्कार्यस्य कीर्त्तनम् ।
निर्वेदवाक्यव्युत्पत्तिर्विन्यास इति स स्मृतः ॥
भ्रान्तिनाशो विबोधः स्यान्मिथ्याज्ञानन्तु साध्वसम् ।
सोपालम्भवचः कोपपीडयेह समर्पणम् ॥
निदर्शनस्योपन्यासो निवृत्तिरिति कथ्यते ।
संहार इति च प्राहुर्यत्कार्यस्य समापनम् ॥ ३०० ॥

स्पष्टान्युदाहरणानि । यथा कामदत्ता । एतेषां सर्वेषां नाटकप्रकृतिकत्वेपि यथौचित्यं यथालाभ नाटकोक्तविशेषपरिग्रहः । यच्च नाटकोक्तस्यापि पुनरुपादानं तत्र तत्सद्भावस्य नियम. । (ज)

अथ श्रव्यकाव्यानि—

श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यमयं द्विधा ॥ ३०१ ॥ (झ)

तत्र पद्यमयान्याह—

छन्दोवद्धपदं पद्यं तेनैकेन च मुक्तकम् ।
द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते । (ञ)
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ॥ ३०२ ॥

तत्र मुक्तकं यथा मम—

सान्द्रानन्दमनन्तमव्ययमज यत् योगिनोपि क्षण
साक्षात्कर्तुमुपासते प्रतिमुहुर्ध्यानैकताना परम् ।
धन्यास्तां मथुरापुरीयुवतयस्तद्ब्रह्म या कौतुका-
दालिङ्गन्ति समालपन्ति शतधा कर्षन्ति चुम्बन्ति च ॥ (ट)

कार्याण्याह—**उपन्यास** इत्यादि । तेषा लक्षणान्याह—**उपन्यास** इति । निर्वेदवाक्यस्य व्युत्पत्तिर्विन्यास , सा च विन्याससज्ञिका । कोपपीडयोपालम्भवच. समर्पणाख्य कार्यमित्यर्थ । निदर्शनस्य दृष्टान्तस्योपन्यास इत्यर्थ । कार्यस्य समापनम्—मुख्यकार्यावान्तरकार्यस्येत्यर्थ । एषा कार्याणा सर्वनाटकेष्वेवौचित्यात्सर्वनाटकानामेवैतत्कार्यत्वमाह—**एषामिति** । नाटकोक्तविशेषे परिग्रह इति विग्रह । तथा च भाणिकोक्तकार्यस्य नाटकान्तरेपि दातव्यमुक्तम् । **यच्चेति** । नाटके हि पञ्चत्रिंशल्लक्षणालङ्कारादयश्चोक्ता । तदुक्तवस्तुनो यच्च पुनरुपादान नाटकान्तर इति बोध्यम् । **तत्सद्भावस्येति**—तत्सद्भावस्य तत्रावश्यकतारूपनियम इत्यर्थ ।

(वि, झ) **श्रव्यकाव्यानीति** । तत्प्रभेदद्वयमाह—**पद्यगद्यमिति** ।

(वि, ञ) द्वाभ्यामित्यादिचतुर्षु परस्परैकवाक्यतापन्नत्वे सतीति बोध्यम् ।

(वि, ट) **सान्द्रानन्दमिति**—यत्परं ब्रह्म क्षणमपि साक्षात्कर्तुं

युग्मकं यथा मम—

किं करोषि करोपान्ते कान्ते ! गण्डस्थलीमिमाम् ।
प्रणयप्रवणे कान्तेऽनैकान्ते नोचिता त्रुध ॥
इति यावत् वुरङ्गाक्षीं वक्तुमीहामहे वयम् ।
तावदाविरभूच्चूते मधुरो मधुपध्वनि ॥ (ठ)

एवमन्यत्रापि । (ड)

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ।
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ॥
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः ।
इतिहासोद्भवं वृत्तमन्यद् वा सज्जनाश्रयम् ॥ (ढ)
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत् ।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ॥
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम् ।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ॥
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह ।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ॥
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।
सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः ॥

ध्यानैकताना ध्यानमात्रावस्थिता योगिन प्रतिमुहुरुपासते तद्वन्न या मथुरापुरयुवतय कौतुकादालिङ्गन्तीत्यादि ता धन्या ।

(वि, ठ) मानिन्या मानभङ्गप्रकारं सख्यौ कथयन्नाह—**किं करोषीत्यादि** । हे कान्ते ! करोपान्ते इमा गण्डस्थलीं किमर्थं करोषि ? तत प्रणयप्रवण इत्यादि स्पष्टम् । वुरङ्गाक्षीमिति वक्तु वय यावदीहामहे तावन्मधुरो मधुपध्वनि चूते आविरभूत् । अत्र प्रथमश्लोकार्थो द्वितीयश्लोक उक्तिकर्मत्वेन उक्त इति एकवाक्यता ।

(वि, ड) **एवमिति**—सन्दानितकादावपि एव बोध्यमित्यर्थ ।

(वि, ढ) महाकाव्यलक्षणमाह—**सर्गबन्ध** इत्यादि । परिच्छेदरूप सर्गो बध्यतेऽस्मिन्निति सर्गबन्ध । सुरो देव । सर्वे नाटकसन्धयो मुखप्रतिमुखादय पञ्च । सज्जनाश्रयम्—वर्णनीयोत्तमजनस्य वृत्त वेत्यर्थ ।

(वि, ण) **चत्वार** इति—धर्मार्थकाममोक्षा ये चत्वारो वर्गास्तेष्वेकमपि तत्फलमित्यर्थ । **एकवृत्तमयैरिति**—एकच्छन्दोव्याप्तैरित्यर्थ । अवसाने सर्गान्ते ।

प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः ।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ॥
रणप्रयाणोपयममन्त्रपुत्रोदयादय ।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ॥
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ।
नामास्य, सर्गोपादेयकथया सर्गनाम तु ॥ ३०३ ॥ (ग)

सन्ध्यङ्गानि यथालाभमत्र विधेयानि । "अवसानेऽन्यवृत्तके" इति बहुवचनमविवक्षितम् । साङ्गोपाङ्गा इति जलकेलिमधुपानादय ।
यथा—रघुवंश शिशुपालवध नैषधादय । यथा वा मम राघवविलासादिः ।(त)

अस्मिन्नार्षे पुन सर्गा भवन्त्याख्यानसंज्ञकाः ॥ ३०४ ॥

अस्मिन् महाकाव्ये । यथा महाभारतम् । (थ)

प्राकृतैर्निर्मिते तस्मिन् सर्गा आश्वाससंज्ञकाः ।
छन्दसा स्कन्धकेनैतत् कचिद्ललितकैरपि ॥ ३०५ ॥

यथा–सेतुबन्ध । यथा वा मम कुवलयाश्वचरितम् । (द)

अपभ्रंशनिबन्धेऽस्मिन् सर्गाः कडवकाभिधाः ।
तथापभ्रंशयोग्यानि छन्दांसि विविधान्यपि ॥ ३०६ ॥

यथा—कर्णपराक्रम । (ध)

साङ्गोपाङ्ग इति—अमी सन्ध्यासूर्येन्द्वादय पुत्रजन्मान्ता इह काव्ये यथायोग यथासम्भव साङ्गोपाङ्गा वर्णनीया इत्यर्थ । तत्र सन्ध्याङ्गम्—चक्रवाकविरह, वासराङ्गम्—जलकेल्यादि, रजन्यङ्गम्—मधुपानादि, उपाङ्गम्—तत्रैव परिहासादय, मुनि—नारदादि, प्रयाणम्—यात्रा, उपयम विवाह, मन्त्र—मन्त्रणा, पुत्रोदय पुत्रजन्म । इतरस्य प्रतिनायकस्य, नाम्नास्य नामेत्यर्थ । सर्गोपादेयेति—सर्गे उपादेया वर्णिता या कथा तया सर्गनामेत्यर्थ ।

(वि, त) बहुवचनमविवक्षितामिति—अवसान एकस्यापि अन्यवृत्तिकस्य दृष्टत्वात् । यथा रघुवंशमिति । तत्र वृत्तस्य नाम्ना रघुवंशेति । एकवंशजा बहु-भूपा । प्रतिनायकस्य नाम्ना शिशुपालवध इति । नैषधादौ तु नायकस्य नाम्ना । नायकस्तु सद्वंशज क्षत्रिय ।

(वि, थ) अस्मिन्नार्षे इति—ऋषिप्रणीतेऽस्मिन् महाकाव्य इत्यर्थ । आख्यानसंज्ञका इति । शिष्य प्रति गुरुणामाख्यानशास्त्रकथने या सज्ञा अध्याय-रूपास्तादृशसज्ञका इत्यर्थ ।

(वि, द) स्कन्धकगलितके छन्दोविशेषौ ।

(वि, ध) कडवकाभिधा —कडवकनामान ।

भाषाविशेषानियमात् काव्यं सर्गसमुज्झितम् ।
एकार्थप्रवणैः पद्यैः सन्धिसामग्र्यवर्जितम् ॥ ३०७ ॥

यथा भिक्षाटनमार्याविलासश्च । (न)

खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च ॥ ३०८ ॥

यथा मेघदूतादिः ।

कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः ।
व्रज्याक्रमेण रचितः स एवातिमनोरमः ॥ ३०९ ॥ (प)

सजातीयानामेकत्र सन्निवेशो व्रज्या । यथा मुक्तावल्यादिः ।

अथ गद्यकाव्यानि । (फ) तत्र गद्यम् ।

वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च ।
भवेदुत्कलिकाप्रायं चूर्णकञ्च चतुर्विधम् ॥
आद्यं समासरहितं वृत्तभागयुतं परम् ।
अन्यद्दीर्घसमासाढ्यं तूर्यञ्चाल्पसमासकम् ॥ ३१० ॥ (ब)

मुक्तकं यथा—"गुरुर्वचसि पृथुरुरसि" इत्यादि । वृत्तगन्धि यथा मम—समरकण्डुलनिबिडभुजदण्डकुण्डलीकृतकोदण्डशिञ्जिनीटङ्कारोज्जागरितवैरिनगर !" इत्यादि । अत्र, " कुण्डलीकृतकोदण्ड " इत्यनुष्टुब्वृत्तस्य पादः, "समरकण्डुल" इति च प्रथमाक्षरत्रयरहित एतस्यैव पादः ।

उत्कलिकाप्रायं यथा ममैव—अणिसविसअणिसिदसरविसरविदलितपरिहगदपरबल !" इत्यादि । चूर्णकं यथा मम—"गुणरत्नसागर ! जगदेकनागर !

(वि, न) भाषाविशेषेति—तादृशवाक्ये संस्कृतप्राकृतभाषयोरनियमः ।

(वि, प) अन्योन्यानपेक्षकः—अन्योन्यनिरपेक्षकः ।

(वि, फ) व्रज्यापदार्थमाह—सजातीयानामिति । वर्णनीयैक्येन साजात्यम् ।

(वि, ब) वृत्तगन्धोज्झितमिति । गद्यसामान्यलक्षणम् ।

तच्चातुर्विध्यमाह—मुक्तकमिति । आद्यं मुक्तकम् । परं वृत्तगन्धिः । वृत्तम्—अक्षरसंख्यातं छन्दस्तदेकदेशयुक्तमित्यर्थः । तुर्यं चतुर्थं चूर्णकम् ।

(वि,भ)समरकण्डुलेति—समरोत्साहेन कण्डुले निबिडे दृढे भुजदण्डे कुण्डलीकृतकोदण्डस्य शिञ्जिन्या गुणस्य टङ्कारेण उज्जागरितं वैरिनगरं येन । हे तादृशेत्यर्थः । अत्र वृत्तभागयुक्तत्वं दर्शयति—अत्रेति । प्रथमाक्षरत्रयरहित इति—एतस्यैव अनुष्टुभ एव पादोऽपरपादः । समरेत्यक्षरत्यागे, 'कण्डूलनिबिडभुज-' इत्येवंरूपः । अणिसेति—अनिशविषमानिशितशरविसरविदलितपरिघगदपरबल इति संस्कृतम् । अनिशं विषमानां निशितानां शराणां विसरेण—पातेन विदलिताः परिघाः मुद्गराः गदाश्च यत्र तादृशं परबलं यस्मात्, हे तादृशेत्यर्थः । गुणरत्नसागरेत्यादि—अत्र रेफान्तं नाम-

कामिनीमदन ! जनरञ्जन !" इत्यादि । (भं)

कथायां सरसं वस्तु गद्यैरेव विनिर्मितम् ।
क्वचिदत्र भवेदार्या क्वचिद्वक्त्रापवक्त्रके ।
आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्तनम् ॥ ३११ ॥ (म)

यथा कादम्बर्यादि —

आख्यायिका कथावत् सा कवेर्वंशादिकीर्तनम् ।
अस्यामन्यकवीनाञ्च तथा वृत्तं क्वचित् क्वचित् ।
कथांशानां व्यवच्छेद आश्वास इति वध्यते ।
आर्यावक्त्रापवक्त्राणां छन्दसा येन केनचित् ।
अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम् ॥ ३१२ ॥ (य)

यथा हर्षचरितादिः—

"अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात्" इति दण्ड्याचार्यवचनात्, केचित् "आख्यायिका नायकेनैव निबद्धव्या" इत्याहुः, तदयुक्तम् । आख्यानादयश्च कथाख्यायिकयोरेवान्तर्भावान्न पृथगुक्ताः । यदुक्तं दण्डिनैव—"अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः" इति । एषामुदाहरणं पञ्चतन्त्रादि । (र)

अथ गद्यपद्यमयानि—

गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते ॥ ३१३ ॥ (ल)

यथा देवराजचरितम्—

गद्यपद्यमयी राजस्तुतिर्विरुदमुच्यते ॥ ३१४ ॥

द्वयं नान्तञ्च सम्बोधनद्वयमल्पसमासकम् ।

(वि, म) कथारूपकाव्यधर्मानाह—**कथायामिति** । आर्यामात्राकृतं छन्दः । वक्त्रापवक्त्रके—छन्दोविशेषौ । तस्य धर्मान्तरानाह—**आदाविति** ।

(वि, य) आख्यायिकात्मककाव्यधर्मानाह—**आख्यायिकेति** । **कथावत्सेति**—सा कथोक्तधर्मतुल्यधर्मवतीत्यर्थः । कथातो विशेषमाह—**कवेरिति** । **अस्यामिति**—अस्यामाख्यायिकायामन्यकवीनाञ्च वंशादिकीर्तनमित्यर्थः । तथा वृत्तमक्षरसंख्यातं छन्दः क्वचित् क्वचिदित्यर्थः । **आश्वास** इति—आश्वासनामाऽत्र परिच्छेद इत्यर्थः । **आर्येति**—आर्यादिच्छन्दसा मध्ये येन केनचिच्छन्दसा आश्वासस्य मुखे—आदौ अन्यापदेशेन-अन्यच्छलेन भाव्यर्थस्य वक्ष्यमाणार्थस्य सूचनमित्यर्थः ।

(वि, र) "आख्यायिका नायकेनैव निबद्धव्या" इति यत् केनचिदुक्तं तद् "अपि तु"—इत्यादिदण्ड्याचार्यवचनादयुक्तमित्यर्थः । आख्यानादिरूपाणां काव्यान्तराणां पृथगयुक्तिबीजमाह—**आख्यानादय** इति । **यदुक्तं दण्डिनैवेति**—यतो दण्डिनैवोक्तम्, अत्रैवान्त.—इत्यादीत्यर्थः ।

(वि, ल) चम्पूसंज्ञकं काव्यान्तरमाह—**गद्यपद्यमयीति** ।

यथा विरुदमणिमाला—(व)

करम्भकन्तु भाषाभिर्विविधाभिर्विनिर्मितम् ॥ ३१५ ॥

यथा—मम षोडशभाषामयी प्रशस्तिरत्नावली ।

एवमन्येपि भेदा उद्देशमात्रसिद्धत्वादुक्तभेदानतिक्रमाच्च न पृथग् लक्षिताः(श

इति साहित्यदर्पणे दृश्यश्रव्यकाव्यनिरूपणो नाम

षष्ठः परिच्छेदः ।

(वि, व) विरुदमणिमाला प्रबन्धविशेषः ।

(वि, श) **एवमन्येपि भेदा** इति । न पृथग् लक्षिता इत्यन्वयः । पृथगलक्षणे हेतुमाह—**उद्देशमात्रसिद्धत्वादिति** । तत्तत्कीर्तनमात्रेणैव सिद्धा. न तु कृत-लक्षणा. । तेषामुक्तप्रभेदलक्षणाक्रान्तत्वमेवेत्याह—**उक्तभेदानेति** ।

इति श्रीमहेश्वरन्यायालङ्कारविरचितायां साहित्यदर्पणटीकायां

षष्ठपरिच्छेदविवरणम्

Arrived Darbhanga
BNSC

सप्तमः परिच्छेदः

इह हि प्रथमत काव्ये दोषगुणालङ्काररीतीनामवस्थितिक्रमो दर्शित । सम्प्रति के ते इत्यपेक्षायामुद्देशक्रमप्राप्ताना दोषाणां स्वरूपमाह—(क, अ) *

रसापकर्षका दोषा ॥ १ ॥ +

अस्यार्थ प्रागेव स्फुटीकृत । तद् विशेषानाह-(ख, आ)

ते पुन पञ्चधा मता ।
पदे तदंशे वाक्येऽर्थे सम्भवन्ति रसेऽपि यत् ॥२ ॥(इ) ×

(वि, क) इह हि प्रथमत प्रथमपरिच्छेदे दोषानामवस्थितिक्रमोऽवस्थिति प्रकारो दर्शित इत्यर्थ । ते दोषा । दोषास्तस्यापकर्षका' इत्युक्त्या अपकर्षकत्वेन दोषाणा प्रकारो दर्शित । 'उत्कर्षहेतव प्रोक्ता गुणालङ्काररीतय' इत्युक्त्या च गुणादीनामुत्कर्षकत्वेनावस्थितिप्रकारा दर्शित इति । अत्र च रीत्यलङ्काराणामिति पाठस्तु उद्देशक्रमप्राप्तानामित्युक्तम् ।

(वि, ख) प्रागेव स्फुटीकृत इति । श्रुतिदुष्टत्वादीना शब्दद्वारा, अपुष्टार्थत्वादीनाम् अर्थद्वारा, व्यभिचारिभावादिशब्दवाच्यत्वादीना च साक्षात् रसापकर्षकत्वमित्यर्थ । प्रागेव स्फुटीकृत इत्यर्थ । तदशेषान् दोषविशेषान् । ते पुनरिति ते दोषा ।

(लो, अ) काव्यस्वरूप निरूप्य दोषान् निरूपयितुकाम तत्प्रस्ताव दर्शयति । इह हि इति । स्वरूप स्वसमाधारण रूपम् इतरव्यावर्त्तको धर्म्म ।

(लो, आ) रसेति—रसापकर्षका आस्वादविघ्नहेतव । प्रागेवेति—प्राक् प्रथमपरिच्छेद ।

(लो, इ) ते पुनरिति—ते दोषा पदतदशादिपञ्चके स्थिता यस्मात् वाक्यार्थ भतस्तास्वादव्यापकर्षकारणानि तस्मात् पञ्च प्रकारा ।

---

* नाममात्रेण वस्तुसङ्कीर्त्तनमुद्देश । तेनैव क्रमेण प्राप्ताना स्वरूप लक्षणम् ।

+ रस्यते आस्वाद्यते इति व्युत्पत्त्या भावादिरपि गृह्यते । उद्देश्यप्रतीतिविधात लक्षणोऽपक्ष ।

× दोषस्त्रिविध —शब्ददोषोऽर्थदोषो रसदोषश्चेति । शब्दस्त्रिविध पद पदाश वाक्य च । एव च तदाश्रित शब्ददोषोऽपि त्रिविध । अतो दोषा पञ्चप्रकारा ।

तदंशे—पदाशे ।

स चाय दोषो द्विविधो नित्योऽनित्यश्चेति । सर्वदैव हेयो नित्य । यथा श्रुत्यसत्कारवादय । तदन्योऽनित्य —यथा शृङ्गारादौ हेयमपि श्रुतिकटु रौद्रादौ उपादेयमेव ।

1 'पदाशे' इति क्वचित्पाठ । 2 यत्' इत्यनन्तर 'स्पष्टम्' (इति क पु.)

तत्र—

दु श्रवनिर्विधाश्लीलानुचितार्थाप्रयुक्तता ।
ग्राम्योऽप्रतीतसन्दिग्धनेयार्थनिहतार्थता ।
अवाचकत्वं क्लिष्टत्वं विरुद्धमतिकारिता ।
अविमृष्टविधेयांशभावश्च पदवाक्ययोः ।
दोषाः केचिद्भवन्त्येषु पदांशेऽपि पदे परम्[1] ।
निरर्थकासमर्थत्वे च्युतसंस्कारता तथा ॥ ३ ॥ (ग इ)

परुषवर्णतया श्रुतिदुःखावहत्वं दुःश्रवत्वम् । यथा—(घ)

"कार्त्तार्थ्यं यातु तावद्धी कदानङ्गयशोवदा । (ङ उ) †
अश्लीलत्वं व्रीडाजुगुप्साऽमङ्गलव्यञ्जकत्वात् त्रिधा ॥ (च)

(वि, ग) दु श्रव इत्यादि । अप्रयुक्तता इत्यत्र द्वन्द्वोत्तरस्य भावप्रत्ययस्य प्रत्यक्षमभिसम्बन्धात् दु श्रवत्वादय एव दोषाः । एतदाद्यविमृष्टविधेयांशभावान्ता त्रयोदश दोषाः पदवाक्ययोः पद वाक्येऽपि सम्भवन्ति इत्यर्थः । एषां मध्ये केचिद्दोषाः पदांशऽपीत्यर्थः । पदे परम् इति । निरर्थकत्वमसमर्थत्व च्युतसंस्कारत चेति दोषत्रय पर केवल पदे नतु वाक्ये इत्यर्थः । तद् यत्र तत्तद्दोषप्रसङ्गे वक्ष्याम ।

(वि, घ) तत्र दु श्रवत्वलक्षणमाह—परुषेति । एतच्च वीरबीभत्सरौद्रान् रसान् विहाय इति बोध्यम् तेषु तस्यानुगुणत्वादेव । तथा प्रादेशिकत्वे एवाय दोषः । समग्र पदव्यापकत्वे तु प्रतिकूलवर्णत्वदोष एव इत्यपि बोद्धव्यम् ।

(वि, ङ) कार्त्तार्थ्यमिति । स्पष्टम् । रेफयुक्तवर्ण श्रुतिदुःखदायि ।

(वि, च) व्रीडाजुगुप्सामङ्गलत्वादिति । एतत्त्रयहेतुत्वादित्यर्थः । हेतुत्व ज्ञापकत्व कारकत्व च । तत्र व्रीडाजुगुप्सया कारकत्व मङ्गलस्य च ज्ञापकत्व बोध्यम् ।

(वि, ई) तत्र के दोषा किंनिष्ठा इत्यत आह दु श्रवेति । तत्प्रत्ययस्य दु श्रवादिषु प्रत्येक सम्बन्धः । सन्दिग्ध सन्देहः । अथ भवेत् क्लिष्टम् अविमृष्टविधेयाश विरुद्धमतिकृत्समासपदमेव । सर्वे दोषा पदवाक्ययोः । एषु दु श्रवादिषु मध्ये ।

(लो, उ) परुषवर्णं परुषाक्षरम् । कार्त्तार्थ्यं कृतार्थता—कृतार्थस्य भावम् ।

---

† अत्र प्रकृतरसव्यञ्जकवर्णाभावात् रसोद्बोधो न जायत । प्रतिकूलवर्णे तु प्रकृतरसप्रतिबन्धकै वर्णै प्रतिबध्यते । अत प्रतिकूलवर्णत्व तु सर्वत्र रसे दुष्टम् । दु श्रवत्व तु न तथा इति अनयोर्भेद । अत्र प्रयुक्त कार्त्तार्थ्यशब्द शृङ्गाररसव्यञ्जकवर्णाभावात् श्रोतुर्विरक्तिमापादयति ।

1 'परे (इति क पु)

क्रमेणोदाहरणम्—

"दसारिविजये राजन् ! साधनं सुमहत्तव।" (छ)
"प्रससार शनैर्वायुर्विनाशे तन्वि ! ते तदा ॥" (ज)

अत्र साधनवायुविनाशशब्दा अश्लीला. । *

"शूरा अमरतां यान्ति पशुभूता रणाध्वरे" *

अत्र "पशु" पदं कातर्यमभिव्यनक्तीत्यनुचितार्थत्वम् । +(झ, ञ)

(वि, छ) दसारीति—साधन सेना सै चार्थः प्राकरणिकत्वात् अनेकार्थस्य साधनशब्दस्य वाच्य । पुंव्यञ्जनरूपत्वयों व्यञ्जय श्रोतृणां व्रीडाजनक; नतु व्रीडाव्यञ्जक. तदप्रतीतेः ।

(वि, ज) प्रससारेति—विरहोत्तरं नायिका प्राप्य नायकस्योक्तिरियम् । हे तन्वि ! तव विनाशे अदर्शने सति तदा मम दुःखोत्पादनाय वायुः शनैः मन्दं प्रससार इत्यर्थः । अत्र अनेकार्थस्य विनाशशब्दस्य व्यङ्ग्यो मरणरूपोऽयोंऽमङ्गलव्यञ्जकः । वायुशब्दस्तु अपानवायुव्यञ्जनया घृणारूपजुगुप्साजनकः । दुःसकाले शनैः प्रसृतवायोरपानवायुत्वप्रतीतेः । अनुचितार्थत्वमिति—उपन्यस्यस्य निन्दाव्यञ्जकत्वं तत्त्वम् ।

(वि, झ) शूरा इति। पशुभूता. पशुवत् हेयरूपा: । अत्रेति । अध्वरच्छेद्यपशोः कातरत्वेनात्र शूरेऽपि तत्प्रतीते ।

(लो, ऊ) दसेति—अत्र साधनशब्दो हस्त्यश्वादिसाधनार्थे प्रयुक्तः पुंव्यञ्जस्य, वायुशब्दः पवनमात्रार्थे अपानपवनविशेषस्य, विनाशशब्दश्च अदर्शनार्थे मरणस्य च स्मारणात् क्रमेण व्रीडादिव्यञ्जका ।

(लो, ॠ) पशुपदं तथाविधसमये प्रयुक्तम् ।

---

* अत्र सैन्यार्थकं साधनपदमुपस्थरूपार्थान्तरोपस्थापकतया व्रीडादायि । वायुशब्दोऽपानवायुस्मारकतया जुगुप्सादायी ।

विनाशशब्दस्य विवक्षित एवार्थोऽमङ्गलः । तादृशार्थोपस्थित्या श्रोतुर्वैमुख्यं दूषकताबीजम् । शिवलिङ्गभगिनीब्रह्माण्डादिशब्देषु तु समुचीतगुप्तलक्षितेषु असभ्यार्थानुपस्थितेर्नायं दोष. । अविगीतानादिप्रयोगयोगित्वे सति भगवदादिसम्बन्धित्वं समुचीतत्वम् । शिवलिङ्गशब्दस्य जगदन्तर्यामिभगवति प्रसिद्धेर्व्रीडाद्यप्रतीतिरेव । रूढ्यर्थस्य झटित्युपस्थित्या तद्भावनया योगार्थस्य तिरोधानं गुप्तत्वं—यथा भगिनीत्यत्र । ग्राम्यस्मृतिजनकैकदेशवत्त्वं लक्षितत्वम् । ब्रह्माण्डादिपदं समुदायरूढ्या झटिति सभ्यमेवार्थमुपस्थापयति । न तु अवयवेनाऽसभ्यार्थमिति न दोषः ।

+ अनुचितः विवक्षितार्थस्य तिरस्कारव्यञ्जक अर्थो यस्य सः । अत्र शौर्ये प्रतिपाद्ये पशुपदं कातरतामभिव्यनक्ति पशुपदार्थे कातरताया दर्शनात् ।

अप्रयुक्त तथा प्रसिद्धावपि कविभिरनादृतत्वम्।

यथा—"भाति पद्म सरोवरे।"। अत्र पद्मशब्द पुलिङ्ग। (अ) *

ग्राम्यत्व यथा—"कटिस्ते हरते मन।"। अत्र कटिशब्दो ग्राम्य (ट) ×

अप्रतीतत्वमेक[1]दर्शनमात्रप्रसिद्धत्वम्। यथा—"योगेन दलिताशय।" योगशास्त्र एव वासनार्थे आशयशब्द। (ठ, ऋ)

"आशी परम्परां वन्द्या कर्णे कृत्वा कृपा कुरु।"

अत्र वन्द्यामिति किं वन्दीभूतायामुत वन्दनीयायामिति सन्देह.। (ड, ऌ)

(वि, अ) **तथा प्रसिद्धावपि** इति। अनुशासने तल्लिङ्गकत्वेन उक्तावपीत्यर्थ। कविभिरिति बहुवचनात् प्राचीनानेककविभिरित्यर्थ। तेन इदानीन्तनानेककविभि प्राचीनैककविना वाऽस्याऽऽदरेऽपि दोष एव। एवम "पद्मान् हि मे प्राशुपि खञ्जरीटान्" इति नैषधकृता प्राचीनैककविना आदरेऽपि दोष एव। काव्यव्यतिरिक्ते भाषामात्रे तदादरे तु अदोष एव, इत्यत नानुशासनप्रामाण्यम्।

(वि, ट) **ग्राम्यो यथे**ति—ग्राम्य शब्द इत्यर्थ। तस्य तथात्व च विदग्धाऽप्रयोज्यत्वात्। काव्यकविसाधारणविदग्धानादराद्प्रयुक्तत्वादस्य भेद।

(वि, ठ) एकदर्शने, एकशास्त्रमात्र।

(वि, ड) **सन्दिग्धमिति**। किमिद वा पदमिति पदस्यैव सन्दिग्धत्वम्। कर्णे कृत्वा इति श्रुत्वा इत्यर्थ। **वन्दीभूतायाम्** इति, बलात् बन्दीकृतशत्रुनार्यामित्यर्थः। अत्र वन्दीवन्द्याशब्दयो सन्देह।

(लो, ऋ) **आशय** इति। योगशास्त्र एव न तु लोके अर्थशास्त्रे वा। तथा हि पातञ्जलसूत्र, "क्लेशकर्मविपाकाशयैरपरामृष्ट पुरुषविशेष ईश्वर" इति। क्लेशा अविद्याकर्माणि, दुष्कृतसुकृतादि तत्फल विपाक। तदनुगुणा वासना आशया। ते च मनसि वर्त्तमाना पुरुषे अपदिश्यन्ते इति। किञ्चैव वक्तृबोद्धव्ययो शास्त्रानभिज्ञत्वबोधादिं विना दोष इति। ततश्च अप्रयुक्तत्वाद् भिद्यते।

(लो, ऌ) **वन्द्यामि**ति—अस्य सप्तम्यन्तत्वेन द्वितीयान्तत्वेन च सम्भवात् प्रकरणाभावेन विनिगमनाभावात् सन्देह।

---

* पुलिङ्गो पद्मशब्दोऽमरकोषे 'वा पुसि पद्म नलिनम्" इति पठितोऽपि कविभिर्न क्वापि प्रयुक्त इत्यप्रयुक्तत्वम्।

× अश्लीले तु व्रीडादिव्यञ्जकत्वम्। अत्र तु न तथा। पर विदग्धे अप्रयोज्यत्व मेवानयोर्भेद नागरैकमात्रवेद्यत्वाभावाल्लौकिकार्थोपस्थापकत्वाद् ग्राम्यत्व दोष। यद्वा ग्राम्यत्व स्वार्थापवर्पव्यञ्जकत्वम्। तेनाङ्गसौन्दर्यादेर्दीपनस्यालाभाद् रस प्रतीतिविलम्ब।

1 'एकदेश–' इति (ग. च पु)

नेयार्थत्वं रूढिप्रयोजनाभावादशक्तिकृतं लक्ष्यार्थप्रकाशनम्। * यथा—

"कमले चरणाघातं मुग्धं मुमुचि ! तेऽकरोत्।"

अत्र चरणाघातेन निर्जितत्वं लक्ष्यम्(ढ) निहतार्थत्वम् उभयार्थस्य शब्दस्याप्रसिद्धेऽर्थे प्रयोगः। यथा—"यमुनाशम्बरमम्बरं व्यतानीत्।" शम्बरशब्दो दैत्ये प्रसिद्धः, अत्र तु जले निहतार्थः। (ण) ¶

"गीतेषु कर्णमादत्ते।" अयाद्पूर्वो दाप्धातुर्दानार्थे अवाचकः। (त,थ) §

(वि, ढ) नेयार्थत्वमिति। अशक्तिकृतं कवेरशक्तिमात्रेण कृतं न तु रूढिप्रयोजनयोः अन्यतरेण कृतमित्यर्थः। कमले इति। मुग्धं कर्तृ। चरणाघातं कर्म। अत्र चरणाघातेन इति। चरणाघातपदेन इत्यर्थः। वाक्येऽपि तात्पर्यानुरोधात् निर्जितत्वं लक्ष्यते। तथा च कमले निर्जितत्वम् अकरोदित्यर्थः। नन्वत्र निर्जितत्वातिशयः कथं न प्रयोजनम्। दर्शितं हि स्थाने स्थाने लक्ष्यार्थातिशयः प्रयोजनमिति चेत्, न। कविप्रयोगार्हलक्षणाया मुख्यार्थबाधावगम इव विवक्षितमुख्यार्थयोगावगमोऽपि हेतुः। न तु विवक्षितप्रमेयत्वादेरधर्मभूतस्वरूपयोगावगमोऽपि अव्याप्तेः। प्रकृते निर्जितत्वे लक्ष्यार्थे मुखनिष्ठशोभाजन्यत्वमेव विवक्षितो योगश्चरणाघाते मुख्यार्थे चालीके तच्छोभाभावात् तज्जन्यत्वनिर्जितत्वं न प्रतीयत एव। ततश्च तदप्रतीत्या अस्या लक्षणायाः कविप्रयोगानर्हत्वज्ञानेन अश्रद्धेयत्वात् लक्ष्यार्थातिशयः प्रयोजकं न प्रतीयते एव इति भावः।

(वि, ण) निहतेति। यमुनाया शम्बरं जलम् अम्बरम् आकाशं व्यतानीत् व्याप्तमित्यर्थः "अम्बु शम्बर"मिति कोषः।

अत्रेति—नच नपुंसकलिङ्गरूपव्यक्तिविशेषात् जलस्यैव उपस्थितिरिति वाच्यम्, तुल्यप्रसिद्धिकस्थले एव तस्य नियन्त्रितत्वात्। अत्र तु प्रसिद्धिवशात् लिङ्गाननुसन्धानेऽपि पदमात्रेणैव प्रथमतः तदुपस्थित्यवलम्बनात् लिङ्गस्यान्वयस्य च बोधात्तु पश्चादेव जलप्रतीतेः।

(वि, त) अवाचकेति। शक्तिभ्रमप्रयुक्तत्वमवाचकत्वम्। आदत्ते ददाति। अत्रेति न च धातोर्नानार्थत्वेन दाने ग्रहणेऽपि शक्तिरस्त्येव, आङुपसर्गेण तु

---

* नेयः न्यायपरिहारेण कवेः स्वेच्छया कल्पनीयः अर्थः यस्य सः। रूढितः प्रयोजनाद् वा लक्षणा समुपास्यते। रूढिप्रयोजनाभ्यां विना निषिद्धा या लक्षणा तया यत्र अर्थबोधः स नेयार्थः। अत्र चरणाघातकरणं निर्जितत्वे लक्षणया प्रयुक्तम्। निर्जितत्वेऽस्य पदस्य रूढेः प्रयोजनस्य वा अभावेन लक्ष्यार्थस्याऽप्रतीतेः नेयार्थत्वम्।

¶ निहतः प्रसिद्धार्थेन अप्रसिद्धः विवक्षितः अर्थः यस्य तस्य भावः।

§ अत्र ददानेर्दाने शक्तिरूपसामर्थ्यसत्त्वेऽपि "आ" इत्युपसर्गेण, ग्रहणे एव, शक्तेर्नियमितत्वात्। आङ् पूर्वो दाधातुर्दानार्थेऽवाचकः न तु असमर्थः।

यथा वा—"दिन मे त्वयि सम्प्राप्ते ध्वान्तच्छन्नापि यामिनी ।"
अत्र दिनमिति प्रकाशमयार्थेऽवाचकम् । (थ, ऐ) +
क्लिष्टत्वमर्थप्रतीतेर्व्यवहितत्वम् । यथा—
"क्षीरोदजावसतिजन्मभुव प्रसन्ना ।" (द)
अत्र क्षीरोदजा लक्ष्मीस्तस्या वसति पद्म तस्य जन्मभुवो जलानि । (ओ)
"भूतयेऽस्तु भवानीश ।" अत्र भवानीश शब्दो भवान्या पत्यन्तर प्रतीतिका-

---

दानबोधप्रतिबन्ध एवेत्यत शक्त्याथ कथ शक्तिभ्रम इति वाच्यम् । उपसर्गस्य प्रतिबन्धकत्वकल्पने कारणीभूताभावप्रतियोगित्वप्रवेशेन गौरवात्, तदपेक्षया आदु पसर्गरहितस्यैव दात्र दाने शाक्करित्यस्यैव युक्तत्वात् । डुदान् दाने इति सामान्यत शक्तिदर्शनात्तु शक्तिभ्रम ।

नेयार्थे तु भ्रमबीजाभावात् न भ्रम इति विशेष । अतो नेयार्थत्वलक्षणे शक्ति भ्रमाभावे सति इति विशेषणादानादसाङ्कर्यम् । अवाचके च शक्तिभ्रमात् विवक्षितार्थे तात्पर्यसत्त्वात् तात्पर्यरूपाया लक्षणाया विवक्षितार्थत्वबोधकत्वमस्त्येव इति । अतो वाक्यार्थबोधकत्वेन निरर्थकासमर्थत्वच्युतसस्काराणामिव नास्य वाक्यार्थदोषताऽपास्या । एतद्युतपदसमूहे वाक्यार्थबाधजननात् लक्षणया स्ववाक्यार्थबोधजनद्वारा वाक्यार्थ बोधजननात् । परन्तु ह्यं लक्षणा न नेयार्था, नापि कविप्रयोगार्हेति बोध्यम् । निरर्थकादिदोषत्रयस्य तु वाक्यदोषत्व न सम्भवतीति तदपास्यम् ।

(वि, थ) यथा वा–' दिन मे त्वयि सम्प्राप्ते ध्वान्तच्छन्नापि यामिनी ।" मे मम दिन प्रकाशमयमित्यर्थ । ध्वान्तच्छन्नापीति अपिशब्देन ध्वान्तच्छन्नत्वविपरीत बोधनात् प्रकाशमयत्वस्यैव तद्विपरीतबोधात् न तु दिनत्वस्य । मेघाच्छन्नदिनस्य तद्विपरीतत्वाभावात् । अत्रापि दिनस्य प्रायशं प्रकाशमयत्वदर्शनात् तथात्वेनैव शक्तिभ्रम ।

(वि, द) क्लिष्टत्वमिति—व्यवधान च द्विधा, क्वचिदन्विताऽन्वयवशेन विशेषाप्रतीतौ कालिकव्यवधानम् । क्वचित्तु अनासत्तिरूप व्यवधानम् । तत्राद्य पद-गतमुदाहरति–"क्षीरोदजावसतिजन्मभुव " । अस्य व्याख्या वृत्तावेव । अनासत्तिरूप व्यवधान तु वाक्यदोषे उदाहरिष्यति ।

(लो, ए) दानाथ अवाचक , ग्रहणार्थत्वात् । "उपसर्गेण धात्वर्था बलादन्यत्र नीयते" इति न्यायात् ।

(लो,ऐ) दिनमिति । सूर्यस्यास्तमयनपर्यन्तं, तदन्यावच्छिन्न कालविशेष एव दिनशब्दवाच्य । न तदविनाभूत प्रकाशमयत्वमपीति भाव ।

(लो, ओ) क्षीरोदेत्यादि पदोऽपि पद, समस्तत्वात् ।

+ रूढ्या दिनपद दिनत्वेन शक्त, न पुन प्रकाशमयत्वेन इति अवाचकम् ।

रित्वात् 'विरुद्धमतिकृद् । (ध, औ)'*

अविमृष्टविधेयांशत्वं यथा—

"स्वर्गग्रामटिकाविलुण्ठनवृथोच्छ्रूनैः किमेभिर्भुजै ।"

अत्र वृथात्वं विधेयं, तच्च समासे गुणीभावात् अनुवाद्यत्वप्रतीतिकृत् ।

(न, अ)×

(वि, ध) विरुद्धमतीति । अन्यान्वयवशेन उपश्लोक्यस्य निन्दाव्यञ्जकत्वं तत्त्वम् । अनुचितार्थस्य तु अन्यान्वयं विनेति भेदः । अत्रेति—भवस्य पत्नीत्यर्थे साधितस्य भवानीशब्दस्य अर्थेन पतिशब्दार्थस्य अन्वयवशात् चैत्रस्य भार्याया पतिरित्यत्र इव उपपतिप्रतीत्या निन्दा ।

(वि, न) अविमृष्टेति—समभिव्याहारविशेषवशाद् विधेयस्य विधेयत्वप्रतीत्यजनकत्वं तत्त्वम् । स च समभिव्याहारप्रतीतिसाक्षिको न तु गत एव । तथा हि प्राङ्निर्दिष्टविधेयक बहुव्रीहिं विना समासान्तरे विधेयस्य पाते, असमासे तु उद्देश्यात् पूर्वविधेयस्य पाते तथात्वम् । तत्र कर्मधारयसमासगतविधेयस्याविमर्शमुदाहरति—स्वर्गेति । रामसैन्यवेष्टितलङ्कस्य रावणस्य विषादोक्तिरियम् । विलुण्ठनेनेत्यर्थः । अत्र भुजानामुच्छ्रूनत्व सिद्धमेव । तस्येदानीं वृथात्वमित्यतः उच्छ्रूनत्वे

(लो, औ) भवानीशब्दो भवस्य पत्नीत्यर्थे नदादौ आनप्रत्ययान्तः ।

(लो,अ) अत्र वृथात्वमिति । समासे तत्पुरुषसमासे गुणीभावात् । अयमाशयः—तत्पुरुषसमासे उत्तरपदस्यैव प्राधान्यात् वृथेति पूर्वपदस्य विधेयस्य प्राधान्येनानिर्देशादविमृष्टविधेयांशो दोषः । अविमर्शो हि प्राधान्येनानिर्देश । इह वस्तुतोदेशमुखस्यायमाशयः—पुरा मम भुजाना मूर्द्ध उच्छ्रूनत्वं स्थितं तदिदानीं वृथाभूतमिति । एवं विधेयत्वेन विवक्षितस्य वृथात्वस्य समासे गुणीभावादनुवाद्यत्वप्रत्ययः । तेन च पूर्वतो भुजानामुच्छ्रूनत्वस्य वृथात्वाभावाद् भुजानामपकर्ष एव प्रतीयते न भुजविक्षेपणोत्कर्षः । एवमुपरितनोदाहरणेष्वपि बोद्धव्यम् ।

---

* विरुद्धस्य मतिं, विरुद्धा मतिं वा करोतीति । अतः प्रकृतस्य न्यक्कारकप्रतीतिजनकत्वम् । अत्र भवस्य पत्नीत्यर्थे सिद्धं भवानीपदम् । भवानीश इत्यत्र भवपत्नीपतिरित्यर्थोपस्थितौ देवदत्तस्य पत्न्याः पतिरिव भवेतरपत्यन्तरं व्यञ्जयति । अन्यथा भव इत्येतावतैव प्रकृतार्थोपस्थितौ आनप्रत्ययेशशब्दयो. वैयर्थ्यपातात् । न च भवानीपदं श्रुत्वा पार्वतीं प्रतिपादयत् अदोषमावहति इति वाच्यम्, अवयवशक्यार्थोपस्थित्या भवपत्नीप्रत्ययात्, रूढेर्लब्धात्मिकत्वाभावान्न योगापहारित्वमिति भाव ।[1]

× अविमृष्टः प्राधान्येनाऽनिर्दिष्ट विधेयांशो यत्र तत् अविमृष्टविधेयांशम् । उद्देश्यं प्राप्तत्वेनावगतम् । प्राप्तस्य धर्म्मान्तरप्राप्तये कथनमुद्देश । विधेयं, साध्य,

1 'द्धमवगमयति' इति (च. छ. पु)

उद्देश्ये वृथात्व विधेयम् । तच्चात्र कर्मधारयसमासगतत्वेनाविमृष्टमित्यर्थ । बहुव्रीहि समासे प्राद्निर्दिष्ट विधेयं तु विधेयतयैव प्रतीयते । यथा "वपुर्विरूपाक्ष" मित्यत्र अक्षिण वैरूप्यस्य, "निर्मृष्टरागोऽधर" इत्यत्र रागे निर्मृष्टत्वस्य चित्रगुरित्यत्र गवि चित्रत्वस्य च विधेयस्य विधेयतयैव सार्वलौकिकी प्रतीति । न तु कर्मधारये विधेयपाते तदविमर्श इति सत्यम् । किन्तु यदि विधेयमुद्देश्यान्वयि भवति । यथा—अग्रे उदाहरिष्यमाणे, "षष्टबाण इव पञ्चशरस्य" इत्यत्र बाणे उद्देश्येऽन्वयि षष्टत्वं विधेयमविमृष्टम् । यत्र तूद्देश्यतावच्छेदके विधेयमन्वेति तत्र विधेयतयैव प्रतीते आनुभाविकत्वान्न दोष । यथा "एष्वयमत्यन्तपण्डित" इत्यत्र अत्यन्तस्य विधेयस्य उद्देश्यतावच्छेदके पाण्डित्ये एवान्वयो विधेयतयैव प्रतीति । एव 'नितान्तसुन्दरीकान्ता" इत्यत्रापि सौन्दर्येऽन्वितस्य नितान्तत्वस्य एव—

"अनिर्देश्योपभोगस्य रूपस्य मृदुन कथ ।
कठिन खलु ते चेत शिरीषस्येव बन्धनम् ॥"

इत्यत्र उपभोग उद्देश्यतावच्छेदकेऽन्वितस्यानिर्देश्यत्वस्य विधेयतयैव प्रतीतिरनुभाविकी । तथा च प्रकृतेऽपि उच्छूनत्वेन उद्देश्यतावच्छेदकेनान्वितस्य वृथात्वस्य कथमविमृष्टत्वम्, उच्छूनभुजे वृथात्वस्य तु विपदेनैव उक्तत्वात् । यत्तु काव्यप्रकाशकृता अस्यैव श्लोकस्य प्रथमचरणे "न्यक्कारो ह्ययमेव मे यदरय' इत्यत्र वाक्यगत विधेयाविमर्शमुदाहरति । अत्र चरणे उच्छूनत्वमात्रं चानुवाद्य नतु वृथात्वविशेषितम्" इत्युद्धम्, तेन विधेयाविमर्शदोषो विधेये दर्शित ।

वाक्ये दोषप्रदर्शनप्रस्तावे समासगतदोषप्रदर्शनानुपयोगात्समासगतस्य तदुदाहरणस्य "मूढ्नोमुद्वृत्तकृत्ता" इत्यादेरेव दर्शितत्वात् । किन्तु प्रसङ्गात् अभवन्मतयोगदोष एव दर्शित । तथा हि स्वर्गावेर्लुण्ठने उच्छूनत्वमेव जन्यते नतु तद् वृथात्व वृथात्वविशेषितमुच्छूनत्व वा । उच्छूनत्ववृथात्वस्य रामेण लङ्कावेष्टनाद् एव जातत्वात् । अतो विलुण्ठनस्य जनकतासम्बन्धेन वृथोच्छूनत्वेऽनन्वयादभवन्मतयोगदोष एव दर्शित न चाभवन्मतदोषस्य वाक्यमात्रगामित्वमेव तेनोक्त कथ, "समासे कपदे तत्सम्भव" इति वाच्यम् । समासस्य पदत्ववाक्यत्वोभयसत्त्वादसमस्तपदगामित्वाभावस्य तत्राभिप्रेतत्वात् । तथा चान अविमृष्टत्व नास्त्येव इत्यतोऽन्यदुदाहरति ।

अप्राप्तत्वेनावगतम् । अप्राप्तस्य प्राप्तये कथन विधानम् । तथा च—

यच्छब्दयोग प्राथम्य सिद्धत्व चाप्यनूद्यता ।
तच्छब्दयोग औत्तर्म्ये साध्यत्व च विधेयता ॥

य क्रियावान् स पण्डित इत्यत्र क्रियावन्तमुद्दिश्य पण्डितत्व विधीयते । यद्यपि यत्तच्छब्दौ सर्वत्र न प्रयुज्येते तथापि गम्यते तौ । यत्र तु विधेयस्य गुणाभाव तत्राय दोष । अनुवाद्यम्—उद्देश्यस्य पर्य्यायान्तरम् ।

यथा वा—"रक्षास्यपि पुर स्थातुमल रामानुजस्य मे।" अत्र रामस्येति वाच्यम्। (प, आ)

यथा वा—"आसमुद्रक्षितीशानाम्।" अत्र आसमुद्रमिति वाच्यम्।

यथा वा—" यत्र ते पतति सुभ्रु! कटाक्ष षष्ठबाण इव पञ्चशरस्य।" अत्र षष्ठ इवेत्युत्प्रेक्ष्यम्। (फ, इ) ❀

यथा वा—"अमुत्रा भवता नाथ! मुहूर्त्तमपि सा पुरा।" अत्र अमुत्रेत्यत्र नत्र प्रसज्यप्रतिषेधत्वमिति विधेयत्वमेवोचितम्। (ब)

यदाहु —"अप्राधान्य विधेर्यत्र प्रतिषेधे प्रधानता।

(वि, प) यथा वा—**रक्षास्यपि** इति। अत्र शिरश्चालनरूपा पुर स्थातुनालमेवेत्यर्थ। अत्र रामसम्बन्धादेवायमहङ्कार इत्यतो रामसम्बन्धबोधिकाया षष्ठ्या तत्पुरुषे लोपात् रामसम्बन्धस्य विधेयस्याविमर्श। षष्ठीसत्त्वे तु अदोष इत्याह—**अत्रेति**।

(वि, फ) **यथा वेति**—अत्र समुद्रपर्य्यन्तत्वस्य विधेयस्य समासेऽविमर्श। कर्म्मधारये उद्देश्यान्वितविधेयस्याविमर्शमुदाहरति—**यथा वा यत्र ते** इति। उत्प्रेक्षया विधेयम्।

(वि, ब) नञ्समासेऽप्युदाहरति—**अमुत्रेति**। **प्रसज्यप्रतिषेधत्वमिति**—प्रतियोगिनमसमासेन प्रसज्य प्रगृह्यीकृत्य प्रतिषेधत्वमत्यन्ताभावत्वमित्यर्थ। तथा च भोजनाभावस्य एवात्र विधेयत्वात् असमासेनैव तथात्व बोधयितुमुचितमित्याह—**विधेयत्वमेवोचितमिति**। समासे तु तद्विशेषत्वस्य एव प्रतीत्या पर्य्युदासत्वमेव तत्र तु विधेयस्य प्रतिषेधो न प्रतीयते इत्यतस्तस्याविमर्श इति भाव।

(वि, भ) असमासे एव नञर्थस्य विधेयत्वरूप प्राधान्य, प्रतियोगिनस्त्वप्राधान्य तादृशस्थले नत्र प्रसज्यप्रतिषेधत्वम् इत्यत्र सम्वादमाह—**अप्राधान्यमिति**।

(लो,आ) विषयव्याप्तये उदाहरणान्तराणि दर्शयति—**रक्षासीति**। इद लक्ष्मण वचनम्। **रामस्येति**। न खलु तस्य केवलस्य मुख्यता किन्तु रामसम्बन्धिन इत्यर्थ।

(लो इ) **षष्ठ** इति—अत्र उत्प्रेक्षाविषयत्वेन विवक्षितस्य षष्ठपदस्य तत्पुरुष समासे पूर्वनिक्षपो न युक्त इत्यर्थ। विधेयत्वमेवोचित नतु तत्पुरुषसमासेन गुणीकृत्याऽनुवाद्यत्वप्रत्यायनमिति भाव।

(लो,ई) कोऽसौ प्रसज्यप्रतिषेध इत्यत आह—**अप्राधान्यमिति**। जुगोपात्मानमत्रस्त इत्यादौ इव विधे प्राधान्य यत्र नास्ति। नवजलधर इत्यादिसमनन्तरो-

---

❀ मदनस्य पञ्चशरत्वात् षष्ठस्यैव शरस्यासम्भव तेन तदीयशरस्य षष्ठत्वम् एव उत्प्रेक्षणीयम्। तच्च षष्ठ्य कर्म्मधारयसमासे परपदार्थप्राधान्याद् गुणीभूतमिति विधेयत्वाप्रतीति।

प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥" (ई)

(यथा—"नवजलधर सम्बद्धोऽयं न दृप्तनिशाचरः।" उक्तोदाहरणे तु तत्पुरुष समासे गुणीभावेन नञ पर्य्युदासतया निषेधस्य विधेयतयानवगम। (भ))

यदाहु—"प्रधानत्व विधेर्यत्र प्रतिषेधेऽप्रधानता।

पर्य्युदास स विज्ञेयो यत्रोत्तरपदे न नञ् ॥" (म)

तेन—जुगोपात्मानमत्रस्तो भेने धर्म्ममनातुर।

विधे भावस्य प्रतियोगिन इत्यर्थ। प्रतिषेधे नार्थेऽसमासवशात् प्रधानता, विधेयता प्रतीयते इति शेष। तथात्व कीदृशप्रयोगमित्यत्राह—**क्रियये**ति—न पचतीत्यादौ आख्यातक्रियया सह समासाभावात्, क्रियेत्यनेन असमास एव लक्ष्यते। तथा च असमासे यत्र नञ इत्यर्थ। अत एवात्र मुक्तक्रियया नञ साहित्येऽपि असमासाभावात् न प्रसज्यप्रतिषेधता। एव नवजलधर इत्यत्रापि नञ क्रियासाहित्याभावेऽप्यसमासात् प्रसज्यप्रतिषेधता। अमुक्तेत्यत्र तु समासात् न तथात्वमित्याह—**उक्तोदाहरणे** त्विति। समासवशात् तथात्वानवगमेन पर्य्युदासत्वमेव।

(**वि, म**) इत्यत्र सम्वादमाह—**यदाहुरि**ति। प्रधानत्वमुत्तरपदप्रधानतत्पुरुषवशाद् विशेष्यत्वम्। विधेयप्रतियोगिभूताभावस्य प्रतिषेधे नञोऽप्रधानता समासवशात् अप्रतीयमानविधेयतारूपाऽप्रधानता इत्यर्थ। तादृशस्थल दर्शयति—**यत्रोत्तरपदे** इति। पद चात्र स्थानपरम्। प्रतियोगिपदोत्तरस्थाने यत्र नञ इत्यर्थे यत्रोत्तरपदे अर्थात् असमासेन पर्य्युदासो ज्ञेय इत्यर्थ। न पचतीत्यत्र उत्तरत्र नञ्सत्त्वात्तु न पर्य्युदास इत्यर्थ। इदमत्रावधेयम्—प्रतियोगिपदोत्तरनञसत्त्वे समासासम्भवात् यत्रोत्तरेत्यादिना समासाभाव एव उपलक्ष्यते। तथा च योऽसमासस्थ तथा नञ न भवति किन्तु समासस्थ एव पर्य्युदास इत्यर्थ। अन्यथा न पचतीत्यत्र, न दृप्त निशाचर इत्यत्र पूर्वपतितस्यापि नञ पर्य्युदासत्वात् यत्रोत्तरेत्यादे प्रलापापत्ते। यद्यप्यसमासस्थस्यापि नञो नेत्र पर्य्युदासत्व तथापि समासे पर्य्युदासत्वनियम स्फुट एव। नामान्वयिन पर्य्युदासत्वम् असमासस्थस्य क्रियान्वयिन प्रसज्यप्रतिषेधत्वमिति तु नियत बोध्यम्। समासे तु दन्तक्रियान्वयिनोऽपि पर्य्युदासत्वात् असमस्तेति क्रियाविशेषण समास पर्य्युदासत्वमेव। तत्र च विवेकन तदुत्तर सामञ्जस्यमेव।

(**वि, य**) इत्यस्य उदाहरण दर्शयति—**जुगोपे**ति एव च नञ पर्य्युदासत्वे

त्वदाहरणवत् यत्र प्रतिषेधस्य प्राधान्य क्रियया वाक्योक्त्या अध्याहार्य्यया वा अस्ति भवत्यादिरूपया पर्य्युदासतापाता पर्य्युदासयोगक्षेमापत्त।

(**लो, उ**) **प्रधानत्वमि**ति—प्रधानत्व जुगोपात्मानमित्यादाविव अप्रधानता अत्रैवोदाहरणे। अत्र, अत्रस्तादौ इत्यर्थ। नोत्तरपदे किन्तु पूर्वपदे। अमुक्तेत्यत्रापि अनन्तर नञ समासान्तरप्रवेशेऽयाति शेष।

अगृह्णुरादृते सोऽर्थानसत्र सुरसमन्वभूत् ॥

अत्राप्रस्तुतार्थानुद्यातमगोपनादि एव विधेयमिति नञः पर्य्युदासतया गुणभावो युक्त । (उ, य)

ननु "अश्राद्धभोजी ब्राह्मण" "असूर्य्यम्पश्या राजदाराः" इत्यादिवत् अमुक्त्वेत्यत्रापि प्रसज्यप्रतिषेधो भविष्यतीति चेन्न । अत्रापि यदि भोजनादिरूपक्रियांशेन नञः सम्बन्ध स्यात्तदैव तत्र प्रसज्यप्रतिषेधत्वं वक्तुं शक्यम् । न च तथा विशेष्यतया प्रधानेन तद्भोज्यार्थेन कर्त्रंशेनैव नञः सम्बन्धात् । (ऊ)

यदाहु —"श्राद्धभोजनशीलो हि यत. कर्त्ता प्रतीयते ।
न तद्भोजनमात्रं तु कर्तरि[1] णिनेर्विधानात् ॥" (ऋ, ऋ)

तदर्थस्य समासे विधेयत्वाप्रतीति· इत्याह । युक्त इत्यत्र विधेयस्य नञर्थस्य अविमर्श एवेति साधितम् ।

(चि, र) अश्राद्धभोजी, असूर्य्यम्पश्या इत्यत्र समासेऽपि प्रसज्यप्रतिषेधरूपयो श्राद्धभोजनाभावसूर्य्यदर्शनाभावयो· प्रतीतिदर्शनात् तद् दृष्टान्तेन अमुक्त्वेत्यत्रापि भोजनाभावरूपस्य प्रतिषेधस्य विधेयस्य विधेयत्वापत्तिमाशङ्कते—नन्विति । समाधत्ते, चेन्नेति ।

क्रियान्वयिन एव प्रसज्यप्रतिषेधत्वनियमः । अश्राद्धित्यनयोरपि यदि भोजनदर्शनक्रिययोर्नञर्थस्याऽन्वय स्यात् तदैव तथात्वापादनं सम्भवति । तयोरन्वय एव तत्र नेत्याह—न च तथेति । तर्हि कुत्रान्वय इत्यत्राह—विशेष्यतयेति । कर्त्तरि विहिताभ्या कृत्प्रत्ययाभ्यामुपस्थापितेन भोक्तृरूपकर्त्रंशेन च सहैव नञो नञर्थस्य सम्बन्धात् इत्यर्थ । कुत इत्यत्राह—कर्त्तरि णिनेरिति । भोज्यार्थेन इत्यस्य उपलक्षणतया दर्शनकर्त्रंशेनेत्यपि बोध्यम् । कृत्प्रत्ययेन कर्त्तुपस्थानात् श्राद्धभोजी इत्यत्र भोजनकर्त्तैव प्रतीयते इत्यत्र सम्वादमाह—यदाहुः—श्राद्धभोजनेति । अत्र

(लो, ऊ) भोजनदर्शनरूपक्रियांशे । कर्त्रंशेनेति । भुजिदृशो. कर्त्रर्थविहितणिनिप्रत्ययान्तत्वागतेन । यदि क्रियांशे नञ सम्बन्ध स्यात् तदैव प्रसज्यप्रतिषेध स्यात् "क्रियया सह यत्र नञ्" इति वचनात् । इह तु श्राद्धभोजनशीलादयमन्य इति कर्त्रंशेनैव सम्बन्धात् नञ पर्य्युदासत्वमेवेति । तदभोज्यर्थेनेत्युपलक्षण तददर्शयेंनेत्यपि बोद्धव्यम् ।

(लो, ऋ) अनार्थे आचार्य्यसम्मतिमाह—यदाहुरिति । अत्राश्राद्धभोजीत्यत्र तद्भोजनमात्रम् । अश्राद्धभोजनमात्रम् । सम्बन्ध इत्यनन्तरम् अभिमत इति शेष । इह तु भाष्यकारादिमतमाश्रित्य क्रियान्वयाशापेक्षया प्रसज्यप्रतिषेधार्थस्वीकारेऽपि अमुक्त्वेत्यादौ क्रियामात्रप्राधान्यात् समासो नोपपद्यत एव ।

---

1 'कर्तरीनेर्विधानत.' इति (क. ख. पु)

अमुक्तेत्यत्र तु क्रिययैव सह सम्बन्ध इति दोष एव । * (ल)
एते च क्लिष्टत्वादय समासगता एव पददोषा । (व)
वाक्ये तु श्रवत्व यथा—(श, ऋ)

कृत्प्रत्ययादेव दर्शनकर्त्तारो रात्रदारा अपि प्रतीयन्ते इत्यपि बाध्यम् । तथा च तयोरपि श्राद्धभाजिभिन्नसूर्यदर्शकभिन्नत्वम् इत्येव पर्य्युदास एव प्रतीयते इत्यर्थ । तथा च समासस्थतत्रत्र—दृष्टान्तेनाप्यमुक्ता इत्यत्र समासस्थनञ पर्य्युदासत्वमव सिध्यतीति मनसिकृत्य अमुक्तेयत्र भात्रीत्यत किञ्चिन्मात्र वलक्षण्य दर्शयति ।

(वि,ल)अमुक्तेत्यत्र त्विति । अभात्रीत्यत्र समासस्थक्तत्रन्वय । अमुक्तेत्यत्र तु समासस्थक्रियायामेवान्वय इत्येतन्मात्र विशष । उभयत्रापि पर्य्युदासत्वमेवेति भाव । न पचति न निद्राति इत्यन्वयें कर्त्तुरपस्थानेऽपि निद्रापाककृत्योरेवान्वयात् । अथ नियमाभावेऽपि तात्पर्य्यवशात् तत्र कर्त्तव्येव नञर्थान्वय इति चेन्न । तादृशतात्पर्य्यस्य एव तत्राभावात् । श्राद्धभोजनशीलान्वये तु श्राद्धभोजनशीलभिन्न इति प्रतीतौ न कदाचित् भोजनकृत् अपि प्रतीयते इयतो ग्रन्थकृतानवधानादेव इत्थ समाधान कृतम् । वय तु तात्पर्य्यवशात् श्राद्धपद श्राद्धमात्रपर, तत्रैव च नञर्थान्वय तथा च श्राद्धमात्रभोजीत्यर्थलाभे मात्रार्थवशात् श्राद्धभोजनशीललाभ इति भ्रम ।

(वि, व) एते चेति । क्लिष्टत्वविरुद्धमतिकृत्त्वाविमृष्टविधेयाशभावाश्रय इत्यर्थ । समासगता एवेति नतु असमासेऽपि पददोषा इत्यर्थ । अन्वितान्वयाधीन क्लिष्टत्वस्य समास विना पदगतत्वासम्भवात् । अनासत्त्यधीनक्लिष्टत्वे तु समासस्य एवासम्भवात् पदगतत्व नास्ति । विरुद्धमतिकृत पदार्थान्तरान्वयेनैव दुष्टत्वात् अविमृष्टविधेयाशस्य चानुवाद्यविधेयार्थकपदद्वयघटितत्वात् वा समास विना पदत्वासम्भवात् ।

(वि, श) एषा त्रयोदशाना पदगतत्व दर्शयित्वा वाक्यगत तु दर्शयितुमार भते । **वाक्ये तु श्रवत्व यथेति** । एवम् एकवाक्ये पदद्वयावलम्बित्वे न वाक्यदोषत्वम् ।

(वि, ऋ) क्लिष्टत्वादय इत्यादिशब्दाद् विरुद्धमतिकृत्त्वमविमृष्टविधेयाशत्व च । अत श्रुतिकटुत्वादीना क्वचित् पदाशनिष्ठत्वेऽपि बहुव्यापित्वेन वाक्यगतत्व बोद्धव्यम् ।

---

* अमुक्तेत्यत्र तु नञ क्रिययैव सम्बन्ध । अन्यथा—मुहूर्त्तमपीत्यस्यान्वयो न स्यात् । अत्र अमुक्तेत्यस्यानुवाद्यत्व अमुक्ता सती किमकरोदिति विधेयाकाङ्क्षत्वाद् दोष एव । अतोऽत्र समासे विधेयस्य गुणाभावादनवगमाद् दोष एव । विधेयान्तरसद्भावे तु न तथा दोषो भवेदित्यर्थ ।

"स्मरार्त्त्यन्ध कदा लप्स्ये कार्त्तार्थ्यं विरहे तव ।" (प) ×
"कृतप्रवृत्तिरन्यार्थे कविर्वान्त समश्नुते ।" (लृ) ✓
अत्र जुगुप्साव्यञ्जनेनारसोद्भावता । (स)
"उद्यत्कमललौहित्यैर्वक्त्राभिर्भूषिता तनु ।"
अत्र कमललौहित्य पद्मराग । वक्त्राभि वामाभिरिति नेयार्थता । (ह) *
"धम्मिल्लस्य न कस्य प्रेक्ष्य निकाम कुरङ्गशावाक्ष्याः ।
रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानस शोभाम् ॥"
अत्र धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानस न रज्यतीति सम्बन्ध क्लिष्ट ।(क)

(वि, प) स्मरार्त्त्येति—स्मरार्त्त्याऽऽधोऽहमित्यर्थ । अत्र आर्त्त्येति कार्त्तार्थ्य मिति पदद्वयगामित्वाद् वाक्यदोषता ।

(वि, स) जुगुप्साश्लीलमाह—कृतप्रवृत्तिरिति । अन्यार्थे अन्यकविर्निव द्धार्थे कृतयत्न । अत्र प्रवृत्तिशब्दस्य पुरीषव्यञ्जनया, वान्तशब्दस्य च उद्गीर्णवाचक-तया जुगुप्सा । व्यञ्जनेन इत्यत्र जननेन इत्यर्थ ।

(वि, ह) सत्त्वेपायाऽन्यान् दोषानुपेक्ष्य वाक्ये नेयार्थदोषमाह—उद्यदिति । उद्यद्विदीप्यमानै कमललौहित्यै पद्मरागमणिभि करणभूतै, वक्त्राभि वामाभि स्त्रीभि वक्त्रीभिस्तनुर्भूषिता इत्यर्थ । अत्रेति । कमललौहित्ये तनुभूषणस्य बाधितत्वात्तत्तुल्य पर्य्यायार्थक पद्मरागपदमत्र लक्ष्यते । लक्षितेन पदेन च पद्मरागमणिरुच्यते इत्यर्थ न च प्रत्ययाना कृत्यर्थान्वितस्वार्थबोधकत्वात् कथमत्र तृतीयया पद्मरागे करणता बोध्यते इति वाच्यम्, ईदृशस्थले प्रकृत्यार्थेऽपि तत् स्वीकारात् । वक्त्राभिरित्यत्र च वामापदे लक्षणा । तेन च स्त्रीरूपार्थ उपस्थाप्यते । वस्तुतस्तु वामावक्त्रपदयो पर्य्या-यैक्यदर्शनस्य शक्तिभ्रमबीजस्य सत्त्वात् अत्र अवाचकत्वमेव युक्तम् ।

(वि, क) क्लिष्टत्वमाह—धम्मिल्लस्य इति । "धम्मिल्ल सयता कचौ" निकामम् अतिशय रज्यतीति अन्वय । बन्धव्युत्पत्ति बन्धविन्यास । शेष पूर्ता-वेव व्याख्यातम् ।

(लो, लृ) प्रवृत्ति, प्रसरण, पुरीषोत्सर्गश्च । वान्त कथितं, भक्षितोद्गीर्ण च ।

+ स्मरादार्त्ति (पीडा) तया अन्ध ।

* अत्र वक्त्रशब्देन एकपर्य्यायतासम्बन्धेन वामाशब्दो लक्ष्यते । तद्वत्कमल शब्देन पद्मशब्द लौहित्यशब्देन रागशब्द एकपर्य्यायतासम्बन्धेन लक्ष्यते । पर-मत्र रूढिप्रयोजनाभावान्नेयार्थता । केचिदिमा लक्षितलक्षणामाहु —तेषामयमभि-प्राय —वक्त्रादिशब्दैर्लक्षितो यो वामादिशब्दस्तस्य वाच्यवाचकतासम्बन्धेन नार्य्या-दयोऽपि लक्ष्यते । न च लक्षितेन वामाशब्देन नार्य्यर्थोऽभिधीयता किं लक्षणयेति वाच्यम्, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधनताव्युत्पत्तिभङ्गप्रसङ्गात् ।

"न्यक्कारो ह्ययमेव मे यदरयः" इत्यादि ।

अत्र चायमेव न्यक्कार इति न्यक्कारस्य विधेयत्वं विवक्षितम् । तच्च शब्दरचनावैपरीत्येन गुणीभूतम् । रचना च पदद्वयस्य विपरीतेति वाक्यदोषः । (ख, ए) *

आनन्दयति ते नेत्रे योऽसौ सुभ्रु ! समागतः ।

इत्यादिषु " यत्तदोर्नित्यसम्बन्धः " इति न्यायादुपक्रान्तस्य यच्छब्दस्य निराकाङ्क्षत्वप्रतिपत्तये तच्छब्दसमानार्थतया प्रतिपद्यमाना इदमेतदद शब्दा

(वि, ख) अविमृष्टविधेयांशभावमाह—**न्यक्कार** इति । **शब्दरचने**ति । विधेयवाचकपदस्य उद्देश्यवाचकपदात् पूर्वनिर्देशेन इत्यर्थः । अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत् इति नियमादिति भावः । अत एव वह्निमान्पर्वत इति न प्रयुज्यते । ननु विधेयपदस्य पूर्वनिपातेन दोषे पददोषत्वमेव उचितमित्यत आह—**रचना चे**ति

(वि, ग) विधेयार्थकस्यादःशब्दस्य उद्देश्यार्थकात् यच्छब्दात् परनिपातेऽपि सान्निध्यवशात् विधेयत्वाप्रतीत्या एतद्दोषमुदाहरति—**आनन्दयती**ति । अत्र यस्ते नेत्रे आनन्दयति असौ समागत इति बोधे यच्छब्दार्थोऽनुवाद्योऽदःशब्दार्थो विधेयः,

---

(लो, ए) **न्यक्कार** इति—अयमाशयः, तत्र धर्म्मिणमुद्दिश्य साध्यधर्म्मो विधीयते इत्यनुसारेण प्रथममनूद्य विधेयो न्यक्कारः पश्चान्निर्देष्टुमुचितः । अन्वयवैपरीत्येनाविमृष्टविधेयांशो दोषः । अत एव शब्दोऽनित्य इति वक्तव्येऽनित्यः शब्द इति वचनेन च प्राप्तं निग्रहस्थानमाहुः । तथा हि कथमत्र वाक्यदोष इत्यत आह—**रचने**ति । पदद्वयस्य विपरीततायामेवेति पदं निर्दिश्य पश्चान्न्यक्कार इति पदस्य च पश्चान्निर्देश्यस्य प्रथमनिर्देशात् । किंच दोषस्यास्य बहुव्यापित्वेन वाक्यदोषत्वम् । वृथोच्छूनैरित्यत्रापि अवस्थानसत्त्वे पूर्वमत्र पददोषत्वमुदाहृतं तत्र न्यक्कार इत्याद्यनपेक्षा ग्रन्थगौरवभयात् ।

(लो, ऐ) **आनन्दयती**ति । य आनन्दयति असौ समागत इति सम्बन्धः । नित्यसम्बन्धः एकं विना अपरस्य साकाङ्क्षत्वात् । यच्छब्दस्य निराकाङ्क्षत्वप्रतिपत्तये प्रतिपद्यमाना इदमेतदद शब्दाः इत्यनेन तेषां सर्वत्र तच्छब्दाभिधानमिति शेषः ।

---

* अत्र प्राप्तमेवाविसद्भावमनुवाद्य अप्राप्तं न्यक्कारत्वं विधीयते । अतोऽनुवाद्यस्यैव पूर्वनिपातो युक्त । "यच्छब्दयोगः प्राथम्य"मित्युद्देश्यस्य लक्षणात् । अस्यार्थः यच्छब्दे यस्य योगः यस्य च प्रथमनिर्देशस्तदुद्देश्यम् । यथा—यो धूमवान् स वह्निमान्, पर्वतो वह्निमान् धूमात् ।

अतोऽयमेवेति प्रथममनूद्य विधेयो न्यक्कार. पश्चान्निर्देष्टुमुचितः । तद्वैपरीत्येनात्र दोष. । "अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत् । न ह्यलब्धास्पदं किंचित् कुत्रचित् प्रतितिष्ठति ॥" इति वृद्धवचनात् ।

विधेया एव भवितुं युक्ता । (ङ) यत्र तु यच्छब्दानिकटस्थाया अनुवाद्यत्वप्रतीतिरुक्ता तच्छब्दस्यापि हि यच्छब्दनिकटस्थितस्य प्रसिद्धपरामर्शित्वमात्रम्(ओ)* यथा—"य स ते नयनानन्द कर सुभ्रु ! स आगत ।"(ग) +

यच्छब्दव्यवधानेन स्थितास्तु निराकाङ्क्षत्वमवगमयन्ति—(औ) यथा—"आनन्दयति ते नेत्रे योऽधुनाऽसौ समागत ।'

तस्याविमर्शं ग्राहयितुम् अद शब्दस्य विधेयतामिव दर्शयति—यत्तदोरिति । उपक्रान्तस्येति । प्रथमादिष्टस्येत्यर्थ । तस्य आकाङ्क्षाया पूरकत्वादेव तदस्त्र नित्यसम्बन्ध । आकाङ्क्षापूरणरूपवीप्सागर्भत्वात् । इदमदसोरपि तत्र नित्यसम्बन्ध इत्याह—तच्छब्दसमानेति । तथा च तच्छब्द इव इदमेतदद शब्दा अपि आकाङ्क्षापूरकत्वेन विधेयार्थकत्वेन विधेया भवितुं युक्ता इत्यर्थ । ततश्चादस् शब्दार्थो ऽत्र विधयाऽप्यविमृष्ट इत्याह—अत्र इति । अनुवाद्यत्वस्य प्रतीतिरेवाऽत्राविमर्श । न केवलमेवभूतोऽद शब्द एव इत्थ । अपि तच्छब्दोऽपि इत्याह—तच्छब्दस्यापि । हिशब्द एवार्थ । प्रसिद्धपरामर्शित्वनात्रमेवेत्यर्थ । य स ते इति य प्रसिद्ध इत्यर्थ ।

(वि, घ) निराकाङ्क्षत्वमिति । निराकाङ्क्षत्वगमकस्यैव च विधेयत्वाप्रतीति विषयत्वमित्यतस्ततो नाविमर्श इति भाव । आनन्दयतीति अत्र अधुनापदेन व्यवधानान्नाविमर्श ।

तथाहि—"अरालान्तश्चपलतिपक्ष्मवचननीलाब्जयुगल
स्थलस्फूर्जत्फुल्लस्मुविलसदलिगम्पात उपरि ।
विन दोषासङ्ग सततपरिपूर्णाखिलकल
कुल प्राप्तश्चन्द्रो विगलितकलङ्क मुमुखि ! ते ॥"

अत्र हि अदस् शब्दस्तच्छब्दार्थमाह । एवमिदमेतदावपि ।

(लो, ओ) अत्र त्विति । योऽसावित्यत्रानुवाद्यत्वप्रतीतिरुक्तदद शब्द प्रसिद्धिपरामर्शित्वादित्यर्थ ।

(लो, औ) निराकाङ्क्षत्वमवगमयति इति । तथा सति तेषा विधयत्व स्फुटमवगम्यत इति भाव ।

---

* असौ इति तत्परामर्शको विधेय, परमत्र न तथा प्रतीयते कुत्र कथम् इति चेत् यत्पदसहितानां तदादिशब्दाना यत्पदार्थस्यैव विशेषणतया प्रतीतिर्नतु विधेयतया । अतो विधेयार्थस्य तच्छब्दस्योपादान विना साकाङ्क्षत्वमेव स्थितम् । तदे वोदाहरणेन स्फुटीकरोति—यथेति ।

+ अन्यथा असौ इत्यनेन तच्छब्दलाभे तच्छब्ददानस्य आनर्थक्य स्यात् ।

एवमिदमादिशब्दोपादानेऽपि । (घ) यत्र च यत्तदोरेकस्यार्थत्वं सम्भवति तत्रैकस्योपादानेऽपि निराकाङ्क्षत्वप्रतीतिरिति न क्षतिः । *

तथा हि यच्छब्दस्योत्तरवाक्यगतत्वेनोपादाने सामर्थ्यात् पूर्ववाक्ये तच्छब्दस्यार्थत्वम् ।

यथा—"आत्मा जानाति यत्पापम् ।" एवम् (अ)

"यं सर्वशैलाः परिकल्प्य वत्सं
मेरौ स्थिते दोग्धरि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधीश्च ॥ इत्यादावपि । (ङ)

तच्छब्दस्य प्रक्रान्तप्रसिद्धानुभूतार्थत्वे यच्छब्दस्यार्थत्वम् । क्रमेण यथा—

"स हत्वा वालिनं वीरं तत्पदे चिरकाङ्क्षिते ।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत् ॥"
" स वः शशिकलामौलिस्तादात्म्यायोपकल्प्यताम् ।"
"तामिन्दुसुन्दरमुखीं परिचिन्तयामि ।" (च, छ)

(वि, ङ) द्वयोरुपादाने एव एष विचारः । एकस्यैवोपादाने तु नायं विचार इत्याह—**यत्र च यत्तदोरिति** । आर्थत्वं पदानुपादानेऽपि तस्यार्थवशाल्लभ्यत्वमित्यर्थः । **न क्षतिरिति** । विधेयत्वाप्रतीतिरूपा क्षतिः नास्ति इत्यर्थ ।

आत्मेति । यत्पापमर्थात् स्वनिष्ठं तदात्मा जानाति इत्यर्थ.—**एवं यं सर्वेति** । अत्र सोऽस्तीति बोध. । न चात्र कथमुत्तरस्थत्वम् इति वाच्यम्, कुलक्त्वेन तत्पूर्ववाक्यार्थतत्पदेन सहाऽस्यान्वयात् तद्वाक्योत्तरवाक्यस्थत्वात् ।

(वि, च) यत्तदोर्नित्यसाकाङ्क्षत्वेन तच्छब्दमात्रोपादाने यच्छब्दस्यार्थत्वं प्रसङ्गाद्दर्शयति—**तच्छब्दस्य इति** । **स हत्वेति**—स प्रक्रान्तो रामस्तत्पदे तत्स्थाने । धातोरिति बोधनम् । धातोः कार्यं यथा आदेशेन क्रियते तथा वालिकार्यम् अपि सुग्रीवेण कर्त्तव्यमित्यर्थः । **स वः शशिकलेति** । स प्रसिद्ध । **तामिन्दिति** । तामनुभूताम् ।

(लो, अ) उपादाने साक्षादुक्तौ सामर्थ्यात् तच्छब्दस्यार्थतयाक्षेपलभ्यत्वात् । **आत्मेति** । तदात्मा जानातीत्यर्थ. ।

---

* ननु यत्तदोर्नित्यसम्बन्ध इति को नियम । व्यभिचारदर्शनात् इति चेत् न । तत्र विषयविभागं दर्शयति । यत्तदोः परस्परापेक्षित्व नियतमेव तत्र यत्तदोर्द्वयोरुपादाने शाब्दः । एकस्य द्वयोर्वाऽनुपादाने त्वार्थः । अनुपात्तस्यापि सामर्थ्यादाक्षेपादर्थलाभः । एवमुभयत्र न दोष. ।

यत्र च यच्छब्दनिकटस्थितानामपीदमादिशब्दाना भिन्नलिङ्गविभक्तित्वं तत्रापि निराकाङ्क्षत्वमेव। क्रमेण. यथा—

"विभाति मृगशावाक्षी येद भुवनभूषणम्।
इन्दुर्विभाति यस्तेन दग्धा पथिकयोषित ॥" (छ)

क्वचिदनुपात्तयोर्द्वयोरपि सामर्थ्यादवगमो यथा—(झ)

"न मे शमयिता कोऽपि भारस्येत्युर्वि! मा शुच।
नन्दस्य भवने कोऽपि बालोऽस्यद्भुतपौरुष ॥"

अत्र योऽस्ति स ते भारस्य शमयितेति बुध्यते। (ञ)

"यद् यद् विरहदु ख मे तत् कोऽप्यापहरिष्यति।"

(वि, छ) **विभातीति**, या भुवनभूषणमित्यर्थ। यत्र य आधारस्तदधिकरणमित्यत्र इव इद पदे विधेयस्य भूषणस्य लिङ्गम्। विभक्तिभेदे उदाहरति—**इन्दुरिति**। य इन्दुर्विभाति तेन पथिकयोषितो दग्धा इत्यर्थ। एवमपि सारान्वितस्यापि तदादेर्निराकाङ्क्षत्वमेव। यथा "शीताशुरपि य सोऽपि दग्धवान् पथिकाङ्गना।" इति।

(वि, ज) **अनुपात्तयोर्द्वयोरिति**। क्षत्रियभारादूनामुर्वी प्रति वाक्यमिदम्। हे उर्वि! मे भारस्य शमयिता कोऽपि न, एव मा शुच। यतो नन्दस्येत्यादि। **अत्रेति**। इद च द्वयोरनुपादानोदाहरणतया न युक्तमुदाहृतम्। व्याख्यातं च तच्छब्दार्थावगम विनापि यथोक्तबालकसत्त्वस्य यत इति उत्तरवाक्यगततया कारणहेतुत्वावगमाद् उत्तरवाक्यगतयच्छब्दस्य तच्छब्दानपेक्षणात्। किन्तु—

"ये नाम केचिदिह न प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्न।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा
कालो ह्यय निरवधिर्विपुला च पृथ्वी ॥

इति यो भवभूतेरहङ्कारश्लोक काव्यप्रकाशकृता यत्तदोर्द्वयोरनुपादानोदाहरण दर्शित तदेवोदाहरण बोध्यम्। तत्र उत्पत्स्यमानस्य धर्मिणो विशिष्यानिश्चितत्वात् यत्तद्भ्या सामान्यत एव य उत्पत्स्यते त प्रति यत्न इत्युक्तौचित्यात्।

(वि, झ) यच्छब्दस्योत्तरवाक्यगतत्वे एव तच्छब्दस्य निराकाङ्क्षत्व दर्शितम्। पूर्ववाक्यगतत्वे उत्तरवाक्यगत तच्छब्द विना साकाङ्क्षमित्यनुभवसिद्धम्। तथापि वक्ष्यितयच्छब्दस्थले एक्यत्पदाभावश्चैव एवतत्पदेन निवर्त्तताम् अन्यद् यत्पद

(लो, आ) **स इत्येति**। स इत्यनेन य प्रकृतो रामचन्द्र स इति। तत्र स इत्यनेन य सकललोकप्रसिद्ध सर्वज्ञत्वादिगुणविशिष्ट तादात्म्यापन्नात्मन एवीभावापत्तये। ता या तद्गुणविशिष्टतया अनुभूतेत्यादिषु यद आर्थत्वम्।

(लो, इ) द्वयो उपात्तवस्तुविषयत्वेनोपकल्पितयोर्यत्तदो।

इत्यत्रैको यच्छब्द साकाङ्क्ष इति न वाच्यम्। तथा हि यद् यदित्यनेन येन केनचिद्रूपेण स्थित सर्वात्मक वस्तु विवक्षितम्। तथाभूतस्य तस्य तच्छब्देन परामर्श। (झ)

एवमन्येषामपि वाक्यगतत्वेनोदाहरणं बोध्यम्। (ई) पदांशे श्रुतिकटु-र्यथा—

"तद्गच्छ सिद्धयै कुरु देवकार्य्यम्।" (ञ) †

"धातुमत्ता गिरिर्धत्ते।" अत्र मत्ताशब्दः क्षीबार्थे निहत[1]।

"घण्यंते किं महासेनो विजेयो यस्य तारक।"

तु साकाङ्क्षमेव स्यात्। तथा च—यद् यद् विरहदु स मे तदित्यत्र एक यत्पद साकाङ्क्ष स्यात् इत्यशङ्क्य समाधत्ते—इति न वाच्यमिति। तथा हि इति। येन केनचित् इत्य स्यायमभिप्रायो वीप्सया तावत् समस्ता व्यक्तय उपस्थाप्यन्ते। ता व्यक्तय एव तत्पदेन च परामश यदि वक्तुस्तात्पर्य्यं तदा एकतत्पदेनैव समस्तव्यक्तिपरामर्शात् यत्पदद्वयाकाङ्क्षापूरणात् न तत्पदे वीप्सा। यथा दार्शतोदाहरणे। तदाह—येन केनचिदिति। तथा भूत तु खत्वसामान्यावच्छिन्नम्। यदि वाप्सितयत्पदद्वयेन तद्व्यक्तित्वेन एव उपस्थापयितु वक्तुस्तात्पर्य्यं तदा भवत्येव तत्पदेऽपि वाप्सा। यथा 'य य व्यतीयाय पतिं वरा सा विवर्णभाव स स भूमिपाल।" इत्यत्र "या या प्रिय प्रेक्षत वातरक्ता सा सा हिया नम्रमुखी बभूव।" "यो य पाञ्चालगोत्रे तस्य तस्यान्तकोऽहम्॥" इत्यत्र च।

(वि, ञ) तद्गच्छ सिद्धयै कुरु देवकार्य्यमित्यत्र सिद्धयै इति श्रुतिकटु।

(लो, ई) अन्येषाम् अनुचितार्थत्वादीनाम्। तत्र अप्रयुक्तस्य वाक्यगतत्वे यथा—'स पातु वो दुश्च्यवनो भावुकाना परम्पराम्।" अत्र दुश्च्यवन इन्द्र। ग्राम्यत्वस्य यथा—'ताम्बूलभृतगल्लोऽय भल्ल जल्पति मानुप।" निहतार्थस्य यथा—सायकसहायवाहैरित्यादि। एवमन्यदपि। अत्र पददोषानन्तर पदांशदोषाणाम् उद्देश्यक्रमप्राप्तत्वे येषा वाक्यदोषाणा पददोषसजातीयत्वेन प्रथम कथन, "न्यक्कारो ह्ययमेव" इत्यादेश्च पददोषजातीयत्वेऽपि अविमृष्टविधेयाशस्य विशेषत्वेनैतत् प्रस्ताव एवोदाहरणम्। एव धम्मिल्लस्येत्यादेरपि क्लिष्टविशेषत्वेन क्लिष्टप्रस्ताव। निरर्थकत्वादीनाञ्च पदमात्रानिष्टत्वेन पदांशनिर्देश सूत्रस्य सुगमप्रतिपत्तये।

---

† प्रकृतिप्रत्ययोर्मिलनेन यत्र दोषप्रतिभान तत्र पददोषत्वम्। एकतरस्मिन् दोषभाने पदांशदोषत्वम्। अतोऽय विभाग —एकत्र पदे बहुवर्णकदुत्वे पददोषत्वम्, अल्पवर्णकदुत्वे पदांशदोषत्वम्, एकत्र वाक्ये बहुपदकदुत्वे वाक्यदोषत्वमिति।

1 'निहित' (इति ट पु)

अत्र विजेय इति कृत्यप्रत्यय क्षप्रत्ययार्थेऽवाचक । (ट, उ) +

"पाणि. पल्लवपेलव ।" पेलवशब्दस्य आद्याक्षरेऽश्लीले । (ऊ)

"संग्रामे निहता शूरा वचोबाणत्वमागता ।" अत्र वच शब्दस्य गी शब्दवाचकत्वे नेयार्थत्वम् । (ठ)

तथा तत्रैव बाणस्थाने शरेति पाठे । अत्र पदद्वयमपि न परिवृत्तिसहम् । जलध्यादौ तूत्तरपद वाडवानलादौ पूर्वपदम् (ड, ढ)

(वि, ट) क्षप्रत्ययार्थे अवाचक इति। न चात्र च्युतसंस्कारता इति वाच्यम्। अनिर्दिष्टकालमात्र प्रत्यया त्रिष्वपि कालेषु भवन्तीत्यनुशासनात् त्रैकालिकक्रियास्वेव तस्य साधुत्वात्। परन्तु कालस्तस्य न वाच्य । किन्तु लक्षणीय एव सा लक्षणा न नेयार्था। अनिर्दिष्टेत्यादयनुशासनेन कालत्रयवाचकत्वभ्रमप्रयुक्तत्वेनावाचकत्वमेव ।

(वि,ठ) संग्रामे इति—वचोबाणत्व गीर्बाणत्वम्। **गी शब्दवाचकत्व** इति। गी शब्दबोधकरूपे इत्यर्थ । न गीर्वच शब्दयोर्द्वयोरपि वाच्यवाचकत्वेन वाक्य-बाणत्वरूपयोगार्थेन देवार्थ कथ शब्दलक्षणेति वाच्यम् । बाणशब्दपूर्ववर्त्तिनो गी शब्दस्य परिवृत्त्यक्षमत्वात् वचोबाणशब्देन देवाबोधनात् । यौगिकशक्तिगत्वेऽपि आनुपूर्वीविशेषस्य बोधप्रतिबन्धकत्वात् । शक्तिरात्त्वादेव नच देवे लक्षणा किन्तु गी शब्दबोधस्य आनुभविकत्वात्, गी शब्दे एव लक्षणेत्यर्थ । न चैव गी शब्दो बाणत्वमेव प्रत्येतुमुचितम्, न वाक्यबाणत्वमिति वाच्यम्। लक्षितगी शब्देनैक-वाक्यबोधनात् तथा प्रतीतिरिति प्रपञ्चितमिदमस्मत्कृतकाव्यप्रकाशटीकाया वस्त्र-वैदूर्यचरणेरिति नेयार्थोदाहरणे।

(वि, ड) शरेति पाठ इति—तथा च गी शर इति न भवति । तथा पाठेऽपि नेयार्थता इत्यर्थ । **जलध्यादौ तु** इति। उत्तरपदं न परिवृत्तिसहमित्यर्थ । एवमुत्तरत्रापि। तथा च जलाशय इति समुद्रत्वेन रूपेणाऽबोधकम् । योगार्थेनैव बोधकम्। जलनिधिरित्यत्र तु उपसर्गमात्रमबोधकम्। पद तु तदेव। पूर्वपदं तु

(लो, उ) विनेय इत्यनेन विजेतु शक्य एव प्रतिपाद्यते नतु विजितत्वम्।

(लो, ऊ) पेलवशब्दे ह्याद्यक्षरे उत्कलभाषाया पुच्यञ्जकस्मारके।

(लो, ऋ) वचःशब्दस्येति—अत्र वचोबाणशब्देन गीर्बाणो विवक्षित उत्तरपदमेव परिवृत्तिं न सहत इत्यर्थ ।

जलस्थाने सलिलादिपदप्रयोगे न काचिच्छति । यथा—सलिलनिधि पयोनिधिरित्यादि ।

+ कृत्यप्रत्ययाना कालसामान्ये विधानात् क्षप्रत्यये अतीतरूपकालविशेषे अवाचकत्वम्।

एवमन्येऽपि यथासम्भव पदाशदोषा ज्ञेया । निरर्थकत्वादीना त्रयाणा च पदमात्रगतत्वेनैव लक्ष्ये सम्भव. । (ङ)

[1]यथा—"मुञ्च मान हि मानिनि।" अत्र हिशब्दो वृत्तिपूरणमात्रप्रयोजन ।

"कुञ्ज हन्ति कृशोदरी ।" अत्र हन्तीति गमनार्थपठितमपि न तत्र समर्थम् । (च)

"गाण्डीवी कनकशिलानिभ भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्ष ।"

"आङो यमहन (पा १ । ३ । २८) स्वाङ्गकर्म्मकाच्च" इत्यनुशासनबलादाङ्पूर्वस्य हनः स्वाङ्गकर्म्मकस्यैवात्मनेपद नियमितम् । इह तु तद्भिन्नमिति व्याकरणलक्षणहीनत्वाच्च्युतसस्कारत्वम् । (ण, ञ)

नन्वत्र "आजघ्न" इति पदस्य स्वतो न दुष्टता अपि तु पदान्तरापेक्षयैवेत्यस्य वाक्यदोषता । नैवम् । (त)

तथा हि गुणदोषालङ्काराणां शब्दार्थगतत्वेन व्यवस्थितेस्तदन्वयव्यतिरे-

---

परिवृत्तिसहम् । तेन वारिधिरित्यादयो भवन्ति । वडवेति तेनाधानन्न इति न भवति वडवाग्निरिति तु भवति ।

(वि, च) न तत्र सामर्थ्यमिति । शक्तिमत्त्वेऽपि जङ्घाप्रवृत्तिरित्यादौ प्रत्यय विशेषोपपदविशेषसहकारेणैव गतिस्मारणसमर्थं न स्वत इत्यर्थ । पुन पुन गम्यते, पद्भ्या गम्यते, इति हि जङ्घाप्रवृत्तिपदयोर्व्युत्पत्ति ।

(वि, ण) च्युतसस्कारत्वमाह—**गाण्डीवीति** । गाण्डीवी अर्जुन । कनकशिलानिभ किरातमूर्त्तेस्त्रिलोचनस्य वक्षो भुजाभ्याम् आजघ्ने इत्यर्थ । अत्र सस्कृतच्युतिर्वृत्तौ एव दर्शिता ।

(वि, त) तत्राऽस्य वाक्यदोषत्वमाशङ्कते—**नन्विति** । **न स्वत** इति । स्वाङ्गकर्मकत्वेऽदृष्टत्वात् । **पदान्तरेति**—पराङ्गकर्मवाचकपदान्तरमित्यर्थ । सस्कृतच्युते पदमात्रदोषत्वम् ।

(वि, थ) न वाक्यदोषत्वमिति साधयितुमाह—**गुणदोषेति** । श्लेषप्रसादादयो

(लो, ङ) निरर्थकत्वादीनामिति । पदमात्रगतत्वेनैव वाक्यगतत्वेनापि लक्ष्येऽसम्भव । तथाविधदोषावह हि को नाम मूढ पुन पुनरभिदध्यात् ।

(लो, ञ) गाण्डीवी अर्जुन । तद्भिन्नापराङ्गकर्मकस्य तस्यात्मनेपद प्रयोगादित्यर्थ ।

(लो, ट) आजघ्न इत्यत्र न सकलस्य पदस्य परिवृत्त्यसहनम् । किन्तु प्रत्ययमात्रस्य । तथा हि आजघ्नान इत्युक्ते हनप्रकृतिसद्भावेऽपि दोषस्याभाव इत्याशङ्क्य

---

1 इत प्राक्, 'क्रमेण' इति (ग पु) 'क्रमत' इति (ज पु)

कानुविधायित्व हेतु । इह तु दोषस्य "आनम्र" इति पदमात्रस्यैवान्वयव्यतिरेकानुविधायित्वम् । पदान्तराणा परिवर्त्तनेऽपि तस्य तादवस्थ्यादेवेति पददोष एव। यथेहानमनेपदस्य परिवृत्तावपि न पददोष , तथा हन्प्रकृतेरपि इति न पदाशदोष । (ए)

एव " पद्म " इत्यत्राप्रयुक्तस्य पदपरत्व बोध्यम् । एव प्राकृतादिव्याकरणलक्षणहानावपि च्युतसस्कारत्वमूह्यम् । (थ,ऐ)

दशगुणा परोक्तास्तेषामेव शब्दार्थगतत्वात् । स्वमते तु माधुर्यौज प्रसादाख्यास्त्रय एव गुणा । ते तु रसवृत्तय एव । आनम्रे इति पदस्य दोषश्च पदमात्रगामीति दर्शयति—इह त्विति । तस्यान्वयव्यतिरेकानुविधायित्व तु तदर्थकस्य आजघान इत्यस्य प्रजहारेत्यस्य च दानेन दोषाभावात् । **पदान्तराणां** त्विति विषमविलोचनादिपदानामित्यर्थ । **तस्य तादवस्थ्यादि**ति । आनम्रे इति पदस्य दुष्टतातादवस्थ्यादित्यर्थ । एव हन्धातूत्तरात्मनेपदस्य दोषताप्रयोजकान्वयानुविधान दर्शयित्वा तस्य पदैकदोषताप्रसक्तिवारणाय आनमनेपदपूर्ववर्त्तिहन्धातोरपि तथात्वमाह—**यथेहेत्यादि न पददोष** इति । प्रकृतिप्रत्ययमेलनेन दोषत्वात् पददोष एव। न पदाशदोष इत्यर्थ। उक्तन्यायादप्रयुक्तत्वस्यापि पदमात्रगतत्व दर्शयति । एव पद्म इत्यत्रापि इति । "भानि पद्म सरोवर" इत्यत्रोक्त पुलिङ्ग पद्मशब्दोऽप्रयुक्त इत्यर्थ । इदमुपलक्षणम् । आदत्ते इति अवाचकपदस्य श्रुतिकटुपदादेरपि एव न्यायात् पददोषतेत्यर्थ । इदमत्रावधेयम् । तथाहि—यदि उक्तन्यायाद् अप्रयुक्तत्वाद्यनेकदोषाणामपि पदमात्रदोषत्वमुक्त तत्कथ स्मरार्त्तस्यन्ध इत्यादिषु तेषा वाक्यगतत्वमुदाहृतम् । कथ वा निरर्थकत्वच्युतसस्कृतत्वासमर्थत्वानामेव वाक्यदोषतो बहिर्भाव कृत । अप्रयुक्तत्वावाचकत्वादीनामपि तद्वद् बहिर्भावौचित्यात् । अथ तेषामेकवाक्यस्थानेनपदावलम्बित्वाद् वाक्यदोषता उदाहृता इति चेत् तदा पदमात्रदोषताप्रयोजकतया दर्शित-

---

आह—**यथाहेति** । अयमर्थ —यथेह प्रकृत्यशमवस्थाप्य प्रत्ययाशपरित्यागे दोषाभाव । तथा प्रत्ययाशमवस्थाप्य प्रकृत्यशपरित्यागेऽपीत्युभयान्वयव्यतिरेकानुविधायित्वात् पददोषताभ्युपगम ।

(लो, ऐ) **प्राकृतादीति**—सस्कारोऽत्र सूत्रव्याकरणमात्रलक्षण । सस्क्रियतेऽनेन इति व्युत्पत्तियोगात् । दोषा केचित् इत्यादिकारिकावाक्यस्य काकाक्षि (गोलक) न्यायेन निरर्थक इत्यादिवाक्ये सम्बन्ध । तेन निरर्थकत्व यथा—"पयसां प्रवाह इव मौरमैन्धव " अत्र सुरसिन्धोरित्येतावतापि गतार्थत्वे अण् प्रत्ययो निरर्थक । एवं वाक्यरिणामित्येतावतैव गतार्थत्वे वन्यवरिणामित्यत्र यप्रत्यय । तथा—"तदायमात्मापगविधर्दैर्' रित्यत्रेयप्रत्यय । एव " विगलितवयश्छेदपाथेयवन्त" इत्यत्र वतुपप्रत्यय । तेन पदपरमित्यत्र परमित्येतेन वाक्यमात्रव्य-

इह शब्दानां सर्वथा प्रयोगाभावेऽसमर्थत्व विरलप्रयोगे निहतार्थत्वम् । निहतार्थत्वमनेकार्थशब्दविषयम् । (द, ओ)

[1]अप्रतीतत्वे त्वेकार्थस्यापि शब्दस्य सार्वत्रिकप्रयोगविरह । अप्रयुक्तत्वमनेकार्थशब्दविषयम् । असमर्थत्वमनेकार्थशब्दविषयम् (ध)

असमर्थत्वे हन्त्यादयोऽपि गमनार्थे पठिता । अवाचकत्वे दिनादय

न्यायकथनस्य प्रमत्तगीततैव । किञ्च निरर्थकत्वादित्रयस्यापि एकवाक्यस्थानेकपदान्तर्भावित्वं न सम्भवति । यथा "शोभनपथा गच्छते । स पुनातु हि हरिश्च व । हन्तीत्यर्थान्तरे—हन्ति गङ्गा सम्प्रति धार्मिक । इति तस्मादेतद्दोषत्रयविशिष्टपदघटितपदसमूहस्य शब्दबोधाजनकत्वाद् वाक्यत्वासम्भव एव । एतत्त्रयस्य वाक्यदोषतो बहिर्भावेऽवाचकत्वदोषव्याख्याप्रसङ्गेन अस्माभिर्दर्शितो हेतुर्बोध्य ।

(वि, द) इदानीं दर्शितस्वस्वलक्षणानुसारेणैव उक्तदोषाणा परस्परभेदसम्भवेऽपि भेदान्तरमाह—**इह शब्दानामिति**। शब्दानामसमर्थादिशब्दाना परस्परभेद इत्यन्वय । शब्दानामित्यत्र दुष्टशब्दानामित्यर्थ । सर्वथा प्रयोगाभाव इति जह्वापद्धतिरित्येतन्निष्ठसहकारिविशेषण विनेति शेष. । **विरलेति**—प्रसिद्धाप्रसिद्धानेकार्थविषयम् । निहतार्थत्व विरलप्रयोगे इत्यर्थ ।

(वि, ध) असमर्थत्वाप्रयुक्तयोभेदमाह—**अप्रयुक्तत्वमिति**। **अनेकार्थशब्देति**, शब्दोऽत्र धातु ।

(वि, न) असमर्थत्वावाचकत्वयोर्भेदमाह—**असमर्थेति** । अस्यानेकार्थत्वं ग्राहयति—**हन्त्यादय इति**।

वन्छेद । ननु "कुञ्ज हन्ति कृशोदरी" इत्यत्र हन् प्रकृतेरेव परिवृत्त्यसहत्वादसमर्थस्य पदाशनिष्टत्वमेव कथ पदनिष्टत्वमिति चेत् । अत्रोच्यते असमर्थत्वस्य पृथक् पदनिष्टत्वस्य प्रायेणादर्शनात् प्रकृतिप्रत्ययौ हि स्वार्थबोधकौ । इत्यनादृत्य समुदित पद वाचकमिति मतमालम्ब्य हन्तीत्यत्र पदनिष्टत्वमेवोक्तम् । अत एव काव्यप्रकाशकृतापि—

अपास्य च्युतसस्कारमसमर्थं निरर्थकम् ।
वाक्येऽपि दोषा सन्त्येते पदस्यांशेऽपि केचन ॥

इति सूत्रे पदाशदोषोदाहरणप्रस्तावेऽसमर्थत्वेऽप्युक्तम् । दिनशोणितादिपदेषु परिवृत्तिसहत्वेऽपि मुख्यतरधर्मरूपप्रतिपादकप्रतिपादिकाना तथाविधवाभावाद् अवाचकत्वादीनां पदगतत्वमुक्तम् । अत एवालङ्कारे "सुनयने। नयने विभेहि"त्यस्याऽपौनरुक्त्येऽपि लाटानुप्रास उक्त ।

(लो, ओ) सर्वथा प्रयोगाभाव अत एव वाक्यदोषमध्येऽगणनम्। एवविधस्खलनस्य कादाचित्कस्यापि दुर्लक्ष्यत्वात् विरलप्रयोगे निहतार्थत्वम् । अत एवाऽप्रयुक्तनिहतार्थौ श्लेषादावदुष्टाविति ।

---

1 'अप्रतीतत्वन्तु (ग घ.)

प्रकाशमयाद्यर्थे न तथेति परस्परभेद । (न, आ)

एव पददोषसजातीया वाक्यदोषा उक्ता , सम्प्रति तद्विजातीया उच्यन्ते। (प,अ)

वर्णानां प्रतिकूलत्वं लुप्ताहतविसर्गते ।
अधिकन्यूनकथित पदता हतवृत्तताः ।
पतत्प्रकर्षता सन्धौ विश्लेषाश्लीलकष्टताः ।
अर्द्धान्तरैकपदता समासपुनरुक्तता ।
अभवन्मतसम्बन्धाक्रमामतपरार्थता. ।
वाच्यस्यानभिधानञ्च भग्नप्रक्रमता तथा ।
त्यागः प्रसिद्धेरस्थाने न्यासः पदसमासयो' ।
सङ्कीर्णता गर्भितता दोषा' स्युर्वाक्यमात्रगाः ॥ ४ ॥ (फ)

वर्णानां रसानुगुण्य-विपरीतत्व प्रतिकूलत्वम् । यथा मम—

ओवट्टइ, उल्लट्टइ, परिवट्टइ, सअणे कहिम्पि ।

(वि, प) इदानीमुक्तषोडशदोषभिन्नान् त्रयोविंशतिवाक्यदोषान् वक्तुमाह—एवं पदेति। पदे यो दोष वाक्येऽपि तादृशदोषस्य सत्त्वात्—तत्सजातीयता, तदुक्तेस्तद्विजातीयता ।

(वि, फ) लुप्ताहतेति—लुप्तविसर्गता आहतविसर्गता चेति दोषद्वयम् । अधिकपदता न्यूनपदता कथितपदता चेति दोषत्रयम् । विश्लेषताऽश्लीलता कष्टता च सन्धौ दोषत्रयम् । अभवन्मत-सम्बन्धता अक्रमता अमतपरार्थता चेति दोषत्रयम् । पदसमासयोरस्थाने न्यास इति दोषद्वयम् ।

(वि ब) ओवट्ट इति—अवलुठति उल्लुठति, लुठति, शयने कदापि । मुखानि नो परिहरति हृदये एन पश्यति, लज्जया स्थियति । विरहिण्या क्रियावर्णनमिदम् । अवलुठति अधोमुखीभवति, उल्लुठति उत्ताना भवति। लुठति पार्श्वं बहुश

(लो, औ) सार्वत्रिकप्रयोगविरह , क्वि निहतार्थत्वेऽर्थदुष्टमपि लौकिकम् । अप्रतीतेर्हेतुस्त्वेकोऽर्थ शास्त्रीय एव । द्वितीयस्तु सम्भवन्नपि लौकिक । तथानुचितार्थमपि लौकिकम् अपभ्रादिपदानामारोपितत्वात् तदभेद ।

(लो, अ) सम्प्रति वक्ष्यमाणाना वाक्यदोषाणां समनन्तरेभ्यो भेददर्शिका कारिकामाह—एवमिति । पददोषाणां सजातीया श्रुतिकष्टत्वादय उभयत्र वर्त्तमानत्वाद् वाक्यमात्रगा । न पुन श्रुतिदुष्टत्वादिवत् पदतदंशवाक्यगा ।

(लो, आ) रसानुगुण्य गुणप्रस्तावे वक्ष्यमाणम् । ओवट्टइ इति—गाथाऽस्यार्या—"अवर्त्तते उद्वर्त्तते परिवर्त्तते शयने कस्मिन्नपि । रमणे नो विलुलितहृदये अवलुठति लज्जया मुद्रयति मुखं सखी ॥" इति । एषा तु इत्यादिनात्रयवाक्यगतश्रुतिकष्टत्वदेर्विजातीयत्व सूचनम् । विसृष्टवर्णादीना पदपदार्थनिष्ठत्वेऽपि दुष्टत्वम् । किन्तु तथा

रुअइ णो विउलिअ हिअएण, भणइ, लज्जाइ तुट्टइ दिहीए सा ॥ ॥

अत्र टकारा शृङ्गाररसपरिपन्थिन केवल शक्तिप्रदर्शनाय निबद्धा । एषाञ्चैकद्वित्रिचतु प्रयोगेण[1] न तादृग्रसभङ्ग इति न दोष । (ब, आ) ×

" गता निशा इमा बाले।" अत्र लुप्तविसर्गा[2]। आहता ओत्व प्राप्ता विसर्गा यत्र । " धीरो वरो नरो याति ।' इति । (भ, इ) +

" पल्लवाकृतिरक्तोष्ठी " अत्र आकृतिपदमधिकम् । एव " सदाशिव नामि पिनाकपाणिम् ।" [3]इति विशेषणमाधिकम् ।

कुर्य्या हरस्यापि पिनाकपाणे । अत्र तु पिनाकपाणिपद विशेषप्रतिपत्त्यर्थ-मुपात्तत्वाद्युक्तमेव ।[4]

अथ वा "वाचमुवाच कौत्स ।" अत्र वाचमित्याधिकम् । उवाच, इत्यनेनैव

परावर्त्तयति । शयने शय्यायाम् । हृदये एन मुञ्चति परिहसति । लज्जया पश्यति च दिशि दिशि खिद्यति च इत्यर्थ । **न दोष** इति । न प्रतिकूलवर्णत्वदोष इत्यर्थ । दु श्रव्यत्वदोषस्तु तदा भवत्येव ।

(**वि, भ**) लुप्तविसर्गत्वमाह—गता निशा इमा बाले । **गता निशा** इति । अत्र घोषवति स्वरे च विसर्गश्रवणलोप । बन्धशैथिल्यकारित्वमत्र दोषतावीजम् । एकद्वित्रिलोपे तु तदभावान्न दोष । **आहतेति**—अस्य तु बहुश पात एव दोष ।

(वि, म) पल्लवेति—पल्लवरक्तेत्युक्त्यैव विवक्षितसिद्धे । **विशेषणमधिक** मिति । अपुष्टार्थदोषसङ्कीर्णमिदम् । **विशेषप्रतिपत्त्यर्थमिति**—धनुर्धरणादप्यसौ न मा वारयितु शक्त इत्यर्थो विशेष ।

सति तेषा पदपदांशदोष वम् । अत एव तथाविधाना बहुवारप्रयोगे पददोषसजातीयो वाक्यदोष । टकारादीना तु एकपदनिष्ठत्वे नाय दोष । वर्णवाक्यव्यापित्वे एवेत्यत्र पददोषसजातीयो वाक्यदोष ।

(**लो, इ**) एव लुप्ताहतप्रयोगयोरपि सकृदेव प्रयोगे न दोष ।

॥ पाठान्तरम्—ओल्लइइ उल्लइइ, लुठइ, कहिम्पि मोट्टाइ । णो परिहसइ हिअएण किट्टइ लज्जाइँ खुट्टइ ॥

× प्रतिकूलवर्णस्य दूषकतावीज श्रृङ्गारादौ विकटादिवर्णा श्रूयमाणा मनसो दाक्ष्यादिजनका इति श्रृङ्गारादौ प्रतिकूलमनोवृत्तिजनकत्वेन रसस्यापरिपोषकत्वम् ।

+ काव्यस्य बन्धशैथिल्यमत्र दूषकतावीजम् । " बन्धपारुष्येऽप्येवम् " ।

यथा—स्मर खल खल कान्त । तदुक्तमग्निपुराणे—

---

1 'प्रयोगे' (स० पु०) 2 'विसर्गा लुप्ता' इति (ख पु) 3 इतीत्यत प्राक, 'अत्र पिनाकपाणिम्' इत्यधिक पाठ (ज पु) 4 'इत्यत्र तु पिनाकपाणि पद विशेषप्रतिपत्त्यर्थमुपात्तमिति युक्तमेव' इति (घ ण पु)

गतार्थत्वात्। (म) †

क्वचिद् विशेषणदानार्थं तत्प्रयोगो युज्यते। यथा—"उवाच मधुरां वाचम्।" इति केचित्त्वाहुः—यत्र विशेषणस्यापि क्रियाविशेषणत्वं सम्भवति, तत्रापि तत्प्रयोगो न घटते। यथा—"उवाच मधुरं धीमान्।" इति। (य, ई) ×

"यदि मय्यर्पिता दृष्टिः किं ममेन्द्रतया तदा।"

अत्र प्रथमे त्वया इति पदं न्यूनम्। (र, उ) +

(वि, य) **क्वचित्तु** इति—क्वचित् स्थल इत्यर्थः। तत्प्रयोगो वाचमित्यस्य प्रयोगः। एतच्च काव्यप्रकाशकृता दूषितम्।

तदाह—**केचित्त्विति**—अत्रापि न युज्यत इति प्रकाशाभिप्रायमवुद्ध्वा लिखितं वान्प्रयोगस्तु उपपत्त्यन्तरासत्त्वाद् युज्यत एव। किन्तु विशेषणदानार्थं तत्प्रयोग इत्युक्तिरेव विशेषणस्य क्रियाविशेषणसम्भवोक्त्या दूषिता न तु वाचमित्यस्य प्रयोगः। "ऊचे वचस्तापसकुञ्जरेण" "नृपमूचे वचनं वृकोदरः।" "संप्रस्थितो वाचमुवाच कौत्सः" "। " जगाद वाक्यं गिरिराजपुत्री " । इत्यादिवहुप्रयोगदर्शनात्तत्प्रयोगस्य तत्सम्मतत्वादेव। तदुपपत्तिस्तु यथा—वचेर्द्विधा व्युत्पत्तिः कण्ठताल्वाद्यभिघातः तज्जन्य वचनं चार्थ। तत्र वचनार्थकतया प्रयोगे वाचमिति न प्रयुज्यते। कण्ठताल्वाद्यभिघातार्थकतया प्रयोगे तु तत्कर्मभूतस्य वाचमित्यस्य युज्यत एव प्रयोग इति। यच्च वाचमित्यधिकमित्युक्तं तदपि युक्तम्। वच् धातोर्वचनार्थकत्वे वाचमित्यस्य पुनरुक्तत्वादेव। पुनरुक्तभाव एव अधिकपदत्वदोषप्रसक्तेः। यथा—पल्लवाकृतिरक्तेत्यत्र।

(वि, र) न्यूनपदत्वमाह—**यदि मयीति**—मम इन्द्रतया इन्द्रत्वेन तदा किमित्यर्थः।

(लो, ई) अधिक सदाशिवमित्यतो विशेषप्रतिपत्त्यभावात्। उपात्तस्यापि पिनाकीति पदेन विशेषप्रतिपत्तेरिवेत्यर्थः।

(लो, उ) त्वयेति। नून प्रस्तुतकाव्यप्रतिपादकस्य चासंमुखीनस्य महात्मन एवेति दृष्टिपातेन वस्तुरभिप्रेतपूरणमिति। तस्यानिर्देशेन यस्य कस्यचिदपि दृष्टिपातसूचनेन तत्प्रख्यायनमन्तरमिति भावः।

"अनुस्वारविसर्गौ तु पारुष्याय निरन्तरमिति"।

† वामनस्येदं मतम्। यथा—अपुष्ट्यर्थस्यापि तत्रोपादानमुचितम्। यत्र तद्विशिष्यते, अन्यथा कृतस्तद्विशेषणान्वयः स्यात्। यथा—"जगाद विशदा वाचं मधुराक्षरशालिनीम्।" इत्यादौ। अत्र हि वाचमित्यनुपादाने मधुरत्वादितद्विशेषणयोगः क्व प्रत्येतव्यः।

× काव्यप्रकाशकारस्येदं मतम्।

+ कर्मपदमन्तरेण क्रियापदस्यानन्वयात्त्वयेति कर्मपदमपेक्षितं दृष्टेश्च वाक्यार्थबोधायत्तत्वात्।

रतिर्लीलाश्रमं भिन्ते सलीलमनिलो वहन्।" लीलाशब्द पुनरुक्त। एवम्-जङ्घरिंस धृतविकाशिबिसप्रसूना।" अत्र 'बिसशब्दस्य "धृतपरिस्फुट-तत्प्रसूना इति सर्वनाम्नैव परामर्शो युक्त। (ल) *

हृतवृत्त—लक्षणानुसरणेऽप्यश्रव्य, रसाननुगुणमप्राप्तगुरुभावान्तलघु च। क्रमेण यथा—" हन्त सततमेतस्या हृदय भिन्ते मनोभव कुपित।" 'अयि मयि मानिनि! मा कुरु मानम्।" इद वृत्त हास्यरसस्यैवानुकूलम्। (व, ऊ)

"विकसितसहकारभारहारिपरिमल एष समागतो वसन्त।"

यत्पादान्ते लघोरपि गुरुभाव उक्तस्तत्सर्वत्र द्वितीयचतुर्थपादविषयम्। प्रथमतृतीयपादविषय तु वसन्ततिलकादेरेव। अत्र प्रमुदितसौरभ आगतो

(वि, ल) कथितपदत्वमाह—**रतिर्लीले**ति। लीलाशब्द इति सलीलमित्यत्र लीलाशब्द इत्यर्थ। **पुनरुक्त** इति। पुन कथित इत्यर्थ। ननु पुनरुक्तदोष। शब्दार्थयोरन्वयभेदेन पुनरुक्त्यभावात् तस्यार्थदोषत्वात्। न्यूनपदोक्तेर कथितपदस्यैव क्रमप्राप्तत्वाच्च। **चतुरि**ति। बिसप्रसून पद्मम्। धृतविकाशितस्का सैन्या सेनासमवेतजना बिस मृणाल जङ्घ बुभुजिरे। अत्र बिसशब्दस्येति कथितपदत्वमिति शेष। पाठान्तरेण कथितपदत्वोद्धारौचित्य दर्शयति—**धृतपरिस्फुटे**ति।

(वि, व) हृतपदार्थत्रैविध्येन त्रिविध हृतवृत्तमाह—**हृतवृत्तमि**ति। अप्राप्तगुरुभाव, अन्तलघु पादान्तलघुर्यस्य तादृशवाक्यमित्यर्थ। अत्र पदमध्ययतिवशादश्रव्यवृत्तमाह—**हन्त सततमेतस्या** इति। अत्र सततमेतस्या इत्यत्र पदमध्ये यतिरश्रव्या। पदम चारदमत्तेति गाहाच्छन्दोलक्षणानुसरणमस्येव। रसाननुगुणवृत्तमाह—**अयि मयि मानिनि** इति। **इद वृत्त**मिति दोधक नाम वृत्त छन्द इत्यर्थ।

(वि, श) अप्राप्तगुरुभावान्तलघु आह—**विकसिते**ति—एष वसन्त समागत। कीदृश विकसितसहकारभारस्य हारी मनोहारी परिमलो यत्र तादृश। अत्र हारीति पादान्तलघोर्गुरुभावाप्राप्ति। पादान्तलघोर्गुरुभावप्राप्ते विषय दर्शयति—

(लो, ऊ) **हन्ते**ति—हन्त सततमेतस्या इति। एतत् द्वितीयाद्यर्यालक्षणानुगमेऽपि श्रुतिर्वरस्या। **इद**मिति। अयमाशय—सामान्यतो हासस्य शृङ्गाररसप्रतिकूल्याभावेऽपि तथाविधमालस्थले स्मरशरविधार्दितस्य नायकस्योक्तौ प्रतिकूलतेति

---

* प्रयोजनाभावे पुनस्तत्पदापादान भुक्तोपभोगन्यायेन न चमत्करोतीति केवरशक्तिप्रकाशकत्वादस्य दोषत्वम्। न च पौनरुक्त्य पदान्तरेण न तदर्थाभिधाने दोषाभावात्। यद्यप्यस्य पददोषत्वमपि सम्भवति तथाप्येकपदस्य द्विरुपादानादेव वाक्यदोषत्वम् इत्याहु।

वसन्त इति पाठो युक्तः । (श) +

यथा वा—अन्यास्ता गुणरत्नरोहणभुवो धन्या मृदन्यैव सा
सम्भाराःखलु तेऽन्य एव विधिना यैरेष सृष्टो युवा ।
श्रीमत्कान्तिजुषां द्विषां करतलात्स्त्रीणां नितम्बस्थलाद्
दृष्टे यत्र पतन्ति मूढमनसामस्त्राणि वस्त्राणि च ॥" (ष)

अत्र धस्त्राणि चेति बन्धस्य श्लथत्वश्रुतिः । (ऋ) † "वस्त्राण्यपि" इति पाठे तु बन्धदार्ढ्यमिति न दोषः । "इदमप्राप्तगुरुभावान्तलघु" इति काव्यप्रकाशकारः । वस्तुतस्तु लक्षणानुसरणेऽप्यश्रव्यमित्यन्ये । (स,ऋ)

प्रोज्ज्वलज्ज्वलनज्वालाविकटोरुस्फटाच्छटः । (लृ)

यत्पादान्त इति, **वसन्ततिलकादावेवेति**। नह्यत्र पुष्पिताग्रा छन्दसीत्यर्थः । पाठं परिष्करोति–**अत्रेति**–प्रमुदितं प्रमोदविषयः ।

(वि, ष) शार्दूलविक्रीडितेति दर्शयति–**अन्यास्ता** इति । रत्नरोहणभुवः प्रसिद्धा एव, गुणरत्नरोहणभुवस्त्वन्या विलक्षणा एव । एवं धन्या मृदन्यैव, एवं सम्भारा अपि सत्वन्ये । एव यैरर्थात् यद्गुणरत्नमृद्विशेषसहितैः सम्भारैरेष युवा विधिना सृष्टः । यत्र यूनि दृष्टे सति मूढमनसा द्विषा करतलादस्त्राणि मूढमनसां स्त्रीणा नितम्बस्थलाद् वस्त्राणि च पतन्ति इत्यर्थः । श्रीमदित्यादि द्वयोर्विशेषणम् । द्विषां मोहो भयेन । स्त्रीणा मोहः कामेन ।

(वि,स) अत्र चतुर्थपादान्तलघोर्बन्धशैथिल्यप्रतीत्येन गुरुमात्र्यबन्धदार्ढ्यकारित्वाभावादश्रव्यवृत्तदोष इत्याह—**अत्रेति**। **बन्धदार्ढ्यमिति न दोष** इति । तथात्वस्मरणान्न दोष इत्यर्थ । काव्यप्रकाशकारमते द्वयमप्यप्राप्तगुरुभावान्तलघुभूतापहतवृत्तदोष एवेत्याह—**इदमपीति**। अन्यमते तु, अश्रव्यवृत्तरूपहतवृत्तमेवेदमित्याह–**वस्तुतस्तु** इति । अत्र स्वमतानुसारेण एवान्ये इत्यनेनोक्ताः ।

(वि, ह) पतन्प्रकर्षमाह—**प्रोज्ज्वलदिति**—नरकेसरी वः पातु । कीदृशः ।

(लो, ऋ) रोदणो माणिक्यादि । अथवा गुणरत्नस्य रोहणभुवः प्राप्तिस्थानस्य ता भुवः । सम्भार उपस्करणम् । मृग्मयवार्यिकारणस्यः पार्थिवो भागः । अत्र चकारस्य अतीव्रप्रयत्नोच्चार्यतया बन्धशैथिल्यम् ।

(लो,ऋ) लक्षणानुसरणेऽप्यत्र द्वितीयचतुर्थपादान्तलघोरप्राप्तगुरुभावादित्यर्थ ।

(लो, लृ) प्रोज्ज्वलनोद्दामवेगस्फुलिङ्गः ।

+ अत्र सर्वत्र बन्धशैथिल्यमेव दूषणबीजम् ।

† अत्र चकारस्य अतीव्रप्रयत्नोच्चार्यतया बन्धशैथिल्यम् । एवमपि पाठे त्वन्यवर्णस्य लघोरपि संयुक्तोत्तरवर्तितया उच्चारणवैलक्षण्येन गुरुमात्र्यबन्धदार्ढ्यकारित्वमित्यर्थः ।

श्वासक्षिप्तकुलक्ष्माभृत् पातु वो नरकेसरी ॥"

अत्र क्रमेणानुप्रासप्रकर्षस्य पात । (ङ) *

"दलिते उत्पले एते अक्षिणी अमलाद्धि ! ते ।" एवविधसन्धिविश्लेषस्यासकृत्प्रयोग एव दोष । (ए) +

अनुशासनमुल्लङ्घ्य वृत्तभङ्गभयमात्रेण सन्धिविश्लेषस्य तु सकृदपि यथा—"वासवाशामुखे भाति इन्दुश्चन्दनबिन्दुवत् ।" (ऐ) "चलण्डामरचेष्टित ।" इति । अत्र सन्धौ जुगुप्साव्यञ्जकमश्लीलम् । × "उर्व्यसावत्र तर्वाली मर्वन्ते चारुवस्थिति ।" (क, ओ) अत्र सन्धौ कष्टत्वम् ।

"इन्दुर्विभाति कर्पूरगौरैर्धवलयन् करैः ।
जगन्मा कुरु तन्वङ्गि मान पादानते प्रिये ॥"

अत्र जगदिति प्रथमार्द्धे पठितुमुचितम् । §

प्रोज्ज्वलत ज्वलनस्य ज्वालावत् विकटा सुन्दरी उरुगानां छटा कान्तिर्यस्य तादृश । श्वासेनाक्षिप्ता पातिता कुलक्ष्माभृत कुलाचला येन तादृश । पाठो न्यूनता ।

(वि, फ) विश्लेषसन्धिमाह—दलितेति । दलिते वृन्ताद्दाढ्टे एवविधे व्याकरणनिषिद्धसन्धौ । वासवाशा ऐन्द्री दिक् । अश्लीलसन्धिमाह—चलण्डामरचेष्टितेति । अत्र सन्धौ लण्डशब्दोत्पत्त्याऽपभ्रशलण्डशब्दार्थस्य दीर्घपुरीषव्यञ्जनया जुगुप्सा । कष्टसन्धिमाह—उर्व्यसाविति । अत्र मरोर्देशस्य अन्ते अर्मा उर्वी महती तरुणी मॉलि श्रेणी । चारुवस्थितिर्यस्यास्तादृशीत्यर्थ । अत्र सन्ध्युत्पन्ना वर्णा कष्टत्व ।

(लो, ए) असकृत्प्रयोग एव सकृत्प्रयोगे तथाविधारुचिदायित्वाभावात् ।

(लो, ऐ) भातीन्दुरित्यनयोर्वृत्तापगतत्वेन सन्धिर्न कृत, तच्च महाकविसमयविरुद्धम् । आयन्तरगनयोरेवेत्यर्थ ।

(लो, ओ) मर्वन्ते-मरोरन्ते अर्मा उर्वी इति सम्बन्ध ।

---

* दृषकत्वाऽस्य कवेरशक्तयुपायकल्पना ।

पतत्प्रकर्षं तद्वारय बन्धादायुस्तरोत्तरम् ।
पूर्वानुसरत कोऽपि निकर्षो यत्र जायते ॥

+ "ईदेदद्विवचन प्रगृह्यमिति प्रकृत्य प्लुतप्रगृह्या अचीति सन्धिनिषेध ।" पाणिनिप्रभृतीनामनुशासनम् ।

एवविधपदेन विसर्गलोपादिपरिग्रह । अत्र दृषकत्वमात्र कवेरशक्तियोजनाद् वैरस्यजननम् ।

× डामरमुद्भटं चेष्टितं चेष्टा यस्य स । अथवा डामरं डमरवाद्य, तद्वच्चेष्टितं यस्य । कार्यं देशभाषायां लण्डशब्देन शिश्नस्याभिधानात् ।

§ अत्र जगदिति पूर्वार्द्धान्तरितम् । अत्र पूर्वार्द्धान्तयोरपदक्रमेण परमार्द्धान्ते

"नाशयन्तो घनध्वान्तं तापयन्तो वियोगिनः ।
पतन्ति शशिनः पादा भासयन्तः क्षमातलम् ॥"

अत्र चतुर्थपादो वाक्यसमाप्तावपि पुनरात्त. । (ख)

असम्भवन्मतसम्बन्धो यथा—

"या जयश्रीर्मनोजस्य यया जगदलङ्कृतम् ।
यामेणाक्षीं विना प्राणा विफला मे कुतोऽद्य सा ॥"

अत्र यच्छब्दनिर्दिष्टाना वाक्यानां परस्परनिरपेक्षत्वादेकान्तःपातिना एणा-

---

(वि, स) समाप्तपुनरात्ततामाह—**नाशयन्त** इति । **अत्रेति** । तृतीयपादे विशेषस्य क्रियान्वयेन वाक्यार्थसमाप्तावपि अनाकाङ्क्षितविशेषणान्वयार्थं विशेषस्यावृत्तिरूपोऽत्र दोष. । अत्र हि ध्वान्तनाशनेनैव क्षमातलभासनप्राप्तौ तद्विशेषणम् अनाकाङ्क्षितम् । यत्र तु विशेषणे आकाङ्क्षा तिष्ठति तत्र नायं दोष । तथा—'अथापि स्तनवेपथुं जनयति श्वास प्रमाणाधिक. ।' इत्यत्र प्रमाणाधिकत्वविशेषणं विना प्रकृतश्वासेन स्तनवेपथ्वजननात् श्वासस्य प्रमाणाधिकत्व आकाङ्क्षा । एवं "उच्च णिचल". इत्यादावप्युपमानालङ्काररूपप्रकर्षप्राप्त्यर्थमाकाङ्क्षा । एवमेवान्यत्रापि विचार्यम् ।

(वि, ग) **असम्भवन्निति** । असम्भवन् असम्भवी कवेरभिमतसम्बन्धो यत्रेत्यर्थ. । असम्भवश्च शाब्दव्युत्पत्तिराहित्यात् । तच्चोदाहरणे दर्शयिष्यते । **या जयश्रीरिति**—अत्र या एणाक्षी । यया एणाक्ष्या इत्येवमेणाक्षीविशेष्यकोऽन्वयः कवेरभिप्रेतः स च न सम्भवति । द्वितीयान्तपदार्थस्य, या, ययेति प्रथमान्ततृतीयान्तयत्पदार्थयोः अभेदेन विशेष्यभावाव्युत्पत्तेरिति प्रतिपादयितुमाह—**अत्रेति** । ननु या ययेत्यनयोर्न एणाक्ष्यामन्वयः । किन्तु या ययेत्यनयोरेव परस्परमन्वय इत्यत्राह—**यच्छब्दनिर्दिष्टानामिति** । निरपेक्षत्वादन्वयित्वाभिप्रायाद्धेतोरेन तथात्वं बोध्यम् । तथा च एणाक्ष्यामेव साकाङ्क्षत्वात् तद्विशेष्यक एव । या ययेत्यनयोरर्थान्वयः कवेरभिमत. स च न सम्भवतीत्याह—**एकान्तःपातिनेति** । **यां विनेति** । एकं यत्पदं तदन्त पातिना तदर्थान्वयिना एणाक्षीशब्देन एणाक्षीशब्दार्थेन इत्यर्थः । अन्येषा या ययेति यच्छब्दार्थानां द्वयोरप्यत्र बहुत्वारोपाद् बहुवचनम् । न चात्र एणाक्षीमिनिपदस्य विभक्तिव्यत्ययेन या ययेत्यनयोरन्वय इति वाच्यम्, अव्यत्ययेन प्रथममन्वितस्यैव व्यत्ययव्युत्पत्ते. । अत्र तु पथादेव याम् इत्यस्याऽव्यत्ययेनान्वय ।

(लो, औ) समाप्तपुनरात्तत्वे उदाहरति । असम्भवन्, मतम्, इष्टम् अर्थात् कवेः योग. सम्बन्धो यत्र । परस्परनिरपेक्षत्वादनुद्देश्यत्वेन तच्छब्दनिर्दिष्टविधेयवाक्यस्य गुणभूतत्वेन तुल्यन्यायेऽङ्गमवायात् । यदाहुः—"गुणानां च परार्थत्वात् असम्बन्ध., समत्वात् स्यादिति" तदेवान्त पातिनां तेषां वाक्यानामेकवाक्यान्न पानिनाम् ।

अनिष्टमिति विशेष्यान्वयानुपपत्तिर्दोषः । यदि क्रियापदमेवार्थान्तरितं तदा न दोष क्रियालाभे एव सर्वपदान्वयात् ।

क्षीशब्देन अन्येषां सम्बन्धः कवेरभिमतो नोपपद्यत एव। (ग, औ) ×

यां विनामी वृथा प्राणा एणाक्षी सा कुतोऽद्य मे।

इति तच्छब्दनिर्दिष्टवाक्यान्तःपातित्वे तु सर्वैरपि यच्छब्दनिर्दिष्टवाक्यैः सम्बन्धो घटते। (घ, अ) यथा वा—

"ईक्षसे यत् कटाक्षेण तदा धन्वी मनोभवः।"

अत्र यदित्यस्य तदेत्यनेन सम्बन्धो न घटते। "ईक्षसे चेत्" इति तु युक्तः पाठः। (ङ) *

यथा वा—"ज्योत्स्नाचय. पय·पूरस्तारका. कैरवाणि च।

राजति व्योमकासारराजहंसः सुधाकरः ॥"

(वि, घ) यदि तु तच्छब्दार्थस्य विशेष्यतया एणाक्षीशब्दः प्रयुज्यते तदाऽदोष इत्याह—**यां विना मे वृथा** इति। सा एणाक्षीति तच्छब्दविशेष्यतयैव प्रयोगः। **सर्वैरपीति**। न च तथापि भिन्नविभक्तिकयत्तत्पदार्थयोः कथमभेदान्वय इति वाच्यम्। तत्पदार्थान्वितविशेष्यस्य यत्पदार्थेऽन्वये समानविभक्तिकत्वनियमाभावात्। यथा यत्र धूम. स देशो वह्निमान् इत्यत्र तत्पदार्थान्वितस्य प्रथमान्तपदार्थस्य देशस्य सप्तम्यन्तयत्पदार्थेऽन्वय।

(वि, ङ) अत्र प्रथममपि व्यत्ययमङ्गीकुर्वतः प्रत्युदाहरणान्तरमाह—**ईक्षसे यदिति**—यतो हेतोरित्यर्थः। **अत्रेति**—यदितिपदेन कटाक्षेक्षणस्योपस्थानम्। तदेत्यनेन तु कालस्योपस्थानम् इत्येकार्थानुपस्थानात्तयोर्नाभेदान्वयः इत्यर्थः। **ईक्षसे चेदिति**। तथाच यदि कटाक्षेण ईक्षसे तदा तेन कटाक्षेण मनोभव. धन्वी इत्यर्थः।

(वि, च) इत्थमभेदान्वयसम्भवं दर्शयित्वा भेदान्वयासम्भवमाह—**ज्योत्स्नाचय** इति। कासारः सरः। व्योमरूपेऽस्मिन् ज्योत्स्नाचयादिरूपपय पूरा-

---

(लो, अ) यथा तद्घटते तदाह। **यां विनेत्यादिः**। तच्छब्दनिर्दिष्टं विधेयं वाक्यम्। सम्बन्ध एणाक्षीशब्दस्य इत्यर्थः।

× अत्र त्रीण्युद्देश्यवाक्यानि एणाक्षीमिति। विशेष्यपदमेकत्र स्थितम्। अन्यस्मिन् वाक्यद्वये तु यच्छब्दनिर्दिष्टस्य विशेष्यस्य न प्रतीतिः। न चानुवृत्तिः कार्या यच्छब्दाना विभिन्नविभक्तिकत्वात्। विशेष्यपदे विधेयवाक्यस्थिते तु सर्वेषामुद्देश्यवाक्यानां तत्र समन्वयो भवत्येव। यथा—दर्शयिष्यमाणोदाहरणे।

* अत्र यदिनि पदं तदित्यपेक्षते—तत्तु न कालविशिष्टम्। एवं तदेति पदं यदीतिकालविशिष्टमुपेक्षते नतु यदिति निर्विशेषम्। अतो द्वयोरपि साकाङ्क्षतया ऽभिमतार्थविरह.। कल्पितपाठे चेच्छब्दो यथार्थः। द्वयोर्यत्तच्छब्दयो. कालविशिष्टत्वे निराकाङ्क्षत्वं प्रतीतेः।

अत्र कासारशब्दस्य समासे गुणीभावात्तदर्थस्य न सर्वैः संयोगः। (च, आ) विधेयाविमर्शे यदेवाविसृष्टं तदेव दुष्टम्। इह तु प्रधानस्य कासारपदार्थस्य प्राधान्येनाप्रतीतेः सर्वोऽपि पयःपूरादिपदार्थस्तदङ्गतया न प्रतीयते इति सर्ववाक्यार्थतिरोभावः इत्युभयोर्भेदः। (छ, इ)

"अनेन छिन्दता मातु कण्ठं परशुना तव।
यद्वस्पर्द्धं कृपाणोऽयं लज्जते मम भार्गव! ॥"

"अत्र भार्गवनिन्दायां प्रयुक्तस्य मातृकण्ठच्छेदनकर्तृत्वस्य[1] परशुना सह सम्बन्धो न युक्त" इति प्राच्या। परशुनिन्दामुखेन भार्गवनिन्दाऽधिकमेव

दय इत्यर्थः। अत्रेति—कासारे राजहंस इत्येवंसमासे तत्पुरुषे उत्तरपदार्थस्य विशेष्यत्वात् कासारशब्दार्थस्य विशेषणीभाव एव गुणीभावः। तादृशगुणीभूतस्य च विशेष्यान्तरेऽपि गुणीभावोऽव्युत्पन्नो निराकाङ्क्षत्वात्, तथा च तस्य पयःपूरादौ विशेषणीभावेन अन्वयासम्भव इत्यर्थः। तादृशविशेषणस्य अन्यत्र विशेष्याभावेनान्वये तु निराकाङ्क्षत्वम्। अत एव चैत्रस्य दासभार्य्या इत्यत्र भार्य्याया विशेषणस्य दासस्य चैत्रविशेष्याभावेनाऽन्वये साकाङ्क्षतैव।

(वि, छ) अभवन्मतयोगविधेयाविमर्शयोर्भेदमाह—**विधेयाविमर्शे** इति। विधेयाविमर्शेऽन्वयबोधो जायत एव। किन्तु विधेयस्य विधेयत्वाप्रतीत्या यदेव विधेयमविसृष्टं तदेव दुष्टमित्यर्थः। न चैवं तस्य वाक्यदोषत्वभावापत्तिरिति वाच्यम्। उद्देश्यसम्बन्धितया विधेयत्वाप्रतीत्या उद्देश्यघटितवाक्यस्यान्वयव्यतिरेकाद् वाक्यदोषत्वाद् दुष्टं तु विधेयपदमेवेत्यर्थः। प्रकृते तु निराकाङ्क्षत्वेनाऽन्वयासम्भवादन्वयप्रतियोगिगमस्तमेव दुष्टमित्याह—**इह त्विति**।

प्रधानस्येति—पयःपूरादिसमस्तान्वयित्वेन प्रधानस्येत्यर्थः। **प्राधान्येनेति** समस्तान्वयित्वेनेत्यर्थः। **तदङ्गतयेति** तदन्वयित्वेनेत्यर्थः। **तिरोभाव इतीति**। बोधानुपपत्तिरित्यर्थः।

(वि, ज) वाच्यार्थे विवक्षितस्य व्यङ्ग्यार्थयोगस्याऽगम्भेऽपि क्वचिदयं दोष इति काव्यप्रकाशकृन्मतं दूषयितुमाह—**अनेनेति**। तव मातुः कण्ठं छिन्दता इत्यन्वयः। मम कृपाण इत्यन्वयः। प्राच्याः काव्यप्रकाशकृदादयो दूषयन्ति। **परशुनेति**। भार्गवस्याधिक्षेपनिन्दा वस्तौ अधिकं चेदाध्यं द्योतयति इत्यन्वयः।

(लो, आ) सर्वे पयःपूरादिपदार्थैः।

(लो, इ) यदेवोच्चरितत्वादेर्ग्रथितत्वं तदेव दुष्टम्। न तु सर्ववाक्यानां तिरोभावः। एवं वाक्योपपदः दुमः। वाक्योपपदत्वं दुमस्य नतु दुमार्थस्य। इत्येवमादिषु अभवन्मतयोगो बोद्धव्यः।

---

1 'कर्त्तृत्वस्य' (प. पु.)।

वैदग्ध्यं द्योतयतीति आधुनिकाः। * (ज) अक्रमता यथा— + ८ वेणी

"समय एव करोति बलाबलं प्रणिगदन्त इतीव शरीरिणाम्।
शरदि हंसरवा परपीकृतस्वरमयूरमयू रमणीयताम्॥"

अत्र परामृश्यमानवाक्यानन्तरमेव इतिशब्दप्रयोगो युक्तो नतु प्रणिगदन्त इत्यनन्तरम्। एवम्-(ऋ, ई) ×

"द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिन।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी॥"

(वि, ऋ) **अक्रमतेति**—अव्यवधानेन तदुत्तरपातनियमेनैव तत्परामर्शकस्य शब्दस्य तत्परामर्शार्थमन्योत्तरपातस्तत्त्वम्। **समय एवेति**। परपीकृताः तु श्रवीकृता. स्वरा येषा तादृशा मयूरा यत्र क्रियाया तादृशं यथा स्यात्तथा शरदि हंसरवा रमणीयताम् अयुः प्राप्तवन्त.। कीदृशा. ? शरीरिणां बलाबलं समय एव करोतीति विनिगदन्त. कथयन्त इति। मयूरस्वापेक्षया हंसस्वाणामपकृष्टत्वेऽपि शरदि हंसस्वाणां परपीकरणात् समयेन स्वराणा बलाबलकरणात् शरीरिणामपि बलाबललाभ इति भाव.। **अनेति**—परामृश्यवाक्यं बलाबलमित्युक्तम्। अत्र च शरीरिणामपि बलाबलम् इति अन्वये क्लिष्टतापि बोध्या।

(वि, ऋ) **द्वयं गतं सम्प्रति शोचनीयतामिति**—तपस्यन्ती पार्वती प्रति जटिलवेशस्य शिवस्य स्वनिन्दावाक्यमिदम्। चन्द्रकला एव प्राक् शोचनीया आसीत्

(लो ई) नतु प्रणिगदन्त इत्यनन्तरम्। एवं सति प्रणिगदन्त इति पदस्यापि अनुवाद्यवाक्यप्रवेशशङ्केत्यर्थ।

---

* अत्र रावणस्य भार्गवेण सह युद्धमनभिलषितमिति तदुपेक्षा वाक्यार्थ.। तेन भार्गवनिन्दायामेव कवेस्तात्पर्यम्। छिन्दतेति परशुविशेषणत्वेन परशुनैव तदर्थाभिसम्बन्धात्तनैव परशौ निन्दा प्रतीयते। तथा सति नाभिमतार्थप्रतीतिरिति दोष.। छिन्दति इति पाठे तु न दोष.। आधुनिकाना मतं तु विवेचनीयम्—अत्रस्य निन्द्यत्वेऽपि अस्त्रिणोऽनिन्द्यत्वात्, निन्दितशस्त्रं विना शस्त्रान्तरेणापि भार्गवेण सह युद्धसम्भवात्परशुनिन्दामुखेन भार्गवनिन्देति वक्तुमशक्यम्। तथा हि परशुरामस्य परिहार्यत्वमेव रावणमभीहितं, तच्च साक्षान्निन्दया यथा सुकर, न तथा परम्परया।

+ नास्ति क्रम प्रयोगनियमो यत्र तस्य भाव। चादयो हि समुच्चीयमानानन्तरमेव श्रूयमाणाः समुच्चयं द्योतयन्ति। एवमित्थमादयोऽपि यस्मात् शब्दान्तरं श्रुत्वा तस्यैव परामर्शमवगमयन्ति। ईदृश क्रमो यत्र नास्ति तत्र दोष।

× अत्र परामृश्यमानं वाक्यं "समय एव शरीरिणां बलाबलं करोति इति प्रणिगदन्त इव" इति वक्तुं युक्तम् इति शब्दस्य अव्यवहितपूर्वपरामर्शकत्वात्।

अत्र त्वमित्यनन्तरमेव चकारो युक्तः † (ञ) श्रमतपरार्थता यथा—

"राममन्मथशरेण ताडिता"—

अत्र शृङ्गाररसस्य व्यञ्जको द्वितीयोऽर्थः प्रकृतरसविरोधित्वादनिष्टः।(ट, ठ) ‡ वाच्यस्यानभिधानं यथा—

व्यतिक्रमलवं कं मे वीक्ष्य वामाक्षि ! कुप्यसि ?

अत्र व्यतिक्रमलवमपीत्यपिरवश्यं वक्तव्यो नोक्तः। (ठ) ||

संप्रति तु तवापि तथात्वाद् द्वयमिति। निन्दाप्रतिपादनार्थं कपालवत्त्वकथनं कलायाः प्रार्थना च तत्समागमादनुमेया।

(वि, ट) श्रमतेति—परार्थोऽप्रकृतार्थो रूप्यमाणस्वरूपोऽमतः प्रकृतरसविरोधरसव्यञ्जकत्वेनानुचितः यत्र तादृशं वाक्यमित्यर्थः। **राममन्मथेति**—सा निशाचरी राक्षसी ताडका एव निशाचरी अभिसारिका रामस्य एव मन्मथस्य कन्दर्पस्यैव दुःसहेन शरेण हृदये ताडिता सती दुर्गन्धवद् रुधिरेणैव गन्धद्रव्ययुक्तरक्तचन्दनेव उक्षिता जीवितेशस्य यमस्यैव जीवितेशस्य प्राणेशस्य उपनायकस्य वसतिं गता इत्यर्थः। **अत्रेति**—द्वितीयोऽर्थो रूप्यमाणः मन्मथाभिसारिकादिरूपः अनिष्टः अनुचितः प्रकृतबीभत्सविरोधिशृङ्गारव्यञ्जकत्वात्।

(वि, ठ) वाच्यस्यानभिधानमिति—वाच्यम् अवश्यं वक्तव्यं तस्योच्चारणेनाऽध्याहारेण च अनभिधानमित्यर्थः। न्यूनपदे तु अध्याहारेणाभिधानमिति भेदो वक्ष्यते। **व्यतिक्रमलवमिति**—प्रीतिहेतुक्रियाव्यतिक्रमस्याल्पभावमपीत्यर्थः। **अत्रेति**—

(लो, ड) जीवितेशो यम प्राणेशश्च प्रकृतो रसः बीभत्सः।

† क्लेत्यनन्तर श्रुतेन चकारेण इतरप्रथमान्तः समुच्चीयते, परं तत्प्रतिपत्तिर्नटिति न जायते इतरस्य षष्ठ्यन्तस्य (लोकस्य) तत्र सत्त्वात्। प्रथमान्तस्य श्रुतत्वाच्चकारं तन्नाकृष्य प्रथमान्तेन संयोज्य विवक्षितार्थप्रतीतिः कृच्छ्रेण भवति। उक्तञ्च महिमभट्टेन—

"अत एव व्यवहितैर्वृथा नेच्छन्ति चादिभिः।
सम्बन्धं ते हि स्वा शक्तिमुपदध्युरनन्तरे॥" इति।

पदसन्निवेशरूपरचनाया प्रस्तुतार्थस्याऽप्रत्यायकत्वेऽक्रमत्वं, प्रत्यायकत्वेऽप्यनौचित्येऽस्थानपदता। अर्थक्रमस्यानौचित्येषु दुष्क्रमत्वम्। उपक्रमोक्तक्रमस्योपसंहारे भङ्गे प्रक्रमभङ्ग इत्येतेषा भेदः।

‡ अत्र द्वितीयोऽर्थः शृङ्गाररसव्यञ्जकः। स च प्रकृत-बीभत्सविरोधीति केचित्। वस्तुतस्तु जुगुप्सास्पदीभूताया राक्षस्यामभिसारिकात्वाधर्म्येण प्रतिपाद्यमानं रत्यास्पदत्वमतीव विरुद्धमिति भावः। अन्यथा रसदोषस्यैव विषयः स्यात्।

|| निशब्दः प्रश्ने विरोध आक्षेपे च वर्तते। यथा—योऽयमार्य्ये। तवेति। का तव कान्ता

न्यूनपदत्वे वाचकपदस्यैव न्यूनता विवक्षिता। अपेस्तु न तथात्वमित्यनयोर्भेदः (ङ)

एवमन्यत्रापि। यथा वा—

"चरणानतकान्तायाश्चण्डि ! कोपस्तथापि ते।"

अत्र " चरणानतकान्तासि" इति वाच्यम्। (ढ, ऊ) *

स्थूलास्थूलव्यतिक्रमसामान्यादर्शनार्थं व्यतिक्रमस्य लवं कथमपीति वाच्यमित्यर्थः। अत्र तु व्यतिक्रमलवमपीति अपिशब्दाध्याहारेणापि न विवक्षितसिद्धिः। व्यतिक्रमस्येत्येव समासेन षष्ठीसत्त्व एव व्यतिक्रमसम्बन्धिस्थूलभागप्रतीतिसम्भवान्नतु व्यतिक्रमलवमपीति। समासे तदा व्यतिक्रमलवं पदार्थान्तरमपीत्येवमेव बोधोदयादतोऽपिशब्दोच्चारणेनाध्याहारेणावश्यं वाच्यस्यानभिधानम्।

(वि, ङ) न्यूनपदत्वादस्य भेदमाह—न्यूनेति—वाचकपदस्यैव नत्वध्याहारस्यापि न्यूनपदत्वमित्यर्थः। तत्र अध्याहारसम्भवादिति भावः। अत्र तु न तथा अध्याहारसम्भव इत्यर्थः।

(वि, ढ) चरणानतेति—हे चण्डि ! कोपने ! चरणे आनतः कान्तः यस्यास्तस्यास्तव तथापि कोप इत्यर्थः। अत्र काकुवशात्कथं कोप इत्यर्थः। अत्रेति—तथापीत्यनेन यद्यपि इति आकाङ्क्षते। यद्यपीति निराकाङ्क्षम् एव सम्बद्धं भवति तथापीति तत्र द्वितीयवाक्यगतत्वे एव उपपद्यते इत्यर्थः। अत्रापि अध्याहारासम्भवः।

(लो, ऊ) न्यूनपदत्वे न्यूनपदसद्भावमात्रेण दोषाभावः। इह तु त्वसन्तं पदं विहायाऽसीति पदनिवेशनेन इत्थनयोर्भेदः।

कस्य पुत्र"। न ते कान्ता न ते पुत्र इत्यर्थः। क्वचिदज्ञातविशेषेऽपि यथा—कश्चित् कान्ताविरहगुरुणेति। अत्र अतत्त्वाक्षेपवचनः किंशब्दः। तथा च व्यतिक्रमस्य लवमपि कं वीक्ष्य कुप्यसि किमुत भूमानमिति विवक्षितोऽर्थः। कं व्यतिक्रमलवं वीक्ष्येत्युक्ते यादृग्जातीयस्य प्रतिषेधो विधेरपि तादृग्जातीयस्येति न्यायाद् व्यतिक्रमभूमाऽस्तीति प्रतीयते। उक्तेऽप्यपिशब्दे समासनिर्देशे तादवस्थ्यं दोषस्य। तथा हि समासे एकार्थीभावाद् व्यतिक्रमलव एव एव पदार्थः सम्पद्यते नरसिंहादिवत्। ततः परं श्रूयमाणोऽपि शब्दस्तादितरमेव पदार्थमाक्षिपति। यथा राजपुरुषोऽप्यत्र नास्तीत्युक्ते अन्यदीयपुरुष एव समुचीयते नच राजसम्बन्धी हस्त्यादिः। व्यतिक्रमस्य लवमपि इति अवयवसनिर्देशे तु लवशब्दात् परं श्रूयमाणोऽपि शब्दः भूयांसमाक्षिपति। तच्च श्रुतेन सम्बन्धिना व्यतिक्रमेणैव सम्बध्यते। यथा राज्ञः पुरुषोऽप्यत्र न विद्यते इत्युक्ते समुचितो हस्त्यादिः राज्ञैव सम्बध्यते।

* तथापीति एकवाक्ये न संगच्छते। तथापीति तच्छब्दार्थः पूर्ववाक्योक्तं किमप्यपेक्षते। यद्यप्येवमिति वाक्यद्वयेन तस्यार्थस्यनिः। अतोऽत्र कान्ताऽसीति पृथग्वाक्यसम्पादयित्री प्रथमा विभक्तिरवश्यं वाच्या, तदभावाद् दोषः।

भग्नप्रक्रमता यथा—

"एवमुक्तो मन्त्रिमुख्यं रावणः प्रत्यभाषत ।"

अत्र वचधातुना प्रस्तुतं प्रतिवचनमपि तेनैव वक्तुमुचितम्। तेन "रावणः प्रत्यवोचत" इति पाठो युक्तः। एवं च सति न कथितपदत्वदोषः। तस्योद्देश्यप्रतिनिर्देश्यव्यतिरिक्तविषयत्वात्। इह हि वचनप्रतिवचनयोरुद्देश्यप्रतिनिर्देश्यत्वम्।

(घ, ङ) *

(वि, ण) भग्नप्रक्रमतेति—प्रथमोपक्रान्तस्वेनाभिहितं यादृशं रूपं तादृशरूपेणानुक्तं तत्त्वम्। एवमुक्त इति—स्पष्टम्। अत्र वचधातुना उद्देश्ये प्रतिवचनेऽपि वचधातुनाऽपि आख्यात इति दर्शयति—प्रत्यवोचतेति। तथा च कथितपदत्वदोषप्रसक्तिं निरस्यति एवमिति—तस्योद्देश्येति—उद्देश्ये प्रतिनिर्देश्यता अनेकविधाः (१) तत्र विधेयतया निर्देश्यस्य धर्मस्यैव पुनर्विधेयतया आक्षिप्तस्य प्रतिनिर्देशः। यथानेव श्लोके रावणे विधेयतया निर्दिष्टस्य वचनस्य प्रतिवचनत्वेन विधेयतया प्रतिनिर्देशः। यथा वा—

उदेति सविता ताम्रस्ताम्र एवास्तमेति च। सम्पत्तौ च विपत्तौ महतामेकरूपता॥

इत्यत्र एकरूपतारथनाद् उदयसवितरि विधेयतया निर्दिष्टस्य ताम्रत्वस्य अस्तसवितर्यपि विधेयतया प्रतिनिर्देशः। (२) एकोद्देशेन विधेयस्य विधेयान्तरे उद्देश्यतया प्रतिनिर्देश इत्यपरा। यथा—'जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते' इत्यत्र जितेन्द्रियत्वेन विधेयस्य विनयकारणत्वस्य शरीरप्रविष्टतया विधेयस्य विनयस्य गुणप्रकर्षविधौ उद्देश्यतया प्रतिनिर्देशः। (३) एकविधौ उद्दिष्टस्य विधेयान्तरेऽप्युद्देश्यतया प्रतिनिर्देश इत्यपरा। यथा—ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम्।

(लो, ङ) तेनैव वक्तुमुचितं नतु भाविधातुना। तस्य कथितपदत्वस्य उद्देश्यप्रतिनिर्देश्यव्यतिरिक्तविषयत्वात्।

अयमाशयः—यदेवोद्दिष्टं तदेव प्रतिनिर्देष्टुमिष्टम्। तत्पूर्वोद्दिष्टशब्देनैव सर्वनाम्ना वा प्रतिनिर्देष्टव्यम्। एतदेवोदाहरणदर्शनेन दृढयति।

नायं विधेयाविमर्शः, तथापीत्यत्र कदापीत्युक्ते विधेयता विनाऽपि निर्दोषताप्रतिपत्तेः। तथापीत्युच्यमाने वाक्यभेदं विना न लगति वाक्यं च न केवलं पद्यता सम्भवति। वाक्यभेदाकरणमेवात्र दोषः।

वाच्यस्यानभिधानं च द्विधा—(१) अवाचकस्य द्योतकादेरनभिधानाद्। (२) अन्यथावाचकस्य चान्यथाभिधानाद्। द्वितीयस्येदमुदाहरणम्।

* भग्नः प्रक्रमः प्रकरणं यत्र तस्य भावः उपक्रमोपसंहारवैरूप्यमित्यर्थः। अत्र वचधातुनोपक्रम्य धात्वन्तरेण प्रतिनिर्देशे प्रतीतिमान्द्यं दोषः। उद्देश्योऽनुवाद्यार्थः प्रतिनिर्दिश्यते विधीयते यत्र।

यथा—"उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।"

इत्यत्र 'यदि' पदान्तरेण स एवार्थः प्रतिपाद्यते तदान्योऽर्थ इव प्रतिभासमानः प्रतीति स्थगयति । (त, लृ) × यथा वा—

"ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥"

अत्र "अस्मै" इति इदमा प्रक्रान्तस्य तेनैव तत्समानार्थाभ्यामेतदद.-शब्दाभ्यां वा परामर्शो युक्तो न तच्छब्देन । (थ) यथा वा—

"उदन्वच्छिन्ना भूः स च पतिरपां योजनशतम् ।"

सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः । इत्यत्र सिद्धार्थनिवेदनविधौ उद्दिष्टस्य तेनैव विधेये उद्देश्यतया पुनः प्रतिनिर्देश इत्यपरा । एतदुदाहरणं च—यशोऽधिगन्तुम् इत्यादिकं दर्शयिष्यते । तच्च तत्रैव दर्शयिष्यामि ।

(वि, त) इत्थमेवमुक्त इत्यत्र प्रक्रमभङ्गमुदाहृत्य प्रक्रमाभङ्गमुदाहरति । यथा—**उदेतीति** । अन्योऽर्थ इवेति नामविशिष्टस्यैव नामिनो बोध इति मते ताम्ररक्तशब्दद्वयरूपविशेषणभेदाद् भेदावभास इत्यर्थः । प्रतीतिम् अभेदप्रतीतिम् ।

(वि, थ) एकविधौ उद्दिष्टस्य विधेयान्तरेऽप्युद्देश्यतया प्रतिनिर्देशे प्रक्रमभङ्गमुदाहरति—**ते हिमालयमिति** । ते सप्तर्षय. सिद्धमर्थं पार्वतीपरिणयघटनारूपम् । तद्विसृष्टाः शूलिना विसृष्टा. । **तत्समानार्थाभ्यामिति** । नच तत्समानार्थकपदभेदाद् भेदावभास इति वाच्यम् । सर्वनाम्ना प्रथमोक्तनामविशिष्टस्यैव परामर्शात् नत्वविशिष्टस्य । न चैवं तत्पदेनापि सर्वनाम्ना तथैव परामर्शाददोष इति वाच्यम् । तत्तु अत्र अस्मै इति इदम् शब्देन बुद्धिस्थपुरोवर्तितया महादेव परामृष्ट. । तच्छब्देन विप्रकृष्टपरामर्शितया तस्य परामर्शः कर्तुं न शक्यते इति भावः ।

(वि, द) धर्मिभेदभासकत्वेन भेदावभासादेकोद्देशेन विधेयस्य विधेयान्तरोद्देश्यरूपेण प्रतिनिर्देशेऽपि तद्दोषमुदाहरति—**उदन्वदिति** । भूः उदन्वच्छिन्ना

(लो, लृ) **उदेतीति**—प्रतीति स्थगयति । तथा च सति रसानुभवविघ्न इति भाव.।

× **उदेतीति** । उदये उद्दिष्टं यत्ताम्रत्वं तदेवास्तमये प्रतिविधीयते । अत्र हि तेनैव शब्देनोपादाने यादृशं ताम्रत्वमुद्दिष्टं तादृशमेवास्तमये प्रतिविधीयते । शब्दान्तरेणोपादाने आश्रयभेदादिना तेषा वैलक्षण्यदर्शनान्न तादृशप्रतीतिरिति केचित् । येषा मते शब्दस्वरूपमपि विशेषणतया पदार्थप्रतीतौ भासते तेषा विशेषणभेदादेव प्रतीतिभेदः स्फुट एव । **स्थगयतीति**—पदान्तरप्रतिपाद्यमानत्वप्रतिसन्धाने 'अर्थान्तरशङ्का' इत्यर्थः । अतः भिन्नपदयोः समानाकारप्रतीतिजनकत्वेऽपि 'अर्थान्तरशङ्कया प्रतीतिस्थगनमत्र दोषः ।

1 यद्यनन्तरम्, 'रक्त एवेति' (इत्यधिकः ख. पु.)

अत्र—"मिता भू पत्यापां स च पतिरपाम्" इति युक्त पाठ । (द)
एवम्—"यशोऽधिगन्तु सुखलिप्सया वा मनुष्यसख्यामतिवर्त्तितु वा ।
निरुत्सुकानामभियोगभाजा समुत्सुकेवाङ्गमुपैति सिद्धि ॥"
अत्र सुखमीहितुम् इत्युचितम् । (ध) *
अत्राद्ययो प्रकृतिविषय प्रक्रमभेद । तृतीये पर्य्यायविषयः । चतुर्थे प्रत्ययविषय । (ज) एवमन्यत् । प्रसिद्धित्यागो यथा—"घोरो वारिमुचां रव. ।" अत्र मेघाना गर्जितमेव प्रसिद्धम्—यदाहु —

"मञ्जीरादिषु रणितप्राय पक्षिषु तु कूजितप्रभृति ।
स्तनितमणितादि सुरते मेघादिषु गर्जितप्रमुखम्॥" इत्यादि । (प) †

अस्थानस्थपदता यथा—

स चापा पति योजनशतं व्याप्य तिष्ठतीति शेष । अत्र भुवमुद्दिश्य उदन्वच्छिन्नत्वे विधेये उदन्वानपि विधेय । तस्य योजनशतव्याप्तिविधौ उद्देश्यतया अपापतिशब्देन प्रतिनिदश कृत इति दोष । पाठान्तरेण दोष परिहरति—**मिता भूरिति** । अपा पत्या मिता परिच्छिन्ना इत्यर्थ ।

(वि, ध) एकविधेये उद्दिष्टस्य तत्रैव विधेये उद्देश्यतया प्रतिनिर्देशस्य प्रत्ययार्थस्य क्रमभङ्गमुदाहरति—**यशोऽधिगन्तुमिति** । योद्धुम् उद्वेजयन्तीं द्रौपदी प्रति युधिष्ठिरस्योक्तिरियम् । यशोऽधिगमनस्य सुखलाभस्य मनुष्यगणनायाम् आधिक्यरूपस्य मनुष्यसख्यातिवर्त्तनस्य वेच्छया निरुत्सुकानामुत्कण्ठारहितानामथ च तदनुकूलचेष्टारूपाभियोगभाजामङ्ग सिद्धि समुत्सुकेव उत्कण्ठितेव उपैतीत्यर्थ । अत्र निरुत्सुकविधानुद्दिष्टाया इच्छायास्तत्रैव निरुत्सुकत्वविधौ उद्देश्यतया प्रतिनिदेश । तत्क्रमश्च तुमुन्प्रत्ययभेदेनोद्देश्यकथनात् भग्न इत्यर्थ ।

(वि, न) अत्राद्ययोरिति । एवमुक्तो मन्त्रिमुख्यैरित्यत्र "ते हिमालयमामन्त्र्य" इत्यत्र चेत्यर्थ । तृतीये उदन्वच्छिन्ना इत्यत्र चतुर्थे यशोऽधिगन्तुमित्यत्र ।

(वि, प) प्रसिद्धीति । सम्बन्धिविशेषे प्रसिद्धार्थकस्य शब्दस्य तादृशसम्बन्धिनि अप्रयोगस्तत्त्वम् । **घोर** इति—सम्बन्धिविशेषे एव शब्दविशेषाणा प्रयोग इत्यत्र काव्यप्रकाशकृदुक्तिसम्वादमाह—**मञ्जीरादिष्विति** । मञ्जीरादिषु सम्बन्धिषु इत्यर्थ । एवमुत्तरत्रापि ।

(वि, फ) अस्थानस्थेति—यादृशस्यानसत्त्व एव यत्पदस्य बोधकता

---

* अत्र यशोऽधिगन्तुमिति तुमुन्प्रत्ययेन प्रक्रम्य सुखलिप्सयेति सन्प्रत्ययस्योपादानात् प्रक्रमभङ्ग स चात्र प्रत्ययभेदादेव ।

† प्रसिद्धित्याग —प्रसिद्धिमुल्लङ्घ्य प्रयोग. । अत्र स्वशब्देन मरुङ्कादिप्रभव एव प्रतीयते ननु मेघाना गर्जनम् । तत्र स्वशब्दोक्त प्रसिद्धिमनुवदति—**यदाहुरिति** ।

"तीर्थे तदीये गजसेतुबन्धात्प्रतीपगामुत्तरतोऽस्य गङ्गाम् ।
अयत्नबालव्यजनीबभूवुर्हंसा नभोलङ्घनलोलपक्षा. ॥"

अत्र तदीयपदात्पूर्वं गङ्गामित्यस्य पाठो युक्तः । (फ, ए) एवम्-हितान्न यः संशृणुते स किं प्रभुः ।"

अत्र संशृणुत इत्यतः पूर्वं नञ. स्थितिरुचिता । अत्र च पदमात्रस्यास्थाने निवेशेऽपि सर्वमेव वाक्यं विवक्षितार्थप्रत्यायने मन्थरमिति वाक्यदोषता । एवमन्यत्रापि । इह केऽप्याहुः—"पदशब्देन वाचक एव प्रयोगो निगद्यते; नच नञो वाचकता, निर्विवादात् स्वातन्त्र्येणार्थबोधनविरहात्" इति । यथा—"द्वयं गतम्" इत्यादौ त्वमित्यनन्तरं चकारानुपादानादक्रमता तथात्रापीति । (च) ❀

तद्भिन्नस्थानस्थत्वं तत्त्वम् । त्वमस्य लोकस्य च इत्यत्र तु उत्तरपठितनियतपदस्य तथात्वमत्र तु तन्नियमरहितपदस्येति भेद. । **तीर्थे तदीये** इति—अस्य राज्ञो गजैः सेतुबन्धात् प्रतीपगा गङ्गाम् उत्तरतो तदीये गाङ्गीये तीर्थे उत्तरदिशि नभोलङ्घन-लोलपक्षा हंसा अयत्नबालव्यजनीबभूवुरित्यर्थ । सेतुबन्धेन जलवृद्ध्या प्रावृट्-कालवुद्ध्या उत्तरदिशि मानसरोवरगमनार्थं हंसा उद्यीना इति भावः । **अत्रेति** । गङ्गाया । प्रथमज्ञाने तत्पदेन तत्परामर्शसम्भवात् ।

(चि, व) हितान्न य इति—हितात् जनात् । हितमिति क्वचित्पाठ. । **अत्रेति**—क्रियान्वयिनो नञ. क्रियासन्निहितपाठस्यैवौचित्यात् । अत्र वाक्यदोषता-मुपपादयति । **अत्र चेति**—मन्थरम् असमर्थम् । हितान्न य इति अक्रमदोषो-दाहरणमिति केषाञ्चिन्मतं दर्शयति—**इह केऽपीति** । **पदशब्देनेति** । अपदस्य-पदेत्यत्र द्वितीयपदशब्देन इत्यर्थ. । वाचकमेवेति पदान्तरे योगं विना प्रयोगाभावेन पचपदं त्रिपदमिति यथा न प्रयोगः तथा नञोऽपि प्रतियोगिपदयोगं विनाऽप्रयोगात् न तत्र वाचकता, नियतपदत्व निर्विवादमित्यर्थ. । घटादिपदस्य तु स्वत. प्रयोगात् तत्र पदत्वं निर्विवादमित्यर्थ. । शक्तिमद्वर्णमात्रस्यैव नैयायिकै. पदव्यवहारात् प्रायश इत्युक्तम् । **यथा द्वयमित्यादाविति** । तत्तदत्राक्रमत्वदोष एवेत्यर्थः । तथा च अस्थानस्थपदत्वोदाहरणं तीर्थे तदीये इत्येवेत्यर्थः ।

(लो, ए) तदीय इत्यस्य पूर्वं गङ्गामित्यस्य पाठे युक्त. । तच्छब्दपरामृष्टय-नन्तरमेव वक्तुमुचितत्वात् ।

❀ अक्रमतादोषे तु नास्ति प्रयोगनियमः केवलं स्वनाविशेषेण तस्य दोषत्वात् । अस्थानस्थपदे तु प्रयोगनियमोऽस्तीति ततो भेद. । अव्यवधानेनैव यत्राभिमतत्वमितीत्सा-मर्थ्यं तदेतस्य विषयः । अन्ये. पुनरितरस्य इति केचित् ।

अस्थानस्थसमासता यथा—

"अद्यापि स्मरशैलदुर्गविषमे सीमन्तिनीना हृदि
स्थातु वाञ्छति मान एष धिगिति क्रोधादिवालोहित ।
प्रोद्यद्दूरतरप्रसारितकर कर्षत्यमौ तत्क्षणात्
फुल्लत्कैरवकोपनि सरदलिश्रेणीकृपाण[1] शशी ॥" *

अत्र कोपिन उन्नौ समासो न कृत, कवेरन्नौ[2] कृत । (भ,ऐ)+

वाक्यान्तरपदाना वाक्यान्तरेऽनुप्रवेश सङ्कीर्णत्व यथा—

(वि, भ) अस्थानस्थेति—यद्रसीयव्यञ्जको य समासस्तद्रसव्यञ्जकस्थानमुपेक्ष्य स्थानान्तरे तत्समासोपातस्तत्त्वम् । अद्यापीति—सन्ध्याकाले पर्य्युपितबुमुदबुद्मला नि सरता श्रेणीभूतालीना वर्णनमिदम् । अद्यापीत्यादयुक्तक्रोधादालोहित प्रोद्यन् असौ शशी फुल्लत कैरवकुड्मलादिव खड्गपिधानरूपात्कोषात् नि सरताम् अलीना श्रेणीभूत कृपाण दूरतर प्रसारित करो रश्मिरेव तादृशो हस्तो येन तादृश सन् तत्क्षणात् कर्षतीत्यन्वय । कोषोऽस्त्री कुड्मले पात्रे दिव्यखड्गपिधानके" इति कोष । खड्गाकर्षणेऽपि हस्तस्य दूरे प्रसारणात् । क्रोधबीजमाह—अद्यापीति । सीमन्तिनीना मान स्तावत् स्तनरूपेणैव दुर्गमाश्रित्याऽन्यदा तिष्ठतु अद्यापि ममोदयेऽपीति तन्मा धिगिति क्रोध । अत्रेति कोपिनशब्दस्य समासो दीर्घसमास ।

(लो, ऐ) कोष कुड्मलम् खड्गपिधान च ।

---

* असौ दृश्यमान शशी फुल्लत् विकसत् यत् कैरव तस्य कोष कुड्मलमेव कोष खड्गपिधान तस्मान्नि सरन्ती या अलिश्रेणी भ्रमरपङ्क्ति सैव कृपाण तां तत्क्षणात् कर्षति निष्कासयति । तत्र हेतुमुत्प्रेक्षते—अद्यापीति । अद्यापि मत्सान्निध्येऽपि एष मान (स्त्रीणामीर्ष्याकृत कोपो मानोऽन्यासन्निनि प्रिये) सीमन्तिनानां वान्ताना हृदि स्थातु वाञ्छति धिक् निन्द्यमिदमिति क्रोधादिव आलोहित आरक्त कोपेन रक्तिमोदयात् । कीदृशी हृदि ? स्तनावेव शैलौ तद्रूपेण दुर्गेण विषम अनाक्रमणीये । यद्वा स्तनलक्षणशैलदुर्गाभ्यां विषमे अगम्ये । शशी कादृश —प्रोद्यन्त एव दूरतर प्रसारिता करा किरणा एव हस्ता येन तथाभूत । खड्गाकर्षणेऽपि करस्य तथात्वात्, केचित्तु प्रोद्यश्चासौ दूरतरप्रसारितकरश्चेति कर्म्मधारयमाहु ।

अत्र शशिनो नायकत्व, मानस्य प्रतिनायकत्व विवक्षितम् । तथा च यथा कान्तो जारवधार्थं खड्गमाकर्षति तथा शशी मानवधार्थं खड्गमाकर्षतीति भाव ।

+ पूर्वार्द्धे कोपिन कविनिबद्धवक्तृ शशिन उक्ति, तत्र दीर्घसमासो युक्त परन्तु न कृत । उत्तरार्द्धे दीर्घसमास कृत स च न युक्त, उत्तरार्द्धे कवेरन्नौ समासस्यानौचित्यात् ।

1 'कृपाणम्' (घ ज पु) २ '-न्नौ तु' (ङ पु)

"चन्द्रं मुञ्च कुरङ्गाक्षि ! पश्य मानं नभोऽङ्गणे ।"

अत्र नभोऽङ्गणे चन्द्रं पश्य मानं मुञ्चेति युक्तम्। "क्लिष्टत्वम् एकवाक्यविषयम्"इत्यस्माद् भिन्नम्। वाक्यान्तरे वाक्यान्तरानुप्रवेशो गर्भितता। यथा—

"रमणे चरणप्रान्ते प्रणतिप्रवणेऽधुना।
वदामि सखि! ते तत्त्वं कदाचिन्नोचिता. क्रुधः ॥" (म)

अर्थदोषानाह—

अपुष्टदुष्क्रमग्राम्यव्याहताश्लीलकष्टताः ।
अनर्थकृतनिर्हेतुप्रकाशितविरुद्धताः ।
सन्दिग्धपुनरुक्तत्वे ख्यातिविद्याविरुद्धते ।
साकाङ्क्षतासहचरभिन्नतास्थानमुक्तता[1] ।
अविशेषे विशेषोक्तिरनियमे नियमस्तथा ।
तयोर्विपर्ययो विध्यनुवादायुक्तते तथा ।
[2]निर्मुक्तपुनरुक्तत्वमर्थदोषाः प्रकीर्तिताः ॥ ५ ॥ (य, आ)

तद्विपर्य्ययो विशेषेऽविशेषो नियमेऽनियम । अत्रापुष्टत्वं मुख्यानुपकारित्वम्
* यथा—"विलोक्य वितते व्योम्नि विधुं मुञ्च रुषं प्रिये !।

(वि, म) संकीर्णमाह—वाक्यान्तरेति । मुञ्च मानमिति । वृत्तावेव अस्यान्वय स्पष्टः । अस्य क्लिष्टत्वे भेदमाह—क्लिष्टत्वमेवेति । गर्भितत्वमाह—वाक्यान्तरेति । रमणे इति—अत्र रमणे चरणप्रान्तपतिते सत्यधुना क्रोधो नोचित इति वाक्यस्य मध्ये वदामि सखि ते तत्त्वमिति वाक्यमनुप्रविष्टम ।

(वि, य) इदानीं त्रयोविंशतिमर्थदोषानाह—अर्थदोषानिति । ख्यातेति । ख्यातविरुद्धता विद्याविरुद्धतेति दोषद्वयम्। तयो विपर्य्ययाविति। अविशेषे विशेषोक्तेर्विपर्य्ययो विशेषेऽविशेषोक्तिः । अनियमे नियमोक्तेर्विपर्य्ययश्च नियमेऽनियमोक्तिरित्यर्थः । विध्ययुक्तताऽनुवादायुक्तता चेति दोषद्वयम् ।

(वि, र) मुख्येति—मुख्यो विधेयरूप । अन्यत् स्पष्टम् । अधिकपदादस्य

(लो, ओ) अर्थदोषानुद्देश्यक्रमप्राप्तान् । ताप्रत्ययस्यापुष्टादिप्रत्येकमन्वयः ।
(लो, औ) मुख्य प्रकृतप्रतिपाद्यम् । समकालमेव बोधप्रतिभास., अत एव

---

* यस्यार्थाभावेऽपि न विवक्षितार्थविलम्बः सोऽर्थोऽपुष्ट. । स च द्विधा—अन्यलभ्यत्वादनुपयोगाच्च । व्यर्थमाहुर्गतार्थं यत् यच्च स्यान्निष्प्रयोजनमिति भोजराज । तत्र द्वितीयप्रकारस्योदाहरणमाह ।

1 'युक्तता' (ख. ग. पु.) 2 'नियुक्त' (ख. ग. पु.)

अत्र विततशब्दो मानव्यागं प्रति न किञ्चिदुपकुरुते। अधिकपदत्वे पदार्थान्वयप्रतीतेः समकालमेव बाधप्रतिभास इह तु पश्चादिति विशेषः। (र,औ) दुष्क्रमता यथा—"देहि मे वाजिनं राजन्! गजेन्द्रं वा मदालसम्।"

अत्र गजेन्द्रस्य प्रथमयाचनमुचितम्। (ल) *

"स्वपिहि त्वं समीपे मे स्वपिम्येवाधुना प्रिय!"।

अग्राम्यो ग्राम्यः। (व) +

कस्यचित् प्रागुत्कर्षमपकर्षं वाभिधाय पश्चात्तदन्यथाप्रतिपादनं व्याहतत्वम्। यथा—

"हरन्ति हृदयं यूनां न नवेन्दुकलादयः।
वीक्ष्यते यैरियं तन्वी लोकलोचनचन्द्रिका॥"

भेदमाह—**अधिके**ति। पल्लवाद्यतिरिक्तेऽर्थेऽत्र व्याहतिशब्दस्य निष्प्रयोजनत्वरूपो बाधोऽन्वयबोधसमकालमेव प्रतिभासत इत्यर्थः।

(वि, ल) दुष्क्रमतामाह—**देही**ति। **अत्रे**ति—अधिकमूल्यवस्तुप्रार्थने सति तत्रासम्मतिसम्भावनयैव न्यूनमूल्यप्रार्थनमुचितत्वात्।

(वि, ल) **स्वपिही**ति—नायकं प्रति नायिकाया उक्तिरियम्। हे प्रिय! एषा अहं स्वपिमि। त्वमपि समीपे स्वपेहीत्यर्थः। ग्राम्य इति वैदग्ध्यराहित्येनोक्त इत्यर्थः।

(वि, श) व्याहतत्वलक्षणमाह—**कस्यचि**दिति—तदन्यथात्वमुत्कर्षान्यथात्वमपकर्षः। अपकर्षान्यथात्वमुपकर्षस्तत्प्रतिपादनमित्यर्थः। तत्र प्रागपकर्षे उदाहरति **हरन्ती**ति—इयं लोकलोचनचन्द्रिकास्वरूपा तन्वी यैर्युवभिर्वीक्ष्यते तेषां यूनां हृदयं नवेन्दुकलादयो न हरन्तीत्यर्थः। अत्र आदिपदाच्चन्द्रिकाऽपि निन्दिता, तन्व्या

वाक्यदोषता। इह अर्थप्रत्ययानन्तरम्, अत एव अस्यार्थदोषत्वम्। विवरं छिद्रं स्त्रीवाचि वा अश्लीलम्। पुंध्वजस्मारकत्वात्।

---

* दृष्टोऽनुचित क्रमो यत्र तस्य भावः। दुष्क्रमत्वं लोके शास्त्रे च सिद्धस्य क्रमस्य वैपरीत्यम्। प्रधानस्यासम्भवे हि गौणं निर्दिश्यते। बहुमूल्ययाचनानन्तरं तदप्राप्तिभावशङ्कयाऽल्पमूल्यस्य याचनं लोकव्यवहारसिद्धम्। नहि तुरङ्गदानेऽशक्तस्य विमुखस्य वा मातङ्गदानप्रसङ्गः। न चायं शब्ददोषः, मुख्यानुपकल्पयोरर्थधर्मत्वात्।

+ ग्राम्यत्वम्—अर्थस्य वक्तुरविदग्धताप्रतिपादकत्वम्। तदुक्तम्—

स ग्राम्योऽर्थो रिरंसादि पामरैर्यत्र कथ्यते।
वैदग्ध्यवर्त्मनिर्मलव हित्वैव वनितादिषु॥

I न्यत्व—(ख. पु)

अत्र येषामिन्दुकला नानन्दहेतुस्तेषामेवानन्दाय तन्व्याश्चन्द्रिकात्वारोप ।
(श) +

"हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिण ।
यथाशु जायते पातो न तथा पुनरुन्नति ॥"

अत्रार्थोऽश्लील (प) †

"वर्षत्येतदह पतिर्न तु घनो धामस्थमच्छ पय
सत्य सा सवितु सुता सुरसरित्पूरो यया[1] प्लावित ।

तदारोपादुत्कर्षे प्रतिपादितस्तदाह—अत्रेति । प्रागुत्कर्ष तु यथा—'तव कणन्दुना तन्वि ! नभसीन्दुस्तिरस्कृत ।' इति ।

(वि, प) हन्तुमेवेति। अप्रणिधानेन युद्धप्रवृत्तपुरुषवर्णनमिदम्। स्तब्धस्य भद्राभद्रविवेचिन विवर परस्य च्छिद्र तत्र इच्छामात्र नतु प्रवृत्तौ तदपेक्षा स्तब्धत्वात् । अत्र पुसो लिङ्गस्य प्रतीति ।

(वि, स) क्लिष्टत्वाद्यभावेऽपि कष्टगम्यार्थत्व तत्त्वम् । वर्षतीति—कस्याश्चित् कामिन्या कान्तदूती प्रति अन्यापदेशेन सोत्कण्ठवचनमिदम्—अह पति सूर्यो धामस्थ स्वीयरश्मिस्थम् एतद् दृश्यमान पयो वर्षति नतु घनो वर्षति घनस्य सूर्यहस्तस्थानीयत्वात् । तथा यया सुरसरितो गङ्गाया पूर प्रवाह प्लावित सा अर्थात् यमुना

(लो, अ) वर्षतीति यमुना व्यासेनेति । वृष्टियमुनयो सूर्य्यप्रभवत्व न खलु केनापीनोक्त, किन्तु व्यासेन श्रुत्या वेदाचारचर्य्यया चेति । श्रद्धा सप्रत्यय । कस्याश्चित् कामिन्या कान्तदूतीच्छलापदेशेन सोल्लुण्ठनवचनमिदम् । अत्र प्रकृष्टतर प्रकृतोयमर्थ -स नागर सत्यवागिति प्रामाणिक्मेवेदम् । तस्य दूतीना भवतीना वाचि सत्यप्रत्ययो युज्यते । किन्त्वहमेव मुग्धा मिथ्याप्रत्ययमेव करोमीति । मृगीणां मरुमरीचिकासु चलप्रत्ययो यथा, ममापि भवतीषु सप्रत्ययस्तथैव ।

+ व्याहतत्व—परस्परविरुद्धत्वम् । अत्र पूर्वार्द्धे चन्द्रकलादय यान् प्रति असारतया प्रतिपादिता तैरेव उत्तरार्द्धे नायिकाया चान्द्रिकात्वम् उत्कर्षायारोप्यते इति व्याघात ।

† विवेचनारहितस्य योद्धुर्वर्णनमिदम् । हन्तु हिंसा, योनौ ताडनविशेष च कर्तुमेव प्रवृत्तस्य स्तब्धस्य अनघस्य, उन्नतस्य च विवरैषिण परच्छिद्रान्वेषिण, स्त्रीव राज्ञान्वेषिण अस्य दुष्टस्य लिङ्गस्य च यथा आशु पात अपचय वीर्य्यत्यागात् शैथिल्य च जायते तथा उन्नतिरुपचयो दृढता (उद्गम) च पुन न जायते ।

पदान्तरप्रतिपादितोऽप्ययमर्थोऽश्लील एवेति पदवाक्याश्लीलतोऽस्य भेद । तत्र साधनादिपदानाम् एव अश्लीलता, सेनादिपदैस्तदर्थप्रतिपादनेऽश्लीलत्वाभावात् ।

1 'यथा' (ट पु)

व्यासस्योक्तिषु विश्वसित्यपि न कः श्रद्धा न कस्य श्रुतौ
न प्रत्येति तथापि मुग्धहरिणी भास्वन्मरीचिष्वप ॥" (स, अ)

अत्र यस्मात् सूर्य्याद् वृष्टेर्यमुनायाश्च प्रभवस्तस्मात्तयोर्जलमपि सूर्य्यप्रभवम्। ततश्च सूर्य्यमरीचीना जलप्रत्ययहेतुत्वमुचितम्। तथापि मृगी भ्रान्तत्वात् तत्र जलप्रत्यय न [1]करोत्ययमप्रस्तुतोऽप्यर्थो दुर्बोध, दूरे चास्मात् प्रस्तुतार्थबोध इति कष्टार्थत्वम्। (ह)

"सदा चरति खे भानु सदा वहति मारुत ।
सदा धत्ते भुव शेष सदा धीरोऽविकत्थन ॥" (क)

सवितु सूर्यस्य सख सुता। कथमेतन्निश्चितम् इत्यत्राह—व्यासस्येति—वृष्टियमुनयो सूर्य्यप्रभवत्व न खलु केनचिदनाप्तनोक्त, किन्तु व्यासेन श्रुत्या वेदापरपर्य्यायनाना चेति। अपि जिज्ञासायाम्। आदित्याज्जायते वृष्टिस्ततश्चान्न तत प्रजा" इति। एवरूपासु कालिन्द्या सूर्य्यकन्यात्वबोधिकासु च व्यासोक्तिषु को जनो न विश्वसिति कस्य चनस्य वा एवमधिकाया श्रुतौ वदे न श्रद्धा? अपि तु सर्व एव विश्वसिति सर्वस्य च श्रद्धा तथा च हरिण्या अपि तत्र विश्वासश्रद्धोचित्यमेव,। तथापि मुग्धा मूढा हरिणी भास्वन्मरीचिषु अधिकरणेषु जल न प्रत्येति। धामस्थमच्छ पय इत्यनेन पयस सूर्य्यमरीचिगतितया व्यासश्रुतभ्या बोधितत्वेन तथा प्रत्ययौचित्यात्।

(वि, ह) अत्र विवक्षितार्थस्य कष्टबोधत्व दर्शयति—अत्रेति। प्रभवो जनकम्, तयोर्जलमपीति वृष्टेर्यमुनायाश्च इत्यर्थ। सूर्य्यजन्यवृष्टिजलेनैव नदीपूरणात् यमुनाया अथ वृष्टिजनकप्रत्ययहेतुत्वमुचितमित्यर्थ। जलस्य तद्धामस्थत्वेनोक्तत्वात्। भ्रान्तत्वात् तत्रेति। तत्र मरीचिष्वधिकरणेषु यमुनाजलस्य सूर्य्यप्रभवत्वप्रदर्शनात् पिपासया यमुनायामेव प्रवर्त्तते तत्र न जलप्रत्यय। मरीचिषु तत्तुल्याम्बुभ्रमान्न प्रत्येति इत्येतत्प्रदर्शनार्थमयमप्रस्तुतोऽर्थ इति। अत्र हि अप्रस्तुतप्रशसानामालङ्कार। अप्राकरणिकथनात् प्राकरणिकप्रत्यायनरूप। प्राकरणिकश्चात्र न्यायसिद्धेऽप्यर्थ भ्रान्तानाचनाना प्रत्ययाभाव इत्येवरूप। अप्राकरणिकस्तु मृग्या जलप्रत्ययरूप।

(वि, क) अनवीकृतमाह सदेति—धीरोऽविकत्थन। नव प्रत्येष। कथित पदस्य भेदमाह—अत्रेति। पर्यायान्तरेण समानार्थकेन विच्छित्यान्तर प्रकारकृतो भङ्गीभेद। तथापीति—प्रकारकृतभङ्गीभेदाभावादनवीकृतत्वमेवेत्यर्थ यथा—"सदा चरति खे भानुर्निश्च वहति मारुत। धत्ते क्षमा सर्वदा शेषोऽचल धीरोऽविकत्थन ॥" अत्र सदानित्यसर्वदाचलपदाना समानार्थता समानप्रकारता च। भानु सदेति—षष्ठाशकृते रात्रोऽपि षष्ठाशग्रहण प्रजापालनरूपो धर्म एव सर्वदेत्यर्थ। अत्र सदासततशब्दयो समानप्रकारकत्वसमानार्थकत्वेऽपि रात्रिन्दिवमित्यत्रार्थस्यैव साम्य रात्रित्वदिवात्व प्रकारभेद।

---

1 'रातारयम' (च ज ट)

अत्र सदेत्यनवीकृतत्वम् । अत्रास्य पदस्य पर्य्यायान्तरेणोपादानेऽपि यदि नान्यद्विच्छित्त्यनन्तरं तदास्य दोषस्य सद्भाव इति कथितपदत्वाद् भेदः । (आ) * नवीकृतत्वं यथा—

"भानुः सकृद्युक्ततुरङ्ग एव रात्रिन्दिवं गन्धवहः प्रयाति ।
बिभर्त्ति शेषः सततं धरित्रीं षष्ठांशवृत्तेरपि धर्म एषः ॥" +

"गृहीतं येनासीः परिभवभयान्नोचितमपि
प्रभावाद् यस्याभूत्र खलु तव कश्चिन्न विषयः ।
परित्यक्तं तेन त्वमपि सुतशोकान्न तु भयाद्
विमोक्ष्ये शस्त्र ! त्वामहमपि यतः स्वस्ति भवते ॥"

अत्र द्वितीयशस्त्रमोचने हेतुर्नोक्त इति निर्हेतुत्वम् । ※ (ख, इ)

(वि, ख) निर्हेतुमाह—गृहीतामिति—हेत्वाभाद्वासत्त्वेऽपि हेत्वनुक्तिस्तत्त्वम् । कर्णक्रोधात् त्यज्यमानमस्त्रं सम्बोध्य अश्वत्थाम्न उक्तिरियम् । हे शस्त्र ! त्वं येन मम पित्रा ब्राह्मणजातेर्नोचितमनुचितमपि परिभवभयाद् द्रुपदनृपतित. परिभवभयाद् गृहीतमासीः, तथा यस्य मम पितु. प्रभावात् तव खलु न विषयो न कश्चिद् अभूदित्रोऽपि त्वद्विषय आसीदित्यर्थः । तेन मम पित्रा सुतस्य हतत्वेन श्रुतस्य मम शोकात् नतु भयात् परित्यक्तमसि अहमपि यतस्त्वा विमोक्ष्ये, अत. स्वस्ति भवते इत्यर्थ. । अत्रेति—द्वितीयमश्वत्थाम्नः शस्त्रमोचनम् । तत्र चाहमपि इत्यपिकार एव हेत्वाभद्योत्थापकः ।

(लो, आ) अस्येत्यनन्तरं सदेति शेष । पर्यायान्तरेण सर्वदेत्यादिना ।
(लो, इ) शस्त्रमोचन इत्यत्र अश्वत्थाम्न इति शेष. ।

---

* अनवीकृत—भङ्ग्यन्तरेण प्रकारान्तरेण यन्नवत्वं तन्न प्राप्तिनः । यत्र एकभङ्गिनिर्दिष्टोऽनेकार्थ सोऽनवीकृतार्थ । अत्रोदाहरणे सर्वेष्वर्थेषु "सदा" इत्येका भङ्गि. भङ्ग्यन्तराभावान्न नवीकृतमित्यर्थ । अत्र पिष्टपेषणन्यायेन एकप्रसरवार्थाभिधानेन सहृदयोद्वेजकत्वं दुष्कृतायोजमिति नित्योऽयं दोष. ।

विच्छित्ति. कान्तिपोषकमनोव्यापारविशेष । यत्तदादिशब्दानामसकृत् प्रयोगेऽपि कथितपदत्वं न शङ्कनीयं, तदर्थानां शब्दान्तरेण निर्देष्टुमशक्यत्वात् । यथा—"ते देशास्ते जनपदा" इत्यादौ "स किं सखे"त्यादौ च शब्दान्तरेण विवक्षितोऽर्थः प्रतिपादयितुं न शक्यते । तस्मादत्र न कथितपदत्वं परं विच्छित्तिभेदाभाव एव दोष. । अत एव प्रसरवार्थाभिधानेऽनवीकृत—भिन्नप्रकारेणार्थाभिधाने तु नवीकृतमिति अर्थदोषताऽस्य ।

+ गरुत् सततं रात्रिन्दिवम् इति भङ्गिभेदेन प्रकारभेदेनोक्तः । अत्र वाच्यार्थबोधकाले भिन्नभिन्नप्रकारेण बोधान्नवीकृतत्वम् ।

※ अत्र यथा द्रोणाचार्यकर्तृकशस्त्रमोचने "सुतशोकात्" इति हेतुरुक्तस्तथाऽश्व-

"कुमारस्ते नराधीश ! श्रिय समधिगच्छतु ।"

अत्र त्व म्रियस्वेति विरुद्धार्थप्रकाशनात् प्रकाशितविरुद्धत्वम् । ¶ (ग)

"अचला अबला वा स्यु सेव्या व्रत मनीषिण ।"

अत्र प्रकरणाभावाच्छान्तशृङ्गारिणो को वक्तेति निश्चयाभावात् सन्दिग्धत्वम् । + (घ)

"सहसा विदधीत न क्रियामविवेक परमापदा पदम् ।
वृणुते हि विमृश्यकारिण गुणलुब्धा स्वयमेव सम्पद ॥"

अत्र द्वितीयार्द्धव्यतिरेकेण द्वितीयपादस्यैवार्थ इति पुनरुक्तता । (ङ) ×

(वि, ग) प्रकाशितविरुद्धार्थमाह—**कुमारस्ते** इति । कुमार पुत्र । **अत्रेति** पितृमरणानन्तरमेव पुत्रस्य श्रालाभ प्रायश इति भाव ।

(वि, घ) सन्दिग्धमर्थमाह—**अचला** इति । **अत्रेति**—उक्तिनिश्चयाभावाद् अचला एव अबला एव वा सेव्या इति निश्चयाभावात् सन्देह इत्यर्थ ।

(वि, ङ) पुनरुक्तमर्थमाह—**सहसेति**—अविवेकोऽविमृश्यकारिता स तु आपदा पदम् आपज्जनक इत्यर्थ । अनेकस्मरणस्य कार्यव्यापकत्वादविमृश्यकारिताया आपद्व्यापकत्व दर्शितम् । ईदृशान्वयव्याप्त्या लभ्या व्यतिरेकव्याप्तिमाह—**वृणुते हि** इति । विमृश्यकारिता अविमृश्यकारितारूपस्य व्यापकस्य व्यतिरेकस्तस्यापद्रूपव्याप्याभावरूपाणा सम्पदा व्याप्यतामाह—**गुणलुब्धा** इति । यत्र विमृश्यकारिता तत्र सम्पद इत्यर्थ । **अत्रेति**—द्वितीयार्द्धव्यतिरेकेण द्वितीयार्द्धलब्धव्यतिरेकव्याप्त्या द्वितीयस्यैव द्वितीयपादलब्धान्वयव्याप्तेरेवेत्यर्थ । अन्वयव्याप्तेरेव पर्यवसितोऽथा व्यतिरेकव्याप्ति । सोऽर्थ द्वितीयार्द्धोक्तव्यतिरेकव्याप्त्या उक्त इत्यत पुनरुक्त इत्यर्थ ।

त्यामकसूक्तशस्त्रमोचने "पितृशोकात्" इति हेतुर्वक्तव्य, स च नोक्त इति निह्नुतम् ।

¶ विरुद्धमतिकृद् दोषे शब्दस्योभयार्थता, अत्र न तथेति भेद । तत्र शब्दशक्तिमूला विरुद्धा प्रतीति । अत्र अर्थसामर्थ्यनियन्धनेति भेद ।

+ तात्पर्यज्ञानार्थाना हि शाब्दी प्रमा । तात्पर्य च । प्रकरणादिभिरवगीयते । अत्र प्रकरणाद्यभावेन शमरसे शृङ्गाररसे वा वक्तुस्तात्पर्यमिति निश्चयाभावात् सन्दिग्धत्व वाक्यार्थस्य ।

× पुनरुक्त द्विधा—स्वार्थशब्दगतमर्थगत च । आद्य कथितपदत्वेन गृहीत न दोषे । अन्य शब्दपरिवृत्तिसहत्वादर्थदोष । तच पदार्थवाक्यार्थगतत्वेन द्विविधम् । तत्रान्यमुदाहरति—**सहसेति** । पुनरुक्तत्वावच्छेदेन अवगतत्वे सति पुनरुक्तप्रकारेण पर्यायान्तरेण एव प्रतिपादित । अर्थेन प्रतिपाद्यस्य प्रतिपादनेऽपुष्टत्वम् । स्वेन परस्य पादान तु कथितपदत्वम् । अत्रोदाहरणे तु "अविवेक

प्रसिद्धिविरुद्धता यथा—

"ततश्चचार समरे शीतशूलधरो हरिः ।"

अत्र हरेः शूलं लोकेऽप्रसिद्धम् । यथा वा—

"पादाघातादशोकस्ते सञ्जाताङ्कुरकण्टक ।"

अत्र पादाघातादशोकेषु पुष्पमेव जायत इति प्रसिद्धं न त्वङ्कुर इति कविसमयव्यातिविरुद्धता । *

" अधरे करजक्षतं मृगाक्ष्या." ।

अत्र शृङ्गारशास्त्रविरुद्धत्वाद् विद्याविरुद्धता । एवमन्यशास्त्रविरुद्धत्वमपि ।(च)

"ऐशस्य धनुषो भङ्गं क्षत्रस्य च समुन्नतिम् ।
स्त्रीरत्नं च कथं नाम मृष्यते रावणोऽधुना ॥"

अत्र स्त्रीरत्नमुपेक्षितुमित्याकाङ्क्षता । (छ) ×

(वि, च) प्रसिद्धिविरुद्धमाह—**प्रसिद्धी**ति । कविप्रसिद्धिविरुद्धत्वं तत्त्वम् । कीर्त्तिधावल्यवर्णनादावन्यलोकप्रसिद्धिविरोधस्तु न दोष । **तत्र** इति । **शीते**ति—शीत शिलाघर्षणेन तनूकृतम् । हरिः कृष्णः । **अत्रे**ति–लोके कविलोके । **पादाघाता-दि**ति । ते पादाघातादिति अन्वयः । **अत्रे**ति—**नत्वङ्कुर** इति । न च कुसुमं कृतदोहदं त्वया इति कालिदासकाव्ये दोहदस्यापि वर्णनात् कथमङ्कुरो न प्रसिद्ध इति वाच्यम् ? "कवीना सत्यर्थेऽपि अप्रसिद्धिरसत्येऽपि प्रसिद्धि" इति अङ्कुरस्य केनापि कविना अवर्णनाद् दोष इत्यर्थः । अप्रयुक्तत्वं तु पदस्य नार्थस्य, इति अतोऽत्र न तत् प्रसक्तिः । विद्याविरुद्धमाह–**अधरे** इति । विद्याशास्त्रम् । **एवमन्ये**ति–'स्मृति रात्रौ बुधः सदा' इति धर्मशास्त्रस्य, 'शूरो नीतिं विना जयी'ति नीतिशास्त्रस्य, 'ज्वरवान् स्नातुमर्हति' इति वैद्यशास्त्रस्य विरुद्धम् ।

(वि, छ) साकाङ्क्षतामाह–**ऐशस्ये**ति । उपात्तपदार्थान्वयभ्रमविषयत्वे सति अनुपात्तपदार्थसाकाङ्क्षत्वं तत्त्वम् । न्यूनपदत्वे तु न तादृशो भ्रम इति भेदः । **ऐशस्ये**ति । कथं मृष्यते कथं सहते कथं न द्वेष्टि इत्यर्थः । इयमुक्तिश्च द्वेष्यवस्तुन्येव

परमापदो पदम्" इत्युक्ते "विवेकी सम्पदा पर पदम्" इति व्यतिरेकव्याप्त्यावगम्यते । तथापि "वृणुते" इत्यादिना तस्यैवार्थस्य पुनः प्रत्यायनात् पुनरुक्तेत्यर्थ. ।

* यत्रार्थे न प्रसिद्धिस्तत्र प्रसिद्धिविरुद्ध. । स द्विविध लोकप्रसिद्धिविरुद्धः कविप्रसिद्धिविरुद्धश्च । क्रमेण तदुदाहरति ।

× उपेक्षितुमित्यनुपादाने स्त्रीरत्नस्योपेक्षणीयत्वं लभ्यते, नच तद्विवक्षितं, स्त्री-रत्नस्य अद्वेष्यत्वात्, प्रत्युत प्रार्थनीयत्वात् । तथाच आसत्त्यभावात् अन्वयाभावे साकाङ्क्षत्वम् । अध्याहृतेनार्थेन यत्रान्वयोपपत्तिस्तत्र न्यूनपदत्वमिति ततोऽस्य भेदः ।

निर्हेतुनायां हेतोरनाकाङ्क्षितत्वमात्रम्, अत्र तु न हेतोरनाकाङ्क्षितत्वमिति ततोऽस्य भेदः ।

सज्जनो [1]दुर्गतौ मग्न कामिनी गलितस्तनी।
"खल पूज्य समज्यायां तापाय मम चेतस ॥" (ज) ×

अत्र सज्जन कामिनी च शोभनौ तत्सहचर खलोऽशोभन इति सहचरभिन्नत्वम्।

"आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चत्वार्येव
भक्तिर्भूतपतौ पिनाकिनि पद लङ्केति दिव्या पुरी।

घन्ते स्त्रीरत्न तु न द्वेषयोग्यमित्यत स्त्रीरत्नोपेक्षा एव द्वेषयोग्या इत्यत उपेक्षितुमित्याह—इत्याह—अत्रेति। अत्र कर्मपदोत्तरचमारस्य कर्मान्तरेण सहैककियान्वयित्व प्रत्याय्यते इत्यत स्त्रीरत्नस्यापि मृष्यतिक्रियान्वयित्वभ्रम। अत्र च रावण इत्येव पाठो युक्तो न भार्गव इति तस्य जितेन्द्रियस्य स्त्रीरत्नोपेक्षाया द्वेषाभावेन मृष्यते तदाभाद्यत्वाभावात्।

(वि, ज) सहचरभिन्नत्वमाह—सज्जन इति। समज्यायां समाजे। उत्कृष्टनिकृष्टयोरेककियान्वयित्वेन कथन तत्त्वम्।

(वि, झ) अस्थानमुक्तनामाह—अस्थाने समापनायोग्यस्थाने मुक्तता समाप्तता तत्त्वम्। आज्ञेति—सीतापरिणयप्रार्थनाय रावणेन प्रेषित तत्पुरोहित शौष्कल प्रति जनकपुरोहितस्य शतानन्दस्य रावणप्रशसापूर्वमोपेक्षावाक्यमिदम्। अहो आश्चर्यमीदृग् वरो न लभ्यते। यतस्तस्य आज्ञा शक्रशिखामणे प्रणयिनी, मणिरिव तदाज्ञापि शिखाया शक्रेण धार्य्यत इत्यर्थ। तथा शास्त्राण्येव नव नवीन चतु शास्त्रदृष्टयैव कर्मकरणात्। तथा भूताना प्राणिना पत्यौ पिनाकिनि महेशे भक्ति। तथा लङ्केति दिव्यापुरी पद निवासस्थानम्। तथा दुहिणस्य ब्रह्मणोऽन्वये कुले उत्पत्ति। एतानि सर्वाण्येव उत्कर्षहेतव सन्ति एव चेत् यदि एष रावणो न स्यात् दुर्वृत्तत्वेन ख्यातनामा लोकानामपकारकत्वेन आर्त्तरक्षारक्षश्च यदि न स्यात्तदा ईदृग्वरो न लभ्यते इत्यर्थ।

(लो, ई) आज्ञा शक्रेति—दुहिणो ब्रह्मा। ईदृगुक्तप्रकारगुणविशिष्टो वरो जामाता श्रेष्ठो वा। रावण जगदाक्रन्दकारी। अयमर्थ—अस्मिन् दशमुखे सर्वे गुणा सन्ति। जगदाक्रन्दकारित्व दोष। अतश्च रावणपदस्यार्थान्तरसक्रमणाद् वाच्यत्वेनैव दोषास्पदत्वम्। एतावतैव वाक्य समापयितुमुचितम्। यत् पुनरुक्त क्व नु पुनरित्यादि तेन पूर्वस्थानेऽर्थप्रतिपादन न लक्ष्यमित्यपदमुक्तमेव दोष। ननु क पुनरित्यादिसमर्थकवाक्यत्वेन पुनरुक्तमिति वाच्यम्? रावणस्यार्थस्य अयुक्ततापादनार्थमेव वक्तुम् इत्यस्य

× सहचरेषु समभिव्याहृतेषु सहचरेभ्य समभिव्याहृतेभ्यो वा भिन्न विजातीय विजातीयत्व च उत्कृष्टत्वापकृष्टत्वाभ्याम्। सतामसता वा साहचर्य्येण तदितराभिधान दोष। अत्र उत्कृष्टमारुरुक्षोश्चित्तस्य तत्परिहारेण निकृष्टारोहण विलम्ब।

1 'दुर्गतो' (ख पुस्तके)

उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते
स्याच्चेदेष न रावण क्व नु पुन सर्वत्र सर्वे गुणा ? ॥"

अत्र न रावण इत्येतावतैव समाप्यम्। (झ, ई) *

"हीरकाणा निधेरस्य सिन्धो किं वर्णयामहे।

अत्र रत्नाना निधेरित्यविशेष एव वाच्य । (ञ) §

"आवर्त्त एव नाभिस्ते नेत्रे नीलसरोरुहे।

तस्मादय त्याज्य एव इति भाव। पुनराह—**क्व पुनरिति**। सर्वत्र जने सर्वे धर्म्मा क्व नु गुणा ? क्वचिद्धर्मो दोषोऽपीत्यर्थ । तथा च सर्वेषा दोषमिश्रिता एव गुणा इत्यर्थ । ननु क्व नु सर्वे गुणा इत्यर्थ । सर्वगुणासत्त्वस्यानुक्तत्वात्त समर्थनानौचित्यात् सर्वगुणसत्त्व मुक्त्वा किञ्चिद्दोषसत्त्वस्यैवोक्तत्वात्। **अत्रेति**। न रावण इत्यन्तस्यैव रावणत्यागार्हत्वात्। क्व नु पुनरित्यादे तत्परिग्रहार्हत्वादेव।

(वि,ञ) अविशेषे विशेषोक्तिमाह-**हीरकाणामिति-अत्रेति**। उत्कर्षापर्य्याप्त्या त्यवर्णनीयत्व वस्तुमुचितम्। रत्नान्तरासत्त्वे तु हीरकमात्रार्थोत्कर्षापर्य्याप्तिबोध इति भाव।

(वि, ट) अनियमे नियमोक्तिमाह—**आवर्त्त एवेति**। वलय. स्त्रीवलय । अत्र नाभ्यादिषु आवर्त्तादयो रूप्यत्वेन विधेयास्तत्र नाभिरेवावर्त्त इति करणे आवर्त्तरूप णयोग्यस्य अन्यतरस्य व्यावर्त्तनार्थमेवकारो दातव्य । एवम् 'आवर्त्त एव' इति करणे तु नाभ्या रूपणयोग्यवापीधर्मान्तरभावेन व्यावर्त्तनीयाभावात्तादृशनियमार्थक एवकारो

वाक्यस्य तथाप्रयुक्तत्वेन समर्थनस्यानौचित्यात् । तथा सति युक्तत्वेन वक्तुमिष्ट वाक्य युक्तमुक्त स्यात्।

---

* अस्थानयुक्ततामाह—अस्थाने युक्त सम्बन्ध । तत्र सम्बन्ध उपसहारा विरुध्यते। सूत्रे अपदमुक्त इति पाठान्तरम्। तदा अपदे अस्थाने अर्थेन मुक्त इत्यर्थ । आक्षेपेति। बालरामायणे जनक प्रति शतानन्दस्योक्तिरियम्। अत्र रावणपदेनैव अर्थान्तरसक्रमितवाच्यतया सर्वोद्वेजकत्वमुपस्थापयता नाय वरयोग्य इति विवक्षितोऽर्थ पर्य्यवस्यति। अतोऽत्रैव वाक्यसमाप्तिरुचिता। यत्तु क्व नु पुनरित्यादिदोषसमर्थन तद् विवक्षितार्थस्य प्रातिकूल्यमावहति । ईप्सितस्यैव दोषसमर्थनमुचित, ननु जिहासि तस्य इति भाव ।

अत्र विरुद्धप्रतीतिरेव दोषबीजम्। अतो नित्य एवायं दोष । नच प्रकाशित विरुद्धतान्तर्भाव । तस्य स्थानविशेषयोगमनपेक्ष्य प्रवृत्ते । अत्र तात्पर्यविरुद्धस्य-वाभिधानाच्च।

§ बहुव्यापक सामान्यम्। अल्पव्यापको विशेष इति । रत्ननिधेरिति सामान्ये वक्तव्ये हीरकनिधेरिति रत्नविशेषस्योक्तौ अविशेषे (सामान्ये) विशेषोक्तिरिति दोष ।

"[1]तरङ्गावलयस्तेन त्व लावण्याम्बुवापिका ॥"

अत्रावर्त्त एवेति नियमो न वाच्य । (ट)

"यान्ति नीलनिचोलिन्यो रजनीष्वभिसारिका ।"

अत्र तमिस्रास्विति रजनीविशेषो वाच्य । (ठ) †

"आपातसुरसे[3] भोगे निमग्ना किं न कुर्वते ?"

अत्र आपात एवेति नियमो वाच्य ॥ (ड) ×

ननु वाच्यस्यानभिधाने "व्यतिक्रमलव" इत्यादावपेरभाव, इह चैवकारस्येति कोऽनयोर्भेद ? अत्राह—नियमस्यावचनमेव पृथग् भूतम् नियमपरिवृत्तेर्विषय इति चेन्न । (ढ)

तथा सत्यपि द्वयो शब्दार्थदोषताया नियमकाभावात् । तत्का गतिरिति चेत् "व्यतिक्रमलवम्" इत्यादौ शब्दोच्चारणानन्तरमेव दोषप्रतिभास, इह

न युक्त इत्याह—**अत्रेति**—नाभिरेवेत्येव नाभिपदोत्तरमुचितस्यैवकारस्यावर्त्तोत्तरपातादस्थानस्थपदत्व नाशङ्कनीयम् । नियमोक्तित्वेन विशेषात् तद्भेदस्य तत्र प्रवेशनीयत्वात् ।

(**वि,ट**) विशेषविपर्ययोक्तिमाह—**यान्तीति**—निचोलो वस्त्रम् । **अत्रेति**—तमिस्रायामेव नीलवस्त्रौचित्याद्रजनीविशेषरूपायास्तमिस्राया एव वस्तुमौचित्येन ज्योत्स्नासाधारणरजन्युक्त्याऽनौचित्यमित्यर्थ ।

(**वि,ड**) नियमविपर्ययोक्तिमाह—**आपातेति**—ननु भो किं न कुर्वते—अकार्यमेव कुर्वत एवेत्यर्थ । **अत्रेति**—सर्वकालसुरसत्वे तन्निमज्जन नार्यम्, अत सर्वकाल व्यावर्त्तनाय आपातत एवेति नियमो वाच्य इत्यर्थ ।

(**वि, ढ**) अन्य वाच्यानभिधानाद् भेदमाशङ्कते—**नन्विति**—इह त्वेवकारस्येत्यत्राभाव इत्यन्वय । अत्र समाधानसम्भव दर्शयित्वा दोषान्तर दर्शयितुमाह—**अत्र नियमस्येति**—अत्र नियमस्यावचनमेव पृथग् भूत विशेषभूत नियमपरिवृत्ते विषय इत्यर्थ । तथा च विशेषविषयपरिहारेणैव सामान्य प्रवर्त्तते इति न्यायान्नियमभिन्नवाच्यानभिधान तदर्थ इत्यर्थ । एतत्समाधानस्य सोढव्यत्वेन दोषान्तरमाह—**इति चेदिति**—**द्वयो. शब्दार्थेति**—एक शब्ददोषोऽन्योऽर्थदोष इत्यत्रेत्यर्थ । नियामकाभावादित्यत्र नियामकाभाव एव दोष इति पूरणीयम् । तत्का गतिरिति

(**लो,ड**) नियमस्यावचनमेवापवादरूपमित्यर्थ । गमकाभावादेव नातित्वादिति भाव ।

† येन रूपेण न शक्तिस्तेन रूपेण बोधस्य कविविवक्षितत्वेऽवाचकत्वम् । अत्र च सामान्यरूपेणैव बाध कविविवक्षित, अतस्तस्माद्भेद ।

× न्यूनपदत्वानभिहितवाच्यत्वयो पदनिष्ठत्वात्ततोऽस्य भेद । नियमो हि तदितरव्यपोहरूप, स चार्थनिष्ठ एवेत्ययमर्थदोष ।

1 'भङ्ग्य' (ग. ङ पु) 2 'स्मरम' (प च पु)

"आनन्दितस्वपक्षोऽसौ परपक्षान् हनिष्यति।"

अत्र परपक्षं हत्वा स्वपक्षमानन्दयिष्यतीति विधेयम्। (त) ×

"चण्डीशचूडाभरण! चन्द्र! लोकत्रयोऽपह!
विरहिप्राणहरण! कदर्थय न मां वृथा॥"

अत्र विरहिण उक्तौ तृतीयपादस्यार्थो नानुवाद्यः। (थ) *

"लग्नं रागावृताङ्गा सुहृदमिह[1] यथैवासियष्टयारिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती।

अश्लीलार्थत्वे तु वाक्यव्यापित्वेऽप्यर्थान्वयव्यतिरेकानुविधानादर्थदोषत्वमिति हृदयेन वाक्यव्यापित्वं दर्शयति—**अश्लीलत्वादाविति**। अर्थाश्लीलत्वादावित्यर्थः।

(वि, त) विध्ययुक्तत्वमाह—**आनन्दितेति**। विधेयतात्पर्य्याप्त्ययोग्ये तात्पर्य्यार्पणं तत्त्वम्। अत्र परपक्षहननानन्तरमेव स्वपक्षानन्ददानविधावेव विधेयतात्पर्य्याप्त्यौचित्यं नतु परपक्षहननविधौ इत्यर्थः। न चात्र विधेयाविमर्श इति वाच्यम्। तत्र विधेयता न प्रतीयते अत्र तु प्रतीतिविधेयतायै, तात्पर्य्याप्त्यनौचित्यमिति भेदात्।

(वि, थ) अनुवादायुक्तत्वमाह—**चण्डीशेति**। अनुवाद्यविशेषणस्य विधिविरोधित्वं तत्त्वम्। चन्द्र प्रति विरहिण्या उक्तिरियम्। हे चन्द्र मा वृथा न कदर्थय इत्यन्वयः। चण्डीशेत्यादिकमपि सम्बोधनत्रयं तदीयैस्कालायास्तथात्वात् स एव तथात्वेन सम्बोधितः। प्रथमविशेषणद्वयं तस्य महत्त्वप्रतिपादनाय। प्राणेत्यादितृतीयपदार्थस्तदनुपकारकरूपोऽयुक्त इत्यर्थः।

(वि, द) निर्मुक्तपुनरुक्तत्वमाह—**लग्नमिति**—निर्मुक्तस्य गमापितस्य कारकस्य पुनरुक्तिस्तत्त्वम्। समाप्तपुनरात्तता तु विशेषणस्याऽऽवृत्तिरूपेवेति भावः। **लग्नमित्यादि**। यस्य राज्ञः कीर्त्तिरम्बुधिं गता तत्पर्यन्तगामिनी तस्य कीर्त्तिरित्यर्थः।

पिण इत्यादौ पदनिष्ठत्वेऽपि सम्भवान्न वाक्यदोषतेत्यर्थः।

(लो, ऋ) लग्नमिति—रागो रक्तः शोणिमा, अनुरागश्च। मातङ्गा गजाश्चाण्डालाश्च। पर उत्कृष्टः अन्य इति।

× विधेरयुक्तत्वम्, अविधेयस्यैव विधेयत्वेन कथनं तत्त्वम्। उदाहरणे तु परपक्षहननं स्वपक्षानन्दे हेतुः। अतः परपक्षं हत्वा स्वपक्षमानन्दयिष्यतीति प्राधान्येन बोधनीयमिति तस्यैव विधेयत्वं युक्तं नतु परपक्षहननस्येति। विवक्षितार्थस्याऽनिर्वाह एवाऽत्र दूषकताबीजम्। अविमृष्टविधेयांशे तु युक्तस्यैव विधिः, परं त्वविमर्शमात्रम्। अत्र तु अयुक्तस्यैव विधिरिति ततो भेदः।

* अनुवादः सिद्धस्य कथनम्। तस्य अयुक्तत्वं विधेयविरोधित्वम्। अत्र विरहिणः प्रार्थनायां विरहिप्राणदमनेति सम्बोधनम् अकदर्थनविधेर्विरोधि।

---

1 'मथ' (ख. ग. घ.)

तत्सङ्गोऽयं न किञ्चिद् गणयति विदितं तेस्तु तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद् गदितुमिति[1] [2]गतेवाम्बुधिं यस्य कीर्तिः ॥

अत्र विदितं तेऽस्तु इत्यनेन समापितमपि वचनं तेनेत्यादिना पुनरपात्तम्।

(द, ऋ) *

अथ रसदोषानाह—

रसस्योक्तिः स्वशब्देन स्थायिसञ्चारिणोरपि ।
परिपन्थिरसाङ्गस्य विभावादेः परिग्रहः ॥
आक्षेपः कल्पितः कृच्छ्रादनुभावविभावयोः ।
अकाण्डे प्रथनच्छेदौ तथा दीप्तिः पुनः पुनः ॥
अङ्गिनोऽननुसन्धानमनङ्गस्य च कीर्त्तनम् ।
अतिविस्तृतिरङ्गस्य प्रकृतीनां विपर्य्ययः ॥
[3]अर्थानौचित्यमन्यद्वा[4] दोषा रसगता मताः ॥ ६ ॥ (ध) †

अत्रोत्प्रेक्ष्यते—श्रीनियोगादिति । गदितुमिवेति समुद्रपुत्र्याः श्रियः स्वपितरि स्वभर्तुरुपचारं गदितुं प्रेष्यायाः कीर्त्तौ नियोगः । नियोगमाह—लग्नमिति । यया सिषप्त्या स्त्रीलिङ्गशब्दार्थत्वेन उपस्त्रीवेनाऽध्यासितया अरिकण्ठ एव लग्नं कीदृश्या ? रागो रक्तिमा एव अनुरागस्तयाऽऽवृताङ्गया, तथा याऽसियष्टिरिह जगति मातङ्गाना हस्तिनामेव मातङ्गाना पिङ्गाना उपरि पतन्ती परपुरुषे शत्रुपुरुषेरेव प्रदृष्टपुरुषैर्दृष्टा । अनेन साक्षित्वं दर्शितम् । तत्सङ्गस्तादृश्यामसन्नायिकाया सङ्गोऽयं मम भर्त्ता राजा न किञ्चिद् भद्राभद्रं गणयति इति मे मम पितुः समुद्रस्य विदितमस्तु । तेन मद्राभद्राऽगणनेन भृत्येभ्योऽहं दत्तास्मीति गदितुमिवेत्यर्थः । असियष्टिसाहाय्येन शत्रुभ्यो भीत्यगणनेनाश्रितत्वाद् भृत्या अपि श्रीमन्त कृता इति स्तुतिः । अत्रेतिवचनं कर्मकारकवचनेन न विभिद्यमानं इत्यन्तं हि वेदनीयं कर्मकारकम् । तच्च विदितं तेऽस्तु इत्यनेन समापितम् । तेनास्मि दत्ता इत्यपि वेदनीयकर्मकारकं पुनरपात्तम् ।

(वि, ध) रसदोषानाह—रसस्येति । स्थायिसंचारिणोरपीत्यत्रापि स्वशब्देन उक्तिरित्यस्यान्वयः । परिपन्थीति—प्रतिकूलरसाङ्गविभावाद्युक्तिरित्यर्थः । आक्षेप इति । अनुभावविभावयो कृच्छ्रादित्यन्तप्रणिधानाद् आक्षेपः प्रत्यायनं दोषः कथित इत्यर्थः । अकाण्डे अनुचितकाले प्रथनच्छेदौ विस्तारत्यागौ रसस्य इति

---

* आदौ निर्मुक्तः (समाप्तः) पश्चात् पुनरात्तः पुनर्गृहीतः, तस्य भावः, समाप्तऽपि वाक्ये पुनः कारकान्तराभिधानम् । लोके हि स्वकस्य भक्ष्यादेः पुनरुपादानं वैरस्यमावहति तद्वदनेन । नित्योऽयं दोषः । समाप्तपुनरात्तस्तु विशेषणमात्रोक्तिपक्ष इत्यनयोर्भेदः ।

† रगानां "शृङ्गार" इत्यादिना प्रोक्तानां शृङ्गारादीनां रसशब्देन शृङ्गारादिशब्देन

1 भिय (स. ग. पु.) 2 'त्व' (स. ग. पु.) 3 'अथा' (ड. पु) 4 'च' (ड. पु)

रसस्य स्वशब्दो रसशब्दः शृङ्गारादिशब्दश्च । क्रमेण यथा—

"तामुदीक्ष्य कुरङ्गाक्षीं रसो नः कोऽप्यजायत ।
चन्द्रमण्डलमालोक्य शृङ्गारे मग्नमन्तरम् ॥"

स्थायिभावस्य स्वशब्दवाच्यत्वं यथा—

"अजायत रतिस्तस्यास्त्वयि लोचनगोचरे ।" (न)

शेषः । अनङ्गस्य प्रकृतरसस्याऽनुपकारकस्य । **अर्थानौचित्यमिति**—अन्यद्वा उक्तादन्यद्वा अर्थानौचित्यमित्यर्थः ।

(वि, न) तामुदीक्ष्येति—अत्र पूर्वार्द्धे रसशब्दः परार्द्धे शृङ्गारशब्दो वाचकः । ननु श्रोतुरेव काव्यश्रवणाद् रसो जायते न तु स्वीयरत्यादिवत्तुः तत्कथमत्र स्वीयरतिवक्तृरसो वाच्य इति चेन्न । रसस्य इत्यत्र स्थायिभावस्येत्यर्थात् । न चैवं स्थायिनः स्वशब्दवाच्यतायाः पृथगुक्त्यनुपपत्तिरिति वाच्यम् । स्थायिभावस्यैव रत्यादिवाचकरसशब्देन स्थायिभावशब्देन उक्तिरित्येवं वाचकशब्दभेदादेव पृथगुक्तेः । अत एव रसशब्देनात्र स्थायिभाव एव उक्त इति । "रसादिलक्षणस्त्वर्थः स्वप्नेऽपि न वाच्यः" इति च काव्यप्रकाशकृता लिखितम् । स्थायिभाववाचकशब्देन वाच्यतामाह—**अजायतेति** ।

कथने, तथैव "रतिर्हास" श्चेत्यादिना प्रोक्तानां स्थायिभावानां स्थायिभावशब्देन रत्यादिशब्देन वा कथने, तथैव "निर्वेदग्लानी" त्यादिना कथितानां व्यभिचारिणां व्यभिचारिशब्देन निर्वेदादिशब्देन वा कथने त्रयो दोषाः । वाच्यत्वाभिसन्धानेन शब्दप्रयोग एव दोषः । तदनभिसन्धाने तु न दोष । यथा—"शृङ्गारः सखि मूर्त्तिमानिव मधौ मुग्धो हरिः क्रीडति ।" इत्यादौ । अन्वयव्यतिरेकाभ्यामनुभावादिद्वारैवोपस्थितिः एतेषां चमत्कारिणी नतु स्वशब्देनेति भावः । परिपन्थिनः व्यङ्ग्यरसापेक्षया प्रतिकूलस्य प्रतिग्रहः उपनिबन्धः । यथा शृङ्गाररसे शान्तरसस्य विभावादेरुपनिबन्धः । कृच्छ्रात् कष्टानुसन्धेयप्रकरणादिपर्यालोचनया । अकाण्डे अनवसरे । प्रथनं विस्तारः; अस्य प्रस्तुततिरोधायकतया दूषकता । छेदः विच्छेदकरणम्, अन्तरे त्याग इत्यर्थः । तथा रसस्य पुनः पुनः दीप्तिः वर्णनम् । अनङ्गस्य प्रकृतरसस्य अनुपकारिणः अङ्गिनः अधिकारिणः प्रसङ्गत्यागः । अङ्गस्य अनधिकारिणो विस्तारः । अस्य अङ्गिप्रकर्षकत्वे पुनरदोषता तथा च दण्डी—"वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि । तज्जयान्नायकोत्कर्षकथनं च विनीति न.॥" प्रकृतीनां धीरोदात्तादीनाम् । अर्थानौचित्यमन्यद् तदुक्तं ध्वनिकृता—

"अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।
औचित्योपनिबन्धस्तु रसस्योपनिषत् परा ॥"

---

1 'ॐमुद्दीक्ष्य' (ख. पु.)

व्यभिचारिणः स्वशब्दवाच्यत्वं यथा—

"जाता लज्जावती मुग्धा प्रियस्य परिचुम्बने।"

अत्र प्रथमे पादे "आसीन्मुकुलिताक्षी सा" इति लज्जाया अनुभावमुखेन कथने युक्तः पाठ। (प, ऋ)

"मानं मा कुरु तन्वङ्गि! ज्ञात्वा यौवनमस्थिरम्।"

अत्र यौवनास्थैर्यनिवेदनं शृङ्गाररसस्य परिपन्थिनः शान्तरसस्याङ्गं शान्तस्यैव च विभाव इति शृङ्गारे तत्परिग्रहो न युक्तः। (फ, लृ)

(वि, न) **व्यभिचारिण** इति—भावताप्राप्तियोग्यस्येति शेषः। तत्प्राप्तिश्च निराकाङ्क्षवाक्यव्यङ्ग्यत्वे सत्येव जायते। अत्र लज्जावत्त्वस्य विधेयस्य निराकाङ्क्षवाक्यबोध्यत्वेन भावताप्राप्तियोग्यता अस्त्येव। तस्य स्वशब्दवाच्यत्वात्तु दोषः। साकाङ्क्षवाक्यबोध्यत्वे भावताप्राप्तियोग्यतामनापन्नस्य तस्य स्वशब्दवाच्यत्वं न दोषः। यथा—'लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता' इत्यत्र चुम्बने विधेयेऽनुवाद्यविशेषणस्य लज्जाया भावताप्राप्तियोग्यतामनापन्नायाः स्वशब्देनोक्तिर्न दोषः।

(वि, फ,) परिपन्थिरसाङ्गविभावपरिग्रहमाह—**मानमिति**। यन्निष्ठः स्थायिभावः सामाजिके रसतामापद्यते प्रकृतरसपरिपन्थिरसविभावस्य तदुत्तर्यैव प्रत्यायनं दोष इत्यर्थः। **मानं मा कुरु** इति—अत्र सामाजिके रसतामापद्यमाना रतिः स्थायिभावो वक्तृनिष्ठस्तत्प्रतिकूलशान्तरसविभावो यौवनास्थैर्यमिदं तेनैवोक्तमित्याह—**अत्रेति**। एवं च "त्यजत मानमलं बत विभ्रमैर्न पुनरेति गतं च तुरं वयः। परभृताभिरितीव निवेदिते स्मरमतेऽरमतेष्टसखीजनः"। इति रघौ यौवनास्थैर्यकथनं न दोषः। अत्रेष्टसखजननिष्ठरतिभाव एव सामाजिके रसतामापद्यते। नत्विष्टसखजनेन यौवनास्थैर्यमुक्तं किन्तु परभृताभिरित्यदोषः. अत्रैव यौवनास्थैर्योक्तिरेव परिपन्थ्यनुभावो ग्रन्थकृदनुक्तोऽपि बोध्यः।

(लो, ऋ) **अनुभावमुखेन कथन** इति—व्यभिचारिणो हि स्वस्वानुभावव्यङ्ग्या एव सहृदयानामास्वाद्याः। इह च यत्रैकत्र व्यभिचारिणामनुभावमुखेन वर्णनं स्वशब्देन त्वभिधानं, तत्र न रसादिमात्रदोषः। किन्तु अधिकपदात्यो वाक्यदोषोऽपि। यथा—

"लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता" इति।

(लो, लृ) शृङ्गारे प्रतिकूल इत्यर्थः। विभावादेरित्यादिशब्दादनुभावसञ्चारिणौ। तत्र प्रतिकूलानुभावपरिग्रहो यथा—

"सुरतोत्सुकमालोक्य मृगाक्षी पथिकं पथि।
निर्मुक्तमर्वविषया प्रययौ विपिनान्तरम्॥"

"धवलयति शिशिररोचिषि भुवनतल लोकलोचनानन्दे ।
ईषत्त्रिसकटाक्षा स्मेरमुखी सा निरीक्षिता[1] तन्वी ॥"

अत्र [2]रसस्योद्दीपनालम्बनविभावावनुभावपर्य्यवसायिनौ स्थिताविति कष्ट कल्पना । (ब, ए) *

"परिहरति रतिं मति लुनीते
स्खलतितरा परिवर्त्तते च भूय ।
इति बत विषमा दशास्य देह
परिभवति प्रसभ किमत्र कुर्म ॥"

अत्र रतिपरिहारादीना करणादावपि सम्भवात् कामिनीरूपो विभाव कृच्छ्रा-

---

(वि, ब) अनुभावस्य कष्टकल्पनयाप्रकाशमाह—**धवलयतीति** । **निरीक्षितेति** । अर्थात् पुसा । उद्दीपन चन्द्र । आलम्बन नायिका । अनुभावस्य सहर्षचक्षु प्रसारणस्य पर्यवसायिनौ प्रणिधानातिशयेनैव बोधकौ इत्यर्थ । द्रष्टु शान्तत्वे वैराग्येण चक्षुर्निमीलनस्यापि सम्भवात् । प्रकरणप्रतिसन्धानकृच्छ्रेण तु उक्तानुभावप्रकाश ।

(वि, भ) विभावस्य कृच्छ्रात् कल्पनमाह—**परिहरतीति** । परिहरतीत्यादौ सर्वत्र पुमान् कर्त्ता । बत खेदे इत्यस्य विषमा दशा अस्य देहमित्यन्वय । प्रसभ बलात् । **अत्रेति**—अत्रापि प्रकरणप्रतिसन्धानकृच्छ्रगम्यम् ।

अत्र निर्मुक्तसर्वविषयतया 'वनगमन शान्तरसानुभाव । अन्यथा तु वनगमन क्वचित् क्वचिदभिसारादिना गुण । एव व्यभिचारिणोऽपि ।

(लो, ए) अनुभावपर्यवसायिनौ इति । रसपर्यवसायित्वे कटाक्षक्षेपणादेरनुभावत्व सुव्यक्त भवेत् । इह च कटाक्षक्षेपणादीनि तस्या नायकविषयत्वरत्युद्बोधकार्याणि अन्यान्येन केन सहोपपन्नानि झटित्यनिश्चितप्रतीतिकारणत्वात् । यद्वा कस्यचिन्नायकस्य निरीक्ष्यमाणो रूपानुभाव तस्या रत्युद्बोधको न जात इति कटाक्षक्षेपविक्षेपविभावयो शृङ्गाररसपर्यवसानाऽभावादित्यर्थ ।

---

* अत्र सेति प्रकान्तपरामर्शिना तच्छब्देन यदि तयोस्तादृशमभिलाषादि प्रकरणमासूचित स्यात्तदा प्रत्येतु शक्यते इत्यनुभावाना कल्पना क्लिष्टा, यत सत्स्वपि विभावेषु अनुभाव विना स्थायिनो न प्रतिपत्ति । कार्येण हि अविनाभावबलात् झटिति कारणमाक्षिप्यते नतु कारणेन कार्यम् । ईषत्त्रिसेत्यादेरुपवर्णनमात्रत्वनुभाव । वस्तुतोऽत्र नायकनिष्ठ एव शृङ्गारो व्यञ्जनीय । न च नायकनिष्ठ कश्चिदनुभाव उपात्त न वा विभावेन झटित्याक्षेपगम्य ।

1 '–क्षता' इति (क स पु) 2 'शृङ्गारस्य' (च पु.)

दास्येप्य । (भ) ¶

अकाण्डे प्रथन यथा–वेणीसंहारे द्वितीयेऽङ्के प्रवर्त्तमानानेकवीरसङ्क्षये काले दुर्य्योधनस्य भानुमत्या सह शृङ्गारप्रथनम् । *

छेदो यथा—वीरचरिते राघवभार्गवयोर्धाराधिरूढे[1] सग्रामे "कङ्कणमोचनाय गच्छामि" इति राघवस्योक्ति । (म) ×

पुन पुनर्दीप्तिर्यथा—कुमारसम्भवे रतिविलापे । (य, ऐ) †

(वि, म) कङ्कणमोचन विवाहोत्तरमाङ्गल्यक्रियाविशेष ।

(वि, य) रतिविलाप इति—

"अथ सा पुनरेव विह्वला वसुधालिङ्गनधूसरस्तनी ।
विललाप विकीर्णमूर्द्धजा समदु खामिव कुर्वती स्थलीम् ॥"

इत्युपक्रम्य प्रवर्त्तिते धाराबाहिके करुणरसे मधौ दृष्टे–

"तमवेक्ष्य रुरोद सा भृश स्तनसबाधमुरो जघान च ।'

इति विशिष्य पुनर्दीप्ति ।

(लो, ऐ) रतिविलापेति—अथ मोहपरायणा सतीत्यादिना परिपुष्टिमागतस्यापि करुणस्य "अथ सा पुनरेव विह्वला' इत्यनेन करुणपरिपूर्णभोज्यस्य पुनर्भोज्य दानेन वैरस्यम् ।

¶ रतिं वस्तुनि स्पृहाम् । मतिम् अर्थनिर्द्धारणम् । अत्र नायकनिष्ठविप्रलम्भ-शृङ्गारस्य आलम्बनविभावो कामिनीरूपस्तु न वर्णित । अत्र वर्णितानामनुभावाना रसान्तरे सम्भवात्प्रकरणायनुसन्धानेन कष्टेन कल्पनीय । करुणादावित्यादिपदेन व्याधिपरिग्रह । कामवशात् शोकवशाद् वेति प्रकरणानुसन्धानरूपयत्नप्रतिपाद्य ।

* यद्यपि शृङ्गारो न वीररसविरोधी, तथाप्यनवसरे तद्वर्णन वीरानुगुण्यादनुचितमिति दोष । वीराणा विनाशसमये करुणवीरादिरेवास्वाद्यते नतु शृङ्गार ।

× धाराधिरूढे–अनवच्छिन्नप्रसारितया प्रवृत्ते । सग्रामे इति पद स्थायिभावपरम् । सामाजिकनिष्ठ एव रसो न त्वभिनयनिष्ठ । ईदृशावसरे महावीरस्य रामचन्द्रस्य विषयान्तरसञ्चारो न युक्त । तादृशोक्तिव्याजेन गमन रामचन्द्रस्य नायकस्य अवीरत्व प्रकाशयति ।

† तथा चोक्त ध्वनिकृता–"उपयुक्तो हि रस स्वसामग्रीलब्धपरिपोष पुन पुन परामृश्यमान परिम्लानकुसुमकल्प कल्प्यते । परिपाकं गतस्यापि पौन पुन्येन दीपनम्, रसस्य स्याद् विरोधाय ।' इति

1 '–डेऽन्योन्यसरम्भे' (क ग घ)

अङ्गिनोऽननुसन्धानं यथा—रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यागमने सागरिकाया विस्मृतिः। (र) *

अनङ्गस्य कीर्त्तनं यथा—कर्पूरमञ्जर्यां राजनायिकयोः स्वयं कृतं वसन्तस्य वर्णनमनादृत्य वन्दिवर्णितस्य प्रशंसा।

अङ्गस्यातिविस्तृतिर्यथा—किरातार्जुनीये सुराङ्गनाविलासादिः। (ल) +

प्रकृतयो दिव्या, अदिव्या, दिव्यादिव्याश्चेति। तेषां धीरोदात्तादिता, तेषामप्युत्तमाधममध्यमत्वम्। (ओ)

तेषु च यो यथाभूतस्तस्यायथावर्णने प्रकृतिविपर्य्ययो दोषः। यथा—धीरोदात्तस्य रामस्य धीरोद्धतवत् छद्मना वालिवधः। यथा वा—कुमारसम्भवे उत्तमदेवतयोः पार्वतीपरमेश्वरयोः सम्भोगशृङ्गारवर्णनम्। "इदं पित्रोः सम्भो-

---

(वि, र) सागरिकाया विस्मृतिरिति—सागरिका रत्नावली। तन्नाटकेऽङ्गिनी।

(वि,ल) अनङ्गस्येति—प्रकान्तरसानुपकारकस्येत्यर्थः। वन्दिवर्णितस्येति। राज्ञा इति शेषः। किरातार्जुनीये भारवौ।

(वि, व) दिव्या इत्यादिषु दिव्यादिनायिकाया इत्यर्थः। दिव्या-देवाः अदिव्या मनुष्याः। दिव्यादिव्या देवावतारा मानुषाः तदीयाः प्रकृतय इत्यर्थः। अर्थानौचित्यमन्यद्वेति यदुक्तं तद्दर्शयति—

(लो, ओ) प्रकृतिविपर्ययाख्यं दोषं च व्याचष्टे—**प्रकृतय** इत्यादि। दिव्या महेन्द्रादयः श्रीकृष्णादयश्च। अदिव्या दुष्म(ष्य)न्तादयः। दिव्यादिव्याः श्रीरामचन्द्रादयः इत्यादि प्रागेव उक्तम्। धीरोदात्तादीनाम् अन्यतमाश्रयत्वस्य सम्भवेऽपि प्रायेण वीरादिप्रधानत्वमेव। तेषां लक्षणानि उक्तानि।

(लो, ओ) उत्तमदेवतयो शृङ्गाररसवर्णनमनुचितमिति यदुक्तं तत्रायमेवाशयः। ये ये शृङ्गारव्यञ्जका रहस्यार्थाः पित्रोर्वर्णयितुमनुचितास्ते उत्तमदेवतानिष्ठा न वर्णनीयाः अन्यथा रघुवंशे रावणवधानन्तरं स्वराज्यमभिनिवृत्तस्य रामचन्द्रस्य

---

* अङ्गिनः प्रधानस्य नायकस्य नायिकाया वा। बाभ्रव्यस्य कञ्चुकिनः आगमने विजयचूडाकर्णने सागरिकाया नायिकाया नाममात्रस्याऽग्रहणम्। यदा अङ्गी नोपादीयते तदा वैचित्र्यं नानुभूयते।

+ अङ्गस्य—अप्रधानस्य प्रतिनायकादेः। यद्यपि

"वंशवीर्य्यश्रुतादीनि वर्णयित्वा रिपोरपि।
तज्जयान्नायकोत्कर्षकथनं च धिनोति नः॥"

इत्युक्तं तथापि यावता वर्णितेन नायकोत्कर्षविश्रान्तिरासाद्यते तावदेव वर्णनीयं न तु प्रतिनायकस्य मधुपानजलविहारादिकमपि। तद्वर्णनस्य प्रधाननायकतिरोधानतया दोषत्वमिति भावः।

गवर्णनमिवात्यन्तमनुचितम् " इत्याहुः[1]। (व, श्री)

अन्यदनौचित्य देशकालादीनामन्यथा यद्वर्णनम् । तथा सति हि काव्य स्यासत्यताप्रतिभासेन विनेयानामुन्मुखीकारासम्भव । (श, अ) *

एभ्यः पृथगलङ्कारदोषाणां नैव सम्भवः ॥ ७ ॥

(वि, श) अन्यदनौचित्यमिति—देशकालेति । दिवि मानुषभावावर्णन देशानुचितम् । एकौ अन्यर्तुधर्मवर्णन कालानुचितम् ।

(वि, प) इति दोषानुक्त्वाऽलङ्कारदोषा अपि एष्वेवान्तर्भवन्ति इत्याह- **एभ्य. पृथगिति** ।

सीतासम्वादवर्णन तादृश वान्यन्महाकविनिष्ठत्वमनुचित स्यात् । अनुचितमेव सकलमहाकवीना प्रबन्धेषु तथा तथा वर्णनमसमञ्जस स्यात् । एवमादिव्याना स्व - पातालगमनसमुद्रलङ्घनादि । एतद्वस्तु महानुभावकुवलयाश्वादेर्यद् वृत्तमितिहासादि- प्रसिद्ध वर्णनीयमेव । अन्यथा वर्णनस्यैव दोषावहत्वात् । एवमन्यस्यापि कृत्यानौचि त्यस्य वर्णने प्रकृतिविपर्य्ययाख्यो दोषो बोद्धव्य ।

(लो, अ) अन्यदनौचित्य दर्शयति—**अन्यदिति**—देशकालादिरित्यादिशब्देन नायिकाया पादप्रहारादि । नायकस्य कोप । बालाया धार्ष्टर्यम् । प्रौढाया वेश्याया- श्चातिलज्जा । प्रतिनायकस्य अन्वयत्वम् । तथा चाह—

वशवीर्य्यश्रुतादीनि वर्णयित्वा रिपोरपि ।
तज्जयान्नायकोत्कर्षकथन हि विनेाति न ॥ इति ।

एव देवतानामवयवाना शिर आरभ्य वर्णनम् । तेषा शिर आराध्यत्वे पादारब्ध- वर्णनम् एव इष्यते । मनुष्याणां न पादारब्धवर्णन तेषा शिर आरभ्य वर्णनस्यैव इष्टे । एवमनयैव दिशा सकलमनौचित्य रसभङ्गकारण प्रयत्नेन सुकविभि परिहार्य्यम् । यदुक्त ध्वनिकृता—

अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।
औचित्योपनिबन्धस्तु रसस्योपनिषत्परा ॥

(लो, आ) ननु यद्येत एव दोषास्तदा प्राचीनोक्ता पुनरलङ्कारदोषा इत्याह । **एभ्यः** इत्यादिभ्य इति । कथ तेभ्योऽपृथगित्याह—

---

* "यत्तत्रानुचित किञ्चिन्नायकस्य रसस्य च ।
विरुद्ध तत्परित्याज्यमन्यथा वा प्रकल्पयेत् ॥"

1 'इत्याहु', इत्यनन्तरम्, "ध्वनिकारादय । तस्मादभिनेयाथ च काव्ये यदुत्तमप्रकृते राजादेरुत्तमप्रकृतिभिर्नायिकाभि सह ग्राम्यसम्भोगवर्णन तत्सिद्धो सम्भो- गवर्णनमिव सुतरामसङ्गतम् । तथैवोत्तमदेवताविषयम् । (ध्वन्यालोके (३. १४ इत्यत्र)" इत्यधिक पाठ ।

एभ्य उक्तदोषेभ्यः । (प, आ) तथा हि–उपमायामसादृश्यासम्भवयोरुपमानस्य जातिप्रमाणगतन्यूनत्वाधिक्त्वयोरर्थान्तरन्यासे उत्प्रेक्षितार्थसमर्थने चानुचितार्थत्वम् । (स)
क्रमेण यथा–

"प्रभामि काव्यशशिनं विततार्थरश्मिम् ।" (इ)
"प्रज्वलज्जलधारावन्निपतन्ति शरास्तव ।" (ह) (ई)
"चण्डाल इव राजासौ संग्रामेऽधिकसाहस. ।"

(वि, स) अत्र यो यदलङ्कारदोषो यत्रान्तर्भवति तदाह–उपमायामिति । असादृश्यम्–उपमानोपमेययोः सादृश्याभाव । असम्भवयोपमानाप्रसिद्धेः । जातिप्रमाणेति । प्रमाणं परिमाणम् । उपमेयजात्यपेक्षया उपमानजातेरुपमेयपरिमाणापेक्षयोपमानपरिमाणस्य चात्यन्तन्यूनाधिक्त्वयोरनुचितार्थत्वमित्यर्थ· । एवमुत्प्रेक्षितार्थस्यार्थान्तरन्यासेन समर्थेन च तदैव दोषत्वस्यानुचितार्थत्वमित्यर्थः । ननु पशुभूता रणाध्वरे इत्यत्र शूराणा क्रातरत्वव्यञ्जनया तेषा निन्दाव्यञ्जनमेवानुचितार्थत्वं दर्शितम् । असादृश्यासम्भवयोरुत्प्रेक्षितार्थसमर्थने न एतादृशमनौचित्य किन्तु प्रतिपाद्यमानार्थालीकत्वमेवानौचित्यं वाच्यं तथा च कथमुभयसाधारणमनौचित्यम् । यदि च औचित्याभाव एव तर्हि इत्युच्यते तदा समस्तदोषाणामेव अनुचितत्वेनैतस्य दोषविशेषत्वानुपपत्तिरिति चेत्सत्यम् । दोषान्तरलक्षणानाघ्रातत्वे सति औचित्याभाव एव तल्लक्षणम् ।
(वि, ह) क्रमेणेति–प्रभामीत्यत्र असादृश्यम् । काव्यं शशीव इत्युपमा । अत्र रूपकत्वेऽपि स एव दोषत्वस्यापि सादृश्यमूलत्वाद् उपमानासम्भवे–प्रज्वलदिति–प्रज्वलन्त्यो जलधारा ह्यप्रसिद्धा । नन्वत्राभूतोपमा स्यादिति चेन्न, सम्भावनयाऽपि यत्रोपमानप्रसिद्धिस्तत्रैवाभूतोपमात्वात् । यथा—

सर्वपद्मप्रभासार. समाहृत इव क्वचित् ।
त्वदाननं विभातीति तामभूतोपमा विदु ॥

इत्यत्र दरिद्रना क्वचित्पदेन सृष्टुर्विधे क्वचित् सर्वपद्मप्रभाहरणसम्भावनां प्रदर्य तादृशोपमानेनाऽभूतोपमा दर्शिता । अत एव बालप्रवालविटपप्रभवा लतेव इत्यत्रापि वटादिविटपे लतादर्शनात् प्रवालविटपे लता सम्भाव्य तदुपमा कृता । प्रकृते तु जले ज्वलनस्य सर्वथा बाधात् प्रज्वलज्जलधाराया सम्भावनाऽशक्यत्वात् ।
(वि,क) उपमेयजात्यपेक्षयोपमानजातेरत्यन्तन्यूनत्वमाह—चण्डाल इवेति।
(लो, इ) तथा हीति–अत्र काव्यस्य शशिना न सादृश्यम्।
(लो, ई) जलधाराणा प्रज्वलनम् असम्भवि ।

यथा—छद्मना वालिवधो मायुराजेनोदात्तराघवे नाटके परित्यक्तः । वीरचरितनाटके भवभूतिना तु रावणमौहार्दाद् रामवधार्थमागतो वाली रामेण हत इत्यन्यथाकृतः

"कर्पूरखण्ड इव राजति चन्द्रविम्बम्।" (क)
"हरवन्नीलकण्ठोऽय विराजति शिखाबल ।"
"स्तनावद्रिसमानौ ते।" (ख, उ)
"दिवाकराद्रक्षति यो गुहासु
लीन दिवा भीतमिवान्धकारम्।
क्षुद्रेऽपि नून शरण प्रपन्ने
ममत्वमुच्चै शिरसा सतीव ॥"

एवमादिपूत्प्रेक्षितार्थस्यासद्भूततयैव[1] प्रतिभासन स्वरूपमित्यनुचितमेव तत्समर्थनम्। (ग, ऊ)

यमकस्य पादत्रयगतस्याप्रयुक्तत्व दोष । यथा—

सहसालिजनै[2] स्निग्धै सहसा कुञ्जमन्दिरम्।
उदिते रजनीनाथे सहसा याति सुन्दरी ॥ (घ, ऋ) +

अत्र रात्रेरत्यपेक्षया चण्डालजातेरत्यन्तन्यूनत्वम्। उपमानपरिमाणापेक्षयोपमानपरिमाणस्यात्यन्तन्यूनत्वमुदाहरति—**कर्पूर** इति।

(वि, ख) एव जातिपरिमाणयोराधिक्यमप्याह—**हरवदि**ति। **स्तनावि**ति च। शिखाबलो मयूर । अवस्थाभेदेन हरशरीरस्यानेकव्यक्तित्वात् हरत्वमपि जाति शिखाबलत्वापेक्षयाधिका।

(वि, ग) अर्थान्तरन्यासेनोत्प्रेक्षितार्थसमर्थनमाह—**दिवाकरादि**ति । यो हिमालयो गुहासु लीनमन्धकार दिवाकराद् रक्षति । अत्रोत्प्रेक्षते—**भीतमिवे**ति। अत्रार्थान्तरन्यासमाह—**क्षुद्रेऽपी**ति । उच्चै शिरसा महिम्ना उच्चमौलीनामर्थान्महताम् उच्चै शिखराणा च । अत्र दोष दर्शयति—**एवमादिपू**ति। समर्थनम्—सत्यत्वेन प्रतिपादनम्। तमसो भय च सर्वथैवालीकमुत्प्रेक्षितम्। कथ तस्यार्थान्तरन्यासेन सत्यतया प्रतिपादनमित्यर्थ ।

(वि, घ) सहसेति—सा सुन्दरी नायिका स्निग्धैरालिजनै सह सहसा

(लो, उ) राज्ञश्चण्डालेन, चन्द्रस्य कर्पूरखण्डेन, हरस्य नीलकण्ठेन, स्तनयोश्चाद्रिणा च साम्यम्।

(लो, ऊ) दिवाकरादौ चोत्प्रेक्षितार्थस्य समर्थनेऽनौचित्य दर्शयति—**उत्प्रेक्षितार्थस्ये**त्यादि । असद्भूततयैव प्रतिभासनम्, सम्भावनविषयत्वादित्यर्थ । दिवाभीत उल्लूक । अथ वा—दिवा दिवसाद्भीतमित्यन्धकारविशेषणम् । यो हिमालय, शिर शृङ्ग मूर्धा वा।

+ "यमक तु विधातव्य न कदाचिदपि निपात्' इति निषेधात्।

1 '०स्यासम्भूततयैव–' (क ख पु) 2 '–०भिर्जनै –' (क ख पु)

उत्प्रेक्षायां यथाशब्दस्योत्प्रेक्षाद्योतकत्वेऽवाचकत्वम्। (ऋ) यथा—

" एष मूर्तो यथा धर्मः क्षितिपो रक्षति क्षितिम्।" (ट)

एवमनुप्रासे वृत्तिविरुद्धस्य प्रतिकूलवर्णत्वम्। यथा—'ओवट्टइ उल्लट्टइ' इत्यादौ। (च, छ)

उपमायाञ्च साधारणधर्मस्याधिकन्यूनत्वयोरधिकपदत्वं न्यूनपदत्वञ्च। (ज) क्रमेणोदाहरणम्।

"नयनज्योतिषा भाति शम्भुर्भूतिसितद्युतिः।
विद्युतेव शरन्मेघो नीलवारिदखण्डधृक्॥"

अत्र भगवतो नीलकण्ठत्वस्याप्रतिपादनाच्चतुर्थपादोऽधिकः। (झ, ए)

"कमलालिङ्गितस्तारहारहारी मुरं द्विषन्।
विद्युद्विभूषितो नीलजीमूत इव राजते॥"

अत्रोपमानस्य सबलाकत्वं वाच्यम्। (ऋ, ऐ) अस्यामेवोपमानोपमेययो-

सस्मिता उदिते रजनीनाथे सहसा तत्क्षणं कुञ्जमन्दिरं यातीत्यर्थः।

(वि, ङ) **उत्प्रेक्षाद्योतकत्व** इति—उत्प्रेक्षाभिधानार्थं प्रयुक्तत्व इत्यर्थः। **एष** इति। धर्मः पुण्यं तस्य मूर्त्यभावात्तदुत्प्रेक्षा न तु धर्मरूपदेवनोपमा, तदा मूर्तित्व-विशेषणवैयर्थ्यापातात्।

(वि, च) **एवमिति**। वृत्तिविरोधस्तदसप्रतिकूलवर्णाना स्थितिः। 'ओवट्ट' इत्यादिकं प्राग् व्याख्यातम्।

(वि, छ) **साधारणधर्मस्येति**। उपमेयेऽनिर्दिष्टधर्मसमानधर्मस्योपमाने निर्देशोऽधिकत्वम्। उपमेये निर्दिष्टधर्मसमानधर्मस्योपमानेनुपादानं न्यूनत्वम्।

(वि, ज) **नयनज्योतिषेति**—अत्र शम्भुरुपमेयः। शरन्मेघ उपमानम्, नयनज्योतिर्विद्युत्। भूतिसितत्वशारदीयलब्ध्यशुभ्रत्वयोश्च समानधर्मयोरस्त्येव निर्देशः। किन्तु शम्भोरुपमेयस्य नीलकण्ठत्वानुपादानात्तसमानधर्मनीलवारिदो-त्पादेरुपमाने शरन्मेघे आधिक्यमाह—**अत्रेति**। समानधर्म एवायं नियमः। धर्मान्तरोपादाने तु नाधिक्यम्, यथात्रैव नभोमण्डलमध्यम इति चतुर्थपादकरणे।

(वि, झ) न्यूनत्वमाह—**कमलेति**। कमलया लक्ष्म्या आलिङ्गितः, उज्ज्वल-हारवाश्च मुरं द्विषन् मुरारी राजते। विद्युद्विभूषितो नीलजीमूत इव इत्यर्थः। अत्र

(लो, ऋ) आलिङ्गनैः सह सार्धं सहसा वेगेन सहसा हर्षेण सह वर्तमाना।
(लो, ऋ) यथाशब्दो हि इवादिशब्दवन्नोत्प्रेक्षाया वाचकः।
(लो, ऌ) वृत्ति नियतवर्णगतो यो रसविषयो व्यापारः।
(लो, ए) सबलाकत्वं वाच्यम्।
(लो, ऐ) उपमेयस्य तारहारत्वस्य वचनात्।

लिङ्गवचनभेदस्य कालपुरुषविध्यादिभेदस्य च भग्नप्रक्रमत्वम् । × क्रमेणोदाहरणम्-"सुधेव विमलश्चन्द्रः"। "ज्योत्स्ना इव सिता कीर्त्तिः।" (ञ)

काप्यभिख्या तयोरासीद् व्रजतोः शुद्धवेशयोः ।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ॥"

अत्र तथाभूतचित्राचन्द्रमसोः शोभा न खल्वासीत् अपि तु सर्वदापि भवति। (ओ)

"लतेव राजसे तन्वि !"

अत्र लता राजते त्वं तु राजसे । (ट)

" चिरं जीवतु ते सूनुर्मार्कण्डेयमुनिर्यथा । "

अत्र मार्कण्डेयमुनिर्जीवत्येव न खल्वेतदस्य जीवित्वित्यनेन विधेयम् । (ठ)

इह तु यत्र लिङ्गवचनभेदेऽपि न साधारणधर्म्मस्यान्यथाभावस्तत्र न दोषः ।

लक्ष्मीस्थानीया विद्युत् हारस्थानीयाया बलाकाया न्यूनत्वमिति भङ्गया प्रतिपादयति—अत्रेति ।

(वि, ञ) **अस्यामेवेति** । उपमायामेवेत्यर्थः । **भग्नप्रक्रमत्वमिति** । यल्लिङ्गेन एकद्व्यादियद्वचनेन चोपमेयोत्त्युपक्रम उपमानस्यापि तल्लिङ्गकत्वेन तद्वचनेन चोक्तिराकाङ्क्षिता तथात्वानुक्तौ क्रमभङ्ग इत्यर्थः । एवं वर्त्तमानादिकालभेदस्य च भग्नप्रक्रमत्वमित्यर्थ । आकाङ्क्षितरूपेणानभिधानात् । सुधेव इत्यत्र स्त्रीपुलिङ्गभेदः । ज्योत्स्ना इव इत्यत्र वचनभेदः ।

(वि, ट) कालभेदे त्वाह—**काप्यभिख्येति** । तयोर्दिलीपसुदक्षिणयोरभिख्या शोभा चित्राचन्द्रमसोः चैत्रे योगः । न खलु आसीत् इति सार्वदिकशोभासत्त्वे अतीत्वेन तद्विवक्षाभावात्। लतेवेत्यत्र पुरुषभेदः, लता राजते इत्येव सम्भवात्।

(वि, ठ) चिरं जीवित्वित्यत्र विधिभेद । अयं च स्वल्प एव दोषः व्यत्ययेन अन्वयसम्भवात् । अत एव सर्वत्र काव्ये ईदृश एव प्रयोगः ।

(लो, ओ) अस्यामुपमाया सर्वदापि भवतीत्यनेन उपमानोपमेययोः कालभेदः।

(लो, औ) इह त्विति—अयमर्थ —यत्र लिङ्गादिभेदे हि साधारणधर्मोऽभिन्न उपमानोपमेययोर्द्वयोरपि सम्बन्धमापद्यते तत्र न प्रतीतिं स्थगयति ।

× उपमानोपमेययोर्लिङ्गवचनादिभेदे सति साधारणधर्मवाचक पदं यस्य (उपमानस्य उपमेयस्य वा) लिङ्गवचनानुसारि स्यात् तेनैव तस्यान्वयो नतूभाभ्याम् । अत उभयत्र उपमानोपमेययोरन्वयाभावे साधारणधर्मत्वमेव व्याहन्यते । साधारणधर्माभावे कथमुपमाया अवकाशः । उपात्तस्य साधारणधर्मस्य एकत्र अन्वयबलेन अपरत्र प्रतीतिबलेन सम्बन्धाङ्गीकारे उपमानिर्वाहस्तु विलम्बेनैव भवति । अतोऽत्र दोषः ।

क्रमेणोदाहरणम्—"मुखं चन्द्र इवाभाति।" (श्रौ) †

"तद्वेशोऽसदृशोऽन्याभि. स्त्रीभिर्मधुरतामृतः।
दधते स्म परां शोभां तदीया विभ्रमा इव॥" (ड, अ)

पूर्वोदाहरणेपूपमानोपमेययोरेकस्यैव साधारणधर्म्मेणान्वयप्रसिद्धेः[1] प्रक्रान्तस्यार्थस्य स्फुटोऽनिर्वाह· । (ढ)

एवमनुप्रासे वैफल्यस्यापुष्टार्थत्वम्[2]। यथा—

(वि, ड) लिङ्गवचनभेदे साधारणधर्मस्य निर्दिष्टरूपेणोभयत्राऽनन्वयो दोषबीजम्। यदि तु निर्दिष्टरूपेणैवोभयत्राऽन्वयसम्भवस्तदा न दोष इत्याह—**अत्र च लिङ्गवचनेति। मुखं चन्द्र इवेति**। अत्राभातिसाधारणधर्म उभयत्रैकरूप एव लिङ्गद्वयं तु भिन्नम्। वचनभेदे त्वाह—**तद्वेश** इति। मधुरतया रम्यतया मृतः पूर्णस्तस्यावेशः परां शोभा दधते धत्त इत्यर्थः। दध धारणे इत्यस्यैकवचने रूपम्। कीदृशः, अन्याभिः स्त्रीभिरसदृशः अन्यस्त्र्यसाधारणः। दृक्प्रत्ययान्तस्य दृश रूपमिदम्। तदीया विभ्रमा इव—तेऽपि हि परा शोभा दधते। धाञो बहुवचने रूपमिदम्। एवं मधुरतामृतः मधुरता बिभ्रतः। मृतः क्विपि रूपमिदम्। एवमसदृश इत्यत्रापि क्विपि रूपम्। लिङ्गादिभेदेषु प्रक्रमभङ्गं दोषान्तर्भाव उक्तं स्मारयति—**पूर्वोदाहरणेष्विति**। मुखमिव विमलश्चन्द्र इत्यादिष्वित्यर्थः।

(वि, ढ) **एकस्यैवेति**। साधारणधर्म्मेण विमलत्वादिना एकस्योपमेयस्यैव समानलिङ्गत्वादिनाऽन्वयसिद्धेरसमानलिङ्गकेनोपमानेनाऽन्वयाभिद्धेरित्यर्थः। **प्रक्रान्तस्येति**—उभयान्वयित्वाकाङ्क्षया उपक्रान्तस्येत्यर्थः।

(वि, ण) **एवमिति**—वैफल्यस्याऽनुप्रासार्थमुपात्तस्य विशेषणस्य यद्वैफल्यं तस्येत्यर्थः।

मुखमिति—अत्र भातीति साधारणमुखचन्द्ररूपोऽर्थ· साध्यः। एवमुत्तरत्रापि।

(लो, अ) सदृश इत्यस्योद्देश्यविशेषणत्वे *एकवचनान्तः सदृशशब्दः। पक्षे मधुरतया मृत इति एकवचनम्। विभ्रमविशेषणत्वे बहुवचनान्तः सदृक्शब्दः। दधतीति दधधातोरेकवचनान्तं, धाधातोर्बहुवचनान्तं च तिङन्तं च पदम्।

(लो, आ) वैफल्यस्याऽपुष्टार्थत्वं च चित्रवर्णारब्धत्वभावेन प्रकृतानुपयोगादित्यर्थः।

---

† साधारणधर्मस्य स्वस्वरूपेण उभयत्र अन्वयान्न दोषस्यावकाशः। अत उक्तं दण्डिना—

"न लिङ्गवचने भिन्ने न हीनाधिकतापि वा।
उपमा दूषणायालं यत्रोद्वेगो न धीमताम्॥"

1 '•धर्मेणैवान्वयसिद्धे·' (क. ख. पु.) 2 'स्यार्थत्वम्'

'अनणुरणन्मणिमेखलमविरलशिञ्जानमञ्जुमञ्जीरम् ।
परिसरणमरुणचरणे ! रणरणकमकारणं कुरुते ॥" (ण, आ)

एवं समासोक्तौ साधारणविशेषणवशात्परार्थस्य प्रतीतावपि पुनस्तस्य शब्देनोपादानस्याप्रस्तुतप्रशंसायां व्यञ्जनयैव प्रस्तुतार्थावगते. शब्देन तदभिधानस्य च पुनरुक्तत्वम् । (त)

क्रमेणोदाहरणम्—

"अनुरागवन्तमपि लोचनयोर्दधतं वपुः सुखमतापकरम् ।
निरकासयद्विमपेतवसुं वियदालयादपरदिग्गणिका ॥"

अत्रापरदिगित्येतावतैव तस्या गणिकात्वं प्रतीयते । (थ, द)

अनणु इति । सविलासं गच्छन्तीं वेश्यां दृष्ट्वा शान्तस्य पुरुषस्योक्तिरियम् । हे अरुणचरणे ! तव परिसरणे गमनं कर्तृ । अकारणम् अर्थात् पुंसा रणरणकं रतिचिन्ता कुरुते जनयतीत्यर्थ. । परिसरणं कीदृशम् ? अनणु अनल्पं रणन्ती मणिरत्ना मेखला यत्र तादृशम् । अविरतं शिञ्जानं मञ्जु मञ्जीरं नूपुरं यत्र तादृशम् । अत्र वक्तुः शान्तत्वेन कामोद्दीपकपरिसरणविशेषणानामपुष्टार्थत्वं केवलमनुप्रासार्थमेव तदुपादानम् । अत्र च वैयर्थ्यप्रतियोगिकामचिन्तोपयोगित्वेऽपि तद्विशेषणाना प्रकृतशान्तरसानुपयोगित्वादपुष्टार्थता ।

(वि, त) एवं समासोक्ताविति । प्राकरणिककथनेनाऽप्राकरणिकव्यञ्जनं समासोक्तिः । अप्राकरणिककथनेन प्राकरणिकव्यञ्जनमप्रस्तुतप्रशंसा । यस्मिन्नलङ्कारद्वयेऽप्राकरणिकप्राकरणिकार्थयोः व्यङ्ग्यत्वेऽपि शब्देन तदुपादानं पुनरुक्तत्वमेवेत्यर्थः ।

(वि, थ) तत्र समासोक्तौ पुनरुक्तत्वमाह—**अनुरागेति** । अपरदिक् पश्चिमदिगेव गणिका वेश्या वियद्रूपादालयाद् आश्रयात् रविं निरकासयत् निष्कासयामास । किंभूतम् अपेतवसुम् अपगतरश्मिम् । अनिष्कासनोपयोगिविशेषणसत्त्वेऽपि अपेतरश्मित्वात् निरकासयदित्याह—**अनुरागेति** । अनु दिवसस्य पश्चाद् रागवन्तं रक्तिमावन्तमपि । अत एव लोचनयोः सुखं सुखजनकम् अतापकरं च वपुर्दधतमपीत्यर्थ । अत्र श्लिष्टविशेषणवशादनुरागवतो लोचनसुखजनकसुशीतलवपुष्मतो नायकस्य वसुना धनेन रहितत्वात् स्वगृहरूपादालयाद् वेश्यया निष्कासनं व्यञ्जनया प्रतीयते । तत्र च निर्धननायकस्य यथाश्लिष्टविशेषणमहिम्ना व्यङ्ग्यत्वं, तथा वेश्याया अपि व्यङ्ग्यत्वमेवोचितम् । वाच्यत्वे तु पुनरुक्तिरित्याह—**अत्रापरदिगेवेति** ।

(लो, द) अनुगतो रागः शोणिमा, प्रेमा च । वसुपदेन रश्मयः धनानि च । आलयः आश्रयः गृहं च । गणिकात्वं प्रतीयते । पुनः स्वशब्देनोपादानेन च पुनरुक्तत्वमावहति इत्यर्थः ।

"आहूतेषु विहङ्गमेषु मशको नायान् पुरो वार्यते
मध्ये वा धुरि वा वसंस्तृणमणिर्धत्ते मणीनां धुरम्[1]।
खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां
धिक् सामान्यमचेतनं[2] प्रभुमिवानामृष्टतत्त्वान्तरम्॥" (ई)

अत्राचेतसः प्रभोरभिधानमनुचितम्। (द)

एवमनुप्रासे प्रसिद्ध्यभावस्य व्यातिरिक्तत्वं यथा—

"चक्राधिष्ठितता चकी गोत्रं गोत्रभिदुच्छ्रितम्।

(वि, द) अप्रस्तुतप्रशंसाया पुनरुक्तिमाह—आहूतेष्विति—सामान्यं जनं धिक्। यतोऽचेतन भद्राभद्रादिचेतनरहितम्। अनामृष्टम् अपरिभावितं तत्त्वं येन तादृशमन्तरं मनो यस्य तादृशं प्रभुमिव। सामान्यस्य अचेतनत्वं दर्शयति—आहूतेषु विहङ्गमेषु विहायसा गच्छन्तु जनेषु प्राणिषु आहूतेषु विहायोगामित्वात् पुरः आयान् आगच्छन् मशकोऽपि न वार्यते, वारणा एव निवर्त्तते। गमनमेवात्र विधेयं बोध्यं तदेव सामान्ये चेतनत्वप्रतिपादनसम्भवात्। तथा तृणमणिस्तु तृणाकर्षको-ऽल्पमूल्यो मणिः धुरि वा मध्ये वा वसन् रथशोभाकरकमहामूल्यमणीनां धुरं रथ-शोभाकरणरूपं धुरं भारं विधत्ते। "धूः स्त्री स्याद्वे यानमुखम्" इति कोषः। यानं रथम्। मध्ये इत्यनोपस्थितत्वात् यानस्येति लभ्यते। मध्ये वसन् इत्यत्र मध्येवारिधि वा वसन् इति क्वचित् पाठः। तदा च मध्ये वारिधे. मध्ये वा वसन् पुनः पुनर्वसन्नित्यर्थः। मणीनां वारिधिवासमाधर्म्यान्महामूल्यमणीना धुरं मणित्वेन गण्यत्वरूपा धुरं भारम् इत्यर्थः। मध्येऽपि इति अपिकारस्य तेजस्विषु अन्वयः। अत एतादृशाऽयुक्त-कारित्वात्सामान्यं धिक् इत्यर्थ.। अत्रेति। अचेताः प्रभुः प्राकरणिकः। मशकादयो-ऽप्राकरणिकाः। तेषाम् अभिधानवशादेव अचेतनः प्रभोः व्यञ्जनया लाभे तदभिधानं पुनरुक्तमित्यर्थ।

(वि, ध) प्रसिद्ध्यभावस्येति—अनुप्रासितपदार्थस्य निर्दिष्टकर्मणि प्रसि-द्ध्यभाव इत्यर्थः। चक्रेति। अस्य भूभुजः चक्राधिष्ठितता राजमण्डलाक्रमणं चक्री विष्णुः प्रायच्छत् दत्तवान्। एवम् उच्छ्रितं गोत्रं गोत्रभित् इन्द्रः, वृषं धर्मं वृषभकेतुः महेशः। अत्र इष्टकर्मसु एषा कर्तृत्वप्रसिद्धिर्नास्ति किन्तु अनुप्रासार्थमेव तथोक्तम्।

(लो, ई) तृणमणिः तृणाकर्षको मणिविशेषः। अनामृष्टं तत्त्वान्तरं येन महीयसामल्पीयसा च पदार्थाना भेदो न प्रकाश्यते। सामान्यं जातिः सामान्यस्य सर्वासु विभक्तिषु एकरूपेणैवावस्थितेरित्यर्थः। अनुचितं च व्यञ्जनयैव प्रत्युत चमत्का-रातिशयदायित्वेन गतार्थत्वात्।

(लो, उ) चक्रेति—अस्यमाशय, चक्रप्रभृतीनां च चक्राधिष्ठिततादिमात्रेण

---

1 'त्वम्' (ख. पु.) 2 'सं' (ख. पु.)

वृषं वृषभकेतुश्च प्रायच्छद्यस्य भूभुजः ॥" (ध, ङ)

उक्तदोषाणां च क्वचिददोषत्वं क्वचिद्गुणत्वमाह–(न)

वक्रारि क्रोधसंयुक्ते तथा वाच्ये समुद्यते ।
रौद्रादौ तु रसेऽत्यन्तं दुःश्रवत्वं गुणो भवेत् ॥ ८ ॥ (ऊ)

एषु चास्वादस्वरूपविशेषात्मकतया मुख्यगुणप्रकर्षोपकारित्वाद्गुण इति व्यपदेशो भाक्तः । (प, ऋ) क्रमेण यथा—

"वद्धिच्छेदकृशस्य कण्ठलुठितप्राणस्य मे निर्दयं
क्रूरः पञ्चशरः शरैरतिशितैर्भिन्दन् मनो निर्भरम् ।
शम्भोर्भूतकृपाविधेयमनसः प्रोद्दामनेत्रानल–
ज्वालाजालकरालितः पुनरसावास्तां समस्तात्मना ॥" *

अत्र शृङ्गारे कुपितो वक्ता । (फ)

(वि, न) उक्तदोषाणामिति दुःश्रवत्वप्रभृतीनाम् इत्यर्थः ।

(वि, प) वक्रारीति—समुद्यते प्रचण्डे भीषणे इति यावत् । रौद्रादौ रसे अत्यन्तं गुण इत्यन्वयः । ननु माधुर्यादय एव गुणास्तत्कथं दुःश्रवत्वादेर्गुणत्वम् इत्यत्राह—एषु चेति । माधुर्यादय आस्वादस्वरूपविशेषात्मका गुणा मुख्याः । तेषां प्रकर्षरूपो य उपचारः तत्कारित्वाद् औपचारिको गुणव्यपदेशो युक्त इत्यर्थः ।

(वि,फ) अत्र क्रोधसंयुक्ते वक्रारेः दुःश्रवत्वगुणमाह—तद्धिच्छेदेति । तस्य विच्छेदेन कृशस्य कण्ठलुलितप्राणस्य च मे मनः, क्रूरः पञ्चशरः अतिशितैः शरैर्निर्दयं भिन्दन्, शम्भोः प्रोद्दामनेत्रानलज्वालेन समस्तात्मना करालित आस्ताम् । शम्भुः कथमिदं करिष्यतीत्यत्राह–भूतकृपेति । भूते प्रार्थिनि मयि कृपया एवं करिष्यति । अत्रेति । विच्छेदकण्ठलुठितादौ च शरटकक्रौञ्चादयो वर्णा दुःश्रवाः कुपितवक्तृका गुणाः ।

प्रशंसनं न खलु प्रतिपाद्यम् । किन्त्वनुप्रासार्थमेवोपनिबद्धम् ।

(लो, ऊ) अधुना पदनिष्ठत्वेन पदवाक्यविभक्तनामेषां दोषाणां क्वचिद् वैगुण्यादिकमन्यथात्वमित्याह । क्रोधोऽत्र रौद्ररसतामनापद्यमानो विवक्षितः, तस्य पृथगुक्तत्वात् । समुद्यते सम्यगौद्धत्यगुणयुक्ते वस्तुनि । आदिशब्देन बीभत्सः ।

(लो, ऋ) मुख्यो गुणो यदादित्वस्वरूपात्मको माधुर्यादिः । भाक्तः औपचारिकः ।

---

* कण्ठे लुठिता उपरियाताः प्राणा यस्य तस्य मम मनः अतिशितैः तीक्ष्णैः शरैः निर्दयं निर्भरमत्यन्तं च भिन्दन् विदारयन् क्रूरः पञ्चशरः कामः समस्तात्मना भूते प्रार्थिनि मयि यो कृपा तस्यां विधेयं वशीभूतं मनो यस्य तस्य शम्भोः शिवस्य, प्रोद्दामः अत्युत्कटो यो नेत्रानलः तृतीयनेत्राग्निः, तस्य उत्थानां शिखानां जालेन समूहेन समस्तात्मना तनु एकदेशेन करालितदाहेन भीषणभूत आस्ताम् ।

'मूर्द्धव्याधूयमानध्वनदमरधुनीलोलवीचोलजालो-
द्भूताम्भ स्तोददम्भात् प्रसभमभिनभ क्षिप्तनक्षत्रलक्ष्म् ।
ऊर्ध्वन्यस्तोग्रदण्डभ्रमिभररभसोद्यद्भस्वद्भवेग-
भ्रान्तब्रह्माण्डखण्डं प्रवितरतु शुभं शाम्भवं ताण्डवं वः ॥"×

अत्रोद्धते ताण्डवे वाच्ये। इमे पद्ये मम। रौद्रादिरसे तु एतद् द्वितयापेक्षयापि तु श्रवत्वमत्यन्तं गुणः । यथा—"उत्कृत्योत्कृत्य वृत्तिमित्यादि" । अत्र बीभत्सो रसः । (च, छ)

सुरतारम्भगोष्ठ्यादावश्लीलत्वं तथा पुनः ॥ ६ ॥

तथा पुनरिति गुणः एव । यथा—

"करिहस्तेन सबाधे प्रविश्यान्तर्विलोडिते ।

---

* (चि, च) उद्धते वाच्ये चाह—मूर्द्ध इति । शाम्भवं ताण्डवं नृत्यं वो युष्माकं शुभं प्रवितरतु । ताण्डवं कीदृशम् । मूर्द्धव्याधूयमानाया ध्वनन्त्या अमरधुन्या गङ्गाया लोलेन कल्लोलजालेन तरङ्गसमूहेन उद्धूतानां क्षिप्तानाम् अम्भसां स्तोदानां जलकणानां दम्भात् छलात् प्रसभं सहसा अभिनभो नभसि क्षिप्तानि नक्षत्राणां लक्ष्माणि येन तादृशम्। पुनः कीदृशम् । ऊर्ध्वन्यस्तयोरुग्रदण्डयोर्भ्रमिभरेण भ्रम्याधिक्येन रभसोद्यत सहसोद्गच्छत नभस्वत वायो प्रवेगेण भ्रान्त ब्रह्माण्डखण्ड यत्र तादृशम् । अत्रेति। उद्धत भाषण उत्कृत्य इत्यादौ बीभत्सो रसः ।

(चि, भ) सुरतेति—सुरतस्यारम्भो यस्या तादृशगोष्ठ्यादौ इत्यर्थः । करिहस्तेनेति । बालिकाया सुरतोपायस्य द्वयर्थपदेन सूचनमिदम् । तथाहि पुंसो ध्वजप्रतीकस्य साधनस्य सैन्यस्यान्तर्मध्ये प्रविश्योपसर्पन् गच्छन् विराजते । साधनान्तः कीदृशे सम्बाधे निबिडत्वादाकृते । तर्हि कथं प्रवेश इत्यत्राह—करिहस्तेनेति ।

(लो, मृ) उद्धत हरताण्डवम् । रौद्रे तु श्रवत्व यथा मम तातपादानां—

स्फुरद्विकच्चपेटाघातनेनायमष्टौ
सपदि कुलगिरीन् वा खण्डशश्चूर्णयित्वा ।
प्रलयमरुदुदारस्फीतकृतो धूतजात
प्रसृतिभिरथ पारावारमुत्क्षेपयामि ॥

(लो, लृ) करिणो गजस्य हस्त स्थूलहस्त । 'तर्जन्यनामिके श्लिष्टे मध्यमा स्याद्वहिर्यदि ।' इति शृङ्गारशास्त्रप्रसिद्धिरूप स्त्रीयोनिविद्रावण पुंध्वजस्याकार करिक

अत्र प्रकरणाद् विप्रलम्भोऽवगम्यते। तत्र क्रोधस्य प्रकर्षकत्वाद् दीर्घसमासविकटवर्णयोर्गुणत्वम् । तेनाङ्गस्य क्रोधस्य प्रकर्षादङ्गिनो विप्रलम्भस्यापि प्रकर्ष इति भावः ।

× अत्र ताण्डवे ओजस्विनि वाच्ये ओजोगुणप्रकाशका दीर्घसमासविकटवर्णा अनुगुणा । अतोऽत्र तु श्रवत्व गुणो रसानुकूलत्वात् ।

उपसर्पन् ध्वज. पुंसः साधनान्तर्विराजते ॥"

अत्र हि सुरतारम्भगोष्ठ्यां "व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्तु" इति कामशास्त्रस्थिति. । आदिशब्दात् शमकथाप्रभृतिषु बोद्धव्यम् । (भ,ल) §

स्यातामदोषौ श्लेषादौ निहतार्थाभियुक्तके ॥ १० ॥

यथा—

"पर्वतभेदि पवित्रं जैत्रं नरकस्य बहुमतं गहनम् ।
हरिमिव हरिमिव हरिमिव सुरसरिदम्भः पतन्नमत ॥"

करिणा हस्तिना हस्तेन शुण्डया विलोडिते । बालिकासुरतोपायस्यात्र द्व्यर्थपदेन सूचनम् । तथाहि सम्बाधे सङ्कुचिते साधनस्य योनेरन्तः प्रविश्य उपसर्पन् गतागतं कुर्वन् पुंसो ध्वज. लिङ्ग विराजते । प्रवेशोपायमाह—**करिहस्तेनेति** ।

"तर्जन्यनामिकायुक्ते मध्यमा स्याद्वहिर्यदि ।
करिहस्त इति ख्यात कामशास्त्रविशारदै. ॥" इति ।

तादृशाङ्गुलित्रयेण विलोडिते इत्यर्थ । **अत्रेति** । रहस्यवस्तु गोप्यवस्तु तत् पिशुनयेत् सूचयेदित्यर्थ । गोष्ठ्यादावित्यादि पदमाद्यमाह—**शमकथेति** । यथा—

"उत्तानोच्छ्वनमण्डकपाटितोदरसन्निभे । क्षेदिनि स्त्रीव्रणे सक्किरङ्गमे· कस्य जायते ॥"

अत्र जुगुप्साश्लीलम् । प्रभृतिपदग्राह्यं चामङ्गलाभिप्रायवद्वक्तृबोध्यम् । यथा—

निर्वाणवैरदहना प्रशमादरीणा नन्दन्तु पाण्डुतनया सह माधवेन ।
रक्तप्रमार्जितभुवः कृतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुताः समृत्याः ॥

अत्र कुरूणां भाव्यमङ्गलमश्लीलसूचनम् ।

(वि, म) **स्यातामिति**—आदिपदाद् यमकचित्रपरिग्रह । तत्र निहतार्थाभियुक्तकयोर्द्वयोरदोषत्वे श्लेषे एकमुदाहरणमाह—**पर्वतभेदि पवित्रम्** इति । पतत् प्रवहत् सुरसरितो गङ्गाया अम्भो नमत् । तत्र विशेषणभेदात् दृष्टान्तत्रयं ददद् विशेषणान्याह—**पर्वतेति** । अम्भ कीदृशं पर्वतभेदि पवित्रं च । अत्र हरिमिन्द्रमिवेति दृष्टान्तः । सोऽ

राख्यश्च । सबाधे संकटे । ध्वजश्च साधनम् अश्वादि स्त्रीवराङ्गं च पिशुनयेत् सूचयेत् शमकथायामश्लीलो यथा—

"उत्तानोच्छ्वनमण्डकपाटितोदरसन्निभे ।
क्षेदिनि स्त्रीव्रणे सक्किरङ्गमे. कस्य जायते ॥" इति ।

(लो, प) **पर्वतेति**—गङ्गाजलपक्षे पर्वतं भेत्तु शील यस्य । पवित्रं पूतं चेति पदद्वयम् । इन्द्रपक्षे पर्वतभेदिना पविना वज्रेण त्रायत इति । जलपक्षे बहूनां मतं सम्मतम् । गहनं चेति पदद्वयम् । लिङ्गपक्षे बहूनां मातङ्गानां हन्तारम् इत्येकपदम् ।

---

§ समाप्ते वैराग्योत्पादनाय कथाः तासु । शान्तरसे विषयाणां हेयत्वसंवेदनमेतत् । अत्र जुगुप्सितोऽश्लीलार्थस्यैवार्थे गुणभावेति गुण इत्यर्थः ।

अत्रेन्द्रपक्षे पवित्रशब्दो निहतार्थः । सिंहपक्षे मतङ्गशब्दो मातङ्गार्थेऽप्रयुक्तः । (म, ए) *

गुणः स्यादप्रतीतत्वं ज्ञत्वं चेद्वक्तृवाच्ययोः ॥ ११ ॥

यथा—

"त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्त्तिनीम् ।
तद्दर्शनमुदासीनं त्वामेव पुरुषं विदुः ॥" (य, ऐ) ×

पि हि पर्वतभेदिना पविना वज्रेण त्रायते अर्थात् देवान् । अम्भः कीदृशं नरकस्य पापजन्ययातनाया जैत्रं नाशकमित्यर्थः । अत्र हरिं श्रीकृष्णरूपं विष्णुमिवेति दृष्टान्तः सोऽपि नरकस्य नरकासुरस्य जैत्रः । अम्भः कीदृशम्—बहुमतं बहुजनसम्मतं गहनं निबिडं च प्रवाहातिशयाद् अत्र हरिं सिंहमिवेति दृष्टान्तः । सोऽपि बहूना मतङ्गानां हन्ता । दोषद्वयं दर्शयति—**अत्रेति** । न चात्र हरिमिवेत्यत्राऽनवीकृतत्वं कथितपदत्वं वा दोष इति वाच्यम् । एकपदवाच्यानेकेषां दृष्टान्तकरणस्य वैचित्र्यविशेषत्वेन तदाधायकत्वेनाऽदोषत्वात् ।

(वि, य) **गुणः स्यादिति** । ज्ञत्वं परिज्ञातत्वम् । **त्वामामनन्तीति**—त्वा ब्रह्माणं पुरुषार्थानां धर्म्मार्थकाममोक्षाणां प्रवर्त्तिनीं प्रवर्त्तिकां प्रकृतिमामनन्ति वदन्ति सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः तत एव समस्तपदार्थोत्पत्तिरिति साङ्ख्यसिद्धान्तात् । तादृशावस्थास्वरूपं त्वामित्यर्थः । तथा च त्वामेव पुरुषं सर्वकर्त्तृपुरुषं विदुः । तत्र किं प्रमाणमित्यत आह—**तद्दर्शनमिति**—तत एव दर्शनं ज्ञानं यस्य तादृशम् । तत्प्रणीतवेदेन तन्निर्मितगिरिसागरादिभ्योऽनुमानेन च तज्ज्ञानात् । उदासीनं समस्तकार्य्योत्पादने स्वार्थत्वाऽभावात् । अत्र ब्रह्मा वाच्यः, वक्तार इन्द्रादयः । सर्व एव परिज्ञाताः । प्रकृत्यादयोऽप्रतीताः पारिज्ञात्यप्रकाशनाद् गुणत्वम् ।

(लो, ऐ) त्वा तदेकदर्शनमात्रप्रतीतरूपा प्रतीतशब्दाभिव्यङ्गकत्वम् । सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः । कूटस्थः चित्स्वरूपः पुरुषः । तदर्थं प्रवर्त्तयितुं शीलं यस्याः । यदुक्तम्—

प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते ॥

तस्या दर्शनं प्रकाशनं—प्रकृतेर्जडरूपायाश्चित्संक्रमणादेव कार्य्यकारित्वात् । अत्र प्रकृत्यादिशब्दः साङ्ख्यशास्त्रप्रसिद्धः ।

---

* पवित्रशब्दस्य पूतार्थे प्रसिद्धतया पविना त्रायते इत्यर्थे निहतार्थत्वम् । मतङ्गशब्दस्य मातङ्गार्थे कविभिरनादृतत्वादप्रयुक्तत्वम् । प्रकृते तु श्लिष्टपदोपादानेन कवेरभिप्रेतत्वे तात्पर्य्याच्च दोषः ।

× ज्ञत्वं तच्छास्त्रव्युत्पन्नत्वम् । प्रतीतिस्थगनस्य दोषबीजतया विज्ञे श्रोतरि तद-

स्वयं वापि परामर्शे ॥ १२ ॥ *

अप्रतीतत्वं गुण इत्यनुषज्यते। यथा—

युक्तः कलाभिस्तमसां विवृद्धयै क्षीणश्च ताभिः क्षतये यथा स्याम्।
शुद्धं निरालम्बपदावलम्बं तमात्मचन्द्रं परिशीलयामि ॥ (र, श्रो)

कथितं च पदं पुनः।

विहितस्यानुवाद्यत्वे विषादे विस्मये क्रुधि।
दैन्येऽथ लाडानुप्रासेऽनुकम्पायां प्रसादने।
अर्थान्तरसंक्रमितवाच्ये हर्षेऽवधारणे ॥ १३ ॥

गुण इत्येव। यथा—"उदेति सविता ताम्रः" इत्यादि। अत्र विहितानुवादः। (ल)†

(वि, र) स्वयं वापि परामर्शे इति कारिकापादस्थमप्रतीतत्वं गुण इति पूर्वोक्तमनुसंधत्ते—अप्रतीतत्वमिति। युक्तः कलाभिरिति—तं परमात्मस्वरूपं चन्द्रं परिशीलयामि सततं भावयामि इत्यर्थः। विलक्षणचन्द्रत्वादिति भावः। अन्यचन्द्रतो वैलक्षण्यमाह—युक्त इति। कलाभिः शरीरपरिग्रहेच्छारूपाभिः कलाभिः धर्मैः विशिष्टः सन् यत्तमसा शरीरात्मनोरभेदाबोधरूपाणां मोहानां विवृद्धयै भवति यथा रामशरीरपरिग्रहे। अन्यचन्द्रस्तु स्वीयषोडशांशरूपाभिः कलाभिर्युक्तः सन् तमसामन्धकाराणां क्षतये एव भवति। तथा ताभिः कलाभिः हीनः सन्नेषां तमसां क्षतये भवति। अगृहीतशरीरत्वेन तादृशमोहाऽभावात्, अन्यचन्द्रस्तु कलाहीनः सन् तमोविवृद्धये एव भवति। तमोनाशककलाभावेन तस्य तमो वृद्धिं प्रति यत्सत्त्वेऽग्रिमक्षणे यस्य सत्त्वं यदसत्त्वेऽग्रिमक्षणे यदसत्त्वं तत्तस्य कारणमित्येवंरूपकारणत्वात्। तथा तं कीदृशं शुद्धः चन्द्रस्तु कलाही। तथा निरालम्बशून्ये पदेऽवलम्बमानं चन्द्रस्तु ज्योतिश्चक्रावलम्बी। अत्र कलातम पदार्थौ अप्रतीतावपि स्वयं परामर्शे गुणौ पराऽप्रतीतिरुद्देश्यत्वात्।

(वि, ल) विहितस्येति। तत्र विहितानुवादे उदाहरति—उदेतीति। अत्रेति। उदयसवितुरुद्देशे विहितस्य ताम्रत्वस्य अस्तमयसवितुरुद्देशेनापि विधेयतया प्रतिनिर्देशरूपोऽनुवाद इत्यर्थः।

(लो, श्रो) कलाभिः षोडशभिः, ताश्च एकादशेन्द्रियाणि, पञ्च तन्मात्राणि। चन्द्रपक्षे—कला अवयवाः। तमांसि अज्ञानानि, अन्धकाराणि च। ताभिः कलाभिरेषां तमसाम्। निरालम्बपदम् आत्मपक्षे एतस्याश्रयाभावात्। चन्द्रपक्षे गगनम्। अत्र कलाशब्दार्थे योगशास्त्रमात्रप्रसिद्धं यदुक्तं—"षोडशकेन पुरुष" इति।

भावात्। एवं वक्तुर्विवक्षातो तादृक्पदोपनिबन्धेऽनौचित्यमेव दूषकतावीजमिति। उभयोर्विवक्षायां अप्रतीतत्वं न दोषः किन्तु गुण एवेत्यर्थः।

* यत्र स्वत एव पर्य्यालोचनया स्वस्य च विवक्षितत्वं तत्राप्रतीतत्वं गुणः।

† तेनैव पदेन सर्वनाम्ना वा विहितस्यानुवादेऽभेदप्रतीतिर्भिन्नतया सम्भवतीति गुणत्वम्।

"हन्त ! हन्त ! गत कान्तो वसन्ते सखि ! नागत ।"

अत्र विषाद ।

"चित्र चित्रमनाकाशे कथ सुमुखि ! चन्द्रमा ।"

अत्र विस्मय ।(व)

"सुनयने ! नयने निधेहि ।"

इत्यत्रलाटानुप्रास ।

"नयने तस्यैव नयने च ।"

इत्यादौ अर्थान्तरसक्रमितवाच्यो ध्वनि । एवमन्यत्र । (श)

सन्दिग्धत्वं तथा व्याजस्तुतिपर्य्यवसायि चेत् ॥ १४ ॥

गुण इत्येव । यथा—

पृथुकार्त्तस्वरपात्र भूषितनि शेषपरिजन देव !

(वि, व) अनाकाश इति—आकाशभिन्नाया त्वयि इत्यर्थ ।

(वि, श) लाटानुप्रास समासासमासगत । एकार्थत्वेन यमकम् । नयने तस्यैवेति—अत्र द्वितीयनयनपदमुत्कृष्टरूपार्थान्तरे सक्रमितवाच्यम् । एवमन्यदिति—तत्र "गच्छ गच्छ न निष्ठुर" इति क्रुधि । "हा हतोऽस्मि" इति दैन्ये । "एहि एहि वत्स !" इत्यनुकम्पायाम् । 'मुख मुख रुषम्" इति प्रसादने । "कथय कथय वार्ताम्" इति हर्षे । "अयमय वीर" इत्यवधारणे ।

(वि, प) सन्दिग्धत्वमिति—सन्देहयोग्यमित्यर्थ । द्वयर्थत्वेन तयोग्यता—विशेषद्वयेऽर्थद्वयात्तु निश्चय एव तथा पदार्थमाह—गुण एवेति । निश्चयवशात् गुण-इत्यर्थ । पृथुकार्त्तेति—राज्ञि दरिद्रस्योक्तिरियम् । आवयो सदन सम्प्रति सम, त्वत्तो धनलाभे तु पश्चात् मम न भविष्यति इति भाव । पृथूनि कार्त्तस्वरस्य सुवर्णस्य पात्राणि यत्र राजसदन तादृशम् । पृथुकाना शिशूनाम् आर्त्तस्वरस्य पात्र दरिद्रसदन भक्ष्याभावात् । भूषिता सुवर्णादभिण्डिता नि शेषपरिजना यत्र राजसदन तादृशम् । भुवि उषिता सुप्ता नि शेषपरिजना यत्र दरिद्रसदन तादृश शय्याविरहात् । विल-सद्भि करेणुभि हस्तिभिर्गहन व्याप्त राजसदनम्, विलमत्स्य विले तिष्ठन्तो मूषिकृपि-पालिश्रदयस्तेषा रेणुभि गहन दरिद्रसदनम् । अत्र स्वगृहसाम्यव्यानेन राज सम्पदा-

---

(लो, औ) पृथ्विति—पृथुकाना बलानाम् आर्त्तस्वरस्य पात्र स्थानम् । पृथु बहुल कार्त्तस्वरपात्र सुवर्णभाजन यत्र । भूषिता भुवि पृथिव्याम् उषिता मण्डिताश्च । विलमन्त. तिष्ठन्त एव विलमन्का रेणवो भूतय । विलमन्त करे-णवो गजाश्च ।

पदान्तरेणानुवादे निश्चयावभासात् प्रतीतविघातो दोष इति भाव । अत उक्तम्—

"न सोऽस्ति प्रत्ययो लोके य शब्दानुगमादृते ।"

विलसत्करेणुगहन सम्प्रति सममावयो सदनम् ॥" (प, औ) +

वैयाकरणमुख्ये तु प्रतिपाद्येऽथ वक्तरि ।
कष्टत्वं दुःश्रवत्वं वा ॥ १५ ॥

गुण इत्येव । यथा—

"दीर्घीवेवीड्समं कञ्चिद्गुणवृद्धथोरभाजनम् ।
क्विप्प्रत्ययनिभं कञ्चिद् यत्र सन्निहिते न ते ॥"

अत्रार्थे कष्ट., वैयाकरणश्च वक्ता । (अ, स) एवमस्य प्रतिपाद्यत्वेऽपि ।

"अत्रातार्क्षमुपाध्याय ! त्वामह न कदाचन । "

अत्र दु श्रवत्वम् । वैयाकरणो वाच्य । एवमस्य वक्तृत्वेऽपि । (ह)

ग्राम्यत्वमघमोक्षिप्तु ॥ १६ ॥

गुण इत्येव ।

यथा मम—"एसो ससहरबिबो दीसइ हेअग्गवीणपिडो व्व

क्त्यकथनात् व्याजस्तुति । व्याजस्तुतीत्युपलक्षणम् । पर्वतभेदि पवित्रमित्यादौ उपमाश्लेषादावपि तथात्व बोध्यम् ।

(वि, स) वैयाकरणमुख्य इति । अतिशयवैयाकरणमित्यर्थ । कष्टत्व कष्टार्थत्वम् । दीर्घीवेवीड इति कश्चिज्जनो गुणवृद्धयोरभाज गुणवृद्धया च हीन इत्यर्थ । दीर्घीवेवीड धात्वोरिडागमस्य च समस्तयोरपि गुणस्य तद्बाधिकाया वृद्धेश्चाभावात् । त्था कश्चिज्जन क्विप् प्रत्ययनिभ, यत्र जने सन्निहिते सति तत्सन्निहितस्यापि न ते गुणवृद्धी, क्विप्प्रत्ययसन्निहितधातोरपि गुणवृद्धयभावात् ।

(वि, ह) एवमिति । अस्य वैयाकरणस्य तद्दर्शयति—अत्रेति । हे उपाध्याय ! अत्र लोके त्वामह कदाचन न अतार्क्षम् । एवमिति । अस्य वैयाकरणस्य वक्तृत्वे कष्टत्व दु श्रवत्वमपि गुण इत्यर्थ । तस्य वक्तृत्वे कष्टत्वस्य च उदाहृतत्वात् ।

(वि, फ) अधमोक्षिप्त्विति । गुण इत्यनुषङ्ग । एसो इति ।

(लो, अ) दीर्घीवेवीड् इति । कश्चिदिपु । गुण शौर्य्यादि । पक्षे ईश्वरादीनामेत्वादि । वृद्धि ऐश्वर्यादिः । पक्षे ईश्वरादीनामैत्वादिरत्र दीर्घीवेवीधात्वोर्गुण वृद्धिनिषेधात् । क्विप्प्रत्ययनिभ क्विप सर्वापहारीति लोपाद् रिपो सर्वनाश । अत्र न केवल दु श्रवत्व कष्टत्व च ।

---

§ सन्दिग्धत्वमत्र आपादत । अत्र राजगृहे बालकार्क्षनादादीनामनुचित त्वम् । दरिद्रगृहे मृण्मयकपालादीनां सागम्भवत्वाद् योऽर्थ सगम्यते तदेव तस्य प्रतीयते । सन्दिग्धत्वे चात्र मुखे निन्दा, नियतार्थप्रतिपत्तौ व्याजस्तुति ।

एए अच्चस्स मोहा पड़न्ति आसासु दुद्धधारव्व ॥ "

इयं विदूषकोक्तिः । (क, आ)

निर्हेतुता तु ख्यातेऽर्थे दोषतां नैव गच्छति ॥ १७ ॥

यथा—सम्प्रति सन्ध्यासमयश्चक्रद्वन्द्वानि विघटयति "

कवीनां समये ख्याते गुणः ख्यातविरुद्धता ॥ १८ ॥ *

कविसमयख्यातानि च—

मालिन्यं व्योम्नि पापे यशसि धवलता वर्ण्यते ह्रासकीर्त्योः ।
रक्तौ च क्रोधरागौ, सरिदुदधिगतं पङ्कजेन्दीवरादि ।
तोयाधारेऽखिलेऽपि प्रसरति च मरालादिकः पक्षिसङ्घो
ज्योत्स्ना पेया चकोरैर्जलधरसमयें मानसं यान्ति हंसाः । (ख)
पादाघातादशोकं विकसति, बकुलं योषितामास्यमद्यैः ।

"एष शशधरबिम्बो दृश्यते हैयङ्गवीनपिण्ड इव ।
एते चास्य मयूखाः पतन्ति आशासु दुग्धधारा इव ॥"

(इति संस्कृतानुवादः)

(वि, क) ह्यो गोदोहोद्भवं घृतं हैयङ्गवीनं भक्ष्यलम्पटस्योक्तौ भक्ष्यदव्य-दृष्टान्तोऽत्र ग्राम्यो गुणः ।

(वि, ख) सम्प्रतीति—सन्ध्यासमयस्य चक्रवाकद्वन्द्वविघटकत्वे तेषां ख्यातिसत्त्वाद्यात्र हेत्वाकाङ्क्षा । कविसमयख्यातादिं दर्शयति—मालिन्यमिति । पापे इत्यर्थः । सत्कर्मणा कीर्तिः, दाने च यश इति यशःकीर्त्योर्भेदः, मरालो हंसः ।

(लो, आ) अधमा विदूषकादयः । एसो इति—

"एषः शशधरबिम्बो दृश्यते हैयङ्गवीनपिण्ड इव ।
एते चास्य मयूखाः पतन्त्याशासु दुग्धधारा इव ॥"

---

* तथा हि—

अगतोऽपि निबन्धेन (१)
सतामप्यनिबन्धनात् । (२)
नियमस्य पुरस्कारात् (३)
गम्प्रदायस्त्रिधा कवेः ॥

असतोऽपीति—वस्तुगत्या यत्र भवति तदपि कविभिः निबध्यते ।
यथा—मालिन्यं व्योम्नि पापे ।
सतामपीति—पारमार्थिकमपि न निबध्यते । यथा—
न स्यात्तापी भगवान् इत्यादि ।
नियमस्येति यथा—हिमवन्त्येव भुजङ्गाः चन्दनं मलय एव ॥

यूनामङ्गेषु हाराः स्फुटति च हृदयं विप्रयोगस्य तापैः।
मौर्वी रोलम्बमाला धनुरथ विशिखाः कौसुमाः पुष्पकेतोः
भिन्नं स्यादस्य वाणैर्युवजनहृदयं, स्त्रीकटाक्षेण तद्वत्। (ग,इ)
अह्नय्यम्भोजं निशायां विकसति कुमुदं, चन्द्रिका शुक्लपक्षे
मेघध्वानेषु नृत्यं भवति च शिखिनां नाप्यशोके फलं स्यात्।
न स्याज्जाती वसन्ते, नच कुसुमफले गन्धसारद्रुमाणा-
मित्याद्युन्नेयमन्यत्कविसमयगतं सत्कवीनां प्रबन्धे ॥ १६ ॥

एषामुदाहरणानि आकरेषु स्पष्टानि।

धनुर्ज्यादिषु शब्देषु शब्दास्तु धनुरादयः।
आरूढत्वादिबोधाय ॥ २० ॥

यथा—"पूरिते' रोदसीध्वानैर्धनुर्ज्यास्फालनोद्भवैः।"

अत्र ज्याशब्देनापि गतार्थत्वे धनु शब्देन ज्याया धनुष्यातत्तीकरणं बोध्यते। आदेशब्दात् "भाति कर्णावतंसस्ते।" अत्र कर्णस्थितत्वबोधनाय कर्णशब्दः। (ई) *

एवं श्रवणकुण्डलाशिर शेखरप्रभृतिः। (घ)

(वि, ग) योषितामास्यमर्थैर्वकुलं विकसतीत्यन्वयः।

(वि, घ) धनुरिति। आरूढत्वेति। तद्बोधश्च धनु-शब्दादौ धनुरारूढत्वं लक्षणया रूढिहेतुकया लुप्तषष्ट्यर्थो वा आरूढत्वम्। गतार्थत्वेपीति—न च ज्याशब्दार्थः कथं धनुर्ज्यात्वस्य संस्थानविशेषध्यङ्ग्यजातीविशेष इति वाच्यम्। ज्यात्वस्य जातित्वेऽपि तत्सम्बन्धिनो धनुषो नमयतः स्मारकत्वेन तद्वशादेव धनुर्लाभे, धनु पदस्याधिक्यप्रसक्तेरारूढत्वप्रतिपादनेन निरवसितत्वात्। अत्र कर्णस्थितत्वेऽपि—अत्र पुनरुक्तिप्रसक्तिवारणमेव कर्णावतंसस्यापि अवतंसपदार्थत्वात् न चैवं कर्णस्थितलक्षणायामपि कर्णस्थितकर्णभूषा इति बोधनेनैव पुनरुक्तिरिति वाच्यम्। अवतंसपदस्य

(लो, इ) हारो हृदयं च स्फुटतीति सम्बन्धः। युवजना युवानो युवतयश्च। स्त्रीकटाक्षेणैव।

(लो, ई) एष्ववतंसादिपदप्रतिपादनेनापि कर्णार्थप्रतिपत्ते पौनरुक्त्यम्। तथा हि—कर्णपदान्यन्यकर्णादिव्यवच्छेदेन प्रकृतमेव कर्णादीन् बोधयन्ति। तेषां शोभादिः स्वहेतुकः। किन्तु प्रकृतनायिकाहेतुक एव पर्यवस्यतीति भावः।

---

* "पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे" इति कोषात्। अत्रावतंसस्य कर्णभूषणे संकीर्तितत्वात् कर्णशब्दोपादाने पुनरुक्तिः। एवमन्यत्र। केचित्तु धनुर्ज्यादिषु अपुष्टार्थदोषस्य परिहारोऽयमित्याहुः। एवं सपूरेकर्करीकलगजर्हस्ताश्वेशशैलेषु-कर्दशब्देषु बोध्यम्। सर्वत्र लक्षणा एव स्वीकार्या।

एवं निरूपपदो मालाशब्दः पुष्पस्रजमेवाभिधत्त इति स्थितावपि "पुष्पमाला बिभाति ते" अत्र पुष्पशब्द उत्कृष्टपुष्पप्रसिद्ध्यै। एवं मुक्ताहार इत्यत्र मुक्ताशब्देनान्यरत्नामिश्रितत्वम्। (ङ)

प्रयोक्तव्याः स्थिता अमी ॥ २१ ॥

धनुर्ज्यादयः सत्काव्यस्थिता एव निबद्धव्या नत्वस्थिता जघनकाञ्चीकङ्कणादयः (च) *

उक्तावानन्दमग्नादेः स्यान्न्यूनपदता गुणः ॥ २२ ॥

यथा—"गाढालिङ्गनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा।

कर्णयोग्यभूषार्थकत्वेन कर्णस्थितकर्णयोग्यभूषा इति पुनरुक्त्यभावात्। **एवं श्रवणे**ति—एतद्द्वये पदाधिक्यस्यैव प्रसक्तिः कुण्डलत्वकिरीटत्वयोः संस्थानव्यङ्ग्यजातित्वादेव।

(वि, ङ) **पुष्पस्रजमेवाभिधत्ते** इति। तथा चात्रापि पुनरुक्तेरेव प्रसक्तिः। उत्कृष्टपुष्पप्रसिद्ध्यै इति पुष्पाशो मालाशब्दार्थ एव पुष्पशब्दस्य तु उत्कृष्टे लक्षणेत्यर्थः। **एवं मुक्ताहार इत्यत्रेति**। मुक्तमैवेयकं हार इति कोशात्। मुक्तांशोऽपि हारशब्दार्थ एव इत्यतोऽत्रापि पुनरुक्तेरेव प्रसक्तिः। अन्यरत्नामिश्रितत्वं तु मुक्ताशब्दलक्षणागम्यम्।

(वि, च) **सत्काव्यस्थिता एवेति**—यतः सत्काव्ये स्थिता अतो निबद्धव्या एवेत्यन्वयः। तथा चात्र लक्षणाया रूढिहेतुकत्व दर्शितम्। जघनकाञ्च्यादौ तु न रूढिरिति भावः।

(वि, छ) **उक्ताविति**—आनन्दमग्नादेर्वचनस्योक्तावित्यर्थः। **गाढालिङ्गनेति**—सख्या सख्युरुक्तिरियम्। गाढालिङ्गनेन वामनीकृतकुचा चासौ प्रोद्भिन्नरोमोद्गमा चेति समासः। कुचे रोमवर्णनानौचित्यान्नास्य समासः। सान्द्रस्नेहरसातिरेकेण विगलन् श्रीमतो नितम्बादम्बरं यस्यास्तादृशविशेषणद्वयवती सा मम नायिका पीडये-

---

(लो, उ) **गाढेति**—अत्र सुप्तेत्यादिना उत्तरोत्तरं निश्चलांधिक्यम्। किम्? उक्तरूपा प्रिया मम मनसि सुप्ता नु! स्थिरतया वर्त्तमानत्वात्। सुप्तापि पुनरुत्थाय पतीन्याशङ्क्याह मृता नु किम्? सापि परैर्विहर्त्तुं शक्या इत्यत आह—लीनेति। जतुकाष्ठादिवदिति विशेषः। तथाभूतापि केनचिद् व्यावर्त्तयितुं शक्येतेत्यत आह—

---

* एवं निर्याजलक्षणायामतिप्रसङ्गः स्यादित्याशङ्क्याह—**प्रयोक्तव्या** इति। महाकविप्रबन्धस्थितेष्वेव कर्णावतंसादिपदेषु एतदुक्त्यक्षरं समर्थनम्। महाकविप्रयुक्तान्येवान्यैःप्रयोज्यानि जघनकाञ्चीत्यादिपदानि प्रयुक्तानि पौनरुक्त्यमेवावहन्ति' कविभिरप्रयुक्तत्वात्। अतो रूढितोऽनादिलक्षणायामेव प्रयोजनाभावो न दोष इति भावः।

मामा मानद ! माऽतिमामलमिति त्वामाचरोल्लापिनी
सुप्ता किन्नु मृता नु किं मनसि मे लीना विलीना नु किम् ॥
(ङ, ऊ)

अत्र पीडयेति न्यूनम् ।

क्वचिन्न दोषो न गुणः ॥ २५ ॥

न्यूनपदत्वमित्येव । यथा—

"तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः ।
सां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्त्तिनीं
सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः ॥" (ज)

अत्र "प्रभावपिहिता" इति "भवेत्" इति च इत्यनन्तरम् "नैतद्यतः" इति पदानि न्यूनानि । एषां पदानां न्यूनतायामप्येतद्वाक्यव्यङ्ग्यस्य वितर्कोऽव्यभिचारिभावस्योत्कर्षाकरणाच्च गुणः । "दीर्घं न सा" इत्यादिवाक्यजन्यया च प्रतिपत्त्या तिष्ठेदित्यादिवाक्यप्रतिपत्तेर्बाधः स्फुटमेवावभासत इति न दोषः ।
(झ, ऊ) *

त्यनुक्तिवशात्, हे मानद ! मा मा मा मा इत्यलमित्येवमल्पाक्षरोल्लापिनी सती सुप्तेत्यादिवितर्कचतुष्टयविषयोऽभूदित्यर्थः । सुप्ता निद्रिता निष्पन्दत्वात् अतिनिष्पन्दत्वेन मरणवितर्कः । मनोगतत्वेन मनसि लयवितर्कः मनसोरप्यपि अबहिर्भावात् अत्यन्तलयरूपस्य विलयस्य वितर्कः ।

(वि, ज) **तिष्ठेत्कोपेति**—उर्वशीमनासाथ पुरुरवसोऽयं वितर्कः । सा उर्वशी स्वप्रभावेन पिहिता अदृश्या तिष्ठदिति वितर्क्याह—**दीर्घं न सा** इति । एवं स्वर्गाय इति वितर्क्याह—**मयि पुनरिति** । अस्या असुरेण हरणकोटिस्तु असम्भव्या इत्याह—**तां हर्तुमिति** । मे पुरोवर्त्तिनीम् इति तत्र हेतुः । अतोऽदर्शने हेत्वभावेन विस्मयादाह—**सा चेति**—अगोचरम् अगोचरत्वं याता प्राप्ता ।

(वि, झ) **अत्रेति**—पूर्वोक्तस्य निषेधं प्रत्येव दीर्घं न सा इत्यनयोः हेतुत्वात् नतु पूर्वप्रतीतिं प्रति इति भावः । ननूत्कर्षस्याकरणात् मा भवतु गुणत्वं, दोषत्वं तु स्यादित्यंत आह—**दीर्घं न सेत्यादीति**। **बाधः स्फुटमेवेति**—विरोधिनः

विलीनेति—दुग्धे जलवत् सर्वथा भेदोपलम्भाभाव इति भावः । ततो मामेति सामान्यतः प्रकृतनिराकरणम् । माऽति मामित्यत्र पीडयेति क्रियापदं न्यूनम् । एतत्प्रतिपादिकया नायिकायाः सान्द्रानन्दजडीभूततया सङ्कीर्णवाक्योच्चारणेऽप्यसामर्थ्यं व्यनक्तीति न्यूनपदत्वं गुणः ।

(लो, ऊ) **तिष्ठेदित्यादि** । प्रभावेन दिव्येन पिहिता, अदृश्या सा उर्वशी । प्रतिपत्त्या ज्ञानेन । उत्तरा प्रतिपत्तिः पूर्वां प्रतिपत्तिं बाधते ।

---

* यथा गाढालिङ्गनेत्यत्र न्यूनपदत्वे रसावेशातिशयप्रतीतिर्न तथात्र इति न गुणः । तिष्ठेदित्यत्र सन्देहः । दीर्घमित्यनेन उत्तरज्ञानेन पूर्वज्ञानस्य संदेहस्य बाधि-

गुण' काप्यधिकं पदम् ॥ २४ ॥

यथा—"आचरति दुर्जनो यत्सहसा मनसोऽप्यगोचरानर्थान् ।
तदहं तन्न न जाने जाने स्पृशति मन किन्तु नैव निष्ठुरताम् ॥"

* अत्र "न न जाने" इत्यनेनाऽयोगव्यवच्छेद । (ऋ) द्वितीये जाने इत्यनेनाहमेव जाने इत्यन्ययोगव्यवच्छेदाद्विच्छित्तिविशेष ।*(ऋ) +

समाप्तपुनरात्तत्वं न दोषो न गुण क्वचित् ॥ २५ ॥ ×

यथा—"अन्यास्ता गुणरत्न" इत्यादि । अत्र प्रथमार्द्धेन वाक्यसमाप्तावपि द्वितीयार्द्धवाक्य पुनरुपात्तम्। एवञ्च विशेषणमात्रस्य पुनरुपादाने समाप्तपुनरा-

---

परवाक्यस्य तथात्वनियमात् । तथा च "नैतद्यत" इत्यस्याकाङ्क्षावशादध्याहारोऽपि न दोषाय इति भाव ।

(वि, अ) गुणः क्वापीति—यत्राधिकपदस्य रूढिलक्षणया अर्थान्तर तत्रेत्यर्थ । **आचरतीति**—मनसोऽप्यगोचरानर्थान् असदर्थान् सहसा यत् दुर्जन आचरति तदहं न न जाने । अपि त्वहमेव जाने इत्यर्थ , किन्तु मम मन निष्ठुरता नैव स्पृशति इत्यर्थ । विच्छित्तिर्बोधविशेषरूपा भङ्गि । **अत्रेति**—आकाङ्क्षोत्थानानुत्थान-द्वयमत्र अदोषदोषतयोर्बीजम् ।

(वि, ट) अन्यास्ता इत्यत्र पूर्वार्द्धेन वाक्यसमाप्तावपि कथमत्र निष्पादक-गुणरत्नादीना वैलक्षण्यमित्याकाङ्क्षोत्थानाददोषता । समाप्तपुनरात्तत्वस्य दोषत्वादोषत्वे विनिगमयति—**एवञ्चेति** । विशेषणमात्रस्य इत्यत्रापि अनाकाङ्क्षितस्येति बोध्य, विशेषणे आकाङ्क्षासत्त्वे तु न दोष इति प्रागेव दर्शितम् । तथा चाकाङ्क्षाया एव

(लो, ऋ) अयोगव्यवच्छेदोऽह जानामीत्येवरूप ।
(लो, ऋ) द्वितीयार्द्धवाक्य श्रीमत्कान्तीत्यादि । **एवञ्चेति**—विशेषण

तत्वात् नञर्थोपस्थितिरिति न दोष । नैतदित्यादेरनुपादानेऽपि "दीर्घं न सा कुप्यति" इत्यादेरुक्त्यैव निषेधो वाच्यवत्प्रतीयते अतस्तदनुपादान न दोषाय इति भाव ।

+ अयोगस्य आत्मनि ज्ञानासम्बन्धस्य व्यवच्छेदान्निराकरणात्—अह न जाने इति न पर जाने एव । द्वितीये जाने इत्यनेन अन्यस्य मद्विषस्य योग ज्ञान-सम्बन्ध तस्य व्यवच्छेद निराकरणं तस्मात्—अहमेव जानामि नत्वन्य इत्यर्थ । "द्वौ नञौ प्रकृतमर्थं सातिशय बोधयत" इति न्यायात् । "न न जाने" इत्यनेन ज्ञानातिशये लब्धे पुनर्जाने इति पदम् "अहमेव जाने ननु अन्य ज्ञापयामि" इति विशेषत्वाद् गुण इति भाव ।

× न गुण प्रकर्षाप्रधानस्याभावात् । न दोष प्रकृत प्रति प्रातिकूल्याभावात् ।

1 तारकान्तर्गतपाठस्थाने, "अत न न जान इत्यन्ययोगव्यवच्छेदाद् विच्छित्ति-विशेष" इत्येव पाठ (स पु)

त्वम्, न वाक्यान्तरस्येति विज्ञेयम्। (ट, ऋ) +

गर्भितत्वं गुणः क्वापि ॥ २६ ॥

यथा—"दिङ्मातङ्गघटाविभङ्गचतुराघाटा मही साध्यते
सिद्धा सापि वदन्त एव हि वयं रोमाञ्चिताः पश्यत।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्माद्प्रादुरभूत् कथाद्भुतमिदं यत्रैव चास्तं गतम्॥"

अत्र "वदन्त एवम्" इत्यादिवाक्यं वाक्यान्तरप्रवेशात् चमत्कारातिशयं पुष्णाति। (ठ, ऋ)

पतत्प्रकर्षता तथा ॥ २७ ॥

तथेति क्वचिद्गुणः। यथा—"चञ्चद्भुज" इत्यादि। अत्र चतुर्थपादे सुकुमारार्थतया शब्दाडम्बरत्यागो गुणः। (ड)

क्वचिदुक्तौ स्वशब्देन न दोषो व्यभिचारिणः।
अनुभावविभावाभ्यां रचना यत्र नोचिता ॥ २८ ॥ (ढ)

नियामकत्वं, न वाक्यत्वविशेषणत्वयोरिति स्थितेन वाक्यान्तरस्येति यदुक्तं तद्वाक्यान्तरे आकाङ्क्षा अवश्यं तिष्ठतीत्यभिप्रायेणैव।

(वि, ठ) दिङ्मातङ्गघटेति। आघाटः पर्यन्तः। तथा च दिङ्मातङ्गघटाभिर्विभङ्गधत्वार पर्यन्ता. यस्याः तादृशी मही येन रामेण साध्यते। सिद्धा व्याघातशून्यसाधनेन स्ववशीकृता साऽपि मही विप्राय प्रतिपाद्यते। किमपरं ब्रूम इति शेष। तस्मै रामाय नम इदं कथाद्भुतं यस्मात् प्रादुरभूत् अन्यैरतथाकरणात् यस्मादेव प्रादुरभूदित्यर्थः। यत्रैव चास्तं गतं, केनाप्युत्तरकालं तथाकरणादस्तं गतमित्येवं वदन्त एव वयं रोमाञ्चिता एव इदं पश्यतेत्यर्थः। हिरधारणे। अत्रेति। चमत्कारस्य वाक्याऽगमाक्षेप विस्मयोद्बोधात्।

(वि, ड) अत्र चतुर्थपाद इति। उत्तंगयिष्यति क्वचास्तव देवि! भीम इत्यत्र सुकुमारतया वर्णानामसमासेन च सुकुमारतयेत्यर्थः।

(वि, ढ) क्वचिदुक्ताविति। व्यभिचारिणः स्वशब्देनोक्तौ क्वचित् दोष इत्यर्थः। तत्र न दोष इत्याह—अनुभावेति। रचना प्रतिपादनम्। अनौचित्यमेव द्विविधं तद्द्वयं व्याचष्टे यत्रेत्यादिभ्याम्।

माश्रयेणोपलक्षणम्। तेन कर्तृकर्मादीनामन्येषां पदानामपि वाक्यगमाक्षावुक्तौ। यथोदाहृते दिवाकरो हरिरित्यादि.।

(सो, ढ) दिङ्मातङ्गेत्यादिपदस्य चतुःसमुद्रसीमा इत्यर्थः।

+ अत्र उक्तम्—"स्वार्थोपगमाक्षानामङ्गत्वव्यपेक्षया।

यत्र विभावानुभावमुखेन प्रतिपाद्ने विशदप्रतीतिर्नास्ति[1] यत्र च विभावानुभावकृतपुष्टिराहित्यमेवानुगुण (ण) तत्र व्यभिचारिण स्वशब्देनोक्तौ न दोष । यथा—

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्त्तमाना ह्रिया
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्य पुन ।
दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे सङ्गमे
सरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु व ॥"(त,ए)

अत्रौत्सुक्यस्य त्वरारूपानुभावमुखेन प्रतिपादने न झटिति प्रतीति । त्वराया भयादिनापि सम्भवात् ह्रियोऽनुभावस्य च व्यावर्त्तनस्य[3] कोपादिनापि सम्भवात् ।

साध्वसहासयोस्तु विभावादिपरिपोषस्य प्रकृतरसप्रतिकूलप्रायत्वादित्येषा

(वि, ण) **विभावानुभावकृतेति**—व्यभिचारिभावस्य यौ विभावानुभावौ ताभ्या व्यङ्ग्यत्वरूपाया व्यभिचारिभावस्य पुष्टिस्तद्राहित्यमेवेत्यर्थ ।

(वि, त) द्वयोरेकमेवोदाहरणमाह—**औत्सुक्येन** इति । गौरी नवे सगमे प्रथमदिने हरसान्निध्यनिमित्तमौत्सुक्येन कृतत्वरानन्तर च सहभुवा साहजिकया ह्रिया व्यावर्त्तमाना ततश्च तैस्तैरित्यादि । ततश्च वर स्वामिन हरम् अग्रे दृष्ट्वा आत्तसाध्वसरूपरसा, ततश्च हसता हरेण श्लिष्टा सती सरोहत्पुलका ईदृशी व शिवायास्तु ।

(वि, थ) **अत्रेति** । औत्सुक्यस्य त्वरारूपो योऽनुभावस्तन्मुखेनेत्यर्थ । भवित्यप्रतातौ चीनमाह—**त्वराया भयादिनाऽपीति** । एव ह्रियोऽप्यनुभावव्यावर्त्तनात् न झटिति तत्प्रतीति इत्यत तस्यापि ह्रियेति शब्दस्य वाच्यत्व न दोष इत्याह—**ह्रियोऽनुभावस्य चेति** । विभावानुभावकृतपुष्टिराहित्य दर्शयति—**साध्वसहासयोस्तु** इति। साध्वस भय हासश्च हास्यहेतुश्चेतोविकास स्थायिभावलक्षणे दर्शित । तद्द्वय च भयानकहास्यरसयो स्थायिभावावपि गौरीमहेशयो[2] शृङ्गारेऽत्र व्यभिचारिभावौ । तयो स्वस्वविभावादिना परिपोषस्य प्रकृतशृङ्गाररसप्रतिकूलप्रायत्वात् इत्यर्थ । विभावादीत्यादिपदात् अनुभावपरिग्रह । तथा हि कम्पस्तावद् गौरी

(लो, ए) कुतो न दोष इत्याह—**अनुभावेति** । **औत्सुक्येनेति** । सहभुवा त्वरासमनन्तरकालोत्पन्नया त्वरेयेति । भयेन त्वरा कृतवतीति सम्भ्रान्तिसम्भावनत्वादित्यर्थ । एवमन्यत्र एषामौत्सुक्यादीना "दूरादुत्सुकमागते विवलितम्" इत्यादौ विवलनादिरूपानुभावमुखेन यथा लज्जादिप्रतिपादन तथा सहसा प्रसारणरूपानुभावमुखेन औत्सुक्यस्य प्रतिपादने न विशदप्रतीतिरिति व्यभिचारिण स्वशब्दप्रतिपादनमेवोचितमिति भाव ।

---

1 विशेष (क-ख पु) 2 –'ने सङ्गमे (क ख पु) 3 व्यावर्तमानथ (क ख पु)

स्वशब्दाभिधानमेव न्याय्यम् । (थ)

सञ्चार्य्यादेर्विरुद्धस्य वाध्यत्वेन वचो गुण ॥ २९ ॥ (ऐ)

" काकाक्ष्यं शशलक्ष्मण क च कुलम् " इत्यादि ।

अत्र प्रशमाज्ञाना वितर्क-मति-शङ्का धृतीनामभिलाषार्ङ्गौत्सुक्यस्मृतिदैन्य-चिन्ताभिस्तिरस्कार पर्य्यन्ते चिन्ताप्रधानमास्वादप्रकर्षमाविर्भावयति । (द)

विरोधिनोऽपि स्मरणे साम्येन वचनेऽपि वा ।

भवेद्विरोधो नान्योन्यमङ्गिन्यङ्गत्वमाप्तयोः ॥ ३० ॥ (ध)

क्रमेण यथा—

"अय स रसनोत्कर्षी" इत्यादि । अत्रालम्बनाविच्छेदेन रतेररसात्मतया स्मर्य्यमाणानां तदज्ञानां शोकोद्दीपकतया करुणानुकूलता । (न, ओ) ७

साध्वसस्यानुभाव । मोहहासश्चोद्दीपनविभावस्ततश्च साध्वसहासावनुपादाय यदि रक्ष्मा इति क्रियेत तदा तदङ्गसर्पदर्शनात् भयेन आर्द्रगजचर्मकपालदर्शनात् जुगुप्सया च शृङ्गारप्रतिकूलाभ्यां तत्क्ष्मासम्भवात् न शृङ्गारव्यभिचारिणो साध्वसहासयोरेव व्यञ्जना स्यात्, भयजुगुप्सयोश्च व्यञ्जनासम्भवादित्यत एषाम् औत्सुक्य-दैन्याध्वसहासाना स्वशब्देनाभिधानमित्यर्थ । साध्वसहासयोरपि व्यञ्जनसम्भवात् नात्यन्त प्रातिकूल्यमित्यत प्रायत्वादित्युक्तम् ।

(वि, द) सञ्चार्य्यादेरिति—सञ्चारी व्यभिचारी । आदिपदादनुभाव-विभावौ च । विरुद्धरसीयस्यापि तस्य बलवता वाध्यस्य वाध्यत्वेन कथन विरोधिनो जये यथातथा गुण । प्रशमाज्ञानामिति । शान्तरसस्थार्यीभाव प्रशम । तदज्ञाना तदीयानामित्यर्थ । अभिलाषार्ङ्गेति । अभिलाषो रतिस्तदीयौत्सुक्यादिभिरित्यर्थ । पर्य्यन्त इति । क खलु युवा धन्योऽधर पास्यतनेन व्यङ्क्ष्यतीत्यर्थ ।

(वि, ध) विरोधिनोऽपि इति—विरोधिरसस्यापि सञ्चार्य्यादे स्मरणे स्मर्य्यमाणत्वेन व्यञ्जितस्य वचने साम्येन कथनेऽपि प्रकृतरसेन सह न विरोधो भवेत् । एवमङ्गिन्यङ्गत्वमाप्तयोश्च नान्योन्यविरोध इत्यर्थ । अङ्गिन्यङ्गत्वमाप्तयोरित्यत्र चार्थ पूरणीय ।

(वि, न) अय स इत्यादिक रूपम् । अत्र रसनोत्कर्षादय उद्दीपनविभावा स्मर्य्यमाणास्तदज्ञता । शृङ्गारोऽपि स्मर्य्यमाणो व्यङ्ग्यस्यापि अर्थान्तरत्वेन रसमर्य्यमाणता ।

(लो, ऐ) विरुद्धस्य प्रकृतरसविरुद्धस्य ।

(लो, ओ) आलम्बन, रसमर्य्यमाण ।

---

७ अत्र आलम्बनस्य (शृङ्गाररसस्य) पुनः विच्छेदेन स्मरणात् रति (शृङ्ग-

"सरागया स्रुतघनघर्मतोयया
करा हतिध्वनितपृथूरुपीठया ।
मुहुर्मुहुर्दशनविलङ्घितोष्ठया
रुषा नृपा प्रियतमयेव भेजिरे ॥" (प, औ)

अत्र सम्भोगशृङ्गारो वर्णनीयस्य वीरस्यभिचारिणः क्रोधस्यानुभावसाम्येन विवक्षितः । (फ) *

(वि, प) साम्येन वचने आह—**सरागयेति** । पीठोपविष्टाना राज्ञा युद्धोद्यमार्थं क्रोधस्य वर्णनमिदम् । नृपा रुषा भेजिरे प्रेपेदिरे प्रियतमया इव । अर्थात् क्रुद्धाया रुष क्रुद्धप्रियतमायाः विशेषणान्याह—**सरागयेति** । रुषो रक्तवर्णनं कविसम्प्रदायसिद्धम्, पक्षे तु प्रियतमत्वेन अनुरागयुक्तया क्रोधाधीनलौहित्यभाजा । स्रुतं चरितं घन घर्मतोय राज्ञा यतः, रुषा तादृश्या, स्रुतं निःसृत घनं घर्मतोयं गात्रात् यस्यास्तादृश्या प्रियतमया । **करा हतीति** । राज्ञा कराहत्या पीठध्वननं रुषा प्रयुक्तम् । पीठस्य पृथुत्वं विस्तारः, उरुत्व उच्चत्वं, प्रियतमया तु स्वीयकराहत्या पृथोः स्वोरुदेशरूपस्य पीठस्य घ्वननम् । **मुहुरिति** । दशनोष्ठलङ्घनं नृपकर्तृकं रुषा प्रयुक्तम् । प्रियतमायास्तु स्वकर्तृकम् ।

(वि, फ) **अत्रेति** । एकरसस्थायिभावोऽपि अन्यरसे व्यभिचारिभाव इत्यतो रौद्ररसस्थायिभाव क्रोधोऽत्र प्रकान्तवीररसस्य व्यभिचारिभावस्तद्व्यङ्ग्यस्य प्रकृतवीररसस्य साम्येनात्र सरागत्वादिव्यङ्ग्य सम्भोगशृङ्गारो विवक्षित इत्यर्थः । ननु प्रियतमया इव इत्युक्त्या प्रियतमैव साम्येन विवक्षिता, न तु शृङ्गार इत्यत आह—**अनुभावसाम्येनेति** । वीरशृङ्गारयोर्द्वयोरपि सरागत्वादयोऽनुभावा । तेषामेकशब्दवाच्यत्वरूपसाम्ये तु तद्व्यङ्ग्ययोर्वीरशृङ्गारयोरपि साम्यमित्यर्थ. । यद्यपि "अनुकूलौ निषेवेते यत्रान्योऽन्यं विलासिनौ । दर्शनस्पर्शनादीनि स सम्भोग उदाहृतः ॥"

(लो, औ) रागो लौहित्य प्रेमा च ।

रसस्य स्थायिभाव·) स्थायितामाप्तुमक्षमा । अत. शृङ्गारो नात्र रसः । ततः पूर्वकालीनविलासस्मरणेन शृङ्गारस्यापि स्मरणम् । पूर्वानुभूतै· स्मर्ध्यमाणैर्विलासैः हृस्तस्यातीव स्पृहणीयता प्रतिपाद्यते, तेन च शोभावेश. प्रचुरीकृतो भवति ।

* यथा क्वामिन सानुरागा प्रकाशितमान्मथविकारां कान्तामत्यन्तोपादेयतयाऽनुरागातिशयादङ्गीकुर्वन्ति तथात्र राजान· प्रकाशितस्वलक्षणा रुषमङ्गीचक्रुः इत्यर्थबोधात् सरागादिसाधारणानुभावरूपयोरङ्गयो साम्यविवक्षया अङ्गिनोरपि वीरशृङ्गारयो. रसयो साम्यं विवक्षितम् । अत· शृङ्गाररसोऽत्र उपमानत्वेन वीररसस्याङ्गम् । अतस्तयो रसयोर्न विरोध. ।

"एकं ध्याननिमीलनेन[1] मुकुलप्राय द्वितीय पुन
पार्वत्या वदनाम्बुजस्तनभरे सम्भोगभावालसम्।
अन्यद्दूरविकृष्टचापमदनक्रोधानलोद्दीपित
शम्भोर्भिन्नरस समाधिसमये नेत्रत्रय पातु व ॥"

अत्र शान्तशृङ्गाररौद्रपरिपुष्टा भगवद्विषया रति । (ब, अ) +

यथा वा—

"क्षिप्तो हस्तावलग्न प्रसभमभिहतोऽप्याददानोऽशुकान्त
गृह्णन् केशेष्वपास्तश्रवणनिपतितो नेक्षित सम्भ्रमेण।

इत्येव सम्भोगलक्षणमुक्तम्। तथापि प्रेमाधीनक्रोधदर्शनादावानुकूल्यमस्त्येव, इत्यतोऽत्र सम्भोगशृङ्गार एव।

(वि, ब) अङ्गिनि अङ्गत्वमात्रयोरविरोधमाह—**एकमिति** । समाधिसमये विभिन्नरस शम्भो नेत्रत्रय व पातु। तत्र भिन्नरसत्व दर्शयति—**ध्याननिमीलनेन मुकुलप्रायमिति** । क्वचित्तु ध्याननिमालनात् मुकुलितप्रायमिति पाठ, तदा मुकुलित मुकुलशब्दात् क्वप्रत्ययेन मुकुलतुल्यम् । प्राय पदात्तु अल्पमुकुलम्। अय शान्तानुभाव । **द्वितीयमिति** । वदनाम्बुजस्तनभरे इत्यत्र प्राण्यङ्गत्वात् समाहारद्वन्द्व । अय शृङ्गारानुभाव । **अन्यदिति** । दूरे विकृष्टचापो यो मदन तद्विषये क्रोधानलेनोद्दीपितमित्यर्थ । अत्र रौद्ररसस्थायिभावस्य क्रोधस्य वाच्यत्वेऽप्युद्दीपनेन तदनुभावेन पुनर्व्यञ्जना अपराङ्गतेत्याह—**अत्रेति** । शान्तादिपदमत्र स्थायिपरम्। तेषां विरोधिनामुक्तानुभावैर्व्यङ्ग्यानामपराङ्गत्वेनाविरोध इत्याह—**अत्रेति** ।

(वि, भ) इत्थमङ्गिनि विरोधिना साक्षादविरोध दर्शयित्वा साक्षात् परम्परया तादृशानामविरोधमाह—**यथा वा—क्षिप्त इति** । त्रिपुरदाहे स प्रसिद्ध शाम्भव शरमिर्वो दुरित दहतु। कीदृश हस्तावलग्न सन् साध्वनेनोत्पलाभित्रिपुर-

---

(लो, अ) अत्र शान्तेति—अङ्गिनो भगवद्विषयरतिभावस्य अङ्गभावेन विरुद्धानामपि शान्तादीनां नान्योऽन्यविरोध इति भाव ।

+ अङ्गिनीति तृतीयप्रकारे एकस्मिन्नङ्गिनि विरुद्धयोरङ्गत्व द्विधा भवति (१) राज्ञि विरुद्धसेनापतिद्वयवत् तुल्यकक्षतया, (२) राज्ञि सेनापतिवद्भृत्यवत् परस्याऽङ्गत्वमाश्रित्य वा। तत्राद्येनाविरोधमाह—**एकमिति** । अत्र भगवद्विषयरतिभावस्यैवेत्यन्तपर्यन्तं स एव प्रधानम्। उपभोक्ष्यमानस्य माहात्म्यवर्णेना युक्तेति तत्र शान्तशृङ्गाररौद्ररसाना वर्णनमुपक्रमायेति शान्तादयस्तत्राङ्गम्। एव चैकस्मिन्नङ्गिन्यङ्गभूयमाणा राज्ञ सेनापतीनामिव सामन्तानामिव वा स्वभावतो विरुद्धानामपि नात्र विरोध सम्भवति इति भाव ।

1 'निमीलना-मुकुलितप्रायम' (स ङ)

आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥"(भ)†

अत्र कविगता भगवद्विषया रतिः प्रधानम् । तस्याश्च परिपोषकतया भगवतस्त्रिपुरविध्वंसं प्रत्युत्साहः, तस्य चापरिपुष्टतया रसपदवीमप्राप्ततया भावमात्रस्य करुणोऽङ्गम्, तस्य च कामी वेति साम्यबलादायातः शृङ्गारः । एवं चाविश्रान्तिधामतया करुणस्याप्यङ्गतैवेति । द्वयोरपि करुणशृङ्गारयोर्भगवदुत्साह—

युवतीभिरार्द्रापराधः कामीव क्षिप्तः, एवमंशुकस्यान्तमाददानोऽपि अभिहतः। अपिकारो ह्यत्र भिन्नक्रमे । तथा केशेषु गृह्णन् अपास्तः । कामिपक्षे—चुम्बनार्थं केशग्रहणं तथा चरणनिपाततोऽग्निः सम्भ्रमेण भयेन नेक्षितः । कामी तु चरणनिपतितः संभ्रमेणादरेण यत् ईक्षण तद्विषयो न कृतः । आलिङ्गन् इति स्पष्टम् । अग्निपक्षे—भयात् कामिपक्षे क्रोधादश्रु ।

(वि, म) कविगता कविनिष्ठा प्रधानम्, स दहतु इत्यादि निराकाङ्क्षवाक्यव्यङ्ग्यत्वात् । **तस्याश्चेति** । तस्या. प्रधानस्य भगवदुत्साहस्त्रिपुरं प्रत्याग्नेयास्त्रप्रयोगाद् व्यङ्ग्यः । स च तन्महत्त्वसूचकत्वेन तद्विषयरतिभावस्याधिक्यरूपपुष्टिकारक इत्याह—**परिपोषकतयेति**। उत्साहो रतिभावस्याङ्गमित्यर्थः । तस्योत्साहस्य करुणोऽङ्गमित्यन्वयः । ननु उत्साहो वीररसस्थायिभावः । स चात्र व्यङ्ग्य इयतो वीररस एवात्र प्रधानम्। तत् कथं रतिभावस्य प्राधान्यमुक्तम् इत्यत आह—**तस्य चापरिपुष्टतया** इति । तस्योत्साहस्य साकाङ्क्षवाक्यव्यङ्ग्यत्वेन दहतिति निराकाङ्क्षवाक्यव्यङ्ग्यकविभावाङ्गत्वेनाऽप्राधान्यरूपया अपरिपुष्टतया रसपदवीमनाप्ततया भावमात्रस्य स्थायिभावस्येत्यर्थः । **करुण** इति । त्रिपुरयुवतीना शोच्यावस्थाव्यङ्ग्यः करुण इत्यर्थः । भगवदुत्साहेन एव तासा शोच्यावस्थाप्रापणात् तद्व्यङ्ग्यः करुणः तत्पुष्टिकारकोऽङ्गमित्यर्थः । **तस्य चेति**। अस्य करुणस्य इत्यर्थः । शृङ्गारोऽङ्गमित्यन्वयः । तस्याङ्गता च उपमानोपमेयप्रकर्षणात् । इत्थं भगवदुत्साहपुष्टस्य भगवद्विषयकविभावस्य साक्षात्परम्पराभ्यामङ्गभूतौ करुणशृङ्गारौ विरोधिस्वरूपौ अपि अविरुद्धौ इति दर्शयति—**एवं चाविश्रान्तीति** । अविश्रान्तिधामतया साकाङ्क्षतयाऽऽश्रयतया, अविसाक-

(लो, इ) अपरिपुष्टतया विभावादिभिरित्यर्थः । भावमात्रस्य इत्यत्र हेतुः । रसपदवीमप्राप्तत्वमङ्गत्वादित्यर्थः । साम्यबलादायातः गदशब्दविशेषणमहिम्ना प्राप्तः । करुणस्येति । करुणस्य शृङ्गारापेक्षयाऽङ्गित्वेऽपि भगवदुत्साहस्याङ्गत्वादेवेत्यर्थः । तस्यात्र शृङ्गाररसस्य "अयं स रसनोत्कर्षी"त्यादिपूर्वोक्तदिशा स्पर्ध्यमाणतयांशभूतत्वेनापि व्यर्तीकरणेन न विरोधः । तथा हि यागां त्रिपुरयुवतीनां प्रणयरोषनिवारणार्थं

† तृतीयप्रकारस्य द्वितीयभेदं—साक्षात् प्रधानाङ्गस्य परम्परया (अङ्गारगिभावेन) तदङ्गेनाप्यविरोधं दर्शयति—क्षिप्त इति । अपराधः तत्फलकृतापराधः ।

परिपुष्टतद्विषयरतिभावास्वादाप्रकर्षकतया यौगपद्यसम्भावादङ्गत्वेन न विरोधः। (म, आ) ×

ननु समूहालम्बनात्मकपूर्णघनानन्दरूपस्य रसस्य च तादृशेनेतररसेन कथं विरोधः सम्भावनीयः, एकवाक्ये निवेशप्रादुर्भावयौगपद्यविरहेण परस्परोपमर्दैकत्वानुपपत्तेः। (य)

क्तयेति यावत्। भगवदुत्साहस्तु अङ्गमपि भावस्याविरोधित्वात् तद्विरोधो न दर्शितः। ननु स्मर्य्यमाणविभावादिव्यङ्ग्यस्य रसस्यापि, स्मर्य्यमाणस्य विभावादिसाम्यस्य विवक्षाधीनविवक्षितसाम्यस्य अङ्गिरसेन सह विरोधप्रसक्तावपि न विरोध इत्युक्तम्, अङ्गिरसेन सह विरोधप्रसक्तिरेव नास्तीत्याशङ्कते—

(वि, य) ननु इति। **समूहालम्बनेति**—प्रपानकरसन्यायाच्चर्व्यमाणो रसो भवेदित्यनेनोक्तस्य विभावादिसमूहालम्बनात्मकस्य निराकाङ्क्षवाक्यव्यङ्ग्यत्वेनाकाङ्क्षापूर्त्या पूर्णस्य घनस्य विषयान्तराऽग्रहणे निविडस्याऽऽनन्दरूपस्य रसस्य अङ्गिरसस्य तादृशेन स्मर्यमाणेन विवक्षितसाम्येन वा रसेन सह कथं विरोधः सम्भावनीय इत्यर्थः। असम्भावनायां हेतुमाह—**एकवाक्ये** इति। अङ्गिरसस्तावन्निराकाङ्क्षविधेयवाक्यात् प्रादुर्भवति। स्मर्यमाणोपमानयोस्तु साकाङ्क्षोद्देश्यवाक्ययोरेव प्रादुर्भावेण एकवाक्यप्रादुर्भावरूपयौगपद्यविरहेण परस्परोपमर्दैकत्वानुपपत्तेरित्यर्थः। तुल्यबलत्वाभावेन प्रधानभूतेन निराकाङ्क्षविधेयवाक्येन व्यङ्ग्यतया प्रधानेन अङ्गिरसेन बलवता स्मर्यमाणोपमान-

---

वामी निराकृतहस्तग्रहणानि कृतवान्। तास्वेव निष्करुणासु शाम्भवः शरान्निस्तथा चेष्टितवानिति सादृश्यसंदर्शनात् स्मर्य्यमाणेनेर्ष्याविप्रलम्भेन करुणः प्रत्युत पुष्टिं नीतः। तेन च त्रिपुरारिप्रभावातिशयपरिपुष्टस्तद्विषयरतिभावः परिपोषं नीयते।

(लो, ६) ननु समूहेत्यादि—यदि रसयोर्विरोधः स्यात्, यदि वा अङ्गाङ्गिभावः स्यात्। नत्वेतत्प्रकारद्वितयमपि रसयोः सम्भवति। कथं विरोधो न सम्भवतीत्याह—परस्परोपमर्दैकत्वानुपपत्तेः। परस्परोपमर्दैकत्वं कथमनुपपन्नमित्याह—**एकवाक्येति**—एकवाक्यनिर्देशे च प्रादुर्भावस्यैकवाक्यनिर्देशहेतुकस्य यौगपद्यस्य

---

* करुणोऽङ्गमिति—करुणोद्दीपनविभावस्य त्रिपुरस्त्रीवृन्दस्य त्रिपुरारिप्रभावातिशयाधीनत्वादिति भावः। एवं च त्रिपुरारिप्रभावातिशयस्य त्रिपुरारिविषयकरतिभावोद्दीपनविभावत्वात् अङ्गिनि त्रिपुरारिविषयकरतिभावे करुणोऽङ्गमिति भावः। शृङ्गारापेक्षया करुणस्य प्रधानत्वेऽपि तत्र पर्य्यवसान नास्ति—तेनाऽपि भावप्रकर्षणादिति करुणोऽङ्गम्। पूर्वं प्रणयी यथा करावलम्बनादिकमकरोत्तदेदानीं शम्भुशरास्त्रीरित्युपमानभावेन पूर्वावस्थाप्रतीतेरुपकत्वेन च शृङ्गारः करुणस्याङ्गं सन् परम्परया प्रधानस्य भावस्याङ्गमिति विरोधिनोरप्यनयोः शृङ्गारकरुणयो राज्ञि सेनापतितद्भृत्ययोरिव प्रधानेऽङ्गभावेन विरोधो नैव सम्भवतीत्यर्थः।

नाप्यङ्गाङ्गिभावः, द्वयोरपि पूर्णतया स्वातन्त्र्येण विश्रान्तेः । (र, इ) सत्यमुक्तम् ।

अतएवात्र प्रधानेतरेषु रसेषु स्वातन्त्र्यविश्रामराहित्यात् पूर्णरसभावमात्राच्च विलक्षणतया सञ्चारिरसनाम्ना व्यपदेशः प्राच्यानाम् । अस्मत्पितामहानुजकविपण्डितमुख्यश्रीचण्डीदासपादानां खण्डरसनाम्ना । (ल, ई) यदाहुः—

योरेव उपमर्दनादिति भावः । न चायं स रसनोत्कर्षादौ निराकाङ्क्षवाक्यैरेव स्मर्यमाणश्रृङ्गार इति वाच्यम् । रसनोत्कर्षादिकरोऽयं हस्तः पतित इत्येवं विधेयपातित्यसाकाङ्क्षत्वादेव । तेषां विधेयपातित्वं तु करुणव्यञ्जकमेव शृङ्गारस्य व्यङ्ग्यत्वेऽपि परोक्षत्वादेव स्मर्यमाणतोपचार इति बोध्यम् ।

(वि, र) इत्थं स्मर्यमाणोपमानयोर्विरोधाप्रसक्तिं दर्शयित्वा अङ्गिन्यङ्गत्वमात्रयोरङ्गाङ्गिभावासम्भवमेवाशङ्कते—**नाप्यङ्गाङ्गिभाव** इति । **द्वयोरपि** इति । शृङ्गारकरुणयोर्विरोधिनोरित्यर्थः । **स्वातन्त्र्येणेति** । खिन्न इत्यादिवाक्यानां कामीव इत्यादिवाक्यस्य च निराकाङ्क्षत्वेन तद्व्यङ्ग्यत्वादित्यर्थः । स्वातन्त्र्यमेव च पूर्णता, आकाङ्क्षायाः पूर्णत्वात् ।

(वि, ल) समाधत्ते—**सत्यमिति** । एकवाक्यव्यङ्ग्यत्वाभावेऽपि द्वयोर्निराकाङ्क्षवाक्यव्यङ्ग्यत्वेऽपि च शृङ्गारवति करुणाऽप्रतीत्या विरोधाप्रसक्तिरस्त्येव । किन्तु स्मर्यमाणशृङ्गारापेक्षया अनुभूयमानस्योपमानशृङ्गारापेक्षया उपमेयस्य च करुणस्य पार्यन्तिकप्रतीतिविषयतया प्राधान्यम् । एवं करुणापेक्षया भगवति कविभावस्य च पार्यन्तिकप्रतीतिविषयत्वेन प्राधान्यम् । इत्थं तादृशप्रधानेतरेषु करुणेतरत्र शृङ्गारे भावेतरत्र करुणे श्लोकान्तरे चान्येतरत्र अन्यस्मिन् रसे च पार्यन्तिकप्रतीतिविषयतारूपस्वतन्त्रविश्रान्तिराहित्यात् तद्वशेन पूर्णरसभावमात्रान्मुख्यरसात् विलक्षणतया व्यपदेशविशेष इत्यर्थः । खण्डरसनाम्नेत्यत्रापि व्यपदेश इत्यन्वयः ।

विरहात् । अयमर्थः—यौगपद्यं हि एकवाक्यनिर्देशेनैव सम्भवति । स तु रसयोर्न सम्भवति, अत्र हेतुः—समूहेति । अयमर्थः, द्विरुक्तप्रत्ययेन 'विभावादिसमूहालम्बनत्वात् । विभावादिसामग्री खलु एकवाक्यस्यार्थः । एका च सामग्री कथं विरोधिनोर्द्वयोरपि स्यात् । कथमेकवाक्यहेतुकं परिपूर्णत्वं स्यात् । घनशब्दो हि निरन्तरीयानवच्छिन्नप्रवाहत्वम् । अङ्गाङ्गिभावासम्भवे हेतुमाह—नापीति । अङ्गाङ्गिभाव उपकार्योपकारित्वम् ।

(लो, इ) सिद्धान्तमाह—**सत्यमुक्तमिति** । अत एव विरोधस्य अङ्गाङ्गिभावस्य चासम्भवात् । मात्रमात्रेतरत्वेन चात्मनः स्वसामग्रीपरिपुष्टतया ।

("अङ्गं बाध्योथ संसर्गाद् यद्यङ्गी स्याद्रसान्तरे ।
नास्वाद्यते समग्रं यत्ततः खण्डरस· स्मृतः ॥" इति ।) (व, उ)

ननु—

"आद्यः करुणबीभत्सरौद्रवीरभयानकै·"
इत्युक्तनयेन विरोधिनोर्वीरशृङ्गारयो कथमेकत्र (श, ऊ)
"कपोले जानक्याः करिकलभदन्तद्युतिमुषि
स्मरस्मेरस्फारोद्गमरपुलकं वक्त्रकमलम् ।
मुहुः पश्यन् शृण्वन् रजनिचरसेनाकलकल
जटाजूटग्रन्थि द्रढयति रघूणां परिवृढ ॥"
इत्यादौ समावेशः । (ष)

(वि, व) चण्डीदासोक्ते खण्डरसव्यपदेशे योगार्थवशात् संवादमाह—अङ्गमिति । बाध्यो यो रसः सोऽङ्गबाध्यत्वमेव । कीदृशमित्यत्राह—अथ संसर्गादिति । अथ सम्बोधने । एकपदयोध्यतारूपात् संसर्गात् यदि रसान्तरे अङ्गप्रकर्षकं स्यात्तदा बाध्य इत्यर्थ । योगार्थविशेषवशात् खण्डरसव्यपदेश इत्याह—नास्वाद्यत इति । पार्यन्तिकप्रतीतिविषये एव समग्रास्वाद इति भाव । इत्थं पार्यन्तिकप्रतीतिविषयस्य बाधकत्वम् । अतथाभूतस्य च बाध्यत्वं खण्डरसत्वं च इत्युक्तम् ।

(वि, श) यत्र तु कपोले जानक्या इत्यत्र विरोधिनो· शृङ्गारवीररसयोर्नेदृशो बाध्यबाधकभावस्तत्र तयो कथं सन्निवेश इत्याशङ्क्य तु वीरशृङ्गारयोर्विरोधं परोक्षं दर्शयति—नन्वाद्य इति । आद्य शृङ्गारः करुणादिभयानकान्तैर्विरुध्यते इति वाक्यान्तरे । इत्युक्तनयेन विरुद्धयोः कथमेकत्र वीरशृङ्गारयोः सन्निवेश इत्यन्वयः ।

(वि, ष) कपोल इत्यादि । श्लोकार्थस्तु रघूणा परिवृढ प्रभु राम. जानक्या वक्त्रकमल मुहु· पश्यन् रावणादिरजनिचरसेनाकलकलं शृण्वन् जटाजूटस्य जटासमूहस्य ग्रन्थि द्रढयति । वक्त्रकमलं कीदृश करिकलभदन्तद्युतिमुषि कपोले स्मरेण जानकीनिष्ठेन रामविषयस्मरेण स्मेरः हर्षप्राय· स्फारो विस्तृतः उद्गमरो बाहुल्यात् उद्भट पुलको यस्य तादृशं वक्त्रकमलम् इत्यर्थ । अत्र जानकीमुखदर्शनव्यङ्ग्य. शृङ्गारः । जटाजूटद्रढनव्यङ्ग्यो वीररसश्च परस्परमबाध्यताम् अनङ्गता चापयोः स्वातन्त्र्येण उपलभ्येते । तत् कथमनयोरेकत्र रसावेश इत्यन्वय ।

(लो, उ) यद्यङ्गी रस अपरिपुष्टतया मात्रमात्रवैलक्षण्येनापानतमात्रतः प्राधान्येनाभिव्यक्त सन्न नास्वाद्यत इति परतन्त्रत्वात्, न्यूनाङ्गरसमर्प्रकत्वात्, रसमपुष्टत्वाच्च ।

(लो, ऊ) आद्य. शृङ्गार । कथमेकत्र यस्य उपरिस्तनेनन्यादौ सन्निवेश इत्यनेन सम्बन्ध. ।

अत्रोच्यते—इह खलु रसानां विरोधितायाः अविरोधितायाश्च त्रिधाप्यवस्था। कयोश्चिदालम्बनैक्येन कयोश्चिदाश्रयैक्येन कयोश्चिच्चैरन्तर्य्येण इति। तत्र वीरशृङ्गारयोरालम्बनैक्येन विरोधः। तथा हास्यरौद्रवीभत्सैः सम्भोगस्य। वीरकरुणरौद्रादिभिर्विप्रलम्भस्य। आलम्बनैक्येन आश्रयैक्येन च वीरभयानकयोः। नैरन्तर्य्यविभावैक्याभ्यां शान्तशृङ्गारयोः। त्रिधाप्यविरोधो वीरस्याद्भुतरौद्राभ्यां शृङ्गारस्याद्भुतेन भयानकस्य बीभत्सेनेति। तेनात्र वीरशृङ्गारयोर्भिन्नालम्बनत्वाच्च विरोधः। (ऋ)

एवं च वीरस्य नायकनिष्ठत्वेन भयानकस्य प्रतिनायकनिष्ठत्वेन निबन्धे भिन्नाश्रयत्वेन विरोधः। (स, ऋ) ×

यत्तु नागानन्दे प्रशमाश्रयस्यापि जीमूतवाहनस्य मलयवत्यनुरागो दर्शितः तत्र "अहो गीतमहो वादित्रम्" तस्यान्तरानिवेशनाच्चैरन्तर्य्याभावाच्च

(वि, स) स्वतन्त्रयोरनेकयोरेकावलम्बनकत्वे एव विरोधः। प्रकृते तु जानक्यालम्बनकः शृङ्गारो, रजनीचरालम्बनकस्तु वीररस इत्यविरोध इति समाधास्यन् आह—**अत्रोच्यते। इह खल्विति**। नैरन्तर्य्येण अव्यवधानेन। तत्र यस्य येन सह विरोधस्तं दर्शयति—**तत्र वीरशृङ्गारयोरिति**। एतानि स्पष्टानि।

(वि, ऋ) ननु शान्तशृङ्गारयोर्नैरन्तर्य्ये विरोधश्चेत् कथं नागानन्दे न तथा निबद्धमित्यत आह—**यत्त्विति**। **अद्भुतस्येति**। रसनामनापन्नोऽद्भुतो अहोशब्दवाच्योऽपि अन्तरास्थितो नैरन्तर्य्यविघटक इत्यर्थः।

(लो, ऋ) स्मारो बहुलः उद्दामर उत्कटः। परिवृढः प्रभुः। त्रिधाप्यालम्बनेत्यादिना कपोले जानक्या इत्यादौ भिन्ने आलम्बने वीरस्य रजनीचरसेना, शृङ्गारस्य जानकीति।

(लो ऋ) नायकनिष्ठत्वं भयानकस्य प्रतिनायकनिष्ठत्वम्।
यथा मम—प्रौढामादाय भीतिं मनसि सरभसं प्राप्य लोकापकीर्तिं
नैव स्तोकाऽप्यपेक्षाऽक्रियत पथि पथि प्राकृतानासु प्रियासु।
धीमन्निःशङ्कभानोः गगनपरिसरद्भीमनिःसीमरोना-
निःशङ्कस्वानराङ्कुलनगरगतां पद्मगौडेश्वरेण।)
अत्र वीरभयानकयोरेकाश्रयाभावान्न विरोधः।

× ग्रन्थे यस्य नायकस्याऽप्रितया वीररसो वर्णितस्तस्य वचनान्तरेऽपि भयानकवर्णने दोषप्रसङ्गः अतोऽनयोरेकाश्रये विरोध

शान्तशृङ्गारयोर्विरोध । एवमन्यदपि विज्ञेयम् ।(ह, लृ)

"पाण्डु क्षाम वदनम्" इत्यादौ च पाण्डुतादीनामङ्गभाव करुण[1] विप्रलम्भेऽपीति न विरोध । (क, ए) ×

(वि, क) ननु परिपन्थिरसाङ्गस्य विभावादे परिग्रहो दोष इत्युक्तम्, तत्कथम्

"पाण्डु क्षाम वदन हृदय सरस तवालस च वपु ।
आवेदयति नितान्त क्षेत्रियरोग सखि हृदन्त ॥"

इत्यादौ शृङ्गाररसीये मालतीमाधवीये श्लोके शृङ्गारपरिपन्थिकरुणानुभावस्य वदनपाण्डुतादे सत्त्वेऽपि अदुष्टतानुभव इत्यत आह—**पाण्डु क्षामम्** इति। मालतीं प्रति लवङ्गिकाया इय पृच्छा। हे सखि ! तव पाण्डुक्षामवदनादिक तव हृदन्त[1] क्षेत्रियरोगम् अस्मिन् क्षेत्रे शरीरेऽचिकित्स्य रोगमावेदयतीत्यर्थ । क्षाम क्षीण, सरस सस्वेदद्रवम् । समाधत्ते—**पाण्डुतादीनामिति** । परिपन्थिमात्रीयत्वे एव दोष । उभयीयत्वे तु प्रकरणसाचिव्यात् प्रकृतरसबोधात् न दोष इति भाव ।

(लो, लृ) शान्तशृङ्गारयोर्नैरन्तर्य्यविरोधिनोर्न परप्रबन्धे यावदेकस्मिन्नपि वाक्ये विरोध । यथा—

(भूरेणुदिग्धाञ्जवपारिजातमालारजोवासितबाहुमध्या
गाढ शिवाभि परिरभ्यमाणान् सुराङ्गनाश्लिष्टभुजान्तराला ।
सशोणितै कव्यभुजा स्फुरद्भि पत्रै खगानामुपवीज्यमानान्
सवीजिताश्चन्दनवारिसेकै सुगन्धिभि कल्पलतादुकूलै ।
विमानपर्य्यङ्कतले निषण्णा कुतूहलाविष्टतया तदानीम्
निर्दिश्यमानान् ललनाङ्गुलिभिर्वीरा स्वदेहान् पतितानपश्यन् ।)

अत्र वीभत्सशृङ्गारयोर्वीररसस्यान्तरा निवेशनान्न विरोध । एवमन्येषामपि रसाना परिहारप्रकारा सत्कविकाव्येषु अनुसर्त्तव्या ।

(लो, ए) अङ्गभावोऽनुभावतयेत्यर्थ । यदि खलु पाण्डुत्वादीना विप्रलम्भापेक्षयाधिका करुणाङ्गता भवेत् तदैव दोष स्यादित्यर्थ । इति उक्तप्रकारात् ।

---

* उत्कटरागलक्षण शृङ्गार । रागप्रशमलक्षण शान्त । अतोऽनयोरेकदा स्थितिर्नैव सम्भवति परस्परविरुद्धत्वात् । अतस्तयो कालिको नैरन्तर्य्यकृतो विरोध । भिन्नकाले तु नैरन्तर्य्याभावान्न दोष ।

× "क्षेत्रियच परक्षेत्रे चिकित्स्य " इति सूत्रेण निपातनात् सिद्धम् । सख्या इयमुक्ति । अत क्षेत्रमन्यत् शरीरम् । तच्च सन्ततभावनया एकान्ततालाभात् तदेव शरीरान्तरम् । तत् प्राप्तौ तु चिकित्सनीयोऽय रोग इत्यमी पाण्डुत्वादय आवेदयन्तीत्यर्थ ।

1 'णवद्दविअ (ग घ)।

अनुकारे च सर्वेषां दोषाणां नैव दोषता[1] ॥ ३१ ॥

सर्वेषा दु श्रुत्वप्रभृतीनाम् । यथा—

"एष दुरुच्यवन नौमीत्यादि जल्पति कश्चन ।"

अत्र दुरुच्यवनशब्दोऽप्रयुक्त । (स्व)

अन्येषामपि दोषाणामित्थोचित्यान्मनीषिभिः ।

अदोषता च गुणता ज्ञेया चानुभयात्मता ॥ ३२ ॥

अनुभयात्मता अदोषगुणात्मता । (ग, घे)

इति साहित्यदर्पणे दोषनिरूपणो नाम सप्तम परिच्छेद ॥

(वि, स्व) अनुकारे अनुकरण । एष इति । एष कथन इत्यन्वय ।

(वि, ग) इत्थंचित्यात् एवम् औचित्यात्, अदोषता गुणता इति । तथा ऽदोषतामात्रं पर्यवस्यति । अनुभयात्मतां व्याचष्टे—अदोषगुणेति । अदोषता अगुणता च इत्यर्थ । दोषतागुणतयोर्व्यतिरेको हि न दोषता न गुणता । दोषतासहितगुणत्व-सत्त्वेऽपि उभयाभावसत्त्वात् यथा—प्रहेलिकाक्रियाकर्मकर्तृगुप्त्यादौ कष्टार्थतायां ।

इति श्रीमद्वेश्वरतर्कालङ्कारभट्टाचार्यकृताया साहित्यदर्पणटीकाया दोष-निरूपणाख्यसप्तमपरिच्छेदस्य विवरणम् ।

(लो, घे) अदोषता "औन्मुक्येन कृतत्वरा" इत्यादिवद् । गुणता "ब्रह्मार्य" मित्यादिवत् । अदोषगुणात्मता "तिष्ठेत् कोपवशा"दित्यादिवत् ।

इति साहित्यदर्पणलोचने दोषनिरूपणो नाम सप्तमपरिच्छेद ।

अत्र पाण्डित्यादीनामनुभावाना विरोधिकरणाङ्गतया विरुद्धत्वेऽपि विप्रलम्भे साधारण-त्वादविरोध इति भाव ।

1 'सम्भव' (ग. घ)

माधुर्य्यमोजोऽथ प्रसाद इति ते त्रिधा ॥ २ ॥ (इ)

ते गुणाः । तत्र—

चित्तद्रवीभावमयो ह्लादो माधुर्य्यमुच्यते ॥ ३ ॥ (ग, ई) (२)

यत्तु केनचिदुक्तम् "माधुर्यं द्रुतिकारणम्" इति, तत्र । द्रवीभावस्यास्वाद-स्वरूपाह्लादाभिन्नत्वेन तत्कार्य्यत्वाभावात् । (घ)

द्रवीभावश्च स्वाभाविकानाविष्टत्वात्मककाठिन्यमन्युक्षोभादिदृष्टतदीयत्व-

---

(वि, ग) माधुर्य्यलक्षणमाह-चित्तद्रवीति-मयट्प्रत्ययोऽत्र स्वार्थे आह्लाद इत्यत्र आह्लादविशेषवृत्तिः । स च आह्लादविशेषे रत्यादिज्ञानानन्दजातः स्वादनाख्यव्यापारमात्रो रसस्वरूपः तद्वृत्तिः न तु तादृशाह्लाद एव माधुर्य्यं, तदा तस्य रसधर्मत्वानुपपत्तेः तथा च चित्तद्रवीभावस्वरूपाह्लादवृत्तिः तादृशाह्लादतावच्छेदको धर्मो माधुर्य्यमित्यर्थः ।

(वि, घ) काव्यप्रकाशदुक्तं दूषयितुमाह—यत्त्विति । आह्लादकत्वं माधुर्य्यं शृङ्गारे द्रुतिकारणमिति तल्लक्षणम् । स च रसस्वरूपाह्लादजनकतावच्छेदको रत्यादिनिष्ठो धर्म इत्यर्थः । रत्यादेरेव रसताप्राप्त्या तस्य रसवृत्तित्वमपि; स एव धर्मो मनसो द्रुतिकारणमित्यर्थः । तद्दूषयति—तत्रेति । द्रवीभावस्येति—स्वेन स्वाश्रयाजननादिभावः । एतच्च द्रवीभावाह्लादयोरभेदं स्वयमभ्युपेत्य दूषितं च । तन्मते तु द्रवीभावश्चित्तवृत्तिराह्लाद आत्मवृत्तिरित्यनयोरभेद एव नास्ति । किन्तु आह्लादरूपेण माधुर्य्येण चित्तस्य द्रवीभावो जन्यत एव रागमाधुर्य्येणेवेति

(वि, ङ) आस्वादरूपाह्लादाभिन्नत्वेन उक्तं द्रवीभावं दर्शयति—द्रवीभावश्चेति । चित्तस्याविष्टत्वमेव हि द्रवीभाव । अनाविष्टता तु तस्य स्वाभाविकी तदात्मकं

रसोत्कर्षकत्वं माधुर्य्यादिगुणेषु उपचर्य्यत इति दर्शितं प्रथमपरिच्छेदे ।

(लो, इ) त्रिधा प्राचीनोक्तस्य प्रत्येकं दशप्रकारस्य निराकरिष्यमाणत्वात् ।

(लो, ई) ह्लादो ह्लादस्वरूप· तस्य तद्भिन्नत्वस्योक्तत्वात् । इह चास्वादस आनन्दपरपर्य्यायत्वेन स्वादसाधारणत्वात् चित्तद्रवीभावमय इत्यनेनाव्याप्तिपरिहारः

(लो, उ) स्वाभाविकेति—स्वाभाविकं सहजम् अनाविष्टत्वमनावेशोऽर्थात् शौर्य्यं ज्ञानविशेषः । पुरुषोत्कर्षहेतुत्वेन शौर्य्यादयो गुणा आत्मनश्चेतनस्यैव धर्मा एव नाऽचेतनस्य शरीरस्य धर्माः । तद्वत् काव्यस्य शब्दार्थौ शरीरं रसश्चात्मा । शौर्य्यादयो यथेति रसधर्मा एव गुणाः । आत्मधर्मेष्वेव गुणव्यवहारो मुख्यः सत्यपि शरीरसौन्दर्य्यादौ, शौर्य्यपाण्डित्यादिरहिते निर्गुणव्यवहारात् ।

* ह्लादः सुखपर्य्यायः; तत्कारित्वं यद्यपि सर्वरससाधारणं तथापि ह्लादपदेनात्र सुखविशेष उच्यते । स च इक्षुक्षीरादिमाधुर्य्यमिव स्वरूपेण वक्तुमशक्यः । चित्तस्य द्रवीभावो नाम मनसः स्नेहमूलसुखातिशयतः कश्चिदार्द्रतारूपो विकारः ।

विस्मयहासाद्यपहितविक्षेपपरित्यागेन रत्याद्याकारानुविद्धानन्दोद्बोधेन सहृदयचित्तार्द्रीभावत्वम्[1]। (ङ, ङ)

तच्च—

सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ॥ ४ ॥ (च, ऊ)

सम्भोगादिशब्दा उपलक्षणानि। तेन सम्भोगाभासादिष्वप्येतस्य स्थितिर्ज्ञेया।

मूर्द्धन्यैर्वर्गान्त्यवर्णेन युक्ताष्टठडढान् विना
रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः।
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा ॥ ५ ॥ (छ, ऋ) ×

यत्काठिन्य तज्जन्यौ यौ शत्रुमारणोत्साहरूपमन्युक्रोधौ तदादिकृत्वा ये उष्णप्रायत्वरूपदीप्तत्वविस्मयहासास्तदाद्युपहितो यश्चित्तस्य विक्षेपश्चाञ्चल्य तत्परित्यागेन अर्थात् चित्तस्याविष्टत्वेन यो रत्याद्याकारानुविद्धो रत्यादिविषयपरिणामेन ज्ञानरूपानन्दस्तदुद्बोधेन सहृदयचित्तस्यार्द्रीभाव द्रवीभाव इत्यर्थ। एतत्सिद्धान्तस्तु आह्लादस्य मनोवृत्तित्वस्वीकारे एव सम्भवतीत्यवधेयम्। अन्यथा द्रुत्याह्लादयोरभेदोक्तयनुपपत्ते। रत्याद्याकारेत्यत्र आदिपदात् माधुर्य्याभ्ययो करुणशान्तयो स्थायिभावस्यापि परिग्रह। एव च रत्यादिज्ञानानन्दजन्याह्लादविशेष एव रस। स एव स्वादनाख्यव्यापारगम्य प्रागुक्तो रस इत्युक्त, तद्वृत्तिधर्मविशेषो माधुर्य्यमिति सिद्धान्तसिद्ध।

(वि, च) **तच्चेति**—तच्च माधुर्यमित्यर्थ। क्रमात्तदाधिक्यं सम्भोगादौ क्रमशश्चित्तद्रुत्याधिक्यात्।

(वि, छ[1]) तद्व्यञ्जकान् वर्णानाह—**मूर्द्धन्यैरिति**। वर्गान्त्यवर्णेन पञ्चमेन युक्ता इत्यन्वय। तत्रैव टठडढान् पर्युदस्यति। तकारस्तु तन्मूर्द्धन्यै अपर्य्युदस्त।

चित्तस्य एव तत्स्वरूप काठिन्य, तथा वीरादाविव मन्युक्रोधादिजन्य दीप्तत्वम्, एव अद्भुतादाविव विस्मयहासयुक्तो यो विक्षेपस्तेषा परित्यागेन परिहारेण। एतस्य माधुर्याख्यगुणस्य।

(लो, ऊ) **शान्तेऽधिकमिति**। तस्य सहजानन्दसुन्दरतया माधुर्य्य प्रायेणेति प्रकृष्टमेव। क्वचित्तु विषयजुगुप्साद्यनुगमे भेद।

(लो, ऋ) मूर्द्धन्यैरिति वर्गा कादयो मावसाना पञ्च पञ्च भूत्वा पञ्चवर्गा तेषामन्त्या उच्चारणसमा तैर्मूर्द्धन्यै स्थितैर्युक्ता अर्थात् निजवर्गीया एव। ट ठ ड ढाः

× अत्र वर्णास्त्रिविधा, विहिताविहितनिषिद्धभेदात्। लघ्वन्तरितौ रणौ मूर्द्धस्थितनिजवर्गान्त्यगता स्पर्शाश्च विहिता। टवर्गा निषिद्धा, अन्ये अविहिता। निषिद्धानां बाहुल्येनोपादान तु दोष।

1 'स्य' (इति ख पु)

यथा—

"अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्गय ।
जनयन्ति मुहुर्यूनामन्त सन्तापसन्ततिम् ॥" (ज) +

यथा वा मम—

"लताकुञ्ज गुञ्जन् मदवदलिपुञ्ज चपलयन्
समालिङ्गन्नङ्ग द्रुततरमनङ्ग प्रबलयन्[1] ।
मरुन्मन्द मन्द दलितमरविन्द तरलयन्
रजोवृन्द विन्दन् किरति मकरन्द दिशि दिशि ॥ (झ, ञ)

ओजश्चित्तस्य विस्तारूप दीप्तत्वमुच्यते ।

तद्व्यक्तौ माधुर्य्यस्य व्यञ्जने कारणतामित्यन्वय । अवृत्तिरसमास । रचना सन्धि तस्य च तदुत्पन्नवर्णमाधुर्य्यवशादेव माधुर्य्यवर्णत्वेन प्राप्तावपि सन्धौ अपि तादृशा वर्णा न ऊहाया इति कव्युपदेशार्थं पृथगुक्तम् ।

(वि, ज) अनङ्गेत्यादि उदाहरणे सन्ध्युत्पन्नतादृशवर्णौ, सन्तापसन्ततिमि त्यत्र उपसर्गधात्वो सन्धौ द्वावेव ।

(वि, झ) अतो बहून् तादृशान् वर्णान् दर्शयितुमाह—**यथा वेति** । मरुन् दिशि दिशि मकरन्द किरति, कीदृश , गुञ्जता मदवतामलीना पुञ्जो यत्र तादृश लताकुञ्ज मन्द मन्द चपलयन् । अङ्गम् अर्थात् त्वा समालिङ्गन् । 'अनङ्ग च द्रुततर प्रबलयन् प्रकृष्ट बलवन्त कुर्वन् । स्वेनैव दलित विकासितमरविन्द तरलयन् । रजोवृन्दम् अर्थात् विकसितारविन्दाना परागसमूह विन्दन् लभमान (विद्लृ लाभे) अत्र सन्धावपि बहवो वर्णा उक्तरूपा ।

(वि, ञ) ओजोलक्षणमाह—**ओजश्चित्तस्येति** । अत्रापि दीप्तत्वजनक- मित्येवार्थ । आयुर्घृतमितिवत्, तथा च रसवृत्तिना ओजसा चित्तस्य विस्तारूप दीप्तत्व जन्यत इत्यर्थ । अत एव चित्तस्य विस्तारूपदीप्तत्वजनकमोज इति काव्य

न तु अन्तिमवर्णेन युक्ता न च स्वरूपावस्थिता अपि । रणौ लघुह्रस्वान्तरितौ, तस्य माधुर्य्यस्य व्यक्तौ, एवमसमासा मन्दसमासाश्च । मधुरा पदान्तरयोगे माधुर्य्यवती ।

(लो, ञ) लताकुञ्चमित्यादौ विधानमात्रवर्णनेऽपि शृङ्गार प्रकरणात् ।

+ अनङ्गस्य कामस्य मङ्गलभुवो माङ्गलिकजन्मस्थानानि तस्या नायिकाया अपा ङ्गस्य भङ्गयो व्यापारा । यूनामन्त करणे मुहु सन्तापसन्ततिं दु खधारा जनयन्ति । अत्र प्रथमार्द्धे कवर्गान्तिमवर्णेङकारे सयुक्तास्तद्वर्गीयगकारा । द्वितीयार्द्धे तवर्गान्तिमवर्णे नकारेयुक्तास्तकारा ।

1 प्रचलयन् (ख पु)

वीरवीभत्सरौद्रेषु क्रमेणाधिक्यमस्य तु ॥ ६ ॥ (ज) ×

अस्य ओजस । अत्रापि वीरादिशब्दा उपलक्षणानि । तेन वीराभासादावप्यस्यावस्थिति ।

वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ ।
उपर्य्यधो द्वयोर्वा स-रेफष्टठडढैः सह ।
शकारश्च पकारश्च तस्य व्यञ्जकताङ्गताः ।
तथा समासबहुला घटनौद्धत्यशालिनी ॥ ७ ॥ (ट)

यथा चञ्चद्भुजेत्यादि । (ट)

चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः ।

प्रकाशकृताऽप्युक्तम् । विस्तारस्तु चित्तस्य उष्णप्रायत्वकारक आत्मसयोगविशेष । यथाश्रुते तु चित्तवृत्ते दीप्तत्वस्य रसवृत्तित्वानुपपत्ते । क्रमेणाधिक्यमिति दीप्तत्वरूपफलाधिक्याद् आधिक्यम् ।

(वि, ट) तद्व्यञ्जकानाह—**वर्गस्येति** । **तदन्तिमौ** इति । आद्यतृतीययोरन्तिमौ द्वितीयचतुर्थौ इत्यर्थ । तथा चाद्येन युक्त द्वितीय । तृतीयेन युक्तश्चतुर्थो वर्ण इत्यर्थ । आद्यतृतीययोस्तदन्तिमयोश्च नैकवर्गीयत्वनियम । किन्तु भिन्नवर्गीययोरपि तथात्व बोध्यम् । तेन कख्ख इव केच्छापि गघ्घ इव घेच्छापि तथा बोध्या कटुत्वसाम्यात् । अत्र चानुक्तेऽपि तुल्ययोर्योगोऽपि काव्यप्रकाशकृदुक्तो ग्राह्य कटुत्वाविशेषात् । तेन कक गग चज इत्यादयोऽपि बोध्या । उपर्यध इत्यादि । तर्क इत्यादौ उपरि । तक्रचक्रादौ अध आर्द्रकम् इत्यादौ द्वयो रेफौ बोध्यौ । **टठडढै. सहेति** । साहित्य व्यञ्जकत्वकथनेन व्यञ्जनपरस्परसहितैरपि व्यञ्जनात् । समासबहुला घटना इत्यत्र घटनापद विन्यासमात्रपर सन्धिपर च । तेन समास बहुला दीर्घसमासवान् विन्यास, औद्धत्येन कटुत्वेन युक्त सन्धिश्चेत्यर्थ । चञ्चद्भुजेत्यादिक नाट्यपरिच्छेदे व्याख्यातम् । अत्र दीर्घसमास कतिपये यथोक्ता वर्णा. ।

(वि, ठ) प्रसादगुणलक्षणमाह—**चित्तमिति** । अत्र चित्तपद ज्ञानपरम् । तथा च यो गुण क्षिप्र श्लोकार्थज्ञान व्याप्नोति आविष्करोति जनयतीति यावत् । अत एवाविष्करोतीति व्याख्यास्यति । स गुण प्रसाद इत्यर्थ । अत्र दृष्टान्तमाह

(लो, ऋ) इह चानुक्तमपि औचित्यादेव । हास्ये विकाशधर्मकत्वात् ओजश्च प्राय शृङ्गारनिष्ठतया च माधुर्यस्योत्कृष्टत्वम् । भयानके चित्तवृत्तेर्विकाशाभावात् यद्यपि माधुर्य, तथापि विभावौचित्यादोज समावेश । अद्भुते शृङ्गारिगते द्वयो साम्यम् । अत्र प्रकृष्टमोज । यद्यपि बीभत्से प्रकृष्टतममोजस्तथापि माधुर्यमप्रकृष्टतरम् ।

(लो, ल) अयमर्थ—कचटतपै खछठथफा, गजडदबै घझढधभा युक्ताः ।

× अतिविद्वेषसद्भावेन विस्तार । द्वेषसद्भावेन च दीप्ति ।

स प्रसादः समस्तेषु रसेषु रचनासु च ॥ ८ ॥ (ड, ए)

व्याप्नोति आविष्करोति ।

शब्दास्तद्व्यञ्जका अर्थबोधकाः श्रुतिमात्रतः ॥ ९ ॥ (ड, ऐ)

यथा—

"सूचिमुखेन सकृदेव कृतव्रणस्त्वं
मुक्ताकलाप ! लुठसि स्तनयोः प्रियायाः ।
बाणैः स्मरस्य शतशो विनिकृत्तमर्मा
स्वप्नेऽपि तां कथमहं न विलोकयामि ॥" (ढ) *

एषां शब्दगुणत्वं च गुणवृत्त्योच्यते बुधैः ॥ १० ॥

शरीरस्य शौर्य्यादिगुणयोग इवेति शेषः । (ओ)

शुष्केति । अनलः शुष्केन्धनं यथा क्षिप्रं सुविशिष्टतयाऽऽविष्करोतीत्यर्थः । **समस्तेषु रसेषु** इति । **रचनासु** इति । सप्तम्यधिकरणताया, रचना शब्दग्रथना तत्र सप्तमी च व्यञ्जकतायाम् । तथा च सर्वरसाश्रय. सर्वरचनाव्यङ्ग्यश्चेत्यर्थ. । न चैवं प्रसादरहितः कोऽपि श्लोको न स्यादिति वाच्यम् । सर्वजातीयासु रचनासु, न तु सर्वरचनाव्यक्तिषु इत्यर्थ ।

(वि, ड) तद्व्यञ्जकरचनाव्यक्तिं दर्शयति—**शब्दा** इति । श्रुतिमात्रतोऽर्थबोधका शब्दास्तद्व्यञ्जका इत्यर्थः ।

(वि, ढ) **सूचिमुखेनेति**—प्रियायाः स्तनन्यस्तं मुक्ताहारं परोक्षमपि भावोपनीतं सम्बोध्य विरहिण उक्तिरियम् । श्लोकार्थस्तु प्रसादात् स्पष्ट एव ।

(वि, ण) रसवृत्तीनामप्येषा शब्दगुणत्वव्यवहारमुपपादयति—**एषामिति**। गुणवृत्त्या परम्परावृत्त्या गुणाश्रयरसव्यञ्जकत्वं परम्पराशब्दगुणत्वमित्युपलक्षणम् ।

(लो, ए) चित्तं प्रतिपत्तृणामित्यर्थ ।

(लो, ऐ) इह च प्रसादगुणस्य झटित्यर्थप्रकाशनेन उक्तरूपरसानिष्टप्रसादगुणाभिव्यञ्जनादौ परिचारिकामपि रचनानिष्ठत्वं प्रयत्नविधेयत्वेन रसमाहचर्येण उक्तिं प्रसादातिक्रमेषु सामान्यमपि सङ्घटना करुणविप्रलम्भशृङ्गारौ व्यनक्ति । तदपि परित्यागे मध्यममार्गमपि प्रश्रयतीति ।

(लो, ओ) यत् पुनरेषा शब्दवृत्तित्वमुच्यते तत्र हेतुमाह—**एषामिति** । गुणवृत्त्या पूर्वोक्तरीत्या उपचारेण ।

---

* हे मुक्ताकलाप ! सूच्या मुखेन सकृदेव कृतव्रणः कृतच्छिद्रस्त्वं प्रियायाः स्तनयोर्लुठसि । स्मरस्य बाणैः शतशः विनिकृत्तमर्मा छिन्नमर्मग्रन्थिः स्वप्नेऽपि तां कथं न विलोकयामि । यदि छिद्रप्राप्तिरेव प्रियाप्राप्तिहेतुस्तदा छिद्रप्राप्तोऽप्यहं कथं तां न प्राप्नोमीत्येतदेवाधर्यम् ।

श्लेषः समाधिरौदार्य्यं प्रसाद इति ये पुनः ।
गुणाश्चिरन्तनैरुक्ता ओजस्यन्तर्भवन्ति ते ॥ ६१ ॥

ओजसि—भक्त्या ओजःपदवाच्ये शब्दार्थधर्मविशेषे । (ण)
तत्र श्लेषो बहूनामपि पदानामेकपदवद्भासनात्मा । (औ)

यथा—

"उन्मज्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धतः
सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिनी ।
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथायं तथा
प्रायः प्रेङ्खदसंख्यशङ्खधवला वेलेयमुद्गच्छति ॥"

अयं बन्धवैकट्यात्मकत्वादोज एव । (त, अ)

अर्थगुणत्वमप्येवं बोध्यम् । इत्थं रसवृत्तय एव त्रय एव गुणाः परम्परया शब्दार्थवृत्तय । चिरन्तनैरुक्तेना "श्लेष. प्रसाद समता माधुर्यं सुकुमारता । अर्थव्यक्तिरुदारत्वमोजः कान्तिः समाधय." इति दशगुणाना मध्ये श्लेषादिगुणचतुष्टयमोजस्यन्तर्भवतीत्याह—**श्लेष** इत्यादि । ओजस्यन्तर्भावे प्रकारमाह—**भक्त्येति** । अस्मदुक्तौजोगुणव्यञ्जकवर्णेष्वेव हि ते चत्वारो गुणा वर्त्तन्ते इति तैरुच्यते । तथा च परम्परया शब्दवृत्तेरस्मदुक्तौजोगुणसमाधानाधिकरणा एव ते तन्मते पर्य्यवस्यन्ति । तथा तेषा तद्भिन्नत्वोक्तौ गौरवं तदात्मकत्वमेवोचितमित्येतदेवाह—**भक्त्येति** । ओजःपदवाच्ये रसगुणविशेषे भक्त्या परम्परारूपया भक्त्या शब्दधर्मेऽन्तर्भवन्तीत्यर्थः । तदभिन्ना एते इत्यर्थः ।

(वि, त) तत्र तैरुक्तस्य श्लेषस्य लक्षणमाह—**श्लेषो बहूनामिति** । एकपदवद्भासनं दीर्घसमासेन । **उन्मज्जादिति**—उन्मज्जतो जलकुञ्जरेन्द्रस्य रभसा स्फालनानुबन्धेन सहसा स्फालनक्रियया उद्धत इवतः अय ध्वनिः यथा उच्चैरुच्चरति, प्राय. सम्भावने, तथा वेला समुद्रस्य नीरम् उद्गच्छति, कुञ्जरास्फालनेन तीरं प्लावयतीत्यर्थः । वेला कीदृशी—प्रेङ्खद्भिश्चलद्भिरसंख्यशङ्खैः धवला । ध्वनि. कीदृश. ? श्रुतिपथोन्माथी । सर्वा. पर्वतकन्दरोदरभुवश्च प्रतिध्वानिनी कुर्वंश्च । **अयमिति** । बन्धवैकट्यमुद्भटत्वविशिष्टशब्दत्वम् । तच्च तादृशशब्दवृत्तित्वात् परम्परया शब्दवृत्तयोजो-

---

(लो, औ) कथं त्रय एव गुणा इत्यत्राह—**श्लेष** इति । भक्त्या उपचारेण । पदाना बहूनामेकपदवद्भासनम् ।

(लो, अ) उच्चैरुच्चरति ध्वनिरित्यादौ सुव्यक्तम् । जलकुञ्जरो हस्त्याकारमुखो जलजन्तुविशेष. । तस्य रभसेन आस्फाल. अर्दनम् अर्थात् जलस्यैव । प्रेङ्खन्तः चलन्तः । वेला समुद्रवीचि. ।

स प्रसादः समस्तेषु रसेषु रचनासु च ॥ ८ ॥ (ड, ए)

व्याप्नोति आविष्करोति ।

शब्दास्तद्व्यञ्जका अर्थबोधकाः श्रुतिमात्रतः ॥ ९ ॥ (ड, ऐ)

यथा—

"सूचिमुखेन सकृदेव कृतव्रणस्त्वं
मुक्ताकलाप ! लुठसि स्तनयोः प्रियायाः ।
बाणैः स्मरस्य शतशो विनिकृत्तमर्मा
स्वप्नेऽपि तां कथमहं न विलोकयामि ॥" (ढ) *

एषां शब्दगुणत्वं च गुणवृत्त्योच्यते बुधैः ॥ १० ॥

शरीरस्य शौर्य्यादिगुणयोग इवेति शेषः । (ओ)

शुष्केति । अनलः शुष्केन्धनं यथा क्षिप्रं सुविशिष्टतयाऽऽविष्करोतीत्यर्थः । **समस्तेषु रसेषु** इति । **रचनासु** इति । सप्तम्यधिकरणतायां, रचना शब्दग्रथना तत्र सप्तमी च व्यञ्जकतायाम् । तथा च सर्वरसाश्रयः सर्वरचनाव्यङ्ग्यश्चेत्यर्थः । न चैवं प्रसादरहितः कोऽपि श्लोको न स्यादिति वाच्यम् । सर्वजातीयासु रचनासु, न तु सर्वरचनाव्यक्तिषु इत्यर्थः ।

(वि, ड) तद्व्यञ्जकरचनाव्यक्तिं दर्शयति—**शब्दा** इति । श्रुतिमात्रतोऽर्थबोधकाः शब्दास्तद्व्यञ्जका इत्यर्थः ।

(वि, ढ) सूचिमुखेनेति—प्रियायाः स्तनन्यस्तं मुक्ताहारं परोक्षमपि भावोपनीतं सम्बोध्य विरहिण उक्तिरियम् । श्लोकार्थस्तु प्रसादात् स्पष्ट एव ।

(वि, ण) रसवृत्तीनामप्येषा शब्दगुणत्वव्यवहारमुपपादयति—**एषामिति** । गुणवृत्त्या परम्परावृत्त्या गुणाश्रयरसव्यञ्जकत्वं परम्पराशब्दगुणत्वमित्युपलक्षणम् ।

(लो, ए) चित्तं प्रतिपत्तॄणामित्यर्थः ।

(लो, ऐ) इह च प्रसादगुणस्य भट्टित्यर्थप्रकाशनेन उत्कृष्टरसानिष्टप्रसादगुणाभिव्यञ्जनादौ परिचारिकमपि रचनानिष्ठत्वं प्रयत्नविधेयत्वेन रससाहचर्येण अङ्गिप्रसादातिक्रमेषु सामान्यमपि सङ्घटना करुणविप्रलम्भशृङ्गारौ व्यनक्ति । तदपि पूर्वत्यागे मध्यमसमासापि प्रकाशयतीति ।

(लो, ओ) यत् पुनरेषां शब्दवृत्तित्वमुच्यते तत्र हेतुमाह—**एषा**मिति । गुणवृत्त्या पूर्वोक्तरीत्या उपचारेण ।

---

* हे मुक्ताकलाप ! सूच्या मुखेन सकृदेव कृतव्रणः कृतच्छिद्रस्त्वं स्तनयोर्लुठसि । स्मरस्य बाणैः शतशः विनिकृत्तमर्मा छिन्नमर्मग्रन्थिः अहं कथं न विलोकयामि । यदि छिद्रप्राप्तिरेव प्रियाप्राप्तिहेतुस्तदा हि तां न प्राप्नोमीत्येतदेवाश्चर्यम् ।

माधुर्यव्यञ्जकत्वं यदसमासस्य दर्शितम् ।
पृथक् पदत्वं माधुर्य तेनैवाङ्गीकृतं पुनः ॥ १२ ॥ (न, इ)

यथा—श्वासान् मुञ्चतीत्यादि ।

अर्थव्यक्तेः प्रसादाख्यगुणेनैव परिग्रहः ।
अर्थव्यक्तिः पदानां हि झटित्यर्थसमर्पणम् ॥ १३ ॥

स्पष्टमुदाहरणम् ।

ग्राम्यदु श्रवतात्यागात् कान्तिश्च सुकुमारता ॥ १४ ॥

अङ्गीकृतेति सम्बन्धः । कान्तिरौज्ज्वल्यम् । तच्च हालिकादिपदन्यास-वैपरीत्येनालौकिकशोभाशालित्वम् । सुकुमारता अपारुष्यम् । अनयोरुदाहरणे स्पष्टे । (प, ई)

क्वचिद्दोषस्तु समता मार्गभेदस्वरूपिणी ।
अन्यथोक्तगुणेष्वस्या अन्तर्भावो यथायथम् ॥ १५ ॥

मसृणेन विकटेन वा मार्गेणोपक्रान्तस्य सन्दर्भस्य तेनैव परिनिष्ठानं मार्गभेदः स च क्वचिद्दोषः । तथा हि—

"अव्यूढाङ्गमरूढपाणि जठराभोगञ्च बिभ्रद्वपु
पारीन्द्र शिशुरेष पाणिपुटके सम्मातु किं तावता ?

(वि, न) माधुर्यलक्षणं पृथक्पदत्वं तच्चासाक्षात् माधुर्यव्यञ्जकोऽसमासेनाङ्गीकृतमित्याह—**माधुर्येति** । श्वासान् मुञ्चतीत्यादावसमासः ।

(वि, प) **स्पष्टमुदाहरणमिति** । सूचिमुखेनेत्यादि प्रसादगुणोदाहरणं ज्ञेयम् । अन्येषां च बहूनां तदुदाहरणत्वात् ।

अपारुष्यम् अदु श्रवत्वम् । **अनयोरुदाहरणे** इति । एतद्दोषद्वयरहिता श्लोका एवेत्यर्थः ।

(वि, फ) **क्वचिदिति** । मार्गभेदप्रदर्शनी समता क्वचिद्दोषः । **अन्यथेति** । अत्र तादृशस्थले तु समता माधुर्योजोगुणयोरन्यतरगुण इत्यर्थः । व्याचष्टे—**मसृणेनेति** । **अव्यूढाङ्गमिति** । शिशुरेष पारीन्द्र सिंह अव्यूढाङ्गम् अप्रौढावयवं पाणिजठराणामाभोगेन परिपूर्णतया रहितं च वपुः दधत् क्षुद्रतया पाणिपुटके

(लो, इ) असमासस्य वर्णितम्—अवृत्तिरल्पवृत्तिर्वेत्यनेन ।

(लो, ई) कान्तिर्यथा मम—

नेत्रे खञ्जनगञ्जने सरसिजप्रत्यर्थिपाणिद्वय
वक्षोजौ करिकुम्भविभ्रमकरीमत्युद्धतिं गच्छतः ।
कान्तिः काञ्चनचम्पकप्रतिनिधिर्वाणी सुधास्पर्द्धिनी
स्मेरेन्दीवरदामसोदरवपुर्लक्ष्म्याः कटाक्षच्छटा ॥

प्रोद्यद्दुर्द्धरगन्धसिन्धुरशतप्रोद्दामदानार्णव-
स्रोत शोषणशोषणात् पुनरिति. कल्पाग्निरुत्पायते ।"

अत्रोद्धतेऽर्थे वाच्ये सुकुमारबन्धत्यागो गुण एव । अनेवविधस्थले माधुर्यान्वयेवान्त पात । यथा—लताङ्ग गुञ्जदित्यादि । (फ)

ओज. प्रसादो माधुर्यं सौकुमार्यमुदारता ।
तदभावस्य दोषत्वात् स्वीकृता अर्थगा गुणाः ॥ १६ ॥ (व)

ओज साभिप्रायस्वरूपम् । प्रसादोऽर्थैवमल्यम् । माधुर्यमुक्तिवैचित्र्यम् । सौकुमार्यमपारुष्यम् । उदारता अग्राम्यत्वम् । एषां च पञ्चानामप्यर्थगुणाना यथाक्रममपुष्टार्थाधिकपदानवीकृतामङ्गलरूपाश्लीलग्राम्यताना निराकरणेनैवाङ्गीकार. । स्पष्टान्युदाहरणानि । (भ)

अर्थव्यक्ति स्वभावोक्त्यलङ्कारेण तथा पुन ।
रसध्वनिगुणीभूतव्यङ्ग्याभ्या कान्तिनामक. ॥ १७ ॥ (म)

अङ्गीकृत इति सम्बन्ध । अर्थव्यक्तिर्वस्तुस्वभावस्फुटत्वम् । (उ)

गम्मातु । एतावता किम् इतो दृश्यमानान् प्रोद्यता दुर्द्धरगन्धाना सिन्धुरशतस्य हस्तिशतस्य प्रोद्दामदानार्णवाना शोषणात् पुन कल्पाग्निरुत्पायते । अनेवंविधेति । अनुद्धते वाच्ये इत्यर्थ । दोषस्तु प्रकृतिविपर्य्ययरूपो बोध्य ।

(वि, व) इदानीम् उक्तनाम्ना भिन्नलक्षणाना परोक्तदशार्थगुणानामप्यनङ्गीकारबीजमाह—**ओज प्रसाद** इत्यादि । ओज आदि उदारान्ता पञ्चार्थगुणा तदभावस्य दोषत्वादेव स्वीकृता इत्यर्थ । तथा च दोषाभाव एव एते पञ्चगुणा इत्यर्थ ।

(वि, भ) ओज आदिपञ्चगुणाना लक्षणान्याह—**ओज** इति । विशेष्यपुष्ट्यभिप्रायकविशेषणत्व साभिप्रायत्वम् । तच्चापुष्टार्थत्वदोषाभावत्वेन स्वीकृतम् । अर्थवैमल्यमधिकपदेनाऽकलुषीकरणम् । तच्चाधिकपदत्वदोषाभावत्वेन । उक्तिवैचित्र्यम् अनेकवारप्रतिपादनीयस्यार्थस्य भङ्ग्यन्तरेण कथनम्, तच्च अनवीकृतत्वदोषाभावत्वेन । अपारुष्यममङ्गलरूपपारुष्यविरह, । तच्चामङ्गलाश्लीलत्वदोषाभावत्वेन, अग्राम्यताऽवैदग्ध्यप्रतिपादकार्थभिन्नत्वम् तच्च ग्राम्यत्वदोषाभावत्वेन स्वीकृतमित्यर्थ । **स्पष्टानीति**—एतद्दोषपञ्चकरहितश्लोका एवेत्यर्थ ।

(वि, म) रसध्वनि शून्य वासगृहमित्यादि । रसगुणीभूतव्यङ्ग्यं ।

(लो, उ) उद्धतार्थ प्रोद्यद्दुर्द्धरत्यादौ । अर्थव्यक्तिर्यथा—

लाङ्गूलेनाभिहत्य क्षितितलमसकृद्दारयन्नग्रपद्भ्या
मात्मन्यवावलीय द्रुतमथ गगन प्रोत्पतन् विक्रमेण ।
स्फूर्जत्पूत्कारघार प्रतिदिशमखिलान् वारयन्नेव जन्तून्
कोपाविष्ट प्रविष्ट प्रतिवनमरणो घूनचक्षुस्तरक्षु ॥

कान्तिर्दीप्तरसत्वम् । स्पष्टे उदाहरणे ।

श्लेषो विचित्रतामात्रमदोषः समतापरम् ॥ १८ ॥ (य)

श्लेष क्रमकौटिल्यानुल्बणत्वोपपत्तियोगरूपघटनात्मा । तत्र क्रम क्रिया सन्ततिः । विदग्धचेष्टित कौटिल्यम् । अप्रसिद्धवर्णनाविरहोऽनुल्बणत्वम् । उपपादकयुक्तिविन्यास उपपत्ति । एषा योग सम्मेलन स एव रूप यस्या, घटनायास्तद्रूपः श्लेषो वैचित्र्यमात्रम् । अनन्यसाधारणरसोपकारित्वातिशय-विरहादिति भाव । (र)

यथा "इष्ट्वैकासनसंस्थिते प्रियतमे" इत्यादि । अत्र दर्शनादय क्रिया । उभयसमर्थनरूप कौटिल्यम् । (ल)

लोकव्यवहाररूपमनुल्बणत्वम् । "एकासनसंस्थिते, पश्चादुपेत्य, नयने निमील्य, ईषद्वक्रितकन्धर" इति चोपपादकानि, एषा योग । अनेन च वाच्यो-पपत्तिग्रहणव्यग्रतया रसास्वादो व्यवहितप्राय इत्यस्यागुणता । समता च

" अय स रसनोत्कर्षी"त्यादि अपराङ्गम् ।

(वि, य) विचित्रतामात्रमिति—तथा च वैचित्र्यमलङ्कार इत्यलङ्कारसा-मान्यलक्षणाक्रान्तत्वादलङ्कार एवासौ न गुण इत्यर्थ । **समतेति** । समता परमदोषो दोषाभावमात्रमित्यर्थ ।

(वि, र) तत्र श्लेषलक्षणमाह—**श्लेषक्रमेति** । क्रमादान् व्याचष्टे **क्रम-क्रियेति**—साकाङ्क्षाक्रियाबाहुल्यमित्यर्थ । क्रमकौटिल्येत्यादि बहुव्रीहिसमास विवृणोति **स एव रूपं यस्या** इति । स एव एषा योग एव इत्यर्थ । तद्रूप इत्यत्र रूपपदमा त्मपदार्थविवरणम् । **अनन्येति** । माधुर्य्यादयस्तदन्तर्भूत गुणान्तर वा यथा विलक्षणरसो पकारातिशयहेतुरस्य, तथात्वविरहान्न गुणत्वमित्यर्थ ।

(वि, ल) इष्ट्वेकेति—प्रियतमे प्रियतमाद्वयम् एकासनसंस्थित तद्द्वय दृष्ट्वा धृत्ता नायक पश्चात् पृष्ठत उपेत्य विहृतक्रीडानुबन्धच्छल सन् एकस्या नयने नयनद्वय पिधाय ईषद्वक्रितकन्धर सपुलक सन् आदरादपरा चुम्बति । अपरा वादृशा, प्रेम्णा उल्लसन्मनसाम् अन्तर्हसेन लसत्कपोले पुलको यस्यास्तादृशां च । **उभयसमर्थ नेति**—पिहितनयनाया क्रोध, चुम्बिताया प्रीतिश्चेत्युभय पृष्ठतो गमनेन नयनपि धानेन च विदग्धचेष्टितरूपकौटिल्येन तत्समर्थन समर्थनरूपमित्यत्र करणे ल्युट् ।

(वि, व) लोकव्यवहारेति—अन्यलोकैरप्येव करणात् । **उपपादका-नीति**—सपत्न्याऽदृश्यमानचुम्बनोपपादनानीत्यर्थ । अस्य गुणत्वाभाव दर्शयति—**अनेन चेति** । वाच्य यच्चुम्बन पश्चाद्गमनादिना तदुपपत्तेर्ग्रहणनिष्पादने धूर्तस्य व्यग्रतया तद्बोधात् बोद्धृणा रसास्वादो व्यवहितप्राय इत्यर्थ " । किंचिद्विलम्बनादिति

---

1 क्य (स. पु.)

प्रक्रान्तप्रकृतिप्रत्ययविपर्यासेनार्थस्य विसवादिताविरह[1] । स च प्रक्रमभङ्ग-रूपदोषविरह एव ।

स्पष्टमुदाहरणम् । (व)

न गुणत्वं समाधेश्च ॥ १६ ॥

समाधिश्चायोन्यन्यच्छायायोनिरूपद्विविधार्थदृष्टिरूप । तत्रायोनिरर्थो यथा—

"सद्यो मुण्डितमत्तहूणचिबुकप्रस्पर्द्धि नारङ्गकम्" ।

अन्यच्छायायोनिर्यथा—

"निजनयनप्रतिविम्बैरम्बुनि बहुश प्रतारिता कापि ।
नीलोत्पलेऽपि विमृशति करमर्पयितु कुसुमलावी ।"

अत्र नीलोपलनयनयोरतिप्रसिद्ध सादृश्य विच्छित्तिविशेषेण निबद्धम्। अस्य चासाधारणशोभानाधायकत्वान्न गुणत्व किन्तु काव्यशरीरमात्रनिर्वाहकत्वम् । (श, ऊ)

क्वचिच्चन्द्रमित्येकस्मिन् पदार्थे वक्तव्ये "अत्रेर्नयनसमुत्थ ज्योति"रिति वाक्यवचनम्। (ऋ) क्वचित् "निदाघशीतलहिमकालोष्णसुकुमारशरीरावयवा[1] योषिदि"ति वाक्यार्थे वक्तव्ये वरवर्णिनीति पदाभिधानम् । (ए)

भाव । **प्रक्रान्तेति**—प्रक्रान्तयो प्रक्रम्यमाणयो प्रकृतिप्रत्ययो साम्यमित्यर्थ । **स्पष्टमिति** । प्रक्रमभङ्गदोषरहितश्लोक एवेत्यर्थ ।

(**वि, श**) अयोनिरन्यैरवर्णितार्थ । अन्यच्छायायोनिरन्यवर्णितार्थानुसारी, **सद्य** इति । हूण पाश्चात्यदेशविशेषीयजन , स च ताम्रवर्ण । मत्तत्वेन चातिताम्र , नारङ्गक नारङ्गफलम् अतिताम्रम् । अन्यैरवर्णितोऽयमर्थ । **निजनयनेति**—कापि कुसुमलावी मालाकारपत्नी जले निजनयनप्रतिविम्बे नीलोत्पलभ्रमेण तद्ग्रहणे प्रवर्त्य तदप्राप्त्या प्रतारिता वास्तवनीलोत्पलेऽपि करमर्पयितु तद्भवति न वेति विमृशतीत्यर्थ । इयमन्यवर्णितार्थच्छाया । **अस्य चेति**—तनुभ्रमेण रसानुपमाणादिति भाव ।

(**वि, प**) प्रौढिरोक्त इत्यपर परोक्त ओजोगुण । तत्र च पदार्थे वाक्यर चना वाक्यार्थे च पदाभिधा । प्रादिर्व्यासससमासौ च इति चतुर्विधा प्रौढि परैरुक्ता । तस्य गुणत्व नोचितम् इति वक्तु तदीय पदार्थ वाक्यरचनेत्यादिक दर्शयति—**क्वचिच्चन्द्र इतीति** । वाक्यार्थे पदाभिधान दर्शयति—**क्वचिन्निदाघेति** ।

शीतकाले भवेदुष्णा ग्रीष्मे च सुखशीतला।

(**लो, ऊ**) अयोनि पूर्वकविभिरदृष्टोऽर्थ । काव्यशरीरमात्रनिर्वाहकत्वमेतत् प्रकारद्वयव्यतिरेकेण काव्यशरीरानिर्वाहात् ।

(**लो, ऋ**) वाक्यवचनमिति पदसमूहाभिधानम् ।

---

1 विच्छेद (ग घ पु) 2 'रा वरयोषित्' (क ग घ पु)

क्वचित् "एकस्य वाक्यार्थस्य किञ्चिद्विशेषाद[1] नैकैर्वाक्यैरभिधानमित्येव रूपो व्यास । क्वचिद् बहुवाक्यप्रतिपाद्यस्यैकवाक्येनाभिधानमित्येवरूप समासश्च" (ऋ) इत्येवमादीनामन्यैरुक्ताना न गुणत्वमुचितम्, (लृ) अपि तु वैचित्र्यमात्रावहत्वम् । (स)

तेन नार्थगुणा पृथक् ॥ २० ॥

तेनोक्तप्रकारेण । अर्थगुणा ओज प्रभृतय [2]प्रोक्ता ।

इति साहित्यदर्पणे गुणविवेचनो नामाष्टम परिच्छेद ।

सर्वावयवशोभाढ्या सा स्मृता वरवर्णिनी ।

इति वरवर्णिनीलक्षण व्यास दर्शयति ।

(वि, स) **क्वचिदेकस्ये**ति—विशेषात् विच्छेदाविशेषात् खण्डखण्डवाक्येन कथनादित्यर्थ । यथा नाथ पण्डित इत्येकवाक्येन वक्तव्ये नाथ व्याकरण नाथ तर्क वेत्तीत्यादिखण्डखण्डवाक्येन समस्तशास्त्राज्ञानकथनम् । समास दर्शयति—**क्वचिद्** द्वेति । बहुप्रतिपाद्यस्य बहुवाक्यप्रतिपाद्यस्य यथा दर्शितव्यासविपर्ययः—**एवमादीना** मिति । ओजागुणत्वेन अन्यैरुक्ताना चतुर्विधग्रीतीनामित्यर्थ । **वैचित्र्यमात्रे**ति तथा चालङ्कार एवायमित्यर्थ ।

इति श्रीमद्वेश्वरन्यायालङ्कारभट्टाचार्यविरचिताया साहित्यदर्पणटीकाया गुणविवेचनाख्यस्याष्टमपरिच्छेदस्य विवरणम्

(लो, ऋ) वाक्यार्थन्यासो यथा—

असौ नानाकारो भवति सुखदु खव्यतिकर
सुख वा दु ख वा प्रभवति भवत्येव भवत ।
ननस्तस्माद्दूर भवति न च दु ख न च सुखम् । इति

अस्यैव समासो यथा—

श्रूयता धर्मसर्वस्व श्रुत्वा चैवावधार्य्यताम् ।
आत्मन प्रतिकूलानि परेषा न समाचरेत् ॥ इति

(लो, लृ) न गुणत्वम्—अनन्यसाधारणरसोपकारितभावादिति भाव । इति ।

इति श्रीसाहित्यदर्पणलोचने गुणनिरूपणो नामाष्टम परिच्छेद ।

---

1 विशयनिवेशाद्' (ग घ पु) 2 परोक्ता (ग पु)

नवमः परिच्छेदः

अथोद्देशक्रमप्राप्तमप्यलङ्कारानिरूपणं बहुवक्तव्यत्वेनोल्लङ्घ्य रीतिमाह। (क,अ)

पदसंघटना रीतिरङ्गसंस्थाविशेषवत्। ❀
उपकर्त्री रसादीनां ॥ १ ॥ (ख)

रसादीनामर्थात् शब्दार्थशरीरस्य काव्यस्यात्मभूतानाम्। (आ)

सा पुनः स्याच्चतुर्विधा।
वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा ॥ २ ॥

सा रीतिः। तत्र—

माधुर्यव्यञ्जकैर्वर्णैरचना ललितात्मिका।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥ ३ ॥

यथा—"अनङ्गमङ्गलभुव" इत्यादि। रुद्रटस्त्वाह—

"असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी।
वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च सुविधेया।"

अत्र दशगुणास्तन्मतोक्ताः श्लेषादय। (ग, इ)

(वि, क) उद्देशेति—गुणालङ्काररीतय इत्युद्देशेऽलङ्कारस्य प्रागुद्दिष्टत्वेन तदुल्लङ्घ्यम् इत्यर्थः। तदुल्लङ्घने हेतुमाह—**बहुवक्तव्यत्वेनेति**। एतेन सूचीकटाहन्यायो दर्शितः।

(वि, ख) रसादीनामित्यादिपदात् समस्ताऽसंलक्ष्यक्रमपरिग्रहः।

(वि, ग) अनङ्गमङ्गलभुव इत्यादि व्याख्यातम्। एकपदसमस्ता न त्वनेकपदैर्दीर्घसमस्ता। स्वल्पप्राणानि अक्षराणि ईषत् प्रयत्नाचार्य्याणि ककारहकारादीनि यत्र। श्लेषादिर्दशगुणाः।

(लो, अ) इदानीं रीतिं निरूपयितुकाम सगतिं करोति—**अथोद्देशेति**। बहुवक्तव्यत्वेन उल्लङ्घ्यक्रमं सूचीकटाहन्यायादित्यर्थः।

(लो, आ) पदानां सङ्घटना रचना अर्थात् विशिष्टा, विशेषश्च विशेषलक्षणैरभिव्यक्तः। **रसादीनामिति**। अङ्गसंस्थाविशेषो यथा लोके आत्मानमुपकरोति तथा काव्येषु।

(लो, इ) ललितात्मिका सुकुमारस्वरूपा। वृत्ति समासः। अत्र रुद्रटाचार्य्यमतप्रकटनम्। एकसमस्ता एकपदसमासयुक्ता, स्वल्पप्राणाक्षरा मृद्वी मृदुश्चेत्यादिवत् न कष्टोच्चारणीयवर्णा।

❀ अङ्गसंस्थाविशेषोऽङ्गविन्यासविशेषः।

ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः ।
समासबहुला गौडी ॥ ४ ॥

यथा—चञ्चद्भुजेत्यादि । पुरपोत्तमस्त्वाह—

"बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौडीया ।
रीतिरनुप्रासमहिमपरतन्त्राऽस्तोभ[1]वाक्या च ॥" (घ, ई)

वर्णैः शेषैः पुनर्द्वयोः ।
समस्तपञ्चमपदो बन्धः पाञ्चालिका मता ॥ ५ ॥ (ङ)

द्वयोर्वैदर्भीगौडयोर्यथा—

"मधुरया मधुबोधितमाधवी-
मधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मद-
ध्वनिभृता निभृताक्षरमुज्जगे ।" (च)

भोजस्त्वाह—

"समस्तपञ्चमपदामोज कान्तिसमन्विताम् ।
मधुरां सुकुमारां च पाञ्चालीं कवयो विदु ॥" (छ, ज)

(वि, घ) आडम्बर उद्धतवर्णघटित । **पुरपोत्तमस्त्विति**। अन्यापेक्षया प्राक्लिखितबन्ध आडम्बर, एतन्मते उद्धवर्णानामनुप्रासितत्वनियम इति विशेषस्तदाह **अनुप्रासमहिमपरतन्त्रेति**। पारतन्त्र्य व्याप्ति । अस्तोभवाक्या यतिरहितवाक्या ।

(वि, ङ) पाञ्चालिका रीतिमाह—**वर्णैरिति**। द्वयो शेषैरवशिष्टैर्वर्णैरित्यर्थ । **समस्तपञ्चमपद** इति अत्र पदपदम् अक्षरपरम् । तेन समासगतपञ्चमाक्षर इत्यर्थ ।

(वि, च) **मधुरयेति**। मधुकराङ्गनया भ्रमर्या निभृताक्षर गुप्ताक्षरमस्फुटाक्षर यथा स्यात्तथा मुहुरुज्जगेऽगीयत । कीदृश्या मधुरया ध्वनिमधुरतयैव तस्या मधुरता, तथा मधुना वसन्तेन बोधिताया उद्बोधिताया माधवीलताया मधुनो मकरन्दस्य समृद्धया सम्पत्त्या समेधिता दीपिता मेधा बुद्धिर्यस्यास्तादृश्या । तथोन्मदध्वनिभृता उच्चत्वमेवोन्मदत्वम् । अत्र मकारनकारौ पञ्चमवर्णौ समासगतौ ।

(वि, छ) कण्ठाभरणकृतो भोजस्य सम्मतलक्षणमाह—**भोजस्त्विति** । **ओज कान्तीति**। साभिप्रायत्वरूपेण ओजसा औज्ज्वल्यरूपया कान्त्या च समन्वितामित्यर्थ । **मधुरां सुकुमारां चेति**। पृथक पदत्वरूपेण माधुर्येण सौकुमार्येण च युक्ताम् ।

(लो, ई) अनुप्रासमहिमपरतन्त्राऽनुप्रासबहुला ।
(लो, उ) ओज —कान्ती तन्मतोक्तौ गुणविशेषौ ।

---

1 'न्त्रा स्तोक' (क ख ग)

लाटी तु रीतिर्वैदर्भीपाञ्चाल्योरन्तरा स्थिता ॥ ६ ॥ (ञ)

यथा—

"अयमुदयति मुद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्
कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥" (ज)

कश्चिदाह—

"मृदुपदसमाससुभगा युक्तैर्वर्णैर्नचातिभूयिष्ठा । (झ)
उचितविशेषणपूरित[1]वस्तुन्यासा भवेल्लाटी ॥" (ञ)

अन्ये त्वाहुः—

"गौडी डम्बरबद्धा स्याद् वैदर्भी ललितक्रमा ।
पाञ्चाली मिश्रभावेन लाटी तु मृदुभिः पदैः ॥"

मित्यर्थः । अनङ्गमङ्गलभुव इति वैदर्भ्युदाहरणे पञ्चममूर्द्धन्य एव वर्ण इति । न तत्र समस्तपञ्चमवर्णघटितपाञ्चालीत्वप्रसक्तिः । मधुरयेत्यादिपाञ्चाल्युदाहरणे समासगता एव पञ्चमवर्णा इति न तत्र पञ्चममूर्द्धन्यवर्णघटितवैदर्भीत्वप्रसक्तिः । तत्र माधुर्य्यव्यञ्जकैरित्यत्र बहुवचनादत्र मधुकराङ्गनया इत्यत्र तद्व्यञ्जकैकवर्णमात्रसत्त्वेन तत्प्रसक्त्यभावात् ।

(वि, ज) अयमुदयतीति । लाट्युदाहरणे तदुभयमिश्रणं दर्शयिष्यते । तदर्थस्तु अयम् अर्थात् सूर्य्य उदयति । कीदृशः । पद्मिनीनां मुद्राया. सङ्कोचस्य भञ्जनः तत्पुष्पविकाशकरत्वात् । तथा उदयगिरिस्थाया वनश्रेण्या नवीनमन्दारपुष्पस्वरूपः । विरहदुःखितस्य चक्रवाकमिथुनस्य बन्धुर्मित्रं तद्विरहनाशकत्वात् । तमांसि भिन्दन् च कुपितस्य वानरस्य कपोलक्रोडोभयवत् ताम्रश्च । कोपवशात् कपोलस्य ताम्रता क्रोडस्य तु स्वाभाविकी। अत्र भञ्जनेति, मन्दारेति, द्वन्द्वबन्धुरिति, भिन्दन्निति पञ्चममूर्द्धन्यवर्णानां वैदर्भीघटकत्वं तच्छेषवर्णानां बहूनामेवं पाञ्चालीघटकत्वमित्युभयमिश्रणम् ।

(वि, झ) कश्चिदाहेति—लाटीलक्षणमिति शेषः । मृदुपदेति—पदसमासयोरुभयत्र मृदुत्वान्वयः । युक्तैः संयुक्तैर्वर्णैर्नचातिभूयिष्ठा, भूयिष्ठसंयुक्तवर्णरहितेत्यर्थः । उचितेति—उचितम् उक्तदोषरहितं विशेषणं पूरितम् प्रतिपादितं येन तादृशस्य वस्तुनो न्यासयुक्ता लाटी भवेदित्यर्थः । एतदप्युक्तैदाहरणे एव सम्भवति । तत्तद्गुणव्यञ्जकाना वर्णादीनां तत्तद्गुणव्यञ्जनार्थमुपादेयत्वेनोक्तत्वात् ।

(लो, ऊ) अन्तरा स्थितेत्यनेन नात्यल्पसमासा न बहुलसमासा, एवमन्यत्र ।
(लो, ऋ) युक्तैः संयुक्तैः ।

---

1 'सूचित' (क ट. पु.)

क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनादय ॥ ७ ॥ (ञ, ञ)

वक्त्रादीत्यादिशब्दाद् वाच्यप्रबन्धौ । रचनादीत्यादिशब्दाद् वृत्तिवर्णौ । तत्र वक्त्रौचित्याद् यथा—

"मन्थायस्तार्णवाम्भ प्लुत[1]कुहरचलन्मन्दरध्वानधीर[2]
कोणाघातेषु गर्ज्जत्प्रलयघनघटाऽन्योऽन्यसघट्टचण्ड ।
कृष्णाक्रोधाप्रदूत कुरुकुलनिधनोत्पातनिर्घातवात
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम् ॥"

अत्र वाच्यस्य क्रोधाद्यव्यञ्जकत्वेऽपि भीमसेनवक्तृत्वेनोद्धता रचनादय । (ट, लृ)

(वि, ञ) क्वचित्तद्रसाभावेन तद्गुणव्यञ्जनार्थमनुपादेयत्वेऽपि वक्त्रार्थौचित्याद् अन्यथा रचनादय इत्याह—**क्वचिद्वक्त्रादीति** । तद्गुणव्यञ्जनाभावेऽपि तन्निबन्ध एवान्यथात्वम् ।

(वि, ट) मन्थायस्तेत्यादि—रणस्थले दुन्दुभिशब्द श्रुत्वा भीमस्येय पृच्छा । केनाय दुन्दुभिस्ताडित —ताडनेन जनित । यथा श्रुते विशेषणाना दुन्दुभौ अन्वय । शब्द कीदृश । मन्थनेन मथनेन आयस्तस्य प्राप्तायास्यार्णवस्याम्भसा प्लुतं व्याप्त कुहर गुहा यस्य तादृशस्य चलत. मन्दरस्य ध्वानवत् धीर । कोणस्य वादनदण्डस्याघातेषु ताडनेषु सत्सु । गर्जन्त्या प्रलयघनघटाया अन्योऽन्यसघट्टनेन चण्ड । यद्वा—

"ढक्काशतसहस्राणि भेरीशतशतानि च ।
एकदा यत्र वाद्यन्ते कोणाघात स उच्यते ॥"

यत्रेति निमित्तसप्तम्या यादृशशब्दनिमित्त ढक्कादय एकदा ताड्यन्ते स शब्द कोणाघात इत्यर्थ । तथा च तादृशशब्देषु मध्ये अय गर्जत् इत्यादि चण्ड इत्यर्थ । कृष्णाया द्रौपद्या क्रोधस्य अप्रदूत तत्प्रवर्त्तकत्वात् कुरुकुलनिधनसूचक उत्पातभूतो निर्घातवातश्च इत्यर्थ । अनेति वाच्यपदमत्र प्रतिपाद्यपर तथा च लक्ष्यस्य दुन्दुभिशब्दस्य इत्यर्थ ।

(लो, ऋ) इह सङ्घटनादीनां गुणपरतन्त्रत्वेऽपि विशेषमाह—**क्वचिदिति** । यदाह सर्वत्रैव रसाश्रिता रचनादयो वक्त्राद्यपेक्षाया तु किञ्चित्तारतम्यमिति ।

(लो, लृ) मन्थायस्तेत्यादौ क्रोधाद्यञ्जकत्व वाक्यस्य च नाम्नरूपस्याभिनेयदुरवगाहत्वात् । अनुचितमपि दीर्घसमासान्तत्वेऽपि विशेषमाह—धारोद्धतो भीमसेनो वक्तेति नानौचित्यमिति भाव ।

---

1 'प्लुति' (च छ पु)
2 'दीर्घ' (च ज पु)

वाक्यौचित्याद् यथा उदाहृते मूर्द्धव्याधूयमानेत्यादौ । (ए)

प्रबन्धौचित्याद् यथा नाटकादौ । रौद्रेऽप्यभिनयप्रतिकूलत्वेन न दीर्घसमासादय । एवमाख्यायिकाया शृङ्गारेऽपि न मसृणवर्णादय । कथाया रौद्रेऽपि नात्यन्तमुद्धता । (ठ)

एवमन्यदपि ज्ञेयम् (ऐ)

इति साहित्यदर्पणे रीतिविवेको नाम नवम परिच्छेद ।

(वि, ठ) आख्यायिकाकथे प्रबन्धविशेषौ ।

इति श्रीमहेश्वरन्यायालङ्कारभट्टाचार्य्यकृताया साहित्यदर्पणटीकायां रीतिनिरूपणाख्यस्य नवमपरिच्छेदस्य विवरणम् ।

(लो, ए) मूर्द्धव्याधूयमानेत्यादौ च न वक्त्रौचित्यम्, नाटकान्त पातित्वाच्च उक्तप्रकारेण प्रबन्धौचित्यमपि । किन्तु काव्यस्य उद्धतार्थप्रकाशकत्वादुद्धतरचना ।

(लो, ऐ) आख्यायिकादिलक्षणमुक्तमेव । आख्यायिकाया गद्यमयप्रबन्धत्वेन गद्यस्य च विकटबन्धदीर्घसमासबहुलप्राबुर्य्यौचित्यात् तत्र शृङ्गारेऽपि न प्रायेण सुकुमाररचनादि । यदुक्त ध्वनिकृता—

("रसबन्धोक्तमौचित्य भाति सर्वत्र सश्रिता ।
रचनाविषयापेक्ष तत्तु किञ्चिद् विभेदवत् ॥" इति)

कथाप्रबन्धस्य गद्यमयत्वेऽपि शृङ्गाररसमयत्वाद्रौद्रादिरसप्रवेशेऽपि नात्यन्तमुद्धतरचनादयो विधेया । एवमन्यदपि । यदुक्त ध्वनिकृता—"सन्दानितादिषु विकटबन्धौचित्याद् मध्यमसमासदीर्घसमासे एव सङ्घटने ।"

इति श्रीसाहित्यदर्पणलोचने रीतिविवेको नाम नवम परिच्छेद ।

दशमः परिच्छेदः ।

अथावसरप्राप्तानलङ्कारानाह—(क, अ)

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ॥ १ ॥

यथा—अङ्गदादयः शरीरशोभातिशायिन शरीरिणमुपकुर्वन्ति, तथाऽनुप्रासोपमादय शब्दार्थशोभातिशायिनो रसादेरुपकारका ये तेऽलङ्कारा । (आ)

(वि, क) अथावसरेति । उद्देश्यक्रमलङ्घनात्, न तु तत्क्रमप्राप्तानिति भाव ।

(लो, अ) इदानीमलङ्कार निरूपयितुकामोऽवतारयति—अथेति । अलङ्कारानाह—स्वरूपतो विशेषतश्चेत्यर्थः ।

(लो, आ) यथेति । शब्दार्थशोभातिशायित्वमनेनालङ्कारत्वम् । तथाहि रसाद्यव्यवसायपृथक्प्रयत्ननिवर्त्यस्य यमकादेरेकरूपानुबन्धननतोऽनुप्रासस्याऽसमीक्ष्य निवेशिनस्य रूपकादेश्च रसानुपकारित्वादलङ्कारता । यदुक्तं ध्वनिकृता—

"यमकादिनिबन्धेषु पृथक् यत्नोऽस्य जायते ।
शक्तस्यापि रसाङ्गत्व तस्मादेषां न विद्यते ॥"

शक्तस्याप्यस्य कवे । यमकदुष्करादीनां यथा—

"शृङ्गारस्याङ्गिनो यत्नादेकरूपानुबन्धनात् ।
सर्वेष्वेव प्रबन्धेषु नानुप्रासः प्रकाशकः ॥" इति

रूपकादे समीक्ष्य निवेशनं च तेनैवोक्तम्—

"विवक्षातत्परत्वेन नाङ्गित्वेन कथञ्चन ।
काले च ग्रहणत्यागौ नाति निर्वहणोचिता ॥
निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम् ।
रूपकादेरलङ्कारवर्गस्याङ्गत्वसाधनम् ॥ इति ॥"

"कपोले पत्रालीं करतलनिरोधेन मृदितां
निपीतो निश्वासैरयममृतह्रदोऽधररसः ।
मुहुः कण्ठे लग्नं तरलयति बाष्पः स्तनतटं
प्रियो मन्युर्जातस्तव निनु रोधे! न तु वयम् ॥"

कपोले गण्डस्थले, पत्रालीं पत्ररचनां, करतलनिरोधेन पाणितलपीडनेन, मृदितां प्रमृष्टां । निश्वासैरमृतह्रदोऽमृतवन्मधुरोऽधररसः, निपीत आहृत । बाष्पः अश्रु, कण्ठे लग्नं सक्तं सन्, स्तनतटं, कुचप्रान्तं, मुहुः पुनः पुनः तरलयति कम्प-

अस्थिरा इति नैषां गुणवदावश्यकी स्थितिः। (ख, इ) *

यति। एवमनेन प्रकारेण नायको नायिकामुपालभते। मन्युः क्रोधः, तव प्रियो जात. अयि निरनुरोधे! अनङ्गीकृतानुवर्त्तने! वयं प्रिया हिताः न भवामः इति सम्बन्धः। अत्र पत्नालीमर्दनव्यापारेण सौभाग्यहारी मन्युः तव प्रियो जात इत्यनेन त्वदनुरोधकारिणो वयं तव हिता न भवाम इत्यनेन च उपालम्भो गम्यते। नायिका, स्वीया मध्या, नायकस्तु शठः। मानकृतो विप्रलम्भशृङ्गारः। अत्र सोपालम्भवचनं नर्म। आक्षेपोऽलङ्कार" इत्यादौ। मम तातपादानां प्रभावतीपरिणये प्रभावतीवर्णनं यथा—

कलाकुलगृहं मनः—पतगपञ्जरं कामिना
वशीकरणभेषजं, परमकौशलं वेधसः।
जगद्विजयकर्मणि स्मरमहीभुजः कार्मणं
दृशोर्निगडबन्धनं त्रिजगता परं भूषणम्॥

इत्यादौ अलङ्काराणां निर्वाहकरससम्बन्धाक्षिप्तचेतसः कवेरपृथक्-यत्ननिर्वर्त्यत्वात् न दोषः, इत्यतोऽतीवरसपरिपोषकत्वम्। यदुक्तं ध्वनिकृता—

रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।
अपृथक्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनेर्मतः।

तथालङ्कारान्तराणि निरूप्यमाणदुर्घटनान्यपि रससमाहितचेतसः प्रतिभानवतः कवेरहंपूर्विकया परापतन्ति। यथा—

"इयमम्लपित्तशमनी त्रिदोषदमनी बुभुक्षुकमनीया।
मर्त्यानामृतवटी रसगन्धकपर्पटी जयति॥" इत्यादौ।

सत्यपि रसे तमपि नोपकुर्वन्ति अनुप्रासादयः। यथा—" ओवट्टइ उल्लट्टइ" इत्यत्र अनुप्रासः।

"मित्रे क्वापि गते सरोरुहवने बद्धानने ताम्यति
क्रन्दत्सु भ्रमरेषु वीक्ष्य दयिता सद्मं पुरः सारसम्।
चक्राह्वेन वियोगिना बिसलता नास्वादिता नोज्झिता
कण्ठे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः॥"

इत्यत्र चोद्दीपनरूपाया बिसलतायाः प्रयत्नजीवहरणावसानोपकारकत्वात् जीवननिरोधार्गलरूपोत्प्रेक्षाया विप्रलम्भशृङ्गारतदाभासयोरननुगुणत्वान्नालङ्कारः रसस्योपकारक। इह नोपमेति उत्प्रेक्षानिरूपणे वक्ष्यते। तदेव सुष्ठूक्तं शब्दार्थशोभातिशयद्वारेण रसादेरुपकारका अलङ्कारा इति।

(लो, इ) अस्थिरा इति—कारिकापदमनूद्य विवृणोति। नैषामिति—गुणादीना

* 'अलङ्कारा रसं विनाऽवतिष्ठन्ते। सन्तमपि रसं परम्परया शब्दार्थद्वारेणोपकुर्वन्ति न तु साक्षात्। गुणास्तावत् रसं विना नावतिष्ठन्ते, अवस्थिताश्चावश्यं रसं

सम्प्रति शब्दार्थयोः प्रथमं शब्दस्य बुद्धिविषयत्वात् शब्दालङ्कारेषु वक्ष्येषु शब्दार्थालङ्कारस्यापि पुनरुक्तवदाभासस्य चिरन्तनैः शब्दालङ्कारमध्ये लक्षितत्वात् प्रथमं तमेवाह। (ग, ई)

आपाततो यदर्थस्य पौनरुक्त्या[1]वभासनम्।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः ॥ २ ॥ (घ, ङ) ×

उदाहरणम्—"भुजङ्गकुण्डली व्यङ्गशशिशुभ्रांशुशीतगुः।

(वि, ख) नैषां गुणवदिति—माधुर्य्यादीना शृङ्गारादिव्यापकत्वात् तत्र तेषामवश्यस्थितेः।

(वि, ग) तत्रादौ पुनरुक्तवदाभासस्य शब्दार्थोभयालङ्कारत्वे शब्दालङ्कारतया कथनबीजं प्रदर्शयंस्तमाह—**शब्दालङ्कारस्यापीति**।

(वि, घ) **आपाततो यदर्थस्येति**। आपातत एव न तु प्रणिधानेऽप्यर्थपौनरुक्त्यम्। भिन्नाकारशब्दत्वेन पौनरुक्त्यप्रसक्तिस्तु नास्त्येव।

(वि, ङ) **भुजङ्गकुण्डलीति**। शिवो जगन्त्यपि सदाऽपायादव्याद् अवतु।

काव्येष्वन्वयव्यतिरेकानुविधायिनो रसस्य धर्मत्वेन अवस्थितिः। अलङ्काराणा च क्वचिदभावेऽपि न काव्यत्वहानिरित्यर्थः। यथा गुणा रसस्य स्थिरधर्मास्तथा नैते शब्दार्थयोः। एवं शब्दार्थयोरुपचरितधर्मत्वेनास्थिरत्वेन शब्दार्थशोभाधानद्वारेण रसोपकारकत्वेन च गुणव्यतिरिक्तत्वमलङ्काराणा दर्शितम्।

(लो, ई) सम्प्रतीत्यवतार्य्य तद्भेदानाह—**शब्दार्थयोरिति**। आह लक्षयतीत्यर्थः।

(लो, उ) आपातत. पौनरुक्त्यावभासनं, पुनरुक्तिवत् प्रत्ययः, पर्य्यवसाने तु न तथा। अतः पुनरुक्तवदाभास इत्यर्थवन्नामालङ्कारः। भिन्नाकारशब्दग इत्यनेन यमकव्यवच्छेदः। अत्र " नवपलाशपलाशवनं पुर " इत्यादावपि आपाततः पौनरुक्त्यावभासनं, किन्तु तदेकरूपशब्दगतम्।

(लो, ऊ) कुण्डली सर्पः, कुण्डलत्वाच्च। शशिशुभ्रांशुशीतगुशब्दास्त्रय एव आपाततश्चन्द्रार्थाः। पर्य्यवसाने तु शशिनः शुभ्रा उज्ज्वला येंऽशवः तद्वत् शीता साह्लादुपकुर्वन्ति" इति गुणालङ्कारयोर्भेद.।

अस्थिरा इति—यथा माधुर्य्ये शृङ्गारादिनियतमोजो वीरादिनियतं प्रसादः सर्वरसनियतस्तथालङ्काराणा सर्वत्र स्वेच्छया प्रयोगादिति भावः। अथवा रसे तेषा स्थितिर्न नियतेति भावः।

× पुनरुक्तस्येव पुनरुक्तवत् आभासो ज्ञानं पुनरुक्तवदाभासः आपाततः तात्पर्यानुसन्धानं विना एकार्थतया प्रतीतौ पुनरुक्तिवत् प्रत्ययः। पर्य्यवसाने तात्पर्यानुसन्धाने तु न पौनरुक्त्यमिति भावः। भिन्नाकारो यः शब्दः तद्विषयः।

1 'पौनरुक्त्येन भासनम्' (क.पु.)

जगन्त्यपि सदापायादव्याच्चेतोहरः शिवः ॥" (ङ, ऊ)

अत्र भुजङ्गकुण्डल्यादिशब्दानामापातमात्रेण सर्पार्थतया पौनरुक्त्य-प्रतिभासनम्। पर्य्यवसाने तु भुजङ्गरूपं कुण्डलं विद्यते यस्य इत्याद्यन्यार्थत्वम्। पायादव्यादित्यत्र क्रियागतोऽयमलङ्कारः। पायादित्यस्याऽपायादित्यत्र पर्य्यवसानात्। (च)

'भुजङ्गकुण्डली'तिशब्दयोः प्रथमस्यैव परिवृत्तिसहत्वम्। 'हरः शिवः' इति द्वितीयस्यैव। 'शशिशुभ्रांशु' इति द्वयोरपि। (छ, ऋ)

"भाति सदानत्याग"इति न द्वयोरपि। इति शब्दपरिवृत्तिसहत्वासहत्वाभ्या-मस्योभयालङ्कारत्वम्। (ज, ॠ)

कीदृशः, भुजङ्गरूपकुण्डलवान्, तथा व्यक्तेन शशिन शुभ्रांशुना शीतः शीतलः गौर्वृषः यस्य तादृशः। चेतोहर. मनोहरः।

(वि, च) अपायादित्यत्र **पर्य्यवसानादिति**। श्लिष्टयकारप्रतिसन्धानात् तत्र पर्य्यवसानम्।

(वि, छ) **प्रथमस्यैवेति**। सर्पकुण्डलीत्युक्तेऽपि पौनरुक्त्यस्य भानात्। **द्वितीयस्यैवेति**। परिवृत्तिसहत्वमित्यन्वय। मृडो भव इत्युक्तवपि तथात्वात्। **द्वयोरपीति**। परिवृत्तिसहत्वमित्यन्वय.। चन्द्रशीतांशुपददानेऽपि तथात्वात्।

(वि, ज) **भातीति**। भाति सदानत्याग स्थिरतायामिति काव्यप्रकाशोक्त्यै-कदेशप्रदर्शनामिदम्। तत्र भवान् सदा अनत्या परनतिराहित्येन भातीति। स्थिरतायाम् अगः पर्वतश्चेत्यर्थः। तत्र दानत्यागपदपौनरुक्त्यावभास.। अत्र न द्वयोरपि परिवृत्ति-सहत्वम्।

गावः कान्तयो यस्य इति। अपायात् अपायत अव्यात् रक्षतात्। हरः सदाशिवः मनोहरश्च। अत्र पायादिति पाधातोः, अव्यादिति अवधातोः रक्षणार्थस्य लिङन्तत्वे पौनरुक्त्यावभासः। पर्य्यवसाने तु सन्धिहेतुकं लुप्तमकारमादायापायशब्दस्य सुबन्त-त्वमित्यर्थः।

(लो, ॠ) अस्य च शब्दार्थालङ्कारत्वे हेतुमाह—**भुजङ्गेति**। परिवृत्ति-सहत्वम्, अहि—कुण्डली, 'सर्पकुण्डलीत्याद्युक्तवपि पौनरुक्त्यावभासता। तेनात्र कुण्डलीति पदस्य न परिवृत्तिसहत्वम्। एवं 'हरः शिवः' इत्यादावपि बोद्धव्यम्।

(लो, ॠ) तृतीयादौ च दानत्यागाभ्या सह वर्त्तते इति पौनरुक्त्यावभासः। सदा सर्वदा अनत्या, अनमनेन, अग. पर्वत इति पर्य्यवसानम्। न द्वयोर्दानत्यागयो.। परिवृत्तिसहत्वासहत्वाभ्या क्वचित् परिवृत्तिसहत्वादर्थालङ्कारत्वं, क्वचित्तदसहत्वाच्छब्दा-लङ्कारत्वं, दोषगुणालङ्काराणा शब्दार्थगतत्वेन व्यवस्थितेरन्वयव्यतिरेकाभ्या नियम-नादित्यर्थ।

अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् ॥ ३ ॥ †

स्वरमात्रसादृश्य तु वैचित्र्याभावान्न गणितम्। रसाद्यनुगतत्वेन प्रकर्षेण[1] न्यासोऽनुप्रास (झ, ट)

छेको व्यञ्जनसङ्घस्य सकृत् साम्यमनेकधा ॥ ४ ॥ (ञ, ए)

(वि, झ) अनुप्रासालङ्कारमाह–**अनुप्रास** इति। **स्वरमात्रसादृश्यमिति**–मात्रपदात् व्यञ्जनसाम्यव्युदास। तेन "के वाते सेवया देशे गेहे च लेभिरे यश" इत्यत्र नानुप्रास। व्यञ्जनमात्रसाम्ये तु कुपितकपिकपोलेत्यादौ अनुप्रास एव। क्वचिदुभयसाम्येऽपि यथा—" धूतचूतप्रसून " इति। यथा वा—"गुणसिन्धु सता बन्धुस्त्वबन्धुस्त्वपरो जन।" केवल स्वरमात्रसाम्य व्युदस्त बोध्यम्। अनुप्रासपदव्युत्पत्तिमाह—**रसाद्येति**। अनुगमश्च व्यञ्जना। अनुप्रासविशिष्टपदवाक्याभ्या रसादिव्यञ्जनात्। आदिपदाद् वक्तुर्वेदग्ध्यपरिग्रह।

(वि, ञ) तत्र छेकानुप्रासलक्षणमाह–**छेक** इति। व्यञ्जनसङ्घत्वमत्र एकव्यञ्जनभिन्नत्वमात्र विवक्षितम्। तेन द्वयोस्त्र्यादीना च तथात्वम्।

(लो, ट) **अनुप्रास** इति—स्वरवैषम्येऽपि शब्दसाम्यमित्यत्र शब्दा व्यञ्जनान्येव। स्वराणा स्वरानाधारत्वात्। तेनैषा बालायातीत्यादौ स्वरमात्रस्य असकृदावृत्तावपि व्यञ्जनवैसादृश्ये चारुत्वाभावस्य सहृदयसवेद्यत्वान्नालङ्कार। एतदेवोक्त वृत्तौ स्वरमात्र इत्यादिना। किञ्च स्वरस्य वैषम्येऽपि इत्यनेन "कावेरी वारी"त्यादेरेतदवाच्यत्वम्। अपिशब्दात् "दर्दुरदुरध्यवसाय सायम्" इत्यादौ दुरशब्दसाम्ये स्वरसाम्येऽप्यनुप्रासत्वम्। "नवपलाशपलाशवन पुर" इत्यादौ यमकस्यापवादत्वेनानुप्रासबाधकता। दर्दुरदुर इत्यादौ प्रथमदुरशब्ददकारस्य मूर्ध्नि रेफयोगान्न यमकम्। दुरध्यवसाय सायमित्यादौ चानुस्वारयोगादनुप्रास एव न यमकम्। "आकर्ण्य कर्णमधुराणी"त्यादौ च प्रथमकर्णशब्दस्य स्वत स्वरयोगेऽपि द्वितीयकर्णशब्दनिष्ठस्वभवद् स्वरवैषम्यम्। नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृतेत्यादौ नकाररेफयुक्तदकारयोर्दूरावस्थानाद् अनुप्रासाभावबुद्धिर्न कार्य्या, सस्कारविच्छेदाभावाद् यदुक्त—"पूर्वानुभवसस्कारबोधनीयेत्यदूरते"ति।

(लो, ए) तद् भेदानाह। सङ्घशब्देनात्र नैकस्य व्यञ्जनस्यासकृदेकवारमनेकधा स्वरूपत क्रमतश्च। एतदेवोक्त वृत्तावनेकधेत्यादिना।

---

† स्वरस्य वैषम्येऽपि अमाम्येऽपि यत् शब्दसाम्य व्यञ्जनस्य (एकस्य द्वयोर्बहूना वा) साम्य सोऽनुप्रास इत्यथ। अत्र शब्दपद व्यञ्जनपरम्। यमकेऽतिव्याप्तिवारणाय वैषम्येऽपि स्वरस्येत्युक्तम्। अपिना स्वरसादृश्ये च अनुप्रास। यमके तु स्वरसादृश्यनियम। अनुप्रासे तु न तथा। उदाहरणं लोचन्यां द्रष्टव्यम्।

[1] 'प्रकृष्टो' (ग घ)

छेकश्छेकानुप्रासः । अनेकधेति स्वरूपतः क्रमतश्च । "रसः सर" इत्यादेः क्रमभेदेन सादृश्यं नास्यालङ्कारस्य विषयः । (ट, ऐ)

उदाहरणं मम सातपादानाम्—

"आदाय बकुलगन्धानन्धीकुर्वन् पदे पदे भ्रमरान् ।
अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः ॥" (ठ)

अत्र "गन्धानन्धी" इति संयुक्तयोः "कावेरीवारि" इत्यसंयुक्तयोः "पावनः पवन" इति बहूनां व्यञ्जनानां सकृदावृत्तिः । छेको विदग्धः । तत्प्रयोज्यत्वादेष छेकानुप्रासः । (ट, ओ)

अनेकस्यैकधा साम्यमसकृद् वाप्यनेकधा ।
एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते ॥ ५ ॥ (औ) *

एकधा स्वरूपत एव, न तु क्रमतोऽपि । अनेकधा स्वरूपतः क्रमतश्च

(वि, ट) अनेकधेति । वर्णानामानुपूर्व्याच्च साम्यमित्यनेकधात्वम् । ईदृशैकधात्वं तु साम्यानुप्रासस्य विषय इत्याह—**सरो रस** इति । न चैवं वर्णेनानुपूर्व्याच्च साम्येऽनुप्रासाद् यमकाभेदप्रसक्तिरिति वाच्यम्, तत्र स्वरस्याऽपि साम्येन एतद् भेदात् ।

(वि, ठ) आदायेति—भ्रमराणामन्धीकरणं गन्धलोभेन तदनुसरणमात्रेण विषयाऽन्तरादर्शनम् ।

(वि, ड) वर्णद्वयस्यापि संघपदार्थत्वेनात्र विवक्षणात्तयोरनेकवर्णानां चात्र सकृत्त्वं दर्शयति—**अत्रेति** । **तत्प्रयोज्यत्वादेवेति** । तथा च छेकपदं तत्प्रयोज्ये निरूढलाक्षणिकम् । एवं च वृत्त्यनुप्रासस्यापि विदग्धप्रयोज्यत्वेऽपि तत्र रूढ्यभावान् न छेकपदप्रयोगः ।

(वि, ढ) वृत्त्यनुप्रासमाह—**अनेकस्येकधेति** । तत्रैकधा पदार्थं व्याचष्टे—**स्वरूपत एवेति** । व्यञ्जनवर्णस्वरूपत इत्यर्थः । असकृद् वाप्यनेकधेत्यत्राऽनेकधात्वं

(लो, ऐ) रस रस इत्यत्र रसयो स्वरूपत एव साम्यं, न तु क्रमतः । कावेरी वारीत्यादौ वरयोरिव क्रमतोऽपि ।

(लो, ओ) संयुक्तयोर्नकारधकारयोः । छेक इत्यादिना पूर्वप्रसिद्धस्य नाम्नः कथ-मिहोल्लेखः ।

(लो, औ) **अनेकस्येति** । अनेकस्यार्थाद् व्यञ्जनस्य एकधा साम्यम् एव । अनेकधापि वाऽसकृत् साम्यं द्वितीयः, असकृदित्यनेन छेकानुप्रासव्यवच्छेदः । एकस्य व्यञ्जनस्य सकृदसकृद् वा साम्यमिति द्वाविति चतुर्धा वृत्त्यनुप्रासः ।

---

* (१) अनेकस्य व्यञ्जनसङ्घस्य एकधा स्वरूपतः साम्ये । (२) अनेकव्यञ्जन-सङ्घस्य अनेकधा स्वरूपक्रमाभ्यामसकृत् साम्ये । (३) एकस्य व्यञ्जनस्य सकृत् साम्ये । (४) एकस्यासकृत् साम्ये वृत्त्यनुप्रासश्चतुर्विधः स्यादित्यर्थः ।

सकृदपीत्यपिशब्दादसकृदपि । (ढ) उदाहरणम्—

"उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर—
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वरा ।
नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण—
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासरा ॥' (ण) +

अत्र "रसोल्लासैरमी" इति रसयोरेकधैव साम्यम् । न तु तनैव क्रमेणापि । द्वितीये पाद तु कलयोरसकृत् तेनैव क्रमेण च ।

प्रथमे एकस्य 'म'कारस्य सकृत् धकारस्य चासकृत् । रसविषयव्यापारवती

व्याचष्ट—अनेकधेति । अत्र अनेकस्येत्यस्यान्वय तथा चानेकस्यानेकधा सकृत्त्व ह्येक । असकृत्त्वे तु वृत्त्यनुप्रास । 'एकस्य सकृदपि इत्यत्राऽपिकारसमुचित दर्शयति—**सकृदर्पीत्यपिशब्दादिति** । एकस्य सकृत्त्वे अनुप्रासस्तु न काव्यप्रकाशसम्मत । जातच्युतेरत्र वैचित्र्यानुभवात् । स्वरसादृश्यसत्त्वे तु तस्यापि सम्मतो यथा धूत चूतप्रसून' इत्यत्र ।

(वि, ण) उन्मीलदित्यादि । काकली तु कलौ सूक्ष्मे ध्वनौ तु मधुरा स्फुटे' इत्यमर । तद्रूपै कलकलै ।

(वि, त) अत्र अनेकस्यैकधासकृत्त्व दर्शयति—**रसोल्लासैरमी** इति । **रसयोरिति**—रसेति रेफसकारयोरानुपूर्वीराहित्यादेकधा । **कलयोरिति**—कोकिल काकलीकलकलैरित्यत्रेत्यर्थ । एकस्य सकृत्त्वमसकृत्त्व दर्शयति—**प्रथमे** इति । धूतचूतेत्यत्र तकारस्य । मधुगन्धलुब्धमधुपत्यत्र धकारस्येत्यर्थ । समासमेत्यत्र तु अनेकधानेकस्य सकृत्त्वाच्छेक एवेत्यतस्तन्न दर्शितम् । वृत्त्यनुप्रास इत्यत्र वृत्तिपदार्थं

(लो, अ) प्राणसमासमागमेत्यत्र च यमकत्व वक्ष्यत । यद्यपि ह्लासैरमी वासरा इत्यत्र च रसयोरनेकधा साम्यहेतुकेन छेकानुप्रासेन सहैकधासाम्यभेदस्य वृत्त्यनुप्रासभेदस्य एकवाक्यानुप्रवेशरूप सङ्करो वक्ष्यते तथापि वासरशब्दमगणे यित्वा वृत्त्यनुप्रासभेदकथनम् । एवमन्यत्र । **रसविषयेति**। रसविषय स्वादानुप्राणको व्यापारो वृत्ति । वृत्त्यतेऽनया शब्दो रसव्यञ्जनयेति व्युत्पत्त्या । तेन तद्वती उक्त-

---

+ पाठकै पाठ्ये कथकथमपि कष्टमुष्ट्या अमी वसन्तकालीना वासरा नीयन्त समाप्यन्ते । वासरा कीदृशा—उन्मीलत् प्रकाशात् यन्मधु, तस्य गन्धेन लुब्धो या मधुपो भ्रमरस्तेन व्याधूता कम्पिता ये चूताङ्कुरा, तेषु क्रीडन्ता ये कोकिला तेषां का कश्च मधुरस्फुटध्वनय त एव कलकलास्तैरुद्गीर्णा प्रादुर्भूता कर्णज्वरा कर्णपीडा येषु । पथिकै कीदृशै—ध्यानावधानक्षणा ध्यानावलम्बनकृत, तत्र प्राप्ता प्राणा यस्यास्ता, ईदृशाना समासमागमेन, उल्लास आनन्दो यत्र तथाभूता । इमे वृत्तिपदा स्यु ।

1 'ण' (इति क पु)

वर्णरचना वृत्तिः । तदनुगतत्वेन प्रकर्षेण न्यसनाद् वृत्त्यनुप्रासः । (त, अ)

उच्चार्य्यत्वाद् यदैकत्र स्थाने तालुरदादिके ।
सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते ॥ ६ ॥ (थ, आ)

उदाहरणम्—

"दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुवे' वामलोचनाः ॥" (द) ×

अत्र "जीवयन्ती"ति "या" इति "जयिनी"रिति । अत्र जकारयकारयोरेकत्र स्थाने तालौ उच्चार्य्यत्वात् सादृश्यम्। एवं दन्त्यकण्ठ्यानामप्युदाहार्य्यम् । एष च सहृदयानामतीव श्रुतिसुखावहत्वाच्छ्रुत्यनुप्रासः ।

व्यञ्जनं चेद् यथावस्थं सहाद्येन स्वरेण तु ।

व्याचष्टे—रसविषयेति । रसविषयो व्यापार व्यञ्जना, तद्वत्या वस्तुरचनायां वस्तुनोऽर्थस्य शब्देन रचनायां वृत्तिसंज्ञा इत्यर्थ । तत्रानुप्रासशब्दार्थं योजयति—तदनुगतत्वेनेति । तादृशरचनासम्बन्धित्वेनेत्यर्थः । प्रकर्षश्च वर्णसाम्यम् ।

(वि,थ) श्रुत्यनुप्रासाख्यमनुप्रासान्तरमाह—**उच्चार्य्यत्वादिति** । वर्णसाम्याभावेऽपि एकस्थानोच्चार्य्यत्वसादृश्यादित्यर्थः ।

(वि, द) दृशा दग्धमिति—विरूपाक्षस्य जयिनीस्ता वामलोचना अहं स्तुवे । लोचनस्य विरूपत्वसुन्दरत्वात्मकवामत्वाभ्या जयपराजयावुक्त्वा क्रियाभ्यामप्याह—**दृशा दग्धमिति** । हरेण मनसिजस्य दृशा दाहस्ताभिस्तु कटाक्षरूपया दृशा जीवनमतोऽपि जयः ।

(वि, ध) अन्त्यानुप्रासाख्यमनुप्रासान्तरमाह—**व्यञ्जनं चेदिति । यथावस्थमिति** । अनुस्वारेण विसर्गेण वा विशिष्टोऽविशिष्टो वा यः स्वरः केवलो वा

रीत्या, रुक्षादिरसोपयिककोमलपरुषमध्यमवर्णारब्धा वापि रचना वृत्तिरुपचारादिति भाव । तदनुगतत्वेन तया वृत्त्योपलक्षितत्वेन ।

(लो, आ) उच्चार्य्यत्वादिति—द्वयोर्वर्णनां वा व्यञ्जनानां तालव्यत्वेन दन्त्यत्वेनादिशब्दात् कण्ठ्यत्वादिना साम्यं श्रुत्यनुप्रास इत्यर्थः । इमं च श्रुत्यनुप्रासं "निवेशयति वाग्देवी कस्यांचन् प्रतिभावतः" इत्यादिना प्रशंसन्ति प्राच्याः ।

(लो, इ) व्यञ्जनमिति । केश इत्यत्र यथासम्भवमिति वचनात् संयुक्ताक्षररहितो विसर्ग इत्यत्र शकारः स्वरविसर्गयुक्तः कथंस्थितेनाऽऽकारेण सह । विलास

× विरूपे विषमे अक्षिणी यस्य तादृशस्य विरूपाक्षस्य शिवस्य जयिनीस्ता वामलोचना सुनयना (वामानि रम्याणि लोचनानि यासाम्) स्तुवे स्तौमीत्यर्थः । याः कर्त्र्यः दृशा दग्धं मनसिजं दृशैव जीवयन्ति । शिवेन चक्षुषा कामो नाशितः । स्त्रीभिस्त्वदृष्टेन चक्षुषा कामो जीवित इति कामशत्रोः शिवस्य जय इति तात्पर्य्यार्थः ।

1 "स्तुमो" (धपुस्तके)

आवर्त्यतेऽन्ययोज्यत्वादन्त्यानुप्रास एव तत् ॥ ७ ॥ (घ)

यथावस्थमिति यथासम्भवमनुस्वारविसर्गस्वरसंयुक्ताक्षरविशिष्टम् । एष च प्रायेण पादस्य पदस्य चान्ते प्रयोज्यः । पादान्तगो यथा मम । (ङ)

"केशः काशस्तबकविकासः कायः प्रकटितकरभविलासः ।
चुम्बदिग्धवराटककल्पं त्यजति न चेतः काममनल्पम् ॥" (च, छ)

पदान्तगो यथा—

"मन्दं हसन्तः पुलकं वहन्तः" इत्यादि ।

शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्य्यमात्रतः । *

पूर्वपादस्य पूर्वपदस्य वा अन्ते उच्चरितस्तादृशस्वरविशिष्टोऽवस्थ व्यञ्जनं चेदाद्येन स्वरेण स्वपूर्वभूतस्वरेण सह आवर्त्यते तदाऽन्त्यानुप्रास इत्यर्थः । तत् संज्ञाव्युत्पत्तिमाह—अन्तयोज्यत्वादिति । यथा एकपादान्ते धीरः अन्यपादान्ते वीरः इति, यथा वा एकपादान्ते सारमन्यपादान्ते हारमिति । एवं कारी हारीति स्वरमात्रे ।

(वि, न) यथावस्थमिति व्याचष्टे—यथासम्भवमिति । अनुस्वारविसर्ग-स्वरणामन्यतरसम्भवो यथासम्भवपदार्थः । अक्षरविशिष्टमित्यत्र यथास्थं बोध्यम् । अन्ययोज्यत्वं व्याचष्टे—एष चेति । प्रायेण इत्यनेन पञ्झटिकादिच्छन्दःस्वेवाऽस्य सम्भवो नानुष्टुबादाविति दर्शितम् ।

(वि, प) केशः काशेति—जरत उक्तिरियम् । काशपुष्पस्तबकवद् धवलः केशाः प्रकटितस्य वक्त्रस्य कुञ्जस्य करभस्य करिशावकस्येव विलासो यस्य कायस्तादृशः । तथापि चेतोऽनल्पं बहु काममभिलाषं न त्यजतीत्यर्थः । तथापीत्याकाङ्क्षावललभ्यम् । अत्र "काशलासशब्दौ स्वविसर्गान्त्यस्वरविशिष्टान्त्यव्यञ्जनौ । कल्पानल्पशब्दौ सानुस्वारान्त्यस्वरविशिष्टान्त्यव्यञ्जनौ । तथान्त्यव्यञ्जनं तत्पूर्वस्वरेण सहागतम् ।

(वि, फ) लाटानुप्रासात्यमनुप्रासमाह—शब्दार्थयोरिति । शब्दद्वयार्थयो-

---

रयत्र लकारस्थितेनाऽऽकारेण सह वर्त्तते । कल्पमित्यत्र लकाररूपं व्यञ्जनं पकारानुस्वारयुक्तं, पकारस्थितेनाऽकारेण सह । अनल्पेत्यत्र नकारस्थितेनाऽकारेण सहेत्यर्थः । प्रायेण इति वचनात् मम तात्पदानां लक्ष्मीस्तवे यथा—

("श्रुताधीता गीता श्रुतिभिरविगीतानिलगुणा
गुणातीता भीताऽभयदृदविनीताऽप्रचयदा ।
नतिप्रीता पीताम्बरसुपरिणीताऽमरवधू-
दृशा पीता स्तीता मलयविपरीता विजयताम् ॥")

इत्यादौ क्वचिदन्ययोज्यत्वाभावेऽप्ययमनुप्रासो दृश्यते । अस्य च प्राचीनोक्त-

---

1 पुस्त (च पुस्तके)

* तात्पर्यमन्वयः । दृश्यविधेयभावादि । कर्मकर्मत्वादिरूपश्च सम्बन्धः

लाटानुप्रास इत्युक्तः ॥ ८ ॥ (फ, ई)

उदाहरणम्—

"स्मेरराजीवनयने ! नयने किं निमीलिते ।
परय निर्जितकन्दर्पं कन्दर्पवशगं प्रियम् ॥" (ब) †

अत्र विभक्त्यर्थस्यापौनरुक्त्येऽपि मुख्यतरस्य प्रातिपदिकांशद्योत्यधर्मिरूपस्याभिन्नार्थत्वाल्लाटानुप्रासत्वमेव । (भ)

" नयने तस्यैव नयने च ।" अत्र द्वितीयनयनशब्दो भाग्यवत्तादिगुण-

---

रित्यर्थः । पौनरुक्त्य पुनः पुनः कथनम् । ततश्च पुनरुक्तिदोषप्रसक्तत्वाह–भेदे इति । तात्पर्य्यमुद्देश्यविधेयताविषयम् । मात्रपदादर्थभेदो व्यावर्त्त्यते ।

(वि, ब) स्मेरराजीवेति—नायकं दृष्ट्वा क्रोधान्निमीलिताक्षीं मानिनीं प्रति सख्या उक्तिरियम् । रूपेण कन्दर्पनिर्जेताऽपि त्वदनुरागात् त्वद्वशगस्तथा चात्र मानाऽनौचित्यमिति भावः । अत्र आद्ये नयनकन्दर्पपदे उद्देश्यतात्पर्य्यकेऽन्त्ये तत्पदे तु विधेयतात्पर्य्यके इत्यतो भेदः । पदार्थौ तु अभिन्नौ मात्रपदात् प्रकृत्यर्थस्य एव भेदव्यावृत्तिर्न तु प्रत्ययार्थस्य ।

(वि, भ) इत्यतो विभक्त्यर्थभेदं दर्शयति—**अत्र विभक्त्यर्थस्येति । मुख्यतरस्येति ।** प्रातिपदिकांशौ नयनकन्दर्पपदे, तद्द्योत्यस्य,तद्बोध्यस्य धर्मिरूपस्य नयनकन्दर्पात्मकस्य अर्थस्य प्रकृत्यर्थान्वितस्वार्थबोधकत्वेन अस्वतन्त्रप्रत्ययापेक्षया स्वातन्त्र्याद् मुख्यतरस्याऽभिन्नत्वाद् इत्यर्थः ।

(ग, म) यत्र तु प्रकृत्यर्थस्यापि भेदस्तत्र न लाटानुप्रासत्वमित्याह—**नयने इति ।** अत्र द्वितीयनयनशब्दस्य भाग्यवत्तादीत्यर्थे तात्पर्यात् तात्पर्य्यस्यैव प्रातिपदिकार्थस्यापि भेद इति दर्शयति—**अत्र हीति** । तथा च अर्थान्तरसंक्रमित-

---

लङ्कारेभ्यः पृथगनुभवसिद्धचमत्कारविशेष इति पृथगलङ्कारत्वम् ।

(लो, ई) शब्दार्थयोरिति । तात्पर्य्यमन्यपरत्वं, तच्चार्थान्तरसंक्रमितस्वरूपं तच्छब्देन विधेयतया प्रकृत्योपयोगार्थविवक्षणात् तन्मात्रेण, न तु स्वरूपेण भेदो विशेषः ।

(लो, उ) अत्रेति । विभक्त्यो. सुपो. । धर्मिरूपस्य चक्षुरादिरूपस्य । विभक्तीत्युपलक्षणं, तेन लिङ्गवचनयोरपि । एवं सुप्रतिपत्तयेऽसन्दिग्धमुदाहरणं दर्शयित्वा सन्दिग्धं दर्शयति–नयने इति । तात्पर्य्यमात्रेण न तु स्वरूपेण । इह च

न्वयः । अन्वयमात्रतो भेदे सति न त्वर्थतो भेदे । एतेन यमकवैलक्षण्यं दर्शितम् । अन्वयमात्रभेदादेवार्थपुनरुक्तिर्न दोषः ।

† हे स्मेरराजीवनयने विकसितपद्मनेत्रि नयने चक्षुषी त्वया किं निमीलिते सङ्कोचिते । सुन्दरत्वात् निर्जितः कन्दर्पो येन तादृशं प्रियं कन्दर्पवशगं कामायत्तं पश्य । अतोऽत्र मानं मा कुरु ।

विशिष्टरूपतात्पर्यमात्रेण भिन्नार्थ । (म, ङ) *

यथा वा—

"यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ।
यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ॥" (य, ऊ) +

अत्रानेकपदाना पौनरुक्त्यम् । एष च प्रायेण लाटजनप्रियत्वाल्लाटानुप्रास ।

अनुप्रासः पञ्चधा तत ॥ ६ ॥ (र, ऋ)

वाच्यलक्षणाविषय एवाय न लाटानुप्रास इत्युक्तम् । अतएव अर्थान्तरसक्रमितवाच्य-लाटानुप्रासयो कथितपदादोपताक्थने पृथगेव तद्द्वयमुक्तम् ।

(वि, य) अस्य एकपदे इव अनेकपदेष्वपि सम्भव दर्शयति—यथा वा । यस्य चेति—अत्र प्रथमार्ध दवदहने तुहिनदीधितित्व विधेयमतापकरत्वात् ।

(वि, र) पञ्चधेति—छेकानुप्रास , वृत्त्यनुप्रास , श्रुत्यनुप्रास , अन्त्यानुप्रासो लाटानुप्रासश्चेति पचधा । काव्यप्रकाशे तु लाटानुप्रासस्यैव पञ्चधात्वमुक्तम् ।

पौनरुक्त्यप्रतिभासमात्रमलङ्कार , न तु प्रतीयमानो विशेष तस्य गूढत्वादिगुणीभावेहेतुत्वाभावात् ।

(लो, ऊ) एष च बहुपदनिष्ठोऽपि सम्भवतीति तत्रोदाहरणान्याह—यथा वेति । यस्य न सविधे दयितेत्यादौ प्रथमार्धे तुहिनदीधितिर्दवदहन द्वितीयार्ध दव दहन तुहिनदीधितिरिति सम्बन्ध ।

(लो, ऋ) उपसहरति—अनुप्रास इति ।

---

* अलङ्कारसर्वस्वे—"तात्पर्यमन्यपरत्वम् । तदेव भिद्यते यत्र न तु शब्दार्थरूपम् । यथा, " ताला जाअन्ति गुणा—"इत्यादि । अत्र समुदबन्धव्याख्याने—अन्यपरत्वम्—उद्देश्यविधेयत्वादिभेदान्वयभेद । ताला इत्यादि—

"तदा जायन्ते गुणा यदा ते महृदयैर्गृह्यन्ते ।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि ॥"

अत्र प्रथमस्य कमलशब्दस्य रविकिरणानुगृहीतानीत्यनेनान्वितस्योद्देश्यार्थत्वम्, द्वितीयस्य तु भवन्तीत्यनेनान्वितस्य विधेयार्थनिष्ठत्वम् । यद्यप्यस्य शोभावत्त्वादिलक्षणेऽर्थान्तरे सक्रमितत्वादर्थभेद । तथापि सङ्केतितार्थापेक्षया पौनरुक्त्य द्रष्टव्यम् ।" अनो लोचनस्य व्याख्यानमव समीचीन न तु मदेश्वरभट्टाचार्यस्य ।

+ यस्य पुरुषस्य सविधे समीप दयिता कान्ता नास्ति तस्य तुहिनदीधितिश्चन्द्र दवदहनो विरहोद्दीपकताया दावाग्निर्भवति । यस्य तु सविधे दयिता अस्ति तस्य दव दहनस्तुहिनदीधितिर्भवति प्रथमार्धे दवदहनो विधेय , तुहिनदीधितिरनुवाद्य उत्तरार्धे तयोर्विपर्यय । अनोऽन्वयभेद स्पष्ट एव ।

स्पष्टम्।

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥ १० ॥ (ल) ⊛

अत्र द्वयोरपि पदयोः क्वचित् सार्थकत्वं क्वचिन्निरर्थकत्वम्। क्वचिदेकस्य सार्थकत्वमपरस्य निरर्थकत्वमत उक्तम्—सत्यर्थ इति। (व, ऋ)

तेनैव क्रमेणेति " दमो भोद " इत्यादेर्विविक्तविषयत्वं सूचितम्।

एतच्च पादपादार्धश्लोकावृत्तित्वेन पादाद्यावृत्तेश्चानेकविधतया प्रभूततमभेदम्। (श)

दिङ्मात्रमुदाहियते—

"नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।

(वि, ल) यमकनिकरमाह—सत्यर्थ इति। अर्थे सति पृथगर्थायाः पदसंहतेः तेनैव क्रमेण आवृत्तिरित्यर्थः। अत्र लाटानुप्रासवारणाय पृथगर्थाया इत्यवश्यं देयम्। तथा च शमरतेऽमरतेजसीत्यत्र यमकितभागयो. द्वयोः "समरसमरसोऽय"मित्यत्र एकतरस्य निरर्थकत्वे पृथगर्थाया इत्युक्त्यनौचित्यम्; अतोऽर्थे सत्युक्तमित्याह।

(वि,व) अत्र द्वयोरपीति। द्वयोरेकतरस्य वा अर्थाऽसत्त्वे तु स्वरव्यञ्जनसंहतेः तेनैव क्रमेण आवृत्तिरित्येवमेव लक्षणान्तरमित्यभिप्राय। उभयानुगमस्तु एकार्थाभिप्राया इत्येवंरूपेण बोध्यम्।

(वि, श) अस्य प्रभेदा बहव इत्याह—एतच्चेति। पादादीत्यादिपदात् पादस्यैव तृतीयचतुर्थभागस्य अनियततद्भागस्य च परिग्रहः।

(वि, ष) नवपलाशेति। स कृष्णः पुरः पुरमिं वसन्तमलोकयत्। कीदृशं

(लो, ऋ) एतदेव वृत्तौ विशदयति—अत्रेत्यादि। अत्र यमके। पदयोर्यमकावयवभूतयो स्वरव्यञ्जनयोरित्यर्थः। प्रियतमायतमानेत्यादिवत् निरर्थकत्वम्। द्वयोरेकस्य वानर्थकत्वे पदत्वाभावादिति क्वचिद् विषये सार्थकत्वे स्वातन्त्र्येणेत्यर्थः। अनर्थकत्वं पदावयवस्पाक्षरसाविच्येनैव सार्थकत्वात्। इह च प्रायिकत्वात् वर्णसमुदायद्वयमधिकृत्य सार्थक्यादिकमुक्तम्। निचयुःपौनरुक्त्येन लक्षणानुसारेण यथायोगमूह्यम्।

(लो,ल) नवपलाशं नूतनपत्रम्। पलाशवनं, किंशुकवनम्, स्फुटैः परागैः कुसुम-

---

⊛ यत्र द्वयो सार्थकत्वं तत्रैव भिन्नार्थानामित्ययं विशेषो लाटानुप्रासव्यवच्छेदकः। तथा च एकार्थत्वाभावनियतगमानाक्षरशब्दावृत्तिर्यमकमिति पर्य्यवसितोऽर्थः।
यमौ समजातौ इव तत्प्रतिकृति यमकम्। "इवे प्रतिकृतौ" इति सूत्रेण कन् प्रत्ययः॥

मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभि सुमनोभरैः ॥" (प, लृ)*

अत्र पदावृत्तिः। "पलाशपलाश" इति "सुरभिं सुरभिम्" इत्यत्र च द्वयो सार्थकत्वम्। "लतान्तलतान्त" इत्यत्र प्रथमस्य निरर्थकत्वम्। "परागपराग" इत्यत्र द्वितीयस्य। एवमन्यत्राप्युदाहार्य्यम्। (स, ए)

"यमकादौ भवेदैक्य डलोर्बवोर्लरोस्तथा"। (ऐ)

इत्युक्तनयात् "भुजलता जडतामबलाजन" इत्यत्र न यमकव्यवहानि। (ह)

नव पलाश पत्र यस्य तादृश पलाशवन किंशुककानन यत्र तादृशम्। स्फुटे परागे परागत व्याप्त पङ्कज यत्र तादृशम्। मृदुतो मृदुतर एव क्लान्तोऽर्थात् रविरश्मना लताया अन्त अग्रभागो यत्र तादृशम्। यद्वा मृदुल मृदु तान्त अर्थात् युवभिराकाङ्क्षितो लताया अन्तो अग्रभागो यत्र तादृशम्। तमु काङ्क्षायामिति धातु। सुरभिं कीदृशम्। सुमनोभरै पुष्पसमूहै सुरभिं सुगन्धिम्।

(वि, स) अत्र सार्थकयो पलाश सुरभिमित्यनयो पदयो द्वयो आवृत्ति इत्याह—**अत्रेति**। अन्यतरनिरर्थकत्व तु दर्शयति—**लतान्तेति**।

(वि, ह) यमकादावित्यादिपदात् श्लेषपरिग्रह। डलोरित्यादौ सर्वत्र प्रथमवर्ण

रेणुभि परागत, सगत, मृदुल कोमल, तान्त विस्तृत, लतान्त लताम्। द्वयोर्निरर्थकत्वे "प्रियतमायतमामेत्यादुदाहरणम्।

(लो, ए) अन्यत्र पादाद्यावृत्तौ। अत्र पादावृत्तिर्यथा मम तातपादानां कुवलयाश्वचरिते मुन्याश्रमवर्णनम्। 'जीअ उअ जण माणअ, जीअ उअ जण माणअ।" केचित्तु स्वरैकव्यञ्जनावृत्तावपि यमकमिच्छन्ति। यथा मुद्राहस्तगोविन्दा नन्दकवे —

("एक कूपे नयनमपर मन्मुखे खेलयन्ती
मामुद्दिश्य प्रतिकृतिमपि स्वा किमप्यालपन्ती।
उद्यत्पीनोरसिजयुगल कुम्भमभ्युद्धरन्ती
शिक्षाकूतस्मितशुचिमुखी प्राविशन्मानस मे ॥")

(लो, ऐ) यमकादावित्यादिशब्देन श्लेषादौ।

---

* अर्थान्तर तु—अन्योपि त सुरभिं सज्जनम् अग्रतोऽपश्यत्। "विख्याते च वसन्ते च सुगन्धौ सज्जनेऽपि च। चैत्रमासे च सुरभि कथ्यते बुधै" इति कोष। किंविशिष्टं नवपलाशपलाशो वन वसतिर्यस्य वानप्रस्थत्वात्। 'वन निवासे गहने" इति कोष। स्फुट पराग प्रसिद्धिर्यस्य तादृश परागतमपगत पङ्कज पापादिप्रभव दु खादि यस्य तादृशम्। 'पङ्क कर्दमपापयो" रिति कोष। मृदुला सुकुमारा तान्ता त्पथश्रमक्लान्ता लता योषिद् यस्य तादृशम्। सुमनोभरै पण्डितसमूहै सुरभिं विख्यातम्।

अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद् यदि ।
अन्यः श्लेषेण काकुा वा सा वक्रोक्तिस्ततो द्विधा ॥ ११ ॥

द्विधेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च । (क, ओ) +

श्लेषेणोदाहरणम्—

के यूयं स्थल एव सम्प्रति वयं प्रश्नो विशेषाश्रय
किं ब्रूते विहगः स वा फणिपतिर्यत्रास्ति सुप्तो हरिः ।
वामाः यूयमहो विडम्बरसिकः कीदृक् स्मरो वर्त्तते
येनास्मासु विवेकशून्यमनसः पुंस्त्वेव योषिद्भ्रमः ॥" (ख, औ)

अवसर उच्चारणार्थः । वक्रोक्तिरित्यत्र अन्यस्यापवर्गोक्तयोरैक्यमुक्तम् । अत्र चालङ्कारिकसमयमात्रम् । अन्ये द्वये तु जलयोरेकत्व श्रुतेर्लक्षणेति रित्यनुशासनमप्यस्ति ।

(वि, क) वक्रोक्त्यलङ्कारमाह—अन्यस्य वक्तुरन्यार्थकं वाक्यम् अन्यः श्रोता तद्वाक्यश्लेषेण स्ववाक्यकाकुा वाऽन्याभिप्रायकतया यदि योजयेद् योजनविशिष्टं प्रत्याययत् तदा सा द्विधा वक्रोक्तिरित्यर्थः । द्विधात्वं दर्शयति—श्लेषेति ।

(वि, ख) के यूयमिति । अविज्ञातनामजातिकं कञ्चित् प्रति अयं वक्तुः प्रश्नः । पृष्टः पुरुषश्च विद्वान् स तद्वाक्यं तद्वाक्यश्लेषेण के जले यूयम् इत्यभिप्रायकं श्लेषादि स्वोत्तरेण प्रत्याययति । पूर्ववद्व्याख्यानमाह—प्रश्न इति । त्वदीयनामजातिरूपविशेषविषय इत्यर्थः । श्रोता तु वि पक्षी, शेषोऽनन्तनागस्तदाश्रयस्तद्द्वयोः प्रश्न इत्यर्थकत्वेन स्वोत्तरेण प्रत्याययति—किं ब्रूते इति । यत्र वा गरुडे हरिरस्ति, यत्र शेषऽनन्ते हरिः शेते इत्यर्थः । प्रश्नं तत् श्रुत्वा क्रोधादाह—वामा विपरीतवादृत्वेन प्रतिकूला यूयमिति । श्रोता तु यूयं वामा स्त्रिय इत्यभिप्रायकत्वेन प्रत्याययन् तं निन्दति—अहो विडम्बेति । विडम्बो विटम्बनं वर्त्तते त्वयीति शेषः । विवेकशून्यमनस्त्वमेवेति शेषः । अस्मासु पुंस्त्वमिति अन्वयः । अत्र श्लेषे सभङ्गाभङ्गपदयोर्दर्शयति—अत्रेति ।

(लो, ओ) अन्यस्येति । अन्यत्व केनचिदन्यार्थकत्वेनोक्तम् । तदितरेण सभङ्गेनाभङ्गेन वा श्लेषेण, काकुा, स्वरविशेषेण वा यदि यथार्थतोऽन्यार्थत्वेन प्रयोज्यते सा वक्रोक्तिः । तत श्लेषस्वरूपोपाधिद्वययोगाद् द्विविधेत्यर्थः ।

(लो, औ) के किमास्थाः ? जले चरः । विशेषो वैधर्म्यं, वि पक्षी, शेषो नागश्च । वामा वक्रा स्त्रियश्च । विडम्बरसिकः विडम्बे रसिकः मतीतुल्यः ।

+ एतेन वक्तृद्वयनिष्ठत्वेऽयमनङ्गार । तत्रान्यार्थं योजने निमित्तं श्लेषो वा काकुर्वा ।

निष्कण्ठजनिर्भरं वक्तुरित्यभिधायने ।"
वक्तुरधरस्पन्दनादिविशेष ।

अत्र विशेषपदस्य 'विः पक्षी' 'शेषो नागः' इत्यर्थद्वययोगात् सभङ्गश्लेषः। अन्यत्र स्वभङ्गः।

"काले कोकिलवाचाले सहकारमनोहरे।
कृतागसः परित्यागात्तस्याश्वेतो न दूयते॥"

[1]अत्रैकया सख्या निषेधार्थे नियुक्तो नञ्, अन्यथा काका दूयत एवेति विध्यर्थे घटितः। (ग)

शब्दैरेकविधैरेव भाषासु विविधास्वपि।
वाक्यं यत्र भवेत् सोऽयं भाषासम इतीष्यते॥ १२॥ (घ, अ)

यथा मम—

"मञ्जुलमणिमञ्जीरे कलगम्भीरे विहारसरसीतीरे।
विरसासि केलिकीरे किमालि! धीरे च गन्धसारसमीरे॥" (ङ)

(वि, ग) काका योजनमाह—काले इति। क्रोधानायिकया परित्यक्तस्य कृतागसो नायकस्य आश्वासजनकसखी प्रति सख्या उक्तिरियम्। कोकिला वाचाला यत्र इति विग्रहः। सहकारं तत् पुष्पम्। अत्रैकयेति। यद्यपि तत्प्रयुक्तं वाक्यं न श्रुतमस्ति यदन्तर्गतः नञ् निषेधार्थकः स्यात्। अतोऽस्य काले इत्यादिवाक्यस्य काका योजनया तदर्थकवाक्यस्यासम्भव एव, तथापि प्रकरणादस्य वाक्यस्य नायकाश्वासजनकवाक्यत्वप्रतीतौ काकुनञा एव तदुपपत्तेस्तदाक्षिप्तवाक्यस्थनञ् एव स्ववाक्यस्थनञो विध्यर्थकताघटनं बोध्यम्। इदं च तादृक्प्रकरणसत्त्वे एव संगच्छते, तादृक्प्रकरणग्राहकासत्त्वे तु नेदमुदाहरणम्। तथाऽऽक्षिप्तवाक्यस्थस्य नञो निषेधार्थकत्वम्। एवं काकुनञ्विशिष्टवाक्यस्यैव विध्यर्थकता। तथा च—

"गुरुपरतन्त्रतया बत, दूरतरं देशमुद्यतो गन्तुम्।
अलिकुलकोकिललालिते नैर्ऋति सखि! सुरभिसमयेऽसौ॥"

इति काव्यप्रकाशकृदुक्तमेव उदाहरणं बोध्यम्। तत्र हि शोचनाभिप्रायकस्य पूर्ववाक्यस्य कामाकुलाभिप्रायकत्वेन द्वितीयवक्त्र्या योजनम्।

(वि, घ) भाषासमालङ्कारमाह—शब्दैरिति। शब्दैः पदैः। वाक्यं तत्समूहः, स च संस्कृतप्राकृतसकलभाषासु एकविधपदघटित इत्यर्थः।

(वि, ङ) मञ्जुलेति। हे आलि! मञ्जुलमणिमञ्जीरे मञ्जुलं मणियुक्तं मञ्जीरं यस्याः हे तादृशि! अथवा मञ्जीरे कलशब्दो गम्भीरो यत्र तादृशि।

(लो, अ) शब्दैरिति। एकविधैर्विशेषाभावादेकप्रकारैः। भाषासु संस्कृतप्राकृतादिषु। भाषासमः। भाषासु समान्येकरूपाणि पदानि विद्यन्ते यत्रेति व्युत्पत्तियोगादन्वर्थनामा पृथगलङ्कारः। एष च श्लेषालङ्कारविशेष इति यदुक्तं चण्डीदासपण्डितैस्तदसङ्गतम्, अर्थद्वयाभावात्।

---

1 अत्र क्वचित् (क. ग. पुस्तके)

एष श्लोक संस्कृतप्राकृतसौरसेनीप्राच्यावन्तीनागरापभ्रंशेषु एकविध एव। सरसं कइणो कव्वमित्यादौ तु सरसमित्यत्र संस्कृतप्राकृतयो साम्येऽपि वाक्यगतत्वाभावे वैचित्र्याभावान्नायमलङ्कार। (च)

श्लिष्टै पदैरनेकार्थाभिधाने श्लेष इष्यते ॥ १३ ॥ (छ, आ)

विहारसरसीतीरे कीदृशे, केल्यर्थक- कीरो यत्र। गन्धसार गन्धप्रधान समीरश्च यत्र तादृशे। एतादृशाऽनेकोद्दीपकसत्त्वेऽपि किं विरसाऽसीत्यर्थ।

(वि, च) सर्वभाषासु एकविधे पदे वाक्यघटितत्वे एवायमलङ्कार तादृशै कपदेन तु वाक्यघटने तादृशस्थले नायमलङ्कार इत्याह—**सरसं कइणो** इति। सरस कवीना काव्यमित्यर्थ। अत्र तादृशैकसरसपदघटितत्वाद् वाक्यस्य नायमलङ्कार इत्यर्थ।

(वि, छ) श्लेषालङ्कारमाह—**श्लिष्टैरिति**। श्लिष्टैरुभयवाचकै एकरूपै रित्यर्थ।

(लो, आ) **श्लिष्टैरिति**। अनेकेत्यनेन द्वयोर्वा बहूनां वार्थानामभिधाने प्रकरणादिनियमाभावादभिधया बाधने। एतन ध्वनिव्यवच्छेद। ननु किं भिन्नै पदैरनेकार्थाभिधानमुतैकेन? आद्य गौरश्च पुरुषो, हस्तीत्यादावपि श्लेषप्रसङ्ग। द्वितीये लक्षणस्यासम्भवित्वमन्याय चानेकार्थत्वमिति न्यायात्। इत्यत आह—श्लिष्टैरिति। श्लिष्टै "अर्थभेदेन शब्दभेद" इति दर्शनात्, "काव्यमार्गे स्वरो न गण्यते" इति च नयात् वाच्यभेदेन भिन्नैरपि युगपदुच्चारणेनापगतभेदै। त्रिधा खलु शब्दाभिव्यक्ति रूपतोऽर्थत स्वरतश्चेति दर्शनात्। एव च भिन्नयोरपि समानश्रुत्यो शब्दयोस्तत्तन्न्यायेन उच्चरितयो क्रमेण स्वस्यार्थबोधन यत्र तत्र शब्दस्वरूपश्लेषेण शब्दश्लेष। शब्दपरिवृत्तिसहत्वे त्वर्थश्लेष इति नियममङ्गीकुर्वतां काव्यप्रकाशकारादीना मतमनूद्य व्याख्यानम्। अन्ये त्वाहु—न खलु घटपटयोरिव "वसुधामहित पुरान्तित निरागमनाभावा। वर्षाश्वासुरभितवराहवपुपस्तव च हरेश्चोपमा यन्त॥" इत्यादौ शब्दानामेकप्रयत्नेन निष्पत्तिद्वयमुपपद्यते। द्वयोरेकाकारत्वेन तथाङ्गीकारे एक एव कुलाल, एकाकार घटशतमेकया सामग्र्या निष्पादयेत्। तथा सति भेदव्यवहारो मुद्द स्यात्। "अयमेव भेदो भवद्देतुश्च यद्विरुद्धधर्माध्यास कारणभेदश्चेति"। किं च यदुभयार्थप्रतिपादनसमीहया वक्तुरेकदा शब्दद्वयोदाहरणसम्भवस्तदा घटसहस्रनिर्वर्तने कुलालोऽपि एकदा तत् निर्वाहयेत्। तदुक्तमाचार्यश्रीमदुद्योतकरचरणै "क्रमवृत्तिवाद् वाच" इति। तेनैकस्मिन् शब्दे नानाविषयाणामर्थाना स्वस्वसामग्रीवशेन क्रमेणोच्चारणमिति वादिना मतमसाधयितुमुचितम्। किन्त्वत्र मते तत्प्रथम

वर्णप्रत्ययलिङ्गानां प्रकृत्योः पदयोरपि ।
श्लेषाद् विभक्तिवचनभाषाणामथा च स ॥ १४ ॥ (ज, इ)

(वि, ज) तस्य अष्टविधत्वमाह—वर्णेति । सकलपदान्ता श्लेषाद् इत्यन्वय । वर्णादिनयेऽपि वर्णद्वयप्रत्ययद्वयलिङ्गद्वयेति बोध्यम् । एव विभक्तिवचन भाषास्वपि द्वित्व त्रित्व च बोध्यम् । प्रकृतिपदयोस्तु द्विवचनेनैव तथात्व बोधित, विभिन्नरूपवर्णद्वयस्य ऐक्यरूप्य तत्त्वम् ।

विरुद्धाया द्वितीयाभिधाया पुनरुज्जीवनमनुपपन्नमिति द्वितीयाभिधानाम्ना "जन स्थाने भ्रान्त" मित्यादाविवाऽत्रापि व्यञ्जनैव वृत्तिरुपादेयते । एव च ध्वनिनन्त्रे प्रकरणनियमस्थले तस्मादेव शब्दादुच्चारणादिसामग्रीमहकृता तद्व्यापारान्तरेण समभिव्याहृतशब्दान्तरलभ्यार्थप्रतीति । यत्र तु येन ध्वस्तेत्यादौ प्रकरणादिनियमो नास्ति तत्र द्वयोरभिधानसशय । यत्र च शब्दपरिवर्तनेऽपि द्वयर्थहानिस्तत्र शब्दशक्तेर्मूलत्वेन शब्दश्लेष । यत्र च शब्दपरिवर्त्तनेऽपि न तदर्थच्छतिस्तत्रार्थ मात्र प्रत्येवशब्दोपयोगादर्थश्लेषता । एतन्मतानुसारेण तु श्लिष्टावर्थौ विद्येते एष्विति मत्वर्थीयप्रत्ययान्तत्वेन श्लिष्टै पदैरित्यादि सौत्र श्लिष्टपद व्याख्येयम्। **अनेकार्थाभिधान** इति। अनेकार्थाभिधानसशय इति। अस्य सूत्रस्य शब्दालङ्कारप्रकरणे पठितत्वादेव सिद्ध पदाना परिवृत्त्यसहत्वम् । ये त्वाहु "प्रति प्रसूते शब्द शब्दान्तर" मिति तदयुक्त, प्रतिप्रसूतशब्दानुभवाभावात्, अननुभूतशब्देनार्थप्रतीतौ चातिप्रसङ्गात्, भिन्नवाचकाद् भिन्नवाच्योपस्थितिनियमाभावाद्वा । एव च वर्णादिगतत्वेन श्लेषस्य प्राचीनानुरोधेन व्यवहार । तयोश्चारणास्वीकारे हि शब्दयो "दुर्गालङ्कित"इत्यादौ जनस्थान इत्यादावपि व्यञ्जनानङ्गीकारप्रसङ्ग। "हृदिशेषु च वक्ष्यति" इत्यादौ "व्यथा द्वेषामपि मेदिनीभृताम्" इत्यादौ च यस्यार्थस्य प्रथम बुद्ध्यारोहस्तस्योपमेयता, अन्यस्य च उपमानतेति सगति ।

(लो, इ) इह च वर्णादिगतत्वेन अष्टविधत्व श्लेषस्यासमीचीनमिति चण्डीदास परिडतराघवानन्दप्रभृतीना मतम् । तदभिधानममत् । तथाहि—वर्णादिगतत्वेन सर्वथा श्लेषस्याष्टविधत्वमस्ति । तथा च—

"वह्नीभूते विधौ मूर्ध्नि भवेद् भस्मानुलेपनम् ।
श्मशाने रङ्गिरावास स्याद्दिगम्बरता तथा ॥"

इत्यत्र प्रकरणाभावात् किं महादेव[1] उताहो कश्चिद्दरिद्रो वाच्य इति सन्देह । तेनात्र विधुविधिशब्दयोरुकारेकारयोरौकाररूपत्वाद् वर्णश्लेष । "येन ध्वस्तमनोभवेन" इत्यादौ 'स्यान्नन्दिता विरूपाक्षपादपद्मनिषेवणात्"इत्यादौ च प्रकरणज्ञाने सत्यपि नन्दितानन्दक स्यादिति, कस्यचिद् भक्तस्य वचनम्[2] उत कस्यचिद् भक्तस्य नन्दितानन्दिनामगणविशेषत्व स्यादिति वचनमिति सन्देह । तेनात्र स्यात् स्यादिति

प्रत्ययश्लेषः । नन्दिता इत्यत्र तत्तृचोर्विभक्तयोः श्लेष. ।

"योऽसकृत् परगोत्राणा पक्षच्छेदक्षणक्षम· ।
शतकोटिदता बिभ्रद् विबुधेन्द्रः स राजते ॥"

इत्यत्र पुनर्पुंसकलिङ्गयो शतकोटिदतामित्यत्र ददाति-दत्तयोः धात्वोः प्रकृत्योश्च श्लेष । "येन ध्वस्त"इत्यादौ विभक्तिसमासयोर्वैलक्षण्येन श्लेषः । "सर्वस्वं हर सर्वस्व" इत्यत्रापि वक्ष्यमाणोदाहरणेऽर्धद्वयस्यापि सन्देहास्पदत्वाद् विभक्तिश्लेषः । "दधतेऽस्य परा शोभामहो मधुरतामृतः" इत्यादौ च किं मधुरता बिभ्रतीति मधुरतामृतो बहवो जना., उत मधुरतया मृत कश्चिद् वर्त्तत इति बहुवचनैकवचनयोः श्लेष. । किञ्च मधुरतामृत इत्यत्रापि क्विप्प्रत्ययक्तप्रत्यययो. । दधत इत्यत्रापि च पक्षे धात्वोर्बहुवचनं पक्षे च दधधातोरेकवचनं श्लिष्ट च । तदेवमभिधाद्वयसंवेद्यप्रत्ययोक्तिः श्लेषालङ्कारविषयेऽष्टविधश्लेषस्य सम्भवमविचार्य्य प्राचीनाधिक्षेपकारिभिरुपजीव्यैः सहालं बहुना विवादेन । नन्वेवं "येन ध्वस्त"इत्यादावपि यस्यार्थस्य प्रथमं बुद्ध्यारोहः स वाच्योऽस्तु अपरस्तु व्यङ्ग्योऽस्तु किं तत्रापि श्लेषालङ्कारकल्पनैरिति चेन्नैवम् । इह यदि संशयज्ञानविषयत्वादनिर्द्धारितत्वात् 'भद्रात्मन' इत्यादौ, 'हृदिस्थेषु च वक्ष्यति' इत्यादौ च निर्द्धारितत्वात् वृत्तिद्वयकल्पनसद्भावे संगति । यत्तु चण्डीदासपण्डितैरुक्तं "व्यङ्ग्यो द्वयेषामपि भेदिनीमृताम्" इत्यादौ उभयाभिधानं चेतीति

("सन्ध्यावन्दनवेलाया मुक्तोऽहमिति मन्यते ।
सण्डस्तूक्तवेलाया दण्डमुद्यम्य धावति ॥")

इत्याभाणकमनुकरोति । क्वचिदभिधार्थाकारे हि भद्रात्मन इत्यादावपि किमपराद्धमभिधाद्वयेन । नन्वत्रैव दोषनिरूपणप्रस्तावे सन्दिग्धयोरर्थशब्दयोर्दुष्टता, तत् कथं "येन ध्वस्त"इत्यादावभिधानसंशये अलङ्कारत्वमप्युच्यते ? "अबला अचला वा स्यु·" इत्यादौ "आशी परम्परां वन्याम्" इत्यादौ च दोषस्थले सन्देहवशेन विवक्षितैकार्थानिर्द्धारणादतिव्यप्तयाऽऽस्वाद प्रति प्रतिकूल्यम् । इह तु विवक्षितयोरप्यर्थयोरनिर्द्धारणरूपाया विचित्रतेरानुकूल्यमनुभवसिद्धम् । अतएव पूर्वत्र महाकवेः स्खलनमन्यत्र कष्टार्थपदनिर्वाहे प्रयुक्तसाधनं सार्वलौकिकमेव । किञ्च पूर्वत्रैकार्थस्यास्वादप्रदाने द्वितीयार्थः प्रतिकूलभूतः, त इत्यादिवाक्यं तत्तो बहिष्करोति, इह तु द्वयोरर्थयोरेकस्य बुद्ध्यारोहेणापरेणार्थेन तन्निमित्तकाव्यादावपकर्षकत्वम् । एवमेव द्वयोरर्थयो· निर्द्धारितत्वेन कविनिबन्धानुभवगाहित्वेति रहस्यम् । एवं "वैरिवेशदवानल" इत्यादौ वेशशब्दात् स्त्रीत्वेन योषितस्य वेणुरूपार्थस्यैकान्वयरूपेणार्थेन 'गोवर्द्धन' इत्यादौ गोवर्द्धनयोरिव 'मुखचन्द्र' इत्यादौ मुखचन्द्रयोरिव तादात्म्यादुपचरम् । ननु गोवर्द्धन इत्यादौ अरोप्यमाणगवार्थस्य उपयुज्यमानान्वयवाध· । स च गवार्थो मुख्य इति तत्र गौणी लक्षणा । इह च वेणुरूपार्थो व्यङ्ग्य इति कथं मुख्यार्थबाधगौरवा

श्लेषेणोदाहरणम्—

"प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यत करसहस्रमपि ॥" (ई) *

अत्र विधाविति विधुविधिशब्दयोरकारेकारयोर्वर्णयोरौकाररूपत्वात् श्लेष ।

(झ)

"किरणा हरिणाङ्कस्य दक्षिणश्च समीरण ।
कान्तोत्सङ्गजुषा नून सर्व एव सुधाकिर ॥"

(वि, झ) प्रतिकूलतामिति । हि एवार्थे । विधौ विधातरि प्रतिकूलतामुपगते बहुसाधनता बहूपायत्व विफलत्वमेति इत्यर्थ । तदेव दर्शयति—अवलम्बनायेति । पतिष्यत दिनभर्तु अवलम्बनाय रक्षणाय करसहस्र रश्मिसहस्रमेव करसहस्र हस्तसहस्र नाभूदित्यर्थ । विधौ चन्द्रे तस्यैव तत्प्रतिकूलत्वान्न तु विधातु । अत्र विधावित्यत्र उकारेकाररूपवर्णयोर्विकारेण ऐक्यरूप्यमित्याह—अत्रेति ।

(वि, ञ) प्रत्ययश्लेषमाह—किरणा इति । विभक्तिश्लेषस्य पृथगुपादानात् प्रत्ययोऽत्र विभक्तिभिन्नो बोध्य । विभिन्नरूपप्रत्ययद्वयस्यैकरूप्य तत्त्वम् । कान्तोत्सङ्ग-

---

लक्षणेति चेत् ? अत्रैव सङ्गति । यथा खलु "जातिरेकपदार्थ" इति वादिना मते प्राचीनैरस्माभिश्च इहैव द्वितीयपरिच्छेदे सङ्केतितार्थनिरूपणे प्रदर्शितेन नयेन जाति-मात्रबोधनाद् अभिधाया विरताया व्यङ्ग्यत्वेनाऽभ्युपगन्तव्याया व्यक्ते रूप्यमाणा-न्वयबोधे लक्षणा तथेहापि व्यङ्ग्यत्वेनाह—तस्य वेणुरूपार्थस्य यथाव्यक्तिरूपव्यङ्ग्यस्य जातिरूपव्यङ्ग्येनाऽविनाभावेन तद्वत्प्रतीति । 'गतोऽस्तमर्क' इत्यादौ "कान्तमभिसरे" त्यादिव्यङ्ग्यवैलक्षण्येनावश्यकत्वेन मुख्यप्रायत्व दवानलादित्वसामग्रीसमुत्थितस्य वेणुरूपार्थस्यापीति तात्पर्यम् ।

यद्वा "सोऽयमिषोरिव दीर्घदीर्घतरो व्यापार" इति मताश्रयणाद् वेणुरूपार्थ-वशशब्दस्यान्वयरूपार्थवशशब्देन एकाकारत्वादभेदोपचाराद् व्यङ्ग्यस्य वेणुरूपार्थस्य विधेयत्वाद् मुख्यार्थत्वमिति । श्लेषादित्यस्य वर्णेत्यादौ प्रत्येकमन्वय । तेन वर्णयो-श्लेषात् प्रत्ययय़ो श्लेषादित्यादि ।

(लो, ई) विधौ चन्द्रे, विधातरि वा । करा किरणा, हस्ताश्च ।

---

* विधौ विधातरि प्रतिकूलता विरोधितामुपगते सति बहूनि साधनानि यस्य तस्य भाव सा, बहुसाधनमित्यर्थ । विफलत्व निरर्थकत्वमेति । अतएव पतिष्यत दिनभर्तु करसहस्र किरणा रश्मीना हस्तानां च सहस्रमपि अवलम्बनाय धारणाय नाभूदित्यन्वय । करैरेकेनाऽपि अवलम्ब कर्तुं शक्यते, विधिवैमुख्यात् करसहस्रमपि तथा नाभवदिति भाव ।

अत्र "सुधाकिर इति क्विप्प्रत्यययोः । किञ्चात्र बहुवचनैकवचनयोरैक्यरूप्याद् वचनश्लेषोऽपि । (ञ, ङ)

" विकसन्नेत्रनीलाब्जे तथा तन्व्याः स्तनद्वयी ।
तव दत्तां सदामोदं लसत्तरलहारिणी ॥"

अत्र च नपुंसकस्त्रीलिङ्गयो. श्लेषो वचनश्लेषोऽपि । (ट, ऊ)

"अयं सर्वाणि शास्त्राणि हृदिज्ञेषु च वक्ष्यति ।
सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः ॥"

अत्र वक्ष्यतीति वहिवच्योः 'सामर्थ्यकृत्' इति कृन्ततिकरोत्योः प्रकृत्योः । (ठ, ऋ)

जुषा नारीणामित्यर्थः । अनैकवचनश्लेषोऽप्यस्तीत्यत्राह—किञ्चेति । वचनद्वयेऽपि ऐक्यरूप्यं तत्त्वम् । अत्र किरण इति बहुवचनान्तम् । समीरण इति एकवचनान्तम् । उभयत्रैव सर्व इति किर इति च । अत्र च सर्व इत्यत्र प्रत्ययश्लेषं विना वचनश्लेष एव । 'दोषयुक्तः पदादर्थ' इत्यत्र तु वचनश्लेषं विना प्रत्ययश्लेष एवेत्यतः पृथक् श्लेषद्वयम् । अत्र हि दोषयुक्त इत्यस्य पदादित्यत्रान्वये पञ्चम्यास्तसिप्रत्यय । अर्थ इत्यन्वये तु क्तप्रत्यये उभयत्र एकवचनम् ।

(वि, ट) लिङ्गश्लेषमाह—विकसदित्यादि । लिङ्गद्वयेऽप्यैकरूप्यं तत्त्वम् । तन्व्या विकसन्ती नेत्रनीलाब्जे स्तनद्वयी च तव मोदं सदा दत्ताम् । उभयोर्विशेषणमाह—लसदिति । नेत्रपक्षे—लसन्ती ते तरले चेति समासे । तादृशी च ते हारिणी मनोहारिणीत्यर्थः । लसन् तरल हारमध्यग· मणिर्यस्य तादृशहारवती स्तनद्वयी । अत्रापि वचनश्लेषसङ्करमाह—अत्र चेति । अत्रापीत्यर्थः । अत्र लिङ्गश्लेषं विना दत्तामित्यत्र वचनश्लेष । वचनश्लेषं विना लिङ्गश्लेषस्तु " हरिस्तन्नाम चाघनुत्" इति । अत्र हरिस्तन्नाम्नो लिङ्गभेदेऽपि अघनुदित्यैकरूप्यम् । वचनं तु अभिन्नम् ।

(वि, ठ) प्रकृतिश्लेषमाह—अयमिति । राजपुत्रे जाते ज्योतिर्विद उक्तिरियम् । हृदि वक्ष्यतीत्यन्वय. । ज्ञेषु पण्डितेषु शास्त्राणि वक्ष्यति कथयिष्यति । अमित्राणा सामर्थ्यस्य क्षेत्ता । मित्राणा सामर्थ्यस्य कर्त्ता जनक ।

(लो, ङ) सर्व एव इत्यत्र सर्वशब्दो बहुवचनान्त., एकवचनान्तश्च । तेन सुधाकिरः इत्यस्य बहुवचनान्तस्य विशेषणत्वे विक्षेपार्थात् कृधातोः क्विप्प्रत्यय । एकवचनान्तस्य तु क्प्रत्यय. ।

(लो, ऊ) दत्तामिति—दाधातो· परस्मैपदे द्विवचनान्त. । आत्मनेपदे चैकवचनान्तः । लसन् तरलहारिणीति पदं नेत्रनीलाब्जविशेषणत्वे द्विवचनान्तं स्तनद्वयास्त्वेकवचनान्त स्त्रीलिङ्गम् । वचनश्लेषोऽपीत्यपिशब्दात् न केवलं लिङ्गश्लेषमात्रमित्यर्थ· ।

(लो, ऋ) वहिवच्योरिति—हृदोऽधिकरणत्वे वहिधातुर्नानार्थवर्ती । साम-

पृथुकार्त्तस्वरपात्रमित्यादि । ४४० पृष्ठे
अत्र पदभङ्गे विभक्तिसमासयोरपि वैलक्षण्यात्पदश्लेषो न तु प्रकृतिश्लेष. । (ङ, ऋ)

एवम्—

"नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखै. ।
सदृशे वनवृद्धानां कमलानां तदीक्षणे ॥"

अत्र लुब्धशिलीमुखादिशब्दानां श्लिष्टत्वेऽपि विभक्तेरभेदात्प्रकृतिश्लेष. ।
अन्यथा सर्वत्र पदश्लेषप्रसङ्ग. । (ङ, लृ)

(वि, ङ) पदश्लेषमाह—पृथुकेति । न्यूनाधिकवर्णयोः पदयोर्मिलनाद् अर्थद्वयेऽपि ऐक्यरूप्यं तत्त्वम् । पृथुकार्त्तेत्यादि व्याख्यातम् । अत्र प्रकृतिश्लेषत्वं निरस्यति—अत्र पदभङ्गे इति । विभक्तेर्वैलक्षण्यमत्र समासे लुप्तायां बोध्यम् । यद्यपि न्यूनाधिकेत्यादिलक्षणवशादेव प्रकृतिश्लेषतो भेदसिद्धिस्तथापि प्रबन्धान्तरेणापि तत्सिद्धिर्दर्शिता । तथा चैतत्सकलवैलक्षण्यविशिष्ट पदश्लेष. । प्रकृतिमात्रवैलक्षण्ये तु प्रकृतिश्लेष. ।

(वि, ढ) तन्मात्रवैलक्षण्ये प्रकृतिश्लेषमप्यत्राह—एवं नीतानामिति । मधुलुब्धैर्भ्रमरैर्नीलोत्पलभ्रमेणाकुलीकृतयो नायिकायाः नेत्रयो. वर्णनमिदम् । अत्र कमलानामित्यत्र चार्थो गम्यः । तथा च वनवृद्धाना वृद्धमृगाणा कमलाना च सदृशे तस्या लोचने । वनवृद्धकमलनायिकालोचनद्वयाना विशेषणमाह—नीतानामिति । भूरिशिलीमुखैरनेकबाणैः करणभूतैः लुब्धकैर्व्याधै कर्तृभिराकुलीभावं नीता वनवृद्धामृगा., लुब्धैर्मधुलुब्धैर्भूरिशिलीमुखैरनेकमधुकरैराकुलीभावं नीतानि वने जले वृद्धानि कमलानि च । परं तु नीलोत्पलभ्रमान्नेत्रद्वयमिति विशेषः । 'अलिबाणौ शिलीमुखौ' इति कोष । अत्र लुब्धशिलीमुखौ प्रकृती । अन्यथेति । न्यूनाधिक इत्यादिलक्षणाभावपक्षे इति बोध्यम् ।

र्थकृत् चामित्रसम्बन्धित्वे छेदनार्थः कृन्तति इति धातो । मित्रसम्बन्धित्वे करणार्थ. । विभक्त्यभेदेऽपि प्रकृतिमात्रस्य भेदात् प्रकृतिश्लेष एव इत्यत आह—प्रकृत्योरिति ।

(लो, ऋ) पृथुकेत्यादि व्याख्यातमेव सन्दिग्धत्वस्य क्वचिददोषकत्वकथनप्रस्तावे । अत्रेति । अयमर्थ. । विभक्त्यादेरभिन्नत्वे हि प्रकृतिमात्रस्य भेदे प्रकृतिश्लेषत्वमेवोचितम् । इह तु विभक्ते पृथ्वादिशब्देषु पृथुकादिशब्देषु च भिन्नतया पददोष एव । विभक्त्यादेरभेदेऽपि पदमात्रस्य भेदात्प्रकृतिश्लेष एव इत्याह ।

(लो, लृ) एवं चेति । कमलशब्दस्य पदार्थत्वे लुब्धैर्लोभयुक्तैर्भूरिभिः शिलीमुखैर्भ्रमरैः । मृगविशेषार्थत्वे लुब्धैर्लुब्धकैर्भूरिभिः पूर्णभूतै शिलीमुखैर्बाणै. । वन जलं कानन च । विभक्ते प्रत्ययरूपाया सर्वत्र वक्ष्यत्यादौ ।

"सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः ।
नयोपकारसाम्मुख्यमायासि तनुवर्त्तनम् ॥ (ण, ए)

अत्र "हर"इति पक्षे शिवसम्बोधनमिति सुप् । पक्षे च हृधातोस्तिङिति विभक्तेः । एवं भवेत्यादौ । अस्य च भेदस्य प्रत्ययश्लेषेणापि गतार्थत्वे प्रत्यया-न्तरासाध्यसुबन्ततिङन्तगतत्वेन विच्छित्तिविशेषाश्रयणात् पृथगुक्तिः । (त, ऐ)

"महदे सुरसन्धं मे तमव समासङ्गमागमाहरणे ।
हर बहुसरणं त चित्तमोहमवसर उमे सहसा ॥" (थ, ओ)

(वि, ण) विभक्तिश्लेषमाह—**सर्वस्वमिति** । सुप्तिङन्तत्वेन भेदेऽपि पदयोरैक्यरूप्यं तत्त्वम् । **सर्वस्वमिति**। शिवभक्तस्तं प्रति दस्योश्च पुत्रादिकं प्रति चोक्तिरियम् । हे हर! त्व सर्वस्य सर्वस्वम् । भवस्य उत्पत्तेश्छेदतत्परश्च मुक्तिदत्वात् । नयस्य नीतेः उपकारान्तरस्य साम्मुख्य सम्भवो यस्मात् तादृशं तनुवर्त्तनं शरीरस्थितिम् आयासि आगच्छसि प्राप्नोषीति यावत् । दस्युपक्षे—त्वं सर्वस्य सर्वस्वं हर । छेदतत्परो भव । उपकारस्य साम्मुख्यमानुकूल्य नय अपनय । आयासि परायासकरिवर्त्तनं तनु विस्तारय ।

(वि, त) अत्र आयासि इति विना सर्वत्र लुप्तसुप्तिङन्तत्वेऽपि आयासि इत्यत्र लुप्तालुप्तद्वयान्तत्वेऽपि च पदयोरैकरूप्य दर्शयति—**अत्र चेति** । अस्य प्रत्यय-श्लेषतो वैलक्षण्यमाह—**अस्य चेति** ।

प्रत्ययान्तरासाध्येति । स्वतुल्यत्वेन प्रत्ययान्तरम् असाध्यम् अबोध्यं ययोः तादृशौ यौ सुप्तिङौ तदन्तर्गतत्वेनास्य श्लेषस्य इत्यर्थ । विच्छित्तिर्वैचित्र्यम् ।

(वि, थ) भाषाश्लेषमाह—**महदे इति** । संस्कृतपक्षे—हे महदे हे उत्सव-दात्रि ! हे उमे पार्वति ! आगमस्य वेदस्य आहरणे वशीकरणे मे मम तं प्रसिद्धं समासङ्गम् अव रक्ष । मुनिजनेषु प्रसिद्ध वेदाभ्यास मम जनयेत्यर्थः । समासङ्गं कीदृशं सुरसन्धं सुराणां सन्धं सम्बन्धिकारकं, मम सुरत्वप्रापकमित्यर्थः । तथा तं प्रसिद्ध चित्तमोहम् अवसरेऽर्थान्मरणरूपे सहसा हर नाशय । कीदृशं चित्तमोहं बहुसरणं नानाविधकार्य्यविषयम् । सृ गतौ ।

(लो, ए) **सर्वस्वमिति** । हे हर शम्भो ! त्वं सर्वस्य लोकस्य सर्वस्वं, त्वं किम्भूत[1] भवस्य ससारस्य छेदतत्परः । आयासि आयासयुक्त तनोर्देहस्य वर्त्तनं वृत्तिमुपकरणसाम्मुख्यं नय प्रापय । देहवृत्तिमायासरहितां कुर्वीति भावः । पक्षे—त्वं सर्वस्य सर्वस्वं हर नाशय । छेदे सपादने तत्परो भव । उपकारात् साम्मुख्यं नय उपकारं मा कुर्वीति भाव । वर्त्तन वृत्तिम् आयासि आयासयुक्तं तनु विस्तारय ।

(लो, ऐ) विच्छित्तिविशेष सहृदयानुभवसिद्ध ।

(लो, ओ) "महदे" इति । संस्कृतपक्षे—महदे उत्सवदे ! उमे ! पार्वति ! मे मम आगमाहरणे आगमानानाकरणे तं समासङ्गम् आसक्तिम् अव स्थिरीकुर्वीति भाव ।

अत्र संस्कृतमहाराष्ट्र्योः ।

पुनस्त्रिधा सभङ्गोऽथाभङ्गस्तदुभयात्मक ॥ ६५ ॥ (औ)

एतद्भेदत्रय चोक्तभेदाष्टके यथासम्भव ज्ञेयम् । (द)

यथा वा—

"येन ध्वस्तमनोभवेन बलिजित्काय पुरा स्त्रीकृतो
यश्चोद्वृत्तभुजङ्गहारवलयो गङ्गाञ्च योऽधारयत् ।
यस्याहु शशिमच्छिरोहर इति स्तुत्यञ्च नामामरा
पायात्स स्वयमन्धकक्षयकरस्त्वा सर्वदो माधव ॥"

प्राकृतपद्ये—

मम देहि रस धर्मे तमोवशामाशा गमागमाद् हर न ।
हरवधु शरण त्व चित्तमोहोऽपसरतु मे सहसा ॥" इति संस्कृतम् ।

तदर्थश्च–हे हरवधु ! मम धर्मे रस देहि । गमागमात् संसारात् तमोवशामाशां मोऽस्माक हर । त्व मे शरणम् । मम चित्तमोह सहसाऽपसरतु ।

(वि, द) पुनस्त्रिधेति। अयमष्टविध श्लेषालङ्कारस्त्रिधा भवतीत्यर्थ । कथमित्य नाह–**सभङ्ग** इति । तदुभयात्मक सभङ्गाभङ्गात्मक इत्यर्थ । **उक्तभेदाष्टक** इति । तत्र पृथुकार्त्तेयत्र सभङ्ग । 'किरणा" इत्यत्र "सर्व एव सुधाकिर" इत्यत्राभङ्ग । महदे इत्यत्र चित्तमोहमित्यत्राभङ्ग । महदे इत्यादिषु सभङ्ग ,इत्युभयात्मक ।

(वि, ध) श्लोकान्तरेऽपि त्रैविध्य दर्शयति—**येन ध्वस्तमिति** । त्वा सर्वदा स उमाधव सर्वदो माधवश्च पायात् । तत्र माधवपक्षे, अभवेन अनुत्पत्तिना येन अन शकट ध्वस्त नित्यशरीरस्य तस्य रूपान्तरेणाविर्भावमात्र, नतूत्पत्ति । तथा यो बलिजित् बलिजेता । येन काय पुरा मोहिनीरूपेण स्त्रीकृत । एकमेव नित्यशरीरे आकारभेदप्रदर्शनमात्रं, न तु शरीरभेद इति भाव । यश्च उद्वृत्तस्य दुर्वृत्तस्य भुजङ्गस्य अघासुरस्य हन्ता । स्वस्य नानात्मकब्रह्मणो लयो लीनता यत्र तादृश । अगं गोवर्द्धन, कूर्मवराहमूर्त्या च गा पृथिवीं च योऽधारयत् । शशिमथ राहो शिरोहर

सुरैर्देवै सन्थ समाधान येनेति समासङ्गविशेषणम् । आगमाभ्यासस्य स्वर्गहेतुत्वाद् बहु बहुल सरण प्रसारो यस्य एवभूत चित्तमोह मनोनिष्ठम् अज्ञानम्, अवसरे,महमा वेगेन हर अपनय । (महाराष्ट्रीयप्राकृतपद्ये) चतुर्थ्यर्थे "महद इति षष्ठी । तेन–

"मह्य देहि रस धर्मे तमोवशामाशा गमागमाद्धर न ।
हरवधु ! शरण त्व चित्तमोहोऽपसरतु मे सहसा ॥"

गमागमो विद्यते यत्र तस्मात् गमागमात् संसारादित्यर्थ ।

(लो, औ) एव वर्णादिगतत्वेनाष्टविध श्लेषमुक्त्वा पुन प्रकारान्तरेण त्रिविध- माह—**पुनरिति**।

अत्र "येन ध्वस्त"इत्यादौ सभङ्गश्लेषः । "अन्धक इत्यादौ अभङ्गः । अनयोश्चैकत्र सम्भवात् सभङ्गाभङ्गात्मको ग्रन्थगौरवभयात् पृथग् नोदाहृतः ।

इह केचिदाहुः—"सभङ्गश्लेष एव शब्दश्लेषविषयः । यत्रोदात्तादिस्वर-भेदाद्भिन्नप्रयत्नोच्चार्य्यत्वेन भिन्नयोः शब्दयोर्जतुकाष्ठन्यायेन श्लेषः । (आ)

इति स्तुत्यं नाम यस्याऽमरा आहुः । स कीदृशः ? स्वयमन्धकवंशक्षयकरः निवासकरः । क्षि निवासगत्योः इति धातोः । उमाधवपक्षे—ध्वस्तमनोभवेन ध्वस्तो दलितो मनोभवो कामो यस्मात् । येन बलिजितो विष्णोः कायः पुरस्य त्रिपुरासुरस्य नाशक्षयीकृतः, त्रिपुरवधे विष्णोः कायस्य शरीकृतत्वात् । यश्चोद्वृत्तभुजङ्गरूपो हारः वलयश्च कङ्कणः यस्य तादृशः, गङ्गां च यो मौलौ अधारयत् । यस्य शिरः शशिमत् चन्द्रयुक्तम् । हर इति स्तुत्यं नाम चामरा आहु । स कीदृशः—स्वयमन्धकासुरस्य नाशकरः । अत्र नित्यसत्त्वं दर्शयति—अत्रेति । एकैकश्लोके एकैकप्रदर्शनस्य बीजमाह—अन्येति ।

(लो, अ) हरपक्षे—मनोभवः कामः । बलिजित् विष्णुः, तस्य कायः पुरा दैत्यार्थमक्षीकृतः । उद्वृत्ता अतिवर्तुलाकारा भुजङ्गा एव हारा वलयाश्च यस्य । गङ्गा त्रिपथगाम् । शशी विद्यते यत्र तत् शशिमत् । अन्धकदैत्यस्य क्षयो नाशः, तत्करः सर्वदा उमाधवः गौरीपतिः । हरिपक्षे—येन अनः शकटं ध्वस्तम् । अभवेन चिद्रूपेण । आत्मन एव कायः पुरा पूर्वम् अमृताहरणकालेऽसुरमोहनार्थं स्त्रीरूपः कृतः । उद्वृत्तः उद्धतो भुजङ्गः कालियः तं हन्तीति । रवे नादरूपे ब्रह्मणि लयो यस्य । अगं पर्वतं गोवर्द्धनाख्यं गां पृथ्वीं च । शशिनं मथ्नाति इति शशिमद्राहुः तस्य शिरोहरः । अन्धकानाम् अन्धकवंशीयाना क्षयो निवासो द्वारकापुरसम्बन्धी तत्करः । सर्वं ददाति इति सर्वदः । माधवः श्रीपतिः । सभङ्गः पदभङ्गे अर्थप्रत्ययात् । अनयोः सभङ्गाभङ्ग-रूपयोः श्लेषयोरेकश्लोके ।

(लो, आ) सम्प्रति सभङ्ग एव शब्दश्लेषविषयः; अभङ्गस्त्वर्थश्लेष इति स्वीकुर्वतां पक्षमनूद्य दूषयति—इहेत्यादि । आहुरित्यस्य दूरस्थेनोपपत्तेरितीति शब्देनान्वयः । सभङ्गः वर्णव्यूहेषु भङ्गेन युतः, तद्भावात्मकेन भिन्नपदेन वा सहितः । शब्दश्लेषविषयः शब्दद्वैधभिन्ननिर्व्यूढार्थद्वैविध्यादित्यर्थः । उदात्तादीति—उच्चैरुदात्तः । नीचैरनुदात्तः । आदिशब्दात्तदन्तर्गतानामनुनासिकादीनां काकुभेदाना चोपसङ्ग्रहः । भिन्नप्रयत्नोच्चार्य्यत्वेन प्रयत्नभेदेन उच्चारणं विना उदात्तादिभेदाभावात् । एतेन तत्कार्य्येणातिभेदश्चाभिप्रेतः । यथा—

"सारसवत्ता विहता न बका विलसन्ति त्रसति नो कङ्कः ।
सरसीव श्रीर्त्तिशेषं गतवति भुवि विक्रमादित्ये ॥" इति

अत्र हि राजपक्षे सा, इति, कम् इति । सरःपक्षे नेतीत्यत्र तु सा नास्ति ।

अभङ्गस्तु अर्थश्लेष एव, यत्र स्वराभेदादभिन्नप्रयत्नोच्चार्य्यतया शब्दाभेदादर्थयोरेकवृन्तगतफलद्वयन्यायेन श्लेष, (इ)

यो हि यदाश्रित स तदलङ्कार एव। अलङ्कार्यालङ्करणभावस्य लोकवदाश्रयाश्रयिभावेनोपपत्तेरिति।" (न ई) *

तदन्ये न मन्यन्ते[1]-तथा ह्यत्र ध्वनिगुणीभूतव्यङ्ग्यदोषगुणालङ्काराणां

(वि, न) समङ्गत्वे शब्दश्लेषत्वबीजमाह—यत्रेति। समङ्गश्लेषस्थले काव्येऽपि स्वरभेदगणनामिति तन्मतम्। ततश्च भिन्नप्रयत्नोच्चार्य्यत्वेनैव पृथक् पृथक् शब्दभेद। केवल विभिन्नत्वेन प्रतीयमानयोरपि अत्यन्तसन्निधानरूप एव जतुकाष्ठयोरिव श्लेष इत्यर्थ। अभङ्गश्लेषस्त्वर्थश्लेष इत्याह—अभङ्गस्त्विति। तदर्थश्लेषत्वे बीजमाह—यत्रेति। अभिन्नप्रयत्नोच्चार्य्यत्वेन शब्दभेदाभावाद् एकवृन्तलग्नफलद्वयवदेकशब्दलग्नार्थयोरेव श्लिष्टत्वमित्यर्थ। तावतैव कथमर्थालङ्कारत्वम् इत्यत्राह—यो हि यदाश्रय इति। समङ्गत्वे शब्दयोरेव श्लिष्टत्वात्तत्र श्लेष शब्दाश्रित। एकदेशाश्रितयोरर्थयोरेव च श्लिष्टत्वादर्थाश्रितस्तत्र श्लेष इत्यर्थ।

(वि, प) तदन्ये इति। काव्यप्रकाशकारादयस्तदनुयायिनो वयञ्च इत्यर्थ।

जतुकाष्ठन्यायेनेति। यथा काष्ठयोर्भिन्नयोरप्युपायवशेन जडीकृतयोरेकता तथाभिन्नयो पदयो शब्दयारेकत्र वर्णव्यूहे सन्निवेश।

(लो, इ) अर्थश्लेष एव शब्दस्वरूपविपर्यासाभावेऽप्यर्थस्य द्वियात्मकत्वादित्यर्थ। यत्रेति। यथा एकस्मिन्नेव वृन्ते फलद्वय तथा एकस्मिन्नेव शब्देऽर्थद्वयसंसर्ग।

(लो, ई) यो हीति। यथा लोके भुजाश्रितो भुजस्यालङ्कार कण्ठाश्रित कण्ठस्य तथासौ शब्दाश्रित इति भाव। लोकवदिति। लोके आश्रयाश्रयिभावेन एव व्यपदेश, यथा राजपुरुष। यद्वा उपपत्तेरुपादानाद् व्यवहरणादिति यावत्।

(लो, उ) सिद्धान्तमाह—तद् उक्तप्रकार पूर्वेषां मतम्, अन्येऽभियुक्ता न

(* अलङ्कारसर्वस्वकारादिमत दूषयितुमुत्थापयति—इह केचिदिति। जतुसयोगात् पूर्व काष्ठ स्थितम्। पश्चाद् जतुसयोगेन जतुकाष्ठयोर्यथा श्लेष, तथा भिन्नप्रयत्नोच्चार्य्यतया भिन्नयो शब्दयो श्लेष समङ्ग। अयं च शब्दविषयत्वाच्छब्दश्लेष। एकस्मिन् वृन्ते यथा फलद्वय वर्त्तते तथा एकस्मिन् शब्दे अर्थद्वयमिति शब्दस्य भेदाभावादभङ्ग श्लेष। अय च अर्थाश्रयत्वादर्थालङ्कार इत्यर्थ—अलङ्कार्य्येति। लोके अलङ्कार कटकमुकुटकुण्डलादिर्यत्राश्रयत्वे वर्त्तते सोऽवयवोऽलङ्कार्य्य। तदवयवस्य तु सोऽलङ्कार एव योऽलङ्कारो यदाश्रय स तदलङ्कार। यथा मुकुटस्य कर्णस्य, कटको हस्तस्येत्यादि। तद्वत् शब्दाश्रितः शब्दालङ्कार, अर्थाश्रितोऽर्थालङ्कार इति भाव।

[1] 'एमन्ते' (क घ)

शब्दार्थगतत्वेन व्यवस्थितेरन्वयव्यतिरेकानुविधायित्वेन नियमनाद् इति । (प, उ)

नच "अन्धकक्षय" इत्यादौ शब्दाभेद· । "अर्थभेदेन शब्दभेद" इति दर्शनात् । (फ, ऊ)

किञ्चात्र शब्दस्यैव मुख्यतया वैचित्र्यबोधोपायत्वेन कविप्रतिभयोद्भूतनात् शब्दालङ्कारत्वमेव । विसदृशशब्दद्वयस्य बन्धे चैवविधस्य वैचित्र्यस्याभावाद्

तथा ह्यत्रेति । अत्रालङ्कारशास्त्रे शब्दशक्तिमूलव्यङ्ग्यत्वे ध्वनिगुणीभूतव्यङ्ग्ययो शब्दगतत्वव्यवहार· । अर्थशक्तिमूलत्वे तु अर्थगतत्वेन दोषादीना तु शब्दार्थान्वयाय· विधान स्फुटमेव । तथा च नानार्थाभङ्गशब्दस्यापि श्लेषेणान्वयव्यतिरेकानुविधानात् तत्रापि शब्दश्लेषत्वमेव इति भाव ।

(वि, फ) मतविशेषे तु यत्र नानार्थस्थलेऽपि शब्दभेदस्तथा च तत्रापि श्लिष्टानेकशब्दकृत· शब्दालङ्कारस्तन्मते निर्बाध एवेति तन्मतं दर्शयति—**न चान्धक** इति । न च शब्दाभेद इत्यन्वय । तत्र हेतुमाह—**अर्थभेदेनेति** । घटपटरूपार्थ-भेदेन घटपटशब्दभेदनादित्यर्थ । तथा चैतद् दृष्टान्तेनैवार्थभेदस्य शब्दभेदव्याप्य-त्वसिद्धिरिति भाव । न च तत्कथ नानार्थकशब्दा श्रूयन्ते इति वाच्यम्—एक-प्रयत्नोच्चार्य्यत्वदोषेण भेदाग्रहात् ।

(वि, घ) ननु सभङ्गश्लेषस्थलेऽर्थभेदात् स्वदभिमतस्वरभेददृष्टान्तेन अभङ्गानेक-शब्दानामर्थभेदात् स्वरभेद एव स्यात् । तथा च स्वरभेदवैलक्षण्यग्रहे कथ भेदाग्रह स्यादतोऽर्थभेदस्य शब्दभेदव्याप्तिरप्रयोजिकैव इत्यत एकप्रयत्नेन नानाशब्दोच्चारण-मित्यत आह—**किञ्चेति** । शब्दस्यैव मुख्यतया वैचित्र्योपायत्वेन कविप्रतिभयोद्भूतनाद् विषयीकरणादित्यर्थः । ननु अन्धकक्षयखण्डशब्दस्य मुख्यत्वे किं प्रमाणमित्यत आह—**विसदृशशब्दद्वयस्येति** । नहि हरिणशब्दस्थले तदर्थकेन्द्रादिशब्दप्रयोगे हरिं

मन्यन्ते न स्वीकुर्वन्ति । कुतो न मन्यन्ते तत्र हेतुमाह—**तथाहीति** । अत्र अल-ङ्कारप्रस्तावे येषा द्वन्द्वार्थाना शब्दाना पर्य्यान्तरेण प्रतिपादनेऽपि न क्षतिस्त एवार्थ-गता । येषा न तु तथा ते शब्दगता एवेति नियमनात् प्राचैनैरलङ्कारकारैरिति शेष ।

(लो, ऊ) नच तन्नियमनमात्रेणाभङ्गस्य शब्दश्लेषत्वं, शब्दभेदादपि इत्याह—**नचेति** । हेतुमाह—**अर्थभेदेनेति** । दर्शनाद् युष्माभिरेव सिद्धान्तात् प्रमाणी-कृतादिति शेष ।

(लो, ॠ) येऽप्याहुर्यो यदाश्रित स तदलङ्कार इति तन्मतेऽप्यत्र वैचित्र्यस्य शब्दनिष्ठत्वाच्छब्दालङ्कारत्वमित्याह—**किञ्चेति** । वैचित्र्य, लोकोत्तरविच्छित्तिरलङ्कार-रूपा । प्रतिभा नवनवोन्मेषशालिनी प्रज्ञा । उद्भूतनात् उल्लेखनात् । अत्र हेतुमाह—**विसदृशेति** । विसदृशमसमानश्रुतिकम् । यथा अन्धकक्षयकर इत्यत्र क्षयशब्दस्थाने

वैचित्र्यस्यैव चालङ्कारत्वात्। अर्थमुखप्रेक्षितया चार्थालङ्कारत्वेऽनुप्रासादीनामपि रसादिपरत्वेनार्थमुखप्रेक्षितयार्थालङ्कारत्वप्रसङ्गः। (व, ऋ) +

शब्दस्याभिन्नप्रयत्नोच्चार्य्यत्वेनार्थालङ्कारत्वे "प्रतिकूलतामुपगते हि विधौ" इत्यादौ शब्दभेदेऽप्यर्थालङ्कारत्वं तवापि प्रसज्यतीत्युभयत्रापि शब्दालङ्कारत्वमेव। (भ, ऋ)

यत्र तु शब्दपरिवर्त्तनेऽपि न श्लेषत्वखण्डना, तत्र

"श्लोकेनोच्चतिमायाति स्तोकेनायात्यधोगतिम्।

नौमीत्यत्रेव विग्घिवन्द्यौ नौमीत्यत्रापि श्लेषरूपवैचित्र्यानुभव इत्यर्थः। नन्वर्थमुखप्रेक्षित्वाद् अभङ्गश्लेषस्याऽर्थालङ्कारत्वमुच्यते इत्यत आह—**अर्थमुखे**ति। अनुप्रासादीनामित्यादिपदात् सभङ्गश्लेषवक्रोक्त्यादिपरिग्रहः। **रसादिपरत्वेने**ति। रसनिष्ठगुणार्थकत्वेनैव रसपरत्वं बोध्यम्। आदिपदात् लाटानुप्रासे वाच्यार्थमुखप्रेक्षित्वमेव बोध्यम्।

(वि, भ) अभिन्नप्रयत्नोच्चार्य्यत्वेनार्थालङ्कारत्वस्य तदुक्तस्य शब्दालङ्कारतया निर्विवादे वर्णश्लेषवर्णानुप्रासेऽपि अतिप्रसक्तिमाह—**प्रतिकूलतामि**ति। **उभयत्रापि** इति। सभङ्गाभङ्गयोरित्यर्थः।

(वि, म) नन्वेवमर्थश्लेषालङ्कारोच्छेदप्रसङ्ग इत्यत आह—**यत्र त्वि**ति। तमेव

विनाशनिवासरूपकशब्दद्वयम्। अस्य च वैचित्र्यस्यार्थानुसन्धानमन्तरेणानुपलब्धेरर्थालङ्कारत्वमस्तीत्याशङ्क्याह—**अर्थे**ति। अर्थमुखप्रेक्षित्वमर्थानुसन्धाने वैचित्र्ययोग। तथा सति अलङ्कारान्तरेऽतिप्रसङ्ग इत्यत आह—**अनुप्रासादीनामि**ति। अयमर्थः—अनुप्रासादीनामपि हि रसादिपरत्वाभावे वृत्तिविरोधात्। रसादिरूपस्यार्थस्य तदभिव्यञ्जकस्य विभावादिरूपस्यार्थस्य वाऽनुसन्धानमस्त्येवेति तेपि कथं शब्दालङ्कारमध्ये युष्माभिरपि गण्यन्त इति।

(लो, ऋ) यत् पुनरुक्तं शब्दस्यैकप्रयत्नोच्चार्य्यत्वेऽर्थालङ्कारत्वमिति तथाप्यव्याप्तिदोष इत्याह—**शब्दस्ये**ति। प्रतिकूलतामित्यादौ विधावित्यत्र इकारोकारयोरौकाररूपत्वेनाभिन्नप्रयत्नोच्चार्य्यत्व तत् शब्दभेदेन शब्दश्लेषमङ्गीकुर्वत। उभयत्र "येन ध्वस्त" इत्यादौ "अन्धकक्षय" इत्यादौ च।

+ न हि ह्यर्थप्रतीतिं विना श्लेषस्य चमत्कारित्वं सम्भवो वा भवति। ततः श्लेषोऽर्थमुखमपेक्षते। अतोऽर्थालङ्कारत्वं श्लेषस्येति मतं दूषयति। अनुप्रासो हि रसादिव्यञ्जकं स्वरूपमपेक्षते। अनुप्रासपदस्य "रसाद्यनुगत प्रकृष्टो न्यास" इति व्युत्पत्ते। अर्थज्ञानमन्तरा रसादिबोधो नैव सम्भवतीति अनुप्रासस्याप्यर्थमुखापेक्षा। अर्थमुखप्रेक्षितया अर्थालङ्कारत्वे अनुप्रासस्यापि अर्थालङ्कारत्वं प्रसज्यति। परमनुप्रासादय. शब्दालङ्कारमध्ये गण्यन्ते सर्वैरिति भाव।

अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ॥"
इत्यादावर्थश्लेषः। (म, लृ)

अस्य चालङ्कारान्तरावाविक्तविषयतायां असम्भवाद् विद्यमानेष्वलङ्कारान्तरेष्वपवादत्वेन तद्बाधकत्वात् तत्प्रतिभोत्पत्तिहेतुत्वमिति केचित्। (य, ए) ×

विषयमाह—**तत्र स्तोकेने**ति। अहो तुलाया मानतुलायाः कोटेरग्रभागस्य खलस्य च सुसदृशी वृत्तिर्यतः स्तोकेनेत्यादि। स्तोकेन गुञ्जादल्पवस्तुना, पक्षे स्तोकेनाऽल्पप्रशंसनेनाऽल्पनिन्दनेन च। अत्रोन्नत्यधोगत्यर्थकपदान्तरदानेऽपि नार्थश्लेषत्वखण्डना।

(वि, य) इदानीं श्लेषस्य अलङ्कारान्तरासङ्कीर्णविषयाभावाद् अलङ्कारान्तरस्य च श्लेषासङ्कीर्णविषयसत्त्वात् सामान्यमलङ्कारान्तरमपवादत्वेन बाधित्वा श्लेष एवालङ्कारः अलङ्कारान्तरं तु तत् सङ्कीर्णं तद्ग्राहकमेवेति केचिदाहुः। तन्मतं दर्शयति—**अस्ये**ति। **तत्प्रतिभोत्पत्तिहेतुत्वमि**ति—तत्प्रतिभा, अलङ्कारान्तरविषयिणी प्रतिभा तस्या एवोत्पत्तिहेतुत्वमस्य श्लेषस्य तद्विषयबोधकत्वमित्यर्थः। शब्दश्लेषेण श्लेषालङ्कारविषयप्रतीतिरेव जन्यत इत्यर्थः। ननु अलङ्कारान्तरविषयप्रतिभा इत्यर्थः। तथा चालङ्कारान्तरसंकरे श्लेष एवालङ्कार इत्यर्थः।

(लो, लृ) तत् क्व नु पुनरर्थश्लेष इत्याह—**यत्र हीति**। शब्दस्य परिवृत्तेन पर्य्यायान्तरेण प्रतिपादने। सुवर्णादिगौरवप्रकर्षापकर्षसूचिका तुलाकोटिः। अत्र स्तोकादिस्थाने स्वल्पादिपदनिवेशेऽपि न व्यर्थताहानिः।

(लो, ए) एष च नियमादलङ्काराणां विच्छित्तिमादायैव सम्भवतीत्येतद्विषये विद्यमानानामलङ्काराणां बाध इति ये मन्यन्ते तेषां पक्षमुपन्यस्य दूषयति—**अस्य चे**ति। विद्यमानेष्वेतद्विषयेषु। तद्बाधकत्वात्। तेषामलङ्काराणां बाधकत्वादवकाशान्तरभावेन तव्यपदेशं बाधित्वा मुख्यत्वेन व्यपदेष्टुं योग्यत्वात्। अस्य च हेतुरपवादत्वेनेति। तेषामलङ्काराणां प्रतिभाबुद्धिस्थिता उत्पत्तिहेतुरस्येति तत्प्रतिभोत्पत्तिहेतुः।

× बहुव्यापकं सामान्यमल्पव्यापको विशेष इति न्यायात् श्लेषस्य अलङ्कारान्तरविविक्तविषयताया अभावात् श्लेषो विशेषः अलङ्कारान्तराणि तु सामान्यानि। "सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत्" इति न्यायात् श्लेषस्तावदलङ्कारान्तराणां बाधकः। "येन नाप्राप्ते यस्यारम्भः स तस्य बाधको भवति" इति न्यायादपि श्लेषोऽलङ्कारान्तराणां बाधकः। **तत्प्रतिभोत्पत्तिहेतुत्वमि**ति। तस्य अलङ्कारान्तरस्य प्रतिभा आभानमात्रं तस्या उत्पत्तौ हेतुर्हेतुभूत इत्यर्थः। अलङ्कारान्तराणां प्रतिभामात्रमुत्पादयति न तु तत्कृतं चमत्कारमिति भावः। केचित् तस्य अलङ्कारान्तरस्य प्रतिभा बुद्धिस्थितं ज्ञानमात्रं न तु स्वस्मिन् विश्रान्तिधामतया चमत्कारित्वम्। सा उत्पत्तिहेतुरस्य श्लेषस्येति विग्रहमाहुः।

इत्थमत्र विचार्य्यते—समासोक्त्यप्रस्तुतप्रशंसादौ द्वितीयार्थस्यानभिधेयतया नास्य गन्धोऽपि। (र, वै)

(वि, र) तन्मतेऽपि सकलालङ्कारसङ्करे श्लेषो न बाधक, किन्तु कतिपयालङ्कारसङ्करे एवेति निष्कर्षं प्रतिपादयितुमाह—**इत्थमत्रेति**। तत्र समासोक्त्यप्रस्तुतप्रशंसासङ्कीर्णस्य श्लेषस्य तद्द्वयबाधकप्रसक्तिरेव नास्ति इत्याह—**समासोक्तीति**। प्रस्तुतकथनेनाऽप्रस्तुतव्यञ्जन समासोक्तिः। क्वचित् श्लेषसङ्कीर्णा सा। यथा—

"अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः।
अहो दैवगतिश्चित्रा तथापि न समागमः॥"

इत्यत्र प्रकृतदिवसपुरःसरसन्ध्याकथनादप्रकृतनायकपुरःसरनायिकाप्रतीतौ श्लिष्टमनुरागोभयार्थकानुरागपदश्लेषसङ्करः। अप्रस्तुतकथनेन प्रस्तुतव्यञ्जन चाप्रस्तुतप्रशंसा, सा च क्वचित् श्लेषसङ्कीर्णापि भवति। यथा—

"मलत या मध्यस्था कथयति यष्टिं प्रतिष्ठितासीति।
पुष्करिणी नैव तदुचित पूर्णायत्तामधो नयसि॥"

इत्यत्र जने यष्टिप्रावनाप्राकरणिकपुष्करिणीकथनेन प्राकरणिकप्रतिष्ठागायकजननिरस्कारकसम्पत्तिमज्जनप्रतीतौ मध्यस्थादिपदश्लेषसङ्करः। एतदुभयत्र श्लेषालङ्कारप्रसक्तिरेव नास्तीत्यत आह—**नास्य गन्धोऽपीति**। अत्र हेतुमाह—**द्वितीयार्थस्येति**। अनयोर्द्वितीयार्थस्य व्यङ्ग्यत्वादेव। अर्थद्वयस्य वाच्यत्व एव श्लेषालङ्कारः। अप्रस्तुतप्रशंसादौ इत्यादिपदादुपमाध्वनिपरिग्रहः, यथा दुर्गालङ्घिते स्यादौ।

(लो, वै) इत्थमिति वक्ष्यमाणस्य बुद्धिस्थितया इदमा परामर्शः। अत्रेत्यमनन्तरोक्तम्। केषाञ्चित् पूर्वपक्षिणां मते समासोक्तिर्यथा—

'उपोढरागेण विलोलतारक, तथा गृहीत शशिना निशामुखम्।
यथा समस्त तिमिराशुक तया पुरोऽपि रागाद् गलित न लक्षितम्॥"

अप्रस्तुतप्रशंसा यथा—

"एणाल सम्भ्रमेण त्यज गवय! भय सैरिभ! स्वैरमास्व
क्षौभ मा यास्तरक्षो! विहर गिरिदरीं स्वेच्छयैवाच्छभल्ल!
पारिन्द्र पारदृश्वा निखिलवनभुव केवल मोदतेऽसौ
मायावुम्भीन्द्रकुम्भस्थलगलिततघनस्थूलमुक्ताफलौघैः॥"

आदिशब्देन पर्य्यायोक्त्यादि। द्वितीयार्थः प्रकृताऽप्रकृतो वा यथा नायकव्यवहारादि। अनभिधेयतया अभिधाया प्रकृतबोधनेन विरमाद् अस्य श्लेषस्य।

"विद्वन्मानसहस"इत्यादौ श्लेषगर्भे रूपकेऽपि मानसशब्दस्य चित्तसरोरूपोभयार्थत्वेऽपि रूपकेण श्लेषो बाध्यते, सरोरूपस्यैवार्थस्य विश्रान्ति[1]धामतया प्राधान्यात्। श्लेषे ह्यर्थद्वयस्यापि समकक्षत्वम्। (ल, औ)

"सन्निहितबालान्धकारा भास्वन्मूर्त्तिश्च"इत्यादौ विरोधाभासेऽपि विरुद्धार्थस्य प्रतिभातमात्रस्य प्ररोहाभावान्न श्लेष । (व, औ) *

(वि, ल) पूर्वस्मिन् श्लिष्टपरम्परितरूपकेऽपि न श्लेषालङ्कारप्रसक्तिरित्याह—**विद्वन्मानसेति**। विदुषां मन एव मानस सरस्तत्र हंसेति राज्ञः सम्बोधनम्। अत्र रूपकस्य श्लेषबाधकत्वे हेतुमाह—**सरोरूपस्येति**। विश्रान्तिधामता पर्य्यन्तिकप्रतीतिविषयता, हंसाश्रयत्वेन न तद्रूपकस्यैव तथात्वात्। उभयत्रैव विश्रान्तिसत्त्वे एव श्लेषप्रसक्तिः। यथा "पृथुकार्त्तस्वरपानम्" इत्यत्र सदनद्वयविशेषणयो श्लिष्टार्थयो विश्रान्तिस्तदाह—**श्लेषे हीति**।

(वि, च) श्लिष्टविरोधाभासेऽपि न श्लेषालङ्कारप्रसक्तिरित्याह—**सन्निहितेति**। नायिका भास्वन्मूर्त्तिर्दीप्यमानमूर्त्तिः सन्निहितबालरूपान्धकारा च मोहजनकत्वेन। बालस्यान्धकारत्वरूपणम्। अत्र भास्वन्मूर्त्त सूर्य्यबिम्बस्यालपान्धकारसान्निध्य बालपदभास्वत्पदश्लेषादुपस्थित विरुद्धतयाऽऽभासते। अत्र श्लेषालङ्काराप्रसक्तिबीजमाह—**विरुद्धार्थस्येति**। प्रतिभातमात्रस्य उपस्थितमात्रस्य इत्यर्थः। प्ररोहाभावाद् अन्वयबोधाभावात्। नहि अन्धकारसन्निहितसूर्य्यमूर्त्तिर्नायिका न वाऽन्धकारसान्निध्य सूर्य्यबिम्बस्य इति बाधस्यापि उपस्थितिमात्रेण एव विरोधाभासालङ्कारता श्लेषस्य तु श्लिष्टार्थस्यान्वये सत्येव अलङ्कारता विरोधाभासवत् श्लेषाभासालङ्कारानभ्युपगमात्।

(लो, औ) श्लेषो बाध्यते—श्लेषव्यपदेशमनूद्यात्मना व्यपदेश कार्य्यते। विश्रान्तिधामता चित्तरूपार्थानुग्रहेण विधेयत्वलाभात्। इह हि चित्तादिकमवच्छादितस्वरूप सरोवरादिरूपत्वमापद्यते। अतएवात्र "राजनारायण लक्ष्मी समालिङ्गति निर्भरम्"इत्यत्र राज्ञो नारायणत्वोचितलक्ष्मीसमालिङ्गन वर्ण्यते। तथा "मुखचन्द्र प्रकाशते" इत्यत्र मुख चन्द्ररूपतामापद्यत इत्युपरचितचन्द्रधर्मस्य तत्र वर्णनम्।

समकक्षत्व न खलु रूपकवद् एकस्य गौणताऽन्यस्य प्राधान्यम्। स्वस्व सामग्रीवशेन पृथक्पृथक्स्वस्वार्थबोधनेनोपक्षेपात्। यथा—"हृदिशेषु वक्ष्यति" इत्यादौ बहनवचनयो तथा "पृथुकार्तस्वर"इत्यादौ पृथुकादीनाम्।

(लो, औ) बाल क्षुद्र केशश्च। भास्वत सूर्य्यस्य, भास्वत कान्तिमतोऽपिवा सूर्य्यमूर्त्तौ अन्धकारस्य सन्निधानाभावाद् विरोधाभास। यथा भासत न तथा विश्रान्तिप्ररोह।

---

* सन्निहितो बालरूपोऽन्धकारो यस्या सा। भास्वती मूर्त्तिर्यस्या सा। प्रतिभा-

1 'विश्राम' (क पु)

एवं पुनरुक्तवदाभासेऽपि । (श) ४

तेन "येन ध्वस्त"इत्यादौ प्राकरणिकयोर्नीतानामित्यादावप्राकरणिकयोरेकधर्माभिसम्बन्धात्तुल्ययोगितायाम् । (प, अ)

"स्वेच्छोपजातविषयोऽपि न याति वक्तुं
देहीति मार्गणशतैश्च ददाति दुःखम् ।
मोहात्समुत्क्षिपति जीवनमप्यकाण्डे
कष्टं प्रसूनविशिखः प्रभुरल्पबुद्धिः ॥" ×

(वि, श) **एवं पुनरुक्ते**ति—न हि भुजङ्गकुण्डलिशब्दयोः एकार्थत्वबोधपर्य्यन्तिकः, आपातमात्रतः श्लेषेण तथा बोधात् ।

(वि, प) इत्थमुक्तस्थलेषु श्लेषालङ्कारं बाधित्वा ते ते अलङ्कारा एवेत्युक्त्वा अलङ्कारान्तरस्यैव बाधकः श्लेष इति तदभिप्रेतं वक्तुमाह—**येन ध्वस्तमिति** । येन ध्वस्तमित्यादौ नीतानामित्यादौ च तुल्ययोगितायां, स्वेच्छोपजातेत्यादौ दीपके सकलकलमित्यादौ चोपमायां विद्यमानायामपि श्लेषेणैव व्यपदेशो भवितुं युक्त इत्यभ्रेऽन्वयः । तेन येन ध्वस्तमित्यादौ माधवोमाधवयोर्द्वयोरपि प्राकरणिक्योः येन ध्वस्तेत्याद्येकधर्मान्वयरूपस्तुल्ययोगितालङ्कारः ।

"पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् ।
एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता ॥"

इति लक्षणात् । अत्र हि प्रस्तुतानां प्राकरणिकानामेवान्येषामप्राकरणिकानामेवेत्यर्थः । नीतानामित्यादौ तु अप्राकरणिकयोरेव वनवृद्धकमलयोः नीतानामित्यादि पूर्वार्द्धोक्ते कर्मान्वयः । स्वेच्छोपजातेत्यादौ सलक्षणं दीपकं दर्शयिष्यते ।

(वि, स) तच्छ्लोकार्थस्तु यथा—प्रभुरल्पबुद्धिरित्यत्र चकारार्थो गम्य ।

(लो, अ) पुनरुक्तवदाभासे यथोदाहृतभुजङ्गकुण्डलीत्यादौ । तेन हेतुना तुल्ययोगितायामित्यादेरुपरितनेन विद्यमानायामित्यनेन सम्बन्धः ।

(लो, आ) **स्वेच्छे**ति । स्वेच्छया उपजात आश्रितः विषयः भोगः यस्य । वक्तुं न यातीति न तत्र स्वार्थनिवेदनं वक्तुं शक्य इत्यर्थः । देहि प्रयच्छ । इति मार्गण-

---

तमात्रस्य शब्दशक्तिमहिम्ना आपाततः उपस्थितस्य प्रतीहाभावात्—पर्य्यन्तेऽन्वयेऽप्रवेशात् । न चात्र उभयविरोधोऽर्थो विवक्षितः । न हि बातुलवत् कोऽपि विरुद्धं प्रजल्पति । अतो द्वितीयार्थस्याप्यन्वये अप्रवेशात् श्लेष एव नास्ति । दूरे चास्तामस्य विरोधिता ।

× कामपक्षे—स्वेच्छया उपजातो विषयो रूपादिर्यस्मादेवंभूत रूपरसगन्धस्पर्शादिविषयकप्रवृत्तिजनकोऽपि देहीति शरीरीति वक्तुं न याति शरीरीति वक्तुमयोग्योऽनङ्गत्वात् ।

इत्यत्र प्राकरणिकाप्राकरणिकयोरेकधर्माभिसम्बन्धाद्[1] दीपके । (स, आ)

सकलकलं पुरमेतज्जातं सम्प्रति सुधांशुबिम्बमिवेत्यादौ चोपमायां विद्यमानायामपि श्लेषस्यैतद्विषयपरिहारेणासम्भवात्, एषां च श्लेषविषय-परिहारेणापि स्थितेः, एतद्विषये श्लेषस्य प्राबल्येन[2] चमत्कारित्वप्रतीतेश्च

वक्तुमित्यत्र भावतुम्वचनमित्यर्थः । तथा च कष्टं खेदे । प्रसूनविशिखोऽल्पबुद्धिः प्रभुश्च स्वेच्छोपजातविषयोऽपि स्वेच्छया सर्वलोकोपरि प्राप्ताधिकारोऽपि देहीति वचनं न याति न प्राप्नोति । देहाभावेन देहीति वाग्विषयो न प्रसूनविशिखः । तथापि मार्गणशतैः असंख्यबाणैः दुःखं ददाति । उक्तरूपः प्रभुस्तु लोकेषु देहीति ददस्वेति वचनं न याति न प्राप्नोति । एतादृशत्यागवक्ता न भवतीत्यर्थः । मार्गणशतैः परधनान्वेषणरूपमार्गणशतैः अर्थात् ईदृशपदातिशतैः दुःखं ददाति । देहीत्यनुक्त्वापि पदातिद्वारा सर्वस्वं हृत्वा दुःखं ददातीत्यर्थः । अधिकारसत्त्वाद्देहीत्युक्त्वापि सर्वस्वं ग्रहीतुं सामर्थ्यसत्त्वेऽपि अल्पबुद्धित्वात्तथा न करोतीत्यर्थः । एवं प्रसूनविशिखः स्वदत्तमोहाद् अकाण्डेऽकस्माज्जीवनमपि समाक्षिपति हरति इत्यर्थः । अत्र प्राकरणिक उक्तरूपः प्रभुरप्राकरणिकः प्रसूनविशिखः, तयोर्न याति इत्याद्येकधर्मान्वयरूपं दीपकम् । तदुक्तम्–"अप्रस्तुतप्रस्तुतयोर्दीपकन्तु तदुच्यते" इति । एकधर्मान्वय इति तत्र शेषः ।

(वि, ह) सकलकलमित्यादौ च सकलकलावत्त्वकलकलशब्दवत्त्वार्थद्वयश्लिष्टोपमा स्पष्टैव । तत्र परस्परव्यभिचारसत्त्वेन द्वयोरप्यलङ्कारत्वं दृढयन्नुभयसत्त्वेषु विषयेषु श्लेषस्यैवौचित्यमित्याह—**श्लेषस्यैतद्** इत्यादि । प्रतिकूलतामुपगते हि विधौ इत्यादिषु एतद्विषयपरिहारेण श्लेषस्य श्लेषरहिततुल्ययोगितादीपकोपमानान्तु श्लेषपरिहारेण स्थितिर्बहुष्वेवोदाहरणेषु द्रष्टव्या । एषु श्लेषालङ्कारस्यैवौचित्ये हेतुमाह—**प्रायल्येन चमत्कारित्वेति** । **अन्यथेति** । एषु विषयेष्वपि तुल्ययोगितादित्रय-

---

शतैः याचनशतैः प्रदानाभावात् पुनः पुनः कृतैः । मोहादपराधगुरुलघुविचारादक्षत्वात् । अकाण्डेऽकस्मात्, स्वल्पेऽप्यागसीति यावत् । पक्षान्तरे तु विषयः कामस्याश्रयो वनितादिः । **वक्तुं न यातीति** । वक्तुं न यातीदृशः सम्प्रति मे काम इति । देहीं प्राणोत्येतावन्मात्रेण विशेषमनपेक्ष्य, मार्गणशतैर्मोहादात्मनो विवेकाभावात् । कष्टमिति निर्वेदेऽव्ययम् । दीपके विद्यमान इत्यर्थः ।

(लो, इ) सकलकलं कोलाहलध्वनिसहितं, सकलाभिः कलाभिर्युक्तं च । एषा तुल्ययोगितादीनां त्रयाणामलङ्काराणां प्राबल्येन चमत्कारित्वं कविना व्यर्थशब्दस्य वैचित्र्यबोधोपायत्वेनोपादानात् ।

---

1 'धर्माभिधानसम्भवात्' (इति क. ग. पु.)
2 'प्राधान्येन" (च. ग. पु)

श्लेषेणैव व्यपदेशो भवितुं युक्त । अन्यथा तद्व्यपदेशस्य सर्वथाऽभावप्रसङ्गा-
दिति । (ह, इ)

अत्रोच्यते—न तावत्परमार्थत श्लेषस्यालङ्कारान्तराविविक्तविषयता, "येन ध्वस्त" इत्यादौ विविक्तविषयत्वात् । नचात्र तुल्ययोगिता, तस्याश्च[1] द्वयोरप्यर्थयोर्वाच्यत्वे नियमाभावात् । अत्र हि माधवोमाधवयोरेकस्य वाच्यत्वनियमेऽपरस्य व्यङ्ग्यत्वं स्यात् । (ई)

स्यैवालङ्कारत्वमित्यर्थ । **तद् व्यपदेशस्येति** । श्लेषव्यपदेशस्येत्यर्थ । नच कथ तदभावप्रसङ्गः । प्रतिकूलतामित्यादिष्वेव तत्सत्त्वादिति वाच्यम् ? तत्रापि विधे प्रतिकूलतोपगमनस्य बहुसाधनतावैफल्यहेतुत्वेन हेत्वलङ्कारसत्त्वात् ।

(वि, क) इत्थ श्लेषस्यालङ्कारान्तरविविक्तविषयासत्त्वादलङ्कारान्तरस्य च श्लेषविविक्तविषयस्यापि सत्त्वेन सामान्यत्वादपवादेन श्लेषेण दर्शितास्तुल्ययोगितादयोऽलङ्कारा बाध्यन्त इति केषाञ्चिन्मते दर्शिते, तद्दूषयितुमाह—**अत्रोच्यत** इति । श्लेषस्यालङ्कारान्तरविविक्तविषयासत्त्वे एव तस्याऽपवादकत्व, तदेव तु न । तस्यापि तद्विविक्तविषयसत्त्वादित्याह—**न तावत्परमार्थत** इति । अलङ्कारान्तरविविक्तविषयं दर्शयति—**येन ध्वस्तमिति** । अत्र येन ध्वस्तमित्यादौ इति समीचीन पाठ । क्वचितु येन ध्वस्तेत्यादिना इति पाठ । तदा च इत्यादिना श्लोकेन हेतुना विविक्तविषयसत्त्वादित्यर्थ. । अत्र माधवोमाधवयो प्राकरणिकयोर्येनेत्यादेकधर्मान्वयित्वात् तुल्ययोगितालङ्कारमाशङ्कते—**नचेति** । समाधत्ते—**तस्यामिति** । तुल्ययोगितायामित्यर्थ । नन्वत्रापि द्वयोः प्राकरणिकयोर्वाच्यत्वमित्याह—**अत्र हीति** । अत्र द्वयोरर्थयोश्च प्राकरणिकत्वे नियामक नास्ति । तथा च वक्त्रा यदेकमेवार्थ प्रकम्येद पयमुक्त स्यात्तदाऽन्यार्थस्य व्यङ्ग्यत्वेन तुल्ययोगिताया अत्र प्रसक्त्यभावेनाऽयमेव तुल्ययोगितालङ्कारविविक्त श्लेषस्य विषय स्यादित्यर्थ । नच तथापि व्यङ्ग्योपमालङ्कारसङ्कीर्ण एवाय श्लेष इति वाच्यम्, सम्भवदवाच्यताकस्यालङ्कारस्य व्यङ्ग्यत्वे अलङ्कारत्वाभावात् किन्तु तदलङ्कारध्वनित्वादेव केवल तत्रालङ्कारव्यपदेशो ब्राह्मणश्रमणन्यायेन वाच्यतादशायामलङ्कारत्वमादाय गौण एव । समासोक्त्यप्रस्तुतप्रशसयोस्तु

(लो, ई) अत्र सिद्धान्तमाह—**अत्रेति** । **वाच्यत्वे नियमाभावादिति** । येन ध्वस्तेत्यादावुक्तप्रकारेण प्रकरणादिनियमाभावात्, माधवोमाधवार्थयोर्द्वयोर्वाच्यत्व नियम । तुल्ययोगितायां च द्वयोर्वाच्यत्वनियमो नास्ति । शब्दयोस्तन्त्रताऽङ्गीकारेण द्वयोर्वाच्यत्वनियम समनन्तरोक्तप्रकारेण ध्वनितन्त्रवादिमते चैकस्य वाच्यत्वमितरस्य व्यङ्ग्यत्वमिति भाव । एतदेव विशेषयति—**अत्र हीति** । अत्र येन ध्वस्तेत्यादौ । अत्र हीत्यनन्तर तुल्ययोगिताङ्गीकारे इति शेष ।

1 तस्याश्च

किञ्च तुल्ययोगितायामेकस्यैव धर्मस्यानेकधर्मिसम्बद्धतया प्रतीति । इह त्वनेकेषा धर्मिणा पृथक् पृथग् धर्मसम्बद्धतया । (क, उ)

" सकलकलम्"इत्यादौ च नोपमाप्रतिभोत्पत्तिहेतु श्लेष । पूर्णोपमाया निर्विषयत्वापत्ते । "कमलमिव मुख मनोज्ञमेतत्"इत्याद्यस्ति पूर्णोपमाया विषय इति चेन्न । यदि सकलकलमित्यादौ शब्दश्लेषतया नोपमा तत्किमपराद्धं

वाच्यताऽसम्भवाद् व्यङ्ग्यत्वेऽपि अलङ्कारता, ननु माधवोमाधवयो द्वयारपि तुल्यविभक्तिविषयत्वेन प्राकरणिकत्वमेवेत्यतो द्वयार्वान्यत्वेनात्र तुल्ययोगितैवेत्यत आह—**किञ्चेति। एकस्यैव धर्मस्ये**ति। न तु एकशब्दवाच्यधर्मद्वयस्येत्यर्थ । **इह त्विति**। येन ध्वस्तेत्यादावित्यर्थ । **अनेकेषाम्** इत्यत्र बहुत्वमविवक्षितम् । उमाधवमाधवयोरित्यर्थ । **पृथग्धर्मै**श्लिष्टशब्दस्य पृथगर्थौ अनोमनोभवादिरूपौ । **सम्बन्धितये**त्यत्र प्रतातिरित्यन्वय । एव च येन ध्वस्तेत्यादौ नातानामित्यादौ च यत्तुल्ययोगिताप्रदर्शन प्राक्कृत तत्परकीयमतप्रदर्शनमात्र कृतमिति बोध्यम् । वस्तुतस्तु तद्द्वये श्लेष एव तुल्ययोगितारहित इति साधित बोध्यम् ।

(वि, ख) तथा सकलकलमित्यादौ च यदुपमाया विद्यमानायामपि अपवादत्वेन श्लेषस्यैव प्राधान्येन व्यपदेशो भवितु युक्त इत्युक्त तत्रोपमैवालङ्कारो न श्लेष इति प्रतिपादयति—**सकलकलमित्यादौ चेति । नोपमाप्रतिभोत्पत्तिरिति** । उपमाप्रतिभा उपमाज्ञानम् । नैव उत्पत्तिहेतुर्ज्ञानोत्पत्तिहेतुर्यस्य श्लेषस्तादृशो न, उपमाज्ञानज्ञाप्यो न श्लेष इत्यर्थ । उपमा श्लेषज्ञापकश्च । अत्र श्लेष एव त्वलङ्कार इति नेत्यर्थ । तथा च श्लिष्टधर्मसाधर्म्या उपमा एवालङ्कार इत्युक्तमनेन । तत्रोपमां बाधित्वा श्लेषस्यैवालङ्कारत्वेऽनिष्टोत्पत्तिमाह—**पूर्णोपमाया** इति । उपमानोपमेय-

---

(लो, उ) अनुपपत्त्यन्तरमाह—**किञ्चेति** । अयमाशय —

"सञ्चारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम् ।
प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनु ॥"

इत्यादौ तुल्ययोगितायामेकस्यैव निलयगमनोपक्रमरूपधर्मस्य सौरभीप्रभयोर्धर्मिणोः सम्बद्धतया प्रत्यय । इह तु श्लेषेषु पुनरनेकेषा धर्मिणा माधवोमाधवप्रभृतीनां येन ध्वस्तमनोभवेनेत्यादिरूपपृथक्पृथग्धर्मसम्बद्धतया प्रत्यय इत्यन्वय । धर्मवाचकशब्दयोर्भिन्नरूपत्वात् । तुल्ययोगिताया तु निलयगमनोपक्रमस्य भिन्नार्थत्वेऽपि एकताध्यवसादेकता । नहि येन ध्वस्तेत्यादावपि माधवोमाधवगामिनोर्धर्मयोरेकताध्यवसाय । द्वयोरनिश्चयेन प्रकृताप्रकृतत्वाभावात् । यद्यपि तुल्ययोगितायामपि द्वयोर्न प्रकृताप्रकृतत्व तथापि तद् विवक्षा, तत्रोपमानोपमेयत्वस्य प्राच्यानामभिमतत्वात् ।

(लो, ऊ) न केवल श्लेषस्यालङ्कारान्तरविविक्तविषयता । पूर्णोपमादिविषयेऽप्यागम्भवोऽपीत्याह—**सकलेति** । पूर्णोपमाप्रकरणे लक्ष्यमाणार्थश्लेषेण कमल

मनोज्ञमित्यादावर्थश्लेषेण ।

स्फुटमर्थालङ्कारावेतावुपमासमुच्चयौ, किन्तु ।
आश्रित्य शब्दमात्रं सामान्यमिहापि सम्भवत. ॥"

इति रुद्रटोक्तदिशा गुणक्रियासाम्यवच्छब्दसाम्यस्याप्युपमाप्रयोजकत्वात् । (ख, ङ)

ननु गुणक्रियासाम्यस्यैव उपमाप्रयोजकता युक्ता, तत्र साधर्म्यस्य वास्तवत्वात्। शब्दसाम्यस्य तु न तथा, तत्र साधर्म्यस्यावास्तवत्वात्, ततश्च पूर्णोपमाया अन्यथानुपपत्ते[1]र्गुणक्रियासाम्यस्यैवार्थश्लेषविषयता[2] परित्यागे पूर्णोपमाविषयता

साधारणधर्मे वादिचतुर्णाम् उपादाने हि पूर्णोपमा । अत्राप्युपमेयं पुरम्, उपमान चन्द्रबिम्बं, सकलकलरूपमुभयान्वितार्थकत्वेन साधर्म्यम्, इवशब्दोऽस्तीति पूर्णोपमा । तद् बाधयाऽत्र श्लेषस्यैवालङ्कारत्वे पूर्णोपमाया निर्विषयत्वापत्तिरित्यर्थः । ननु श्लेषरहितगुणसाधर्म्योपमैव पूर्णोपमा, तद्वान् विषय एव पूर्णोपमाया विषय स्यादित्याशङ्कते—**कमलमिवेति** । अत्र हि न श्लेषो मनोज्ञत्वगुणकथनरूपक्रिययोरेव साधर्म्याद् न तु श्लिष्टशब्दस्य इति । तत्र प्रतिबन्धमाह—**यदीति** । श्लेषो द्विविधः शब्दश्लेषोऽर्थश्लेषश्च । यदि सकलकलामिल्यत्रोपमा बाधित्वा श्लेष एव शब्दालङ्कारस्तदा कमलमिव मुखमिल्यादावप्युपमा बाधित्वा अर्थश्लेषालङ्कारे प्रसजति तेन किमपराद्धं मनोज्ञत्वादिधर्माणामुभयत्रान्वयरूपश्लिष्टत्वादिति भावः । इवशब्दसद्भावादुपमाया एव तत्रानुभविकत्वे तु सकलकलमिल्यादावपि शब्दसाधर्म्यादनुभूयमानोपमैवेत्यभिप्रायेणान्न रुद्रटोक्तमपि प्रमाणयति—**स्फुटमर्थेति** । इहापि शब्दालङ्कारमध्येऽपि "तवाधरे च रागोऽभूद् रम्भोरु ! हृदये च मे" इत्यत्र शब्दसाधर्म्यात् समुच्चयालङ्कार. ।

(वि, ग) तत्र साधर्म्यस्याऽवास्तवत्वादिति । शब्दस्य पुरचन्द्रबिम्बधर्मत्वाभावादिति भाव. । ततश्च सकलकलमिल्यादावुपमाप्रसक्त्यभावात्तत्र श्लेषालङ्कार एवास्तु । पूर्णोपमाया निर्विषयत्वापत्तिपरिहाराय गुणक्रियासाधर्म्येऽर्थश्लेष बाधित्वा पूर्णोपमैवास्तामित्याह—**ततश्चेति** । न तु सकलकलमिल्यादौ शब्दसाधर्म्यस्य

मिवेत्यादौ मनोज्ञत्वधर्मस्य कमलमुखरूपप्रतिसम्बन्धभेदाङ्गीकारप्रयोजितेन किमपराद्धम् । तुल्येनापराधेन शब्दश्लेषविषये पूर्णोपमामनङ्गीकृत्य एतद् विषये किं तस्या परिग्रहोऽभिमतो युष्माकं, द्वयो समानत्वादिति भाव । कथ द्वयो. समानन्यायत्वमित्याह-**स्फुटमिति** । समुच्चयो यथा वसुधामहितेत्यादि. । सामान्य साधारणो धर्म । इह शब्दालङ्कारमध्ये मुखमम्य, कमलमित्यादि, क्रियासाम्य चन्द्र इव मुख शोभते इत्यादि ।

---

1 'नुपपत्या' (क ङ)
2 विषयतया परित्यागे (क. ङ)

युक्ता, न तु सकलेत्यादौ शब्दसाम्यस्ये'ति चेत्त । 'साधर्म्यमुपमेत्येवाविशिष्टस्य उपमालक्षणस्य शब्दसाम्याद् व्यावृत्तेरभावात् । (ग, ङ)

यदि वा शब्दसाम्ये साधर्म्यमवास्तवत्वान्नोपमाप्रयोजक तदा कथ विद्वन्मानसेत्यादौ आधारभूत चित्तादौ सरोवराधारोपो राजादेर्हंसाधारोप[2]-प्रयोजक । (घ, ङ) *

किञ्च यदि वास्तवसाम्य एवोपमाङ्गीकार्य्यो, तदा कथ त्वयापि सकल कलेत्यादौ बाध्यभूतोपमाङ्गीक्रियते । (च, छ) †

इत्यत्र उपमाप्रयोजकत्वमिति यन्वय । **शब्दसाधर्म्याद् व्यावृत्तेरभावादिति**-उपमालक्षणस्य शब्दसाम्यतोऽव्यावृत्तत्वात् शब्दसाम्यविषयत्वादपीत्यर्थ । शब्दस्य साधर्म्यं च वाचकतासम्बन्धेन इति यद्वृत्तित्वादिति भाव ।

(वि, घ) यदि हि वाचकतासम्बन्धस्य वृत्तिनियामकत्वाभावेन शब्दरूपसाधर्म्यस्य अवास्तवत्वान्नालङ्कारप्रयोजकत्व तदा परम्परितरूपके एव शब्दवाच्यत्वेन साम्येन तदर्थयोरभेदारोपात्मकरूप कथ रूपकालङ्कारप्रयोजकमित्याह-**शब्दसाम्य** इति ।

(वि, ङ) ननु साधर्म्यं तावत् समानो धर्मस्तस्याऽवास्तवत्वे तदनुपपन्नम् । विद्वन्मानसेत्यादौ त्वभेदारूप आहार्य्यऽवास्तवत्वेऽपि श्लिष्टशब्दरूपदोषेण सम्भवत्येव इत्यत आह—**किञ्चेति** । **बाध्यभूतोपमेति** । उपमात्वाभावे उपमाया बाध्यत्वस्याप्यनुपपत्ति इत्यर्थ ।

(लो, ङ) तत्र गुणक्रियासाम्ये वास्तवत्वात् स्वाभाविकत्वात् अवास्तवत्वात् अतात्त्विकत्वात् । पूर्णोपमाविषयता युक्ता गत्यन्तराभावादिति भाव । अविशिष्टस्य गुणक्रियासाम्ये चेति विशिष्यानिर्दिष्टस्य ।

(लो, ङ) दूषणान्तरमाह—**यदि चेति** । अयमर्थ –यदि शब्दसाम्यस्य सकलकलोमित्यादौ नोपमाप्रयोजकता कथ तर्हि 'विद्वन्मानसहस''इत्यादौ राज्ञो हसारोपस्य मानससाधारणप्रयोजकता चेति ।

(लो, छ) पुनर्दूषणान्तरमाह—**किञ्चेति** । बाध्यभूता श्लेषस्य सर्वालङ्कारापवादत्वप्रपन्नेत्यर्थ । कथमङ्गीक्रियते, उत्सर्गसिद्धस्यैवाऽपवादबाध्यत्वादित्यर्थ ।

---

* विद्वन्मानसेत्यादौ शब्दसाम्यस्यैवारोपनिमित्तत्वात् तस्यावास्तवत्वेन उपमावद् रूपकस्याऽपि अप्रयोजकत्वात् श्लिष्टरूपकाभावापत्तिरित्यर्थ । अत शब्दसाम्येऽपि साधर्म्यमङ्गीक्रियते इति भाव ।

† रूपके अवास्तवसाम्यस्य प्रयोजकत्व नोपमायामित्याशङ्क्याह—**किञ्चेति** । उपमाया असम्भवे उपमाया बाध्यतावादिनस्तव स्ववचनविरोध इत्यर्थ ।

1 'साम्यस्यैवेति' (क पु)

2 रूपकेति अधिक पाठ (क पुस्तके)

किञ्चात्र श्लेषस्यैव साम्यनिर्वाहकता, न तु साम्यस्य श्लेषनिर्वाहकता, श्लेषबन्धतः प्रथमं साम्यस्यासम्भवादित्युपमाया एवाङ्गित्वेन व्यपदेशो न्यायान्। प्रधानेन व्यपदेशा भवन्तीति न्यायात्। ननु शब्दालङ्कारविषयेऽङ्गाङ्गिभावसंकरो नाङ्गीक्रियते तत्कथमत्र श्लेषोपमयोरङ्गाङ्गिभाव संकर इति चेन्न। अर्थानुसन्धानविरहिण्यनुप्रासादावेव तथानङ्गीकारात्। एवं दीपकादावपि ज्ञेयम्। (च, ए) *

"सत्पद्मा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः।

(वि, च) ननु तत्रैव शब्दबोध्यत्वरूपसादृश्यात्तत्रोपमापदं गौणमेवेत्यत आह—किञ्चेति। श्लेषस्यैव इति। श्लिष्टपदस्यैवेत्यर्थः। साम्यनिर्वाहकता—उपमाघटकसाम्यनिर्वाहकता। उभयात्मकत्वे ज्ञाते सत्येव तादृशैकशब्दार्थरूपसाम्यबोधादित्यर्थः। श्लेषबन्धतः प्रथममिति। सकलकलपदबन्धाभावे पुरचन्द्रविम्बयोः साम्याऽप्रतीतेः, अङ्गित्वेन पर्य्यन्तिकप्रतीतिविषयतया प्रधानत्वेन, तथा च श्लिष्टपदार्थानुसन्धानेन साम्यप्रतीतौ ततोऽङ्गिन्युपमा प्रतीयते। श्लेषस्तु तन्निर्वाहकरूपमङ्गमिति भावः। अङ्गाङ्गिभावो निर्वाहकनिर्वाह्यभाव.। एवं दीपकादावपीति। दीपकतुल्ययोगिताऽर्थालङ्कारादावपि श्लेषस्तदङ्गमित्यर्थः।

(वि, छ) इत्थं सकलकलमित्यत्रोपमैव न श्लेष इति साधिते श्लेषाधीनवस्तुध्वनावपि न श्लेषालङ्कार इत्याह—सत्पद्मा इति। शरत्कालवर्णनमिदं प्राकरणिकम्।

(लो, ए) एवं चात्रोपमाया श्लेषप्रतिभोत्पत्तिहेतुत्वेनाङ्गित्वं, श्लेषस्य तदङ्गत्वमिति युक्त्यन्तरेणापि दृढयति—किञ्चात्रेति। साम्यमुपमाप्रयोजकम्। अङ्गाङ्गिभावसंकर। "अविश्रान्तजुषामात्मन्यङ्गाङ्गित्वे तु संकर" इत्युक्तप्रकारः। अर्थाननुसन्धानात् शब्दालङ्कारेष्वनुप्रासादीना परस्परनिरपेक्षत्वेनाङ्गाङ्गिभावसंकर. नाङ्गीक्रियते, श्लेषादेस्त्वर्थानुसन्धानात् सापेक्षत्वेन परस्परापेक्षासम्भवात् कथं वा न स्वीक्रियते इति भावः। एवमुक्तप्रकार उपमाभिधायकन्यायो दीपकादावपि ज्ञेयः। अयमर्थ —यथा शब्दसाम्यस्योपमाप्रयोजकत्वे श्लेषस्य तदङ्गता, तथा दीपकादिप्रयोजकत्वे दीपकाद्यङ्गतेति। आदिशब्दात्तुल्ययोगितादौ।

(लो, ऐ) सत्पद्मा इति। पद्मो गरत् सहायश्च। प्रसाधिताः भूषिता. प्रकर्षेण—स्मसात्कृताश्च। धार्त्तराष्ट्रा हंसाः दुर्योधनादयश्च। उपमाध्वनिशङ्का निराचष्टे।

* न हि श्लेषमन्तरा साधारणधर्मसम्भवः। साधारणधर्मं विना उपमा नैव सम्भवति। अतः श्लेषस्य साम्यनिर्वाहकता। यच्च यन्निर्वाहकं तत् तदङ्गम्। अङ्गं चाप्रधानमेव। अत. श्लेषोऽत्र उपमाया अङ्गमप्रधानं च उपमा तु प्रधानभूता। अत उपमया व्यपदेशो ज्यायान्।

निपतन्ति धार्तराष्ट्रा. कालवशान्मेदिनीपृष्ठे ॥" (छ, ऐ)

अत्र शरद्वर्णनया प्रकरणेन धार्तराष्ट्रादिशब्दानां हंसार्थाभिधाने नियमनाद् दुर्योधनादिरूपोऽर्थ शब्दशक्तिमूलो वस्तुध्वनिः। इह च प्रकृतप्रबन्धाभिधेयस्य द्वितीयस्यार्थस्य सूच्यतयैव विवक्षितत्वादुपमेयोपमानभावो न विवक्षित इति नोपमाध्वनिर्नच श्लेष इति सर्वमवदातम्। (ज, झ)

पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ॥ १६ ॥ (ञ)

— आदिशब्दात् खड्गमुरजचक्रगोमूत्रिकादयः। अस्य च तथाविधलिपिसन्निवेशविशेषवशेन चमत्कारविधायिनामपि वर्णानां तथाविधश्रोत्राकाशसमवायित्वम्। तत्र धार्तराष्ट्रा कृष्णवर्णचञ्चूचरणा हंसविशेषा शरत्कालवशात् मेदिनीपृष्ठे निपतन्तीत्यन्वय । पद्म पतत्रम्। आशा प्रणाधनं दिक्षु गमन, चौरादिकस्य गाधेर्गत्यर्थत्वात्। अत्र धृतराष्ट्रपुत्राणाममङ्गले वस्तुतस्तात्पर्यम्। तेषां मरणरूपं वस्तु निष्टशब्दव्यञ्जनया प्रतीयते। तत्र धार्तराष्ट्रा धृतराष्ट्रपुत्रा दुर्योधनादयः प्रसाधिताशाः शासितदिङ्मण्डला. । अतएव मदोद्धतारम्भाः । शत्रवः प्रकृष्टसहायाः कालवशाद् यमवशाद् मधुरगिरः कान्तवाच मेदिनीपृष्ठे निपतन्ति इत्यर्थः।

(वि, ज) अत्र चोपमाध्वनित्वं श्लेषालङ्कारश्च न प्रसज्यत इत्याह—इह चेति। प्रकृतप्रबन्धो वेणीसंहारनाटक तदभिधेयस्य तत्प्रतिपाद्यस्य दुर्योधनादीनां मरणरूपस्य द्वितीयार्थस्य सूच्यतयैव व्यङ्ग्यतयेत्यर्थ , न तु हंसोपमानत्वेनेति एवकारार्थ । तदेव विवृणोति—उपमेय इति । नच श्लेष इति । उभयार्थस्य वाच्यत्वाभावाद् इति भाव । सर्वमवदातमिति। येन ध्वस्तमित्यादावलङ्कारान्तरासङ्कीर्ण एव श्लेष. । सकलकलमित्यादौ च श्लेषघटित उपमालङ्कार एवेत्यादिक विशदितमित्यर्थ ।

(वि, झ) चित्रालङ्कारमाह—पद्मेति। अत्र वर्णस्मारकलिपीनां सन्निवेशस्यैव पद्माद्याकारकत्वाल्लिपीनां चाऽशब्दत्वात् शब्दालङ्कारत्वमस्याऽनुपपन्नमित्याशङ्क्य समाधत्ते—तथाविधश्रोत्रेति। तथाविधलिपिस्मार्य्यवर्णस्य यः श्रोत्ररूपे आकाशे सम

(लो, औ) प्रकृतप्रबन्धो वेणीसंहाराख्य नाटकम्। सूच्यतयैव विवक्षितत्वात् यदुक्तमेव नाटकलक्षणावसरे "सूचयेद् वस्तुबीज वा मुख्यपात्रमथापिवा" इति उपमेयोपमानभावो हंसादीना दुर्योधनादिभि सहेत्यर्थ.। नच श्लेष, शरद्वर्णनाया एव प्रकृतत्वात्।

(लो, औ) सम्प्रति रसानुपकारकमपि कविभिस्तेषु तेषु शक्तिप्रदर्शनार्थमुपनिबद्धत्वात्प्राच्यैरलङ्कारमध्ये लक्षितं चित्र निरूपयति—पद्मेति। अस्य चालङ्कारतायां तथाविधनेपुण्यादिसत्कारवशेन विस्मयावेशो यथाकथञ्चिद् बीजम्।

(लो, अ) तथाविधश्चक्षुरिन्द्रियैरनुभूयमानो यो लिपिनिवेशः सन्निवेशविशेषोऽर्थाद् भूम्यादिस्थले सम्यगभिमतनिर्वाहोपयिकतया निवेशविशेष [illegible] लिपिनी-

वेशेषवशेन चमत्कारविधायिभिर्वर्णैरभेदेनोपचाराच्छब्दालङ्कारत्वम् । (झ, ञ)

तत्र पद्मबन्धो यथा मम—

"मारमासुषमा चारुरुचा मारवधूत्तमा ।
मात्तधूर्त्ततमावासा सा वामा मेऽस्तु मा रमा ॥" (ज)

एषोऽष्टदलपद्मबन्धो दिग्दलेषु निर्गमप्रवेशाभ्यां श्लिष्टवर्णः, किन्तु विदिग्-दलेष्वन्यथा, कर्णिकाक्षरन्तु श्लिष्टमेव । एव खड्गबन्धादिकमप्यूह्यम् । (ट, आ)

वायविशेष तद्वशेन चमत्काराधायिभिर्वर्णैः सह लिपे अभेदोपचारादित्यर्थः । तादृशसमवायस्य वर्णानुभवजनकत्व तज्जनितसस्कारेण लिपितो वर्णस्मरण ततश्च मत्कार इत्येतत्परम्परया श्रोत्रावाशसमवायस्य चमत्कारजनकत्व बोध्यम् । तत्तद्वर्ण निरूपितसमवायलाभार्थं विशेषपर्य्यन्तानुधावनम् ।

(वि, ञ) मारमेति ।

'मारमा सुषमा चारु-रुचा मारवधूत्तमा ।
मात्तधूर्त्ततमा वामा सा वामा मेऽस्तु मारमा ॥"

इति श्लोक ।

अस्यार्थ —सा वामा मा आर नागता । कीदृशी चारुरुचा विशिष्टा अतएव मासुषमा, लक्ष्मीतुल्यपरमाशोभा । तथा मारस्य कामस्य वधू रतिरिवोत्तमा । तर्हि धूर्त्ततया नागता इत्यत्राह—**मात्तधूर्त्ततमा** इति । धूर्त्ततमा पुनर्मेयर्थ । तत्कथ नागतेयत्राह—अवासा—वासो वसति तद्रहिता । इथ श्रुत्वा नायक आमानमाशास्ते—**सा वामेति** । पूर्वान्वितस्यापि आवृत्त्या पश्चादप्यन्वयेन सा वामा मे मारमा कामलक्ष्मीरस्तु । आवृत्तिवशेन सा वामा इत्यस्य पश्चादप्यन्वयेन तस्य वा परकीयपदत्वादपि तत्पर त्वाद् मे इत्यादेश ।

(वि, ट) अस्य बन्धप्रकार दर्शयितुमाह—**एषोऽष्टदलपद्मबन्ध** इति । अष्टदलता च दिगविदिग्दलैलक्ष्या । **तत्र प्रवेशनिर्गमाभ्यामिति** । कर्णिकाया-मादवर्णं लिखित्वा दले द्वौ द्वौ वर्णौ लेख्यौ । तत्र निर्गमप्रवेशाभ्यामिलेव बोध्यम् ।


कृत्येत्यर्थ । तथाविधश्रोत्रेन्द्रियेणानुभूयमानैर्वर्णैरर्थादनुप्रासादिशब्दालङ्कारप्रयाजकै । अत्र हि शब्दान्वयव्यतिरेकानुविधायित्वमात्रेण शब्दालङ्कारत्वाङ्गीकारेऽनुप्रासान्त पातित्वमेव स्यादिति भाव ।

(लो, आ) मारमेति—माया लक्ष्म्या रमणात् मारमो विष्णुस्तस्य असुसमा प्राणसमा । मारवधू रति । ततोऽपि उत्तमा श्रेष्ठा । आत्ता गृहीतो धूर्त्ततमस्यावासो यया एवभूता न भवतीत्यर्थ । तथाभूता सा प्रसिद्धा रमा लक्ष्मीर्मे वामा, वक्रा मास्त्विति सम्बन्ध । **एषोऽष्टदल** इति । कर्णिकायाम् मा" शब्दं विन्यस्य "रमा' इत्यक्षरद्वय तत्र दिग्दले लिखित्वा 'सु' 'ष' इति अक्षरद्वय विदिग्द

काव्यान्तर्गडुभूततया तु नेह प्रपञ्च्यते (इ)। *

कर्णिकालिखितप्रथमवर्णमाकारमारभ्य प्राच्यदले प्रथमनिर्गमादेव श्लोकान्ते च प्रवेशात्। तत आग्नेयदलात् प्रवेश एव दक्षिणदिग्दले, ततो निर्गत्य पुनः प्रवेश.। नैर्ऋतदले ततो निर्गत्य पश्चिमदले प्रवेशस्तत. तेनैव दलेन निर्गत्य वायव्यदलप्रवेशः। तत उत्तरदलेन च निर्गत्य तेनैव दलेन पुन प्रवेश., तत ईशानदलेन निर्गत्य प्राच्यदलेन पुनः प्रवेश इति। अस्य मस्थानं लिखित्वाऽपि दर्श्यते यथा पद्मबन्धः।

पद्मबन्धो यथा-



लेन प्रवेश्य "चारु" इत्यक्षराभ्यामितरदिग्दलेन निर्गमप्रवेशौ। तदनन्तरं विदिग्दले 'रव' इति अक्षरद्वयं दत्त्वा तदनन्तरदिग्दले "धूर्त्त" इत्यक्षरद्वयेन प्रविश्य पुन कर्णिकाक्षरात् प्रभृति तेनैव निर्गम्य "तमा" इत्यक्षरद्वयेन, पुनः तदनन्तरविदिग्दले प्रविश्य, तदनुदिग्दले, "वा सा" इत्यक्षरद्वयेन निर्गमप्रवेशौ। तदितरदिग्दले 'मेऽस्तु" इत्यक्षरद्वयेन निर्गत्य पुन प्राक् निर्गम्य दिग्दले "मार" इत्यक्षरद्वयेन प्रविश्य कर्णिकाङ्कता गते "मा" इत्यत्र विश्रान्तिः। श्लिष्टवर्ण· अभिन्नवर्णः। कर्णिकाक्षरं "मा" इति। खड्गबन्धो यथा—

"सानन्दं देवदैत्यद्विजभुजगमुखैः प्राणिभिः सेव्यमाना
नाशं तापं नयन्ती शरदि शशिकला श्यामयन्ती स्वभासा।
मा सत्य· साधरारे सकलजगदधीशेन संयुक्तहारा
सा ध्वस्ताशेषपापा सलिलानिधिसुता सन्तत पातु युष्मान्॥"

(लो, इ) अन्तर्गडुभूततया काव्यमध्यप्रविष्टगडुवद् असारतया।

---

* कण्ठगतोच्चप्रदेशो गडु। देहे गडुवदसारं भारग्रायमित्यर्थः। तदुक्तं ध्वनिकृता—

"यमकादिनिबन्धेषु पृथग् यत्नोऽस्य जायते।
शङ्कस्याऽपि रसाङ्गत्वं तस्मादेषा न विद्यते॥"

रसस्य परिपन्थित्वान्नालङ्कारः प्रहेलिका ।
उक्तिवैचित्र्यमात्रं सा च्युतदत्ताक्षरादिका ॥ १७ ॥ (ठ)

च्युताक्षरा दत्ताक्षरा च्युतदत्ताक्षरा च । उदाहरणम्—

"कूजन्ति कोकिला साले यौवने फुल्लमम्बुजम् ।
किं करोतु कुरङ्गाक्षी वदनेन निपीडिता ॥" (ड)

अत्र "रसाल" इति वक्तव्ये "साल" इति रच्युत । "वने" इत्यत्र "यौवन" इति यौदत्त. । "वदनेन" इत्यत्र "मदनेन" मच्युतो वो दत्त । आदिशब्दात् क्रियाकारकगुप्त्यादय । तत्र क्रियागुप्तिर्यथा—

"पाण्डवाना सभामध्ये दुर्य्योधन उपागत ।
तस्मै गां च हिरण्य च सर्वाण्याभरणानि च ॥"

अत्र "दुर्य्योधन" इत्यत्र "अदुर्य्योधन" इति । अदुरिति क्रिया गुप्ता । एवमन्यत्रापि । (ढ)

(वि, ठ) प्रहेलिका वक्तुमाह—**रसस्येति** । नालङ्कारो न रसप्रकर्षकोऽलङ्कार इति, किन्तु उक्त्यलङ्कार एवेत्याह—**उक्तिवैचित्र्यमात्रामिति** । तथा च वैचित्र्य मलङ्कार इति अलङ्कारसामान्यलक्षणाक्रान्तत्वाद् उक्त्यलङ्कार एव स इत्यर्थ । सा च्युतदत्तेत्यादिनिप्रकारा क्रिया गुप्त्यादिका च भवतीत्याह—**च्युतदत्तेति** । च्युताक्षराऽयुक्तैकाक्षरा । दत्ताक्षरा उक्ताधिकैकाक्षरा । च्युतदत्ताक्षरा एकाक्षर च्यावयित्वा तत्स्थले दत्तापराक्षरा ।

(वि, ड) एतत्त्रयस्य एकमुदाहरणमाह—**कूजन्तीति** । अत्र यथाश्रुतेऽर्थसम्भवेपि अनुपयुक्तकथनरूपत्वेन च्युतदत्ताक्षरत्वे एव तात्पर्य्यात् । प्रहेलिकात्व तत्र यथाश्रुतेऽर्थो यथा—कोकिला शालवृक्षे कूजन्ति । नारीणा यौवनेऽम्बुज फुल्लम् । निपीडिता कुरङ्गाक्षी वदनेन किं करोतु इति । अनुपयुक्तकथनमेतत् । च्युतदत्ताक्षरत्वे तु भवत्येव उपयुक्तकथनम्—यथा—"कूजन्ति रसाले कोकिला । वने जले चाम्बुज फुल्लम् । एभिरुद्दीपकैर्मदनेन निपीडिता सती कुरङ्गाक्षी किं करोतीति ।

(वि, ढ) अत्र च्युतदत्ताक्षराणि दर्शयति—**अत्रेति** । **पाण्डवानामित्यादि** स्पष्टम् । क्रियागुप्त्यादौ यथा मम—

"षड्जसम्वादमापन्नै स्वरै श्रुतिमनोहरै ।
गिरिशृङ्गस्थित सर्व मयूर जयति ध्रुवम् ॥" इति

अत्र मयूर जयति इत्यत्र लुप्त कर्त्ता । सिद्धान्ते तु मयूस्तुरङ्गवदनो गिरिशृङ्गस्थितं सर्वं जन रञ्जयतीत्यर्थ । कर्मगुप्तिर्यथा—

"कर्मभिर्बहुभि श्रान्त पुरुषो वारयत्ययम् ।
अपयातपरिश्रान्तेरस्य दास्यामि वेतनम् ॥"

सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च ।
उपमेयं चोपमानं भवेद् वाच्यम् ॥ १६ ॥

सा उपमा । साधारणधर्मो द्वयोः 'सादृश्यहेतु गुणक्रिये मनोज्ञत्वादि। औपम्यवाचकमिवादि, उपमेयं मुखादि, उपमानं चन्द्रादि । (द, ऊ) ×

वाच्यत्वघटितं लक्षणं कृतम् । किन्तु वाच्यमित्यस्याऽव्यङ्ग्यमित्येवार्थः । अतएव रूपकादौ साधर्म्यस्य व्यङ्ग्यत्वादेव तत्र वाच्यपदेन तद्व्याप्तिर्दर्शिता । इवादेरुपमानस्याऽनुपादाने त्वच्याहृतादिवादेरुपमानवाचकपदाच्च तल्लाभो, न व्यञ्जनयेति तत्त्वम् । इवाद्युपादाने तु अन्विताभिधानाभ्युपगमे वाच्यत्वमेव तादृशसम्बन्धस्य । तदनभ्युपगमे तु इवाद्युपादाने तुल्याद्युपादाने वा संसर्गमर्य्यादयैव तल्लाभ इति । सर्वत्राऽव्यङ्ग्यत्वमेव ।

(वि, द) सा च पूर्णा लुप्ता चेति द्विधा । तत्र पूर्णामाह—सा पूर्णेति । भवेद्वाच्यमिति । कारिकाबलस्य "इयं पुनः" अग्रे शेषभागः । व्याचष्टे—सा उपमेति । सामान्यधर्मपदार्थमाह—साधारणधर्म इति । स एव कः इत्यत्राह—द्वयोरिति । श्लिष्टशब्दोऽपि गुण इत्यभिप्रायः । तेन सकलकलंपुरमित्यादेः परिग्रहः ।

(लो, ऊ) तद्भेदानाह—सेति । सामान्यधर्म इत्यस्य विवृत्तिः साधारणधर्म इति द्वयोरुपमानोपमेययोः ।

× साधारणत्वं तदितरानुवृत्तित्वम् । सादृश्यं—तद्गतभूयोधर्मवत्त्वम् । 'साधारणधर्मवत्त्वेन प्रसिद्धः पदार्थ उपमानम्' । तद्वत्तया वर्णनीयः पदार्थ उपमेयम् । औपम्यवाचका इवादयो दण्डिना काव्यादर्शे उक्ताः ।

यथा—"इववद्वायथाशब्दाः समाननिभसन्निभाः ।
तुल्यसंकाशनीकाशप्रकाशप्रतिरूपकाः ।
प्रतिपक्षप्रतिद्वन्द्विप्रत्यनीकविरोधिनः ।
सदृक्षसदृशसंवादिसजातीयानुवादिनः ।
प्रतिबिम्बप्रतिच्छन्दसरूपसमसम्मिताः ।
सलक्षणसदृक्षाभसपक्षोपमितोपमाः ।
गल्पदेशीयदेश्यादि प्रख्यप्रतिनिधी अपि ।
सवर्णतुलितौ शब्दौ ये चान्यूनार्थवादिनः ।
समासश्च बहुव्रीहि. शशाङ्कवदनादिषु ।
स्पर्द्धते जयति द्वेष्टि दुह्यति प्रतिगर्जति ।
आक्रोशत्यवजानाति कदर्थयति निन्दति ।

1 'सादृश्यहेतुगुणक्रिये' (क. पु)
'सादृश्यहेतुर्मनोज्ञत्वादि.' (च. पु.)

इयं पुन
श्रौती यथेववाशब्दा इवार्थो वा वतिर्यदि । (ऋ)
आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वति ॥ २० ॥ *

यथेववादय शब्दा उपमानानन्तरप्रयुक्ततुल्यादिपदसाधारणा अपि श्रुतिमात्रेणोपमानोपमेयगतसादृश्यलक्षण सम्बन्ध बोधयन्तीति तत्सद्भावे श्रौत्युपमा । एव "तत्र तस्येव" इत्यनेन इवार्थे विहितस्य वतेरुपादाने । (ध, ऋ) ×

(वि, घ) अस्या श्रौत्यार्थीत्वद्वैविध्यमाह—**इय पुनरिति** । इय पूर्णोपमा सर्वप्रकारैव श्रौती आर्थी चेत्यर्थ । वक्ष्यमाणा लुप्ता तु किञ्चित्प्रकारैव । यथेववा शब्दा इत्यत्रादिपदशब्दोऽपि बोध्य । तेन "शात्रव च पपुर्यश" इयादावपि तथात्वम् । श्रुतिमात्रेण श्रवणमात्रेण शीघ्रमित्यर्थ । उपमानोपमेयगत सम्बन्ध प्रति यागितानुपयोगितारूपमित्यर्थ । **सादृश्यलक्षणमिति** । सादृश्याल्लक्षण ज्ञान यस्य तादृशमित्यर्थ । प्रतियोगिताऽनुयोगिताख्यस्य सम्बन्धस्य सादृश्यनिरूप्यत्वेन तज्ज्ञानज्ञेयत्वात् । ननु सादृश्यरूप एव सम्बन्ध उपमा, तस्य तुल्यादिपदानामपि वाच्यत्वात् शीघ्रप्रतीयमानत्वेन इवादितोऽविशेषेण श्रौत्यार्थीविभागानुपपत्ते । षष्ठ्यन्तसप्तम्यन्ततो विहितस्य वतेरर्थीवार्थे पाणिनिना विहितत्वात्, तस्यापि इवतुल्यव्युत्पत्तिरू-

---

(लो, ऋ) इय पूर्णा । श्रौतीशब्द श्रुत्या ज्ञायत इति व्युत्पत्त्यर्थो । तेन साक्षान्निवेदिता श्रौती ।

(लो, ऋ) उपमानानन्तरप्रयुक्ततुल्यादिपदसाधारणा अपीति । ननु मुख चन्द्र तुल्यमित्याद्याकारेण उपमानानन्तरे यानि प्रयुक्तानि तुल्यसदृशादीनि पदानि तत्साधारणास्तत्प्राया यद्यपीत्यर्थ । **श्रुतिमात्रेण** यादि । अयमाशय—मुख कमलमिव इत्यादे शब्दस्य प्रयोगादेव मुखमुपमेय कमल चोपमानमिति प्रतीति । न त्वेव

विडम्बयति सन्धत्ते हसतीर्ष्यत्यसूयति ।
तस्य मुष्णाति सौभाग्य तस्य कान्ति विलुम्पति ।
तेन सार्द्ध विगृह्णाति तुला तेनाधिरोहति ।
तत्पदव्या पद धत्ते तस्य कक्षा विगाहते ।
तमन्वेत्यनुबध्नाति तच्छील तन्निषेधति ।
तस्य चानुकरोतीति शब्दा सादृश्यसूचका ॥"

* उद्भट आह—'यथेवशब्दयोगेन सा श्रुत्यान्वयमर्हति ।'

प्रदीपेप्युक्तम्—श्रौतत्व चोपमानोपमेययो साधारणधर्मसम्बन्धरूपायास्तस्या शब्दबोधविषयत्वम् । अर्थापत्तिगम्यत्व चार्थत्वम् ।'

× साधर्म्य सादृश्य च भिन्नम् । साधर्म्यमेवोपमा । इवादिप्रयोगस्थले साधर्म्यम्

अथावसरप्राप्तेष्वर्थालङ्कारेषु प्राधान्यात् सादृश्यमूलेषु लक्षितव्येषु तेष्वप्युपजीव्यत्वेन प्रथममुपमालङ्कारमाह—(ण, ई) *

साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमाद्वयोः ॥ १८ ॥ (त)

अत्र पुरुषोऽय वारयतीति । अस्य कम गुप्तम् । सिद्धान्ते तु वा जल पुरुषोऽमर्यति याति । अक्षरलोपगुप्ति विरुद्धप्रदर्शन च यथा—

"मुकुन्देनामुना नून शुभ्रेण वरवर्णिनि ।
हसितेनासितेनापि राजमाना वनाङ्गने ॥"

अत्र मुकुन्देन शुभ्रेण हसितेनाऽसितेन इति विरुद्धधर्मवत्त्वम् । अत्रैव कस्यचिदक्षरस्य लोपो गुप्त । सिद्धान्ते तु मुकुन्दपदस्य मुकाररहित्यात् कुन्देन इत्यर्थ तथा च तेन कुन्दवैशिष्ट्येन यद् हसित तेन राजमानाऽमीत्यर्थ ।

(वि, ण) अर्थालङ्कारान् वक्तुमाह—**अथेति** । **प्राधान्यात् सादृश्यमूलेष्विति** । उपमारूपकोत्प्रेक्षादयो बहवोऽलङ्कारा सादृश्यमूला अन्यालङ्कारान्तरापेक्षया चमत्काराधिक्यात् प्रथम ते लक्षितुमुचिता । तत्रापि तत्सर्वोपजीव्यत्वेन प्रथममुपमामाहेत्यर्थ । तस्यास्तदुपजाव्यत्व च सर्वत्रैव सादृश्यवशात् प्रथममुपमास्फुरणात् ।

(वि, त) साम्यमिति । अवैधर्म्यमनुक्तवैधर्म्यम् । द्वयोरुपमेयोपमानयो साम्य वाक्यैक्ये वाच्य सद् उपमा इत्यर्थ ।

(लो, ई) अथेति । अथ शब्दालङ्कारनिरूपणानन्तरमर्थालङ्कारेष्वर्थालङ्कारविशेषलक्षणेषु । प्राधान्यादित्यनन्तर प्रथममिति शेष । उपजीव्यत्व तेषामेतन्मूलत्वेन प्रवृत्ते । यदुक्तम्—उपमैव प्रकारवैचित्र्येण सर्वालङ्काराणा बीजभूतेति ।

---

* "अलङ्कारशिरोरत्न सर्वस्व काव्यसम्पदाम् ।
उपमा कविवंशस्य मातेवेति मतिर्मम ॥" (राजशेखर)

अलङ्कारसर्वस्वेप्युक्तम्— 'उपमैवानेकप्रकारवैचित्र्येणानेकालङ्कारबीजभूतेति प्रथम निर्दिष्टा ।"

तथाचोक्त तत्रैव—'मुखमेव चन्द्र मुखचन्द्र, मुख चन्द्रश्च शोभते, मुख वा चन्द्रो वा, न मुख किन्तु चन्द्र इत्यादिसादृश्यविच्छित्तिविशेषे रूपकदीपकाद्यनेकालङ्कारबीजतयोपमाया प्रथम निरूपणमित्यर्थ ।'

+ समयो साधारणधर्म्मसम्बन्धवतोर्भाव साम्य साधारणधर्म्मसम्बन्धरूप साधर्म्यम् । तत्साधर्म्य सादृश्यस्य निर्वाहकम् ।

लक्षणान्तराण्यपि शास्त्रान्तरेषु दृश्यन्ते । तथाहि—'अथात उपमा यदेतत्तत्सदृशमिति गार्ग्यस्तदासा कर्म ।' निरु ३ १३

'यत्किञ्चित्काव्यबन्धेषु सादृश्येनोपमीयते ।
उपमा नाम सा ज्ञेया गुणाकृतिसमाश्रया ॥" भरतनाट्यशास्त्रे

रूपकादिषु साम्यस्य व्यङ्ग्यत्व, व्यतिरेके च वैधर्म्यस्याप्युक्ति , उपमेयोपमायां द्वयम् , अनन्वये च एकस्यैव साम्योक्तिरित्यस्या भेद । (थ, उ)

(वि, थ) तत्र वाच्यपदव्यावृत्तिमाह—रूपकादिष्विति । एव च उपमाच्च लुप्तोपमापद गौणमिति बोध्यम् । अवैधर्म्यपदव्यावृत्तिमाह—व्यतिरेके चेति । तत्रैक्यपदवृत्तिमाह—उपमेति । द्वयोरित्यस्य व्यावृत्तिमाह—अनन्वये चेति । अनन्वयनामालङ्कार इत्यर्थ । अत्रोपमेयस्यैव, उपमानत्वेन द्विर्भावात् । अत्र च साम्यमित्यस्य समानो धर्म इति नाऽर्थ । वक्ष्यमाणधर्मलुप्तोपमाया धर्मस्याऽवाच्यत्वेनाऽव्याप्त्यापत्ते । मुखमाह्लादकश्चन्द्र इति रूपकधर्मस्य वाच्यत्वेन तत्राऽतिव्याप्त्यापत्ते । किन्तूपमेयोपमानयो सामान्यसादृश्यरूपस्य धर्मस्य तयोरनुयोगितापतियोगितारूप्य सम्बन्ध एव अत्र साम्यपदार्थ । चन्द्र इव मुखमित्यत्र चन्द्रप्रतियोगिसादृश्यवन्मुख मिति बोधे सादृश्यस्य प्रतियोगितायाश्चन्द्रेऽनुपयोगितायाश्च मुखे प्रतीतौ सादृश्यसम्बन्ध एवोपमेत्यर्थ । अतएव साधर्म्यमुपमाभेदे इति काव्यप्रकाशोक्तलक्षणे समानेन धर्मेण सम्बन्ध उपमा इत्येव तत्र व्याख्यातम् । परान्त्ववादय षष्ठीवत् सम्बन्ध प्रतिपादयन्ति, इति तत्र लिखनात् सादृश्यप्रतियोगितारूप्य सम्बन्ध एव तन्मते उपमानानुयोगितारूप्य । ग्रन्थकृन्मते तु उपमानोपमेयगत सम्बन्ध बोधयन्तीत्यग्रे लिखनात् प्रतियोगिताऽनुयोगितारूप्यसम्बन्धद्वयमेवोपमा । काव्यप्रकाश च तादृशप्रतियोगिताया इवाद्यव्ययपदवाच्यत्वेन उपमायाश्च श्रौतीत्व तुल्याद्यनव्ययपदवाच्यत्वेन तस्या आर्थीत्वम् । अव्ययानामन्विताभिधायित्वमतेन चन्द्रान्वितप्रतियोगिताया इवादिवाच्यत्वात्तुल्याद्यनव्ययपदाना स्ववाच्यत्वात् । प्रकृतग्रन्थकृत्तु—इवादय श्रुतमात्रा एव शीघ्र मुपमा प्रतिपादयन्तीति तत्सद्भावे श्रौती उपमा । तुल्यादयोऽनव्ययशब्दास्तु प्रणिधानेन विलम्बादेव उपमा प्रतिपादयन्तीति तत्सद्भावे आर्थीति वक्ष्यति । अतएव तन्मतेऽन्विताभिधान नास्ति । ननु तत्कथ तादृशसम्बन्धरूपस्य साम्यस्य वाच्यत्वम् ? यदि चान्विताभिधानवादावलम्बेन वाच्यत्वस्वीकारस्तथापि इवादेरुपमानस्य वाऽनुपादाने या लुप्तोपमा तत्र तादृशसम्बन्धस्याऽवाच्यत्वात्तत्राऽव्याप्ति । अतएव काव्यप्रकाशे तादृशसम्बन्धरूपाया उपमाया वाच्यत्वघटित लक्षण न कृतम् । उच्यते । अत्रापि

(लो, उ) रूपकमित्यादिशब्दाद् दीपकतुल्ययोगितादय । वैधर्म्यस्य अकलङ्क मुख तस्याश्चन्द्रवदित्यादावकलङ्कत्वादे । एवाकारकपदावृत्तिरनन्वये चेति ।

"विरुद्धेनोपमानेन देशकालक्रियादिभि ।
उपमेयस्य यत्साम्य गुणलेशेन सोपमा ॥" भामह
"यत्रेतोहारि साधर्म्यमुपमानोपमेययो ।
मिथो विभिन्नकालादि शब्दयोरुपमा तु तत् ॥" उद्भट
"उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयो ॥" चन्द्रालोके

तुल्यादयस्तु "कमलेन तुल्य मुखम्" इत्यादावुपमेय एव, 'कमल मुखस्य तुल्यम्' इत्यादावुपमान एव, 'कमल मुख च तुल्यम्' इत्यादावुभयत्रापि विश्राम्यन्तीत्यर्थानुसन्धानादेव साम्य प्रतिपादयन्तीति तत्सद्भावे आर्थी। एव 'तेन तुल्यम्' इत्यादिना तुल्यार्थे विहितस्य वतेरुपादाने। (न, लृ) +

तेन तदुपादानेऽपि श्रौती याह—**एवं तेनेति**। तत्र तस्येवेति वतिविधायक पाणिनिसूत्रम्। तत्रैव तस्येव इत्यर्थक षष्ठ्यन्तात् सप्तम्यन्ताद् वा इवार्थे वतिरित्यर्थ ।

(वि, न) तुल्यादयस्तु अव्ययोपादाने तु आर्थीत्व वक्तुमाह—**तुल्यादयस्त्विति**। तुल्यादय शब्दा विश्राम्यन्तीत्यग्रेऽन्वय । विश्राम्यन्ति विशेष्यता प्रतिपादयन्ति। यत्र हि विशेष्यताप्रतीतिस्तदुपमेय तदितरदुपमानम्, तुल्यादिपदोपादाने तु तत्प्रतिपादनस्याऽनियतत्वाद् उपमेयोपमानयो प्रतिसन्धानगम्यत्वाद् उपमेयोपमाननिष्ठप्रतियोग्यनुयोगिरूपाया उपमाया अपि प्रतिसन्धानगम्यत्वात् तत्सद्भावे आर्थीत्यर्थ । तत्र तुल्यादिपदोपादाने विशेष्यताप्रतीतेरनियतत्व दर्शयति—**कमलेनेति**। **कमलं मुखस्येति**—नचात्र मुखमुपमान कमलमुपमेयमेव इति कथमुपमाने विश्रान्तिरिति वाच्यम्, कमलस्योपमानत्वे तात्पर्याद् अप्येव प्रयोगे तथात्वात्। तुल्यार्थेऽपि वतिविधायक 'तेन तुल्यम्' इति पाणिनेरपर सूत्रम्। तादृशवत्युपादानेऽपि भवति आर्थीत्याह—**एवं तेनेति**।

तुल्यादिपदोपादान इति समनन्तरमेव वक्ष्यति—**एवमिति**। अनेन व्याकरणेन। यत इवशब्दस्योपादाने श्रौती, अतस्तदर्थविहितस्य वतेरुपादानेऽपि सैव युक्तेति भाव ।

(लो, लृ) उपमेये इत्यादिभि सप्तम्यन्तै विश्राम्यन्तीति क्रियाया सम्बन्ध । उपमेय एव विश्राम्यन्ति तद्विशेषणत्वेनोपादानात् । एवमुत्तरत्रापि । साम्य मुखस्य उपमेयत्वम्। कमलस्य उपमानत्वम् । **एवमिति**—इवार्थविहितवतिविषयोक्तन्यायेन इत्यर्थ ।

इवादिशक्त्या शीघ्र प्रतीयते इतीय श्रौती। तत्र सादृश्य त्वार्थम्।

अयमर्थो मम्मटेनाप्येतदनुरूपैरेव शब्दै प्रतिपादित—'तत्र तस्येव' इत्यनेन इवार्थे विहितस्य वतेरुपादानै। 'तेन तुल्यम् मुखम्'। इत्युभयत्रापि तुल्यादिशब्दाना विश्रान्तिरिति साम्यपर्यालोचनया तुल्यताप्रतीतिरिति साधर्म्यस्यार्थत्वात्तुल्यादिपदोपादाने आर्थी। तद्वत् 'तेन तुल्य क्रिया चेद्वति' इत्यनेन विहितस्य वते स्थितौ।"

+ तुल्यादिशब्दाना सादृश्यवति शक्तेस्तुल्यादिपदप्रयोगस्थले सादृश्य वाच्यम्। साधारणधर्मसम्बन्धरूप साधर्म्य विना सादृश्यस्यानुपपत्त्याऽर्थादेव साधारणधर्मसम्बन्धप्रतीतिरिति साधर्म्यस्यार्थत्वादार्थी उपमा। "श्रौतीत्व चोपमानोपमेययो साधारणधर्म्मसम्बन्धरूपायास्तस्या शाब्दबोधविषयत्वम् । अर्थापत्तिगम्यत्व चार्थ-

द्वे तद्धिते समासेऽथ वाक्ये ॥ २१ ॥

द्वे श्रौती आर्थी च । उदाहरणम्—

"सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ ।
हृदय मदयति वदन तव शरदिन्दुर्यथा बाले ॥"

अत्र क्रमेण त्रिविधा श्रौती । (प) (ए)

"मधुर सुधावदधर पल्लवतुल्योऽतिपेलव पाणि ।
चकितमृगलोचनाभ्या सदृशी चपले च लोचने तस्या ॥" (फ)

अत्र क्रमेण त्रिविधा आर्थी ।

पूर्णा षडेव तत् ॥ २२ ॥

स्पष्टम्—

लुप्ता सामान्यधर्मादेरेकस्य यदि वा द्वयो· ।

(वि, प) तत्र पूर्णाया षडविधत्व दर्शयति—**द्वे** इति । वाक्ये इत्यन्त कारिका पूर्णा । षडेव तद् इति तच्छेष । तत्र तद्धितादिषु त्रिषु श्रौतीमाह—**सौरभ-मिति** । मुखस्य सौरभमित्यन्वय । अम्भोरुहस्येव इति षष्ठ्यन्ताद् वति । कुम्भाविवेत्यत्र इवशब्दयोगे नित्यसमासात्समासगा । शरदिन्दुर्यथा वदनमित्यत्र वाक्यगा । इवादेस्तदर्थकवतेश्च सत्त्वात् श्रौतीति । **त्रिविधेति**—तद्धितसमासवाक्यगा-मित्यरूपत्रैविध्यवतीत्यर्थ ।

(वि, फ) एतत् त्रिविधामार्थीमाह—**मधुर** इति । अत्र सुधया तुल्य इत्यर्थे तुल्यार्थे वति । पल्लवतुल्य इत्यत्र समास । चकितमृगलोचनाभ्यामित्यत्र वाक्यम् ।

(वि, ब) लुप्तामाह—**लुप्तेति** । सामान्यधर्म साधारणधर्म । आदिपदादुपमा-प्रतिपादकेवतुल्यादिशब्दा उपमानमुपमेय च । तेषामेकस्य द्वयोस्त्रयाणा वेत्यर्थ ।

(लो, ए) सौरभमिवेत्यादौ सौरभ साधारणधर्म । कुम्भाविवेत्यत्र " इवेन नित्यसमासो विभक्त्यलोप पूर्वपदप्रकृतिस्वरत्व च" इति नित्यसमास । एतत्प्रोक्तस्य पूर्वपदप्रकृतिस्वरत्वस्य वेद एव उपयोग ।

त्वम्" (प्रदीप) ' तेन तुल्य क्रिया चेद् वति " क्रिययोस्तुल्यत्वे एव ' वतिप्रत्ययो भवति । यथा—ब्राह्मणवदधीते क्षत्रिय —

"वतिनाऽपि क्रियासाम्य तद्वदेवाभिधीयते ।
द्विजातिवदधीतेऽसौ गुरुश्चानुशास्ति न ॥" (भामह)

चैत्रेण तुल्य कृश इत्यत्र गुणसाम्यान्न वति । पर ' चन्द्रवन्मुखम्" इत्यादौ भवतिक्रियामध्याहृत्य चन्द्रभवनसदृश मुखभवनमित्येव वाच्योऽर्थ । चन्द्रमुखयो सादृश्य तु व्यञ्जनयैवेति बोध्यम् ।

त्रयाणां वानुपादाने श्रौत्यार्थी सापि पूर्ववत् ॥ २३ ॥ (व, ऐ)

सा लुप्ता । तद्भेदमाह—

पूर्णावद्धर्मलोपे सा विना श्रौतीन्तु तद्धिते ॥ २४ ॥

सा लुप्तोपमा धर्मस्य साधारणगुणक्रियारूपस्य लोपे पूर्णावदिति पूर्वोक्तरीत्या षट्प्रकारा, किन्त्वत्र तद्धिते श्रौत्या असम्भवात् पञ्चप्रकारा। (भ, श्रो) उदाहरणम्—

"मुखमिन्दुर्यथा पाणिः पल्लवेन समः प्रिये ।
वाचः सुधा इवोष्टस्ते बिम्बतुल्यो मनोऽरमवत् ॥" (म, औ)

आधारकर्मविहिते द्विविधे च क्यचि क्यङि ।
कर्मकर्त्रोर्णमुलि च स्यादेवं पञ्चधा पुनः ॥ २५ ॥(य, अ,) *

सापि यथासम्भवं श्रौती आर्थी च भवतीत्यर्थः । **पूर्ववदिति**—तद्धितादिन्नयगामिनीत्यर्थः ।

(वि, भ) पूर्णावदिति—लोपेऽनुपादाने । पूर्णावदिति व्याचष्टे–**पूर्वोक्तेति** । तद्धितादिन्नयगामित्वं पूर्वोक्तरीतिः । **षडिति**—षट् प्रसक्ता इत्यर्थः । वस्तुतस्तु पञ्चेत्याह–**किन्त्विति** । **श्रौत्या असम्भवादिति** । धर्मलोपे धर्मनिष्ठसम्बन्धबोधिका षष्ठी नास्ति । ततस्तदन्तादिवार्थके वतिरपि नास्ति इत्यतोऽसम्भवः ।

(वि, म) मुखमिन्दुरिति । तत्राह्लादकत्वं धर्मो लुप्तः । यथाशब्देन सह समासाभावाद् वाक्यगा आर्थी । वाचः सुधा इवेत्यत्र मधुरत्वं धर्मो लुप्तः । इवशब्देन सह नित्यसमासात् श्रौती । ओष्टस्ते इत्यत्र शोणत्वं धर्मो लुप्तः । तुल्यशब्देन समासात् समासगा आर्थी । मनोऽरमवत् । इत्यत्राऽरमना तुल्यमित्यर्थे तुल्यार्थे तद्धिते वतिरित्यार्थी ।

(वि, य) धर्मलुप्तामित्थं पञ्चविधामुक्त्वा तामेवान्यषड्विधामाह–**आधारकर्मविहित** इति । द्विविधे इत्यस्य क्यचि इत्यत्रैवान्वयो न तु क्यङीत्यत्रापि । **कर्मकर्त्रोरिति**–कर्मकर्त्रोरुपपदयोरित्यर्थः ।

(लो, ऐ) सामान्यधर्मादिरित्यादिशब्देन उपमानोपमेयोपमाप्रतिपादकाना सङ्ग्रहः ।

(लो, श्रो) लुप्तोपमाया तद्धिते श्रौत्या असम्भवः । मुखस्य चन्द्रवत् शोभेत्यत्र शोभारूपसाधारणधर्मानुपादानेनार्थस्य साक्षाच्चलेनाऽसङ्गतेः ।

(लो, औ) मुखमिन्दुर्यथेत्यादौ पूर्वोक्तक्रमव्यत्ययः पद्यनिर्वाहार्थः ।

(लो, अ) क्यङीति । अर्थात् कर्तृविहिते ।

---

* "उपमानादाचारे" उपमानात् कर्मणः सुबन्ताद् आचारेऽर्थे क्यच् स्यात् । पुत्रमिवाचरति पुत्रीयति छात्रम् ।

'धर्मलोपे लुप्ता'इत्यनुपज्यते । क्यच्क्यङ्णमुलः कलापमते यिन्नागमः। क्रमेणोदाहरणम्—

"अन्तःपुरीयसि रणेषु सुतीयसि त्वं
पौरं जनं, तव सदा रमणीयते श्रीः ।
दृष्टः प्रियाभिरमृतद्युतिदर्शमिन्द्र-
सञ्चारमत्र भुवि सञ्चरसि क्षितीश ॥" (र, आ)

अत्रान्तःपुरीयसीत्यत्र सुखविहारास्पदत्वस्य सुतीयसीत्यत्र स्नेहनिर्भरत्वस्य च साधारणधर्मस्य लोपः । एवमन्यत्र । इह च यथादितुल्यादिविरहात् श्रौत्यादिविशेषचिन्ता नास्ति । (इ)

इदं च केचिद् औपम्यप्रतिपादकस्य 'इवादेर्लोपमुदाहरन्ति । (ल)

(वि, र) **अन्तःपुरीयसी**ति । रणेषु निर्भयत्वेन अन्तःपुरेष्विवाचरसीत्यर्थः । अत्र निर्भयसञ्चारस्थानत्वं धर्मो लुप्तः । **पौरमि**ति । पौरं जनं सुतमिवाचरसीत्यर्थः । अत्र स्नेहविषयत्वं धर्मो लुप्त अनयोराधारकर्मणोः क्यच् । सदा रमणीयते इत्यत्र रमणीवाचरतीत्यर्थे क्यङ् । अत्र अधीनत्व धर्मो लुप्तः । **दृष्ट** इति । अमृतद्युतिकर्मकदर्शनेन त्वं प्रियाभिर्दृष्टः । अत्र मनोहरत्वं धर्मो लुप्तः । तथा चात्र भुवि इन्द्रकर्तृकसञ्चारेणैव सञ्चरसीत्यर्थ । अत्राऽऽधिपत्यं धर्मो लुप्तः । उभयत्र कर्मकर्त्रोरुपपदयोर्णमुल् ।

(वि, ल) अत्र क्यङादित्रये तदर्थाचारस्य णमुल्द्वये च धात्वर्थदर्शनसञ्चारयोश्च साधारणधर्माणा सत्त्वाद् धर्मलुप्तोदाहरणानि एतानि न सम्भवन्तीत्यतः काव्यप्रकाशकृता उपमाप्रतिपादके वादिलोपोदाहरणतयैव क्यङादिलोपे उदाहृतम् ।

(लो, आ) अमृतद्युतिदर्शं दृष्टः—अमृतद्युतिरिव दृष्टः । इन्द्रसञ्चारं सञ्चरसि । इन्द्रवत् सञ्चरसीत्यर्थः ।

(लो, इ) **अन्यत्रे**ति । यथा रमणीयते इत्यत्र अधीनत्वस्य । अमृतद्युतिदर्शम् इत्यत्र मनोहरत्वस्य । इन्द्रसञ्चारमित्यत्र परिच्छदायतिशयस्य । नास्तीत्यनन्तरं प्राचीनानुसारादिति शेष ।

"अधिकरणाच्चेति वक्तव्यम्" प्रासादीयति, कुड्या भित्तुः । "कर्तुः क्यङ् सलोपश्च ।" उपमानात् कर्तुः सुबन्तादाचारे क्यङ् वा स्यात् । सान्तस्य तु कर्तृवाचकस्य लोपो वा स्यात् । कृष्ण इवाचरति कृष्णायते ।

"उपमाने कर्मणि च" । "चात्कर्तरि" (णमुल्) घृतनिधायं निहितं जलं घृतमिव सुरक्षितम् । अजकनाशं नष्टः—अजक इव नष्ट इत्यर्थः । "यस्माण्णमुलुक्तः स एव धातुरनुप्रयोक्तव्यः[1]।"

1 'वेतेः' (ग. पु.)

तदयुक्तम् । क्यङादेरपि तदर्थविहितत्वेनौपम्यप्रतिपादकत्वात् । ननु क्यङादिषु सम्यगौपम्यप्रतीतिर्नास्ति प्रत्ययत्वेनास्वतन्त्रत्वाद्, इवादिप्रयोगाभावाच्चेति न वाच्यम्। (य, ई)

कल्पबादावपि तथाप्रसङ्गात् । नच कल्पबादीनामिवादितुल्यतयौपम्यस्य वाचकत्वं, क्यङादीनां तु द्योतकत्वम्, इवादीनामपि वाचकत्वे निश्चयाभावात्। (श) *

ग्रन्थकृता तु आचारादीना साधारणधर्मत्वमनवधार्यैवोदाहृत्य औपम्यप्रतिपादकलोपोदाहरणतया यत्काव्यप्रकाशकृतैतत् पद्यमुदाहृतं तद्दूषयितुमुत्कीर्त्तयति—इदं च केचिदिति ।

(वि, य) दूषयति—तदयुक्तमिति । तदर्थविहितत्वेनेति—तादृशाचारविहितत्वेनेत्यर्थः । सुतमिवाचरतीति प्रतीतिवशात् तथार्थे एव विधानादित्यर्थः । ननु तादृशार्थे विधानसत्त्वेऽपि इवादिवन्न तेभ्यः स्वत औपम्यप्रतीतिः; प्रत्ययाना प्रकृत्यर्थान्वयेनैव बोधकत्वात् । अतः क्यङादयः स्वत औपम्यप्रतिपादकत्वाभावान्न स्वत औपम्यप्रतिपादकाः । तथा च तत्सत्त्वेऽपि विवक्षितः स्वत औपम्यप्रतिपादकलोपो नास्तीत्याशङ्कते—नन्विति । ननु तैरौपम्यं स्वतः प्रत्याय्यते एव; किन्तु तादृशार्थस्य प्रकृत्यर्थान्वितत्वमात्रं नियतं, तेषां तादृशार्थकत्वे तु तद्विवरकेवशब्दप्रयोग एव नास्ति । कथमसौ तदर्थविवरक इति भावः । तथा च क्यङादय इवादिवन्न स्वत औपम्यप्रतिपादकाः इत्यापातत एवेयं विचारसहाप्याशङ्का । तत्र स्वतस्तु अविवक्षैव न सम्भवतीति समाधत्ते—नेति ।

(वि, श) कल्पबादाविति । तेषामपि प्रत्ययत्वादित्यर्थः । इदमुपलक्षणम् । इवादेरपि स्वतः प्रयोगाभावात् । तत्सत्त्वेऽपि औपम्यप्रतिपादकलोपापत्तेरिति बोध्यम् । आपातत आशङ्कते—नच कल्पबादीनामिति—आचारमत्र वाचकत्वम्; इवाद्यर्थस्य तु व्यञ्जकत्वमेवेत्यर्थः । प्रतिबन्धमाह—इवादीनामपीति । विनिगमकाभा-

---

(लो, ई) तदर्थो वत्यर्थः । अस्वतन्त्रत्वात् प्रकृतियोगं विना केवलानामर्थबोधनसामर्थ्याभावात् ।

(लो, उ) दूषणान्तरमाह कल्पबादावपीति—अयमर्थः—यदि कचित् क्यङादीना सद्भावेऽपि तेषा प्रत्ययत्वेनास्वतन्त्रतयार्थबोधनासामर्थ्याद् औपम्यवाचकत्वाभावः तदा कल्पबादीना सद्भावे अपि तथा स्यात् । नच तथा कल्पबादीनां

---

* "चादयो न प्रयुज्यन्ते पदत्वे सति केवलाः ।
प्रत्ययो वाचकत्वेऽपि केवलो न प्रयुज्यते ॥" (वाक्यपदीये)
(अत्र) एते हि चादयः केवला न प्रयुज्यन्ते ततो वाचका न भवन्तीति बोद्धव्यम् । (पुण्यराजः)

+वाचकत्वे वा "समुदितं पदं वाचकम्" (+) प्रकृतिप्रत्ययौ [1]स्वस्वार्थबोधकौ" इति च ।×

मतद्वयेऽपि वत्यादिक्यङाद्योः साम्यमेवेति । (प, उ)

वेऽपि स्वतन्त्रमुख्यतया यदि कस्यचित्प्रत्ययस्य वाचकत्वं कस्यचित्प्रत्ययस्य व्यञ्जकत्वमुच्यते तदा इवादयोऽपि न वाचकाः स्युरुक्तिमात्रेणैव प्रमाणाक्षेपेऽने तत्रापि प्रमाणाभावादित्यर्थः ।

(वि, प) नन्वत्र नायं प्रतिबन्धकः । इवादीनामौपम्यवाचकत्वेऽनुशासनमेव प्रमाणमित्यतो यदि त्वयेवादेः स्वतोऽस्वतो वा वाचकत्वमिष्यते तदा ममाऽपि क्यजादीनामपि मतभेदेन स्वतोऽस्वतो वा वाचकत्वं समानमेवेत्याह—**वाचकत्वे वेत्यादि** । तव यथा वाचकत्वं ममाऽपि तथा वाचकत्वमिति साम्यमित्यर्थः । मतभेदेन तद्द्वैधेति दर्शयति—**समुदितामिति** । स्वप्रकृतिप्रत्ययसमुदितमित्यर्थः । मतान्तरमाह—**प्रकृतीति** । स्वस्वार्थबोधकौ—स्वतः स्वस्वार्थबोधकावित्यर्थः । **वत्यादिक्यङाद्योरिति** । कल्पबित्यादयो यथेवादितुल्यतया त्वन्मते साम्यवाचकाः, क्यजादयोऽपि तथेति द्वयोः साम्यमित्यर्थः । एवं क्यजादीनामिवार्थैकत्वेन नेदमौपम्यप्रतिपादकलोपोदाहरणमित्युक्तम् ।

सद्भावेऽपि औपम्यवाचकत्वम् । कल्पेऽप्यभावस्य सर्वत्रादिनिषिद्धत्वाद् निश्चयाभावात्; तथाहि—कैश्चिदिवादीनामपि वाचकत्वमङ्गीक्रियते । तन्मतानुसारेणास्माभिः कल्पबादीनामिवार्थविहितत्वेन वाचकत्वम् । क्यङादीना तु द्योतकत्वमङ्गीक्रियते इत्यत आह—**वाचकत्वे वा** इति । समुदितं प्रकृतिप्रत्ययाभ्यां मिलितं, तत् स्वरूपं पदम् । मतेरत्यतः पूर्वं वैयाकरणेति शेषः । **वत्यादिक्यङाद्योः साम्यमेवेति** । अयमाशयः—यदि वत्यादीनां वाचकत्वाङ्गीकारः तदा क्यङादीनामपि वाचकत्वम् । यदा तेषामपि न वाचकत्वं तदेषामपीति । सर्वैरपि मतिकल्पबादिसद्भावे औपम्यवाचकसद्भावाङ्गी-

---

+ "पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ॥' (वाक्यपदीय)

"मुख्यं वाचकत्वं तु कल्पनया बोधिते समुदायरूपे पदे वाक्ये वा । लोकाना मत एवार्थबोधात् ।" इति च ।

× "प्रकृतिप्रत्ययौ मतः प्रत्ययार्थं सहेति यत् ।
भेदेनैवाभिधानेऽपि प्राधान्येन तदुच्यते ॥
पचं हि पचिरेवाह कर्तारं प्रत्ययोऽप्यकः ।
पक्त्युक्तः पुनः कर्ता वाच्यो नैकस्य कस्यचित् ॥"
(लौकिकन्याय)

1 'स्वार्थबोधक—" (प. पु.)

यच्च केचिदाहु –'वत्यादय इवार्थेऽनुशिष्यन्ते क्यङादयस्त्वाचारार्थे इति' तदपि न। न खलु क्यङादय आचारमात्रार्था अपि तु सादृश्याचारार्था इति*। तदेव धर्मलोपे दशप्रकारा लुप्ता। (स, ऊ)

उपमानानुपादाने द्विधा वाक्यसमासयोः ॥ २६ ॥ (ह)

उदाहरणम्—

"तस्या मुखेन सदृश रम्य नास्ते न वा नयनतुल्यम्।" (क, ऋ)

(वि, स) काव्यप्रकाशकृता तु तेषामाचारमात्रेऽनुशासनादिवार्थेऽनुशासनाभावान्न तदर्थकत्वमित्युक्तम्। तदुद्भूपमितुमाह—**यच्च केचिदिति**। **न खलु आचारमात्रार्था** इति। उपमानादाचारे इत्यनुशासनस्यैव तुल्याचारोऽर्थ इति भाव। तस्य च इवार्थकत्वेऽनुशासनाऽभावोक्तिदूषणायोक्तत्वेन पूर्वोक्तेन सह न पौनरुक्त्यमिति बोध्यम्। **तदेवमिति**। तद्धितादित्रयगा श्रौत्यार्थभिदा उक्ता पञ्च, क्यजादावुक्ता पञ्च, इत्येव दशेत्यर्थ।

(वि, ह) **उपमानानुपादाने** इति। उपमानतावच्छेदकचन्द्रत्वादिना अनुपादाने इत्यर्थ। तेन सदृशतुल्यादिपदेन तदनुपादानेऽप्यनुपादान बोध्यम्।

(वि, क) तस्या मुखेनेति वाक्ये। नास्ते न वा नयनतुल्यमिति समासे। अत्र रम्यत्व साधारणधर्म उक्त इत्यत्र उपमानमात्रलोप। नच कथमत्रोपमानलोप

कारात् प्रत्ययत्वेन तत्सदृशे क्यङादिभि किमपराद्ध यदेषा सद्भावे औपम्यवाचकलोप स्यादिति।

(लो, ऊ) **सादृश्याचारार्था** इति। अयमर्थ –क्यङादीनामाचारमात्रार्थत्वे एव सादृश्यार्थत्व न स्यात् न च तथा। सादृश्याचारोभयार्थत्वादिति।

(लो, ऋ) वाक्यसमासयो। वाक्ये समासे चेत्यर्थ। वाक्ये समासाभावो

---

* रसगङ्गाधर इदमुक्तम्—

"अत्रेदमवधेयम्–कर्मधारक्यचि क्यङि च वाचकलुप्तोदाहरण प्राचामसङ्गत मिव प्रतायते। धर्मलोपस्यापि तत्र सम्भवात्। नच क्यन्तार्थ आचार एव साधारणधर्मोऽस्तीति वक्तव्यम्। धर्ममात्ररूपस्याचारस्योपमाप्रयोजकत्वाभावात्। 'नारीयते सपत्न सेना' इत्यादौ शत्रुत्यन्तरनिवेदितैः कातरत्वादिभिरभिन्नतयाध्यवसितस्याचारस्योपमानिष्पादकत्वात्। यदि च क्यङर्थ आचारमात्रमुपमानिष्पादक स्यात्तदा 'निविष्टप तत्खलु भारतायते' इत्यादौ सुप्रसिद्धत्वादिरूपाचारोपस्थितावप्युपमालङ्कृतेरनिष्पत्ते। तस्यैव च 'सुपर्वभि शोभितमन्तराश्रितै' इति चरणान्तरनिर्माणे तस्या निष्पत्ते क्यङार्थ साधारणोऽपि नोपमा प्रयोजयति। उपमाप्रयोजकतावच्छेदकरूपेण साधारणधर्मवाचकशून्यत्वस्यैव धर्मलोपशब्देनाभिधानात्। अन्यथा 'मुखरूपमिद वस्तु प्रफुल्लमिव पङ्कजम्' इत्यादौ पूर्णोपमापत्तेरिति दिक्।"

अत्र मुखनयनप्रतिनिधिवस्त्वन्तरयोर्गम्यमानत्वादुपमानलोपः। (ख)

अत्रैव च "मुखेन सदृशम्" इत्यत्र "मुखं यथेदम्" इति "नयनतुल्यम्" इत्यत्र "दृगिव" इति पाठे श्रौत्यपि सम्भवतीत्यनयोर्भेदयो प्रत्येक श्रौत्यार्थीत्वभेदेन चतुर्विधत्वसम्भवेऽपि प्राचीनरीत्या द्विप्रकारत्वमेवोक्तम्। * (ग)

औपम्यवाचिनो लोपे समासे क्विपि च द्विधा ॥ २७ ॥ (घ, ङ)

क्रमेणोदाहरणम्—

"वदन मृगशावाक्ष्याः सुधाकरमनोहरम्।
गर्दभर्ति श्रुतिपरुषं व्यक्त निनदन् महाभगा पुरत" ॥ (च)

मुखन सदृशमित्युक्ते मुखस्यैव उपमानताप्रतीतिस्तस्य चोद्देश्यादेवेति वाच्यम्। मुखस्योपमानत्वे सदृशपदमनुपमेयपरं स्यात्, उपमेयस्य च उपमानापेक्षया नाधिक्यम्, किन्तु न्यूनत्वं समानत्वं वा। तथा च तस्या मुखस्य न्यून समान वा नास्तीत्युक्तेऽपि न्यूनत्वाद्यनिवृत्तौ मुखप्रस्तावानुपपत्त्या सदृशपदस्यानुपमानपरत्वादेव उपमेयापेक्षया उपमानस्याधिक्येन तस्या मुखस्याधिक्यं नास्तीत्येवार्थात्।

(वि, ख) नन्वेवं सदृशपदेनैव उपमानकथनात् कथं तल्लोप इत्यत आह—अत्र मुखप्रतिनिधीति। प्रतिनिधिरुपमान चन्द्रादिवस्तु। गम्यमानत्वादिति। सदृशादिना उपमानतायच्छेदरूपेणानुपादानादाक्षेपबलेनाऽध्याहार्य्यत्वादित्यर्थः। एवं चाध्याहारलभ्ये तत्र शाब्दव्यवहारायोग्यत्वमेव वाच्यनियत्र वाच्यपदस्य व्यङ्ग्यपरत्वं यद् व्याख्यातं तदत्रापि उपपन्न बोध्यम्। एवमुत्तरत्रापि।

(वि, ग) दर्शितद्वये शाब्दव्यवहारयोग्यपदबलादार्थीत्वमेव, तत्पदद्वयस्थाने यथा दृगादिपददाने तु श्रौत्यो अनुपमाने सुते भवत। अतश्चतुर्विधा उपमानलुप्ता भवितुमर्हति। किन्तु काव्यप्रकाशकृदादिभिर्यानेतद्द्वयस्यानुक्तत्वाद् द्विप्रकारत्वमेवोक्तमित्याह—अत्रैव चेति।

(वि, घ) औपम्यवाचिन इति। औपम्यप्रतीतिपदकत्वमर्थः, तुल्यादिशब्दानां तदर्थकत्वस्वभावस्य दर्शितत्वात्।

(वि, ङ) यदनमिति—मुखकर इत्यर्थः। गर्दभर्तीति—महाभगा पुरो

वैयाकरणरीत्या। तस्या इयत्तो मुखन सदृशमित्यत्र वाक्यम्। नयनतुल्यमित्यत्र समासः। क्वचि क्विपि वाक्यनामित्यर्थः।

(लो, झ) औपम्यवाचिन इत्यादि क्विपो लोप।

---

* प्रदीप इत्यमुक्तम्—

न च श्रौत्यो। इवादेरनुपमानत्वे वस्तुतस्तदनुक्तत्वे लोपस्यैवानुपपत्तेः। अत्रैव वाक्यसमासयोः। तदेवमत्रैव। द्विप्रकारता सुलोचनेत्यत्र।

अत्र "गर्दभति"इत्यत्र औपम्यवाचिनः क्विपो लोप । न चेह उपमेयस्यापि लोप । "निनदन्" इत्यनेनैव निर्देशात् । (च)

द्विधा समासे वाक्ये च लोपे धर्मोपमानयोः ॥ २८ ॥ (छ)

"तस्या मुखेन"इत्यादौ "रम्यम्"इति स्थाने "लोके" इति पाठेऽनयो रुदाहरणम् । (ज)

क्विप्समासगता द्वेधा धर्मे वादिविलोपने ॥ २९ ॥

उदाहरणम्—

" विधवति मुखाब्जमस्या ॥"

अत्र "विधवति"इति मनोहरत्वक्विप्प्रत्यययोर्लोप । केचित्त्वत्रापि प्रत्यय-मात्रलोपमाहु । "मुखाब्जम्"इति च समासगा । (ज, ए)

उपमेयस्य लोपे तु स्यादेका प्रत्यये क्यचि ॥ ३० ॥ (ऐ)

व्यक्त श्रुतिपरुष निनदन्नय गर्दभ इवाचरतीत्यर्थ । उभयत्र मनोहरत्वश्रुतिपरुष-निनादयोर्धर्मयो सत्त्वादौपम्यप्रतिपादकयोरिव क्विपोर्लोपमात्रमत्र । लुप्तयोस्तयो प्रतिसन्धानाच्चौपम्यस्य प्रतीतिरित्यतो न तस्य व्यङ्ग्यत्वमित्यतो निरुक्त वाच्यत्वमस्त्येव ।

(वि, च) औपम्यवाचिनः क्विप इति । यद्यपि लुप्तस्य एव क्विप क्विप्प-रिभाषा इत्यत तस्य लोप इत्युक्तिसम्भवः, तथापि भविष्यल्लोपस्य क्विप एव क्विप्त्व मुक्त तस्यैवौपम्यवाचित्व तु एवेत्युक्तमेव । **निनदन्निति यनैवेति** । कर्तुरुपमेयस्य कर्तरि विहितेन[1] शतृङेवोक्तत्वात् ।

(वि, छ) एव धर्मलोपे दश, उपमानानुपादाने च द्वे औपम्यवाचिलोपे च द्वे इति चतुर्दशविधामेकलुप्तामुक्त्वा द्विलुप्तामेदानाह—**द्विधेति** । **रम्यमिति स्थाने** इति । धर्मस्यापि लोपात् ।

(वि, ज) विधवतीति—विधुरिवाचरति इत्यर्थ । क्विपो लोप एव । **मुखा-ब्जमिति**ति । मुखमब्जमिवेति पुरुषव्याघ्रादिसमास । न चात्र रूपकमेव नोपमेति वाच्यम्, उपमित व्याघ्रादिभि सामान्याप्रयोगे इति पाणिनिसूत्रेण साधारणधर्मा-प्रयोगे रूपकबाधया उपमानविधानात् । साधारणधर्मप्रयोगसत्त्वे एव रूपकसम्भवात् ।

(लो, छ) एवमेवैकलोपे लुप्तोपमा दर्शयित्वा द्विलोपे दर्शयति । अनयो रुदाहरण व्युत्क्रमेण इत्यर्थ । इयमपि पूर्ववत् श्रौत्यार्थी चेति चतुर्धा सम्भवति ।

(लो, ए) केचिदिति—अनेनात्मनोऽसम्मतिप्रकटनम् ।

(लो, ऐ) पुनरेकलोपे लुप्तोपमा प्राचीनानुरोधाद् द्विलोपप्रकरणे लक्षयति—उपमेयस्येति ।

---

1 शतृङ (शतृप्रत्ययेनेत्यर्थ)।

यथा—

"अरातिविक्रमालोकविकस्वरविलोचन ।
कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति ॥" (झ,) *

अत्र सहस्रायुधमिवात्मानमाचरतीति वाक्ये उपमेयस्यात्मनो लोप । नचेह औपम्यवाचकलोप उक्तादेव न्यायात् । अत्र केचिदाहु —सहस्रायुधेन सह वर्त्तत इति ससहस्रायुध स इवाचरतीति वाक्यात् ससहस्रायुधीयतीति पदसिद्धौ विशेष्यस्य शब्दानुपात्तत्वादिहोपमेयलोप" इति । तच्च विचारसहम् । कर्त्तरि क्यचोऽनुशासनविरुद्धत्वात् । (ञ, ओ) †

(वि, झ) इत्थ द्विलुप्ताश्चतस्र एकलुप्ताश्चतुर्दशोक्ता इत्यष्टादशोक्त्वा पुनरेकलुप्तामेकामाह—**उपमेयस्येति । अरातीति । सहस्रायुधीयतीति ।** कृपाणोदग्रदोर्दण्डोऽपि सहस्रायुधो यस्तमिवात्मानमाचरतीत्यर्थ ।

(वि, ञ) नच सहस्रायुधीयते इत्येवमपि सम्भवात् क्यङा चापि अस्या सम्भव इति वाच्यम्। क्यङन्तस्याऽकर्मकत्वेन कर्मभूतस्यात्मन उपमेयस्याऽत्र प्रसक्त्यभावात् । नचेत्याशङ्क्योत्तरयति—**उक्तादेवेति ।** क्यच एव तद्वाचकत्वस्योक्तत्वादित्यर्थ । ननु क्यङर्थस्य आचारस्य साधारणधर्मत्वमनवधाय पौरःसुतीयतीत्यादिके धर्मलुप्तत्वेन प्रागुदाहृत, तत्कथमत्र उपमेयमात्रलोपे उदाहृतम्, आचारस्य साधारणधर्मत्वानवधानेन तस्यापि लोपाद् इति चेन्न, अरातीत्यादे साधारणधर्मवत्त्वेऽवधानात्। सहस्रायुधपुरुषस्यापि तादृशविलोचनत्वात् । केचित्तु कर्मभूतस्यात्मन उपमेयस्याऽत्र न लोप । "अकर्मके कर्त्तरि वा" अत्र क्यचो विधानात् । तथा च कर्त्तैवात्रोपमेयस्तस्य च विशेष्यतावच्छेदकेन रूपेणाननुपादानाल्लोप इत्याहु । तन्मतमाह—**अत्र केचिदिति ।** शब्दानुपात्तत्वादित्यर्थ । तन्मते कर्त्तरि विहितस्य क्यच आख्यातस्य

(लो, ओ) उक्तादाधारकर्मविहित इति सूत्रव्याख्यानप्रसङ्गे इत्यर्थ । केचिद् चण्डीदासपरिष्टतादय । अनुशासनविरुद्धत्वात् कर्त्तरि क्यच एवानुशासनात् । किञ्च "*स सहस्रायुधीयति*" इत्यत्र क्विप्प्रत्ययस्य औपम्यवाचकत्वादुपक्रमे उपगम । पर्य्यवसाने तु सम्भावनोत्थापनात् । उत्प्रेक्षा यथा—

कस्तूरीतिलकन्ति भालफलके देव्या मुखाम्भोरुहे
रोलम्बन्ति तमालबालमुकुलोत्तंसन्ति मौला प्रति ।

---

* अरातीना शत्रूणा विक्रमालोकेन पराक्रमदर्शनेन विकस्वरे विस्फारिते लोचने यस्य स । कृपाणेन खड्गेन उदग्रो भीषणो दोर्दण्डो बाहुदण्डो यस्य स । सहस्रमायुधानि यस्य स सहस्रायुध कार्त्तवार्य्य । तमिवात्मानमाचरतीत्यर्थ ।

† "अत्र यद्यपि साक्षादुपात्त कर्त्तैवोपमेय, तथापि न तथात्वेन, किन्तु कर्मतेन । अन्यथा क्यचोऽसङ्गतत्वापत्ते" प्रदीप ।

धर्मोपमेयलोपेऽन्या ॥ ३१ ॥

यथा—

"यशसि प्रसरति भवतः क्षीरोदीयन्ति सागराः सर्वे ।"

अत्र क्षीरोदमिवात्मानमाचरन्तीत्युपमेय आत्मा साधारणधर्मः शुक्लता च लुप्तौ । (ट)

त्रिलोपे च समासगा ॥ ३२ ॥

यथा—

"राजते मृगलोचना" ।

अत्र मृगस्य[1] लोचने इव चपले लोचने यस्या इति समासे उपमाप्रतिपादक-साधारणधर्मोपमानानां लोपः । (ठ) †

तेनोपमाया भेदाः स्युः सप्तविंशतिसंख्यकाः ॥ ३३ ॥

च कर्तृत्वेन रूपेण वाचकत्वात् । अतो विशेष्यतावच्छेदकेन रूपेणानुपादानात् । **अनुशासनादिति** । अकर्मके कर्तरीत्यर्थः । तथा च दर्शितार्थे ईदृशप्रयोगोऽसाधुरेवेत्युक्तं पुत्रीयतीत्यादौ कर्तृबोधस्तु कर्माख्यातादेवेति बोध्यम् । स इत्यनेन विशेष्यतावच्छेदकेन रूपेण कर्तुरुपादानमस्त्येवेत्यपि तन्मते दूषणं बोध्यम् ।

(वि, ट) क्षीरोदीयन्तीत्यत्र साधारणधर्मलोपप्रदर्शनमाधारस्य साधारणधर्मत्वानवधानादिति प्रागेव दर्शितम् । काव्यप्रकाशकृता तु एवादृशस्थले आचारस्यैव साधारणधर्मत्वादुपमेयलोपमात्रोदाहरणमेवोच्यते । क्षीरोदं यथा चरति तथात्मानमिति प्रतीत्या कर्मत्वेनोभयधर्मत्वादाचारस्य ।

(वि, ठ) प्रभेदान्तरमाह—**त्रिलोपे चेति** । मृगलोचनेत्यत्र त्रिलोपं दर्शयति । **अत्र मृगस्येति** । मृगस्येवेति प्रामादिकः पाठः । लोचने इवेत्येव पाठः । इवकारस्योपमानपरभागनियमात् ।

याः कर्णे विकचोत्पलन्ति कुचयोरङ्के च कालागुरु-
स्थामन्ति प्रथयन्तु तास्तव शिवं श्रीकण्ठकण्ठत्विषः ॥" इत्यादौ ।

(लो, ओ) उपसंहरति—**तेनेति** । लुप्तोपमा चैकविंशतिप्रकारा । तथा हि धर्मलोपेन दश । उपमानानुपादाने द्वौ । इवादिलोपे द्वौ । धर्मोपमानलोपे द्वौ । धर्मे

---

† "सप्तम्युपमानपूर्वपदस्य बहुव्रीहिरुत्तरपदलोपश्च' इति वार्त्तिकेन मृगलोचन-पूर्वपदकस्य लोचनशब्देन सह बहुव्रीहौ उपमानवाचिनि मृगलोचने इति पूर्वपदे उत्तरपदभूतस्य लोचनशब्दस्य लोपे पदं सिद्धम् । उपमानभूतस्य लोचनस्य लोपाद् उपमेयभूतस्य लोचनस्य उपादानाद् उदाहरणं स्पष्टम् । अत्र यदि मृगशब्देन लक्षणया तल्लोचने विवक्ष्येते तदा त्रिलोपे नेदमुदाहरणम् ।

1 मृगस्येवेति पाठान्तरम् । (घ. पु.)

पूर्णा षड्विधा लुप्ता चैकविंशतिविधेति मिलित्वा सप्तविंशतिप्रकारोपमा । + (औ) एषु चोपमाभेदेषु मध्ये अलुप्तसाधारणधर्मेषु भेदेषु विशेषः प्रतिपाद्यते—(ट)

एकरूपः क्वचित् क्वापि भिन्नः साधारणो गुणः ।
भिन्ने बिम्बानुबिम्बत्वं शब्दमात्रेण वा भिदा ॥ ३४ ॥ (ढ, अ)

(वि, ड) अलुप्तेति । साधारणधर्मस्य शब्दप्रतिपाद्यत्वे इत्यर्थः ।

(वि, ढ) एकरूपत्वम् एकशब्दप्रतिपाद्यतावच्छेदकैक्यात् । तेन "त्वं सुधेव मधुर" इत्यत्र तदुदाहरणे व्यक्तैक्यस्य शक्यतावच्छेदकस्याऽभावेऽपि मनोहरत्वस्य

वादिलोपे द्वौ । उपमेयलोपे एकः । धर्मोपमेयलोपे एकः । त्रिलोपे एकप्रकार इति गणनया एकविंशतिप्रकारा लुप्तोपमा । किं चोपमानानुपादाने धर्मे वादिलोपेनेति मिलित्वा प्रकारचतुष्टयं श्रौतमार्थं च सम्भवतीत्यष्टविधमिति पञ्चविंशतिप्रकारा ।

(लो, अ) एकरूपतया सम्बन्धिभेदमात्रेण वेति द्विधा । तत्रार्यं वृत्तावेव—मधुरः सुधावदित्यादि । द्वितीयं सकलकलं पुरमेतदित्यादि । बिम्बानुबिम्बत्वं बिम्बप्रतिबिम्बभावः । सा च प्रकृते. सदृशता यथा शमश्रुलत्वसरघाध्यापत्वयोः । शब्दमात्रेण नत्वर्थतोऽपि भिदाभेदः । यथा—स्मेरं विधाय इत्यादि ।

+ अलङ्कारसारसङ्ग्रह उद्भटेन शब्दशास्त्रमनुसरतोपमाभेदा इत्थं दर्शिताः—

यथेवशब्दयोगेन सा श्रुत्यान्वयमर्हति ।
सदृशादिपदश्लेषादन्ययेत्युदिता द्विधा ॥
संक्षेपाभिहितापेषा साम्यवाचकविच्युते. ।
साम्योपमेयतद्वाचिवियोगाच्च निबध्यते ॥
उपमानोपमेयोक्तौ साम्यतद्वाचिविच्यवात् ।
क्वचित्समासे तद्वाचिविरहेण क्वचिच्च सा ॥
तथोपमानादाचारे क्यच्प्रत्ययबलोक्षित. ।
क्वचित्सा कर्तुराचारे क्यङा सा च क्विपा क्वचित् ॥
उपमाने कर्मणि वा कर्तरि वा यो णमुल् कषादिगतः ।
तद्वाच्या सा वतिना च कर्मसामान्यवचनेन ॥
षष्ठीसप्तम्यन्ताच्च यो वतिर्नामतस्तदभिधेया ।
कल्पप्प्रभृतिभिरन्यैश्च तद्धितैः सा निबध्यते कविभिः ॥

अयञ्चोपमाविभागो नादृत. । तथा चोक्तमप्पयदीक्षितेन चित्रमीमांसायाम्—

एवमयं पूर्णालुप्ताविभागो वाक्यसमासप्रत्ययविशेषगोचरतया शब्दशास्त्रव्युत्पत्तिकौशलप्रदर्शनमात्रप्रयोजनो नातीवालङ्कारशास्त्रे व्युत्पाद्यतामर्हति । नवा लुप्तानामयं सामस्त्येन विभाग. ।

तत्र एकरूपे यथा उदाहृतम्। "मधुरः सुधावदधर" इत्यादि। बिम्बप्रतिबिम्बत्वे यथा—*

"भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम्।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव॥"

अत्र श्मश्रुलैरित्यस्य सरघा व्याप्तैरिति दृष्टान्तवत्प्रतिबिम्बनम्।

शब्दमात्रेण भिन्नत्वे यथा—

"स्मेरं विधाय नयनं विकसितमिव नीलमुत्पलं मयि सा
कथयामास कृशाङ्गी मनोगतं निखिलमाकूतम्॥" †

अत्र एके एव स्मेरत्वविकसितत्वे प्रतिवस्तूपमावच्छब्दभेदेन[1] निर्दिष्टे॥+(त,इ)

लक्ष्यतावच्छेदकस्यैक्येनैकरूप्यं बोध्यम्। भिन्नरूपत्वे तु शब्दभेदो वक्ष्यते। गुणो धर्मः। भिन्नस्य द्वैविध्यमाह—**भिन्ने** इति। बिम्बानुबिम्बत्वं व्यक्त्योर्मनसा अभेदारोपः।

(वि, ण) भल्लेति—स रघुस्तेषां पारसीकाणां यवनानां भल्लरूपास्त्रविशेषेणाऽपवर्जितैस्त्याजितैः शिरोभिः महीं तस्तार व्यापारयामास। कीदृशैः श्मश्रुलैः (अस्त्यर्थे लच्) क्षौद्रपटलैः मधुरससमूहैरिव सरघा मधुमक्षिका। **दृष्टान्तवदिति**—दृष्टान्तः—सादृश्यं तच्चात्र श्यामरूपम्। तद्वत् तद्विशिष्टं तन्मूलमिति यावत्। तादृशं प्रतिबिम्बनं मनसा अभेदारोपः इत्यर्थः। क्षौद्रपटलमुखयोः सादृश्यम्—श्यामसरघाऽभिन्नश्मश्रुमत्त्वादिति बोधनात्।

(वि, त) स्मेरं विधायेति स्पष्टम्। **अत्रेति—एके एवेति**—एकधर्मावच्छिन्ने एवेत्यर्थः। यद्यपि स्मेरत्वं मुखस्यैव धर्मः न नयनस्येत्यतो विस्तारत्वमेव लक्ष्यता-

---

(लो, आ) सरघा मधुमक्षिका। क्षौद्र मधु। अत्र श्मश्रुलत्वसरघाव्याप्तत्वयोः धर्मयोर्भेदेऽपि स्वगतपिङ्गलत्वादिधर्मसाजात्येन सादृश्यादेकरूपतया समानता शिरः क्षौद्रपटलयोर्धर्मिणोः साम्यबीजम्। एवं च गुणसाधारण्यं धर्मिणोर्विरुद्धधर्मयोगेऽपि सुसङ्गतम्। दृष्टान्तप्रतिवस्तूपमे सोदाहरणे लक्षयिष्यते।

(लो, इ) एके एवेति—स्मेरत्वस्य विकसितत्वस्याविशेषत्वात्।

---

* वस्तुतो भिन्नयोर्धर्मयोः परस्परसादृश्यादभिन्नतयाध्यवसितयोर्द्विरुपादानं बिम्बप्रतिबिम्बभावः।

'अत्र एवात्र बिम्बप्रतिबिम्बव्यपदेशः। लोके हि दर्पणादौ बिम्बात्प्रतिबिम्बस्य भेदेऽपि मदीयमेवात्र वदनं सङ्क्रान्तमित्यभेदेनाभिमन्यते। अन्यथा हि प्रतिबिम्बदर्शने कृशोऽहं स्थूलोऽहमित्याद्यभिमानो नोदियात्, भूषणविन्यासादौ च नायिका नादियेरन्।'
जयरथः।

† चक्षुषोर्विकाशात् सर्वं मनोगतमभिलाषं सूचितवतीत्यर्थः।

+ अलङ्कारसर्वस्वे रुय्यकः—तत्रापि साधारणधर्मस्य क्वचिदनुगामितया ऐक्य-

1 '०पमावच्छब्देन निर्दिष्टे' (क. पु.)

एकदेशविवर्त्तिन्युपमा वाच्यत्वगम्यत्वे[1]।
भवेतां यत्र साम्यस्य ॥ ३५ ॥ (य, ई) ‡

यथा—

"नेत्रैरिवोत्पलै पद्मैर्मुखैरिव सर श्रिय ।
पदे पदे विभान्ति स्म चक्रवाकै स्तनैरिव ॥"

अत्र नेत्रादीनामुत्पलादीना सादृश्य वाच्य सर श्रीणाञ्चाननासादृश्य गम्यम्। (द)

च्छेदकम्। विकसितत्व तु नीलोत्पलधर्म इत्यव छेदकस्यापि भेदस्तथापि विकासस्यापि विस्तारविशेषत्वाद् अभेदो बोध्य । **प्रतिवस्तूपमायदिति**। तत्रैकधर्मावच्छिन्न साधारणधर्मस्य शब्दभेदो वक्ष्यते।

(वि, थ) एकदेशविवर्त्युपमामाह—**एकदेशेति**। गम्यत्व व्यङ्ग्यत्वम्, साम्यस्य सादृश्यप्रतियोगितानुयोगितारूपाया उपमाया ।

(वि, द) नेत्रैरिवेति। सर श्रिय सरोवरलक्ष्म्या पदे पदे देशे देशे उत्पलै पद्मैश्चक्रवाकैश्च विभान्ति स्म। तत्रोत्पलादिनयस्य नेत्रादिनयोपमामाह—**नेत्रैर्मुखैस्तनैरिवेति। अत्रेति**। सादृश्य सादृश्यप्रतियोगितानुयोगितारूपोपमा। सादृश्यप्रतियोगितानुयोगितारूपसम्बन्धस्य एवोपमात्वेनोपमाग्रन्थे प्रतिपादितत्वात्। तच्चात्र इवादेर्वाच्यमव्यङ्ग्यम्। अव्यङ्ग्यत्वस्यैव वाच्यपदार्थत्वेन प्राक् प्रतिपादितत्वाद् अन्विताभिधानपक्षे वाच्यमन्यथा तु ससर्गमर्य्यादागम्यम्। **सर.श्रीणामिति**। उत्पलादीन्य नेत्रादिसादृश्यवशाद् गम्य व्यङ्ग्यमित्यर्थ ।

(लो., ई) वाच्यत्वगम्यत्वे एकदेशे वाच्यत्वमेकदेशे गम्यत्वमित्येकदेशे विशेषेण वर्त्तमानाद् एकदेशविवर्त्तिनीत्यन्वर्थं नाम क्वचित् रूपकवत् समस्तवस्तुविषयाप्युपमा दृश्यते। यथा गोपीनाथकवे —

("ब्रह्माण्ड भवनायते त्वदुदरे लोकेश ! लोक स्फुर-
ज्ज्ञानाचेतनकल्पनाशबलित साक्षात् वितानायते ।

रूपेण निर्देश । क्वचिद्वस्तुप्रतिवस्तुभावेन पृथङ् निर्देश । पृथङ्निर्देशे च सम्बन्धिभेदमात्र प्रतिवस्तूपमावत्। बिम्बप्रतिबिम्बभावो वा दृष्टान्तवत् ।'

‡ अत्र रसगङ्गाधरकार —'इयमपि रूपकवत्केवलनिरवयवा, मालारूपनिरवयवा समस्तवस्तुविषयसावयवा, केवलश्लिष्टपरम्परिता, मालारूपपरम्परिता, केवलशुद्धपरम्परिता, मालारूपशुद्धपरम्परिता चेत्यष्टधा ।' उदाहृतञ्च तत्रैव—

"मकरप्रतिमैर्महाभटै कविभी रत्नसमै समन्वित ।
कवितामृतकीर्तिचन्द्रयोस्त्वमिहोर्वीरमणासि कारणम् ' ॥

1 'गम्यते' (क घ ङ)

कथिता रसनोपमा ।

यथोर्ध्वमुपमेयस्य यदि स्यादुपमानता ॥ ३६ ॥ (घ, ङ) *

यथा—

"चन्द्रायते शुक्लरुचापि हंसो
हंसायते चारुगतेन कान्ता ।
कान्तायते स्पर्शसुखेन वारि
वारीयते स्वच्छतया विहायः ॥" (न)

मालोपमा यदेकस्योपमानं बहु दृश्यते ॥ ३७ ॥

यथा—

"वारिजेनेव सरसी शशिनेव निशीथिनी ।
यौवनेनेव वनिता नयेन श्रीर्मनोहरा ॥" (प, ऊ)

(वि, घ) रसनोपमामाह—**कथितेति** । यथोर्ध्वमिति उत्तरस्येत्यर्थः ।

(वि, न) **चन्द्रायते** इति । चन्द्र इवाचरति इत्यादिरर्थ. । शुक्लरुचाऽपीत्यत्र अपिकारस्य हंसोऽपि इत्यन्वय. । विहाय आकाशम् ।

(वि, प) मालोपमामाह—**मालोपमेति** । **वारिजेनेत्यादि** स्पष्टम् । अत्र प्रत्युपमानं मनोहरत्वमेको धर्मः । विभिन्नधर्माप्येषा सम्भवति—यथा

"विज्ञो गुरुरिवासि त्वं कन्दर्प इव सुन्दर. ।
पाथोधिरिव गम्भीरो गरुत्मानिव विक्रमी ॥" इति ।

तन्मध्येऽपि तवामरायत इयं भूमण्डलालम्बिनी
हारक्षीरपटीरसोदररुचि· स्वर्गौकसामापगाः ॥"

अत्र भवनस्थाङ्गिनो वितानाद्यङ्गसहितस्य उपमानत्वेन समस्तवस्तुविषयता ।

(लो, ङ) यथोर्ध्वम् ऊर्ध्वोर्ध्वक्रमेण ।

(लो, ऊ) नयेनेत्यादौ मनोहरत्वमेकः साधारणो धर्म. । क्वचिद् भिन्नसाधारण-धर्मा मालोपमा यथा —

("ज्योत्स्नेव नयनानन्दः सुरेव मदकारणम् ।
प्रभुतेव समाविष्टसर्वलोका नितम्बिनी ॥")

एवं रसनोपमाप्यभिन्नसाधारणधर्माभिन्नसाधारणधर्मेति द्विधा बोद्धव्या ।

---

* यथोर्ध्वमूर्ध्वक्रमेण । प्रथमवाक्ये यदुपमेयं तद् यदि परवाक्ये उपमानं भवति तदा रसनोपमा ।

उदाहरणे प्रथमवाक्ये हंसस्य उपमेयत्वम् । द्वितीयवाक्ये हंसस्य उपमानत्वं, कान्तायाः उपमेयत्वमित्यादि ।

क्वचिदुपमानोपमेययोर्द्वयोरपि प्रकृतत्व दृश्यते ।

"हसश्चन्द्र इवाभाति जल व्योमतल यथा ।
विमला कुमुदानीव तारका शरदागमे ॥" (फ, ऋ)

"अस्य राज्ञो गृहे भान्ति भूपानीता[1] विभूतय ।
पुरन्दरस्य भवने कल्पवृक्षभवा इव ।"

अत्रोपमेयभूतविभूतिभि "कल्पवृक्षभवा इव" इत्युपमानभूता विभूतय आक्षिप्यन्त इति आक्षेपोपमा । अत्रैव "गृहे" इत्यस्य "भवने" इत्यनेन प्रतिनिर्देशात् प्रतिनिर्देश्योपमा । इत्यादयश्च न लक्षिता । एवविधवैचित्र्यस्य सहस्रधा सदर्शनात् । * (ब, ऋ)

उपमानोपमेयत्वमेकस्यैव त्वनन्वय ॥ ३८ ॥

अर्थादेकवाक्ये । (भ, लृ) ×

(वि, फ) मालोपमाप्रसङ्गेन स्मृतमुपमाया विशेषान्तरमाह—**क्वचिदिति** । **हस** इति । अत्र प्रकृतशरद्वर्णने तद्धर्मा हसश्चन्द्रादय सर्व एव प्रकृता ।

(वि, ब) आक्षेपोपमा—प्रतिनिर्देश्योपमयो सूत्रेणानुक्तिबीज दर्शयितु तद्द्वयमाह—**अस्य राज्ञ** इति । भूपानीता पराजितभूपेभ्य आनीता । कल्पवृक्षभवास्तज्जन्या विभूतय इत्यनुषङ्ग । आक्षिप्यन्ते अनुषज्यन्ते । आक्षेपोपमा अनुषङ्गोपमा । अत्रैव प्रतिनिर्देश्योपमात्वमप्याह—**अत्रैवेति** ।

(वि, भ) अनन्वयालङ्कारमाह—**उपमेति** । **अर्थादेकवाक्य** इति । वाक्यभेदे उक्तरसनोपमाया वक्ष्यमाणोपमेयोपमायाश्च प्रसक्त्या तद्भेदस्याऽत्र प्रवेशात् ।

(लो, ऋ) हसश्चन्द्र इवेत्यादौ शरद्वर्णनस्य प्रकृतत्वाद्धसचन्द्रयोर्जलव्योम्नो स्तारकाकुमुदयोश्च प्रकृतत्वम् ।

(लो, ऋ) भूपानीता राजभिरुपहारीकृता । गृहे इत्यस्य उपमेयवाक्यगतस्य भवन इत्यनेन उपमानवाक्यगतेन । **एवविधेति** । अयमाशय यदित्थ क्वचिदपि विच्छित्त्याभासमादाय विशेषतो लक्षितव्य तेन तस्य तथाविधस्य सहस्रधासम्भवाद् ग्रन्थगौरव विना न किञ्चित्फलमिति । तथाविधस्यापि लिखितव्यत्वे वा यद्युक्तप्रकारवैलक्षण्यस्य तदा लक्षितव्यम् । नच तथा ।

(लो, लृ) तु पुनरर्थे । उपमालक्षणस्थस्य द्वयोरित्यस्य व्यवच्छेदार्थ । न

---

* (मालोपमा रसनोपमा च) न लक्षिता । एवविधवैचित्र्यसहस्रसम्भवात् । उक्तभेदानतिक्रमाच्च—अस्मा ।

1 'भूपाना ता विभूतय' (क ग पु)

यथा— "राजीवमिव राजीवं जलं जलमिवाजनि ।
चन्द्रश्चन्द्र इवाऽतन्द्रः शरत्समुदयोद्यमे ॥" (म)

अत्र राजीवादीनामनन्यसदृशत्वप्रतिपादनार्थमुपमानोपमेयभावो वैवक्षिकः। "राजीवमिव पाथोजम्" इति चास्य लाटानुप्रासाद् विविक्तो विषयः। किन्त्वत्रोचितत्वादेकशब्दप्रयोग एव श्रेयान्। यदाहुः—

"अनन्वये च शब्दैक्यमौचित्यादानुषङ्गिकम्।

(वि, म) राजीवमिति। अतन्द्रोऽनिद्रितो घूर्णमान इति यावत्। शरत्समुदयः शरल्लक्ष्मीस्तस्या उद्यमे उपक्रमे।

(वि, य) वैवक्षिक इति। विवक्षाशब्दात् कण्। मुखं चन्द्र इत्यत्र यथा भेदेऽभेदारोपाद् व्यधिकरणेनाऽऽरोपितेन चन्द्रत्वेन मुखप्रतीतिस्तथात्राऽभेदे भेदारोपाद् विवक्षितेन व्यधिकरणेनापि भेदघटितसादृश्येनैवार्थे नौपम्यप्रतीतिरित्यर्थः। आहार्य्यतादृशविवक्षाप्रयोजनमाह—अनन्यसदृशत्वेति। अत्र लाटानुप्रासोऽप्यस्ति। तदसङ्कीर्णमिममाह—पाथोजमिति। उचितत्वादिति। अलङ्कारद्वयेन शोभातिशयजननादौचित्यम्। अनन्वये चेति। आनुषङ्गिकमन्यार्थप्रयत्नेन सिद्धम्।

विषय उपमेयस्य उपमानान्तरेणान्वयः सम्बन्धोऽत्रेत्यन्वर्थनामाऽनन्वयालङ्कारः, अर्थादिति। वाक्यद्वये उपमेयोपमाया वक्ष्यमाणत्वादित्यर्थः।

(लो, प) नन्वेकस्यैव उपमानोपमेयभावः कथं न विरुद्ध इत्यत आह—अत्रेति। वैवक्षिको न हि तात्त्विकः। अस्यालङ्कारस्य राजीवशब्दयोस्तात्पर्य्यमात्रभिन्नार्थत्वेन लाटानुप्रासे सम्भवत्यपि न तद्विशेषत्वमित्याशयः। तत्र विषयविवेकं दर्शयति—कथं राजीवमित्येकशब्दप्रयोगः पौनरुक्त्यापततीत्याह—किन्त्वत्रेति। उचितत्वं पर्य्यायक्रमभङ्गदोषस्यावश्योपेक्षणीयत्वादिति भावः। अत्र प्राचीनसम्मतिं दर्शयति—यदाहुरिति। आनुषङ्गिकं तल्लक्षणानन्तर्गतमपि काव्योज्ज्वलीकरणार्थमुपा-

---

एकस्योपमेयोपमानत्वेऽनन्वय.—वामनः

तेनेत्यमुदाहृतम्—
"गगनं गगनाकारं सागरः सागरोपमः।
रामरावणयोर्युद्धं रामरावणयोरिव ॥" इति ॥
"यत्र तेनैव तस्य स्यादुपमानोपमेयता।
अनादरविवक्षातस्तमित्याहुरनन्वयम् ॥" भामहोद्भटौ

उद्भटेन पात्रोदाहृतम्—
"यस्य वाणी स्वयाणीव स्फुरितेव क्रियाऽमला।"
कथं स्मित्व कथं न लोकलोचनलोभनम् ॥

जयदेवेनाप्यनन्वयालङ्कारत्वमित्थं समर्थितम्—
"एवं चात्र द्वितीयवाक्यप्रचारनिरूपितैवालङ्कारत्वप्रतिशरीरं प्रमाणम्"

अस्मिंस्तु लाटानुप्रासे साक्षादेव प्रयोजकम्" इति ॥* (य, ए)

पर्य्यायेण द्वयोरेतदुपमेयोपमा मता ॥ ३६ ॥ +

एतदुपमानोपमेयत्वम् । 'अर्थाद् वाक्यद्वये । यथा—

"कमलेव मतिर्मतिरिव कमला
तनुरिव विभा विभेव तनु ।

अस्मिंस्त्विति । लाटानुप्रासोक्तकारिकात्वेनाऽस्मिन्नित्येनेन लाटानुप्रास उक्त — **साक्षादेवेति** । अन्यार्थप्रयत्नाभावाद् इत्यर्थ । प्रयोजन लाटानुप्रासस्य शब्दैक्यमित्यनुषङ्ग ।

(वि, र) उपमेयोपमामाह—**पर्य्यायेणेति** । द्वयोरुपमानोपमेययोरित्यर्थ ।

देयमिति भाव । साक्षादेव न तु दोषनियमात्, तल्लक्षणान्तर्गतत्वादित्यर्थ ।

(लो, श्रो) उपमेयोपमेति । उपमेयेन पूर्ववाक्यस्थेन उपमासादृश्य द्वितीय-

---

* अनन्वयलाटानुप्रासयोर्भेद एकावल्यामित्थ प्रदर्शित —

पौनरुक्तयस्य तात्पर्यमात्रभिन्नस्यात्र प्रयोजकत्वात् । अनन्वये चार्थमात्रगतयुगपदुपमानोपमेयभावस्योपयुक्तत्वात् । शब्दैक्यस्य पुनरौचितीवशेन प्रसङ्गसङ्गतत्वात् ।

तदेतेप्युक्तम्—उभयपौनरुक्त्य लाटानुप्रासे प्रयोजकमनन्वये त्वर्थपौनरुक्त्य तावतैवैकस्य युगपदुपमानोपमेयभावसिद्धेरित्यर्थ । किमर्थं तर्हि तत्र शब्दैक्य कुर्वन्ति कवयो नियमेनेत्याशङ्क्याह—**शब्दैक्यस्य पुनरिति** । **औचितीवशेनेति** । उद्देशप्रतिनिर्देशयोरैकरूप्यमिति न्यायबलेनान्यथा पर्यायप्रक्रमभङ्गापत्तेर्नतु लक्षणान्वयेनेत्यर्थ ।

+ अत्र जयरथ —

"अस्यारचोपमानान्तरतिरस्कार एव फलम् । अत एवोपमेयेनोपमा इत्यस्या अन्वर्थाभिधानम् । यत्र पुनरुपमानान्तरतिरस्कारो न प्रतीयते तत्र नायमलङ्कार । यथा—

"सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्य ।
यामिनयन्ति दिनानि च सुखदु खवशीकृते मनसि ॥"

"न ह्यत्र विधुसवित्रादीनामुपमानन्तरतिरस्करण विवक्षित किन्तु सुखदु खवशीकृतमनसामेव विपरीत भवतीति ।'

भामहेनोदाहृतम्—

"सुगन्धि नयनानन्दि मादिरामदपाटलम् ।
अम्भोजमिव वक्त्र ते त्वदास्यमिव पङ्कजम् ॥"

तथा कालङ्कारसर्वस्वे—

"खमिव जल जलमिव ख हसश्चन्द इव हस इव चन्द ।
कुमुदाकारास्तारास्तारकाकाराणि कुमुदानि ॥"

धरणीव धृतिर्धीतिरिव धरणी
मतत विभाति तव यस्य वत ॥"

अत्रास्य राज्ञ श्रीबुद्ध्यादिसदृश नान्यदस्तीत्यभिप्राय । (र, श्री)

[सदृशानुभवाद् वस्तुस्मृति स्मरणमुच्यते ॥ ४० ॥ *

"अरविन्दामद वीक्ष्य खेलत्खञ्जनमञ्जुलम् ।
स्मरामि वदन तस्याश्चार चञ्चललोचनम् ॥" (ल)

तेनोपमेयोपमालङ्कार इत्यर्थ । अर्थादिति । वाक्यद्वय विना पर्य्यायेणोक्त्यसम्भवात् । कमलेवेति । अत्र सर्वत्र विभातीत्यन्वय ।

(वि, ल) स्मरणालङ्कारमाह—सदृशेति । अरविन्दमिति । अरविन्दस्यैवोपरि खेलता खञ्जनेन मञ्जुलमरविन्द वीक्ष्य चारुचञ्चललोचन तस्या वदन स्मरामीत्यर्थ । अत्र अरविन्दसादृश्यान्मुखस्य, खञ्जनसादृश्याल्लोचनस्य, खेलासाद-

---

वाक्यस्थयोपमानस्येत्यन्वर्थं नाम, एतदितरोपमानव्यवच्छेद फलम् । एतदेव वृत्ता वुक्तमस्य राज्ञ इति । धृतिर्धैर्य्यम् ।

---

* सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानम् । सा द्विविधा स्मृतिरनुभवश्चेति ।
सस्कारमात्रजन्य ज्ञान स्मृति । तद्भिन्न ज्ञानमनुभव ।
सस्कारस्त्रिविध । वेगा भावना स्थितिस्थापकश्चेति । अनुभवजन्या स्मृतिहेतुर्भावना आत्ममात्रवृत्ति —तर्कसग्रहे ।
सादृश्य विना तु स्मृतिर्नायमलङ्कार —रुय्यक
सादृश्यज्ञानोद्बुद्धसस्कारप्रयोज्य स्मरण स्मरणालङ्कार —जगन्नाथ
तत्रैव च तेनोक्तम्—अयमालङ्कारिकाणां सम्प्रदायो यत्सादृश्यमूलत्वे स्मरण निदर्शनादिवदलङ्कार । तस्याभावे व्यङ्ग्यतायां भावस्तयोरभावे तु वस्तुमात्रम् ।
सदृशानुभवादित्यव्याप्तिं प्रदर्शयता पण्डितराजेनैवमुक्तम्—यद्यपि 'सदृशानुभवादन्यत्तरस्मृति स्मरणम्' इत्यलङ्कारसर्वस्वरत्नाकरया स्मरणालङ्कारलक्षणमुक्त तदपि न । सदृशस्मरणादुद्बुद्धेन सस्कारेण जनिते स्मरणेऽव्याप्ते । यथा—

सत्येवास्मिन् जगति यदहा पक्ष्मणो रम्यरूपा
स्रोतो मध्ये मम तु महती वासना चातकेषु ।
यैरभ्यर्णस्थ निजगर्ग नीरद स्मारयद्भि
स्मृत्यारूढ भवति किमपि ब्रह्म कृष्णाभिधानम् ॥"

अत्र न चातकदर्शनादेकसम्बन्धिदर्शनादुद्बोधेनापरसम्बन्धिनो जलधरस्य भगवत्सादृश्यस्य स्मरणेन चलित भगवत् स्मरण भगवद्विषयरतिर्निमित्तम् । यदि च 'सदृशानुभवाद्' इत्यपहाय 'सदृशदर्शनाद्' इति लक्षणे निवेश्यते तदा भवत्यव्याप्ति रूपम् इति दिक् ।

मयि सकपटमित्यादौ च(+) स्मृते सादृश्यानुभव विनोत्थापितत्वान्नायमलङ्कार । (औ) राघवानन्दमहापात्रास्तु वैसादृश्यात् स्मृतिमपि स्मरणालङ्कारमिच्छन्ति । तत्रोदाहरण तेषामेव यथा—

"शिरीषमृद्वी गिरिषु प्रपेदे यदा यदा दु खशतानि सीता ।
तदा तदास्या सदनेषु सौख्यलक्षाणि दध्यौ गलदश्रु राम । (ब, अ)

रूपकं रूपितारोपो[1] विषये निरपह्नवे ॥ ४१ ॥ (श, आ) *

स्यात् चाञ्चल्यस्य स्मरणम् ।

(वि, ब) मयि सकपटमित्यादाविति । तत्र "स्मेर स्मेर स्मरामि तदाननम्" इति । स्मृतेरित्थन्तयैवोत्थापितत्वादित्यर्थ । "सदृशदृष्टचिन्ताया स्मृतिबीजस्य बोधका" इत्युक्तत्वात् । स्मृतिबीजसंस्कारोद्बोधकत्वाहुल्यात् । **शिरीषेति** । शिरीषमृद्वी सीता यदा यदा गिरिषु दु खशतानि प्रपेदे तदा तदा रामोऽस्या सदनेषु सौख्यलक्षाणि गलदश्रु यथा स्यात्तथा दध्यावित्यर्थ । सुखध्यानमिति स्मृति । दु खे सुखवैसादृश्यम् ।

(वि, श) रूपकालङ्कारमाह—**रूपकमिति** । रूपितेत्यत्र रूपणं रूप तत इतच्-

---

(लो, औ) सदृशानुभवादिति प्रतीकव्यवच्छेद्य दर्शयति—**मयि सकपटमित्यादि** । अरविन्दमित्याद्युदाहरणे स्मृतिरूपाया विप्रलम्भाङ्गत्वेन प्रेयोऽलङ्कारविषयत्वेऽपि स्मरणालङ्कारस्यापवादत्वेन तद्बाधकता । तेनानुचिन्तनीयदर्शनोत्थापिता स्मृति प्रेयोलङ्कारविषय । यथा मयि सकपटमित्यादिरेव ।

(लो, अ) सुखमेव सौख्यम्, अत्र सुखदु खयोर्वैसादृश्यम् ।

उदाहरणान्तर यथोत्तररामचरिते—

' अतिशयितसुरासुरप्रभाव
शिशुमवलोक्य तथैव तुल्यरूपम् ।
कुशिकसुतमखद्विषां प्रमाथे
धृतवनुष रघुनन्दन स्मरामि ॥"

+ ' मयि सकपट किञ्चित् क्वापि प्रणीतविलोचने
किमपि नयन प्रेम्णा तिर्य्यग्विजृम्भिततारकम् ।
स्मितमुपगतामाली दृष्ट्वा सलज्जमवाञ्छित
कुवलयदृश स्मेर स्मेर स्मरामि तदाननम् ।"
इति श्लोक ।

* ' विषयेण विषयस्य रूपवत करणाद्रूपकम्" (अलङ्कारस०) "विषयी

1 'रोपाद्विषये' (क प)

रूपितेति परिणामाद् व्यवच्छेदः। एतच्च [1]परिणामप्रस्तावे विवेचयिष्यामः। निरपह्नवे इत्यपह्नुतिव्यवच्छेदार्थम्। (घ)

तत्परम्परितं साङ्गं निरङ्गमिति च त्रिधा ॥ ४२ ॥ (स, इ)

तद्रूपकम्। तत्र—

यत्र कस्यचिदारोपः परारोपणकारणम्।

प्रत्ययाद्रूपणवानित्यर्थः। तथा च रूपयिष्यमाणश्चन्द्रादिरत्र रूपितपदार्थः। उक्तप्रत्ययान्तत्वेऽतीतत्वानन्वयात्। तस्य मुखादावारोपो रूपकमित्यर्थः। केचिदत्र आरोपादिति पञ्चमी ज्ञापकतायां, स्वज्ञानद्वारा स्वस्यैव रूपकत्वप्रकारज्ञानहेतुता बोध्या इत्याहुः।

(वि,घ) पदव्यावृत्तिमाह–रूपितेति। परिणामालङ्कारे रूपणाधिकरणतया रूप्यमाणस्य परिणामाद्वास्तवोऽभेदस्तथात्वाऽऽरोपवत्त्वरूपं रूपितत्वम्। यथा–"स्तनोपपीडमाश्लेषः कृतो द्यूते पणस्तया" इति परिणामोदाहरणे रूपणाधिकरणाऽऽश्लेषतयैव रूप्यमाणस्य पणस्य परिणामाद्वास्तव एव पणाऽऽश्लेषयोरभेद इत्यतः पणो न रूपित इति तद्व्यवच्छेदः। अपह्नुतिव्यवच्छेदायेति–"नायं शशी कुण्डलितः फणीन्द्रः" इत्यादौ शशिनि कुण्डलितफणीन्द्रारोप एव, किन्तु शशित्वापह्नवपूर्वक इत्यतः तद्व्यवच्छेदः।

(वि, स) तस्य त्रैविध्यमाह–तदिति।

(वि, इ) **यत्र कस्यचिदिति**। यत्र रूपके गृह्यमाणे क्वचित् कस्यचिदारोप इत्यर्थः। परारोपणस्य प्रकृष्टारोपस्य मुख्यारोपस्य इत्यर्थः। कारणं साधकम्।

(लो, आ) एवं साधर्म्येऽभेदप्राधान्ये अलङ्कारान् निर्णीय भेदप्राधान्ये लक्षयति–रूपकमिति। रूपितारोपवत्त्वं नच प्रकृतेऽप्युपयोगः। अनिर्गीर्णस्वरूपस्याऽन्यतादात्म्यप्रतीतिरारोपः। तेनाध्यवसायमूलकोत्प्रेक्षादेरपि व्यवच्छेदः; अध्यवसायोऽपि विषयनिगरणेन विषयिणोऽभेदप्रतिपत्तिः। अपह्नवो "न मुखं चन्द्र" इत्याकारः। एवं च निरपह्नवस्यानिर्गीर्णस्य विषयस्य विषयिणा तादात्म्याद् यद्रूपवत्त्वं तद्रूपकाख्यमलङ्करणमन्यरूपेणान्यस्य रूपवत्त्वादित्यर्थः।

(लो, इ) तद्भेदानाह–तदिति। त्रिधेत्यतः पूर्वं प्रथमामिति शेषः। अन्यभेदानामेतदन्तरत्वात्।

विषयं रूपयति रूपवन्तं करोतीति अन्वर्थाभिधानं रूपकम्' (एकावली) "रूपवत् करोतीति रूपयति रूपयुक्तं करोतीत्यर्थः। सोऽस्मिन्नस्तीति रूपकमलङ्कारः।" (मुकुरमालायां अप्पयदीक्षितः) । निरपह्नवे अपह्नवरहिते। विषये आरोप्ये। साधर्म्यं स्वनुगतमेव।

1 'तत्प्रस्तावे' (क. ङ)

तत्परम्परितं * श्लिष्टाश्लिष्टशब्दनिबन्धनम् ।
प्रत्येकं केवलं मालारूपं चेति चतुर्विधम् ॥ ४३ ॥ (ङ, ई)

तत्र श्लिष्टशब्दनिबन्धन केवलपरम्परितं यथा—

"आहवे जगदुद्दण्डराजमण्डलराहवे ।
श्रीनृसिंहमहीपाल ! स्वस्त्यस्तु तव बाहवे ॥" (क, उ)

श्लिष्टेति–एकशब्देनैव रूप्यरोपकोभयोपस्थापने श्लिष्टत्वनिबन्धनत्वम् । अतथात्वे तु अश्लिष्टशब्दनिबन्धनत्वम् ।

(वि, क) आहवेति—हे नृसिंहमहीपाल ! तव बाहवे हस्ताय स्वस्त्यस्तु । कीदृशाय–आहवे युद्धे जगत्युद्दण्ड राजमण्डल नृपतिमण्डलमेव राजमण्डल चन्द्रमण्डल तदीयराहवे सैंहिकेयाय तत्तिरस्कारकत्वात् । अत्र नृपतिमण्डलसम्बन्धित्वेन राहुत्वारोपोऽनुपपन्न राहोर्नृपतिमण्डलतिरस्कारकत्वाभावात् । अतो मुख्यतदारोपसाधको नृपतिमण्डले चन्द्रमण्डलारोप । श्लिष्टराजशब्देन च तदुभयोपस्थापनम् एतदाह—अत्रेति । अत्र च मुख्यरूपकनिर्वाहाय द्वयोर्नृपतिचन्द्रयो प्राकरणिकत्वादादावेव नृपचन्द्रो राजपदवाच्यो न तु चन्द्रो व्यङ्ग्य । एकार्थमात्रे प्रकरणत्वे एवाऽन्यार्थस्य व्यङ्ग्यत्वात् । अतो नात्र वाच्यसाधकत्वव्यङ्ग्यरूपस्य वाच्यसिद्ध्याङ्गाख्यगुणीभूतव्यङ्ग्यत्वस्य प्रसक्ति । यत्र तु कस्यचिदारोप विनैव प्रथम मुख्यरूपक सिद्धयति पश्चात्तादृशनिरूप्यमाणस्याऽपरपदार्थान्वयानुपपत्तिस्तत्र प्राकरणिके तादृशापरपदार्थे नियन्त्रकस्य श्लिष्टशब्दस्याऽपरार्थो मुख्यरूपमाणस्याऽपरपदार्थान्वयानुपपत्तिनिरासाय रूप्यमाणे व्यङ्ग्य एव, तत्र वाच्यसिद्ध्यङ्गतैव तस्य । यथा–

"भ्रमिमरतिमत्वमहृदयता प्रलय मूर्च्छा तम शरीरसाद च ।
मरण च जलदभुजगज प्रसह्य कुरुते विषं वियोगिनीनाम् ॥"

इत्यत्र श्यामत्वेनोपकारकत्वेन च जलदे भुजगरूपण प्रथम सिद्धयत्येव । पश्चाच्च रूप्यमाणस्य भुजगस्य विषपदार्थे प्राकरणिकनलजनकत्वानुपपत्त्या तन्निरासाय विषपदद्वितीयार्थो हलाहल व्यङ्ग्यम् । तत्र रूप्यतो वृष्टिवर्णनप्रकरणाज्जलस्यैव वाच्य-

---

(लो, ई) परस्य मुख्यस्य तथाविधसम्यगर्थान्तररूपण विनानुपपद्यमाने आरोपणे कारण निमित्तम् । श्लिष्ट, प्रकृतरोपणोत्पादकरूपाश्रयस्यात्मनो द्व्यर्थता श्लिष्ट । अश्लिष्ट पृथक्पदनिर्दिष्टरूपरूपकार्थ । तथाविध शब्दो निबन्धन कारणम् । अर्थात् मुख्यारोपे यस्य इत्यर्थ । केवल सकृद्रूपणात्मकम् । मालारूपम् एकत्रैव विषयपरम्परामनपेक्ष्याऽनेकवस्त्वारोपात्मकम् । एवमन्यत्रापि । परम्परा जाताऽस्येति परम्परित सार्थकम् ।

(लो, उ) जगदुद्दण्डोऽतिशयोत्कट, राजमण्डल नृपसमूह चन्द्रमण्डल च ।

---

* परम्परया एकस्य माहात्म्यादपरस्यारूपणत्वमायातं तत्र तत्तथोक्तम्—जयरथ ।

अत्र राजमण्डल नृपसमूह एव चन्द्रबिम्बमित्यारोपो राजबाहो राहुत्वारोपे निमित्तम्। मालारूप यथा—

"पद्मोदयदिनाधीश सदागतिसमीरण ।
भूभृदावलिदम्भोलिरेक एव भवान् भुवि ॥"

अत्र पद्माया उदय एव पद्मानामुदय । सतामागतिरेव सदागमनम्। भूभृतो राजान एव पर्वता इत्याद्यारोपो राज्ञ सूर्यत्वाद्यारोपे निमित्तम्। (ख, ऊ)

त्वात्। ततो भुजगस्य हलाहलजनकत्वेनानुपपत्त्यभावाद् भुजगरूपेण सिद्धिरिति विषयस्य विभाग सुधीभिरवधेय । एव च मुख्यरूपकसाधकविशेष्यस्य वाच्यत्वे परम्परित रूपक, तस्य व्यङ्ग्यत्वे तु वाच्यसिद्धयङ्गमिति स्थिते "दीपयन् रोदसीरन्भ्रमेष ज्वलति सर्वत । प्रतापस्तव राजेन्द्र वैरिवशदवानल ।" इत्यत्र कुले वेण्वारोपणस्य व्यङ्ग्यतया वाच्यदावानलरूपसिद्धयङ्गत्वमिति मन्थकृता प्रागुक्त चिन्त्यम्। राजमण्डल-राहवे इत्यत्र इव तत्रापि मुख्यदवानलरूपकसाधकत्वेन वेण्वारोपणस्य वाच्यत्वादेव।

(वि, ख) श्लिष्टपरम्परितरूपकमालामाह—**पद्मोदयेति** । अस्यार्यो वृत्तावेव विवृत । इत्याद्यारोप सूर्य्यत्वाद्यारोपे निमित्तमिति। अत्र हि लक्ष्म्या उदये सूर्य्यस्य, सतामागतौ समीरणस्य, भूभृता राज्ञामावलौ दम्भोलेश्चानुपयोगेन पद्माया उदयादौ पङ्कजोदयाद्यारोपणेव तदुपयोगात्तन्निमित्तता।

"विद्वन् मानसहस ! वैरिकमलासङ्कोचदीप्तद्युते !
दुर्गामार्गणनीललोहित ! समित्स्वीकारवैश्वानर !
सत्यप्रीतिविधानदक्ष ! विजयप्राग्भावभीम ! प्रभो !
साम्राज्य वरवीर ! वत्सरशत वैरिंचमुच्चै क्रिया ।"

इति श्लोक काव्यप्रकाशकृता श्लिष्टपरम्परितमालारूपकोदाहरणतयैव दर्शित । तस्यार्था हि "हे वरवीर ! वैरिंच ब्राह्म वत्सरशतम् उच्चै साम्राज्य क्रिया कुर्य्या । राज्ञ अन्यान्यपि सम्बोधनान्याह-विद्वदिति। विदुषा मानस मन एव मानसर तत्र हस, कमलानामसङ्कोचो विकाशस्तत्र दीप्तद्युते सूर्य्य। दुर्गाणाममार्गण दुर्ग विना योद्धृत्व, तदेव दुर्गाया मार्गण तत्र नीललोहित ! समिता युद्धानां स्वीकार एव समिधां स्वीयर तत्र वैश्वानर ! सत्ये प्रीतिविधानमेव सत्याम् अप्रीतिविधान तत्र दक्ष प्रजापते ! विजय पराभव एव विजयोऽर्जुनस्तत् प्राग्भावे पूर्वोत्पत्तौ भीमसेन !

(लो, ऊ) पद्मा लक्ष्मी पद्म च। सतामागमन सर्वदागमन च। भूभृतो राजान पर्वताश्च। पद्माया लक्ष्म्या सर्वदा सङ्ग च। एव—

("त्वमेव देव पातालमाशानो त्व निबन्धनम्।
त्व चमरमरुद्भूमिरेको लोकत्रयात्मक ॥")

इत्यत्र लोकत्रयात्मकत्वमित्यादि रूपण पातालमित्यादि रूपण देव ॥

अश्लिष्टशब्दनिबन्धन केवल यथा—

"पान्तु वो जलदश्यामा शार्ङ्गज्याघातकर्कशा ।
त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिबाहव ॥"

अत्र त्रैलोक्यस्य मण्डपत्वारोपो हरिबाहूना स्तम्भत्वारोपे निमित्तम्॥ (ग)

मालारूप यथा—

"मनोजराजस्य सितातपत्र
श्रीखण्डचित्र हरिदङ्गनाया ।
विराजति व्योमसर सरोज
कर्पूरपूरप्रभमिन्दुबिम्बम् ॥"

अत्र मनोजादे राजत्वाद्यारोपश्चन्द्रबिम्बस्य सितातपत्रत्वाद्यारोपे निमित्तम्। एषु च राजभुजादीना राहुत्वाद्यारोपो राजमण्डलादीनां चन्द्रमण्डलत्वाद्यारोपे

हे प्रभो इत्यत्र राज्ञि हंसाद्यारोपमुख्यरूपकाएयनेकानि प्रत्येक तत्साधकानि मनआदौ मानससरोवरादिरूपकाएयनेकानि । प्रकृते अपि राज्ञि दिनाधीशाद्यनेकरूपकसाधकानि लक्ष्म्यादीनामुदयादौ पद्मजोदयादिरूपकाणीति ।

केवलश्लिष्टपरम्परितरूपकोदाहरण तु काव्यप्रकाशकृता दत्त यथा—

"अलौकिकमहालोकप्रकाशितजगत्त्रय !
स्तूयते देव ! सद्वशमुक्तारत्न न कैर्भवान् ॥"

इति । अस्यार्थ—हे देव ! सद्वश सत्कुलमेव सद्वश सद्वेणु तत्र मुक्तारत्न भवान् कैर्न स्तूयते ? वशे मुक्तोत्पत्ते । राज्ञ सम्बोधनान्तरमाह—**अलौकिके**-ति । अलौकिकोऽन्यलोकविलक्षणो यो महालोको महादृष्टिपात स एव महालोको महाज्योतिस्तेन प्रकाशित जगत्त्रयम् अर्थात् मुक्तामण्डित येन हे तादृश ! अत्र हि राज्ञि मुक्तारोपो मुख्यरूपक तत्साधक कुले वेणवारोपणम् । दृष्टिपाते ज्योतिरारोपण च ज्योतिरभावे मुक्तोत्कर्षाभावात् ।

(वि, ग) अश्लिष्ट केवलमाह—**पान्तु वो जलदश्यामा** इति । चत्वारो हरिबाहवो व पान्तु । कीदृशा ? त्रैलोक्यमेव मण्डपस्तस्य स्तम्भा, धारकत्वात् । तथा शार्ङ्गस्य धनुषो व्याघातेन कर्कशा । **स्तम्भत्वारोपे निमित्तमिति** । त्रैलोक्ये स्तम्भानन्वयात् ।

(वि, घ) मालारूप यथेति—अश्लिष्टशब्दनिबन्धनमिति शेष । **मनो-जराजस्येति** । कर्पूरपूरप्रभमिन्दुबिम्ब विराजति । तत्र परम्परितरूपकनिमित्तकानि रूपकान्तराएयाह—**मनोजेति** । मनोज एव राजा तस्य सितातपत्रम् । हरिद्रूपाया अङ्गनाया श्रीखण्डस्य, चन्दनस्य चित्रम् । व्योमरूपस्य सरस. सरोजम् । एषु चतुर्षु

निमित्तमिति केचित् । (घ, ङ) ⊛

अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत् ।
समस्तवस्तुविषयमेकदेशविवर्ति च ॥ ४४ ॥ * (ङ, ङ)

तत्र—

आरोप्याणामशेषाणां शाब्दत्वे प्रथमं मतम् ॥ ४५ ॥ (ल)

प्रथमं समस्तवस्तुविषय यथा—

"रावणावग्रहक्लान्तमिति वागमृतेन स ।
अभिषिच्य मरुच्छस्य कृष्णमेघस्तिरोदधे ॥"

अत्र कृष्णस्य मेघत्वारोपे वागादीनाममृतत्वाद्यारोपितम् । (च, ए)

रूपकयोर्निमित्तनिमित्तिभाव उक्तविपरीत एवेति केषाञ्चिन्मत दर्शयति—एष्विति ।

(वि, ङ) द्विविध साङ्गरूपकमाह–अङ्गिन इति । साङ्गस्य सधर्मस्य । यो रूप्यते तस्य धर्मा अपि यदि रूप्यन्ते तदा साङ्गमित्यर्थ ।

(वि, च) रावणावग्रह इति । रावणरूपेणाऽवग्रहेण वृष्टिविघातेन क्लान्तं मरुद्रूप शस्य वाग्रूपामृतेन स कृष्णो विष्णुर्मेघो शस्यमभिषिच्य अभिषिच्य तिरोदधे । अन्योऽपि रूप्यमाणो मेघोऽङ्गी । तस्य धर्मो जल वाचि रूपितम् । एव स्वजलसिच्यमानत्वसम्बन्धेन शस्यमप्यङ्गम् । मरुत्तु तद्रूपितम् । तदाह–अत्रेति ।

(लो, ङ) केचिन्नतु वयमिति भाव । एतच्चात्रैव स्फोरयिष्यति ।

(लो, ङ) साङ्गस्य सोपकरणस्य ।

(लो, ल) अशेषाणामङ्गतदुपकरणानाम् । शाब्दत्वे शब्देनाभिधेयत्वे ।

(लो, ए) वागादीनां कृष्णोपकरणानाममृतत्वादीति मेघोपकरणम् । इह च रूपितरूपणम् । यदाहु —

("मुखपङ्कजरङ्गेऽस्मिन् भ्रूलतानर्त्तकी तव ।
लीलामृत्य करोतीति रम्य रूपितरूपणम् ॥" इति ॥)

इह हि मुखे पङ्कजत्वरूपणानन्तर पुना रङ्गत्वरूपणम् । एव भ्रूलतानर्त्तकीत्यत्रापि ज्ञेयम् ।

⊛ रूप्यकस्य मतमिदम् । यथा—'त्वमेव हस इत्याद्यारोपणपूर्वक मानसमेव मानसमित्याद्यारोप '(अलङ्कारसर्वस्वे)। तत्र समुद्रबन्धव्याख्याने 'ज्ञप्त्यपेक्षया हसत्वारोप' मानसत्वारोपे निमित्त प्रवनो मद्गुक्तस्य उत्तरत्वापेक्षया मानसत्वाद्यारोप हसत्वाद्यारोपे निमित्त. यदुत. काव्यप्रकाशकारस्य. च. न. विरोध. ।'

* एकदेश आरोप्यविषयाणामर्थानां तदात्मक एवारोप्यमाणप्रयोजनप्रतिपादनाय तद्रूपतया विवर्तते परिणमति यत्र तत्तथोक्तम् ।

यत्र कस्यचिदार्थत्वमेकदेशविवर्ति तत् ॥ ४६ ॥ (ऐ)

कस्यचिदारोप्यमाणस्य । यथा—

"लावण्यमधुभि पूर्णमास्यमस्या विकस्वरम् ।
लोकलोचनरोलम्बकदम्बै कैर्न पीयते ॥"

अत्र लावण्यादौ मध्वाद्यारोप शाब्दो मुखे पद्माद्यारोप आर्थ । न चेय-मेकदेशविवर्तिन्युपमा विकस्वरत्वधर्मस्यारोप्यमाणे पद्मे मुख्यतया वर्त्तना-न्मुखे चोपचरितत्वात् । (छ, ओ)

निरङ्गं केवलस्यैव रूपणं तदपि द्विधा ।
मालाकेवलरूपत्वात् ॥ ४७ ॥ (औ)

तत्र मालारूप निरङ्ग यथा—

"निर्माणकौशल धातुश्चन्द्रिका लोकचक्षुषाम् ।

(वि, छ) एकदेशविवर्तिरूपकमाह—यस्य कस्येति । कस्यचिद्रूप्य माणस्येति । क्वचिदङ्गिन क्वचिदङ्गस्य तथात्व बोध्यम् । तत्राङ्गिन आर्थत्वमाह—लावण्येति । लावण्यरूपैर्मधुभि पूर्ण विकस्वर चास्या आस्य लोकलोचनरूपाणा रोलम्बाना भ्रमराणा कदम्बै कैर्न पीयते । मुखे पद्माद्यारोप इति । मधुपूर्णता भ्रमरनिपीयमानता अत्राङ्गम् । रूप्यमाणम् पद्मादिकम् अत्राऽङ्गि । क्वचिदङ्गरूप्यमेवऽऽर्थ । यथा—"गुणसिन्धुर्भवानिति ।" अत्राङ्गिन सिन्धोर्धर्मा जल गुणे आरोप्यमाणमार्थम् । नेत्येत्यादि लावण्य मधु इव इत्याद्युपमानसम्भवात् तद्वशेन मुखेऽपि पद्मोपमाप्रतीते इत्याशङ्क्याथ । विकस्वरेत्याद्युत्तरम् । विकस्वरत्व पुष्पधर्म एवेत्यतस्तद्धर्मणि पुष्पे एव मुख्यतया साक्षात् सम्बन्धेन वर्त्तमानत्वात् इत्यर्थ । मुखे चेति पद्मतुल्ये मुखे स्वाश्र-यसादृश्यसम्बन्धनैव परम्परासम्बन्धरूपादुपचारादित्यर्थ ।

(वि, ज) निर्माणकौशलमिति । अत्र सारोपा लक्षणा । तत्कौशलजन्या

(लो, ऐ) आर्थत्वमर्थगम्यत्वम् । एकदेशे विशेषेण शाब्दतया स्फुरत्वेन वर्त्तितु शीलमस्य रूपकस्येकदेशविवर्ति ।

(लो, ओ) मुख्यतया वर्त्तनाद् इति । मुख्यतया विधेयतया । अयमा शय । अत्र हि विषयस्यास्य रूपमवच्छाद्य, विषयिण पद्मरूपेण रूपवत्तापादने तस्य विकस्वराख्यधर्मपरिग्रह साधक प्रमाणम् । एतच्च सकरनिरूपणप्रस्तावे सुव्यक्त भवि ष्यतीति नेह तन्यते ।

(लो, औ) केवलस्य सहयोगान्तररूपणासयुक्तस्य । मालाकेवलरूपत्व पूर्वोक्त-वद् व्याख्येयम् ।

(लो, अ) निर्माणेति—अनेकस्यामिन्दीवरेक्षणायामनेकवस्त्वारोपात् निर वयवविमाला ।

क्रीडागृहमनङ्गस्य सेयमिन्दीवरेक्षणा ॥" (ज, अ)

केवलं यथा—

"दासे कृतागसि [1]भवत्युचितः प्रभूणां
पादप्रहार इति सुन्दरि ! नात्र दूये ।
उद्यत्कठोरपुलकाङ्कुरकण्टकाभै-
र्यद्विध्यते[2] मृदु पदं ननु सा व्यथा मे ॥" (ङ, आ)

तेनाष्टौ रूपके भिदाः ॥ ४८ ॥ (ञ, इ)

चिरन्तनैरक्ता इति शेषः । क्वचित् परम्परितमप्येकदेशविवर्ति यथा—

"खड्ग. क्ष्मासौविदल्लः समिति विजयते मालवाखण्डलस्य ।" ×

अत्रार्थः क्ष्मायां महिपीत्वारोप. खड्गे सौविदल्लत्वारोपे निमित्तम् । अस्य

इत्यर्थः । नाऽत्राशे रूपकम् । चन्द्रिकाक्रीडागृहद्वयरूपणात्तु मालेत्यवधेयम् ।

(वि,ङ) दासे कृतागसीति । उद्यता कठोरपुलकाङ्कुररूपाणा कण्टकानामभै-रित्यन्वयः । अत्र पुलकाङ्कुरेषु कण्टकरूपणमात्रम् ।

(वि, ञ) तेनाष्टाविति । श्लिष्टाश्लिष्टावाचकभेदे द्विविधस्य परम्परितरूपकस्य मालाकेवलभेदाच्चातुर्विध्यम् । साङ्ग च समस्तवस्तुविषयत्वैकदेशविवर्तित्वाभ्या द्विविधम् । निरङ्गं च केवलमालात्वाभ्या द्विविधमित्यष्टावित्यर्थः ।

(वि, ट) खड्गः क्ष्मेति—खड्ग एव स्त्रीत्वेनाऽऽरोपिताया क्ष्मायाः पृथिव्याः सौविदल्ल अन्तःपुरस्थनपुंसक । "सौविदल्लो महल्लिका" इति कोषः । अत्रेति । क्ष्मायाः स्त्रीत्वेनाऽऽरोपणं विना खड्गे सौविदल्लारोपस्यानुयोगेनानुपपत्तेः । उदाहरणं मृग्यमिति । यथा—

(लो, आ) दास इति । दासे, स्वाधीनजने, कृतागसि कृतापराधे, प्रभूणा सेव्यानाम् । अत्र प्रहारे न दूये नाभ्यसूयामि । भिद्यते विध्यते । अत्र केवलमिति निरवयवरूपं रूपकान्तररूपणं विना एकत्रैव निरूपणानिबन्धनात्, इहापि पुलकस्याङ्कुररूपणानन्तरं कण्टकत्वरूपणेन रूपितरूपणम् ।

(लो, इ) तेन तेन प्रकारेण अष्टौ, अन्यथा पुनर्वक्ष्यमाणा अपि भेदाः सम्भवन्तीत्याशयः ।

(लो, ई) सौविदल्लोऽवरोधाध्यक्षः । अत्रेति । अयमर्थः—अत्र क्ष्मायां महिषीत्वरूपणस्यार्थत्वाद् एकदेशविवर्तिरूपकं, तद्रूपणस्य च खड्गस्य सौविदल्लत्वरूपणहेतुत्वात् परम्परितमिति । इह च क्ष्मायां महिषीत्वरूपणं विना खड्गस्य सौविदल्लत्वरूपणं

× "पर्य्यङ्को राजलक्ष्म्या हरितमणिमयः पौरुषाभ्येत्तरङ्गः
भग्नप्रत्यर्थिवंशोन्मथनविजयकरिस्यानदानाम्बुपङ्कः ।

1 'भवेदु' (क. पु.) 2 'खिद्यते' (क. पु.)

भेदस्य पूर्ववन्मालारूपत्वेऽप्युदाहरण मृग्यम्। (ट, ई)

दृश्यन्ते क्वचिदारोप्या श्लिष्टाः साङ्गेऽपि रूपके॥ ४६ ॥ (ठ, उ)

तत्रैकदेशविवर्ति श्लिष्ट यथा मम—

"करमुदयमहीधरस्तनाग्रे गलिततम पटलाशुके निवेश्य।
विकसितकुमुदेक्षण विचुम्बत्ययममरेशदिशो मुख सुधाशु॥"

समस्तवस्तुविषय यथा—अत्रैव "विचुम्बति" इत्यादौ "चुचुम्बे हरिदबला

"प्रसूनबाणस्य सितातपत्रमैन्द्रया दिशश्चन्दनबिन्दुरिन्दु।
विराजते विष्णुपदारविन्द मयूखविस्तालितभूमिपीठम्॥" इति

अत्र हि प्रसूनबाणादे राजत्वाधारोप चन्द्रस्य सितातपत्राधारोपहेतु। यदि चैकस्य वाच्यस्य रूप्यस्य साधकान्यनेकान्यन्यानि रूपकाण्येव माला इत्यभिप्राय, तदा "राकाया नभसश्चन्द्र पुण्डरीक शशस्य च" इत्युदाहार्य्यम्। अत्र हि शशिनि रूप्यमाणे पुण्डरीके वाच्ये राकाया पदहस्तलक्ष्मीत्व गगनस्य सरोवरत्व शशस्य भ्रमरत्व चार्थसाधकम्।

(वि, ठ) **साङ्गेऽपि रूपके** इति। समस्तवस्तुविषयैकदेशविवर्त्तित्वेन द्विविधे साङ्गे इत्यर्थ।

(वि, ड) **करमुदयेति**। अय सुधाशु अमरेशदिश प्राच्या, मुख विचुम्बति। किं कृत्वा? उदयमहीधररूपस्य स्तनस्याग्रे कर रश्मिमेव कर पाणिं निधाय, स्तनाग्रे कादृशे गलित तम पटलरूपमशुक यत्र तादृशे। मुख कीदृश? विकसितकुमु-

---

नोपपद्यते। साक्षयवैकदेशविवर्त्तिनि तु वाक्यरूपण स्वयमनुपपन्नमेव। सामर्थ्यात्त्वन्यदाक्षिपतीति विवेक। मृग्य लक्ष्येष्वित्यर्थ। यथा—

("अस्ति स्वस्त्ययन श्रिय सुचरित द्राघीयस श्रेयस
सौन्दर्य्यस्य रसायन निरवधे शीलस्य लीलायितम्।
विद्यानामधिदैवत निरुपधे शौर्य्यस्य विस्फूर्जित
श्रीभानुस्त्रिकलिङ्गमङ्गलपद गङ्गान्वये भूपति॥")

अत्र श्रीप्रभृतीना प्राणिविशेषत्वरूपणम् आर्थं स्वस्त्ययनरूपणे हेतु।

(लो, उ) क्वचिदेकदेशे आरोप्या आरोपविषयवाचके पदे व्यञ्जकतया निर्दिष्टा

(लो, ऊ) कर किरण हस्त च। मुखमाद्यभाग, वदन च

सग्रामत्रासताम्य मुरलिपतियशोहसनीलाम्बुवाह
खड्ग क्ष्मासौविदल्ल समिति विजयते मालवाखण्डलस्य॥"

इति सम्पूर्णश्लोक। (अलङ्कारसूत्रम्।) सौविदल्ल—कञ्चुकी। "सौविदल्ला कञ्चुकिन स्यापत्या सौविदाश्च ते" इत्यमर। समिति—सङ्ग्रामे। मालवाखण्डलस्य—मालवेश्वरस्य।

मुखमिन्दुनायकेन" इति पाठे। (ङ, ऊ) नचात्र श्लिष्टपरम्परितम्। तत्र हि "भूभृदावलिदम्भोलि "इत्यादौ राजादौ पर्वतत्वादिरूपेण विना वर्णनीयस्य राजादेर्दम्भोलित्वादिरूपेण सर्वथैव सादृश्यासम्भवादसङ्गतम्।

तर्हि कथं "पद्मोदयदिनाधीश "इत्यादौ परम्परित, राजादे सूर्य्यादिना सादृश्यस्य तेजस्वितादिहेतुकस्य सम्भवादिति न वाच्यम्। तथाहि राजादेस्तेजस्वितादिहेतुकं सुष्यत्र सादृश्य नतु प्रकृते तद्विवक्षित, पद्मोदयादेरेव द्वयो साधारणधर्मतया विवक्षितत्वात्। इह तु महीधरादे स्तनादिना सादृश्य पीनोत्तुङ्गवादिना सुष्यत्रभेवेति न श्लिष्टपरम्परितम्। (ङ, ए)

दरूपमीक्षण यस्य तादृशम्। अत्रामरेशादिश नायिकात्व, सुधाशोर्नायकत्व चार्थम्। तयोर्धर्मौ स्तनदत्तहस्तविकशितनेत्रे शब्दौ। करपदञ्च श्लिष्टम्। द्वितीयस्योदाहरण स्पष्टम् "चुचुम्बे हरिदबलामुखमिन्दुनायकेन"इति पाठे।

(वि, ढ) नचात्रेति। श्लिष्टपदेन करूपणस्य स्तनरूपणसाधकत्वात्। समाधत्ते-**तत्र हि** इति। परम्परित यद् रूपक तदेव मुख्यरूपकसाधक नतु सादृश्य तत्साधकम्। यत्र तु सादृश्यादपि मुख्यरूपक सिद्धयति न तत्र परम्परितरूपकम्। तेन प्रकृते पर्वतसादृश्याद् उच्चत्वादेव स्तनरूपणमित्युक्तमनेन। ननु यदि सादृश्याऽसत्त्वे एव परम्परितरूपकं, तदा "पद्मोदय" इत्यादावव्याप्तिरित्याक्षिपति-**तर्हि** इति। अव्याप्तिमुपपादयति। **राजादेरिति**। नतु तद्विवक्षितमिति। यत्तु विवक्षित तदाह-**पद्मोदयादेरेवेति**। पद्मोदयादिरिलष्टपदस्यैव इत्यर्थ।

(लो, ए) करादिशब्दस्य श्लिष्टत्वेन श्लिष्टपरम्परितशङ्का निराकरोति—**नचेति**। राजादौ शासनवादिरूपे सुष्यत्वमित्यत पूर्वमस्त्वेवेति शेष। पद्मोदयेत्यादौ प्रद्योतत्तेजस्वितादिकमेव सादृश्यम्। पद्मोदयादेरिव सकलस्य पुरमित्यादावुपमाया सकलकलत्वस्येव इत्यर्थ। राजादिनाधीशयो प्रकृते योजयति-**इह त्विति**। इह करमुद यमहीधरस्तनाग्र इत्यादौ। तु पुनरर्थ। एव च "भ्रमिमरति" मित्यादौ विष जलमेव विषमित्यारोपो जलदे प्रसिद्धसादृश्यभुजगस्यारोपे निमित्तमिति श्लिष्टपरम्परितमेव। अत्र "विद्वन्मानसहस" इत्यादौ राजादौ हसत्वारोपो मानसे मानसत्वारोपे हेतुरिति मन्यमाना आहु -"नेह विषशब्दस्य द्वयर्थता "विद्वन्मानसहस" इत्यादाविव जलदे भुजगारोपहेतुका, किन्तु एतत्पद्यावस्थितवैद्यशास्त्रप्रसिद्धभ्रमादिमरणान्ताष्टविधगरल कार्य्यविशेषोत्थापितेति द्वयर्थतायास्तादात्म्यारोपेण विना प्रसिद्धेरिह श्लेषालङ्कार एवेति।" तदयुक्तम्। जलदे भुजगसादृश्यस्य सकलकल पुरमित्यादाविव विषशब्दस्य द्वयर्थता विनाऽनुपपत्ते। किञ्च जलदभुजगज विष जलमिति न घटते। जलदस्य भुजगताया अवास्तवत्वाद् भुजगाच्च जलबन्धानिबन्धनात्। तस्माद् विषमेव विषमिति रूपणमाक्षिप्यैव वाच्यरूपण सगच्छते। नच श्लेषमात्रेणास्तु वाच्यरूपणोपपत्तिरिति युक्त, श्लेषेण

तादात्म्याप्रतीते । श्लेषोपपादकनिश्चलितप्रतीतौ वाच्यरूपणासङ्गति, तादवस्थ्यात् । अन्यथा "विद्वन्मानसहंस" इत्यादावपि तथाप्रसङ्ग स्यात् ।

("आभाति ते क्षितिभृत क्षणदानिभेय
निस्त्रिंशमासलतमालवनान्तलेखा ।
इन्दुस्त्विषो युधि हठेन तवारिकीर्त्ति-
रानीय यत्र रमते तरुणप्रताप ॥")

इह एकदेशवर्त्तिनि रूपके क्षितिभृद् राजा एव क्षितिभृत् पर्वत इति श्लिष्टम् । तत्रालङ्कारिकचरिञ्जदासपण्डितादय राजनि पर्वतत्वारोपण निस्त्रिंशस्य तमालवनत्वारोपणे हेतुरिति श्लिष्टपरिम्परितमादियन्ते । तच्चिन्त्यम् । तथाहि क्षितिभृतो यद्यर्थतया 'विद्वन्मानसहंस'इत्यादौ मानसत्वादे राज्ञो हंसत्वादिरूपणानिमित्तमिव, निस्त्रिंशस्य तमालवनत्वरूपणोपयोगित्वम् । अपितु हठक्रमुक्तकार्य्येऽपीति प्रतापकीर्त्त्योर्नायिकनायिकान्योपकरणत्वाद् इह प्रकृतसूत्रोक्त श्लिष्टैकदेशरूप्य सावयवैकदेशवर्तिरूपकमेव भवितु युक्त, नतु श्लिष्टपरम्परितमिति मन्यामहे । किञ्च श्लिष्टपरम्परिते विद्वन्मानसहंसेत्यादौ राज्ञो हंसत्व मानसस्य मानसत्वारोपणसादृश्यं विनाऽसिद्धम् । इह तु निस्त्रिंशस्य तमालवनान्तत्व नीलिमादिनापि प्रसिद्धम् । किञ्च सावयवे रूपके क्वचिदेवैकस्य सादृश्यप्रसिद्धेरप्येकीभूयान्योन्यसाहाय्येन सादृश्यप्रतीति । यथा—रावणावग्रहेत्यादौ मरुदादीना शस्त्रत्वादेः । अपिच परम्परितस्यावयवरूपणाभावादेव सावयवान्त पानिता नोच्यते । केवल मानसादिपदेषु आक्षिप्यमाण सरोवरार्थरूप व्यावर्त्य हंसत्वादिसाधकमात्रम् । अतएवात्र क्षणदानिभेत्यस्यापि पदस्य रात्रिसालोक्षेपेण असि शेष भातीति तमसो बहुलीभावात् हठक्रमणोपयोगितेति प्राच्यानामपि व्याख्या । तदेव क्षितिभृत इत्यादि सर्वेषां रूप्यमाणाना हठक्रमणोपकरणत्वाद् यथोक्तमेव ज्याय ।

("श्यामालिलिङ्ग, मुखमाशुदिशां चुचुम्ब
रुद्धाम्बर शशिकलामलिनत् करा ।
अन्तर्निमग्नचरपुष्पशरोऽनिपाता-
न्किं किं चकार तरुणो नयदीक्षणापि ॥")

इत्यत्र नयनाभ्या तरुणत्वस्य प्रौढत्वरूपमर्थमादाय प्रथममभिधाया विश्रामाद् व्यक्तमेव मुख्योऽर्थ प्रतीयते । इह तु क्षितिभृत इत्यादौ बहुना रूपणात् प्रतापस्य तरुणत्वरूपण शक्यम् । इत्थ रमत इत्यादिपदानां रूपकसाधकत्वेव, नतु श्यामालिलिङ्गेत्यादावनिङ्गनादीनामव समासोक्तिसाधकता । अन्यथा सर्वत्रैव एकदेशविवर्त्तिरूपकेषु समासोक्तिप्रसङ्ग स्यात् । हठक्रमणाय रमत इत्यत्र कार्य्यसाम्येऽपि न समासोक्ति । यदि हि कार्य्यसाम्य वा समक्षिप्य समासोक्तिरङ्गीक्रियते तदेकदेशविवर्त्तिरूपकस्य विषयविभाग एव स्यात्, तस्मान्नेवविधस्य तदवस्थत्वादिति ।

यत्र वक्ता रूपं नास्ति

क्वचित्तु समासाऽभावेपि रूपकं दृश्यते । यथा—

"मुखं तव कुरङ्गाक्षि ! सरोजमिति नान्यथा" ।

[1]क्वचिद्वैयधिकरण्येऽपि । यथा—

"विदधे मधुपश्रेणीमिह भ्रूलतया विधिः" । (ण, ऐ)

क्वचिद् वैधर्म्येऽपि यथा—

"सौजन्याम्बुमरस्थली सुचरितालेख्यद्युभित्तिर्गुण-
ज्योत्स्नाकृष्णचतुर्दशी सरलतायोगश्वपुच्छच्छटा ।

(वि, ण) उक्तरूपकाणामेवान्तरविशेषान् प्रपञ्चयति—क्वचित्त्विति । "राजमण्डलराहवे" इत्यादिषु सर्वत्र समास एव तस्य दर्शितत्वात् । मुखं तवेति । स्पष्टम् । वैयधिकरण्ये विभिन्नविभक्तिकत्वे । विदधे इति । तथा चात्र भ्रूलतया हेतुना मधुपश्रेणीं विधिर्विदधे इत्यर्थः । भ्रूलता विधातुं मधुपश्रेणीं विदधे इति पर्य्यवसितोऽर्थ । इच्छाद्वारा भ्रूलतायास्तद्विधानहेतुत्वात् ।

(वि, त) क्वचिद् वैधर्म्येऽपि इति । अत्र रूप्यरूपकयोर्विरुद्धधर्मो नाऽर्थः । किन्तु निर्दिष्टं यत्साधर्म्यं तदभाववत्त्वमेवात्र वैधर्म्यम् । सौजन्याम्बिति । अत्र कलियुगे यैर्दुराशया एषा राजावली नृपश्रेणी सेविता भक्तिमात्रसुलभे शूलिनि तेषा सेवा कियत् कौशलम् । राजावली कीदृशी? सौजन्यरूपस्याम्बुनो मरुस्थली । अत्राभिन्नत्वेन निर्दिष्टयोः सौजन्याम्बुनोरुभयधर्मता इति । तयोरभावत्वमेव द्वयोर्मरुराजावल्योर्यथोक्तं वैधर्म्यम् । एवमुत्तरोत्तरं बोध्यम् । सुचरितरूपं यदालेख्यं वस्तु, तस्य द्युरूपा गगनरूपा

द्यामालिलिङ्गेत्यादि समासोक्त्युदाहरणवत् कार्य्यसाम्यबाहुल्यसम्वलितत्वम्, तत्रैव सामग्र्यभावादप्रस्तुतनायिकातादात्म्यं प्रतीयते । आभातीत्यादौ च वाच्यरूपणाना बहुत्वेन कार्य्यादिसाम्यं स्वल्पतया तत्साहाय्यमेवाचरति इति । अरिकीर्त्यादेस्तादात्म्यप्रतीतिहेतुत्वं सहृदयानुभवसिद्धं नतु व्यवहारसमारोपजीविता समासोक्तिः । अनयोश्च समासोक्त्येकदेशविवर्तिरूपकयोरपरमपि युक्तिजातमिहैव समासोक्तिप्रस्तावे सुव्यक्तं भविष्यतीत्यल बहुना ।

(लो,ऐ)समासाभावेऽपि रूपकमुदाहृतमपि स्पष्टप्रतिपत्तये पुनरुदाहरति-मुखमिति। विदध इत्यादौ तव भ्रूलता मधुपश्रेणी इत्यर्थः ।

(लो,औ) वैधर्म्येण, वैपरीत्येन, समानधर्मरूपताऽनापन्नेन। सरलता, सन्मार्गता, वक्रताविरहश्च । अत्र वैधर्म्येण परम्परितरूपकम् ।

---

[1] क. पुस्तके तु, "क्वचिद्वैयधिकरण्येपि यथा—" इत्यनन्तरम्, "सौजन्याम्बुमरुस्थली—"इत्यादि पद्यमुदाहृतम् । "क्वचिद् वैधर्म्येपि यथा—" इत्यंशो नास्ति ।

यैरेषापि दुराशया कलियुगे राजावली सेविता
तेषा [1]शूलिनि भक्तिमात्रसुलभे सेवा कियत्कौशलम् ॥"
(त, श्री) +

अत्र च केषाञ्चिद् रूपकाणा शब्दश्लेषमूलत्वेपि रूपकविशेषत्वादर्थालङ्कार-मध्ये गणनम्। एव वक्ष्यमाणालङ्कारेषु बोद्धव्यम्। (औ)

अधिकारूढवैशिष्ट्यं रूपक यत्तदेव तत् ॥ ५० ॥

तदेवाधिकारूढवैशिष्ट्यसज्ञरूपकम्। यथा मम—

"इद वक्त्र साक्षाद्विरहितकलङ्क शशधर
सुधाधाराधारास्रिरपरिणत बिम्बमधर ।

भित्तिराश्रय । गुणरूपाया ज्योत्स्नाया कृष्णचतुर्दशी । सरलतायोगश्वपुच्छच्छग । अत्र छटापद स्वरूपार्थकम्। तथा सरलताया योगस्य सम्बन्धस्य कुक्कुरपुच्छ-स्वरूपेत्यर्थ । सर्वत्र निर्दिष्टधर्माभावो बोध्य ।

(वि, थ) रूपकान्तरमाह—**अधिकेति** । रूप्यमाणेन व्यक्तिविशेषेणाऽपर-प्रसिद्धतत्सजातीयतोऽधिकमारूढ वैशिष्ट्य तदित्यर्थ । तदेव तन्नामकमेव । **इदं वक्त्रमिति** । कलङ्कविरहो वैशिष्ट्य रूप्यमाणशशधरव्यक्तिविशेषेण आरूढम्।

(लो, औ) ननु पद्मोदयेत्यादौ परम्परितादे शब्दान्वयव्यतिरेकानुविधा-यित्वात्कथ वाऽर्थालङ्कारमध्ये गणनमित्यत आह—**अनेति**। शब्दश्लेषमूलत्वेऽपि शब्दद्वयर्थताया शब्दान्वयव्यतिरेकानुविधानप्रयोजकत्वादुक्तरीत्या यद्यपि शब्दालङ्कार-तैवोचितेति भाव । वक्ष्यमाणालङ्कारा विरोधादय । वक्ष्यमाण इत्युपलक्षणम्। तेन उक्तया शब्दसाधारणधर्मायामुपमायामपि ज्ञेयमिति शेष ।

(लो, अ) अधिकारूढ वैशिष्ट्य विशेष अर्थादारोप्यमाणादारोपविषयस्य यत्रेत्यर्थ । अवगाहे सुखतर इत्यत्र लवणोदधिर्मकरतरङ्गलवणादिसद्भावादवगाहकाना सुखावहो न भवतीत्याशय । अधिक वैशिष्ट्यमर्थात् सुखादे । ग्रन्थानान्तरे चेदमेक-गुणहानौ विशेषोक्तिरिति ।

+ सौजन्य सुजनता एव अम्बु जल तस्य मरुस्थली निर्जलदेश । यथा निर्जलदेशे जल नास्ति तथा राजनि सौजन्य नास्तीति वैधर्म्यमित्यर्थ । सुचरित शोभनचरितमेव आलेख्य तस्य युभित्तिराकाशइत्यम्। आकाशे यथा चित्र नैव सम्भ-वति तथा राजनि सुचरित न दृश्यते इति भाव । गुणा एव ज्योत्स्नाश्चन्द्रिका तासु कृष्णचतुर्दशी चन्द्रक्षयविशिष्टामावास्या। यथा चन्द्रक्षये चन्द्रिकाया अभावस्तथा राजनु गुणानामभावो दृश्यते इति भाव । सरलता अकुटिलता तस्या योग सम्बन्धे

1 'शार्ङ्गिणि' (~ ~)

इमे नेत्रे रात्रिन्दिवमधिकशोभे कुवलये
तनुर्लावण्यानां जलधिरवगाहे सुखतरः ॥" (थ, अ)

अत्र कलङ्करहित्यादिनाधिक वैशिष्ट्यम्। †

विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि।
परिणामो भवेत्तुल्यातुल्याधिकरणो द्विधा ॥ ५१ ॥ (द, आ)

एवमुत्तरत्र सुधाधारायां आधारोऽधरधिरकालस्थमेव परिणत पक्व बिम्बम्। अत्र पक्वस्य चिरकालस्थितिर्वैशिष्ट्यम्। परार्द्धं स्पष्टम्। एव च—

"असम्भृत मण्डनमङ्गयष्टेरनासवाख्य करण मदस्य।
कामस्य पुष्पव्यतिरिक्तमस्त्र बाल्यात्पर साऽथ वय प्रपेदे ॥"

इत्यत्रायमप्यलङ्कारो मालारूपो बोध्य। असम्भृतत्वानासवाख्यत्वपुष्पाभिन्नत्व-रूपवैशिष्ट्यारोहणात्।

(वि, द) परिणामालङ्कारमाह—**विषयात्मतये**ति। विषयो रूपणाधिकरण, प्रकृतार्थोपयोगिन्यनुष्ठीयमानार्थोपयोगिनि आरोप्ये, आरोप्यस्य परिणाम इत्यर्थ। **तुल्यातुल्ये**ति। अभिन्नाभिन्नविभेक्लेक इत्यर्थ।

("असम्भृत मण्डनमङ्गयष्टेरनासवाख्य करण मदस्य।
कामस्य पुष्पव्यतिरिक्तमस्त्र बाल्यात्पर साथ वय प्रपेदे ॥"

इहाऽसम्भृत मण्डनमित्यत्र केचिदाहुर्विभावनारूयोऽलङ्कार इति, तन्न। न खलु सम्भरणपुष्पे मण्डनाङ्गयो कारणे, किन्तु तत्स्वरूपे। अन्ये त्वाहु, परिणामोऽयमिति। तदप्यसत्, तत्कार्य्यस्य शरीर-शोभाकरणस्य मदनोद्दीपनस्य च प्रस्तुतत्वेन केनचिद् अनुमन्धीयमान-त्वाभावात्। राघवानन्दमहापात्रास्त्वाहु—अधिकारूढवैशिष्ट्य रूपकमिदमिति। तदपि चिन्त्यम्। आरोपविषयस्यारोप्यमाणात् केनचिदंशेन वैशिष्ट्यस्यैतत्प्रयोजकत्वात् तत्स्वरूपत्वम्। तेनात्र 'अय राजा अपर पाकशासन' 'अन्यदेवाङ्गलावण्यम्' इत्यादि-वद् अतिशयोक्तिरेव भवितु युक्तेति मामक पक्ष। अध्यवसायस्य स्फीततयानुभूय-मानत्वात्। रूपकस्य च आरोपमूलत्वात्।)

(लो, आ) विषय आरोपविषय, तदात्मतया, तद्रूपतया नतु रूपकवत् तदुप-रञ्जकत्वमात्रेण। एव चास्य विषयात्मत्वेन, प्रकृते कार्य्योपयोगित्वेन रूपकाद् व्यव-

---

रवपुच्छच्छटा कुक्कुरलाङ्गलस्वरूपा। कुक्कुरलाङ्गलवत् सरलतायोगो नास्तीत्यर्थ। एतच्चतुष्टय राजावलीविशेषणम्। यैर्जनैरेषा राजावली कलियुगे दुराशया सेविता तेषा भक्तिमानसुलभे शूलिनि शिवे सेवा कियत् कौशलम्? राजसेवापेक्षया शिवसेवा सुकरा इति भाव।

† चन्द्रे कलङ्क, बिम्बस्य क्षणपक्वता अमृताभावश्च कुवलये रात्रावेव शोभा, जलधौ दुरवगाहत्वम्। परमुपमेयेषु नैषामभावादधिक वैशिष्ट्यमित्यर्थ।

आरोप्यमाणस्यारोपविषयातया परिणमनात्परिणाम । (इ)
यथा—

"स्मितेनोपायन दूरादागतस्य कृत मम ।
स्तनोपपीडमाश्लेष कृतो द्यूते पणस्तया ॥" *

अन्यत्र उपायनपणौ वसनाभरणादिभावेनोपयुज्येते, अत्र तु नायकसम्भावनद्यूतयो स्मिताश्लेषरूपतया । (ध) अत्र प्रथमार्द्धे वैयधिकरण्येन प्रयोग । द्वितीये सामानाधिकरण्येन । रूपके "मुखचन्द्र पश्यामि" इत्यादौ आरोप्यमाणचन्द्रादेरुपरञ्जकतामात्रम्, नतु प्रकृते दर्शनादावुपयोग । इह तु उपायनादेर्विषयेण तादात्म्य प्रकृते च नायकसम्भावनादावुपयोग । अतएव रूप-

---

(वि, ध) स्मितेनेति । अत्राभेदे तृतीया । अत्र स्मिते आरोप्यमाणमुपायन वास्तवस्मिततयैव परिणत, तच्चानुष्ठीयमानसम्भावनोपयोगि । स्तनोपपीडमिति । स्तनावुपपीड्याऽऽश्लेष इत्यर्थ । अत्राऽऽश्लेषे आरोप्यमाण पणो वास्तवाश्लेषतयैव परिणत अनुष्ठीयमानद्यूतोपयोगी । उभयत्राऽनुष्ठीयमानार्थोपयोग दर्शयति—अन्यत्रेति । सम्भावनद्यूतयोरित्यनोपयुज्येते इत्यस्यान्वय । आरोप्यमाणयोरुपायनपणयो स्मिताश्लेषरूपतयेत्यत्र परिणाम इति शेष ।

(वि, न) रूपके आरोप्यमाणस्यानुष्ठीयमानार्थोपयोगो नास्तीति दर्शयति—रूपके इति। उपरञ्जकत्वमात्र शोभाबोधकत्वमात्रम्। नत्विति। उपयोगो निर्वाहकत्व चन्द्रेण दर्शनाऽनिर्वाहात्। प्रकृते तु निर्वाहकत्वमस्त्येवेत्याह। इह त्विति। तादात्म्यमिति यत्र उपयुज्यते इति शेष । तादात्म्यस्योपयोगप्रदर्शन परिणामत उपायनादेरेवोपयोगप्रद-

---

च्छेद । रूपके विद्यमानाया अपि तादात्म्यप्रतीतेर्न पर्य्यन्त गन्तुमाकाङ्क्षा इत्याशय । परिणामालङ्कारस्य तथाभूतो रूप्यमाणो विषय यद् एतद्विशेषस्मर परिणाम नाम निर्वक्ति।

(लो, इ) आरोप्यति—परिणमनस्थानानिवेशेन तद्रूपतापत्ते । नतु सतो धर्मिणो वै पूर्वरूपपरित्यागेन रूपान्तरापत्तेरिति भाव ।

(लो, ई) कविनिबन्धाद्यर्थतादात्म्येऽप्यारोपस्यैव रूपकप्रयोजकत्वादित्यवच्छेदकत्वमात्रेण । उपरञ्जकत्वमात्र चारुत्वातिशयप्रकल्पनमात्रम्। तुरवार्थ । तादात्म्य तत्र निवेश स्मितादे उपायनत्वमस्ति तद्विशेषकत्वात् । मुखादेश्चन्द्रादित्व न तथेति भाव ।

---

* स्मितेनेति । आगताय उपढौकन दीयते, नायकागमने तया स्मित कृतम् इति स्मितस्य उपायनत्वेन परिणमनम् । अत्र भिन्नविभक्तिकत्वाद् वैयधिकरण्यम् । स्तनोपपीड स्तनावुपपीड्य आश्लेष आलिङ्गन द्यूतविषये पण शुल्क कृतम् । मया चेद् जेष्यसे त्व स्तनोपपीडमाश्लेष दास्यसीति सङ्केत । अत्र एकविभक्तिकत्वात् सामान्याधिकरण्यम् ।

के आरोप्यस्यावच्छेदकत्वमग्रेणान्वयः। अत्र तु तादात्म्येन। (न, ई)

"दासे कृतागसि" इत्यादौ रूपकमेव ननु परिणामः। आरोप्यमाणकण्टकस्य पादभेदकार्य्यस्याप्रस्तुतत्वात्। न खलु तत्कस्यचिदपि प्रस्तुतकार्य्यस्य घटनार्थमनुसन्धीयते। (प) +

र्शनपर्य्यवसन्नं बोध्यम्। उपायेन सम्भावनस्य पणेन द्यूतस्य च निर्वाहात्। तदेव विशदयित्वा दर्शयति—**प्रकृते चेति**। उपयोगः सम्भावनद्यूतयोर्निर्वाहकत्वेनोपायनपणयोः स्मितारलेषाभेदेनान्वय इत्यर्थः। स चान्वयोऽनारोपित इत्यतो निर्वाहकता। आरोपे तु न निर्वाहकतेत्याह—**अतएवेति**। अनारोपे सत्येव निर्वाहकत्वादेवेत्यर्थः। अवच्छेदकत्वेन अवास्तवत्वेन। प्रकृते तु वास्तवत्वेन इत्याह—**अत्र चेति**। तादात्म्यं वास्तवोऽभेदः।

(वि, प) दासे कृतागसीत्यादिश्लोकीयरूपके तु परिणामाप्रसक्तिं दर्शयति—**दासे** इति। नन्वत्र कथं रूपकमेवेत्युक्तं सूक्ष्माग्रत्वेन कठोरत्वेन च पुलकाङ्कुराणां कण्टकभेदस्य वास्तवत्वादेवेत्याह—**आरोप्यमाणेति**। पादभेदः कार्य्यं यस्य तादृशस्यारोप्यमाणकण्टकस्य पुलकरूपस्येत्यर्थः। अत्र यद्यपि पुलकस्य कण्टकारोपविषयत्वमेव कण्टकत्वेनारोप्यमाणत्वं तथापि पादभेदकार्य्यकत्वेऽनारोप्यमाणस्येत्यर्थः। तथाच तत्कार्य्यनिर्वाहकत्वं यतस्तस्यारोप्यमाणमतस्तस्य कण्टकत्वमपि न वास्तवम्। किन्तु आरोप्यमाणमेवेत्यतो रूपकमेवेत्यर्थः। ननु पादभेदकार्य्यनिर्वाहकत्वमेव पुलकाङ्कुराणामस्ति। तत्कथमवास्तवत्वमित्याह—**न खल्विति**। तत्पुलकाङ्कुराग्रं कस्यचिदपि—भेदो हि प्रस्तुतं कार्य्यम्। कस्यचिदपि पादीयभेदस्यान्यदीयभेदस्य वा कस्यचिद् घटनार्थमित्यर्थः। इत्थं रूपकाभिन्नतया परिणामः सिद्धः। एवम्—

"शिष्यता निधुवनोपदेशिनः शङ्करस्य रहसि प्रपन्नया।
शिक्षितं सुरतिनैपुणं तया यत्तदेव गुरुदक्षिणीकृतम्॥"

इत्यत्रापि गुरुदक्षिणायाः सुरतिनैपुण्येन परिणामात् परिणामालङ्कार एवेति बोध्यम्।

+ एकावल्यामयं "दासे कृतागसि" श्लोकः परिणामोदाहरणतया प्रदत्तः, तत्खण्डनार्थमाह—**अत्र रूपकमेवेति**। अप्रकृतस्य प्रकृतकार्य्यतयैव परिणमनं परिणामः। परं पुलकाङ्कुरे आरोप्यमाणस्य कण्टकस्य पादभेदनकार्य्यसाधकत्वं विद्यते। परं तत्कार्य्यं तु अत्र प्रस्तुतम्। मानिन्या मानभङ्गाय नायकानुनयस्यैव प्रस्तुतत्वात्। न खलु पादभेदनं प्रस्तुतकार्य्यस्य मानभङ्गस्य सम्पादनार्थमवगम्यते परं दुःसजनकत्वादनुनयप्रतिबन्धकमेव।

अयमपि रूपकादधिकारूढवैशिष्ट्यो दृश्यते । यथा—

"वनेचराणां वनितासखाना
दरीगृहोत्सङ्गनिषण्णभास ।
भवन्ति यत्रौषधयो रजन्या-
मतैलपूरा सुरतप्रदीपा ॥"

अत्र प्रदीपानामौषध्यात्मतया * प्रकृते सुरतोपयोगिन्यन्धकारनाशे उपयोगोऽतैलपूरत्वेनाधिकारूढवैशिष्ट्यम् । (फ)

सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः ।
शुद्धो निश्चयगर्भोऽसौ निश्चयान्त इति त्रिधा ॥ ५२ ॥ (ब, उ)

यत्र सशय एव पर्यवसान स शुद्ध । यथा—

"किं तारुण्यतरोरिय रसभरोद्भिन्ना नवा वल्लरी
वेलाप्रोच्छलितस्य किं लहरिका लावण्यवारानिधे ।

(वि, फ) वनेचराणामिति । यत्र हिमालये औषधय एव रजन्यां वनेचराणा वनितासखाना सुरतप्रदीपा भवन्ति इत्यन्वय । प्रदीपीभावे हेतुमाह—दरीगृहेति । अतैलपूरा तैलपूरणरहितास्तैलसमूहरहिता वा । अत्र प्रदीपीभावस्य प्रकृतार्थोपयोगित्व दर्शयति—अत्रेति । प्रकृते सुरतोपयोग्यन्धकारनाशे प्रदीपानामौषध्यात्मतया उपयोग इत्यन्वय । औषध्यात्मतया परिणामस्येत्यपि क्वचिच्छोभन पाठ । औषध्यात्मतया प्रकृत इति क्वचित्प्रामादिक पाठ । नच सुरतमेव शाब्दं प्रकृत नान्धकारनाश , तस्याऽशाब्दत्वादिति वाच्यम् ? सुरतोपयोगित्वेन तस्यापि प्रकृतत्वात् ।

(वि, ब) सन्देहालङ्कारमाह—सन्देह इति । प्रतिभया उत्थितोऽन्यस्याऽप्रस्तुतार्थकोटे प्रस्तुते वस्तुनि य सशय स सन्देहालङ्कार इत्यर्थ ।

(वि, भ) किं तारुण्येति । इयं नायिका किं लावण्यतरो नवा वल्लरी ! लावण्यरूपतर्वाश्रिता नवा लतेत्यर्थ । कीदृशी रसभरोद्भिन्ना शृङ्गाररस एव रसो

(लो, उ) सन्देह सन्देहाख्योऽलङ्कार । प्रकृते वर्ण्यमाने अन्यस्य आरोप्यमाणस्य । एव च प्रकृतसन्देहेऽप्रकृतमपि सन्दिह्यत एव । एव च प्रकृताप्रकृतविषयसशयज्ञान सन्देहालङ्कार इत्यर्थ । सशयश्च व्यवस्थानाद्यनेककोटिकज्ञानम् । एवच सशय इत्येतावतैव लक्षणे पर्याप्ते प्रकृते अन्यस्येति वचन "मध्य तव" इत्यादि प्रत्युदाहरिष्यमाणव्यवच्छेदार्थम् । प्रतिभोत्थित इति, प्रतिभा कवे , तया उत्थित आहत , एवच कविवर्णितस्यापि "स्थाणुर्वा पुरुषो वा" इति सशयस्य नालङ्कारता । एतदेव मूले स्फुटीभविष्यति । अप्रतिभोत्थापिन इत्यादिना ।

---

* परिणामस्येत्यधिक पाठ (क. पु)
प्रकृत इति पाठ (ख पु)

उद्गाढोत्कलिकावतां स्वसमयोपन्यासविश्रम्भिणः
किं साक्षादुपदेशयष्टिरथवा देवस्य शृङ्गारिणः ॥" (भ,ऊ)

यत्रादावन्ते च संशय एव मध्ये निश्चयः स निश्चयमध्यः। यथा—

"अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः
कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम्।
कृतान्तः किं साक्षान्महिषवहनोऽसाविति पुनः
समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः ॥" (ऋ)

अत्र मध्ये मार्तण्डाद्यभावनिश्चयो, राजनिश्चये द्वितीयसंशयोत्थानासम्भवात्।
(म) *

जलं तेनोद्विग्नो जलमेकेन लतोद्वेदात्। किंवा वेलया नीरेण प्रोच्छलितस्य उच्छलितस्य लावण्यरूपस्य वारानिधेः समुद्रस्य लहरिका तरङ्गः। "वेला स्यान्नीरतीरयोः" इति कोषः। किं वा शृङ्गारिणो देवस्य कन्दर्पस्य अर्थात् शृङ्गारार्थमुद्दामोत्कलिकावता गाढोत्कण्ठावता जनाना स्थाने उपदेशस्य अर्थात् शृङ्गारोपदेशस्य साक्षाद् यष्टिरालम्बनभूता यष्टिः। एनामालम्ब्य शृङ्गारोऽनुभूयतामित्युपदेशः। देवस्य कौदृशस्य स्वसमयस्य वसन्तस्य उपन्यासेन विश्रम्भिणो विश्वस्तस्य ममेदानीमुपदेशो योग्य इत्येवं विश्वासवत इत्यर्थः। असन्दिग्धानत्वमेव विश्वासः।

(वि,म) **मध्ये च निश्चय** इति। एककोटेर्व्यतिरेकनिश्चय इत्यर्थः। **अयमिति**। आजौ युद्धे त्वा समालोक्य प्रतिभटाः प्रतिकूलवीरा इत्येवं वितर्कान् विदधति कुर्वन्ति। तान् वितर्कान् आह—**अयमिति**। इतो गत। **सर्वा दिश** इति। कृशानुः सर्वा दिशो न प्रसरति। अयं तु सर्वदिक्प्रसारी, अतो न कृशानुरित्यर्थः। साक्षात् कृतान्त इत्यन्वयः। महिषवाहनत्वाभावान्न कृतान्त इत्यर्थः। अत्र मार्त्तण्डाद्यभावनिश्चयो मध्ये। ननु विरुद्धकोट्यभावनिश्चयाद्राजकोटिनिश्चयोऽपीत्यत आह—**राजत्व-निश्चय** इति।

(लो, ऊ) रस. तारुण्यपक्षे—भोगाभिलाषः, पक्षे सामान्यदत्व.। वेलालावण्यपक्षे-सामान्यमर्य्यादा, समुद्रपक्षे-तटम्। उच्छलितम् उत्सर्पणम् अतिक्रमः। उत्कलिका उत्कण्ठा। स्वसमयोपन्यासविश्रम्भिण स्वसम्मतार्थकथने विश्वासप्रवर्त्तकस्य साक्षाद् उपदेशयष्टेः, यष्टयाकारमूर्त्तिमत्त्वेन प्रत्यक्षमुद्देशः। यद्वा उपदेशार्थं यष्टेः, ताडनेत्रादिदण्डः। तथाहि—यस्याः कस्या अपि विद्याया उपदेष्टारः बालाना चपलचित्तनिवारणाय ताडनार्थं यष्टिमाददते इति लोकप्रसिद्धः।

(लो, ऋ) सर्वा दिशो न प्रसरति, किन्तूर्ध्वमेव ज्वलतीति प्रसिद्धम्।

---

* **अयमिति**—सप्ततुरगाभावान्न सूर्य्य इति मध्ये निश्चयः। 'वह्नेः ऊर्ध्वज्वलनस्वभावत्वात् सर्वदिक्प्रसरणाद् अग्नित्वाभावनिश्चयः, महिषवाहनत्वाभावाद्

पक्षादौ संशयोऽन्ते च निश्चयः स निश्चयान्तः । यथा—

"किं तावत् सरसि सरोजमेतदाराद्
आहोस्विन्मुखमवभासते तरुण्याः ।
संशय्य क्षणमिति निश्चिकाय कश्चिद्
विव्वोकैर्बकसहवासिनां परोक्षैः ॥" (य)

अप्रतिभोत्थिते तु "स्थाणुर्वा पुरुषो वा" इत्यादिसंशये नायमलङ्कारः । (ऋ)

"मध्यं तव सरोजाक्षि पयोधरभरार्दितम् ।
अस्ति नास्तीति सन्देहः कस्य चित्ते न भासते ॥"

अत्रातिशयोक्तिरेव । उपमेये उपमानसंशयस्यैवैतदलङ्कारविषयत्वात् । (ऋ, लृ)

साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थिता[1] ॥ ५३ ॥ (ए) +

(वि, य) किं तावदिति । नायिकायामपि सरस्त्वाशङ्का बोध्या । आराद् एतत् किमित्यर्थः । विव्वोकै "विव्वोकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादरः" इति । एवंलक्षणैः स्त्रीणां हावविशेषैरित्यर्थः । कीदृशं बकसहवासिना परोक्षै—बका हि मत्स्यनिश्चयार्थं ध्यायिनस्तत्सहवासिनस्ततः शिक्षितध्यानास्तेषामपि परोक्षै अप्रत्यक्षैः । अतिदुरूहत्वादत्यन्तध्यानेनैव ज्ञेयैरित्यर्थः ।

(वि, र) एवमसादृश्यमूलकाहार्य्यसंशयाऽन्तरेऽपि नायमलङ्कार इत्याह—मध्यं तवेति । सन्देहः कस्य चित्ते न भासते इत्यन्वयः । तत्रातिशयोक्तेः इति वक्ष्यमाणायाः पञ्चविधायाः अतिशयोक्तेर्भेदेऽप्यभेदारोपरूपप्रभेद एवात्रेत्यर्थः । नास्ति यः पदार्थः तदसत्त्वेऽपि तदभेदारोपरूपत्वात् । नन्वेव सन्देहालङ्कारेऽप्येवमारोपोऽस्त्येवेत्यत आह—उपमेयेति । तथाचानयोरलङ्कारयोः परस्परभेदो निवेशनीय इति भावः ।

(लो, ऋ) विव्वोको, भावविशेषः । यदुक्तमत्रैव "विव्वोकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादरः" इति । बकसहवासिना पक्षिणा परोक्षैरगोचरैः । अप्रतिभोत्थापिते इत्यनन्तरं काव्योपनिबद्धेऽपीति शेषः ।

(लो, लृ) अतिशयोक्तिरेवाध्यवसायमूलत्वात् ।

यमत्वाभावनिश्चयः । किन्तु राजेति निश्चयोऽयं न भवतीत्याह—राजनिश्चये इति । राजत्वनिश्चये अग्नित्वाभावनिश्चयाद् अग्नित्वप्रकारकज्ञानरूपसंशयस्यानुदयप्रसङ्ग इत्यर्थः । एवमुत्तरत्र ज्ञेयम् । द्वितीयपदमुपलक्षणम् ।

+ अतस्मिन्—तद्भाववति उपमेये, प्राकरणिके । साम्यात् सादृश्यात् ।

1 'प्रतिभोत्थितः' (क. पु.)

यथा—

"मुग्धा दुग्धधिया गवा विदधते कुम्भानधो बल्लवा
कर्णे कैरवशङ्कया कुवलय कुर्वन्ति कान्ता अपि।
कर्कन्धूफलमुच्चिनोति शबरी मुक्ताफलाकाङ्क्षया
सान्द्रा चन्द्रमसो न कस्य कुरुते चित्तभ्रम चन्द्रिका॥" (ल,ऐ)

[1]स्वरसोत्थापिता भ्रान्तिर्नायमलङ्कार। (ओ)

यथा—शुक्तिकाया रजतमिति। (औ)

नचासादृश्यमूला। यथा—

"सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्या।
सङ्गे सैव तथैका त्रिभुवनमपि तन्मय विरहे॥" (व, अ)

(वि, ल) भ्रान्तिमदलङ्कारमाह—**साम्यादि**ति। तद्बुद्धिस्तत्त्वेन बुद्धि। **मुग्धा** इति। चन्द्रमस सान्द्रा चन्द्रिका कस्य जनस्य चित्तविभ्रम न कुरुते इत्यर्थ। भ्रान्तान् दर्शयति—**मुग्धा** इति। बल्लवा गोपा मुग्धा भ्रान्ता सन्त दुग्धधिया गवामध कुम्भान् विदधते दुग्धमादातुमित्यर्थ। कैरवशङ्कया इत्यत्र शङ्काभ्रम एव। **कर्कान्धि**ति। बदरफलमित्यर्थ। आकाङ्क्षा चात्र भ्रममूलिका।

(वि, व) प्रतिभोत्थितेत्यस्य व्यावृत्तिमाह—**स्वरसे**ति। असादृश्यमूलकभ्रमेऽपि नायमलङ्कार इत्याह—**नचासादृश्ये**ति। **सङ्गमे**ति। सङ्गमविरहयो विकल्पे वरन्त्व-विचारे इत्यर्थ। वर मनागिष्टम्। न चात्रापि त्रिभुवने तत्सादृश्यभ्रमात्तद्भ्रम इति वाच्यम्। सादृश्यांशेऽभ्रमस्यैव विवक्षितत्वात्। तथाच सङ्गमाद् विरहस्याधिक्याद् व्यतिरेकालङ्कार एवायमिति भाव। एव च लोभादिना भ्रमेऽपि न भ्रान्तिमान्। यथा

(लो, ए) मिथ्याज्ञानसादृश्येन सन्देहानन्तरमस्य प्रस्ताव। भ्रान्तिश्चित्त-धर्मविशेषो विद्यते यत्र भ्रमप्रकारे स भ्रान्तिमान् इत्यन्वर्थनामालङ्कार।

(लो, ऐ) कर्कन्धूर्बदरी।

(लो, ओ) प्रतिभोत्थापितेति लक्षणपदस्य व्यावृत्तिं दर्शयति—**स्वरस** इति। स्वरस स्वभाव।

(लो, औ) शुक्तिकाया रजतभ्रान्तिरित्यर्थ। स्वरस इत्यत पूर्वं काव्येऽपीति शेष।

(लो, अ) साम्यादित्यस्य व्यावृत्तिर्नचेत्यादि।

तद्बुद्धि—तत्प्रकारकज्ञानमुपमानज्ञानम्।

रूपके—आहार्य्यज्ञानम् (बाधकालीनेच्छाजन्य ज्ञानम्)।

भ्रान्तिमति अनाहार्य्य ज्ञानमित्यनयोर्भेद।

1 'अस्वरसोत्थापिता' (क पु)

क्वचिद् भेदाद्ग्रहीतॄणां विषयाणां तथा क्वचित् ।
एकस्यानेकधोल्लेखो यः स उल्लेख उच्यते ॥ ५४ ॥ (श)

क्रमेणोदाहरणम्—

"प्रिय इति गोपवधूभिः शिशुरिति वृद्धैरधीश इति देवैः ।
नारायण इति भक्तैर्ब्रह्मेत्यग्राहि योगिभिर्देवः ॥" (प)

अत्रैकस्यापि भगवतस्तत्तद्गुणयोगादनेकधोल्लेखे गोपवधूप्रभृतीनां रुच्यादयो यथायोगं प्रयोजकाः । (स) यदाहुः—

"यथारुचि यथार्थित्वं यथाव्युत्पत्ति भिद्यते ।
आभासोऽप्यर्थ एकस्मिन्ननुसन्धानसाधितः ॥" (ह, आ)

"जगद्धनमयं लुब्धाः कामुकाः कामिनीमयम् ।
नारायणमयं धीराः पश्यन्ति परमार्थिनः ॥" इति ।

नचात्र धनभेदेऽपि धनाभेदारोपात्किमतिशयोक्तिरेवेति वाच्यम् । अतिशयोक्तिपटकस्य आरोपस्य आहार्य्यत्वे एव तथात्वात् । अत्र तु प्रथमे चिन्तारूपव्यभिचारिभावध्वनिः । द्वितीये रसध्वनिः । तृतीये भावध्वनिरेव ।

(वि, श) उल्लेखालङ्कारमाह—**क्वचिद्भेदादिति** । एकस्य वस्तुनोऽनेकधा अनेकत्वेनोल्लेखो बुद्धिविषयत्वमित्यर्थः । तादृशबुद्धेर्हेतुद्वयमाह—**क्वचिद्भेदादिति** । क्वचिज्ज्ञानाग्रहीतृणां तत्तद्रूपेणानेकत्वबुद्धिः । क्वचित्तु तादृशबुद्धिप्रयोजकधर्मरूपाणां विषयाणां भेदादेकस्यैव ग्रहीतुस्तथात्वबुद्धिविषयत्वमित्यर्थः । तेनास्य द्वैविध्यम् ।

(वि, प) **प्रिय इतीति** । देवैः श्रीकृष्णस्तैस्तै. सममित्यग्राहीत्यर्थः । तत्तद्देवाह—**प्रिय इत्यादि** । प्रिय. स्वामी । सागरशायिरूपनीरूपत्वेन भेदान्नारायणब्रह्मणोर्भेदः । "आपो हि नारः" तदयनः तत्स्थो नारायणः जलशायी इत्यर्थः ।

(वि, स) **तत्तद्गुणे इति** । तादृशबुद्धिप्रयोजकतत्तद्गुण इत्यर्थः । तत्र प्रिय इत्यत्र सौन्दर्यरूपः, शिशुरित्यत्र स्नेहविषयत्वम्, अधीश इत्यत्रैश्वर्य्यम्, नारायण इत्यत्र ध्यानोपयोगिमूर्त्तिमदभिन्नत्वम्, ब्रह्मेत्यत्र तद्व्याकृतस्वरूपाभिन्नत्वम् । रुच्यादयः प्रयोजका इति । तथाच तादृशरुचिमन्तो ग्रहीतारो भिन्ना इति दर्शितम् ।

(वि, ह) रुच्यादीनां तद्बुद्धिप्रयोजकत्वे संवादमाह—**यथारुचीति** । एकस्मिन्नर्थे अनुसन्धानेन मनोनिवेशेन साधित आभासः ज्ञानं बुद्धिरपि यथारुच्यादिभेदात् भिद्यत इत्यर्थः । 'रुचिरिच्छा, अर्थित्वं किञ्चित् प्राप्यर्थमिच्छारूपा । व्युत्पत्तिः संस्कारः ।

(लो, आ) व्युत्पत्तिरभ्यासकृता वासना, वा प्रतीति । अनुसन्धानं मनसस्तद्विषये प्रवणीकरणम् । तेन साधित विषयान्तरं व्यवच्छिद्य निर्वाहित. । एवं च प्रिय

अत्र भगवत प्रियत्वादीना वास्तवत्वाद् प्रहीतृभेदाश्च न मालारूपकं, न-च भ्रान्तिमान्। नचायमभेदे भेद इत्येवरूपातिशयोक्ति । तत्र[1] हि "अन्यदेवाङ्ग-लावण्यम्"इत्यादौ लावण्यादेर्विषयस्य पृथक्त्वेनाध्यवसानम् । नचेह भगवति गोपवधूप्रभृतिभि प्रियतान्यथाध्यवसीयते[2]। प्रियत्वादेर्भगवति तत्काले तात्त्वि-कत्वात् । (क, इ)

केचिदाहु –"अयमलङ्कारो नियमेना'वश्यम्भावेनालङ्कारान्तरविच्छित्तिमूल । उन्नोदाहरणे च शिशुत्वादीनां नियमाभिप्रायात्प्रियत्वादेर्भिन्नत्वाध्यवसाय

(वि, क) अत्र मालारूपकप्रशङ्कि निरस्यति—**अत्र भगवत** इति । वास्त-वत्वेन अहार्य्याभेदारोपात्मकरूपकाऽप्रसक्ति प्रहीतृभेदाश्च न तन्मालात्वप्रसक्ति, मालाया प्रहीतृभेदाविवक्षमाणादेव । यद्यपि वास्तवत्वेन रूपकाप्रसक्तौ मालारूपकप्रस क्तिरपि तत एव निरस्ता तथापि प्रहीतृभेदप्रदर्शन मालापरिणामप्रसक्तिवारणसूचनार्थम् । वास्तवत्वेन तत्प्रसक्तिसत्त्वेऽपि प्रहीतृभेदस्य तद्बाधकत्वादिति हेतु । अप्रसक्त-मप्यतिशयोक्तिप्रभेदविशेष वैशद्याय निरस्यति—**नचायमभेद** इति । तत्प्रभेदस्योदा-हरण प्रदर्श्यते । तत्प्रसक्तिर्नास्तीत्याह–**तत्र हीति** । तत्रातिशयोक्तिप्रभेदे पृथक्त्वेन तत्रैव तदन्यत्वेन । **नचेहेति** । इह प्रिय इत्यादुल्लेखोदाहरणे । **प्रियतान्यथेति** । प्रियतात अन्यथा इत्यर्थ । किन्तु प्रियत्वाद्यध्यवसीयते इति क्वचित् भ्रामादिक पाठ । स चाध्यवसीयत इत्यत्र निरस्यते इत्येव लक्षणया समर्थनीय । तात्त्विकत्वा-दित्यन्यत्वेनाऽबोधितत्वादित्यर्थ । तात्त्विकबुद्ध्या च नाहार्य्यारोपरूप रूपक चेत्युक्तम्।

(वि, ख) अलङ्कारान्तरसङ्करात् तद्भङ्गिमूल एव नियमेनायमलङ्कार इति केचिदाहु तद्दर्शयति—**केचिदिति** । विच्छित्तिर्भङ्ग । उन्नोदाहरणेषु ता विच्छित्तिं दर्शयति–**उन्नेति** । **नियमाभिप्रायादिति** । वृद्धैश्च शिशुरेवाऽग्राहि इत्येव नियमाभि-प्रायादित्यर्थ । अतिशयोक्तिरस्तीत्यत्रेऽन्वय । तथाच यूनि देवे शिशुभिश्चेऽपि

इत्यादौ भगवत प्रियत्वे गोपवधूना रुच्यादिनितयमपि प्रयोजकम् । शिशुत्वे च वृद्धाना व्युत्पत्ति । सच्चिदानन्दब्रह्मत्वे योगिना व्युत्पत्ति । एवमन्यत्र ।

(लो, इ) भगवतस्तत्काले तात्त्विकत्वाद् प्रहीतृभेदाश्चेति हेतोर्द्वयमपि माला-रूपकभ्रान्तिमतोर्द्वयोरपि विवेच्य । तात्त्विक वस्तुतस्तद्रूपताया सम्भवात् । तथा मालारूपकस्य कविनिबद्धाहार्य्यतादात्म्यारोप एव प्रयोजक । भ्रान्तिमतस्तु मिथ्या-ज्ञानमेव निदानम्। प्रहीतृभेदस्य च द्वयोरपि सम्भवेऽपि अपवादत्वेन उल्लेखाख्यभिन्ना-लङ्कारस्य न प्रयोजकत्वमिति भाव । नचाध्यवसीयते, किन्तु तत्त्वेनैवावसीयते । अध्यवसान विषयनिगरणेन विषयिणोरभेदप्रतिपत्ति ।

---

1 'तथा' (ग घ) 2 'प्रियत्वाद्यध्यवसीयते ।'
3 'अवश्यभावेन' इति नास्ति (ग घ)

इत्यतिशयोक्तिरस्ति । तत्सद्भावेऽपि च ग्रहीतृभेदेन नानात्वप्रतीतिरूपो विच्छित्तिविशेष उल्लेखाख्यभिन्नालङ्कारप्रयोजक । (घ)

श्रीकण्ठजनपदवर्णने "वज्रपञ्जरम् इति शरणागतै, [1]असुरविवरमिति वातिकै" इत्यादिश्चातिशयोक्तेर्विषयो विषय', इह च रूपकालङ्कारयोग ।" वस्तुतस्तु असुरविवरमित्यादौ भ्रान्तिमन्त' मेवेच्छन्ति न रूपकम्, भेदप्रतीति-

---

नियमत. शिशुभेदारोपाद् भेदेऽप्यभेदारोपारूपातिशयोक्तिर्दर्शिता । अत्र च नियमप्रदर्शन तेषा तथात्वेन भावनातिशयप्रदर्शनार्थमेव, नतु तस्यातिशयोक्तिघटनार्थतेति बोध्यम् । प्रिय इत्यादयोऽपि तमेवातिशयोक्तिं दर्शयति—प्रिय इत्यादीनामिति ।

अत्र च भेदेऽप्यभेदारोपरूपाया अतिशयोक्तेरेव सम्भव । तथा च भिन्नार्थाध्यवसाय इत्यत्र भिन्नत्वस्याध्यवसाय इत्यर्थः । कस्याध्यवसाय इत्यत्राह—प्रियत्वादीनामिति । तथा च अस्वामिनि देवे स्वामित्वारोप एव स्वाम्यभेदारोप इत्यर्थ । अत्रैव केचिदित्यनेनास्वरसस्सूचनम् । देव इत्यनेन आरोपविषयस्योक्तिगत्वे तु निगरणघटितस्यातिशयोक्तिसामान्यलक्षणस्यात्राभावात् । वक्ष्यमाणे 'श्रीकण्ठजनपदे' इत्यादौ तु नास्वरस इत्यवधेयम् ।

नन्वेवमतिशयोक्तिसत्त्वे स एवात्रालङ्कारोऽस्तु नोल्लेख इत्यत आह—तत्सद्भावेऽपीति । अतिशयोक्तिसत्त्वेऽपीत्यर्थ । प्रतीतिरूपविच्छित्तिविशेष उल्लेखाख्यस्यातिशयोक्तिभिन्नस्यालङ्कारस्य प्रयोजक इत्यर्थ ।

(घ, ग) अतिशयोक्त्यसङ्कीर्णोऽप्युल्लेखस्य विषयोऽस्तीति दर्शयति—श्रीकण्ठेति । श्रीकण्ठनामा राजविशेष तस्य नगर शरणागतै शत्रुतो भीतै वज्रपञ्जरमित्यबोधीत्यर्थ । स्वप्रविष्टरक्षकत्वेन वज्रपञ्जरसादृश्यादभेदारोपरूप रूपकमेवेत्यर्थ । ग्रहीतृभेदात् तत्सङ्कीर्ण उल्लेख । नचासम्बन्धे सम्बन्धारोपरूपातिशयोक्तिरेवेयमिति वाच्यम्, स्वसादृश्यमूलकत्व एव तदवसरात् । शिशुरित्यत्र तु तात्त्विकत्वादेव न रूपकमित्युक्तमेव । असुरविवरमितीति । वातिकैरुन्मत्तैरप्रकाशरूपसादृश्यबुद्धया विवर-

---

(लो, ई) अलङ्कारान्तरविच्छित्तिर्निदान यस्येति भाव । शिशुत्वादीनामित्यादिशब्देन प्रियत्वादे. सग्रह । अयमर्थ —भगवत शिशुत्वादिभेदेषु सत्स्वपि गोपवधूभि प्रिय इत्येवाय गृह्यते न शिशुरिति । यथा प्रियत्वादौ सत्यपि वृद्धै शिशुरित्येव गृह्यते । तदप्यनेकरूपस्यापि प्रतिग्रहीत्रैकैकभेदरूपत्वेन नियमनमिति चाभेदे भेदाध्यवसायादतिशयोक्ति । यदि त्वय प्रत्येतृभेदेन भेदेऽतिशयोक्तिसद्भाव एव स्यात्तदातिशयोक्तिप्रकारविशेष एव स्यात् नच तथा, अलङ्कारान्तरेऽपि सम्भवादित्याह—श्रीकण्ठेति ।

---

1 'अम्बर' (क ङ.)। 2 'भ्रान्तिमत्व' (क ङ)।

पुरःसरस्यैवारोपस्य गौणीमूलरूपकादिप्रयोजकत्वात्; यदाहुः—शारीरिक-मीमांसाभाष्यव्याख्याने श्रीमद्वाचस्पतिमिश्राः "अपिच परशब्दः परत्र लक्ष्यमाणगुणयोगेन वर्त्तत इति। यत्र प्रयोक्तृप्रतिपत्रोः सम्प्रतिपत्तिः स गौणः सच भेदप्रत्ययपुरःसर" इति। इह तु वातिकानां श्रीकण्ठजनपदवर्णने भ्रान्तिकृत एव असुरविवरत्वाद्यारोप इति। (ग, ई)

मित्यर्थः। **अतिशयोक्तिर्विच्छिन्न** इति। नगरस्यारोपविषयस्य स्वशब्देनैवोक्तत्वेन तन्निगरणाभावादतिशयोक्त्यप्रसक्तेरिति भावः।

गौणीमूलेति। गौर्वाहीक इत्यादिवद् गौणीलक्षणामूलेति नात्रार्थः, रूपके लक्षणाभावात्। व्यधिकरणेनैव चन्द्रत्वेन शक्त्यैव चन्द्रपदात् मुखबोधात्। आरोपाधिकरणस्य प्राङ्निर्देशे' रूपकं यथा—अय चन्द्र इत्यत्र। 'आरोपस्य प्राङ्निर्देशे तु गौणी लक्षणा, यथा गौर्वाहीक इत्यत्र। किन्तु आरोपाधिकरणस्यारोप्यगुणयोगात्मकसादृश्यरूपा या बुद्धिः सैवात्र गौणीपदार्थः। तादृशबुद्धिमूलकरूपकादिप्रयोजकत्वाद् भेदप्रतीतिपुर.सरारोपस्य इत्यर्थः। रूपकादीत्यादिशब्दात् सादृश्यमूलकोत्प्रेक्षाद्यनेकालङ्कारपरिग्रहः। तत्र मूलकत्वप्रदर्शनं च तत्पूर्वके परिणामालङ्कारे तथात्वाभावप्रदर्शनाय। **परशब्द** इत्यादि। परशब्दश्चन्द्रादिशब्दो गवादिशब्दश्चेत्यर्थः। परत्र मुखादौ वाहीकादौ च। **लक्ष्यमाणेति**। लक्ष्यमाणो ज्ञायमानो य आरोपस्य गुणो धर्म आरोपाधिकरणस्य तद्योगेनेत्यर्थः। परत्र वृत्तिश्च रूपके व्यधिकरणप्रकारेण शक्त्यैव। गौर्वाहीक इत्यादौ गौणीलक्षणास्थले तु लक्षणयेति विशेष। **वर्त्तत इतीति**। संप्रतिपत्तिर्यत्र शब्दे प्रयोक्तृप्रतिपत्रोः स शब्दो गौण इत्यर्थः। **स चेति**। स गुणयोग इत्यर्थ.। तादृशगुणयोगबुद्धिस्तु असुरविवरमित्यत्र नास्तीत्याह—**इह तु इति**।

• श्रीकण्ठजनपदो नाम श्रीकण्ठदेवताभिष्ठितो देशः। असुरविवरं सिद्धविवरम् वातिकाः पवनयोगिनः। यद्वा—असुरविवरं वातरोगशान्तिकरः कोऽपि रोगविशेषः। वातिकैः वातरोगिभि। अत्राप्यलङ्कारान्तरविच्छित्तिमूलता दर्शयति—**इह चेति**। इच्छन्ति तत्त्वज्ञा इति शेष। रूपकालङ्कारयोग इति तु केषाञ्चिद् मतानुसारेणोक्तमित्यर्थः। कथं न रूपकमित्यत आह—**भेदेति**। भेदप्रतीतिपुर.-सरस्यैव इत्येवकारेण भ्रान्त्यादेर्व्यवच्छेदः। प्रथमतोऽपि भेदप्रतीतौ भ्रान्त्यादेरभावात्। मुग्धा दुर्धियेत्यादौ मिथ्याज्ञानस्य कविप्रतिभाहतत्वेन कविना यत्नवादिनिगृह्यत्वेन सत्यत्वेनोपनिबद्धत्वाद् रूपकमदीत्यादिशब्देनापह्न्त्यादिसंग्रहः। कथं तथाभूतस्यारोपस्य रूपकादिप्रयोजकत्वमित्यत आह—**गौणीमूलेति**। रूपकादेर्गौणी-लक्षणाहेतुकत्वादित्यर्थ.। तथापि कथं तत्रारोपस्य भेदप्रतीतिपुरःसरत्वमित्यत्राचार्य्य-सम्मतिं शारीरमीमांसाभाष्यं श्रीमदाचार्य्यराद्धान्तसम्मतत्वादुदृतम्। परशब्दोऽ-

अत्रैव च तपोवनमिति मुनिभिः कामायतनमिति वेश्याभिरित्यादौ च परिणामालङ्कारयोगः । (ङ)

"गाम्भीर्य्येण समुद्रोऽसि गौरवेणासि पर्वतः।" इत्यादौ चानेकधोल्लेखे गाम्भीर्य्यादिविषयभेदः प्रयोजकः । अत्र च रूपकयोगः । (घ)

गुरुर्वचसि पृथुरुरसि अर्जुनो यशसीत्यादिषु चास्य रूपकाद् विविक्तो विषय इति । अत्र हि श्लेषमूलातिशयोक्तियोगः । (ङ, ऊ)

(वि, घ) अत्रैव चेति । तपोवनमित्यादौ परिणामयोग इत्यन्वयः । तपोवनत्वकामायतनत्वयोस्तत्र वास्तवत्वेन परिणामालङ्कारत्वसम्भवात् । नच तपोवनत्वस्य कथं तत्र वास्तवत्वमिति वाच्यम् । वनपदस्याश्रमे लाक्षणिकत्वाभिप्रायेण परिणामालङ्कारत्वकथनात् । इत्थं ग्रहीतृभेदघटितमुल्लेखमुदाहृत्य विषयभेदघटितं तमुदाहरति—**गाम्भीर्य्येणेति**। विषयभेदो धर्म्मरूपविषयभेदः । अत्र ग्रहीत्यैक्यमेव ।

(वि, ङ) रूपकासङ्कीर्णस्य विषयं दर्शयति—**गुरुरिति** । उपदेश्यरूपे वचसि विषये गुरुरुपदेष्टा इत्यर्थः । श्लेषाच्च बृहस्पतिरित्यर्थः । **पृथुरिति**। उरसि उरोवच्छेदेन पृथुर्विस्तारः श्लेषाच्च—पृथू राजा । **अर्जुन** इति । अत्र यशसि इत्यत्र

मिर्माणवक इत्यादौ माणवकादिशब्दः परत्र माणवकादौ तन्मते लक्ष्यमाणो गुणस्तैदर्थ्यापिङ्गलादिः । प्रयोक्तृ वाक्यप्रयोजकः । प्रतिपत्ता तदर्थज्ञाता। स च गौणीवृत्त्या बोध्योऽर्थः । प्रकृते योजयति—**इह तु** इति। भ्रान्तिकृत एव प्राच्यानां मते भ्रान्तिकृतत्वाभावे पुना रूपकमस्ति इति भावः । अत्र भ्रान्तिमतोऽलङ्कारत्वेऽपि नालङ्कारान्तरविच्छित्तिमूलत्वं ह्रीयत इति प्रकृते न वाचित् क्षतिः ।

(लो, उ) अनेव श्रीकण्ठजनपदवर्णने परिणामालङ्कारयोगः । श्रीकण्ठजनपदे तपोवनत्वाद्यारोपस्य मुन्यादेः प्रकृते तपःप्रभृतावुपयोगात् । नचेह रूपकं तपोवनत्वाद्यारोपस्य सादृश्यमूलत्वाभावात् । मुन्यादीना तु तपोवनादिभिन्नरूपस्य तद्रूपताप्रतीतेरिह भ्रान्तिमानिति येऽप्याहु तेषामयमाशय —

श्रीकण्ठजनपदे एकदेशस्य तपोवनादित्वेप्यवयवावयविनोरभेदात्समुदायस्य तथात्वप्रतीतिरिह न तात्त्विकेति न परिणाम इति । एवमत्र, एषु सर्वेषु अलङ्कारान्तरविच्छित्तिसम्भवेऽपि ग्रहीतृभेदेनानेकधोल्लेखस्य विच्छित्तिविशेषस्य सम्भवात् तत्प्रयोजितस्य उल्लेखालङ्कारस्यापलापो न शक्यक्रिय इत्यर्थः ।

(लो, ऊ) एवं ग्रहीतृभेदे उदाहृत्य विषयभेदे उदाहरति—**गाम्भीर्य्येणेति** । श्लेषमूलातिशयोक्तिः । गुरुरुपदेष्टैव गुरुर्बृहस्पतिरिति भेदेऽप्यभेदाध्यवसायात् श्लेषमूलातिशयोक्तिरिति । पृथुर्विशालो वैण्यश्च । अर्जुनो धवलः, पक्षे कार्त्तवीर्य्यः, पार्थो वा। नचात्र शब्दशक्तिमूलो ध्वनिः, नच रूपकम् उपदेष्टृत्वादीनां बृहस्पतित्वादिरूपेणाध्यवसानात् ।

प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः ॥ ५५ ॥ (ङ) ×

इत्थं द्विधा—क्वचिदपह्नवपूर्वक आरोप । क्वचिदारोपपूर्वकोऽपह्नव इति । (च)

क्रमेणोदाहरणम्—

"नेदं नभोमण्डलमम्बुराशि-
नैताश्च तारा नवफेनभङ्गाः ।
नायं शशी कुण्डलितः फणीन्द्रो
नासौ कलङ्कः शयितो मुरारिः ॥" (छ) +

तृतीयार्थे सप्तमी । यशसाऽर्जुनो धवल इत्यर्थः । शेषाश्च पाण्डवोऽर्जुन कार्त्तवीर्य्यार्जुनो वा । **रूपकाद् विशिष्यते** इति । त्वं भवानित्यनयोरन्यतरस्याऽपि अनुक्तिरूपाभिगरणादतिशयोक्तेरेव विषयत्वात् । सा चात्र भेदेऽपि अभेदारोपरूपा । यदि तु त्वं भवानित्यनयोरेकतरस्य निर्देशस्तदा रूपकमेव, रूपकातिशयोक्त्योरेतन्मात्रभेदात् । **अत्र हीति** । नच दुर्गालङ्घितविग्रह इत्यादिवदुपमाध्वनिरयमिति वाच्यम् । तत्र विशेष्यस्य श्लिष्टोभावश्लभपदस्येवात्र विशेष्यपदाभावात् त्वपदसत्त्वेऽपि रूपकमेव नोपमाध्वनिस्तस्य श्लिष्टत्वाभावात् ।

(वि, च) अपह्नुत्यलङ्कारमाह—**प्रकृतमिति** । प्रकृत प्रक्रान्तम्, अन्यस्थापनम् अप्रकृतस्थापनम् । **इत्यश्चेति** । प्रकृतापह्नवो अन्यस्थापनश्चेत्येतन्मात्रविलक्षणे सतीत्यर्थः । प्रकृतापह्नवाऽप्रकृतस्थापनयो पौर्वापर्य्यव्यत्यासाद् द्वैविध्यमिति दर्शयति **क्वचिदिति** । नच निषिध्येति क्त्वानिर्देशादपह्नवपूर्वकत्वमेव लभ्यते कथ द्वैविध्यमिति वाच्यम् । निषेधबुद्धिं विषयीकृत्य इत्येव तदर्थात् । तद्विषयीकरणस्य चोभयथाऽपि सम्भवात् ।

(वि, छ) नेदं नभ इति । नभआदिनिषेधेन सफेनसमुद्रे फणिशायित्वमुरारिस्थापनमिदम् । अम्बुराशिरित्यादौ सर्वत्र किन्तु इति बोध्यम् ।

(लो, मु) प्रकृतमारोपविषयम् अन्यस्थापनम् आरोप्यविषयत्वस्थापनम् ।

× प्रकृत वर्णनीयमुपमेय निषिध्य असत्यतया प्रतिपाद्य अन्यस्य अप्रकृतस्य उपमानस्य स्थापन सत्यतया प्रतिपादनमपह्नुतिः । अपह्नवो निषेध । निषिध्य इत्यनेन व्यवच्छेद्यः, रूपके प्रकृतस्य निषेधाभावात् । सन्देहे तु शब्दाय । अत्र तु निश्चय इति ततो भेदः । अपह्नवश्च द्विविध—शाब्द आर्थश्चेति । शाब्दस्तु यत्र शब्देन निषेधकथनम् । आर्थस्तु यत्र निषेध आक्षेपलभ्य । अर्थस्तु बहुभि प्रकारै र्निरूप्यो । क्वचिन्नकारमिषच्छब्दच्छद्मकपटादिशब्दोपादानेन क्वचित्परिणामार्थकशब्दोपादानेन ।

+ अत्र अप्रकृतताया नञ शब्देन बोधनमिति शाब्द ।

"एतद् विभाति चरमाचलचूडचुम्बि
हिण्डीरपिण्डरुचिशीतमरीचिबिम्बम् ।
उज्ज्वालितस्य रजनौ मदनानलस्य
धूम दधत्प्रकटलाञ्छनकैतवेन ॥" (ज, ञ) *

इद पद्यं मम । एवम्-

विराजति व्योमवपुः पयोधि-
स्तारामयास्तत्र च फेनभङ्गा ॥ (ञ)

इत्याद्याकारेण च प्रकृतनिषेधो बोद्धव्य ।

गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन ।
यदि श्लेषेणान्यथा वाऽन्यथयेत्साप्यपह्नुतिः ॥ ५६ ॥ (ट)

श्लेषेण यथा—

"काले वारिधराणामपतिनया नैव शक्यते स्थातुम् ।
उत्कण्ठिताऽसि तरले ! नहि नहि सखि पिच्छिल पन्था ॥"+

(वि, ज) अन्यस्थापनपूर्वक निषेधमाह-एतद् विभातीति । एतद् बिम्बम् अर्थाच्चन्द्रस्य । हिण्डीर कर्पूर । उज्ज्वालितस्येति । निर्वापितस्येत्यर्थ । निर्भरस्वकान्तसम्भोगेन रजन्या मदनानलनिर्वाणाद् धूमोद्गम । कैतवेनेति । नाय लाञ्छन किन्तु यथोक्तधूम इति निषेधप्रतीति पश्चात् कैतवपदेन ।

(वि,ञ) भङ्गयन्तरेणापि निषेधप्रतीतावाह-विराजतीति । अत्र वपु पदमयद्-प्रलयाभ्या व्योमादिनिषेधप्रतीति ।

(वि, ञ) द्वितीयापह्नुतिमाह-गोपनीयमिति । श्लेषेण द्योतनं शक्त्यैव । अन्यथा द्योतनन्तु व्यञ्जनया । अन्यकथनन्तु श्लेषेण श्लिष्टपदवाच्यार्थेन चेति बोध्यम् ।

(लो, ञ) हिण्डीर फेन । अत्र कैतवपदेन कपटार्थेन न प्रकटलाञ्छनमिति प्रतीतेरपह्नव आर्थ ।

(लो, ट) अन्यथयेदिति । अन्यार्थे णिच्येत् । कर्मण्यदिति शेष । सापीति । अपिशब्देन समनन्तरोक्तप्रकारमिश्रापह्नुति इत्यर्थ ।

---

* चरमाचलचूडचुम्बि । अस्ताचलशिखरावलम्बि । हिण्डीरस्य फेनस्य पिण्ड समूह, तस्य रुचिरिव रुचिर्यस्य तादृशो य शीतमरीचिश्चन्द्रस्तस्य बिम्ब रजनी व्याप्य उज्ज्वालितस्य मदनानलस्य प्रकटलाञ्छनकैतवेन प्रकाशितकलङ्कच्छलेन धूम दधद् विभाति ।

+ पूर्वार्द्धे चतुर्थपादस्य नायिकया उक्ति । तृतीयपादस्य सख्या । अविद्यमान पति समीपे यस्या सा अपति तस्या भाव तया अपतितया । पक्षे-न पतिता अपतिता तया अस्खलितयेत्यर्थ ।

अप्रापतितयेत्यत्र पतिं विना इत्युक्त्वा पश्चात्पतनाभावेन इत्यन्यथाकृतम्। (अ)

श्लेषेण यथा—

"इह पुरोऽनिलकम्पितविग्रहा
मिलति का न वनस्पतिना लता।
स्मरसि किं सखि! कान्तरतोत्सवं
नहि घनागमरीतिरदाहृता॥" (ट)×

वक्रोक्तौ परोक्तेरन्यथाकारः, इह तु स्वोक्तेरेवेति भेदः; गोपनकृता गोपनीयस्यापि प्रथममभिहितत्वाच्च व्याजोक्तेः। (ठ, ए)

काले इति। अत्र वारिधराणां कालस्य कामोद्दीपकत्वेन पतिशून्यतया स्थित्यशक्यत्वं गोपनीयमर्थमुक्त्वा तद् बोद्ध्याः संख्याः प्रश्नानन्तरं तदन्यथयति—नहि नहीति। वर्षाकाले पथः पिच्छिलत्वेन पतितभिन्नतया इत्युक्तवान्यश्लेषेण अन्यथा कृतं तदाहाऽनेति।

(वि, ट) इह पुरोनिलेति। इह देशे पुरः सम्मुखे का लता। वनस्पतिपदमहिम्ना व्यञ्जनया साध्वसवत्नायिकायां सङ्गतनायकप्रतीतिः समासोक्तिरूपा संख्या तत्प्रतीत्या स्मरसीत्यादिप्रश्ने कृते वक्त्री वाच्यार्थेनैव तदन्यथयति—नहि घनागमेति।

(वि,ठ) अस्या वक्रोक्तितो भेदमाह-**वक्रोक्ताविति**। व्याजोक्तिर्नाऽप्यस्या भेदमाह—**गोपनेति**। गोपनीयार्थो वक्ता व्याजोक्तौ प्रथमं नोच्यते। यथा—

"पृथुना जलकुम्भेन श्रमोऽयं श्वासकृन्मम।
विश्राम्यामि क्षणं तस्माद् वयस्ये! तव सन्निधौ॥"

इत्यत्र जलाहरणस्य पथि उपनायकसम्भोगजन्यः श्रमो वक्त्र्या प्रथममनुक्तोऽपि सखिप्रतीतिभिया निगूहितः। व्याजोक्तेरिति भेद इत्यन्वयः।

(लो, ए) अपतितया न विद्यते पतिर्यस्या. सा अपतिः तस्या भावस्तत्ता पतनरहितयेत्यर्थः। अन्यथाकरणमेतदेवाह। वक्रोक्तौ "के यूयं स्थल एव" इत्यादौ। व्याजोक्तौ शैलेन्द्रप्रतिपाद्यमानेत्यादौ गिरिजाकरस्पर्शजन्यस्य रोमाञ्चादेर्नाभिधानम्।

× इह देशे पुरः सम्मुखे का लता अनिलेन वायुना कम्पित विग्रहः कायो यस्याः तथा सती वनस्पतिना न मिलति, कम्पस्वेदादियुक्ता का रमणी पुरुषेण न मिलतीति च व्यज्यते। तृतीयपाद. सख्या उक्तिः। घनागमस्य वर्षाकालस्य रीतिरवस्था तु मया कथिता। अत्र स्वोक्त्या व्यञ्जितस्य कान्तमिलनस्य घनागमेत्यादिना पुनरन्यथाकरणम्।

अन्यन्निषिध्य प्रकृतस्थापनं निश्चयः पुनः ॥ ५७ ॥ (ऐ) ❀

निश्चयाख्योऽयमलङ्कारः । अन्यदित्यारोप्यमाणम् ।

यथा मम—

"वदनमिदं न सरोजं नयने नेन्दीवरे एते ।
इह सविधे मुग्धदृशो मधुकर[1] न मुधा परिभ्राम्य ॥"

यथा वा—

"हृदि बिसलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः ।
मलयजरजो नेदं भस्म प्रियारहिते मयि
ग्रहर न हरभ्रान्त्याऽनङ्ग क्षुधा किमु धावसि ॥" (ड, ओ) +

न ह्ययं निश्चयान्तः सन्देहस्तत्र संशयनिश्चययोरेकाश्रयत्वेन अवस्थानात् ।

(वि, ड) निश्चयालङ्कारमाह—अन्यन्निषिध्येति । अपह्नुतौ प्रकृतनिषेधेन अन्यस्थापनम्, इह तु तद्वैपरीत्यमित्यर्थः । वदनमिदमिति । हे मधुकर इह मुग्धदृशः सविधे मुधा न परिभ्राम्य । भ्राम्येत्यत्र वैकल्पिकदिवादिश्यन्नन्तता । पद्मादिबुद्धया यद् भ्राम्यसि तन्मुधेत्यर्थः । मुधात्वमुपपादयति—वदनमिदमिति । हृदि विसलताहार इत्यादिका विरहिण उक्तिः । एवम्—"नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः, सुरधनुरिदं दूराकृष्टं न तस्य शरासनम् । अयमपि पटुधारासारो न बाणपरम्परा, कनकनिकषस्निग्धा विद्युत्प्रियां न ममोर्वशी ।" इत्यादावप्ययमलङ्कारो बोध्यः ।

(वि, ढ) न ह्ययमिति । वार्थो हिकारः । नवायमित्यर्थः । भ्रमरादेरित्यादिपदादनङ्गस्य नायिकादेरित्यादिपदात् तत्तद्बोधकपुरुषस्य च परिग्रहः । ननु निश्च-

---

(लो, ऐ) निश्चयाख्य । अपह्नुतिवैधर्म्यात् ॥

(लो, ओ) मुग्धदृशो मनोहराक्ष्याः । अस्यालङ्कारस्य पूर्वाचार्यैरप्रकाशितत्वाद् विषयव्याप्तये पुनरुदाहरति—यथा वेति । भुजङ्गमनायको वासुकिः ।

❀ अन्यत् । अप्रकृतमुपमानम् । प्रकृतस्य उपमेयस्य ।

+ प्रियारहिते मयि मम प्रियारहित्वेन शिवस्य च प्रियारहित्वेन मम न तद्रूपता । अतो मा न प्रहर । किमु क्षुधा धावसि ? यतः अयं मम हृदि स्थापितः विपलनाहारः । मृणालस्य हार एव, परं भुजङ्गमनायकः शिवहृदि स्थितः सर्पो न । मम कण्ठे विरहतापशान्त्यर्थं कुवलयदलश्रेणी वर्त्तते । परं सा शिवस्य कण्ठस्थिता गरलद्युतिर्न । इदं मम गात्रे दृश्यमानं मलयजरजः चन्दनधूलिः, परं शिवस्य शरीरस्थं भस्म न, अतो न मम शिवरूपता इत्यर्थः ।

1 "भ्रमर मुधा किं परिभ्रमसि ?" (क, ग)

अत्र तु भ्रमरादेः संशयो नायकादेर्निश्चयः। †

किञ्च न भ्रमरादेरपि संशयः, एककोट्यनधिके ज्ञाने तथा समीपगमनसम्भवात्। तर्हि भ्रान्तिमानस्तु। अस्तु नाम भ्रमरादेर्भ्रान्तिः। नचेह तस्याश्चमत्कारविधायित्वम्, अपितु तथाविधनायकाद्युक्तेरेवेति सहृदयसंवेद्यम्। किञ्च अविवक्षितेऽपि भ्रमरादेः पतनादौ भ्रान्तौ वा नायिकाचाटूक्तादिरूपेणैव सम्भवत्येव तथाविधोक्तिः। (ढ)

यान्तसन्देहे तदैक्य न विवक्षितमित्यत आह—एककोट्यनधिके ज्ञाने इत्यर्थः। तज्ज्ञानं च एककोटौ उत्कटत्वेन तद्वृत्तिकोटेरेव निश्चये च भवति, तादृशनिश्चयश्च भ्रम एवेति ता कोटिमादायाशङ्कते—तर्हीति। **अस्तु नामेति** समाधानम्। **तथाविधनायकाद्युक्तेरेवेति**। नायिकासुखोत्कर्षस्य द्वितीयश्लोके वक्तुर्विप्रलम्भोत्कर्षस्य च प्रतिपादनादेव चमत्कारादिति भावः। तस्मिन्नर्थे सहृदयाः प्रमाणमित्याह—**सहृदयेति**। मुग्धा दुग्धधिया" इत्यादौ अपि चन्द्रोत्कर्षप्रतिपादनादेव चमत्कार इति तुल्यमित्यत आह—**किञ्चेति**। तत्र तु भ्रान्तिमति भ्रमाधीनकुम्भपातादिक्रिया, अत्र तु भ्रमरस्य नतु भ्रमाधीनपातक्रियेति समाधानसम्भवेऽपि तादृशक्रियाभावेऽपि भ्रान्तिमदलङ्कारादित्युपपत्तॄन् प्रत्याह। **अविवक्षितेऽपीति**। तुष्यतु इति न्यायात्। तथात्वाभ्युपपत्तौ आह—**नायिका चाटूक्तेति**। तथाच भ्रान्तिमदलङ्कारसङ्कीर्ण एव निश्चयालङ्कार इति स्वीकृतम्।

(लो, औ) एकाश्रयत्वेनावस्थानात् संशयितुरेव निश्चेतृत्वायथा—किं तावत् सरसीत्यादौ। एककोटिः सरोजादि। तथा समीपगमनादिसम्भवश्च शास्त्रयुक्तिसिद्ध एव। आदिशब्देन हृदि बिसलताहार इत्यादौ प्रहारादेः सग्रहः। **तर्हीति**। यद्येकं कोट्यनधिकं मिथ्याज्ञानमित्यर्थः। तस्याः यथाकथञ्चिद् अङ्गीकृताया भ्रान्तेस्तथाविधायाः 'तव वदनं सरोजसदृशमेव' इत्यादेर्नायिकाद्युक्तेर्विशेषणे, तत्र किं प्रमाणमित्याह—सहृदयसंवेद्यं सहृदयानामनुभव इत्यर्थः। भ्रमरादेः पतनादिसद्भावे तदभावेऽपि वा भ्रान्तिज्ञानस्य तेषां हृदयग्राह्यत्वे भ्रान्तिमदलङ्कारो वक्तुं युक्तः। **नच तथेति**। युक्त्यन्तरदर्शनेनापि तदभावं दृढयति—**किञ्चेति**। तथाविधवदन-

---

† निश्चयान्तसन्देहे यस्यैव सन्देहस्तस्यैव निश्चयज्ञानं भवति। अत्र तु वदनमिदमित्यादौ एकस्य सन्देहः, अपरस्य तु निश्चयः। अतोदाहरणे भ्रमरस्याऽपि संशयो नास्ति। सन्देहे तु न कोऽपि कुत्रापि गच्छति। अत्र भ्रमरस्य संशयाभावादेव मुखसमीपगमनं सम्भवति। अतो नात्र भ्रमरस्यापि सन्देहः। एका कोटिः प्रकारः। तस्यानधिकं तस्मिन् एककोटिमात्रावगाहिनि। सन्देहस्तु एकाधिककोट्यवगाही। अतो भ्रमरादेः सन्देहे तथाविधगमनं नैव सम्भवतीत्यर्थः। अत्र तु समीपगमनमेव भवति।

नच रूपकध्वनिरयम्। मुखस्य कमलत्वेन अनिर्द्धारणात्। न चापह्नुति, प्रस्तुतस्यानिषेधात्। इति पृथगेवायमलङ्कारश्चिरन्तनोन्मालङ्कारेभ्य। शुक्तिकाया रजतधिया पतति पुरुषे, "शुक्तिकेयं न रजतम्" इति कस्यचिदुन्निर्णीयमलङ्कारो वैचित्र्याभावात्" (ण, थौ)

भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना ॥ ५८ ॥ (त, थ) †

(वि, ण) अप्रसक्तमपि रूपकध्वनित्व स्पष्टत्वाय निषिध्यति—**नच रूपकेति**। **कमलत्वेनानिर्द्धारणादिति**। न सरोजमिति तद्विशेषनिर्देशादनिर्द्धारणम्। अपह्नुतिस्तु न सम्भवत्येव इत्याह—**नचेति**। **चिरन्तनेति**। न केवलमयमलङ्कार किन्तु—

"दशरश्मिशतोपमद्युतिं यशसा दिक्षु दशस्वपि श्रुतम्।
दशपूर्वरथं यमाख्यया दशकण्ठारिमुरं विदुर्बुधा ॥"

इत्येकसख्यालङ्कार।

एक विष्णुं द्वे तदीये च नेत्रे
त्रींस्तान् देवान् दोश्चतुष्कं च विष्णोः
पञ्चेशास्त्रान्यग्निभूपण्मुखानि
सप्तार्चिष्कं नौमि साष्टाङ्गपातम् ॥

इति क्रमिकसख्यालङ्कार। अन्येऽपि वैचित्र्यावहा अलङ्कारा अनुक्ता अपि स्वयमूह्या। प्रायश सर्वेषामेव अलङ्काराणामाहार्य्यारोपबुद्धिविषयत्वे एवालङ्कारत्व नतु वास्तवत्वे इयत आह—**शुक्तिकायामिति**।

(वि, त) उत्प्रेक्षालङ्कारमाह—**भवेदिति**। प्रकृतस्य परात्मनाऽप्रकृत—तादात्म्येन सम्भावनमुत्कटकोटिक सशय इत्यर्थ। तेनानुत्कटकोटिकसन्देहनिश्चययो रूपकादौ च नातिप्रसङ्ग।

मिद सरोजरूपम्। एव च भ्रान्ते स्वरूपस्याभावात्। तदभावे च कथ भ्रान्तिमदलङ्कार इत्यर्थ। कमलत्वेन अनिर्द्धारणादित्यत पूर्व व्यङ्गयोरर्पाति शेष।

अयमस्माभि प्रकारितो निश्चयाख्योऽलङ्कार। वैचित्र्यमलङ्कारबीजभूता लोकोत्तरा विच्छित्ति ॥

(लो, अ) एवमभेदप्राधान्येनारोपगर्भालङ्कारान् लक्षयित्वाऽध्यवसाय गर्भान् लक्षयति—**भवेदिति**। प्रकृतस्य सम्भाविनो वर्णनीयस्य पर सदृशतयोपस्थित। अर्थाद् असम्भवी योऽर्थ तदात्मना तत्स्वरूपेण सम्भावना। मिथ्या ज्ञानविशेष उत्प्रेक्षालङ्कार इत्यर्थ।

---

† उत्कटा प्रकृतस्य उपमानस्य ईक्षा ज्ञानमुत्प्रेक्षा। उत्कटैककोटिक सशय सम्भावनम्। सशये हि कोटिद्वय वर्त्तते। यथा। "स्थाणुर्वा पुरुषो वा" इत्यत्र एक कोटि स्थाणु। अपरा च कोटि पुरुष। यस्मिन् सशये कोटिद्वयमध्ये एकस्या

वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता ।
वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः ।
जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि ।
तदष्टधापि प्रत्येकं भावाभावाभिमानतः ।
गुणक्रियास्वरूपत्वाभिमित्तस्य पुनश्च ताः ।
द्वात्रिंशद्विधतां यान्ति ॥ ५६ ॥ (थ, आ)

(वि, थ) अस्या विभङ्गविभागबाहुल्येन षट्सप्तत्युत्तरैकशतविधतां पर्यवस्थापयितुमादौ द्वैविध्यमाह—**वाच्येति**। प्रतीयमाना चात्र न व्यङ्ग्या, तदा उत्प्रेक्षाध्वनित्वापत्तेः, यथा दर्शयिष्यमाणे महिलासहस्रेत्यादौ, किन्तु अध्याहियमाणा इत्येवेत्यर्थः । परा अध्याहियमाणा द्वयोरपीति वाच्योत्प्रेक्षायामध्याहियमाणोत्प्रेक्षाया चेत्यर्थः । तेन जात्यादिचतुष्कोत्प्रेक्षा वाच्या अध्याहियमाणा च इत्यष्टधेत्यर्थः । जात्यादिचतुष्काभावोत्प्रेक्षाप्येवमष्टधेत्याह—**तदष्टधापीति**। भावस्य जात्यादिभावचतुष्कस्य प्रत्येकमभावाभिमानतोऽभावोत्प्रेक्षणादपि तदष्टधा तस्या उत्प्रेक्षायाः अष्टधा अष्टप्रकारभाव इत्यर्थः । अपिशब्दस्य दर्शितरीत्या भिन्नक्रमेण योजना । एवं च जात्यादिभावोत्प्रेक्षाष्टक तदभावोत्प्रेक्षाष्टकं चेति षोडशप्रकाराः षोडशत्वानुक्त्यवपि पर्य्यवसिताः, तद्द्वैगुण्येन द्वात्रिंशत्वमाह—**गुणक्रियेति**। निमित्तस्य उत्प्रेक्षाया हेतोर्गुणक्रियास्वरूपत्वात् ताः षोडशविधाः उत्प्रेक्षाः पुनर्द्वात्रिंशद्विधतां

(लो, आ) तद्भेदानाह—**वाच्येति** । वाच्या इवादिद्योतकपदनिबन्धनाद् भणितिः प्रत्येया । प्रतीयमाना द्योतकपदविरहेण वाच्यार्थपर्य्यालोचनानुसन्धेया । तदेवाह—**वाच्ये वादेरिति** । एकधर्म्मवच्छानाधर्मवाचकोपमेयोऽर्थो जातिः । गुणः सामानाधिकरण्येन सिद्धतानिर्देश्यो धर्मः । क्रिया साध्यताकारनिर्देश्यो धर्मः । द्रव्यं शुद्धग्राहिक्या निर्देश्यो धर्मः । उत्प्रेक्ष्यमध्यवसेयम् । प्रकृतस्यापि एतद् भेदयोगेऽपि वैचित्र्यानावहत्वान्न भेदगणनम्, सम्भावनप्राणस्य अस्यालङ्कारस्य सम्भाव्यमानविशेषादेव विशेषोपालम्भात् । द्वयोरुक्तभेदयोः । भावो

कोटेः उत्कटत्वं (निश्चितप्रायत्वं नतु निश्चय.) तादृशः संशयः सम्भावनमुच्यते यथा प्रायेण पुरुषोऽयं भवेदिति सादृश्याद् उपमेयस्य वर्णनीयस्य उपमानत्वेन सम्भावना उत्प्रेक्षा इत्यर्थः ।

अत्रापि आहार्य्यस्य सम्भावनमेव उत्प्रेक्षा। बाधकालिकेच्छाजन्यं ज्ञानमाहार्य्यम्॥ " मुखं चन्द्रो न " इति ज्ञानं बाधज्ञानम् । तत्कालिकी या इच्छा मुखे चन्द्रत्वज्ञानं मे भवतु, तदिच्छाजन्य यद् ज्ञानं मुखं चन्द्रः तद् आहार्य्यमिति कथ्यते । रूपकादौ आहार्य्यज्ञानमेव कारणम् ।

तत्र वाच्योत्प्रेक्षायामुदाहरणं दिङ्मात्रं यथा—

"ऊरुः कुरङ्गकदृशश्चञ्चलचेलाञ्चलो भाति ।
सपताकः कनकमयो विजयस्तम्भः स्मरस्येव ॥"

अत्र विजयस्तम्भस्य बहुवाचकत्वाज्जात्युत्प्रेक्षा । (द, इ) ×

यान्तित्यर्थः । ते वाच्यप्रतीयमानत्वभेदादष्टौ जात्यादिभावोत्प्रेक्षा अष्टौ च तदभावोत्प्रेक्षाश्च इति षोडशैव गुणक्रियाहेतुवत्त्वेन द्वैगुण्याद् द्वात्रिंशादित्यर्थः । हेतुश्च उत्प्रेक्षाजनकः ।

(वि, द) दिङ्मात्रम् अल्पमात्रम् । ऊरुरिति । चञ्चलचेलाञ्चलः चलवस्त्रैकदेशः । कुरङ्गकदृशः ऊरुः स्मरस्य सपताकः कनकमयो विजयस्तम्भ इव भातीत्यर्थः । स्तम्भो हेमयष्टिः । पताका तदुपरिवस्त्रम्, चलचेलाञ्चलस्थाने तत्र । अत्र जात्युत्प्रेक्षात्वं ग्राहयति—**अत्रेति** । **विजयस्तम्भस्येति** । तद्वाचकपदस्येत्यर्थः, प्रक्रान्तस्य बहुवाचकत्वाद् बहुव्यक्तिग्राहित्वात्, तथाच स्तम्भत्वस्य जातित्वमुपपादितम् । स्तम्भोत्प्रेक्षायाश्च तत्प्रकारकत्वात् तस्या अप्युत्प्रेक्षा । एवं सर्वत्र विधेयम् । इदमुदाहरणं न गुणक्रियानिमित्तोत्प्रेक्षायाः किन्तु वक्ष्यमाणायाः अनुक्तनिमित्तोत्प्रेक्षाया एव। अतोऽत्र विजयस्तम्भोत्प्रेक्षाहेतुं कामोद्दीपकत्वमनुक्तम् ।

जात्यादिरेव । अभावस्तेषामेवासत्ता । निमित्तस्य उत्प्रेक्षणकारणस्य विषयधर्मस्य ता उक्तषोडशप्रकाराः । उत्प्रेक्ष्यते प्रकाश्यते, अर्थात् सजातीयमनेकमनया स्वल्पयापीत्युत्प्रेक्षा ।

(लो, इ) जात्युत्प्रेक्षा । जातिस्वरूपोत्प्रेक्षणात् ।

(× चञ्चलं चेलाञ्चलं वस्त्रप्रान्त यत्र तादृशः । कुरङ्गकदृशः बालहरिणेक्षणायाः ऊरुः । अत्रोपमेये ऊरौ स्तम्भत्वमुत्प्रेक्ष्यते ।

"यदायमुपमानाश्रो लोकतः सिद्धिमृच्छति ।
तदोपमैव येनेवशब्दः साधर्म्यवाचकः ॥"

यदा पुनरयं लोकसिद्धश्च कविकल्पितः तदोत्प्रेक्षैव । येनेवशब्दः सम्भावनापरः । अत्रेदमवधेयम्—नाम्ना सहैवोक्त इवशब्दस्तु उपमानस्य लौकिकत्वे उपमावाचकः अलौकिकत्वे च उपमानस्य उत्प्रेक्षावाचक एव । अत्र अनन्तस्य विजयस्तम्भस्य अलौकिकत्वाद् इवशब्द उत्प्रेक्षावाचकः । 'नवै तिङन्तेनोपमानमिति महाभाष्यम् ।

"सिद्धमेव समानार्थमुपमानं विधीयते ।
तिङन्तार्थस्तु साध्यत्वादुपमानं न जायते ।"

अतस्तिङन्तेन सहैवोक्त इवशब्दः सर्वत्रोत्प्रेक्षावाचकः । 'गौरिवाति पश्यति" इत्यादौ नोपमा किन्तूत्प्रेक्षैव ।)

"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः ।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥"
अत्र सप्रसवत्वं गुणः । (घ, ई) +
"गङ्गाम्भसि सुरत्राण तव निःशाणनिःस्वनः ।
स्नातीवारिवधूवर्गगर्भपातनपातकी ॥" *
अत्र स्नातीति क्रिया । (न)
मुखमेणीदृशो भाति पूर्णचन्द्र इवापरः । (प) †
अत्र चन्द्र इत्येकव्यक्तिवाचकत्वाद् द्रव्यशब्दः ।
एते भावाभिमाने ।

(वि, घ) वाच्यगुणोत्प्रेक्षामाह–**ज्ञाने मौनमिति** । तस्य दिलीपस्य गुणाः गुणानुबन्धित्वात्सप्रसवा इवेत्यर्थः । गुणानां गुणान्तरानुबन्धित्वं दर्शयति–**ज्ञानमिति** । ज्ञानादौ सति मौनादिकमित्यर्थः–**अत्रेति** । प्रसवो योनिबहिर्भावः । उत्पादने प्रकृतेऽप्रकृततदुत्प्रेक्षा । प्रसवपदस्य कृदन्तत्वेन नामत्वप्राप्त्या तदर्थो न क्रियेत्यतो गुण एव । अत्र गुणानुबन्धित्वमुत्प्रेक्षाहेतुरुक्त एव ।

(वि, न) वाच्या क्रियोत्प्रेक्षामाह—**गङ्गाम्भसीति** । **सुरत्राणेति**–पाश्चात्ययवननृपतीनामुत्कर्षबोधकः परिभाषाविशेष. सुलतान इति पदस्याऽपभ्रंशः । हे तादृश तव निःशाणस्य सैन्यवाद्यस्य निःस्वनः अरिवधूवर्गगर्भपातनपातकी यतः अतस्तत्पातकक्षयार्थं गङ्गाम्भसि स्नातीवेत्यर्थः । गङ्गायाः पाश्चात्यनृपतिसैन्यदूरवर्त्तित्वात्तत्पर्य्यन्तमपि सैन्यनिःस्वन आयात इति भावः । अत्र हेतुं ग्रन्थकृदेव प्रदर्शयिष्यति ।

(वि, प) द्रव्योत्प्रेक्षामाह–**मुखमिति** । इयमपि अनुक्तहेतुका ।

(लो, ई) एवं वक्ष्यमाणे गुण इत्यनन्तरमुत्प्रेक्ष्यते इति शेषः । एवमन्यत्र ।

+ श्लाघाविपर्य्ययः कीर्त्तनराहित्यम् । गुणानुबन्धित्वाद् गुणान्तरप्रयोजकत्वात् । अस्य राज्ञो गुणशालित्वाद् ज्ञानादयो गुणाः मौनादिगुणजनकाः इति तात्पर्य्यार्थः । अत्र ज्ञानादीना मौनादिजनकत्वे प्रसवसम्भावना ।

* अरिवधूवर्गाणां गर्भपातनेन पातकी । तच्छब्दश्रवणेन शत्रुस्त्रीणा गर्भपातो जातः । अतस्तेन पातकी । अयं सैन्यगमनकालिकः शब्दश्च तत्पातकक्षालनार्थं गङ्गाया स्नातीव । अत्र शब्दस्य गङ्गापर्य्यन्तगामित्वं स्नानक्रियारूपेणोत्प्रेक्ष्यते ।

† अनापरविशेषणदानादेव प्रसिद्धपदार्थातिरिक्तत्वादलौकिकत्वादुत्प्रेक्षावाचक इवशब्दः ।

अभावाभिमाने यथा—

"कपोलफलकावस्थाः कष्टं भूत्वा तथाविधौ ।
अपश्यन्ताविवान्योऽन्यमीदृशां क्षामतां गतौ ॥"

अत्रापश्यन्ताविति क्रियाया अभावः । एवमन्यत् । (फ, उ)

निमित्तस्य गुणक्रियारूपत्वे यथा गङ्गाम्भसीत्यादौ शीतीवेत्युत्प्रेक्षानिमित्तं पातकित्वं गुणः । "अपश्यन्ताविव" इत्यादौ क्षामतागमनरूपं निमित्तं क्रिया ।

एवमन्यत् । (ब)

प्रतीयमानोत्प्रेक्षा यथा—

"तन्वङ्गयाः स्तनयुग्मेन मुखं न प्रकटीकृतम् ।

(वि, फ) अभावाभिमाने जात्याद्यभावोत्प्रेक्षाया तत्र क्रियाभावोत्प्रेक्षामाह—**कपोलफलकाविति** । अस्याः कपोलफलकौ कपोलरूपस्फारदेशौ तथाविधौ पुष्टस्वरूपौ भूत्वा ईदृक्षामीदृशीं क्षामता क्षीणता गतौ इति कष्टमित्यर्थः । इष्टादर्शनात् क्षीणत्वप्राप्तिः । अत्र क्षामत्वहेतौ विरहे प्रकृते तद्धेतुत्वेन परस्परदर्शनक्रियाभाव उत्प्रेक्षितः । अत्र हेतूक्तिः ग्रन्थकृतैव अग्रे दर्शयिष्यते—**एवमन्यदिति** । अत्र जात्यभावोत्प्रेक्षा यथा—"न सन्ध्या कुरुते भास्वान् द्विजत्वाभावतः किमु" इत्यादपद्यगन्तोक्तौ सन्ध्याकरणहेतौ मन्दगमने प्रकृतेऽप्रकृतश्लिष्टसन्ध्यापदार्थाकरणहेतुत्वेन द्विजत्वजात्यभाव उत्प्रेक्षितः । सन्ध्याकरणस्य उत्प्रेक्षाहेतुरुक्तः । अनुक्तहेतुका जात्यभावोत्प्रेक्षा यथा—

"आगच्छन्नेव पुरुषो न विप्र इति लक्ष्यते ।" इति ।

अत्र तु विप्रत्वव्यञ्जकसंस्थानाभावो हेतुरनुक्तः । एवं रीत्याऽन्यत्रापि हेतूक्त्यनुक्ती बोध्ये ।

"कीर्तिस्ते श्रीमतो दूरं प्रयाताऽनादरेव किम् ।"

इत्यत्र कीर्तिरनादरो गुण उत्प्रेक्षितः । तत्सपत्नीत्वेन अध्यासित्वं श्रीमत्त्वं हेतुरुक्तः ।

"अस्तं जगाम रजनी तदीशेन्दुमृतेरिव ॥"

इत्यत्र द्रव्यस्य इन्दोरभाव उत्प्रेक्षितः । रजन्यस्तगमनं तद्धेतुरुक्तः ।

(वि, ब) एषु हेतूनां क्रियात्वगुणत्वे स्वयमेव अवधातव्ये । पातकित्वं हेतुरिति । "प्रभाते हसतीवेयम्" इत्यत्र तु प्रियसूर्यदर्शनं हेतुरुक्तः । एवमन्यदिति । उत्सुकेव हसलेखा ज्योत्स्नामिन्दो मुमुदती ।" इत्यत्रोत्सुकत्वोत्प्रेक्षायामिन्दुज्योत्स्ना गुणः ।

(वि, भ) तन्वङ्गया इति । मुखाप्रकटनं वस्त्रावृतत्वात् । हासाय स्या-

---

(लो, उ) तथाविधौ रूपवन्तौ । क्रियाया दर्शनरूपायाः ।

हाराय गुणिने स्थान न दत्तमिति लज्जया"।

अत्र लज्जयेवेत्तीवाद्यभावात्प्रतीयमानोत्प्रेक्षा।

एवमन्यत्। (भ, ऊ)

ननु ध्वनिनिरूपणप्रस्तावेऽलङ्काराणा सर्वेषामपि व्यङ्ग्यत्व भवतीत्युक्तम्। सम्प्रति पुनः विशिष्य कथमुत्प्रेक्षाया प्रतीयमानत्वम्? उच्यते-व्यङ्ग्योत्प्रेक्षायाम्—

"महिला सहस्सभरिए तुह हिअए सुहअ सा भमाअन्ती।
अणुदिणअण्णण्णकम्मा अङ्ग तणु अपि तणू एइ॥" *

नादान निबिडसान्निध्येन सन्धिराहित्याच्च। स्थानादानमत्र गुणो हेतुरुक्त। एवमन्यदिति।

"विक्रीय विस्पष्टमुरोन वाला, मालाकृत· कैरवकोरकाणि। विक्रेतुकामा विकचाम्बुजानि चेलाञ्चलेनाननमावृणोति॥" इत्यत्राप्यम्बुजविक्रयेच्छाया मुखावरणहेतुत्वाभावाद् विक्रेतुकामेव "इत्युत्प्रेक्षाऽध्याहार। तदैव मुखचन्द्रादर्शनाद् पद्मनिमीलनस्य वारणमिति भाव। क्रियोत्प्रेक्षाध्याहारे तु हसत्यर्कोदयेऽम्बुजमिति जात्युत्प्रेक्षाध्याहारे "चाण्डालोऽन्यो द्विज पापी' इति। द्रव्योत्प्रेक्षाध्याहारे—चन्द्रोऽन्यमुखमेतस्या इत्यनयोरन्यपदसत्त्वान्न रूपकम्।

(वि, म) ननु इत्याद्याशङ्का स्पष्टैव। वाक्यार्थबोधस्योत्प्रेक्षाध्याहारं विनानुपपत्तौ तदध्याहारे प्रतीयमानोत्प्रेक्षा तदध्याहार विनापि वाक्यार्थबोधसम्भवे पश्चात्तात्पर्य्यवशाद् उत्प्रेक्षाव्यञ्जने उत्प्रेक्षाध्वनिरिति सिद्धान्तयितुमुत्प्रेक्षाध्वनिविषय दर्शयति—उच्यत इति। महिलेति। प्राग् व्याख्यातम्। नायकस्थाने-

---

(लो, ऊ) मुख चूचुकापरपर्य्याय वदनञ्च। गुण सूत्र विज्ञत्वविनयादिश्च। अत्र गुणोत्प्रेक्षा प्रतीयमाना। भावाभिमानश्च अन्यत्र यथा मम तातपादानाम्।

(विकसितमुखीं रागासङ्गाद् गलत्तिमिराशुका
दिनकरकरस्पृष्टामैन्दीं निरीक्ष्य दिशं पुर।
जरठलवलीपाण्डुच्छायो भृशं कलुषान्तर
भयति हरित प्रात प्राचेतसा तुहिनद्युति.॥)

अत्र निरीक्ष्येवेति निरीक्षणक्रियोत्प्रेक्षा प्रतीयमाना। एवमन्यत्र।

(लो,ऊ) एव च उत्प्रेक्षाध्वनेर्विवेक दर्शयितुकाम आशङ्कते-ननु इति। सिद्धान्तमाह—उच्यत इति। व्यङ्ग्योत्प्रेक्षाया काव्यस्य ध्वनित्वप्रयोजकस्य व्यङ्ग्यभूत-

---

* "महिलासहस्रभरिते तव हृदये सुभग साऽमान्ती।
अनुदिनमनन्यकर्म्माङ्ग तन्वपि तनूकरोतीति॥"

इत्यादावुत्प्रेक्षणं विनापि वाक्यविश्रान्तिः । इह तु स्तनयोर्लज्जाया असम्भवाल्लज्जयेवेत्युत्प्रेक्षयैवेति व्यङ्ग्यप्रतीयमानोत्प्रेक्षयोर्भेदः । (म, ऋ)

अत्र वाच्योत्प्रेक्षायाः षोडशसु भेदेषु मध्ये विशेषमाह—(य)

तत्र वाच्याभिदाः पुनः ।
विना द्रव्यं त्रिधा सर्वाः स्वरूपफलहेतुगाः ॥ ६० ॥ (र, ऋ)

कनायिकानुरागात् कृशीभवन्त्यास्तत्पत्न्या अवस्थां तस्मिन् श्रोतरि दयन्त्यास्तत्सख्या उक्तिरियम् । सा तव पत्नी अमान्ती अवकाशमलभमाना दिवसं व्याप्य तनयति तनूकरोति । नामधारितान्तस्य तनुशब्दस्य रूपमिदम् । इत्यादाविति । विश्रान्तिर्बोधः । भाव्यमानत्वसम्बन्धेन स्थानप्राप्तेरभावस्याभाव्यमानत्वादेव बोधसम्भवात् । परन्तु अङ्गतनूकरणतात्पर्यानुसन्धानेन संयोगसम्बन्धेन मनसि स्थानाप्राप्तिरेवाङ्गतनूकरणहेतुतया प्रतीयते । तच्च बाधितमित्यतः स्थानाप्राप्त्युत्प्रेक्षाध्वनिः । तन्वङ्गया इत्यत्र तु न तथेत्याह—इह तु इति । इत्युत्प्रेक्षयेव इत्यत्र । विश्रान्तिरिति अनुषङ्गः । उत्प्रेक्षयोर्भेद इति । उत्प्रेक्षयोरप्याहार्यत्वव्यङ्ग्यत्वाभ्यां भेद इत्यर्थः ।

(वि, य) वाच्योत्प्रेक्षायाः षोडशसु इति । जात्यादिचतुष्कस्य तच्चतुष्काभावस्य च उत्प्रेक्षा वाच्या अष्टविधाः तदष्टकस्यैव गुणक्रियाहेतुकत्वाद् द्वैविध्येन षोडशत्वम् । एवं प्रतीयमानायामपि षोडशत्वं प्रागुक्तं स्मर्तव्यम् ।

(वि, र) तत्र वाच्येति । वाच्याया उत्प्रेक्षाया भिदाः भेदाः । जात्यादिचतुष्कस्य भावाभावरूपत्वेन द्वैगुण्यं प्रत्येकं च गुणक्रियाहेतुकत्वेन द्वैगुण्याच्चतुर्विधत्वमिति वाच्योत्प्रेक्षाया यत्तत् षोडशविधत्वमुक्तं तत्र द्रव्योत्प्रेक्षाचतुष्कं विना द्वादशानामेव त्रैगुण्यं भवतीत्याह—**विना द्रव्यमिति**। द्रव्योत्प्रेक्षाचतुष्कं विनेत्यर्थः। **स्वरूपेति** । उत्प्रेक्षितस्य वस्तुनः वस्यापि फलत्वेन हेतुत्वोक्तौ तत्स्वरूपविषया उत्प्रेक्षास्वरूपोत्प्रेक्षा । तद्द्वयान्यतरत्वेन उक्तौ तु तद्द्वयान्यतरगा ।

स्योत्प्रेक्षायाम् । गतार्थः पूर्वं व्याख्यात एव उत्प्रेक्षा विना अपि वाक्यविश्रान्तेरिति । अयमाशयः । अमान्तीति पदस्य तव हृदयानुरागपात्रतामप्राप्य" इत्यर्थेनाभिधेये विश्रान्तेरिति । इह प्रकृतोदाहरणे व्यङ्ग्यप्रतीयमानोत्प्रेक्षयोर्भेद इति । अयमाशयः । प्रतीयमानस्य वाच्यसिद्ध्यङ्गत्वादित्यादिना यथान्येषामपि बहूनामलङ्कारणामलङ्कारविशेषता तथोत्प्रेक्षाया अपीति न कश्चित् क्षतिः । यत्र तु काव्यध्वनित्वहेतुर्व्यङ्ग्यता न तत्रालङ्कारता युक्तेति । एवं यत्किञ्चित् महिलासहस्रेत्यादि प्रतीयमानोत्प्रेक्षायामुदाहर्तं तदयुक्तमिति भावः ।

(वि, ऋ) स्वरूपफलहेतुगाः । स्वरूपोत्प्रेक्षा, फलोत्प्रेक्षा, हेतूत्प्रेक्षा चेति । स्वरूपं धर्म्मान्तरम्, विषयसनसंख्यतयाभिहितौ धर्म्मौ च ।

तत्रोक्तेषु वाच्यप्रतीयमानोत्प्रेक्षयोर्भेदेषु मध्ये ये वाच्योत्प्रेक्षायाः षोडश भेदास्तेषु जात्यादीनां त्रयाणां ये द्वादश भेदास्तेषां प्रत्येकं स्वरूपफल-[1]हेतुगत्वेन द्वादशभेदतया षट्त्रिंशद्भेदाः । द्रव्यस्य स्वरूपोत्प्रेक्षणमेव सम्भवतीति चत्वार इति मिलित्वा चत्वारिंशद्भेदाः ।

अत्र स्वरूपोत्प्रेक्षा यथा—

पूर्वोदाहरणेषु " स्मरस्य विजयस्तम्भः" इति ।

सप्रसवा इवेत्यादय. जातिगुण[2]रूपाः । (ल)

फलोत्प्रेक्षा यथा—

"रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः ।
विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम् ॥"

अत्र आख्यातुमिति भूप्रवेशस्य फलं क्रियारूपमुत्प्रेक्षितम् । (घ, ल)

हेतूत्प्रेक्षा यथा—

"सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम् ।

(वि, ल) व्याचष्टे—तत्रेति । ये द्वादश भेदा इति । चतुष्कत्रयस्य द्वादशत्वात् । तेषा प्रत्येकं द्वादशभेदतयेत्यर्थ. । एकैकचतुष्कस्य त्रैगुण्याद् द्वादशत्वम्—षट् त्रिंशदिति । द्वादशत्रयस्य षट्त्रिंशत्त्वात् । चत्वारिंशदिति । द्रव्यो प्रेक्षाचतुष्कस्य षट्त्रिंशत्साहित्यात् । तत्र जातिगुणयो· स्वरूपोत्प्रेक्षाद्वयं पूर्वोक्तमेव दर्शयति—अत्र स्वरूपेति । जातिगुणस्वरूपा इत्यत्र जातिगुणादिस्वरूपा इत्यर्थः । आदिपदात् क्रियाद्रव्योत्प्रेक्षापरिग्रह । अत्रैव जातिगुणेत्यत्र क्रियागुणेति क्वचित्पाठादिक एव पाठ । क्रियोत्प्रेक्षाया अनुक्तत्वेन आदिपदग्राह्यत्वादेव, तत्क्रियास्वरूपोत्प्रेक्षा स्नातीवेति, द्रव्यस्वरूपोत्प्रेक्षा पूर्णचन्द्र इवापर इति पूर्वोक्तद्वयमेव ।

(वि, घ) इत्थं स्वरूपोत्प्रेक्षाया द्रव्येऽपि सम्भवादादिपदग्राह्याभ्या सह जात्यादिचतुर्ष्वेव दर्शयित्वा फलोत्प्रेक्षा हेतूत्प्रेक्षाञ्च द्रव्यं विहाय जात्यादित्रिषु दर्शयितुं क्रियागामिनीं फलोत्प्रेक्षामाह—रावणस्यापीति ।

रामास्तो रामक्षिप्तः आशुगोऽपि रावणस्य हृदयं भित्त्वा उरगेभ्यः प्रियमाख्यातुमिव भुवं विवेश इत्यन्वय । अत्रेति । आख्यानक्रियारूपं प्रवेशस्य फलमुत्प्रेक्षितमित्यर्थः । तुमर्थेच्छाविषयस्य फलत्वप्रतीते· ।

(वि, श) सैषा स्थलीति—पुष्पकस्था सीता प्रति रामस्योक्तिरियम् । त्वा

(लो, ल) रामास्तो रामेण क्षिप्त । प्रियमाख्यातुमिवेति सम्बन्धः ।

---

1 'गम्य' (क. पु.)
2 'स्वरूपा.' (क. पु)
'रूपगा.' (च. ज पु.)

अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ॥"
अत्र तु स्वरूपो गुणो हेतुत्वेनोत्प्रेक्षित । एवमन्यत् ।(श, ए)

उक्त्यनुक्त्योर्निमित्तस्य द्विधा तत्र स्वरूपगा ॥ ६१ ॥ (प)

तेषु चत्वारिंशत्सङ्ख्याकेषु भेदेषु मध्ये ये स्वरूपगाया षोडश भेदा ते

विचिन्वता विचारयता मया, यत्र भ्रष्टमर्थात्त्वच्चरणात्पतितमेक नूपुरमदृश्यत सैषा स्थली । नि शब्दस्य नूपुरस्य मौनहेतुमुत्प्रेक्षते—त्वच्चरणेति । अत्रेति । हेतुत्वाभावादित्यर्थ । एवमन्यदिति । क्रियोत्प्रेक्षाया फलगामित्वमेवोक्त न हेतुगामित्वम्, गुणोत्प्रेक्षाया हेतुगामित्वमेवोक्त न फलगामित्वम्, जात्युत्प्रेक्षायास्त्वनेकगामित्वमप्युक्तम् । एव रीत्या तदूह्यमित्यर्थ । तत्र क्रियोत्प्रेक्षाया हेतुगत्व यथा—

'यशस्तव महीपाल ! मार्जनादिव निर्मलम् ।'

इत्यत्र नैर्मल्यहेतुत्वेन मार्जनक्रियोत्प्रेक्षिता । गुणस्य फलगामित्व यथा—

'सदा कीर्तिमुख पद्म पुण्यार्थमिव तिष्ठति ।'

अत्र पुण्य गुणश्च फलत्वेनोत्प्रेक्षितम् । जात्युत्प्रेक्षाया फलगामित्व यथा—

"कामुकस्य रतौ बाला कन्दर्पशरपीडिता ।
नखक्षतकृत दु ख सुखत्वायेव वाञ्छति ॥"

अत्र नित्याया अपि सुखत्वजातेर्दुःखे आरोप्यत्वरूपवाञ्छाया फलमुत्प्रेक्षितम् जात्युत्प्रेक्षाया हेतुगामित्व यथा—

'राहुग्रस्तोऽपि शीताशुर्द्विजत्वादिव पुण्यकृत् ।' इति

अत्र पुण्यजननत्वेन द्विजत्वजातिरुत्प्रेक्षिता । यथापि—

'कोक्यूनोर्मनोदु ख चन्द्रादिव समुत्थितम् ।'

इत्यादिषु द्रव्योत्प्रेक्षाया अपि हेतुगामित्व सम्भवति तथापि विरलत्वाद् वैचित्र्य विशेषानावहत्वाच्च तदसम्भवो दर्शित ।

(वि, प) वाच्योत्प्रेक्षायाश्चत्वारिंशद्विधत्व गुणक्रियारूपनिमित्तद्वयघटित दर्शितमेव । सम्प्रति तु निमित्तानुक्तिवशादेव षोडशप्रकारकत्वेन षट्पञ्चाशद्विधत्व दर्शयितुमाह—**उक्त्यनुक्त्योरिति** । जात्यादित्रयस्य फलहेतुगत्वेन निमित्तानुक्त्यसम्भवस्य वक्ष्यमाणत्वात् त्रयस्य द्रव्यगोत्प्रेक्षाया स्वरूपगामित्व एव निमित्तानुक्तिसम्भवादाह—**द्विधेति** । **स्वरूपगा** इति । नतु फलहेतुगा इत्यर्थ ।

(वि, स) व्याचष्टे—**तेष्विति** । ये स्वरूपगाया षोडश भेदा जातिगामित्यो

(लो, ए) गमेत्यत्र चलनद्रव्ययोगाभावाद् नूपुरस्य मौनित्वम्, तदेव तु न हेतुकमौनित्वाभावेनाध्यवसितम् । यद्वा नूपुरमौनित्वहेतुभूतद्रव्यगयोगाभाव एवतु सतादात्म्येन अध्यवसित । तत्र च पञ्चेऽतिशयोक्तिवद् विषयस्य गम्यमानता । एतच्चापे स्फुटीभविष्यति ।

उत्प्रेक्षानिमित्तस्योपादानानुपादानाभ्यां द्वात्रिंशद्भेदा इति मिलित्वा षट्पञ्चाशद्-भेदा वाच्योत्प्रेक्षाया । तत्र निमित्तस्योपादान यथा पूर्वोदाहृते—"घातीव" इत्युत्प्रेक्षाया निमित्त पातकित्वमुपात्तम् । अनुपादाने यथा—"चन्द्र इवापर" इत्यत्र तथाविधसौन्दर्याद्यतिशयो नोपात्त । हेतुफलयोस्तु नियमेन निमित्त-स्योपादानमेव । तथा हि, "विश्लेषदु खादिव" इत्यत्र यन्निमित्त बद्धमौनत्वम्, "आख्यातुमिव" इत्यत्र च भूप्रवेशस्तयोरनुपादानेऽसङ्गतमेव वाक्य स्यात् । (स, ऐ)

प्रतीयमानाया षोडशसु भेदेषु विशेषमाह—(यो)

प्रतीयमानाभेदाश्च[1] प्रत्येक फलहेतुगा ॥ ६२ ॥ (ह)

यथोदाहृते 'तन्वङ्ग्या स्तनयुग्मेन" इत्यत्र, 'लज्जयेव' इति हेतुरुत्प्रेक्षित', अस्यामपि निमित्तस्यानुपादान न सम्भवति, इवाद्यनुपादाने निमित्तस्य चाकीर्त्तने उत्प्रेक्षणस्य प्रमातुर्निश्चनुमशक्यत्वात् । (क)

जात्या चतस्रा, भावाभावविषयत्वेनाष्टौ, गुणक्रियानिमित्तद्वैविध्यात् षोडशप्रकारत्व स्वरूपोत्प्रेक्षाया बोध्यम्। **उपादानानुपादानाभ्यामिति**। उपादानघटिताश्च षोडश चत्वारिंशद्गणनाप्रविष्टा एव। अनुपादानघटिता षोडशमात्रवृत्तिर्गोह्या। नच निमित्तानु पादाने कथ तद्द्वैविध्यघटित षोडशत्वम् अष्टत्वस्यैवौचित्यादिति वाच्यम् । क्वचिन्निमित्तभूता क्रियायैव तस्या अनुक्तौ । क्वचित्तादृशस्य गुणस्यानुक्तौ । अनुक्ता वपि द्वैविध्यसम्भवात् । **मिलित्वेति**। अनुक्तनिमित्तकषोडशभि सह मिलित्वे-त्यर्थ । इद स्वरूपोत्प्रेक्षायामेव हेत्वनुक्तिसम्भवात् षट्पञ्चाशत्त्व नतु फलयोगो-त्प्रेक्षायामित्याह—**हेतुफलयोस्त्विति**। भूप्रवेश इत्यत्रापि यन्निमित्तमित्यन्वय । **असङ्गतमेवेति**। तुमन्तपदमन्तयोराकाङ्क्षाऽनिवृत्तिरेवासङ्गतिः ।

(वि, ह) **प्रतीयमानाया षोडशस्विति**—भावाभावविषयकत्वेन जात्या-दिचतुष्कोत्प्रेक्षा अष्टौ, गुणक्रियानिमित्तद्वयवशाच्च षोडशेति प्रागेव दर्शितम्। **फलहेतुगा** इति। नतु स्वरूपेणेति वक्ष्यते । तथा च फलगामित्वहेतुगामित्व द्वैविध्याद् द्वात्रिंशत्प्रकारा इति वक्ष्यते ।

(वि, क) ननु निमित्तानुपादानकृता परषोडशाऋद्धि कथ न प्रदर्श्यते इत्याह—**अस्यामपीति**। अस्या प्रतीयमानोत्प्रेक्षायामित्यथ । फलहेतुगत्वे वाच्योत्प्रेक्षाया-मिवास्यामपीत्यर्थ । तदसम्भवमुपपादयति—**इवाद्यनुपादान** इति । तथा हि,

---

(लो, ऐ) उक्तिर्वाचकपदप्रयोग , अनुक्तिस्तदभावेऽप्यर्यलभ्यता । **असङ्ग-तमेवेति**। साकाङ्क्षत्वादिति भाव ।

(लो, ओ) षोडशसु—समनन्तरोक्तेषु ।

---

1 'प्रतीयमानाभेदाच्च' (क पु)

स्वरूपोत्प्रेक्षाप्यत्र न भवति । धर्म्यन्तरतादात्म्यनिबन्धनायामस्यामिवाद्यप्रयोगे विशेषणयोगे सत्यतिशयोक्तेरभ्युपगमात् । यथा—"अयं राजाऽपरः पाकशासनः" इति । ('विशेषणस्याभावे च रूपकस्य; यथा—'राजा पाकशासनः' इति ।) तदेवं द्वात्रिंशत्प्रकारा प्रतीयमानोत्प्रेक्षा । (ख, औ)

उक्त्यनुक्त्योः प्रस्तुतस्य प्रत्येकं ता अपि द्विधा ॥ ६३ ॥ (अ)

ता उत्प्रेक्षाः । उक्तौ यथा—"ऊरुः कुरङ्गकदृशः" इति । (ग)

अनुक्तौ यथा मम प्रभावत्याम्—"प्रद्युम्नः—इह हि सम्प्रति [2]प्रतिदिगन्तमाच्छादयता तिमिरपटलेन—

"तन्वङ्गयाः" इत्यादौ हाराय स्थानादानं लज्जोत्प्रेक्षाया हेतुः, तदनुपादाने तु लज्जाहेत्वदर्शनाल्लज्जोत्प्रेक्षा प्रमात्रा बोद्धा निश्चेतुमशक्यैवेत्यर्थः । तदनिश्चयेऽचेतनस्य स्तनयुग्मस्य लज्जासम्भवात् तदन्वयो बाधित एव स्यादित्यर्थः । नच बाधवशादुत्प्रेक्षा निश्चीयतामिति वाच्यम् । हेत्वभावे कुतो लज्जेत्याकाङ्क्षासत्त्वान्निश्चयासम्भवात् ।

(वि, ख) अस्या हेतुफलगामित्वमेवोक्तम्, स्वरूपगामित्वेनापरप्रभेदद्वैविध्यं कथं न दर्शितेत्यत्राह—**स्वरूपोत्प्रेक्षाप्यत्रेति** । तदसम्भवमुपपादयति—**धर्म्यन्तरेति** । प्रकृते धर्मिण्यप्रकृतधर्म्यन्तरतादात्म्यं यत्र निबध्यते, तन्निबन्धनं यस्या तादृश्यामस्यामुत्प्रेक्षायामित्यर्थः । **विशेषणयोग** इति । उत्प्रेक्षणीयचन्द्रादेरपरत्वादिविशेषणोपादान इत्यर्थः । तथात्वेऽतिशयोक्तिं दर्शयति—**यथायं राजेति** । अत्र भेदेऽप्यभेदारोपरूपातिशयोक्तिः । तदनुपादाने तु रूपकस्याभ्युपगमादित्याह—**विशेषणस्येति** । तद्दर्शयति—**राजेति** । **द्वात्रिंशत्प्रकारेति** । वाच्योत्प्रेक्षाया मेलने त्रिषष्टीतिप्रकारेति बोध्यम् ।

(वि, ग) अष्टाशीतिप्रकारायाः अस्या द्वैगुण्येन षट्सप्तत्युत्तरैकशतरूपतामाह—**उक्त्यनुक्त्योरिति** । प्रस्तुतस्य प्राकरणिकस्य । वाच्यप्रतीयमानसमस्तभेलनेनाष्टाशीतिरूपोत्प्रेक्षा । नच प्राकरणिकानुक्तौ तस्य निगरणरूपातिशयोक्तिरेवेति वाच्यम् । स्वरूपोत्प्रेक्षायामेव तत्प्रसक्तेः । प्रतीयमानोत्प्रेक्षाया तु स्वरूपोत्प्रेक्षाऽसम्भवस्य दर्शितत्वादेव । वाच्योत्प्रेक्षायामिवादिसत्त्वादेव नातिशयोक्तिप्रसक्तिः । वाच्योत्प्रेक्षायां प्रकृतोक्तिं दर्शयति—**ऊरुरिति** ।

(लो, औ) न भवति—तद्विषयेऽलङ्कारान्तरानीकरणादित्यर्थः । तदेवाह—**धर्म्यन्तरेति** ।

(लो, अ) प्रस्तुतस्य—उत्प्रेक्षाविषयस्य । ताः—समनन्तरोक्तप्रकाराः ।

---

1 'कुण्डलितः पाठे नास्ति (क. पु.)

2 'दिगन्तरम्' (क. पु.)

"घटितमिवाञ्जनपुञ्जै पूरितमिव मृगमदस्य दोर्दै ।
ततमिव तमालतरुभिर्वृतमिव नीलांशुकैर्भुवनम् ॥"

अत्राञ्जनेन घटितत्वादेरुत्प्रेक्षणीयस्य विषयस्याप्तश्च नोपात्तम् । (घ)

यथा वा—

"लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।" *

अत्र तमसो लेपनस्य व्यापनरूपो विषयो नोपात्तः, अञ्जनवर्षणस्य तमःसम्पातः । अनयोरुत्प्रेक्षानिमित्तयोश्च तमसोऽतिबहुलत्वं धारारूपेणाघसंयोगश्च यथासङ्ख्यम् । केचित्तु "अलेपनकर्तृभूतमपि तमो लेपनकर्तृत्वेनोत्प्रेक्षितं व्यापनं च निमित्तम् । एवं नभोऽपि वर्षणक्रियाकर्तृत्वेन" इत्याहुः । (ङ, आ)

(वि, घ) घटितमिवेत्यादि–तिमिरपुञ्जेनैवमेव कृतमिवेत्यर्थः । तत्तत्करणं दर्शयति-घटितमिवेति । भुवनमञ्जनपुञ्जैर्घटितं निर्मितमिवेत्यर्थः । ततं व्याप्तम् । वृतमाच्छादितम् । विषय इति–प्रस्तुतरूपः ।

(वि, ङ) परकीयश्लोकमपि दर्शयति–लिम्पतीवेति । तमः सम्पात इत्यनुषङ्गः इत्यन्वयः । सम्पातश्चाघसंयोगहेतुपतनक्रिया, नत्वघसंयोगः । अतोऽत्र निमित्तत्वेन वक्ष्यमाणाघसंयोगस्य भेदः । अनयोरुक्तनिमित्तं दर्शयति–अनयोरिति । इयं क्रियास्वरूपोत्प्रेक्षा । केचित्त्वत्र कर्तृस्वरूपद्रव्योत्प्रेक्षामाहुः । तद्दर्शयति–केचित्त्विति । अत्र केचिदित्यरुचिरसूचनम् । क्रियोत्तरमिवकारात्तमोनभसोर्वास्तवत्वेनानुत्प्रेक्षणीयत्वाच्च । लेपनवर्षणकर्तृत्वमवास्तवमिति चेत्तदा लेपनवर्षणयोरेवोत्प्रेक्षापर्यवसानात् ।

(लो, आ) क्षोदैश्चूर्णैः । अनयोर्घटितमिवेत्यादेर्लिम्पतीवेत्यादेश्चोदाहरणयोरुत्प्रेक्षानिमित्तमित्यत्र पूर्वं व्यापनस्याञ्जनघटनादीति शेषः । "वर्षतीवाञ्जनं नभः" इत्यत्र च धारारूपेणाघसंयोग इत्यर्थः । केचिदलङ्कारसर्वस्वकारादय इत्याहुरिति सम्बन्धः । लेपनकर्तृत्वेनोत्प्रेक्षितं लिम्पतीति ततः कर्तृताभिधानात्तस्य च तमसि सामानाधिकरण्येन तद्गततात्प्रत्ययादित्यभिसन्धिः । तेषामेषा युक्तिः–तमोगतत्वेन लेपनक्रियाकर्तृत्वोत्प्रेक्षाया लेपनादिनिमित्तं गम्यमानम् । व्यापनादावुत्प्रेक्षाविषयत्वे निमित्तमन्यदन्वेष्यं स्यात् । नच विषयस्य गम्यमानत्वं युक्तम्, तस्योत्प्रेक्षाधारत्वेन प्रस्तुतस्याभिधातुमुचितत्वात् । अत्र केचिदित्यनेनात्मनोऽरुचिप्रकटनम् । तथा हि अतिशयोक्तौ कमलमनम्भसीत्यादाविवात्र विषयनिमित्तयोर्द्वयोरप्यत्र गम्यमानत्वमेव । व्यापनकर्तर्येव तमसि लेपनकर्तृत्वसम्भावनस्य तमसो लेपनकर्त्रा सादृश्यविरहाच्च ।

---

* अत्र क्रियास्वरूपोत्प्रेक्षैव, नतूपमा, तिङन्तसमभिव्याहृतत्वेवशब्दस्य सम्भावनाबोधकत्वात् । तथाहि "न वै तिङन्तेनोपमानमस्ति ।" इति महाभाष्यम् । "किन्तु वत्र सम्भावनार्थक इवशब्द" । इति कैयटः । तस्य कारणं तु प्रागेवोक्तम् ।

अलङ्कारान्तरोत्था सा वैचित्र्यमधिकं भजेत् ॥ ६४ ॥ (च)

तत्र सापह्नवोत्प्रेक्षा यथा मम—

"अश्रुच्छलेन सुदृशो हुतपावकधूमकलुषाद्याः ।
अप्राप्य मानमङ्गे विगलति लावण्यवारिपूर इव ।" (छ, इ)

श्लेषहेतुगा यथा—

"मुक्तोत्करः सङ्कटशुक्तिमध्याद् विनिर्गतः सारसलोचनायाः ।
जानीमहेऽस्याः कमनीयकम्बुग्रीवाधिवासाद् गुणवत्त्वमाप ॥"

अत्र गुणवत्त्वे श्लेषः कम्बुग्रीवाधिवासादिवेति हेतूत्प्रेक्षाया हेतुः ।
अत्र 'जानीमहे' इत्युत्प्रेक्षावाचकम् । (ज, ई)

संयोगविशेषस्येव हि व्याप्तिनान्नोरतिशयस्थगनसाम्येन रूपसम्भावना उत्प्रेक्षाभेदः प्रतीयते । विषयस्य गम्यता हेतुफलोत्प्रेक्षयोरङ्गीक्रियते । स च यदि स्वरूपोत्प्रेक्षायामेव स्यात्तदा को दोष इत्यलं बहुना ।

(वि, च) अलङ्कारान्तरोत्थेति । सा दर्शितसमस्तप्रकारोत्प्रेक्षाऽलङ्कारान्तरोत्था अलङ्कारान्तरनिष्पन्ना चेत्तदाधिकं वैचित्र्यं भजेदित्यर्थः ।

(वि, छ) अश्रुच्छलेनेति । पत्यौ जुह्वति तत्सन्निधिस्थाया नायिकाया अश्रुनिर्गमवर्णनमिदम् । हुतपावकधूमकलुषाद्याः सुदृशोऽङ्गे मानमवकाशमप्राप्य लावण्यवारिपूर इव अश्रुच्छलेन विगलतीत्यर्थः । अत्र छलपदादश्रुपह्नवो विगलल्लावण्यवारिपूरात्मकस्वरूपोत्प्रेक्षानिष्पादकः । अश्रुपह्नवं विना तदसम्भवादधुणि लावण्यरूपकस्यैवापत्तेः । अत्र च वारिपूरकसत्त्वेपि न तदुत्प्रेक्षानिष्पादकम् । तद्धि नापि लावण्यमित्युक्तावप्युत्प्रेक्षानिष्पत्तेः ।

(वि, ज) मुक्तोत्कर इति । आवरणयन्त्रितत्वेन संकटाद् दुःखदायकात् शुक्तिमध्याद् विनिर्गतो मुक्तोत्करः सारसाक्ष्या अस्या कमनीयकम्बुग्रीवाधिवासाद् गुणवत्त्वं तन्तुमत्त्वमेव, गुणवत्त्वं ज्योतिराधिक्यमापेति जानीमहे उत्प्रेक्षामहे इत्यर्थः । अस्थानस्थितिदुःखोत्तीर्णस्य गुणवत्स्थानवासादिव गुणवत्त्वप्राप्तिरित्यर्थः । त्रिरेखाविशिष्टा ग्रीवा कम्बुः । अत्र तन्तोर्वास्तवत्वान्न तत्प्राप्तिहेतूत्प्रेक्षा सम्भवतीत्यतो गुणपदश्लेषाज् ज्योतिर्विशेषप्राप्तिहेतूत्प्रेक्षा इत्यतः श्लेषनिर्वाह्या इयमुत्प्रेक्षा ।

(लो, इ) सापह्नवोत्प्रेक्षेत्यनेन सहार्थनिर्देशनापह्नतेरङ्गभाव । सम्भावनाया एव उद्रेकावभासात् । हुतः पावको विवाहकालीनः ।

(लो, ई) गुणः सूत्रं महार्घ्यतादिश्च । अत्र श्लेषहेतुकत्वं स्पष्टशब्दान्वयव्यतिरेकानुविधानादेव ।

एवम्—

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः ॥ ६५ ॥ (उ)

कचिदुपमोपक्रमोत्प्रेक्षा यथा—

"पारेजलं नीरनिधेरपश्यन्मुरारिरानीलपलाशराशीः ।
वनावलीरुत्कलिकासहस्रप्रतिक्षणोत्कूलितशैवलाभाः ॥"

इत्यत्राभाशब्दस्योपमावाचकत्वादुपक्रमे उपमा । पर्यवसाने तु जलधितीरे शैवलस्थितेः सम्भवोपपत्तेः सम्भावनोत्थानमित्युत्प्रेक्षा । (ऋ, ऊ) +

(वि, ऋ) **कचिदुपमोपक्रमोत्प्रेक्षा** इति । उपक्रान्तायां उपमायां एवोत्प्रेक्षेत्यर्थः । **पारेजलमिति**—मुरारिः श्रीकृष्णः नीरनिधेः समुद्रस्य पारेजलं जलस्य पारे कूले वनावलीरपश्यत् । कीदृशीः ? आनीलः पलाशानां पत्राणां राशिर्यासु । पुनः कीदृशीः ? उत्कलिकासहस्रेण तरङ्गसहस्रेण प्रतिक्षणोत्कूलितानां शैवलानामाभा इवेत्यर्थः । अत्रोपमाया एवोत्प्रेक्षां प्राहयति—**अत्राभाशब्दस्येति** । शैवलस्येव आभा यत्रेति बहुव्रीहिसमासवशादुपमाप्रतिपादकस्येत्यर्थः । अनेन उपमोपक्रमो दर्शितः । ततस्तस्या उपमाया उत्प्रेक्षामुपपादयति—**पर्यवसाने त्विति** । 'शैवलाभा' इत्यनेनैवोपमापर्यवसानसम्भवे उत्कूलत्वकथनमनुपयुक्तमत उत्कूलितशैवलाभा इवेति पर्यवसाने उत्प्रेक्षेत्यन्वयः । तादृशोत्प्रेक्षाया उत्थानमुपपादयति—**जलधितीर इति** । वनान्तर उत्कूलितशैवलासम्भवात् तत्र न तत्सम्भावनोत्थानम् । जलनिधितीरे शैवलस्थितेः सम्भवस्योपपत्तेरनुपपत्त्यभावात् सम्भावनोत्थानमुत्कूलितशैवलसम्भावोत्थानमित्यर्थः । ततस्तदाभा इवेत्युत्प्रेक्षेत्यत आह—**उत्प्रेक्षेति** । तत्सम्भावनोत्थानाभावे उत्कूलितविशेषणवैयर्थ्यमिति भावः एवं चोत्प्रेक्षाया उपक्रान्तोपमाविषयत्वादुपमानिष्पाद्येयमुत्प्रेक्षेत्यर्थः ।

(लो, उ) जानीमहे इति मन्ये इत्यादयोऽप्युत्प्रेक्षावाचका ज्ञेया इत्यर्थः । आदिशब्देन किमादयः । तत्र किंशब्दस्य प्रयोगे यथा गोपीनाथस्य गङ्गावर्णने—

("वलिप्रसूनावलिमूर्मिहस्तैः सञ्चारयन्ती भजतां सुदूरम् ।
विक्रीय कैवल्यममुष्य मूल्यं वराटसंख्यां किमियं करोति ॥")

(लो, ऊ) उपमोपक्रमोत्प्रेक्षा—उपमोपक्रमे पदार्थान्वयवेलाया तद्वाचकशब्दोपादानाद् यस्यास्तथाभूता । वाक्यप्रतीत्यनन्तरं सम्भावनाकर्तुरभिमानव्यापारस्याविर्भावाद् विश्रान्तावुत्प्रेक्षा । उत्कलिका वीचयः । उत्कूलितानि—कूलमुद्रतानि ।

+ अत्र "सम्भावनानुपपत्तेः" इति पाठस्तु सर्वपुस्तकेषु दृश्यते परं तु असङ्गतत्वान्न स साधुः । किन्त्रियाहत. पाठ एव साधु. । अलङ्कारसर्वस्वेऽपि, "तथाप्युपमानस्य प्रकृते सम्भवौचित्यात्सम्भावनोत्थान उत्प्रेक्षायां पर्यवसानम्" एवं पाठः प्रकरणेऽस्मिन् दृश्यते ।

एवं विरहवर्णने—"केयूरायितमङ्गदैः" इत्यत्र "विकासिनीलोत्पलति स्म कर्णे, मृगायताक्ष्याः कुटिलः कटाक्षः" इत्यादौ च ज्ञेयम्। (झ, ञ)

भ्रान्तिमदलङ्कारे, "मुग्धा दुग्धधिया" इत्यादौ भ्रान्तानां बह्ववादीनां विषयस्य चन्द्रिकादेर्ज्ञानमेव नास्ति। तदुपनिबन्धस्य कवेर्नैव कृतत्वात्। इह तु सम्भावनाकर्तुर्विषयस्यापि ज्ञानमिति द्वयोर्भेदः। (ञ, ट)

सन्देहे तु समकक्षतया कोटिद्वयस्य प्रतीतिः। इह तु उत्कटा सम्भाव्यभूता एका कोटिः। अतिशयोक्तौ विषयिणः प्रतीतस्य पर्यवसानेऽसत्यता प्रतीयते; इह तु प्रतीतिकाल एवेति भेदः। (ट, ठ)

(वि, झ) **केयूरायितमिति**। केयूरैरिवाचरितमिवेत्यर्थः। केयूरं कङ्कणम्। विरहकार्श्यादङ्गदैः केयूरस्थानं प्राप्तमित्यर्थः। तत्रापि प्रत्ययवशात् प्राप्तोपमा अङ्गदस्याऽऽचाराभावादुत्प्रेक्ष्यते। श्रौत्युपमोत्प्रेक्षा दर्शयित्वा आर्थ्युपमोत्प्रेक्षां दर्शयति—**विकासी**ति। अत्रापि क्विब्लोपादार्थी लुप्तोपमा उत्प्रेक्ष्यते।

(वि, ञ) भ्रान्तिमदलङ्कारे निश्चयोऽत्र तु उत्कटकोटिकः संशय इति भेदसम्भवेऽपि भेदकान्तरमाह—**भ्रान्तिमदलङ्कार** इति। ज्ञानमेव नास्तीत्यर्थः। तत्सत्त्वे दुग्धधिया गवामधः कुम्भदानानुपपत्तेः। ज्ञानमेव नास्ति चन्द्रिकात्वेन। ननु, "न कस्य कुरुते चित्तभ्रमं चन्द्रिका" इत्युक्तिश्चन्द्रिकात्वेन ज्ञानमस्तीत्यत आह—**तदुपनिबन्धस्ये**ति। चन्द्रिकायां बह्ववानां भ्रमोपनिबन्धस्येत्यर्थः। तथा च कव्युक्त्या श्रोतृणां बह्ववादीनां न चन्द्रिकात्वेन ज्ञानमित्यर्थः। उत्प्रेक्षायामस्यां तद्वैलक्षण्यमाह—**इह त्वि**ति। सम्भावनाकर्तुः कवेस्तदुपनिबद्धजनस्येत्यर्थः। विषयस्यापि विषयस्यानुत्कटतया तत्कोटेरपि ज्ञानात्।

(वि, ट) तर्हि सन्देहालङ्कारभेद इत्यत आह—**सन्देहे** इति। एककोटेरुत्कटत्वतुल्यत्वाभ्यां भेद इत्यर्थः। अतिशयोक्तितो भेदमाह—**अतिशयोक्ताविति**। विषयिण आरोप्यमाणस्य पर्यवसाने उत्तरकाले, 'कथमुपरि कलापिनः कलाप' इत्यत्र कलापभ्रमानन्तरमेव केशत्वविशेषदर्शनात् कलापेऽसत्यता प्रतिपाद्यत इत्यर्थः। **इह त्वि**ति—सम्प्रसवा इवेत्यादावुत्प्रेक्षाकाल इत्यर्थः। एतच्चानुभववैलक्षण्यमभिप्रेत्योपात्तत

(लो, ञ) सम्प्रति प्रत्ययस्योपमावाचकत्वे उदाहरति—**केयूरायितमिति**। प्रत्ययलोपे उदाहरति—**विकासी**ति।

(लो, ञ) विषयस्य वर्ण्यमानस्य। चन्द्रिकादेरित्यादिशब्दाच्चन्द्रिकाशबलितकुवलयादिः। तदुपनिबन्धस्य काव्ये शब्देनोपनिबन्धस्य। इह—उत्प्रेक्षाया कोटिद्वयस्य विषयविषयिरूपात्मकस्य।

(लो, ठ) उत्कटा—विषयनिगरणेन प्रतीयमानत्वात्। एककोटिविषयरूपा।

"रञ्जिता नु विविधास्तरुशाला
नामित नु गगन स्थगित नु ।
पूरिता नु विषमेषु धरित्री
सहता नु ककुभस्तिमिरेण ॥" (ठ)

इत्यत्र यत्तर्वादो तिमिरव्याप्तत्वात् रञ्जनादिरूपेण सन्दिह्यत इति सन्देहालङ्कार इति केचिदाहु, तत्र, एकविषये समानबलतयानेककोटिस्फुरणस्यैव सन्देहत्वात्। इह तु तर्वादिव्याप्ते प्रतिसम्बन्धिभेदो व्यापनादेर्निगरणेन रञ्जनादेः स्फुरणञ्च । अन्ये तु, "[1]अनिर्धारणरूपविच्छित्त्याश्रयत्वेनैककोट्यधिकोऽपि भिन्नोऽय सन्देहप्रकार" इति वदन्ति स्म । तदप्ययुक्तम् । निर्गीर्णस्वरूपस्या-

---

एवोक्तम् । वस्तुतस्तु योनिबहिर्भावरूपप्रसवबाधस्येव नायिकाशिरसि कलापबाधस्यापि सत्त्वे एवाहार्यतदुभयबुद्धिसत्त्वेनोभयत्र साम्यमेव । किन्तूत्प्रेक्षा उत्कटकोटिकसन्देहरूपा, अतिशयोक्तिस्तु निश्चयरूपेति भेद । "कथमुपरि" इत्यत्र हि कलापस्याहार्यनिश्चय एव कथपदबोध्य सन्देहः ।

(वि, ठ) उत्प्रेक्षालङ्कारस्यैव विषये क्वचिच्छ्लोके सन्देहालङ्कार केचिदाहु, तद्दूषयितु श्लोकमाह—"रञ्जिता नु' इत्यादि । गाढतमोवर्णनमिदम् । रञ्जितान्विति—कृष्णवर्णीकृतेत्यर्थ । सर्वत्र निमिरेणेत्यन्वय । स्थगितमाच्छादितम् । विषमेषु—गभीरोच्चस्थलीषु । सहता नाशिताः ।

(वि, ड) अत्र केचिदुक्त सन्देहालङ्कार दर्शयति—इत्यत्रेति । एकविषय इति । एकधर्मिणि । तर्वादिव्याप्ति—तर्वादिकर्मकरचनादिव्याप्ति । प्रतिसम्बन्धितर्वादिरूप विशेष्य प्रतीत्यर्थ । ननु प्रतिविशेष्य सन्देहा एव बहव स्युरित्यत्र उत्प्रेक्षाप्रयहेतुविशेषश्चास्तीत्याह—व्यापनादेरिति । तिमिरव्यापनादेरित्यर्थ । आदिपदात्तिमिरकृतोच्चनीचादर्शनपरिग्रह । तस्य निगरणमत्रानुत्कटकोटिकरणम् । अन्ये तु सन्देहालङ्कारविशेष इत्याहु, तद्दर्शयति—अन्ये त्विति । अत्रोत्प्रेक्षामेव व्यवस्थापयितुमाह-तदप्ययुक्तमिति । निर्गीर्णस्वरूपस्यानुत्कटकोटिविशेषीकृतस्वरूप-

---

(सो, ठ) रञ्जनादीन्यादिशब्देन नमनादि । एको विषय, "स्थाणुवा पुरुषो वेत्यादौ स्थाण्वादि । अय मार्तण्ड तिमित्यादौ राजादि । समानबलतया—तैककोटितया, इह—प्रकृतोदाहरणे, तु—पुनरर्थ । तर्वादिव्याप्ते—तद्गगनादौ तमसो व्यापनस्य सम्बन्धिनस्तद्गगनादय, तद्भेदाद् व्यापनस्यापि भेद । ततश्च विषयभेदात्क्यमुत्कटस्य सशय इत्यर्थ । नच समानबलतयानेककोटिस्फुरणमपीत्याह—व्यापनादेरिति । अन्ये—एकदेशिन । अनिर्धारणम्—तरायर्थानेकदेश । कथमयुक्तमित्याह—निर्गीर्णेति । अन्यद् विषयात् । तस्या सम्भावनाया । अदृष्टन्यायवि-

---

1 'अनेकत्वनिर्धारणरूप' इति (ग घ) ।

न्यतादात्म्यप्रतीतिर्हि सम्भावना। तस्याश्चात्र स्फुटतया सद्भावानुशब्देन चेवशब्दवत्तस्या द्योतनादुत्प्रेक्षैवेयं भवितुं युक्ता, अलमदुष्टसन्देहप्रकारकल्पनया।
(ङ, ए) ×

"यदेतच्चन्द्रान्तर्नलदलवलीला वितनुते
तदाचष्टे लोक शशक इति नो मां प्रति तथा।
अहन्त्विन्दु मन्ये त्वदरिविरहाक्रान्ततरुणी—
कटाक्षालकापातव्रणकिणकलङ्काङ्कितततनुम्॥" (ढ)

इत्यत्र 'मन्ये'—शब्दप्रयोगेऽप्युत्प्रेक्षारूपाया सम्भावनाया अप्रतीतेर्वितर्कमात्रम्, नासावपह्नवोत्प्रेक्षा। (ण ऐ)

स्यान्यतादात्म्यमनुत्कटान्यकोटिभेद। नन्वत्र निगरणसत्त्वादतिशयोक्तिरेवप्रसक्तिरियत आह—नुशब्देन चेवशब्दवदिति।

(वि, ढ) 'यदेतच्चन्द्रान्त इत्यादिश्लोके सापह्नवोत्प्रेक्षाप्रसक्तिं निरस्यापह्नुत्यलङ्कारमात्र व्यवस्थापयितुमाह—यदेतदित्यादि। राहि कस्यचिदुक्तिरियम्। चन्द्र स्यान्तर्यदेतद्वस्तु, जलदलवस्य जलदखण्डस्य सादृश्यरूपां लीला वितनुते तद् वस्तु, लोक शशक इति आचष्टे। अन्यजन प्रति तदाचष्टां, मां प्रति तु न तथाचष्टे इत्यर्थ। मम तथात्वाभावनिश्चयादिति भाव। तर्हि तव कीदृशो निश्चय इत्यत्राह—अहन्त्विति। त्वया बन्दीकृतानामरीणा विरहेणाक्रान्तानां तदीयतरुणीनां कटाक्षोत्क्षेपातैर्जातो यो व्रणस्तस्य किणा व्रणस्थाने प्रकटभाग, स एव कलङ्को दोष, तच्चिह्निता तनुर्यस्य तादृशम्।

(वि, ण) उत्प्रेक्षारूपाया सम्भावनाया इति। उत्कटानुत्कटकोटिद्वयरूपाया इत्यर्थ। तदप्रतीतिश्च नो मां प्रति तथेत्यर्थ। तेन वस्तु शशकोत्थभावनिश्चयस्य प्रतीते। नासावपह्नवेति—तथा चापह्नवमात्रमिति भाव।

द्विरित्यर्थ। सन्देहप्रकारेऽनेकविषयनिष्ठ एककोट्यधिकरस्फुरणाकारश्च।

(लो, ऐ) जलदस्य मेघस्य लव। कलङ्काङ्कितम्—कलङ्कचिह्नितम्। 'मन्ये शब्द क्वचित् क्वचिदुत्प्रेक्षाद्योतक। उत्प्रेक्षारूपाया —अध्यवसायगम्यतापदवाच्यायाः। वितर्क —ऊहनम्।

× स्थाणुर्वा पुरुषो वा इत्यत्र सन्देह एकस्मिन्विषय एव कोटिद्वयस्य युगपत्प्रतीति र्भवति। इह तु भिन्नविषय एव ज्ञान भवति यथा—तरुशिखरेषु रत्नेन गगने नमन मित्यादि। अतोऽत्र ज्ञान प्रति तत्तदिगम्बन्धिभेदेन भिन्ने। नान्यत्रानेकवादिक ज्ञानम्। निगिरत्यसौ शब्देनानुपात्तत्वात्तस्य निगरणम्। शब्दोपात्तत्वात् केवलं रत्नादि ज्ञान प्रबन्धेन भवति। अतो नात्र स देहालङ्कार। तथापि केचिद् एककोट्येकनिष्ठस्य प्राबल्येऽपि निश्चयाभावादेव सन्देहमत्र स्वीकुर्वन्ति। तदयुक्तम्। अत्र किम

सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते ॥ ६६ ॥

विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोऽध्यवसायः । (त) †

तस्य चोत्प्रेक्षायां विषयिणोऽनिश्चितत्वेन निर्देशात्साध्यत्वम् । इह तु निश्चितत्वेनैव प्रतीतिरिति सिद्धत्वम् । विषयनिगरणं चोत्प्रेक्षायां विषयस्याधः-

---

(वि, त) अतिशयोक्त्यलङ्कारमाह—**सिद्धत्व** इति । अध्यवसायस्यारोपस्य सिद्धत्वे निश्चयरूपत्वे सति अतिशयोक्तिरित्यर्थः । एवं चानिश्चयरूपयोः सन्देहोत्प्रेक्षालङ्कारयोर्वारणम् । परन्तु निश्चयालङ्कारापह्नुत्यलङ्काररूपकालङ्कारेष्वतिव्याप्तिरवशिष्यते, तदलङ्कारत्रये आरोप्यस्य निश्चयरूपत्वात् । तद्वारणार्थमारोपविषयनिगरणपूर्वकत्वं विशेषणं दत्त्वाऽऽरोपविशेष्यपरत्वं निबध्नन् व्याचष्टे—**विषयनिगरणेनेति** । विषयिणोऽभेदप्रतिपत्तिरर्थाद् विषये अध्यवसाय इह विवक्षित इत्यर्थ । यत्रारोप्यते स विषयः । य आरोप्यते स विषयी । निगरणं चाधःकरणं व्याख्यास्यते । तदप्यनिस्पष्टार्थमतो विशेषार्थक शब्दं विना व्यञ्जनयैव विषयनिषेधबुद्धिरधःकरणम् । तच्च सर्वविधातिशयोक्तौ तदवसरे दर्शयिष्यते । अपह्नुतिनिश्चयालङ्कारयोर्निषेधार्थकशब्द एवास्ति इयतो न तत्र निषेध-व्यञ्जना । रूपके तु चन्द्रतादात्म्येनैव मुखप्रतीतिर्नतु मुखनिषेधप्रतीतिः । अपह्नुतेर्व्यङ्ग्यत्वे तु नासावलङ्कारः किन्तु तद्ध्वनिः । तत्रालङ्कारपदप्रयोगस्तु ब्राह्मणश्रमणन्यायादौपचारिक एव । किन्तु अपह्नुतिध्वनौ अपह्नुताविवातिव्याप्तिरिति, अतिशयोक्तौ तु अपह्नुतिपूर्वकेऽन्यतादात्म्यारोप इयनयोर्भेदः ।

(वि, श) सिद्धत्व इयस्य व्यावृत्तिं दर्शयति—**तस्य** चेति । साध्यत्वमनिश्चयत्वम् । सिद्धत्वं निश्चयत्वम् । उत्प्रेक्षावारणं निश्चयत्वविवक्षयैव न तु निगरणपूर्वकत्वविवक्षयेति दर्शयति—**विषयनिगरणं** चेति । अधःकरणपदार्थो विवृत

व्यापनस्य शब्देनोपादानाभावात् तत्तु निर्गीर्णस्वरूपम् । रजनादिकं तु शब्देनोपादानाभावात् प्रधानम् । तयोश्चाभेदप्रतीतिरूपा सम्भावना स्फुटमेवावगम्यते । अत्र नु-शब्दोऽपि उत्प्रेक्षाद्योतकः । अत उत्प्रेक्षैवात्रालङ्कारः न तादृशः सन्देहप्रकारः ।

† "अध्यवसायो द्विविधः साध्यः सिद्धश्चेति । साध्यो यत्र विषयिणोऽगल्यतया प्रतीतिः, असत्यत्वं च विषयिगतस्य धर्मस्य विषय उपनिबन्धे विषयिसम्भवित्वेन विषयासम्भवित्वेन च प्रतीतेः, धर्मो गुणक्रियारूपः । तस्य सम्भवासम्भवप्रतीतौ सम्भवाश्रयस्य तत्रापरमार्थतयाऽगल्यत्वं प्रतीयते, इतरस्य तु परमार्थतया सत्यत्वम् । यस्याऽगल्यत्वं तस्य गल्यत्वप्रतीतावध्यवसायः साध्यः । अतश्च व्यापारप्राधान्यम् । सिद्धो यत्र विषयिणो वस्तुनोऽसत्यस्यापि गल्यतया प्रतीतिः । गल्यत्वं च पूर्वकस्य अगल्यत्वनिमित्तस्याभावात् । अतश्चाध्यवसितप्राधान्यम् ।" (अलङ्कारसर्वस्व)

करणमात्रेण, इहापि "मुखं द्वितीयश्चन्द्रः" इत्यादौ। (ध)
यदाहुः—

"विषयस्यानुपादानेप्युपादानेऽपि सूरयः।
अधःकरणमात्रेण निगीर्णत्वं प्रचक्षते॥" इति। (द)

भेदेऽप्यभेदः सम्बन्धेऽसम्बन्धस्तद्विपर्ययौ।
पौर्वापर्यात्ययः कार्यहेत्वोः सा पञ्चधा ततः॥ ६७॥

एव। उत्प्रेक्षाया च विषयतावच्छेदककोटेः क्वचिदनुक्तिवशात् क्वचिदुक्तया अपि अनुत्कटत्ववशान्निषेधव्यञ्जना। यथा—"गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव।" इत्यत्र गर्भवहिर्भावरूपप्रसवकोट्या उत्कटाया अनुत्कटाया गुणानुबन्धकोट्या उक्तया एव निषेधव्यञ्जना। "गङ्गाम्भसि स्नातीव" इत्यादौ त्वनुक्तया गङ्गासम्बन्धकोटेर्निषेधव्यञ्जना। अतिशयोक्तिविशेषेऽपि न तदसम्भव इत्यत आह—**इहापि मुखं द्वितीयः** इत्यादि। द्वितीयचन्द्रोक्तिवशादेव मुखत्वकोटिनिषेधव्यञ्जनेत्यर्थः। द्वितीयचन्द्राभावान्नेदं मुखमयमेव द्वितीयचन्द्र इति प्रतीतिः। द्वितीयपदाभावे तु नेदृशी निषेधप्रतीतिरिति तत्र रूपकमेव।

(वि, द) **यदाहुरिति**—अनिगीर्णस्योपात्तस्य निगीर्णस्यानुपात्तस्य अधःकरणं तु विवृतमेव।

(वि, ध) अस्याः पञ्चविधत्वमाह—**भेदेऽप्यभेद** इति। अभेद आरोप्य-

---

"एवमप्यनिश्चयात्मकसम्भावनाप्रत्ययमूलत्वादुत्प्रेक्षायाः कथमध्यवसायमूलत्वम्? तस्य हि विषयनिगरणं विषयिनिश्चयश्च स्वरूपम्। नचाग्रेकमपि सम्भवति, विषयोपादानान्निश्चयाभावाच्चेति। अत्रोच्यते—इह द्विधास्ति अध्यवसायः सारूपिक उत्पादितश्च। तत्र सारूपिके विषयानवगम एव निमित्तसामर्थ्यात् स्वरसत एव विषयप्रतीतेरुल्लासात्। इतरत्र तु विषयमवगम्यापि तदन्तःकरणेन प्रतिपत्तौ स्वात्मपरतन्त्रविकल्पनाद् विषये प्रतिपत्तिमुपादयेत्। जानान एव हि विषयिनिक्षिप्तं विषयं तत्र प्रयोजनपरतया विषयिणमध्यवस्येत्। तत्राद्यो भ्रान्तिमदादिविषयः। तत्र हि प्रमाप्रत्यन्तरगम्या सारूपिकेव तथाविधा प्रतिपत्तिर्वक्त्रानूद्यते न तूत्पाद्यते। इतरस्तूत्प्रेक्षाविषयः. ननु विषयनिगरणमध्यवसायस्य लक्षणमिह पुनर्विषयस्य निगीर्यमाणतेति कथमत्राध्यवसायतेति चेत्। नैतत्—"विषयान्तःकृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका" इत्यादुक्तया अध्यवसायस्य विषयिणा विषयस्यान्तःकरणं लक्षणम्। तथ विषयस्य निगरणेन निगीर्यमाणत्वेन वा भवतीत्यपि न कश्चिद् विरोधः—विमर्शिनी।

स्वरूपेण अनुपस्थितत्या गर्वेणाभेदप्रतिपत्तिरध्यवसायः साध्यः। अत्र अत्रत्वतादात्म्यारोप आहार्यनिश्चयरूपः। आहार्यत्वेन भ्रान्तिमति अप्रसङ्गः।

तद्विपर्ययौ अभेदे भेद, असम्बन्धे सम्बन्ध । साऽतिशयोक्ति । (ध)

अत्र भेदेऽप्यभेदो यथा मम—

"कथमुपरि कलापिन कलापो विलसति तस्य तले ऽष्टमीन्दुखण्डम् ।
कुवलययुगल ततो विलोल तिलकुसुम तदध प्रवालमस्याव ।"

अत्र कान्ताकेशपाशादेर्मयूरकलापादिभिरभेदेनाध्यवसाय । (न)

यथा वा—

"विश्लेषदुःखादिव बद्धमौनम् ।" अत्र चेतनगतमौनित्वमन्यद्, अचेतनगतं चान्यदिति द्वयोर्भेदेऽप्यभेद ।

एवम्—

"सहाधरदलेनास्या यौवने रागभाक् प्रिय ।"

अत्राधरस्य रागो लौहित्य प्रियस्य राग प्रेम, द्वयोरभेद । (प)

अभेदे भेदो यथा—

"अन्यदेवाङ्गलावण्यमन्या सौरभसम्पद ।
तस्या पद्मपलाशाक्ष्या सरसत्वमलौकिकम् ॥ (फ)

सम्बन्धेऽसम्बन्धो यथा—

"अस्या सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रद-
श्चङ्गारैकरस स्वय नु मदनो मासो नु पुष्पाकरः ।

माणश्चेत्तदा स आरोपोऽतिशयोक्तिरित्यर्थ । एवमुत्तरत्रापि । कार्यहेत्वो पौर्वापर्यास्य —पौर्वापर्यविपर्यय इत्यर्थ ।

(वि, न) **कथमुपरीति**—नायिकया उपरीत्यर्थ । तदपि तदवयवरूपत येति बोध्यम् । ततो विलोलमित्यत्र तत्स्थानमित्यनुषङ्गः । तिलकुसुममित्यत्रापि तत्स्थानमित्यनुषङ्ग । प्रवाल—नवपल्लवम् । अत्रारोपविषयाणा केशपाशादीनामनुपादानादेव निषेधव्यञ्जनरूपाध करणम् । एवमुत्तरोत्तरमपि विषयानुपादाने बोध्यम् । उपादाने तु रूपकमेवेति बोध्यम् ।

(वि, प) **अचेतनगत चान्यदिति**—उत्तरकरणसामर्थ्येऽपि तदकरणरूपान्मौनादन्यदित्यर्थ । तच्च शब्दाकरणरूपम् । स च विषयोत्रानुपात्त ।

अस्या यौवने अस्या एवाधरदलेनेत्यन्वय । **द्वयोरभेद** इति । रागपदस्लेषादिति भाव । एककालोत्पत्तिकत्वरूपसाहित्यमात्रप्रतीतौ तु अरुणाधरेण सह रागवान् इत्यतोऽपिशब्द्य वैचित्र्यस्यानुभूयमानस्यानुपपत्तिप्रसङ्गात् ।

(वि, फ) **अन्यदेवेति** । अङ्गलावण्यादेर्वैलक्षण्यात्तत्रैव तद्भेदारोप । **सरसत्वमिति** । रागिकत्वमित्यर्थ । लौकिके तस्मिन्नलौकिकभेदारोप । अत्रान्यत्वायारोपानुकूलस्यापि तद्विषयलावण्यस्य निषेधव्यञ्जना ।

(वि, ब) **अस्या सर्गविधौ** इति । नु वितर्के । अस्या निर्माणविधौ

वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥" (श्रो) *

अत्र पुराणप्रजापतिनिर्माणसम्बन्धेऽप्यसम्बन्धः । (ध) +

असम्बन्धे सम्बन्धो यथा—

"यदि स्यान्मण्डले सद्मन्दोरिन्दीवरद्वयम् ।
तदोपमीयते तस्या वदनं चारुलोचनम् ॥"

अत्र यद्यर्थबलादाहृतेन सम्बन्धेन सम्भावनया सम्बन्धः । (भ, श्रो)

प्रजापतिर्निर्माता चन्द्र यतोऽसौ कान्तिप्रद कान्तिमत्त्वेनैव तस्य कान्तिप्रदत्व सम्भाव्योक्तम् । स्वयं मदनो नु यतोऽसौ शृङ्गारैकरस । इय हि शृङ्गारिणी । पुष्पाकरे चैत्रमासे अपि शृङ्गारैकरसत्वाऽन्वय । मूलविधातृभाव कथ खण्डयसीत्याह—वेदाभ्यासेति । पुराणो जीर्ण । मुनि मुनिधर्मा तपस्वीत्यर्थ अत्र । चन्द्रादेर्विधातृत्व कथनादारोपविषयस्य विधातृसम्बन्धस्य निषेधव्यञ्जना ।

(वि, भ) यदि स्यादिति । चारुलोचनस्थाने इन्दीवरद्वय वदनस्थाने इन्दुमण्डलम् । आहृतेन सम्बन्धेन इति । इन्दुमण्डले इन्दीवरस्य सम्बन्ध एव स्यादित्येव सम्बन्धसम्भावना । अत्रापि सम्बन्धसम्भावनयैव आरोपविषयस्याऽसम्बन्धस्य निषेधव्यञ्जना ।

(लो, श्रो) पुराणो मुनि विधि । अत्र च प्रथमार्द्धे नुशब्देनाध्यवसायस्य सिद्धतानिरासादुत्प्रेक्षा ।

---

* विक्रमोर्वशीये उर्वशीमवलोक्य पुरूरवसो वितर्कोऽयम्—अस्या नायिकाया उर्वश्या सर्गविधौ सृष्टिकर्मणि य प्रजापतिर्निर्माता अभूत् स कान्तिप्रद चन्द्रो नु ? ईदृशकान्त्याधन्द्रत एव सम्भवात् । अथवा शृङ्गार एक प्रधानो रसो यस्य तादृशो मदनो नु ? शृङ्गारोद्दीपकेदृशरूपलावण्यादेर्मदनत एव सम्भवात् । किं वा पुष्पाकरो मास वसन्तो नु ? अधरदशनादिरूपपुष्पाणा वसन्तत एव सम्भवात् । अत्र नुशब्दो वितर्कार्थो । "नु प्रश्नेऽनुनयेऽनुतापार्थे विकल्पवितर्कयो" इति हेमचन्द्र । ननु प्रसिद्धो ब्रह्मा कुतो नास्या निर्माता इत्यत आह—वेदाभ्यासेत्यादि । वेदाभ्यासेन जड, विषयेभ्य सकलदनवनितादिभ्यो व्यावृत्त निवृत्त कौतूहल कौतुक यस्य तादृश, पुराणो वृद्ध मुनिस्तपस्वी ब्रह्मा इद मनोहर रूप निर्मातु कथ नु प्रभवेत् न कथमपि समर्थो भवेदित्यर्थ ।

+ अत्र प्रसिद्ध सृष्टिकर्ता ब्रह्मा वेदाभ्यासजड इति स नाऽस्या सृष्टिकर्त्रया सम्भाव्यते । अतस्तस्य सन्दिह्यते उत्प्रेक्ष्यते वा अस्या सृष्टिकर्ता क चन्द्रो नु मदनो नु वसन्तो नु । अत्र उत्तरार्द्धे "कथ नु प्रभवेत्" इत्युक्त्या ब्रह्मणो निर्माणसम्बन्धेऽपि असम्बन्धस्याऽतिशयोक्तिरलङ्कार । पूर्वार्द्धे तु काव्यप्रकाशकारमते सन्देहालङ्कार ।

कार्यकारणयोः पौर्वापर्यविपर्ययश्च द्विधा भवति । कारणात् प्रथ कार्यस्य भावे; द्वयोः समकालत्वेन च । क्रमेण यथा—

"प्रागेव हरिणाक्षीणां चित्तमुत्कलिकाकुलम् ।
पश्चादुद्भिन्नबकुलरसालमुकुलश्रियः ॥" (म, अ) +

(वि, म) पञ्चमातिशयोक्तिप्रभेदमुदाहर्तुमाह—कार्य्यकारणयोरिति प्रागे वेति—उत्कलिका उत्कण्ठा । बकुलरसालयोर्द्वन्द्वः । तयोरुद्भिन्नमुकुलश्रियः पश्चा त्यर्थः । अत्र मुकुलश्रीदर्शनस्य कारणस्य जन्योत्कण्ठोत्तरोपपन्नत्वेन निर्देशाति पर्य्ययः । आहार्यबुद्धिविषयेण तेन कारणस्य शीघ्रकारित्वं व्यज्यते । अत्रापुतरो पपन्नत्वादारोपविषयस्य पूर्वोत्पन्नस्य निषेधव्यञ्जना । एवमुत्तरत्रापि बोध्यम् ।

(लो, औ) यद्यर्थेति । इह यद्यपि चन्द्रमण्डलस्येन्दीवरद्वयेन सम्बन्धो सम्भवति तथापि कविना निबद्धस्य वा सम्भावनारूपेणाऽसावस्तीत्यर्थः । एतेन "यद यौक्तौ च कल्पन"मिति कैश्चिदुक्तोऽतिशयोक्तेर्भेद उदाहृतः, एकस्यैव नानाभावोल्लेखश्च अत्र प्रथमे अन्यकृतैव उदाहृतम्, अन्यदेव इत्यादौ । द्वितीये केशपाशादीरित्यादि शब्देन ललाटनयननासाधराणां संग्रहः । एवं मुखं द्वितीयश्चन्द्रः ।

तथा च—

("चूताङ्कुरास्वादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं चुकूज ।
मनस्विनीमानविघातदक्षं
तदेव जातं वचनं स्मरस्य ॥")

नचेह तस्या मुखं चन्द्र इतिवदारोपमूलं रूपकम् । तादात्म्यदृढतायामध्यवसाय स्वरूपोत्थानात् । अत्र हि मदनस्य उद्यमं विनापि कोकिलरुतमात्रेण जगद्वशमायां दित्यर्थः । यथा—"अत्यास्थो हि नारीणामकालज्ञो मनोभवः ।" एवं "न कामयति वंचनीयमीक्षते" अत्र करणयोर्मनोभवकामयित्रोः क्रियारूपभेदेऽप्यभेदेनोक्तिः । 'इ कान्ता सुरजनमनसो वशीकरण"मित्यादौ च हेत्वलङ्कारो वक्ष्यते । स तस्या एवा सम्बन्धे सम्बन्धरूपेण भेदेन सहगृह्यत इत्यर्थः । अत्र शुद्धोदाहरणं निरूपयंश्चे— 'दाहोऽम्भः प्रसृतिं पचः प्रचयवान् बाष्पः प्रणालोचित' इत्यादि । अत्र दाहादीना अम्भःप्रसृतिप्रभृतौ अगम्यभेदेऽपि सम्बन्धः सिद्धत्वेनोक्तः ।

(लो, अ) उत्कलिका, उत्कण्ठा, उद्गतकोरकत्व ।

अन्येषां मते तु उल्लेखः—'रञ्जिता तु विभिन्नात्तश्लोका' इत्यादिवत् ।

+ उद्भिन्नयोः प्रस्फुटितयोर्बकुलरसालयोर्मुकुलानां श्रियः भवन्तीति शेषः । रसालबकुलोद्भेददर्शनानन्तरं स्त्रीणामुत्कण्ठा भवति । अतोऽत्र मुकुलश्रीदर्शनमेव उत्कण्ठया कारणम् । कार्यमुत्कण्ठा । अत्र कारणात्पूर्वमेव कार्यस्य वर्णनं जातम् ।

"सममेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यं मण्डलं च महीक्षिताम् ॥" (य) *

इह केचिदाहुः—"केशपाशादिगतो लौकिकोऽतिशयोऽलौकिकत्वेनाध्यवसीयते, केशपाशादीनां कलापादिभिरध्यवसाये "अन्यदेवाङ्गलावण्यम्" इत्यादिप्रकारेष्वव्याप्तिर्लक्षणस्येति " तन्न । तत्रापि ह्यनन्यदङ्गलावण्यमन्यत्वेनाध्यवसीयते । तथाहि "अन्यदेव" इति स्थाने "अन्यदिव" इति पाठे अध्यवसायस्य साध्यत्वमेवेत्युल्लेखाङ्गीकियते । "प्रागेव हरिणाक्षीणाम्" इत्यत्र बकुलादिश्रीणां

(वि, य) सममेवेति—तेन रघुणा । पितृसिंहासनाक्रमणरूपकारणस्य महीक्षिन्मण्डलाक्रमणरूपकार्य्यस्य समकालोपपन्नत्वकथनात्पौर्वापर्य्यविपर्य्ययः ।

(वि, र) ग्रन्थकृदुक्तस्यातिशयोक्तिसामान्यलक्षणस्य अन्यदेवाङ्गलावण्यमित्यादावव्याप्तिं केचिदाहुस्तद्दूषयितुमाह—इह केचिदिति । विषये विषयिणोऽभेदेनाध्यवसायो हि भवत्कृतलक्षणार्थः, विषयविषयिभावश्च भेदघटितः । तथा च "कथमुपरि कलापिनः" इत्यत्र केशकलापयोर्भेदसत्त्वात्तल्लक्षणार्थसम्भवेऽपि 'अन्यदेवाङ्गलावण्यम्' इत्यत्र तत्रैव तद्भेदारोपे भेदघटितविषयविषयिभावाभावादव्याप्तिरिति केशाधिदुक्तिं दर्शयति—केशपाशादिगत इति । अतिशयः सौन्दर्य्यं लौकिकोऽन्यलोककेशसाधारणः अलौकिकत्वेन लोकविलक्षणकलापनिष्ठसौन्दर्य्यत्वेनाध्यवसीयत इत्यर्थः । तयो सौन्दर्ययोरभेदाध्यासमूलकेशपाशकलापयोर्भिन्नयोरभेदाध्यासः सम्भवतीत्याह—केशपाशादीनामिति । अध्यवसाये इत्यनन्तरं सम्भवत्यर्थीति पूरणीयम् । तथापि अन्यदेवेत्यादिप्रकारेष्वव्याप्तिरित्याह—अन्यदेवेति । आरोप्यमाणारोपविषयलावण्ययोर्भेदाभावादिति भावः । अभेदे भेदारोपोऽस्मदुक्तलक्षणार्थोऽत्राप्य-

(लो, आ) लौकिकः स्वाभाविकः । अलौकिकत्वेनाध्यवसायफलभूताऽलौकिकातिशयत्वेनाङ्गलावण्यमित्यादिशब्देन " प्रिय इति गोपवधूभि " रित्यादेरुपसंग्रहः । अव्याप्तिलक्षणस्य इत्थमाशयः—उपमेयवस्तुनः उपमानवस्तुतादात्म्ये एवाध्यवसायरूपोत्थापनम् । इह चान्यादिशब्दाख्यं लावण्यादेः किमपि प्रतीतिनिधिवस्त्वन्तरं नास्ति । तदेवमादियूदाहरणेषु लक्षणस्याव्याप्तिरिति सिद्धान्तमाह—

* रघो राज्यप्राप्तिवर्णनमिदम् । द्विरदगामिना हस्तीव सलीलगमनशीलेन तेन रघुणा पित्र्यं पितृत आगतं सिंहासनं महीक्षिता राज्ञा मण्डलं राष्ट्रं च समम् एकदा समाक्रान्तं गृहीतम् । राजानो हि सिंहासनमध्यास्य शत्रुमण्डलमायत्तीकुर्वन्तीति सिंहासनारोहणस्य कारणतया पूर्वभावित्वं, शत्रुराज्यग्रहणस्य तु कार्य्यतया परभावित्वं युक्तम् । कवेः प्रौढोक्तिवशाद् अत्र तयोः कार्य्यकारणयोः समकालत्वेन अतिशयोक्तिः ।

प्रथममभावितापि पश्चाद्भावित्वेनाध्यवसिता, अत एवात्रापि इवशब्दप्रयोग उत्प्रेक्षा। एवमन्यत्र। (र, आ) *

पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् ।

स्तीति भवन् समाधत्ते—तत्र। तत्र हीति। अनन्यदङ्गलावण्यमभिन्नमङ्गलावण्यमन्यत्वेन भिन्नत्वेनाऽध्यवसीयत इत्यर्थः। तथा च भिन्नत्वेनाध्यवसायादारोपविषयेऽभेदे तद्भिन्नस्य भेदस्यारोपाद् भेदघटितो विषयविषयिभावोऽत्राप्यस्तीति साधितम्। उत्प्रेक्षाया विषयविषयिभेदघटित आरोपस्तवापि सम्मतः। अत्रैवोत्प्रेक्षासम्भवाद् भेदघटितारोपः त्वन्मतेऽपीत्याह—**तथा हीति**—अतिशयोक्तितो व्यावृत्तिदर्शनाय साध्यत्वप्रदर्शनम् 'अगेव हरिणाक्षीणाम्' इत्यत्रापि भेदघटितो विषयविषयिभावोऽस्तीति दर्शयति। अत्राप्युत्प्रेक्षासम्भवं दर्शयति—**अत एवेति**। भेदघटितविषयविषयिभावसत्त्वादेवेत्यर्थः।

(वि, ल) तुल्ययोगितालङ्कारमाह—**पदार्थानामिति**। **अन्येषां वेति**।

तत्रेति। कथमन्यत्वेनाध्यवसाय इत्यत आह—**तथा हीति**।

* इह केचिदित्यादिना अलङ्कारसर्वस्वकारस्य मतमाहिपति। अत्र वास्तवं सौन्दर्यं कविसमर्पितेन सौन्दर्येणाध्यवसीयते न तु केशपाशादीनां कलापादिभिरध्यवसायः। अत्र भिन्नस्य धर्मद्वयस्य (वास्तवसौन्दर्यस्य कविसमर्पितसौन्दर्यस्य च) अभेदाध्यवसायः न तु भिन्नयोर्धर्मिणोः (केशपाशस्य कलापस्य च) अध्यवसायः। धर्मिणोरभेदाध्यवसाये "अन्यदेवाङ्गलावण्य" मित्यादौ अभेदे भेदाध्यवसायोदाहरणे धर्मिद्वयस्य अभावाल्लक्षणस्याऽव्याप्तिरिति सन्मतं दूषयितुमाह—

एषु पञ्चसु भेदेषु भेदेऽभेदादिवचनं लोकातिक्रान्तगोचरम्। अत्र चातिशयाख्यं यत्फलं प्रयोजकत्वान्निमित्तं तत्राभेदाध्यवसायः। तथा हि "कमलमनम्भसि" इत्यादौ वदनादीना कमलादेर्भेदेऽपि वास्तवं सौन्दर्यं कविसमर्पितेन सौन्दर्येणाऽभेदेनाध्यवसितं भेदेऽभेदवचनस्य निमित्तम्। तत्र च सिद्धोऽध्यवसाय इत्यध्यवसितप्राधान्यम्। ननु वदनादीना कमलादिभिरध्यवसायो योजनीयः। अभेदे भेद इत्यादौ पुनरेषव्याप्तेः। तत्र हि "अण्णं लच्छत्तणअं' इत्यादौ सादृश्यं लक्ष्यत्वं निमित्तभूतमभेदेनाध्यवसितम्। एवमन्यत्रापि ज्ञेयम्।' (अलङ्कारसर्वस्वम्)। अलङ्कारसर्वस्वस्य टीकाकारेण जयरथेनाऽपि दूषितमेतत्। "उपलक्ष्यं चैतत्। यावता अध्यवसितप्राधान्यमस्य लक्षणम्। तच्च धर्मिणामस्तु धर्माणा वेति को विशेषो येनाऽव्याप्तिः। प्रत्युत धर्मयोरभेदाध्यवसायाभ्युपगमे उपमादीनामप्यतिशयोक्तिप्रसङ्गः स्यात्। तत्रापि धर्माणामेव भेदेऽभेदविवक्षणात्। एवं च विवक्षीयत्वेन भेदे धर्मयोरप्यव्याप्तिः प्रसज्यत इत्यलमप्रस्तुतमन्यायोद्भावनेन।' (जयरथः)

एकधर्माभिसम्बन्ध स्यात्तदा तुल्ययोगिता ॥ ६६ ॥ (ल,इ)+

अन्येषामप्रस्तुतानां धर्मो गुणक्रियारूप ।

उदाहरणम्—

"अनुलेपनानि कुसुमान्यबला
कृतमन्यव पतिषु दीपदशा ।
समवेन तेन सुचिर शयित
प्रतिबोधितस्मरमबोधिषत ॥" (ई)

अत्र [1]तमोवर्णनस्य प्रस्तुतत्वात् प्रस्तुतानामनुलेपनादीनामकबोधनक्रियाभि सम्बन्ध । (व)

"त्वदङ्गमार्दव द्रष्टु कस्य चित्ते न भासते ।
मालतीशरभूलेखाकदलीनां कठोरता ॥'

इत्यत्र मालत्यादीनामप्रस्तुतानां कठोरतारूपैकगुणसम्बन्ध । (श)

वाकारेण पृथक् स्वातन्त्र्यबोधनाद् प्रस्तुताऽप्रस्तुतयोर्मिथणनिषेधो बोध्य । तन्मिश्रणे तु दीपकालङ्कारो वक्ष्यते ।

(वि, व) **अनुलेपनानीति** । तामिस्राया तत्कालीनवस्तूनां कामुककामोद्दीपकत्वर्णनमिदम् । सुचिर शयित तेन समयेन तादशरात्रिरूपेण प्रतिबोधित जागरित स्मरम् अनुलेपनादयो अबोधिषत क्रीडार्थ बोधयामासुरित्यर्थ । **तमोवर्णनस्येति** । तमस्र कामोद्दीपकत्वात् तस्मिन् प्रस्तुते तत्कालीनानामन्येषामुद्दीपकानाम नुलेपनादीनामपि प्रस्तुतत्वमिति भाव ।

(वि, श) अप्रकृतानामेकगुणसम्बन्धमाह—त्वदङ्गमार्दव द्रष्टुरिति । तद् द्रष्टु कस्य जनस्य चित्ते मालत्यादीना कठोरता न भासते । तन्मार्दवाधिक्येनात्र कठोरताभासनात् । अत्र त्वदङ्गोपमानत्वेन मालत्यादयोऽप्रकृता ।

(लो, इ) **पदार्थानामिति** । बहुवचनमत्रम् । तेन पदार्थयोरपीति शेयम् । प्रस्तुतानां प्राकरणिकानाम् । अप्रस्तुतानाम् अप्राकरणिकानाम् ।

(लो, ई) **अनुलेपनानीति** । सुचिर शयित स्मर प्रतिबोधितस्मरम् अबोधिषतेत्यर्थ ।

+ तुल्येन धर्मेण योगो जातोऽस्यामिति अन्वर्थनामा तुल्ययोगिता । (एकावली)

"तुल्ययोगिताऽन्वयो यत्र' इत्याशाधरमट्ट । तुल्यस्यागो योगोऽन्वयश्चेति तुल्ययोग एकधर्मान्वय । सोऽस्ति येषां ते तुल्ययोगिन । तेषां भावस्तुल्ययोगिता ।

1 'तमोवर्णनस्य' (ग घ ङ)

एवम्—

"दानं वित्तादृतं वाचः कीर्तेर्धर्मो तथायुषः ।
परोपकरणं कायादसारात्सारमुद्धरेत् ॥"

अत्र दानादीनां कर्मभूतानां सारतारूपैकगुणसम्बन्ध एकोद्धरणक्रिया-सम्बन्धः । (प, ङ)

अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते ।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥ ६७ ॥ (स, ङ) *

क्रमेणोदाहरणम्—

"बलावलेपादधुनापि पूर्ववत्
प्रधाष्यते तेन जगज्जिगीषुणा ।
सती च[1] योषिप्रकृतिश्च निश्चला
पुमांसमभ्येति भवान्तरेष्वपि ॥" (ह)

(वि, प) प्रकृतानामेकगुणसम्बन्धोऽप्रकृतानामेकक्रियासम्बन्धश्चानुदाहृत एक-श्लोकेन उदाहियते—**एवं दानं वित्तादिति** । वित्तादितोऽसारादानादिकं सारमुद्धरेदित्य-न्वयः । अत्र प्रकृतानामेकगुणक्रियासंम्बन्धं दर्शयति—**अत्र दानादीनामिति** । उपा-र्जनीयत्वेन दानादीनि प्रकृतानि । अत्र प्रकृतानामपादानभूतानामेकसारतागुणसम्बन्धो-ऽप्यत्रैवास्ति । ग्रन्थगौरवापत्त्या न प्रदर्शितः ।

(वि, स) दीपकमलङ्कारमाह—**अप्रस्तुतप्रस्तुतयोरित्यनयोरेकधर्माभिसम्बन्ध इत्यनुषङ्गः** । अन्यविधं दीपकमाह—**अथेति** ।

(वि, ह) **बलावलेपादिति** । अवलेपोऽहङ्कारः । पूर्ववद्धिरण्यकशिपुरूपपूर्व-जन्मवत् जिगीषुणा शिशुपालेनापि जगद् बाध्यत इत्यन्वयः । अर्थान्तरं न्यस्यति—**सती चेति** । भवान्तरेषु जन्मान्तरेषु ।

(लो, ङ) **परत्रान्तरेऽपि उदाहरति—दानमिति** । अत्र न केवलं दानादीनामुद्ध-रणक्रियासम्बन्धो वित्तादीनामप्यसारतारूपैकगुणसम्बन्धः । इदं च तुल्ययोगितायां 'हंसधवल इवाभाती'त्यादिवद् द्वयोः प्रकृतत्वेऽप्युपमानोपमेयभावो वैवक्षिकः । इदे-मायमावाद् औपम्यस्य गम्यत्वम् ।

(लो, ऊ) **अप्रस्तुतप्रस्तुतयोरेकधर्माभिसम्बन्ध इत्यर्थः** । इदं च द्वयोः प्रकृताऽ-प्रकृतत्वादिवाक्यभावादौपम्यस्य गम्यत्वं स्फुटमेव ।

---

* 'प्रकरणिप्रकरणिकयोर्भेदादेकत्र निर्दिष्टः समानो धर्मः प्रकरणेनान्यत्रो-पचारात्तिरस्कारेण दीपकस्यालङ्कारस्य चारुत्व.' । (अलं सं०) 'प्रकृतार्थमुक्तो धर्मः प्रकृताप्रकृतगतो दीपयन् प्रकाशयन् गुणक्रियाभिर्वा दीपकम् । यत्र दीप इव ।

1 'सतीव' (क. ग. घ.) ।

अत्र प्रस्तुताया निश्चलाया [1]प्रकृतेरप्रस्तुतायाश्च सख्या योषित एकानुगमनक्रियासम्बन्ध ।

"दूर समागतवति त्वयि जीवनाथे[2]
भिन्ना मनोभवशरेण तपस्विनी सा ।
उत्तिष्ठति स्वपिति वासगृह त्वदीय-
मायाति याति हसति श्वसिति क्षणेन ॥" (क)

इद मम । अत्रैकस्या नायिकाया उत्थानाद्यनेकक्रियासम्बन्ध । अत्र च गुणक्रिययोरादिमध्यावसानसद्भावेन त्रैविध्यं न लक्षितम् । तथाविधवैचित्र्यस्य सर्वत्रापि सहस्रधा सम्भवात् । (ङ)

प्रतिवस्तूपमा सा स्याद्वाक्ययोर्गम्यसाम्ययोः ।
एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक् ॥६८॥ (ख,ङ)×

(वि, क) अनेकक्रियास्वेकसारकान्वयमाह—दूरमिति । प्रवासादागते नायके तत्पत्नीसख्या तद्विरहावस्थाकथनमिदम् । समागतवति—आगतवति । तपस्विनी दु खान्विता सा तव प्रिया वासगृहंगमन, त्वत्प्राप्तिसम्भावनया ।

(वि, ख) प्रतिवस्तूपमालङ्कारमाह-प्रतिवस्त्विति । अत्र गम्यसाम्ययोरुक्तिवशाद् उपमेयोपमानयोरिति लभ्यते । तेन वाक्यद्वये ये उपमेयोपमाने, तयोरेकोऽपि सामान्यो धर्म पृथक्शब्दभेदेन यत्रालङ्कारे निर्दिश्यते सा प्रतिवस्तूपमेत्यर्थ । गम्यसाम्ययोरिति बोध्यसाम्ययोरित्यर्थ । बोध्यता च क्वचिच्छब्दद्वयेन शक्तिलक्षणाभ्यां

(लो, ङ) तपस्विनीति—शोच्या । इह दीपकप्रकारे क्रियाणां प्रस्तुतत्वादुपमानोपमेयभावो वैवक्षिक । तत्रादिमध्यान्तवाक्यगतत्वेन धर्मस्य प्रवृत्तौ आदिमध्यान्तदीपकत्रयोऽस्य भेदा । तत्रादिदीपक यथा—

('रेहइ मिहिरेण णह रसेण कव्वि सरेण जोव्वणअ ।
अमएण ससिबिम्बओ तुमए णरणाह भुअणमिणं ।')

मध्यदीपक यथोदाहृते बलावलेपादित्यादौ । एवमन्यत् ।

(लो, ङ) वस्तुवाक्यार्थे । एव च प्रतिनिर्दिष्टेन वाक्यार्थेन वाक्यार्थस्य उपमासादृश्य यस्यामित्यनेन वाक्यार्थस्योपमासादृश्य यस्यामित्यन्वया प्रतिवस्तूपमा ।

दीपकम् ।' राज्ञायां कन् । दीपसादृश्य च प्रकृताप्रकृतप्रकाशकत्वेन बोध्यम् । (रसगङ्गाधरे)

× 'उपमायां तु पदार्थयो साम्यं तत्र बाध्यम् । अत्र तु (प्रतिवस्तूपमायां) वाक्यार्थयो , तदपि गम्यमेवेति ततो भेद' । एव च वाक्यार्थयो साम्य गम्यमेव नियतम्' । विस्तरस्तत्र ।

1 'प्रकृतत्वे' (क. पु) 2 'जीवनाथे' (क पु)

यथा—

"धन्यासि वैदर्भि गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि ।
इत स्तुति का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति ॥"

अत्र समाकर्षणमुत्तरलीकरण च क्रियैकैव पौनरुक्त्यनिरासनाय भिन्नवाचकतया निर्दिष्टा । (ग)

इय माधवापि दृश्यते । यथा—

"विमल एव रविर्विशद शशी
प्रकृतिशोभन एव हि दर्पण ।
शिवगिरि शिवहाससहोदर
सहजसुन्दर एव हि सज्जन ॥" (घ, ङ)

अत्र विमलविशदादि[1]रर्थत एक एव । वैधर्म्येण यथा—

"चकोर्य एव चतुराश्चन्द्रिकापान[2]कर्मणि ।

कविचोपमेयगतस्य शब्दशक्त्या धर्मान्तरे तद्वैधर्म्येण व्यञ्जनया । तच्चोदाहरणे दर्शयिष्यति ।

(वि, ग) **धन्यासी**ति । प्रसिद्धजितेन्द्रियत्वेन धीरो नैषधोऽपीत्यर्थ । अत्र प्रतिवस्तूपमामाह—**अत्रे**ति । अत्र दमयन्ती उपमेया चन्द्रिका उपमान तयोर्धीराकर्षण-मेको धर्म । **आकृष्यत** इति । शब्दशक्त्या उत्तरलीकरोति इत्यत्र उत्तरलताजनका कर्षणविशिष्टक्रियते इत्यर्थ । **उत्तरलीकरणं चे**ति । उत्तरलीकरणजनिका चेत्यर्थ । **एकैवे**ति । आकर्षणरूपकैवेत्यर्थ । भिन्नवाचकतये**ति** भिन्नप्रातिपदिकतयेत्यर्थ ।

(वि, घ) **विमल एवे**ति । शिवगिरि कैलास । शिवहास शिवस्य अट्ट-हास हासान्तरापेक्षया विलक्षण । अत्र सज्जन एव वाक्ये उपमेय । वाक्यान्तरेषु उपमानानि । निर्मलत्वम् एको धर्म शब्दभेदन प्रतिपादित ।

(वि, ङ) **वैधर्म्येण यथे**ति—उपमेये निर्दिष्टधर्मविपरीताद् धर्म्यन्तरे निर्दि-ष्टाद्धर्माद् व्यञ्जनया लभ्येनोपमाननिष्ठसाधर्म्येण इत्यर्थ । **चकोर्य एवे**ति ।

सामान्य साधारण । पृथक् पर्य्यायादिना निर्दिश्यते प्रतिपाद्यते पौनरुक्त्यनिरासाय इत्यर्थ । एकैकोपचाराश्रयेण नैकार्थपर्य्यवसानात् ।

(लो, लृ) विमल एवेत्यादौ चतुर्थपाद प्रकृत ।

अत्र वस्तुशब्दो वाक्यार्थक । अत्र वाक्यार्थस्य वाक्यार्थेनोपमानोपमेयभाव । 'वस्तुनो वाक्यार्थस्योपमानत्वात्' इत्यत्र काव्यप्रकाशे 'एव चोपमेयत्वमपि वाक्यार्थ स्येति ध्वनितम्'—उद्योतकार । वस्तुशब्दस्य वाक्यार्थाभिधायित्वा प्रतिवाक्यार्थमुपमेति सार्थकताभिधानेयम् ।' (एकावली)

1 'विशदादे' (च. ङ) 2 'चाम' (क. च ङ)

विनावन्तीर्न निपुणा सुदृशो रतिकर्मणि[1] ॥" (ङ)

दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम् ॥ ६६ ॥ (ए) *

सधर्मस्येति प्रतिवस्तूपमान्यवच्छेद । अयमपि साधर्म्यवैधर्म्याभ्यां द्विधा।

(च) क्रमेणोदाहरणम्—

"अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम् ।
अनधिगतपरिमलापि हि हरति दृशं मालतीमाला ॥" (छ)

आवन्त्योऽवन्तिदेशीया स्त्रीर्विना, रतिकर्मणि नान्या सुदृशो निपुणा इत्यर्थः । अत्र स्वकर्मचातुर्यस्य उपमेयासु चक्षुरादिषु निर्दिष्टस्य विपरीतो धर्म अवन्तीयस्त्रीभिन्नस्त्रीषु निर्दिष्टो रत्यनैपुण्यरूप, ततो व्यत्ययनया उपमानेषु अवन्तीस्त्रीषु स्वकर्मचातुर्य्यं साधर्म्यं प्रतीयते ।

(वि, च) दृष्टान्तालङ्कारमाह—**दृष्टान्तस्त्विति** । सधर्मस्य साधारणैकधर्मस्य, प्रतिबिम्बनमुभयत्र निर्दिष्टाभ्या परस्परसमानाभ्या धर्माभ्यामेकस्य तस्य व्यञ्जनमित्यर्थ ।

सधर्म प्रसिद्ध एव विवक्षित इत्यप्रस्तुतप्रशसायां व्यक्तिर्भविष्यति । प्रतिवस्तूपमायां तूपमेयनिर्दिष्टो धर्मो वाच्य एव उपमाननिर्दिष्टशब्दस्य लक्षणया क्वचिच्छक्त्या वा स बोध्य इति भेद' । तस्य व्यञ्जनया बोधे तु दृष्टान्तः । **साधर्म्यवैधर्म्याभ्यामिति**। साधर्म्यव्यञ्जनार्थं निर्दिष्टाभ्यां साधर्म्याभ्यां साधर्म्यवैधर्म्याभ्यां चेत्यर्थ ।

(वि, छ) **अविदितगुणापीति** । वर्णमाधुर्य्यादेवेति भाव. । अत्र कर्णे

(लो, ए) सधर्मस्य साधारणगुणक्रियासहितस्य वस्तुनो वाक्यार्थस्य ।

---

* प्रतिबिम्बन बिम्बप्रतिबिम्बभाव । बिम्ब शरीर प्रतिबिम्ब तच्छाया, तयोर्भाव —आकारप्रत्याकारतुल्यत्वम् । प्रतिबाक्य विभिन्नस्याऽपि साधारणधर्मस्य तुल्यरूपतया वाक्यार्थयोरुपमासम्पादकत्वे दृष्टान्तालङ्कार । "एकस्यार्थस्य शब्दद्वयेनाभिधाने सति प्रतिवस्तुभाव । द्वयोरर्थयोर्द्विरुपादान बिम्बप्रतिबिम्बभाव " । (प्रतापरुद्रयशोभूषणे) बिम्बप्रतिबिम्बभावश्च विशेषणसाम्यविशेष्ययोश्च गाढरयनिर्देशे भवति नत्वेवस्य।

"योऽयमा प्रस्तुतार्थस्य विशेषाभिधित्सया सादरयार्थमप्रस्तुतमर्थान्तरमुपादीयते । अत एव चात्र (प्रतिवस्तूपमायां) प्रस्ताप्रस्तुतयोरुपमानोपमेयभाव । दृष्टान्ते पुनरेतादृशो वृत्तान्तोऽन्यत्रापि स्थित इति प्रस्तुतार्थेऽस्याविम्पष्टा प्रतीतिर्मा भूदिति प्रतीतिविशदीकरणार्थमर्थान्तरमुपादीयते ।" (अप्पय) । दृष्ट अन्तो निश्चयो यत्र स दृष्टान्त ।

1 'तर्मणि' (ब. ग पु)

"त्वयि दृष्टे कुरङ्गाक्ष्या सस्पृहे मदनव्यथा।
दृष्टानुदयभाजीन्दौ ग्लानि कुमुदसहृते ॥" (ज)

"वसन्तलेखैकनिबद्धभाव
परासु कान्तासु मन कुतो न ।
प्रफुल्लमल्लीमधुलम्पट किं
मधुव्रत काङ्क्षति वाह्लिमन्याम् ॥" (ञ)

इद पद्य मम। अत्र "मन कुतो न" इत्यस्य "काङ्क्षति वाह्लिमन्याम्" इत्यस्य चैकरूपतयैव पर्य्यवसानात्प्रतिवस्तूपमैव । इह तु कर्णे मधुधारावमनस्य नेत्रहरणस्य च साम्यमेव न त्वैकरूप्यम्। (ज, ऐ)

[1]समर्थ्यसमर्थकवाक्ययो सामान्यविशेषभावेऽर्थान्तरन्यास, प्रति-

---

मधुधारावमननेत्रहरणे धर्मौ भिन्नौ प्रीतिजनकतया परस्परसमानौ। प्रीतिजनकत्व रूप एको धर्म ताभ्या व्यङ्ग्य ।

(वि, ज) साधर्म्यवैधर्म्याभ्या व्यञ्जनेत्याह—त्वयि दृष्टेति। दृष्टानुदयेति। दृष्टो याऽनुदय इन्दौ तद्भाजि सतीत्यर्थ । उदयसत्त्वेऽपि मेघात्तददर्शनात्। क्लान्ति-प्रतिपादनार्थं दृष्टेत्युक्तम्। अत्र व्यधासमनस्य विपरीतो धर्म क्लान्ति, उपमेयोप मानगताभ्यो ताभ्या सस्पृहियदर्शने स्वार्थप्राप्तित्वमको धर्म व्यज्यते। नच वैधर्म्य व्यङ्गयप्रतिवस्तूपमानोऽस्या को भेद इति वाच्यम्। तत्र वैधर्म्य धर्मान्तरनिष्ठम्, अत्र तूपमाननिष्ठ तया च तत्र वैधर्म्येणैव व्यञ्जना । अत्र तु उभयनिष्ठाभ्या साधर्म्यवै धर्म्याभ्यां व्यञ्जनेति भेदात्।

(वि, झ) यत्र तु समानधर्मप्रतिपादकशब्दाभ्यामेको धर्मो व्यञ्जनां विनैव प्रतीयते तत्र प्रतीतेरव्याभावात् प्रतिवस्तूपमैवेति । अत्र स्वकीयं श्लोकमुदाहरति—वसन्तलेखैवेति—वसन्तलेखा नायिकाविशेष । राजशेखरमुक्ति ।

(वि, ञ) एकरूपतयैव पर्य्यवसानादिति। वाच्यप्रश्नस्यैकधर्मविषयतया एकत्वारोपादित्यर्थ । अत्र हि परनायिका उपमेया अन्या बहवश्च उपमानानि तासां मनोविषयत्वाश्रुतिविषयत्वयोर्हेतुप्रश्नैकधर्मविषयतया एकत्वारोपरूपपर्य्यवसानम् । अविदितगुणादीत्यत्र तु नैक्यपर्यवसानम् । किन्तु समानधर्माभ्यामुभयसाधारणैक-धर्मव्यञ्जनमात्राद्—इह तियेति।

(वि, ट) अथान्तरन्यासाद् इमौ प्रतिवस्तूपमादृष्टान्तयोर्भेदमाह—सम

(लो,ऐ)एकरूपतयैव पर्य्यवसानादिति। 'मन कुतो न' इत्यस्य पर्य्यवसानो नान्यो अन्तो चरणे इत्यदर्शनाद् इह दृष्टान्तो तु पुन बिम्बप्रतिबिम्बभाव ।

---

1 समर्थ्येत्या ग्रह 'अत्र' (क पु) 'अथ,(ख पु)

वस्तूपमादृष्टान्तयोस्तु न तथेति भेद । (ट) *

सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित् ।
यत्र बिम्बानुबिम्बत्वं बोधयेत्सा निदर्शना ॥ ७० ॥ (ओ, ट)

तत्र सम्भवद्वस्तुसम्बन्धनिदर्शना यथा—

"कोऽग्र भूमिवलये जनान्मुधा तापयन् सुचिरमेति सम्पदम् ।
वेदयन्निति दिनेन भानुमानाससाद चरमाचल ततः ॥" (ड, औ)

अत्र रवेरीदृशार्थवेदनक्रियाया कर्तृत्वा[1]न्वयः सम्भवत्येव । (ढ)

ईदृशार्थज्ञापनसमर्थचरमाचलप्राप्तिरूप धर्मवत्त्वात् ।

स च रवेरस्ताचलगमनस्य परतापिना विपत्प्राप्तेश्च बिम्बप्रतिबिम्बभावं बोधयति । असम्भवद्वस्तुसम्बन्ध[3]निदर्शना त्वेकवाक्यानेकवाक्यगतत्वेन द्विविधा ।

र्थ्येति । वाक्ययोरित्यत्र वाक्यार्थयोरित्यर्थ । अनयोरपि उपमेय सामर्थ्यमुपमान समर्थनमित्यतोऽभेदप्रसक्ति । न तथेति । न सामान्यविशेषभाव इत्यर्थ ।

(वि, ट) निदर्शनालङ्कारमाह—सम्भवन्निति । वस्तुनो क्वचित् क्रिया कारकयो । क्वचिद् यत्तद्पदार्थयो सम्बन्ध असम्भवन्, क्वचिद् असम्भवन्, वाचकयोर्यत्र कुत्रचिद् बिम्बानुबिम्बत्व सादृश्य बोधयेदित्यर्थ ।

(वि, ड) कोऽग्रेति । अत्र भूमिवलये मुधा निरर्थक जनास्तापयन् क सुचिर सम्पदमेति । भानुमानिति । वेदयन् ज्ञापयन् दिनेन चरमाचल ततो नभोमध्यादासासादेत्यर्थ. । दिनेनेत्यत्र दिनस्य पूर्ववर्तित्वरूपकारणताया तृतीया ।

(वि, ढ) अत्रेति । अत्र कर्तृत्वान्वयो जनकत्वान्वय स्वस्तिगमनेन तादृशवदस्तानुमितिरूपस्य जनकत्वात् । जन सुचिर न सम्पदमेति परतापकत्वादस्तगामिरविवादित्यनुमितिसम्भवात् । सादृश्यव्यञ्जनरूप प्रतिबिम्बानुबिम्बबोधकत्व तस्य दर्शयति—स चेति । स च सम्बन्ध इत्यर्थ । परतापिनो रवेरस्तगमनवदन्येषा-

---

(लो, ओ) वस्तुसम्बन्धो धर्मधर्मिभाव इत्यर्थ । असम्भवन् बाधप्रतिभासा दित्यर्थ । बिम्बानुबिम्बत्व, बिम्बप्रतिबिम्बभाव । निदर्शन प्रतिबिम्बीकरणम् । तदस्या भणितावस्तीति निदर्शना ।

(लो, औ) दिनेनेत्यपवर्गे तृतीया । तृतीयार्थ परितापिनो विपत्प्राप्तिरूपः ।

---

* सरूपयोर्विशेषयो समर्थ्यसमर्थकभावो न भवति । वस्त्वन्तरेण वस्त्वन्तरसि द्धनुपपत्ते । यदि चात्र समर्थ्यसमर्थकभाव स्याद् अर्थान्तरन्यासादस्य पृथगलङ्कारता न स्यात् । (जयरथ)

1 'कर्तृत्वेनान्वय' (क ङ) 'वक्तृत्वेनान्वय' (च ङ)
2 'कर्मवत्त्वात्' (क ङ) 3 सम्बन्धेति नास्ति (क ङ)

तत्रैकवाक्यगा यथा—

"कलयति कुवलयमाललित कुटिल कटाक्षविक्षेप ।
अधर किसलयलीलाममाननमस्या कलानिधिविलासम् ॥"

अन्यस्य धर्मं कथमन्यो वहतीति कटाक्षविक्षेपादीना कुवलयमालादिगत ललितादीना कलनमसम्भवत्ललितादिसदृश ललितादिकमवगमयत्कटाक्ष विक्षेपादे कुवलयमालादेश्च विम्बप्रतिविम्बभाव बोधयति । (ण, अ)

यथा वा—

"प्रयाणे तव राजेन्द्र ! मुक्ता वैरिमृगीदृशाम् ।
राजहसगति पद्मथामाननेन शशिद्युति ॥"

अत्र पादाभ्यामसम्बद्धराजहसगतेस्त्यागोऽनुपपन्न इति तयोस्तत्सम्बन्ध कल्प्यते, स चासम्भवन् राजहसगतिमिव गति बोधयति । (त) (आ)

अनेकवाक्यगा यथा—

'इद किलाव्याजमनोहर वपु
स्तप क्षम[1] साधयितु य इच्छति ।

मपि परतापिना विपत्प्राप्तरित्येव हि तत् ।

(वि, ण) कलयतीति । अस्या कुटिल कटाक्षविक्षेप कुवलयमालाया ललित विन्यास कलयति दधाति । एवमुत्तरत्रापि कलयतीत्यस्यान्वय —**अत्रेति** । कटाक्षविक्षेपादीना कर्तृणा ललितादीना कर्मणा धर्मतया धर्मिणारप्यत्र प्रतिबिम्बानु विम्ब दर्शयति तद्वल्ललितादिकमवगमयत्कटाक्षविक्षेपादेश्चेति । अत्रैकवाक्यगतयोरप मेयोपमानया प्रतिविम्बानुविम्बनम् । एवमुत्तरत्रापि ।

(वि त) प्रयाणे तवेति । तव प्रयाणे यात्राया सत्या वैरिमृगीदृशा पद्मया राजहसगतिर्मुक्तप्राय द्रुतपलायमानत्वात् । आननेन च शशिद्युतिर्मुक्ता म्लानत्वात् । **असम्बद्धेति** । सम्बद्धस्यैव त्यागसम्भवात् । **सम्बन्ध कल्प्यत इति** । प्रतियोग्यारोपपूर्वकत्वादभावप्रहस्य । प्रतिबम्बन दर्शयति—**स चेति** ।

(वि, थ) इद किलेति—आश्रमे तपस्येचितवशा शकुन्तलां दृष्ट्वा दुष्म न्तस्योक्तरियम् । अव्याजेन यायार्थ्येन । मनोहरमिद वपुर्यो मुनिस्तप क्षम साध

(लो, अ) अवगमयत्—प्रत्याययत् । ललितव्यक्ते सजातीयत्वेनाल्पन्ता सङ्गतिविरहणाऽदूरविप्रकर्षादिभाव । एव लीलादावपि ज्ञेयम् ।

(लो., आ.) कल्पत. इत्यत. पूर्वं. प्रथममिति. शेष. ', 'तदसत्यर्थ. चैतत्. एवमाननेन शशिद्युतिरित्यत्रापि ज्ञेयम् ।

---

1 क्षम' (क ग घ)

ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥" (ग)

अत्र यत्तच्छब्दनिर्दिष्टवाक्यार्थयोरभेदेनान्वयोऽनुपपद्यमानस्तादृशवपुस्तप-श्चमत्यसाधनेच्छा नीलोत्पलपत्रधारया शमीलताच्छेदनेच्छेवेति बिम्बप्रतिबिम्ब-भावे पर्यवस्यति । (घ, ङ)

यथा वा—

"जन्मेदं धन्यतां नीतं भवभोगोपलिप्सया ।
काचमूल्येन विक्रीतो हन्त चिन्तामणिर्मया ॥"

यितुम् इच्छति ध्रुवं निश्चितं स मुनिर्नीलोत्पलपत्रधारया कोमलया कठिना शमीलता छेत्तुं व्यवस्यतीत्यर्थः ।

(वि, द) अत्र यत्तच्छब्देति । वाक्यार्थयोरित्यत्र वाक्यद्वयार्थयोरित्यर्थः । वाक्यार्थौ तु तपश्चमत्वसाधनेच्छा शमीलताच्छेदनेच्छेति । व्यवसायस्याऽपीच्छार्थकत्वात्तयोरभेदान्वयोऽनुपपद्यमान इत्यर्थः । यत्तदोरेकधर्मिबोधकत्वेनाऽभेदान्वय एव व्युत्पत्तिसिद्धः । स चेच्छाद्वययोरभेदाभावादनुपपद्यमान इत्यर्थः ।

(वि, ध) जन्मेदमिति । व्यर्थतानयन चिन्तामणिविक्रयश्चेति जन्मापि चिन्तामणिरिवेति बोध्यम् ।

(लो, इ) इद वपु. तप क्षम साधयितुमिच्छति योऽनेन शकुन्तलाया वपुषा तपो निर्वाहयितुमिच्छतीति भाव । न केवल यत्तदोर्द्वयो शाब्दले वाक्य-निदर्शना । एकस्यापीच्छायो यथा—

"शुद्धान्तदुर्लभमिद वपुराश्रमवासिनो यदि जनस्य ।
दूरीकृता खलु गुणैरुद्यानलता वनलताभि. ॥"

एवम्—"मृतानामपि जन्तूनां आशा बलवतीयसी ।
निर्वाणस्य प्रदीपस्य स्नेह सवर्द्धयेदिवशाम् ॥"

"यच्चकार विधिः शिलापने
ताडयोरपि न रत्नगोचरे ।
अप्रवेशविषयस्य रत्नगो
द्वारतामगमदन्तकस्य तत् ॥"

इत्यत्र तु निदर्शना व्याहता । नहीद "[1]हीरा" मिति सामान्यनिर्देश । उपमेयनिगम्यमानहीरकमनेनेत्थी रायानन्दमहाशया —

("मुनेरात्र मनोभेद दुर्लभे गुरुसन्निधौ

---

1 'अनिश्चय' (क ख ग.)

अत्र भवभोगलोभेन जन्मनो व्यर्थतानयनं काचमूल्येन चिन्तामणि-विक्रय इवेति पर्यवसानम्। एवम्-(ध)

"क्व सूर्यप्रभवो वंश क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहाडुडुपेनास्मि सागरम्॥"

अत्र मन्मत्वा सूर्य्यवंशवर्णनमुडुपेन सागरतरणमिवेति पर्यवसानम्। (न) (ई)

इयं क्वचिदुपमेयवृत्तस्योपमानेऽसम्भवेऽपि भवति। यथा—

"योऽनुभूत कुरङ्गाक्ष्यास्तस्या मधुरिमाधरे।
समास्वादि स मृद्वीकारसे रसविशारदै॥" (प)

अत्र प्रकृतस्याधरस्य मधुरिमधर्मस्य द्राक्षारसेऽसम्भवात्पूर्ववत्साम्ये पर्यवसानम्। (उ)

(वि, न) क्व सूर्येति। रघुवंश वर्णयितुमिच्छो कालिदासस्य उक्तिरियम्। मतिरित्यत्र ममेति शेष। अत्र पूर्वार्द्धं वक्ष्यमाणो विषमालङ्कार। परार्द्धं तु प्रकृतो दाहरणम्। तद् ग्राहयति—अत्र मन्मत्येति। नच तितीर्षुपुरुषरूपकमेव कथ नाऽऽश्रेति वाच्यम्, तादृशपुरुषाप्रसिद्धे, कस्यचिदुन्मत्तस्य तादृशस्य सत्त्वेऽपि तस्य बुद्ध्यनारोहात्, किन्तु वक्तर्येव तितीर्षाया स्फुटमवभास। तस्य बोधेन रघुवंश वर्णनतितीर्षयो सादृश्यमवगम्यते।

(वि, प) इयं चेति। इय निदर्शना उपमेयवृत्तस्योपमेयधर्मस्य "कलयति कुवलय' इत्यादौ तूपमानधर्मस्यैवोपमेयाऽसम्भवादर्शिता। असम्भवेऽपीति। उपमानगतत्वेनोक्तस्याऽसम्भवेऽपि तत्सादृश्यबोधनादित्यर्थ। योऽनुभूत इति। मधुरिमा। मृद्वीका द्राक्षा, तस्या रसे द्रवे।

कटाक्षा एवमेणाक्ष्या प्रययु स्मरयाणताम्।")

इत्यादिषु तु परिणामादय एव।

(लो ई) सागरतरणमिवेत्यनन्तर बिम्बप्रतिबिम्बभाव इति शेष।

(लो, उ) पूर्ववत् पूर्वोदाहरणवत्। एव "सोऽपि त्वदाननरुच विजहाति चन्द्र" इत्यत्र "प्रयाणे तव राजेन्द्र" इत्युदाहरणवन्निदर्शनैव, निदर्शनालङ्कार लक्षणस्य तथाविधपर्यवसितबिम्बप्रतिबिम्बभावस्य सम्भवात्। अन्यथा योऽनुभूत इत्यादौ समनन्तरोक्तोदाहरणेऽपि निदर्शनाभावप्रसङ्गाच्च।

(एव "सम्भवन् वस्तुसम्बन्ध उपमापरिकल्पक. निदर्शने"ति लक्षणे चोपमा-शब्द सादृश्यमात्रार्थो न तूपमालङ्कारार्थ। अत एवालङ्कारसर्वस्वकृताऽपि प्रतिबिम्बकरण निदर्शनेत्युक्तम्।)

मालारूपापि यथा मम—

"क्षिपसि शुक वृषदशकवदने मृगमपर्यसि मृगादनरदने।
वितरसि तुरग महिषविषाणे निदधचेतो भोगवितानेः॥" (फ)

इह बिम्बप्रतिबिम्बतादेव विना वाक्यार्थापर्यवसानम्। दृष्टान्ते तु पर्यवसितेन वाक्यार्थेन सामर्थ्याद् बिम्बप्रतिबिम्बताप्रत्यायनम्। नापीयमर्थापत्ति, तत्र हारोऽय हरिणाक्षीणामित्यादौ सादृश्यपर्यवसानाभावात्। (ब) (ऊ) *

आधिक्यमुपमेयस्योपमानान्न्यूनताथ वा।
व्यतिरेक एक उक्ते हेतौ नोक्ते पुनस्त्रिधा॥ (भ) †

(वि, फ) क्षिपसीति। भोगसक्तपुरुष प्रति शान्तपुरुषस्योक्तिरियम्। हे पुरुष! त्व भोगवितानेः भोगसमूहे चेतो विदधद् वृषदशकस्य मार्जारस्य मुखे शुक क्षिपसि। यथा मार्जार शुक हिनस्ति तथा भोगवितानेऽपि नरकपातेन हिंसिष्यति। अत शुकस्य तत्र क्षेप इव भोगे चेतोविधानमित्यर्थ। एवमुत्तरत्रापि। मृगादनो व्याघ्र।

(वि, ब) दृष्टान्तनिदर्शनयोर्भेद दर्शयति—इह बिम्बेति। वाक्यार्थापर्यवसानं बाधादिति भाव। पर्यवसितेनेति। तत्र बाधाभावादित्यर्थ। सामर्थ्यादिति। प्रयुक्तानुपयुक्तकथनापत्तिपरिहार एव सामर्थ्यम्। "हारोऽयं हरिणाक्षीणा"मिति—

"हारोऽय हरिणाक्षीणा लुठति स्तनमण्डले।
मुक्तानामप्यवस्थेय क्व वय स्मरकिंकरा.।"

इति श्लोकेऽस्माक स्तनमण्डले मुतरां लुठनमुचितमित्येव हि पर्यवसानम्। न तु सादृश्यस्येत्यर्थ। एकथनाद् दण्डापूपन्यायाद् अन्यपर्यवसानस्यैवार्थापत्तित्वात्।

(वि, भ) व्यतिरेकालङ्कारमाह—आधिक्यमिति। उपमेयस्योपमानादाधिक्य न्यूनताऽथवा वर्ण्यते स व्यतिरेकालङ्कार इत्यर्थ। तस्य विभक्तविभागेनाऽष्टचत्वारि-

---

(लो, ऊ) मृगादनस्तरक्षु। वाक्यार्थस्यापर्यवसानमन्वयानुपपत्ते, पर्यवसितेनान्वयानुपपत्तेश्चाभावादुपमेयवाक्येनोपमानवाक्येन च प्रत्येक स्वस्वबोधनविश्रान्तेन। अपर्यवसानस्य सादृश्यऽभाव। किन्तु नियतसमानन्यायेनार्थान्तरस्यापतनमात्रेण।

---

* परस्परनिरपेक्षयोर्वाक्यार्थयोर्दृष्टान्तालङ्कार, सापेक्षयोर्वाक्यार्थयोस्तु निदर्शना। इत्यपरो भेद। यथा—निरपेक्षयोर्वाक्यार्थयोर्बिम्बप्रतिबिम्बभावो दृष्टान्त। यत्र च प्रकृते वाक्यार्थान्तरमारोप्यते सामानाधिकरण्येन तत्र सम्बन्धानुपपत्तिमूला निदर्शनैव युक्ता न दृष्टान्त।" (अल ग)

† विशेषेण अतिरेक एकस्याधिक्य व्यतिरेक।

चतुर्विधोऽपि साम्यस्य बोधनाच्छब्दतोऽर्थतः । (ऋ)
श्लेषाच्च द्वादशधा श्लेषेऽपीति त्रिरष्टधा ।
प्रत्येकं स्यान्मिलित्वाष्टचत्वारिंशद्विधः पुनः ॥७१॥

उपमेयस्योपमानादाधिक्ये हेतुरुपमेयगतमुत्कर्षकारणमुपमानगतं निकर्षकारणं च । तयोर्द्वयोरप्युक्तावेकः प्रत्येकं समुदायेन वानुक्तौ त्रिविध इति चतुर्विधेऽप्यस्मिन्नुपमानोपमेयस्य निवेदनं शब्देनार्थेनाक्षेपेण चेति द्वादशप्रकारोऽपि श्लेषेऽपीत्यपिशब्दाच्छ्लेषेऽपि चतुर्विंशतिप्रकारः । उपमानान्न्यूनतायामप्यनयैव भङ्ग्या चतुर्विंशतिप्रकारतेति मिलित्वाष्टचत्वारिंशत्प्रकारो व्यतिरेकः । (म)

उदाहरणम्—"अकलङ्कं मुखं तस्या न कलङ्की विधुर्यथा ।" (य)

अत्रोपमेयगतमकलङ्कत्वमुपमानगतं च कलङ्कित्वं हेतुद्वयमप्युक्तम् । यथा-शब्दप्रतिपादनाच्च शाब्दमौपम्यम् । अत्रैव न कलङ्कि विधूपममिति पाठे आर्थम् । "जयतीन्दुं कलङ्किन"मिति पाठे त्विवा[1]दितुल्यादिपदविरहादाक्षिप्तम् । अत्रैवाकलङ्कपदत्यागे उपमेयपदगतोत्कर्षकारणानुक्तिः । कलङ्किपदत्यागे चोपमानगतनिकर्षकारणानुक्तिः । द्वयोरनुक्तौ द्वयोरनुक्तिः । (र, ऋ)

शद्विधत्वम् । स चेति । क्वचित्तु एक उक्तेऽनुक्ते हेतौ पुनः त्रिधेति कारिका । एक इत्यादेरत्यापिकाक्षत्ति । हेतावित्युत्कर्षानुपकर्षतया हेतुद्वये इत्यर्थः ।

(वि, म) कारिकार्धं स्वयमेव विशदयति—उपमेयस्येति । प्रत्येकमिति । उत्कर्षहेतोर्निकर्षहेतोर्वाऽनुक्तौ द्वौ । समुदायानुक्तौ चैक इत्यनुक्तिनयमित्याह—त्रिविध इति । हेतुद्वयोक्तिगाद्वित्यादाह—चतुर्विधेऽप्यस्मिन्निति । निवेदनं ज्ञापनम् । शब्देनेति । उपमाया श्रौतीत्वे इत्यर्थः । अर्थेनेति । उपमाया आर्थीत्वे इत्यर्थः । आक्षेपेणेति । उपमाप्रतिपादकानाम् इवादीनां तुल्यादिपदानां चाभावे कल्पनेनेत्यर्थः । इति द्वादशविधोपीति । हेतुद्वयोक्त्यनुक्तिनयवशाच्चतुर्विधस्य उपमाया शब्दार्थाक्षेपवशात्त्रिगुणत्वेन द्वादशविध इत्यर्थः । तदा द्वादशकस्य श्लेषारोपयोः सम्भवं कारिकोक्तमपिशब्दाद् दर्शयति-श्लेषेऽपीति । भङ्ग्या प्रकारेण ।

(वि, य) अकलङ्कमिति । कलङ्की विधुर्यथा तस्या मुखं तथा न, किन्तु ततोऽधिकम् । यतोऽकलङ्कमित्यर्थः ।

(वि, र) तत्रैवानेकप्रकारसम्भवं दर्शयति—अत्रैवेति । द्वयोरनुक्तिरिति । 'तस्या मुखं न विधुर्यथे'त्येवं करणम् इत्यर्थः ।

(लो, ऋ) हेतावितीति । आश्रयेत्यर्थकवचनम् । यदुक्तं वृत्तौ हेतुरुपमेयगतमित्यादि । शब्दत इति । यदुक्तमर्थेन—श्रौती यथेवयाराब्दा इति । अर्थत इति । यदुक्तमर्थेन—आर्थी तुल्यगमनाद्या इत्युक्तन्यायात् ।

---

1 'इवपुष्पादि' (क. ग. ङ.)

विपर्यये वा व्यतिरेक इति" केषाञ्चिल्लक्षणे "विपर्यये वेति पदमनर्थक"मिति यत्केचिदाहुः, तन्न विचारसहम् । तथा ह्यत्राधिक्यन्यूनत्वे सत्त्वासत्त्व एव विवक्षिते । (ए)

अत्र च चन्द्रापेक्षया यौवनस्याऽसत्त्वं स्फुटमेव । अस्तु वात्रोदाहरणे यथा कथञ्चिद्गतिः । (श)

"हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दूतपथः सितीकृतः" । इत्यादिषु का गतिरिति सुष्ठूक्तं "न्यूनताथ वेति" । (प) (ऐ)

सहार्थस्य बलादेकं यत्र स्याद् वाचकं द्वयोः ।
सा सहोक्तिर्मूलभूतातिशयोक्तिर्यदा भवेत् ॥७२॥ (स, श्रो)*

इत्याह—**तेनात्रेति** । केचित्काव्यप्रकाशकारा. । किमाहुरित्यत्राह—**उपमानादिति** । व्यतिरेक इत्यन्तेय प्राचीना कारिका । तल्लक्षणे 'विपर्यये वेति' पदमनर्थकमित्याहुरित्यर्थ । सत्त्वासत्त्वे तत्रत्यातत्रत्ये, यौवनस्यातत्रत्वमाह—**अत्र चन्द्रापेक्षयेति** । ननूद्देश्यार्थस्याधिक्यमेव विवक्षित प्रकृते च मानिन्या यौवनास्थैर्य्य प्रदर्शयितुमुद्देश्य तदाधिक्यं चोपमेयाधिक्यमेवेत्यत आह—**अस्तु वेति** ।

(वि, प) हनूमदाद्यैरिति । नलस्य देवदूतभूतस्य दौत्यफलासिद्धया विषादोक्तिरियम् । **का गतिरिति** । दूतपथस्य यशसा सीतिकर्त्तृणा हनुमदादीनामुपमानानामेवाधिक्यादिति भावः । इदमुपलक्षणम् ।

"बलापाङ्गा दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।
कर व्याधुन्वत्या पिबसि रतिसर्वस्वमधरं
वय तत्त्वान्वेषान्मधुकर हतास्त्व खलु कृती ॥" इत्यभिज्ञाने
"पादाहतं यदुत्थाय मूर्द्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥"

इति माघे चोपमानभूततया मधुकररजसो कृतिपदवरपदाभ्यामेवाधिक्यस्योक्तत्वात् काव्यप्रकाशस्य मतमत्रानुपादेयमेव ।

(वि, स) सहोक्त्यलङ्कारमाह—**सहार्थस्येति** । **वाचकं द्वयोरिति** । उभयत्र स्वार्थान्वयबोधनमित्यर्थ । भिन्नविभक्तिकमपि पदं सहार्थस्य बलात्समानविभक्तिकभिन्नविभक्तिकपदार्थयोरभेदेन स्वार्थान्वयबोधनमित्यर्थ ।

(लो, ए) सत्त्वासत्त्वे, शोभनाशोभनत्वे ।

(लो, ऐ) हनूमदाद्यैरित्यादि दमयन्ती प्रति देवदूतस्य नलस्य वचनम् । द्विषा हसैर्दूतत्व परित्यज्य स्वय नायकत्वप्रतिग्रहादिति भाव ।

* सहभावस्य (साहित्यस्य) उक्ति सहोक्ति.", (हेमचन्द्र) यत्र "सहयुक्तेऽ-

अतिशयोक्तिरप्यत्राभेदाध्यवसायमूला कार्यकारणपौर्वापर्यविपर्ययरूपा च। अभेदाध्यवसायमूलाऽपि श्लेषभित्तिका अन्यथा च। क्रमेणोदाहरणम्। (ह)

"सहाधरदलेनास्या यौवने रागभाक् प्रिय।"

अत्र रागपदे श्लेष। (क, औ)

"सह कुमुदकदम्बै काममुल्लासयन्त
सह घनतिमिरौघैर्धैर्य्यमुत्सारयन्त।

(वि, ह) **अभेदाध्यवसायमूलेति**। नच भेदाध्यवसायस्यैव अतिशयोक्तित्वेन सा कथ तन्मूलेति वाच्यम्, शब्दस्यैवाध्यवसायस्यातिशयोक्तित्वेन तस्या वक्तृतदध्यवसायमूलत्वात्। भित्तिराश्रय श्लेषाश्रितेत्यर्थ।

(वि, क) **सहाधरेति**। अत्र तृतीयान्तपदार्थेऽधरदले प्रथमान्तपदार्थे प्रिये च रागवानितिपदम् अभेदेन स्वार्थबोधकम्, अधरदलमपि रागवदिति प्रतीते। रागपदार्थयोरभेदाध्यासरूपातिशयोक्तिश्च मूलम्।

(वि, ग) श्लेष विना त्वाह—**सह कुमदेति**। अमृताशारशव प्रतीदिश

(लो, औ) सहार्थस्य सहपर्य्यायशब्दस्य। एक क्रिया, गुणो वा। मूलभूता, बीजभूता।

(लो, औ) अन्यथाऽश्लेषभित्तिका। रागो लौहित्यम्, अनुरागश्च। श्लेषो द्व्यर्थता। उपमानोपमेयभावेऽत्र वैवक्षिक। द्वयो प्रकृतत्वात्। प्रकृतत्व च द्वयो प्रज्ञाविशेषत्वात्। अत्र तृतीयान्तानिर्दिष्टस्य गुणभावेनोपमानविवक्षा। स्थित्यनोदाहरणे अभेदाध्यवसायोऽपि कार्य्यकारणैककालीनतासपृक्त अधरदलस्य रागभक्तानानन्तरमेव प्रियस्य रागदर्शनात् तेनात्रातिशयोक्तिद्वयमप्यवस्थित, सम्बन्धिभेदाद् आश्रय भेदाद् (यदुक्त राघवानन्दै—"एकोऽपि धर्म आरोपमाश्रित्य सहार्थबलादन्यधर्मेणापि सम्बद्धयेत्तदा सहोक्तिरिति, तदसङ्गतम्। अस्यातिशयोक्तिमूलत्वस्य तैरपि स्वयमुपगमात्। अध्यवसायमूलायामतिशयोक्तौ पृथग्बीजस्यारोपस्यासम्भव। तदाहुश्चण्डीदासप्रभृतय—अनिगीर्णस्य विषयस्यान्यतादात्म्यप्रतीतिरारोप। निगीर्णस्य त्वध्यवसाय इति। अलङ्कारसर्वस्वकृताऽऽरोपे रूपकादिरध्यवसाये चोत्प्रेक्षादिरेवेति विवेक कृत।)

प्रधाने" इति सूत्रेण विहिता तृतीया तत्रैवायमलङ्कार। तृतीयान्तस्य विशेषणतया गुणत्व प्रथमान्तस्य विशेष्यतया प्रधानत्वम्। एव च प्रथमान्ते शाब्दोऽन्वय तृतीयान्ते तु सहार्थसामर्थ्यादार्थ। (उद्योत)। "उपमानोपमेयेत्र चात्र वैवक्षिकम्। द्वयोरपि प्राकरणिकत्वादप्राकरणिकत्वाद् वा तत्र तृतीयान्तस्य नियमेन गुणत्वादुपमानत्वम्। अर्थात्र परिशिष्टस्य प्रधानत्वादुपमेयत्वम्" (अलस०)।

सह सरसिजपण्डैः स्वान्तमामीलयन्तः
प्रतिदिशममृताशोरश्म सञ्चरन्ति ॥"

इद मम । अत्रोल्लासादीना सम्बन्धिभेदादेव भेदो न तु श्लिष्टतया । (ख)

"सममेव नराधिपेन सा गुरुसम्मोहविलुप्तचेतना ।
अगमत्तनु[1]तैलबिन्दुना सह[2] दीपार्चिरिव क्षितेस्तलम् ॥"(ग)

इय च मालयापि सम्भवति। [3]तथोदाहृते—

"सह कुमुदकदम्बैरि"त्यादौ । "लक्ष्मणेन सम राम· कानन गहन ययौ" इत्यादौ चातिशयोक्तिमूलत्वाभावान्नायमलङ्कार ।

विनोक्तिर्यद्विनान्येन नासाध्वन्यदसाधु वा ॥ ७३ ॥ ¶

नासाधु अशोभन न भवति । एव च यद्यपि शोभनत्व एव पर्यवसानं तथाप्यशोभनत्वाभावमुखेन शोभनवचनस्यायमभिप्रायो यत्कस्यचिद् वर्णनीयस्याशोभनत्व तत्परसन्निधेरेव दोष । तस्य पुन स्वभावत शोभनत्वमेवेति । (घ, ङ)

सञ्चरन्ति । अस्मिन् विशेषणान्याह—**सह कुमुदेति** । कदम्ब परड , समूह । आमीलयन्त सङ्कोचयन्त । स्वान्तस्य विषयान्तराद् व्यावर्त्तनमेव सङ्कोच· । अत्रेति । भेद इत्यनन्तरमभेदस्याध्यवसाय इति पूरणीयम् । तथा च सोऽध्यवसायो नतु श्लिष्टतयेत्यन्वय ।

(वि, ग) कार्यकारणपौर्वापर्यविपर्ययरूपातिशयोक्तिमूलिकामाह—**सममेवेति** । गुरुसम्मोहविलुप्तचेतना सा इन्दुमती नराधिपेन अजेन सममेव क्षितेस्तल पृष्ठम् अगमत् । तनुतैलबिन्दुना सह दीपार्चिरिवेत्यर्थ । अत्र नराधिपोऽपि क्षितेस्तलमगमदिति राहार्थस्य सम पदबलाद् बोध्यम् । इन्दुमतीपात कारण नराधिपपात कार्य्य, तयो समकालत्वकथनरूप पौर्वापर्यविपर्यय ।

(वि, घ) विनोक्त्यलङ्कारमाह—**विनोक्तिरिति** । व्याचष्टे—**नासाध्विति** । नन्वयमुक्तोक्ते भावार्थ कथनमाह—**एवं चेति** । **परसन्निधेरेव दोष** इति । परसन्निधेर्या दोषस्तदेवाऽशोभनत्वमित्यर्थ ।

(लो, ङ) शोभन एव पर्यवसानम् "अभावस्य तु योऽभावो भाव एवाऽवशिष्यते' इति न्यायादित्यर्थ ।

---

[1] यद् अन्येन विना अन्यद् नासाधु शोभनम्, असाधु अशोभन वा सा विनोक्तिः । यत्र केनचिद् विना कस्यचित् शोभनत्वमशोभनत्व वा प्रतिपाद्यते सा विनोक्तिः । विना भावस्य उक्तिर्विनोक्तिः । इय च न केवल विनाशब्दस्य सत्वे एव भवति । अपितु

'गह' (ङ. पु) 2 नतु (ङ पु)
3 'तथो' (ङ. पु)

यथा—

"विना जलदकालेन चन्द्रो निस्तन्द्रतां गतः।
विना ग्रीष्मोष्मणा मञ्जुर्वनराजिरजायत ॥" (ङ, आ)

असाधु अशोभनं यथा—

"अनुयान्त्या जनातीतं कान्तं साधु त्वया कृतम्।
का दिनश्रीर्विनार्केण का निशा शशिना विना ॥" (च, इ)

"निरर्थकं जन्म गतं नलिन्या
यया न दृष्टं तुहिनांशुबिम्बम्।
उत्पत्तिरिन्दोरपि निष्फलैव
दृष्टा विभाता[1] नलिनी न येन ॥" (ई)

अत्र परस्परविनोक्तिभङ्ग्या चमत्कारातिशयः। विनाशब्दप्रयोगाभावेऽपि विनार्थविवक्षया[2] विनोक्तिरेवेयम्। एवं सहोक्तिरपि सहशब्दप्रयोगाभावेऽपि सहार्थविवक्षया[3] भवतीति बोद्धव्यम्। (छ, उ)

(वि, ङ) विना जलदकालेनेति। निस्तन्द्रतां निर्मलताम्। अत्र जलदकालादेव चन्द्रो मलिनो ग्रीष्मतौ च वनराजिरमञ्जुरिति प्रतीतेः।

(वि, च) अनुयान्त्येति। सीता प्रति अनसूयावाक्यमिदम्। जनातीतं परिजनरहितम्।

(वि, छ) विनाशब्दाभावेऽपि तदर्थपर्यवसानेऽप्ययमलङ्कार इत्याह—निरर्थकमिति। अत्रेति। परस्परादर्शनादेव परस्परविनोक्तिभङ्गिलाभ इत्यर्थः। एवं सहोक्तिरपीति। तृतीयामात्रबलादित्यर्थः।

(लो, आ) निस्तन्द्रता निर्मलताम्। अत्र चन्द्रवनराज्योरनिर्मलत्वाऽमञ्जुलत्वे जलदकालग्रीष्मकालहेतुके, निर्मलत्वमञ्जुलत्वे पुनः सहजधर्मादित्याशयः।

(लो, इ) जनातीतं लोकान्तिकानिर्जनस्थानं गतमिति यावत्।

(लो, ई) विभाता—विकसिता।

(लो, उ) विनाशब्दाभावादत्र कथं विनोक्तिरित्याशङ्क्याह—विनाशब्देति। सहशब्दाभावे सहार्थविवक्षा, यथा 'ततो भार्गवप्रौढाहङ्कृतिकन्दलेन सहसा तद्भग्नमैशं धनुर्येन।

विना शब्दार्थवाचकमात्रस्य। तेन नञ् निर् वि अन्तरेण ऋते रहित विकल इत्यादिप्रयोगे इयमेव।' (रस. ग)

1 'विनिद्रा' (क. पु.)
2 'विवक्षायाम्' (क. ख. पु.)
3 'विवक्षाया' (क. पु)

समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः ।
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः ॥ ७४ ॥ (ज, ऊ)+

अत्र समेन कार्येण प्रस्तुतेऽप्रस्तुतव्यवहारसमारोपः ।

यथा—

"व्याधूय यद्वसनमम्बुजलोचनाया
वक्षोजयोः कनककुम्भविलासभाजोः ।
आलिङ्गसि प्रसभमङ्गमशेषमस्या
धन्यस्त्वमेव मलयाचलगन्धवाह ॥" *

अत्र गन्धवाहे हठकामुकव्यवहारसमारोपः । (ऋ, ॠ)

(वि, ज) समासोक्त्यलङ्कारमाह—**समासोक्तिरिति** । अन्यस्य अप्रस्तुतस्य वस्तुनो व्यवहारस्य अर्थाद् व्यङ्ग्यस्य प्रस्तुते वस्तुनि समारोप इत्यर्थः । तद् व्यञ्जनं च समै प्रस्तुताऽप्रस्तुतसमानैः कार्यलिङ्गविशेषणैरित्यर्थः ।

(वि, ऋ) व्याधूयेति । वक्षोजयोर्वसनं व्याधूय दूरीकृत्येत्यर्थः । अत्रालिङ्गनं कार्यम् । सम्बोध्यत्वेन मलयानिलः प्रकृतः । यथा वा मम—

"उल्लास्य लास्यनिलयं विपुलोरुयुग्मं
प्रोत्क्षिप्य बाहुलतिकामतिशान्तगम्यः ।
यं साभिलाषमनसः प्रमदा भजन्ते
पुण्यात्मने शिशिरपावन ते नमोऽस्तु ॥"

अत्र नायिकाव्यवहारारोपभजनं कार्यं सम्बोध्यत्वेन पावनः प्रकृतः ।

"वनश्रियं वसन्तेन ज्योत्स्नया तुहिनद्युतिम् ।
कान्तया शून्यमालोक्य कस्य चेतो न दूयते ॥"

इत्र न दूयत इत्यनेनासाधुत्वमुक्त्यायामिति विनोक्तिरेव ।

(लो, ऊ) **समासोक्तिरिति** । समैस्तुल्यैर्व्यवहारस्य कृतस्य न तु रूपकवत् स्वात्मन । अन्यस्याऽप्रस्तुतस्य ।

(लो, ऋ) व्याधूयेत्यत्र गन्धवाहे हठकामुकव्यवहारसमारोपे लिङ्गसाम्यस्यापि प्रयोजकत्वे वसनव्याधूननादिक्रियासाम्यप्राधान्यादन्योदाहरणम् । एवमन्येष्वपि समासोक्त्युदाहरणेषु । कार्यलिङ्गविशेषणानां कस्यचिद् द्वयो. त्रयाणां वा समारोऽपि बोध्यम् ।

+ समासोक्तौ प्रकृतवृत्तान्तोऽभिधया प्रतीयते, अप्रकृतवृत्तान्तस्तु व्यञ्जनयैव बुध्यते । प्रकरणेन अभिधाया नियमनाद् इति भावः ।

समासेन संक्षेपेण (एकेन शब्देन) उक्तिरर्थद्वयस्य यत्रेति व्युत्पत्तिः ।

* हे मलयानिल ! दक्षिणपवन ! यद् यस्मात् त्वमम्बुजलोचनायाः

लिङ्गसाम्येन यथा—

"असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः ।
अनाक्रम्य जगत्कृत्स्नं नो सन्ध्यां भजते रविः ॥" *

अत्र पुस्त्रीलिङ्गत्वमात्रेण रविसन्ध्ययोर्नायक[1]व्यवहार । (ग)

विशेषणसाम्यन्तु श्लिष्टतया साधारण्येनौपम्यगर्भत्वेन च त्रिधा । तत्र श्लिष्टतया यथा मम—(ट, ङ)

"विकसितमुखीं रागासङ्गाद्गलत्तिमिरावृतिं
दिनकरकरस्पृष्टामैन्द्रीं निरीक्ष्य दिशं पुरः ।
जरठलवलीपाण्डुच्छायो भृशं कलुषान्तरः
श्रयति हरित हन्त प्राचेतसीं तुहिनद्युतिः ॥"

(वि, ञ) **असमाप्तेति** । स्पष्टार्थं । पराङ्ग दृष्टान्त । सन्ध्यां सायसन्ध्याम् । नायकव्यवहार इत्यत्रैकशेष । यद्यप्यत्र जिगीषुरेव प्रकृततयोपमेयभूतो रवि प्रकृत , तथापि व्यङ्ग्यनायिकापेक्षया वाच्यो रविरपेक्षिक प्रकृत ।

(वि, ट) **श्लिष्टतयेति** । श्लिष्टशब्दस्यैवोभयविशेषणत्वेन इत्यर्थ । **साधारण्येनेति** । आर्थीरूपविशेषणस्योभयसाधारण्येनेत्यर्थ । औपम्यगर्भत्वमौपम्यप्रतीत्यनन्तरमप्यप्रस्तुतत्वव्यवहारारोप । तस्य च त्रिधात्व वक्ष्यते ।

(वि,ठ) **विकसितमुखीमिति** । प्रभातवर्णनमिदम् । हन्त खेदे । ऐन्द्रीं दिश दिनकरकरस्पृष्टा पुर सम्मुखे निरीक्ष्य जरठस्य कठिनस्य लवलीफलस्येव पाण्डुच्छाय सन् तुहिनद्युति कलुषान्तर कलङ्कमलिनान्तर प्राचेतसीं प्रतीचीं हरित श्रयति । लवलीफलस्य पक्वत्वे सति काठिन्य पाण्डुरत्व च । शशिन पाण्डुरत्व दर्शनात् । ऐन्द्रीं कीदृशीं विकसितमुखीं, प्राप्तप्रकाशसम्मुखीम् । रागासङ्गात्, किरण रक्तिमासङ्गाद् गलत्तिमिरूपावरणाम् । हन्तेत्यनेन खेदप्रकाशनम् । स्वाक्रान्ता दिश विरोधिनाऽऽक्रान्ता दृष्ट्वा दु खेन पाण्डुर सन् दिगन्तरमाश्रयतीति वाक्यार्थाभिप्राय ।

(लो,ङ) **पुस्त्रीलिङ्गत्वमात्रेणेति**। प्राधान्यतो हेतुभूतेनेत्यर्थ । श्लिष्टतया द्व्यर्थतया । साधारण्येन सम्बन्धभेदभिन्नैकधर्मवत्त्वेन ।

(लो, ल) **विकसितेति** । मुखमारम्भो वदन च । रागो लौहित्यमासक्तिश्च ।

कमलनयनाया कनककुम्भस्य स्वर्णकलसस्य विलास शोभा भजेति तयो—(भजेर्विण्) वक्षोजयो स्तनयो वसन वस्त्र व्याधूय दूरीकृत्य अस्या अशेष सर्वम् अङ्ग प्रसभ हठाद् आलिङ्गसि तस्मात् त्वमेव धन्य ।

* न समाप्ता जिगीषा जेतुमिच्छा यस्य तादृशस्य मनस्विन का स्त्रीचिन्ता । अपितु न काऽपि । अनाक्रम्य अनतिक्रम्य ।

1 नायकनायिका इति (घ. ग च पुस्तके)

अत्र मुखरागादिशब्दाना श्लिष्टता । (ठ, ख)

अत्र हि "तिमिरावृति"मित्यत्र "तिमिराशुकामि"ति पाठे एकदेशस्य रूपणेऽपि समासोक्तिरेव। नतु एकदेशविवर्त्तिरूपकम्। अत्र हि तिमिराशुकयो रूप्यरूपकभावो द्वयोरावरकत्वेन स्फुटसादृश्यतया परसाचिव्यमनपेक्ष्यापि स्वमात्रविश्रान्त इति न समासोक्तिबुद्धिं व्यपहन्तुमीश्ट । (ए)

यत्र तु रूप्यरूपकयो सादृश्यमस्फुट तत्रैकदेशान्तररूपण विना तदसङ्गत स्यादित्यशब्दमप्येकदेशान्तररूपणमार्थमपेक्षत एवेति ।

तत्रैकदेशविवर्त्तिरूपकमेव (ड) यथा—

"जस्स रणन्तेउरए करे कुणन्तस्स मण्डलग्गलअ ।

अप्रस्तुतस्य व्यञ्जनया रविचन्द्रयोरैन्द्रीप्राचेतसीदिशोश्चारोप• । तथा हि—स्वनायिका स्मेरमुखीम् अनुरागेण गलिताङ्गावरणा करेण स्पृशन्त परनायक दृष्ट्वा दु खात् पाण्डुरच्छायो नायकस्ता त्यक्त्वा नायिकान्तरमाश्रयतीत्येव व्यवहारस्य प्राचीरव्यो प्रतीचीचन्द्रयोश्चारोप । तत्र च सम्मुखमुखोभयाश्लिष्टमुखपदरागकरपदाना श्लिष्टतेत्याह—**अत्र मुखेति ।**

(वि, ड) न त्वेकदेशविवर्त्तिरूपकमिति । ऐन्द्रीप्रधाननायिकानिरूपण व्यङ्गयम् । तद्धर्मरूपस्याशुकरूपस्यैकदेशस्य तिमिररूपस्य वाच्यत्वेन तत्प्रसक्तिर्वोध्या । तद्भावे हेतुमाह—**अत्र हीति ।** रूपकान्तरस्याऽऽक्षेपे एव यत्र वाच्यो रूप्यरूपकभावो, न तु स्वस्य स्फुटसादृश्यात्तत्रैव वाच्यरूपकान्तरस्य आक्षेपत्वेन एकदेशविवर्त्तिरूपकम् । तदुदाहरण च "जस्स रणन्ते" इति दर्शयिष्यते । प्रकृते तु अशुकतिमिरयो स्फुटसादृश्यादार्थरूपकनिरपेक्ष स्वतो रूप्यरूपकाभाव इत्यतो नैकदेशविवर्त्तितेत्यर्थ । स्वमात्रविश्रान्त स्वतन्त्र । एकदेशविवर्त्तिनो विषय दर्शयति । अशब्दमित्यस्य विवरणस्य व्यङ्गयमित्यर्थ ।

(वि, ढ) जस्स रणन्ते इति ।

"यस्य रणान्त पुरे करे कुर्वतो मण्डलाग्रलताम् ।
रसस्सम्मुख्यपि सहसा पराङ्मुखी भवति रिपुसेना ॥"

इति स• । मण्डलाग्रलता खड्गलताम् । रसो युद्धरस एव । व्यङ्गयप्रतिनायिकापक्षे शृङ्गाररस । भीत्या पराङ्मुखी, तयैव लज्जया पराङ्मुखता मुखस्य पराश्रय-

---

कर किरणो इत्यत्र । श्लिष्टेत्ययमाशय श्लेषाद्यातिशयोक्तिप्रयोजने नायकव्यवहारे बीजम् ।

(लो, ए) स्फुटसादृश्यतया मुखचन्द्रयोरिवेत्यर्थ । परसाचिव्य, परस्य शब्दार्थस्य वा रोपणस्य साचिव्य साहाय्यम् । स्वमात्रे नतु शब्दान्यापेक्षी ।

रससंसुहीवि सहसा परंमुही होइ रिउसेणा ॥" +

अत्र रणान्त पुरयो सादृश्यमस्फुटमेव । (ऐ)

क्वचिच्च यत्र स्फुटसादृश्यानामपि बहूना रूपणं शाब्दमेकदेशस्य चार्थं तत्रैकदेशविवर्तिरूपकमेव । (ण, ओ)

रूपकप्रतीतेर्व्यापितया समासोक्तिप्रतीतितिरोधायकत्वात् । (त, औ)

त्वेन । रण एव अन्त पुरं तत्र श्रीलिङ्गशब्दार्थत्वेन मण्डलाग्रलतया रूप्यमाण-नायिकाव्यञ्जनात् । स्वैरं कुर्वतो राज्ञोऽपि नायकत्वं व्यङ्ग्यम् । तद्भ्रष्टायां रिपु-सेनायामपि स्त्रीलिङ्गशब्दार्थत्वेन रूप्यमाणा प्रतिनायिका व्यङ्ग्या अत्र रणेऽन्त-पुररूपणमेकदेशविवर्ति ।

(वि, ण) नन्वेवमस्फुटसादृश्यसत्त्व एव एकदेशविवर्तित्वं, तत्कथम्

"लावण्यमधुभि पूर्णमास्यमस्या विकस्वरम् ।
लोकलोचनरोलम्बकदम्बै र्वैनं पीयते ॥"

इत्येकदेशविवर्त्युदाहरण दत्तम् । तत्र लावण्यमधुनो माधुर्यस्य उपादेयत्वपर्य्यव-सन्नस्य सादृश्यस्य लोचनभ्रमरयोश्च चाञ्चल्यरूपगादृश्यस्य स्फुटत्वादित्यत आह—यत्रेति ।

(वि, त) ननु स्फुटसादृश्यादीनां बहुत्वे एकदेशविवर्तित्वमित्यत्र का युक्ति-रित्यत्र आह—रूपकप्रतीतेरिति । व्यापितया बहुत्वेन तस्याश्च बहुत्ववशात् प्रथमो-त्पन्नत्वेन समासोक्तिविरोधकत्वम् ।

(लो, ऐ) तर्हि क पुनरेकदेशविवर्तिरूपकस्य विषय इत्याशङ्क्याह—तत्र त्विति । "जस्स रणन्तउर' इत्यादौ रणान्त पुरादिकयो रूप्यरूपकयोरेकदेशान्तररू-पण मण्डलाग्रलतादिषु राजनायिकात्वाद्यारोप विनाऽस्फुटमेव । जस्सेति ।

"यस्य रणान्त पुरे करे कुर्वतो मण्डलाग्रलताम् ।
रणसम्मुख्यपि सहसा पराङ्मुखी भवति रिपुसेना ॥"

रम उत्साहोऽनुरागश्च ।

(लो, ओ) क्वचिल्लावण्यमधुभि पूर्णमित्यादौ । करमुदयमहीधर इत्यादौ ।

(लो, औ) व्यापितयानेकपदाश्रयत्वादिति भाव ।

+ यस्य राज्ञो रण एवान्त पुर तत्र मण्डलाग्र खड्ग एव लता तदाकारत्वात् सा नायिका च करे पाणौ कुर्वतो गृहीतवत युद्धार्थं रतार्थं च रिपुसेना शत्रुसेना प्रतिनायिका च रणसम्मुख्यपि युद्धरसया वीररसाविष्टाऽपि रिरंसया शृङ्गाररसावि-ष्टापि सहसा पराङ्मुखी भवति । अत्र रणे अन्त पुरत्वमारोप्यमाण शब्दोपात्तम् । मण्डलाग्रलताया नायिकायाश्च रिपुसेनायाश्च प्रतिनायिकात्वं चारोप्यमाण न शब्दोपात्तं किन्त्वन्त पुरत्वारोपादवगीयते ।

नन्वस्ति रणान्तःपुरयोरपि सुखसञ्चारतया स्फुटं सादृश्यमिति चेत्, (थ) सत्यमुक्तम्। अस्त्येव। किन्तु वाक्यार्थपर्यालोचनसापेक्षं न खलु निरपेक्षम्। मुखचन्द्रादेर्मनोहरत्वादिवद्रणान्तःपुरयोः स्वतः सुखसञ्चारालाभात्। (य)

साधारण्येन यथा—

"निसर्गसौरभोद्भ्रान्तभृङ्गसङ्गीतशालिनी।
उदिते वासराधीशे स्मेराजनि सरोजिनी॥" (द, श्रा)

अत्र निसर्गेत्यादिविशेषणसाम्यात्सरोजिन्यां नायिकाव्यवहारप्रतीतौ स्त्रीमात्रगामिनः स्मेरत्वधर्मस्य समारोपः कारणम्। (इ)

तेन विना विशेषणसाम्यमात्रेण नायिकाव्यवहारप्रतीतेरसम्भवात्। (ध) †

(वि, थ) रणान्तःपुरयोरपि स्फुटसादृश्यत्वमाशङ्कते—**नन्वस्तीति**। **वाक्यार्थपर्यालोचनसापेक्षमिति**। नृपदर्शनाद् रिपुसेनापराङ्मुखत्वं प्रत्यर्थतात्पर्य्यालोचनेन राज्ञः शूरत्वस्य ततो रणेऽभीतत्वस्य च लाभेन तत एव सुखसञ्चारलाभ इत्यर्थः। **रणान्तःपुरयोः स्वतः सुखसञ्चारालाभादिति**। नहि मुखचन्द्रयोर्मनोहरत्वमिव राज्ञो रणे भीतत्वबुद्धिं विना प्रत्यक्षादिना सुखसञ्चारत्वं गम्यमिति भावः। अत्र रणान्तःपुरयोरिति सञ्चारालाभादित्यत्र सञ्चारत्वाभावादिति क्वचित् प्रामादिक एव पाठः।

(वि, द) **निसर्गेति**। अत्राप्रस्तुतनायिका व्यङ्ग्या। तत्पक्षे च निसर्गसिद्धसुखसौरभेणोद्भ्रान्तो भृङ्गो यस्यास्तादृशी चासौ सङ्गीतशालिनी चेति समासः। एवं वासरं दिनमेव। वासरं गृहं तदधीशे गृहपतौ उदिते इत्यर्थः।

अत्र दर्शितरीत्या निसर्गेति विशेषणान्नायिकाऽऽपतति।

(वि, ध) प्राकरणिकरविकमलिनीवृत्तान्तमात्रप्रत्यायकत्वेनापि तदुपपत्तेरित्यतस्तत्प्रत्यायकत्वनियतं स्मेरविशेषणमेवेति वक्तुमाह—**अत्र निसर्गेत्यादीति**। **स्त्रीमात्रेति**, मात्रपदात् सरोजिनीव्यवच्छेदः। तथा सरोजिन्याः, पुष्पविकाशस्मेरत्वस्यारोपवशात्तस्या साधारणधर्मत्वं तादृशारोपश्च नायिकाव्यवहारप्रतीतिहेतुरित्यर्थः। **विशेषणसाम्यमात्रेणेति**। निसर्गेत्यादिविशेषणसाम्यमात्रेणेत्यर्थः। **असम्भवादिति**। रविकमलिनीवृत्तान्तेनैव तदुपपत्तेरित्यर्थः।

(लो, अ) मुखसञ्चारतयाऽनायासविहारास्पदत्वेन स्वतो मण्डलाग्रलतादीनां नायिकाचायारोपमनपेक्ष्य।

(लो, श्रा) स्मेरा ईषद्भागवती।

(लो, इ) स्त्रीमात्रगामिनः सरोजिन्यामुपचारादेव प्रवृत्तेः, कारणं प्रधानम्, इतरेषां तु तच्चर्चिकमाहात्म्यमेव।

---

† "तदेव साधारण्येन समासोक्तेर्विशेषणसाम्ये सत्यपि अप्रकृतसम्बन्धिधर्मस्वसंगमारोपमन्तरेण तद्व्यवहारप्रतीतिर्न भवतीति सिद्धम्।" (जयरथः)

औपम्यगर्भत्वं पुनस्त्रिधा सम्भवति । उपमारूपकसङ्करगर्भत्वात् । (न)
अत्रोपमागर्भकत्वे यथा—

"दन्तप्रभापुष्पचिता पाणिपल्लवशोभिनी ।
केशपाशालिवृन्देन सुवेषा हरिणेक्षणा ॥"

अत्र सुवेशत्ववशात्प्रथमं दन्तप्रभाः पुष्पाणीत्युपमागर्भत्वेन समासः । अनन्तरं च दन्तप्रभासदृशैः पुष्पैश्चितेत्यादिसमासान्तराश्रयेण समानविशेषणमाहात्म्याद् हरिणेक्षणायां लताव्यवहारप्रतीतिः । (प, ई)

(वि, न) **उपमारूपके**ति । उपमागर्भत्वे रूपकगर्भत्वे उपमारूपकयो. सन्देहसङ्करगर्भत्वे चेत्यर्थः । गर्भत्वं च तज्ज्ञानपूर्वकत्वम् । नच रूपकगर्भकस्य कथमुपमागर्भप्रभेद इति वाच्यम्, रूपकस्यापि सादृश्यजनकत्वेन तज्जननात्पूर्वं तद्बोधेन तत्पूर्वत्वादपीत्याह—

(वि, प) **दन्तप्रभे**ति । अत्र दन्तप्रभा पुष्पाणीव इत्यादिरीत्या सर्वत्र पुरुषव्याघ्रादित्वादुपमासमासः । नच दन्तप्रभैव पुष्पमित्यादिरीत्या रूपकमेवेति वाच्यम् । रूपकस्य बाधकद्वयसत्त्वात् । तथा हि—"उपमित व्याघ्रादिभि सामान्याप्रयोगे" इति पाणिन्यनुशासनेन साधारणधर्माऽप्रयोगे रूपकसमासबाधाद् उपमासमासस्यैव व्यवस्थापनादित्येकं बाधकम् । द्वितीयं ग्रन्थकृदेव आह—**अत्र सुवेषत्ववशादि**ति । अयं भाव । वेषास्तदारोपितधर्माः । कटकुण्डलसिन्दूरादीना दन्तप्रभादीना च नायिकाधर्मशक्तिधर्मत्वेनारोपितत्वात् । पुष्पादिभिस्तै सुवेषप्रतीतिर्न घटते इत्यत. प्रथमं दन्तप्रभादिविशेष्यके व्याघ्रादिसमास एवेत्याह—**उपमागर्भत्वेने**ति । ननु तथापि सैवानुपपत्तिः, स्वीयधर्मै. सुवेषत्वाऽसम्भवादित्यत आह—**अनन्तरं चे**ति । अयमर्थ —सकृदुच्चरितै शब्दैरसकृच्छक्तिक्लृप्तानाम्या बोधासम्भवाद्दर्शितोऽयं पुष्पादिविशेष्यक उपमासमासार्थो व्यङ्ग्य एव । तात्पर्यवशाच्छक्त्या वाच्यबोधकत्वं वा । सुवेषत्वोपपत्तिरूप च समासद्वयतात्पर्यग्राहक तेन च सुवेषत्वोपपत्तौ उपपत्तिमाह—**समानविशेषणमाहात्म्यादि**ति । समासद्वयघटितत्वेनोभयविशेषणात् साम्यम् । एकैकसमासेन एकैकविशेषणमिति भाव । लताव्यवहारस्तद्वल्लास्यादिः ।

(लो, ई) सुवेषत्ववशात् सुवेषेति पदसामर्थ्यात् । तद्धि नायिकायां मुख्यं ननु सतायामिति नायिकाधर्मेणामेव दन्तप्रभादीनामुपमेयप्रयोजक, ननु हरिणेक्षणापदोपादानं, प्रस्तुतेतरपदापेक्षयैव समासप्रवृत्तेर्व्यवस्थानात् । अन्यथा दासे कृतागसीत्यादावपि प्राचीनप्रसिद्धेऽपि रूपकसमासविषये उपात्तनायिकानुगुण्येन पुलकाङ्कुरकण्टकैरित्यत्र उपमागमास एव स्यात् । समासान्तरेण सामग्रीवशादासर्गिणेन ।

रूपकगर्भत्वे यथा—

"लावण्यमधुभिः पूर्णमि"त्यादि ॥ (फ)

सङ्करगर्भत्वे यथा—

"दन्तप्रभापुष्पे" त्यादौ "सुवेषे"त्यत्र "परीते"ति पाठे ह्युपमारूपकसाधकाभावात् सङ्करसमाश्रयणम् । समासान्तरं पूर्ववत् । समासान्तरमहिम्ना लताप्रतीतिः । (ब, उ)

एषु च येषां मते उपमासङ्करयोरेकदेशविवर्तिता नास्ति तन्मते आद्यतृतीययोः समासोक्तिः । द्वितीयस्तु प्रकार एकदेशविवर्तिरूपकविषय एव । (भ)

(वि, फ) लावण्यमध्वितिं—नच एकदेशविवर्तिरूपकोदाहरणमेव प्रागुक्तम्, कथमत्र समासोक्तिरिति वाच्यम् । साम्प्रदायिकमते एकदेशविवर्तिरूपकस्थले सर्वत्र व्यङ्ग्यरूप्याशे समासोक्तित्वस्वीकारात्, यत्र विशेषे तु न स्वीकार इत्यग्रे व्यक्तिर्भविष्यति । अत्र सामान्यधर्मप्रयोगेऽपि नोपमासमासः । मधुतुल्यलावण्यस्य पानासम्भवात् । रूपकत्वे तु मधुनः सम्भवत्येव पानम् । आस्यस्यैवात्र पानमुक्तं तस्य चोभयथापि पानासम्भव इति न वाच्यम्, 'सविशेषणौ विधिनिषेधौ विशेषणमुपसङ्क्रामतः सति विशेष्ये बाधे' इति न्यायान्मधुन्येव चान्वयात् ।

(वि, ब) परीतेति पाठे इति । सुवेषत्वस्य निजधर्मेणाऽसम्भवात्तन्मत्त्वे क्रमशः समासद्वयेनैवोपपत्तिर्दर्शितेत्यतस्तत्र न रूपकोपमायाः सन्देहसङ्करः । परीतेति पाठे तु परीतत्वं व्याप्तिः पुष्पैर्लावण्यैः सम्भवतीत्यत्र समासद्वयेनोपमारूपकयोर्भेदस्यैव सन्देह इति भावः । नच सामान्यधर्मप्रयोगवशादुपमा रूपकं बाधत इति वाच्यम् । रूपकस्य सम्भवे तथा रूपकाऽबाधात् । सुवेषत्ववशाद्रूपकबाधादेव तथा तद्बाधस्य प्राग् दर्शितत्वात् । सन्देहसङ्करं प्राहेति—अत्र हीति । समासान्तरमिति । विनिगमकाभावेनोभयसमासान्तरं पूर्ववल्लताप्रतीतिरित्यन्वयः । तत्र हेतुमाह—समासान्तरमहिम्नेति । समासान्तरमत्र रूपकसमासः । तद्भवे लावण्यमधुभिः पूर्णमित्येकदेशविवर्तिरूपकोदाहरणेऽपि समासोक्तिभेदः दर्शितः साम्प्रदायिकमतानुसारेणैव ।

(वि, भ) केचित्त्वेकदेशविवर्तिरूपके समासोक्तिं न मन्यन्ते, किन्तूपमातत्सङ्करगर्भत्वमेव तां मन्यन्ते । तत्र प्रथमं रूपकसमासयोरभेदस्याऽदर्शितत्वात्तेषां मतं दर्शयति—एषु चेति । आद्यं दन्तप्रभेत्यादिकम् । तृतीयं परीतत्वपाठविशिष्टम् । तेन द्वितीयो लावण्यमधुभिरित्यादिरेव रूपकविषय एव न समासोक्तिविषयः । व्यङ्ग्य-

---

(ला, उ) साध्यकामायामिति । परीतत्वस्य हरिणेक्षणायां लतायां न साधारण्येनैव प्राप्ते । सङ्करसमाश्रयणमिति । सङ्करोऽत्र उपमारूपकसन्देहसङ्करः । समासयोस्तु समासो निर्दोष एवास्ते । पूर्वं दन्तप्रभापुष्पयोः पुष्पैक्ये पुनरुक्तप्रसङ्गः । समासान्तरमिति । समासान्तरं भावप्रधानम् ।

पर्यालोचने त्वाद्ये प्रकारे एकदेशविवर्त्तिन्युपमैवाङ्गीकर्तुमुचिता। (म, ऊ) अन्यथा। (य)

"ऐन्द्रं धनुः पाण्डुपयोधरेण
शरद्दधानार्द्रनखक्षताभम्।
प्रसादयन्ती सकलङ्कमिन्दुं
तापं रवेरभ्यधिकं चकार ॥" (र, ऋ)

रूपकं मुखस्य पद्मत्वं तद्धर्मलावण्यादौ मध्वादिरूपकं वाच्यमित्येकदेशविवर्त्तिसुवेषत्व-विशेषणवति दन्तप्रभेत्यादौ।

(वि, म) पर्यालोचने तु न समासोक्तिर्नाप्येकदेशविवर्त्तिरूपकं किन्त्वेकदेशविवर्त्युपमैव इति स्वमतं ग्रन्थकृदाह—**पर्यालोचने त्विति**। समासे लुप्तेवकाराल्लावण्यादौ मध्वाद्युपमा वाच्या। नायिकाया तूपमा व्यङ्ग्या इत्येकदेशविवर्त्तिनी उपमैवेत्येवकारात्समासोक्तिव्यवच्छेदः। तद्व्यवच्छेदस्तु तत्पर्यालोचनादित्याह—**पर्यालोचने त्विति**। विशेषणसाम्ये यत्समासोक्तिरित्युक्तं तत्र विशेषणस्य साधारणत्वं श्लिष्टत्वं चेति। द्वैविध्यमेवोचितम्। औपम्यगर्भत्वरूपस्तृतीयप्रकारो नोचितः। तत्र दन्तप्रभापुष्पमित्येवोपमासमासबोधे हरिणेक्षणा लते वेति बोधस्य समासद्वयकुक्षिकल्पनविनैवोपपत्तिरित्येवं पर्यालोचना। एवं चाद्यप्रकारीतेस्तृतीयप्रकारेऽपि सम्भवात्तत्राप्येकदेशविवर्त्युपमैवेत्यत्र उपमागर्भविशेषणिका समासोक्तिर्नास्त्येवेत्यभिप्रायः। आद्ये प्रकारे इत्युपलक्षणमेव।

(वि, य) अन्यथेति। समासद्वयकल्पना कुक्षम्भरैव औपम्यगर्भस्थले समासोक्त्यङ्गीकारे इत्यर्थः। यत्र समासद्वयकल्पना कुक्षम्भरसम्भवस्तत्र कथं समासोक्तिरित्यत्राह।

(वि, र) ऐन्द्रं धनुरिति। पाण्डुना पयोधरेण औपम्येनार्द्रनखक्षताभम् ऐन्द्रं धनु दधाना सकलङ्कमिन्दु प्रसादयन्ती प्रसन्नं निर्मलं कुर्वती शरद्रवेरत्यधिकं तापं ततानेत्यर्थः। शरदि मेघस्य पाण्डुत्वादिन्दोः निर्मलत्वान्मेघावरणाभावेन रवेस्तापाधिक्याच्च। अत्र पाण्डुपयोधरेण गौरस्तनेनार्द्रनखक्षतं दधानायाः परनायिकाया गन्तृ-

---

(लो, ऊ) इह चौपम्यगर्भस्यैव वैशिष्ट्यसम्भवेऽपि द्वितीयोदाहरणम् एकदेशविवर्त्तिरूपकविषय एवेति न पूर्वोत्तरविरोध इत्याह—**एषु चेति**। आद्य दन्तप्रभा इत्यादि पद्यम्। तृतीयं तदेव सुवेषा इत्यत्र परीतपाठयुक्तम्। द्वितीयो लावण्यमधुभिः पूर्णमित्यादिपद्यावस्थितः। नन्व प्रथमतृतीययोरपि समासोक्तिरित्याह—**पर्यालोचने त्विति**। पर्यालोचने तस्यनो विवेचने उचिता हरिणेक्षणा लतेवेति प्रतीतेः।

(लो, ऋ) ऐन्द्रमिति। पयोधरो मेघः स्तनश्च। प्रसादनं निर्मलीकरणं, परितोषणं च। कलङ्को लक्ष्म, कुलादिदोषश्च। तापः आतपो मनोज्वरश्च। शरदो नायिकान्वयप्रतीतिरित्युक्तम्। तद्विशेषणस्यैव विचारदशास्पदत्वात्। रविशशिनोर्नायक-

इत्यत्र कथं शरदि नायिकाव्यवहारप्रतीतिः। नायिकापयोधरेणार्द्रनखक्षता-भशक्यचापधारणासम्भवात्। (ल)

ननु "आर्द्रनखक्षताभम्" इत्यत्र स्थितमप्युपमानत्वं वस्तुपर्यालोचनया ऐन्द्रे धनुषि सञ्चारणीयम्। (व) यथा—"दध्ना जुहोती"त्यादौ हुवनस्यान्यथा सिद्धेर्दध्नि सञ्चार्य्यते विधिः। एवं चेन्द्रचापाभमार्द्र-

---

लेन कलङ्किनमुपनायकमनुनयन्त्यास्तत्प्रदर्शनेन पत्युस्तापाधिक्यं जनयन्त्याश्च नायिकायाः समासोक्त्या प्रतीतिः तद्व्यवहारस्य च शरदि प्रतीतिः।

(वि, ल) उपमागर्भसमासोक्त्यङ्गीकारे तद्गर्भत्वे च समासद्वयनियमे सा कथं स्यादित्यर्थः। आर्द्रनखक्षतामामित्यत्रोपमाबोधकस्यामापदस्य सत्त्वे रूपकासम्भवाद् उपमासमासे च ऐन्द्रे धनुषि आर्द्रनखक्षततुल्यत्वप्राप्तौ नायिकायां च विशेषणाभावेन तद्विशेषणस्य शरन्नायिकोभयधर्मत्वाभावेन कथं विशेषणसाम्यं कथं तस्यैवोपम्यगर्भत्वं कथं वा समासगर्भद्वयकल्पनमिति मनसिकृत्याह—

नायिकापयोधरेणेति। तथा च उपमागर्भसमासोक्तिर्नास्त्येव। किन्त्वत्र पयोधरस्य प्रसादयन्तीति पदस्य सकलङ्कपदस्य तापपदस्य च श्लिष्टविशेषणस्य समासोक्तिरेवेयम्। नोपम्यगर्भविशेषणिका इत्युक्तमनेन।

(वि, व) ननु आर्द्रनखक्षताभमित्यत्रार्द्रनखक्षतमुपमानम्। ऐन्द्रं धनुश्चोपमेयम्। धारणान्वयश्चोपमेय एव बोधितस्तेनाऽसम्भवो दर्शितः। मनसा तु आर्द्रनखक्षतस्योपमानत्वं धनुषि बोध्यम्। क्षते तु तदुपमेयत्वं बोध्यम्। तथा च तत्क्षतधारणं क्षतस्य गम्भवत्येव इत्यत उपमागर्भसमासोक्तिरेवात्रापीति कथमुपमागर्भसमासोक्तिविलोप इत्याशङ्क्याह—नन्विति। **स्थितमपि** इति। नखक्षते स्थितमपीत्यर्थः। इदमुपलक्षणम्। धनुषि स्थितमुपमेयत्वमपि नखक्षते सञ्चारणीयमित्यपि बोध्यम्। ततस्सञ्चारस्यैव प्रकृतक्षतधारणोपयोगित्वात्। **पर्यालोचनयेति**। पयोधरादिपदश्लेषात्तादृशार्थपर्यालोचनयेत्यर्थः।

(वि, श) शब्देनात्र बोधितार्थस्यान्यत्र सञ्चारे दृष्टान्तमाह—**यथा दध्नेति**। आख्यातेन हवनस्यैव प्रकृतक्षतधारणोपयोगित्वाद् विधेयत्वं बोध्यते। हवनस्य तु

प्रतिनायकत्वे गौरवमुख्यपदं निदानम्। सकलङ्कतापशब्दयो रविशशिनोर्मुख्ययोर्वर्णनानायकविषयाऽनियतत्वात्। उपमानत्वमामाशब्दबोध्यम्। वस्तुपर्यालोचनया तद्विशेषेण सञ्चारणीयम्। धनुरुभमिति प्रत्ययोदयप्रसङ्गादिति भावः।

(लो, झ) शब्दस्यार्थोपलक्ष्यस्यार्थस्य पर्यालोचनायामन्यथाभावे दृष्टान्तमाह—**यथेति**। विधिः कर्त्तव्यतोपदेशः। अत्र हि होतव्यमित्यर्थे जुहो-

किञ्चोपमायां व्यवहारप्रतीतेरभावात्कथं तदुपजीविकायाः समासोक्तेः प्रवेशः। यदाहुः—(स, लृ)

"व्यवहारोऽथवा तत्त्वं यत्रौपम्ये यत्प्रतीयते।
तद्यौपम्य[1]-समासोक्तिरेकदेशोपमा स्फुटा॥" (ह, ए)

दिबोधात् सरःश्रिय इव नायिका इति पर्यवसाने प्रक्रान्तसरःश्रीवर्णनाभावापत्तेः।

(वि, स) नन्वेवं "दन्तप्रभे"त्यत्र उपमागर्भसमासोक्तिर्नेत्रैरिवोत्पलैरित्यत्रैकदेशविवर्त्युपमा इति कथमुपमागर्भसमासोक्तिविलोप इत्यत आह—किञ्चेति।

(वि, ह) व्यवहारोऽथवेति। ऐन्द्रं धनुरित्यादौ उपमानोपमेयभावविपरीतसम्भारणोक्तेः कष्टसृष्टिकल्पनारूपं दूषणमुक्त्वा औपम्यगर्भसमासोक्त्यङ्गीकारे दूषणान्तरं ददत इतीयं कारिका। अतो दूषणान्तरत्वबोधकमथवेति। यद् यस्मात् काव्यलिङ्गादिसाम्यहेतुकसमासोक्तौ यथाव्यवहारसमारोपः प्रतीयते तद्वदौपम्यगर्भत्वमुपमाया न प्रतीयते। तत्तस्मान्नौपम्यसमासोक्तिरङ्गीकार्येति शेषः। किन्तु तादृशे स्थले एकदेशोपमा एकदेशविवर्त्युपमैव स्फुटेत्यर्थः। तथा चौपम्यगर्भा समासोक्तिर्नास्त्येवेत्युक्तम्।

(लो, लृ) प्रत्युत "नेत्रैरिवोत्पले" रित्युपमासाधकसद्भावात्। यत्पुनरुक्तं राघवानन्दैः सरःश्रीनिष्ठ लिङ्गसाम्यं समासोक्तिप्रयोजकमिति; तदसत्, व्यवहारप्रतीतिसाधकाभावात्। लिङ्गसाम्यमात्रेण समासोक्तिप्रतीतौ "दृश्यते सखि! शीतांशुः" इत्यादावप्यतिप्रसङ्गात्। किन्तु प्रस्तुतमपेक्ष्यैव समासोक्तिः क्रियते इति स्वयमनन्तरमेवोक्तम्। तत्कथं युष्मन्मतेऽपि लिङ्गसाम्ये समासोक्तिप्रतीतिरिति चेत्। समानकार्यलिङ्गविशेषणानां लक्ष्येषु द्वयोः त्रयाणां वा सद्भावे प्राधान्येन व्यवहार इति। यच्चोक्तं तैरपि "नेत्रैरिवोत्पले" रित्यादावुत्प्रेक्षाऽपि। तदत्यन्तमनुचितम्। हेत्वभावेऽध्यवसानस्यानुत्थानात्। किञ्चैवं "मुखेन कमलेनेव विभाति हरिणेक्षणा" इत्यादावपि हरिणेक्षणाया नलिनीव्यवहारसमारोपेण समासोक्त्युत्प्रेक्षयोः समावेशः स्यात्। एतत्सर्वं गर्भीकृत्य प्राचीनाचार्यसम्मतिं दर्शयति—यदाहुरिति।

(लो, ए) यतस्माद् व्यवहारः समासोक्तिवत्तत्त्वं रूपकवद् औपम्येन प्रतीयते। तदौपम्यगर्भकसमासोक्तिर्न। अत एवालङ्कारसर्वस्वकृताप्युक्तम्। नेत्रैरिवोत्पलैरित्यादौ सर श्रिया नायिकात्वप्रतीतिर्न समासोक्त्या विशेषणसाम्याभावात्। तस्मान्नायिकाऽत्र उपमानत्वेन प्रतीयते, नतु सरःश्रीधर्मत्वेन नायिकात्वप्रतीतिरिति। एकदेशविवर्तिन्युपमैवोपास्येति। एतेन दन्तप्रभापुष्पेत्यादौ पदानामुपमानरूपकसमासगम्भत्वेन हरिणेक्षणाया लतायाश्च विशेषणत्वे सम्भवत्यपि ऐन्द्रं धनुरित्यादौ च कष्टकल्पनेत्युक्तिसद्भावेऽपि चोक्तप्रकारेणाऽवश्याभ्युपगन्तव्यत्वेनैकदेशविवर्त्यु-

---

1 'नौपम्यं' (क. ग. घ.)

एव चोपमारूपकयोरेकदेशविवर्तिताङ्गीकारे तन्मूलसङ्करेऽपि समासोक्तेरप्रवेशो न्यायसिद्ध एव। तेनौपम्यगर्भविशेषणोत्थापितत्व नास्या विषय इति। (क, ऐ)

विशेषणसाम्ये श्लिष्टविशेषणोत्थापिता साधारणविशेषणोत्थापिता चेति द्विधा। कार्यलिङ्गयोस्तुल्यत्वे च द्विविधेति चतुःप्रकारा समासोक्तिः। सर्वत्रैवात्र व्यवहारसमारोप कारणम्। (ख)

स च क्वचिल्लौकिके वस्तुनि लौकिकवस्तुव्यवहारसमारोप, शास्त्रीये वस्तुनि शास्त्रीयवस्तुव्यवहारसमारोप।

लौकिके वा शास्त्रीयवस्तुव्यवहारसमारोप। शास्त्रीये वा लौकिकवस्तुसमारोप इति चतुर्धा (ओ) तत्र लौकिकवस्त्वपि रसादिभेदादनेकविधम्। शास्त्रीयमपि तर्कायुर्वेदज्योतिःशास्त्रादिप्रसिद्धतयेति बहुप्रकारा समासोक्तिः।

(वि, क) उपमाया रूपकस्य एकदेशविवर्तित्वे तुल्ययन्यायादुभयत्रैव समासोक्त्य प्रवेशे तदुभयसन्देहसङ्करस्थलऽपि समासोक्तिर्नास्तीत्याह—**एव चेति**। **नास्या विषय** इति। अस्या समासोक्तेरित्यर्थः।

(वि, ख) औपम्यगर्भत्व समासोक्तेर्निरस्य चतुर्विधमेव समासोक्ते रूप सहृदय व्यवस्थापयति—**विशेषणसाम्ये श्लिष्टेत्यादि**। व्यवहारसमारोपस्याप्यत्र चातुर्विध्य वक्तुमाह—**सर्वत्र चेति**।

पमयैव व्यवहारो युक्त। तथाच भाषणम्—

"अर्के चेन्मधु विन्देत किमर्थं पर्वत व्रजेत्" इति।

(लो, ऐ) तन्मूलसङ्करे दन्तप्रभेत्यादौ परीतेति पाठे यत्पुनरुक्त कैश्चित्। सन्देहसङ्करे सन्देहास्पदत्वेनाव्यवस्थितत्वाद्रूपकोपमयोरभाव इति तन्न। द्वयोरपि साधकबाधकाभावेन पर्यन्तेऽप्यन्यूनानतिरिक्तत्वेन वृत्तौ हि सन्देहसङ्करालङ्कार। नतु स्थाणुर्वा पुरुषो वेति असशयवर्तित्वज्ञानदशाया क्वचित् कस्यचिन्मिथ्यात्व क्वचिद् द्वयोरपि। अन्यथा तत्र प्राचीनोक्तलौकिकहारमुद्रिकादिसंसृष्ट मुकुटाद्यलङ्कारसादृश्यमनुपपन्न स्यात्। नच सन्देहसङ्करस्य निर्वाह शक्यक्रिय इति वक्तु न युक्त, वैचित्र्यस्यानुभवसिद्धत्वात्तस्यैव चालङ्कारत्वात्। किञ्च क्षीरनीरन्यायेन मिश्रणेन सङ्कर इति प्राच्या। तयोश्च मिश्रणेन चैकस्य द्वयोर्वा भाव। किन्त्वत्र एकतरनिश्चयाभावमात्रेण सन्देहसङ्करव्यवहार इत्यल बहुना। उपसंहरति—**तेनेति**। अस्या समासोक्तेः।

(लो, ओ) लौकिके सर्वमार्गसाधारणे। शास्त्रीये विद्याव्युत्पत्तिविशेषगम्ये।

दिङ्मात्र यथा—

"व्याधूय यद्वसन"मित्यादौ लौकिके वस्तुनि लौकिकस्य हठकामुकव्यव हारादे समारोप ।

"यैरेकरूपमखिलास्वपि वृत्तिषु त्वा
पश्यद्भिरव्ययमसख्यतया प्रवृत्तम् ।
लोप कृत किल परत्वजुषो विभक्ते
स्तैर्लक्षण तव कृत ध्रुवमेव मन्ये ॥"

अत्र आगमशास्त्रप्रसिद्धे वस्तुनि व्याकरणप्रसिद्धवस्तुव्यवहारसमारोप । एवमन्यत्र । (ग, औ)

(वि, ग) यैरेकरूपमिति । परमेश्वर प्रति कस्यचिदुक्तिरियम् । अखिलासु वृत्तिषु ससारेषु एकरूपमद्वितीय त्वा पश्यद्भिर्यैर्जनै परत्वजुषो भिन्नत्वविषयाया विभक्तेर्विभागस्य लोप कृत । तदैतदर्शनाद् भेदबुद्धिर्न कृतेत्यर्थ । तैरेव तस्य च ध्रुव ध्रुवत्व लक्षण कृतमित्यहं मन्ये । ध्रुवमिति भावप्रधाननिर्देश । त्वा कीदृशम् अव्ययम् अक्षयम्, असख्यतया सख्यातुमशक्यतया प्रवृत्तम् असख्य पदानुवृत्तित्वात् । अत्र श्लिष्टविशेषणसामर्थ्यादपि विकारादव्ययप्रतीति । तेषामपि हि अखिलपदसाहित्येन वृत्तिषु स्थितेष्वेकरूप विकारराहित्यात्तदथ सख्याराहित्यम् । परस्या सुब्विभक्तेर्लोपथ कृत इति ध्रुव निश्चित मन्ये । ईदृश त्वा पश्यद्भिर्विभक्ति-लोप दुर्वृद्धि चादीनामीदृशञ्च लक्षण चिह्न कृतमित्येव भाव । अत्रेति । आगमशास्त्र वेद । व्याकरणप्रसिद्ध वस्तु चकारादि । तद्वद् व्यवहारश्च शब्दात्मकत्वम् । ईश्वरे तदा-रोपस्यापि शब्दब्रह्मात्मकत्वात् । एवमन्यत्रेति । तत्र चान्यशास्त्रव्यवहारसमारोपो वेदशास्त्रप्रसिद्धे वस्तुनि इश्वरे यथा मम ।

"यस्यौज्ज्वल्य द्युतिभिरधिक विभ्रदेरलद्वृत्तीना
यत्पादान्ते लघुरपि पतन् गौरव सम्प्रयाति ।
छन्द सिद्धाक्षरतनुरसौ सद्गुण शब्दमूर्ति
पुण्यश्लोके मनसि भवत सन्निधि मे प्रयातु ॥'

(लो, औ) एकस्य सन्मात्रतेनाविचरित्वा प्रत्ययादिविशेषाभावाद्वा । वृत्तिषु वर्तन्ते प्रवर्तन्ते आविर्भवन्तीति व्युत्पत्त्या वस्तुषु स्त्रीत्वादिलिङ्गेषु या अव्यय पदरहित चकारादिरूप । असख्यतया प्रवृत्तमनन्तपदार्थरूपेण विवर्तनात् । एकत्वादिसख्याविरहितत्वेन प्रसिद्धम । परत्वजुषो भिन्नत्वभाज विभक्त्यर्थभूतस्य इति यावत् । लोप कृत अभावो निश्चित । प्रत्ययत्वेन परद् भाविन्या विभक्ते

रूपकेऽप्रकृतमात्मस्वरूपसन्निवेशेन प्रकृतस्य रूपमवच्छादयति । इह तु स्वावस्थासमारोपेणानवच्छादितस्वरूपमेव त पूर्वावस्थातो विशेषयति ।

इत्यत्र वाक्ये प्रस्तुतोऽर्थो यथाऽसौ पुण्यश्लोक परमेश्वरो मे मनसि सतत सन्निधिं प्रयातु । यस्य विग्रहे शरीरेऽलङ्कृतीना कौस्तुभभूषणाना द्युतिभिरधिकम् औज्ज्वल्य, यत्पादान्ते लघुर्निकृष्टोऽपि पतन् गौरव गुरुत्वम् उत्तमत्व सम्प्रयाति । असौ पुण्यश्लोक कीदृश । छन्दसि वेदे सिद्धाक्षररूपा अस्खलनरूपा तनुर्यस्य तादृश सद्गुण ऐश्वर्यरूप गुणवान् । शब्दमूर्त्तिधरस्यैते विष्णोरंशा इति विष्णुपुराणम् ।

अत्र श्लिष्टविशेषणैर्व्यञ्जनया पुण्यस्योत्तमश्लोकस्य कविरिव प्रतीति । तस्याऽपि विग्रहे समासेऽलङ्कृतीनाम् अनुप्रासोपमादाना द्युतिभि शोभाभिरधिकम् औज्ज्वल्य तत्पादस्य चतुर्थभागस्यान्ते पतितो लघुवर्णस्यापि गुरुत्वम्, पदान्तगो गुरुर्वेति छन्द-शास्त्रे उक्तत्वात् । असौ छन्दसाऽनुष्टुबत्वादिच्छन्दसा सिद्धो वर्णमयमूर्त्ति । माधुर्य्यादिगुणवान् शब्दात्मकश्चेति ।

(वि, घ) एकदेशविवर्त्तिरूपकसमासोक्त्योर्भेदमाह—**रूपक** इति । एकदेशविवर्त्तिरूपके इत्यर्थ । **अप्रकृतमात्मस्वरूपेति** । अप्रकृत व्यङ्ग्यरूप तत् कर्तृ । **आत्मस्वरूपसन्निवेशेनेति** । आत्मस्वरूपस्याभेदारोपेण प्रकृत वाच्यमवच्छादयत्यपह्नवविषयीकरोतीत्यर्थ । यथा "लावण्यमधुभि पूर्णम्" इत्यादौ । **इह त्विति** । स्वावस्थाव्यङ्ग्यस्य स्वरूप तत्समारोपेण तदारोपेणानवच्छादितस्वरूपमपह्नुतस्वरूप

विभक्ते सुप प्रोच्यनामिति लक्षणम् । लक्षणम्—स्पष्टसाक्षात्कार साधनसूत्र च । आगम शास्त्रम् । अभिधानाभिधेययो शब्दाभिन्नब्रह्मपर । ब्रह्मणोऽभेदवदाश्रयम् मन्त्रशास्त्रम् । अन्यद् यथा—

"सीमान न जगाम यन्नयनयोर्नान्येन यत्सङ्गत
न स्पृष्ट वचसा कदाचिदपि यद् दृष्टोपमान न यत् ।
अर्थादापतितं न यच्च स यत्तत् किञ्चिदेणीदृशो
लावण्य जयति प्रमाणरहित चेत चमत्कारि तत् ॥"

अत्र लावण्ये लौकिके प्रत्यक्षानुमानोपमानार्थापत्त्यभावशब्दरूपषट्प्रमाणादि-मीमासाशास्त्रप्रसिद्धवस्तुसमारोप ।

---

1 'अवच्छादितस्वरूपम्' (क ग)

अत एवात्र "व्यवहारसमारोपो नतु स्वरूपसमारोप" इत्याहुः । (घ, श्री)

उपमाध्वनौ श्लेषेण 'विशेष्यस्यापि साम्यम् । इह तु विशेषणमात्रस्य । अप्रस्तुतप्रशंसायां प्रस्तुतस्य गम्यत्वमिह त्वप्रस्तुतस्येति भेदः । (ङ, अ)

उक्तिर्विशेषणैः साभिप्रायैः परिकरो मतः ॥ ७५ ॥

यथा—अङ्गराज सेनापते द्रोणोपहासिन् कर्ण रक्षैनं भीमाद्दुःशासनम् । (च,आ)

तत् प्रकृतं वाच्यम् । पूर्वावस्थातोऽन्यारोपितव्यङ्ग्यव्यवहाररूपावस्थातो विशेषयति आरोपितव्यङ्ग्यव्यवहारं करोतीत्यर्थः । एकदेशविवर्त्तिरूपके व्यङ्ग्यं रूप्यं वाच्ये आरोपिते यथा व्याधूय वसनामित्यादौ वाच्ये गन्धवहेन कामुकभेदारोपः । किन्तु कामुकव्यवहारस्य रत्यर्थं वसनाक्षेपालिङ्गनरूपव्यवहारस्यैवारोपोऽत्र इत्यर्थः । संवादमाह—**अत एवात्र व्यवहारेति** । वस्तुतस्तु व्यङ्ग्यव्यवहाररूपकत्वद्वयमेकदेशविवर्त्तिरूपके समासोक्तिरो भेदकम् ।

(वि, ङ) उपमाध्वनितोऽस्य भेदमाह—**उपमाध्वनाविति** । अत्र श्लेषेणेत्येव पाठः, श्लेषाकारे द्वयोरेव वाच्यत्वेन व्यङ्ग्यस्यैवाभावात् । श्लेषेण विशेष्यस्यापि साम्यमित्यर्थः । प्रामादिकपाठे तु श्लेषे सति ततो विशेष्यादेः साम्यमित्यर्थः । तथापि चकारो निरर्थकः । अप्रस्तुतप्रशंसातो भेदः स्फुट एव ।

(वि, च) परिकरालङ्कारमाह—**उक्तिरिति** । साभिप्रायत्वं प्रतिपादनीयार्थपुष्ट्यार्थपुष्टिकारित्वम् । तच्च यद्यपुष्टार्थदोषत्यागेनैव लभ्यं तथापि विशेषणैरित्यत्र

अवच्छादयति निगूहति । अनवच्छादितस्वरूपम् अगूढस्वरूपम् । पूर्वावस्था लोकप्रसिद्धा । यदुक्तं चण्डीदासपरिडतैरपि "यत्राऽप्रकृततादात्म्येन प्रकृतप्रतीतिस्तत्र रूपकम् । यत्रापकृतव्यापारवतः प्रकृतस्य स्वतन्त्रस्यैव प्रतीतिस्तत्र समासोक्तिरिति स्पष्टार्थः । एवं रूपकेऽपि व्यवहारसमारोपवचनं राघवनन्दानामपास्तम् ।

(लो, अ) इह चाप्रस्तुतप्रशंसायामप्रस्तुतवर्णनामुखेन प्रस्तुतप्रतीतिर्युक्ता तथाच मूलमन्तरेणाऽप्रस्तुतवर्णनस्याऽसम्बन्धप्रलापप्रायत्वात् । इह च विशेषणानां वर्णनीयार्थप्रतिपादनेन प्रकरणेन नियमितेऽपि द्वितीयार्थप्रतीतेरनुभवसिद्धेः ।

(लो,आ) सम्प्रति सादृश्यमूलालङ्कारलक्षणाऽवसरेऽपि विशेषणविच्छित्तिहेतुकत्वेन समासोक्त्यनन्तरं परिकरं लक्षयति—**उक्तिरिति** । विशेषणैरिति बहुवचनस्य नैकस्य द्वाभ्यां विशेषणाभ्यामेव बोध्यम्, किन्तु अपुष्टार्थदोषपरिहार एवेति भावः । साभिप्रायैर्गर्भीकृतप्रतीयमानार्थैः । इह च प्रतीयमानार्थस्याऽगूढत्वे गुणीभूतव्यङ्ग्यता, अतोऽस्यालङ्कारस्य न ध्वनित्वम् । **अङ्गराजेति** । इदं भीमवचनम् । अङ्गो देशविशेषः । अत्र अङ्गराजत्वेन पररक्षार्थमधिनायकत्वम् । सेनापतित्वेन राजपूजा । द्रोणोपहासित्वेन शौर्यमदः प्रतीयते ।

---

1 'श्लेषे च (क. ख. पु.)

शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम् ॥ ७६ ॥

स्वभावादेकार्थैरिति । श्लेषाद् व्यवच्छेद । वाचनमिति च ध्वने । उदाहरणम् । (छ, इ) *

"प्रवर्त्तयन् क्रिया साध्वीर्मालिन्य हरिता हरन् ।
महसा भूयसा दीप्तो विराजति विभाकर. ॥"

बहुविवक्षणाद् बहुत्वे वैचित्र्यविशेषानुभवाद् अलङ्कारित्वम् । अङ्गराजन्यादिक कर्णापहासिनोऽश्वत्थाम्न उक्ति । अत्र प्रतिपाद्य कर्णोपहास. तत्पुष्टिकारीण्येतानि सम्बोधनानि । साक्षाद् भावेन वध्यमानस्य दु शासनस्य रक्षकत्वेनाङ्गदेशनृपतित्व सेनापतित्व महावीरद्रोणोपहासित्व तदा वीरस्य याज्ञसेन्युपहास स्पष्ट ।

(वि, छ) अर्थश्लेषालङ्कारमाह—**शब्दैरिति** । एकार्थैरित्येकार्थे एव शक्तैरित्यर्थ । **अनेकार्थैति** । शक्त्यैकभिन्नो योऽर्थ अपरार्थ तस्य वाचन लक्षणया बोधनमित्यर्थ **श्लेषाद् व्यवच्छेद** इति । श्लेष —शब्दश्लेषालङ्कार । अत्र शब्दस्य स्वभावादेकार्थत्वाद् वाचनमित्यनेन व्यञ्जनाव्यवच्छेदमाह—**ध्वनेरिति** । गुणीभूतव्यङ्ग्यस्याप्युपलक्षणमिदम् ।

(वि, ज) प्रवर्त्तयन्निति । विभाकर सूर्य्य विभाकरनामा राजविशेषश्च विराजति । द्वयोर्विशेषणान्याह—**प्रवर्त्तयन्निति** । क्रिया आलोकसाध्या, पक्षे-ब्राह्मणादिवर्णक्रिया । हरित दिशा, पक्षे—दिक्स्थितलोकाना मालिन्य तम श्यामता, पक्षे-दारिद्र्यवशादनुज्ज्वलता च, महसा ज्योतिषा, पक्षे—शौर्य्येण । अत्र क्रिया इत्यत्र नानेकार्थता । मालिन्यादिपदत्रयस्य स्वैकार्थ शक्तिरन्यार्थ लक्षणा, विभाकरादौ तु शब्दश्लेष । अत्रोपमाध्वनित्व व्यवच्छिनत्ति "अनेकार्थस्य शब्दस्य सयोगाद्यैर्नियन्त्रिते' इत्यत्र शक्तिलक्षणाभ्याम् अनेकार्थताऽपि परिगृह्येत्यभिप्रायेणैवात्रोपमाध्वनिप्रसक्तिर्वाच्या ।

(लो, इ) श्लेषप्रकरणादत्र श्लेष । वाचनमनिद्धारितत्वेन बाधनम् । एवञ्च शब्दैरितिकारिकापदार्थ एकीभूय बाध्यभावमापन्नैरिति विशकलिताना बहूना पदार्थाना तथाविधार्थबोधनक्षमत्वात् । नच कस्यचित्पदार्थविशिष्टार्थे शक्ति ।

(लो, ई) क्रिया सन्ध्योपासनाद्या इष्टापूर्ताद्या । मालिन्यम् अन्धकारमयत्वम् । दुराचारयोगो वा । महस्तेन उत्सवश्च दीप्त प्रकाशित निर्मलीभूतश्च विभा-

---

* 'यत्रोभयोस्तात्पर्य्यं स श्लेष । यत्र त्वेकस्मिन् तत्रामर्शमहिम्ना तु द्वितीयार्थप्रतीति सा व्यञ्जना' (प्रदीप) । परिवृत्तिसहानां शब्दानां प्रकरणादिनियमाभावाद् अनेकार्थबोधने अर्थश्लेष । एकस्यार्थस्य वाचकाना शब्दानामनेकार्थो विशेषरूप प्रकरणादिनियमेन युज्यते 'स श्लेष' इति केषाञ्चिन्मतम् । यथा उदाहरणे क्रियाशब्देन इष्टापूर्तादिक्रियासन्ध्याव दनादिक्रियारूपयोरर्थयो प्रतीति ।

अत्र प्रकरणादिनियमाभावाद् द्वावपि राजसूर्यौ वाच्यौ । (ज, ई) †

क्वचिद् विशेष' सामान्यात् सामान्य वा विशेषतः ।
कार्यान्निमित्तं कार्यञ्च हेतोरथ समात्समम् ।
अप्रस्तुतात् प्रस्तुत चेद्गम्यते पञ्चधा ततः ।
अप्रस्तुतप्रशंस्या स्यात् ॥ ७७ ॥ (ऋ, ऊ) *

क्रमेणोदाहरणम्—

"पादाहत यदुत्थाय मूर्द्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वर रज ॥"

(वि, झ) अप्रस्तुतप्रशसालङ्कार पञ्चविधमाह—**क्वचिद्विशेष** इति । सकलपदम्यन्तपदार्थाद् अप्रस्तुतात् सकलप्रथमान्तपदार्थे प्रस्तुतत्वेद् गम्यते बुध्यते तदा पञ्चविधोऽप्रस्तुतप्रशसालङ्कार इत्यर्थ । अन्यापदेशपरिभाषाऽप्यन्यत्र ।

(वि, ञ) तत्र सामान्यादप्रस्तुतात् प्रस्तुतविशेषव्यञ्जकत्वमाह—**पादाहतमिति**। अपमानेऽपि स्वस्याद् देहिन तद्वत वर श्रेष्ठम् । यद्वज पादाहत सद् उत्थाया-भिहन्तुरेव मूर्द्धानमधिरोहति आरोहतीत्यर्थ । अत्रेति सामान्य देहिसामान्य, तद-भिधानात् प्रस्तुतस्याऽस्मत्त इत्यस्य व्यञ्जनेत्यर्थ ।

कर सूर्य । विभा करोति व्यनक्तीति व्युपत्त्या राजा च विभाया कान्ते कारकत्वा-त्तदाश्रयत्वाद् वाच्यवन्निर्द्धारितत्वेन बाध्या ।

(लो, ड) विशेष इत्यादीना कर्मपदाना प्रस्तुतमिति विशेषणम् । सामान्यादि-त्यादिपञ्चम्यन्तपदानामप्रस्तुतादिति अप्रस्तुतादर्थतोऽवाच्यात् । अत एवाऽप्रस्तुतस्य प्रशसावाच्यतया वर्णनमित्यर्थाद् अप्रस्तुतप्रशसाख्योऽलङ्कार । एव चाप्रस्तुतात् प्रस्तुतप्रतीतिरप्रस्तुतप्रशसेति सामान्यलक्षणम् । तस्याश्चोक्तनयात् पञ्चप्रकार-तेति भाव ।

---

† अत्र विभाकरशब्द शक्त्या सूर्य योगेन नृप बोधयतीति अर्थश्लेष, प्रभाकरादिपर्य्यायशब्देन परिवृत्तिसहत्वात् । यत्र प्रकरणादिभि अभिधाया नियन्त्रणेन राजा प्रकृतो रविरप्रकृतस्तदा 'दुर्गालङ्घितविग्रह' इत्यादिवत् द्वितीयार्थस्य ध्वनि स्यात् ।

अत्र सयोगादीनामभावेन अभिधाया अनियन्त्रणाद् द्वयोरप्यर्थयोर्वाच्यत्वम् । वाच्याविति । निरूढलक्षणया अपि शक्तितुल्यत्वात् समकाल प्रतीयमानौ इत्यर्थ । विभाकरपदस्य नृपतौ निरूढ लक्षणिकत्वम् ।

* अप्रस्तुतस्य प्रशसा कथनमप्रस्तुतप्रशसा । प्रशसन च वर्णनमात्र, नतु स्तुति, (रसगङ्गाधरे) 'एव च लक्ष्यलक्षणयो प्रशसाशब्द स्तुतिनिन्दासाधारण-कीर्तनमात्रपरो द्रष्टव्य '—कुवलयानन्दे ।

अत्रास्मदपेक्षया रजोऽपि वरमिति विशेषे प्रस्तुते सामान्यमभिहितम्। (अ, ऊ)

"स्वगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम्।
विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया॥" (ट)

अत्रेश्वरेच्छया क्वचिदहितकारिणोऽपि हितकारित्वं हितकारिणोऽप्यहितकारित्वमिति सामान्ये प्रस्तुते विशेषोऽभिहितः।

एवं चात्राप्रस्तुतप्रशंसामूलार्थान्तरन्यासः। दृष्टान्ते प्रख्यातमेव वस्तु प्रतिबिम्बत्वेनोपादीयते। इह तु विषामृतयोरमृतविषीभावस्याप्रसिद्धेर्न तस्य सद्भावः। (ठ, ऋ)

(वि, ट) विशेषादप्रस्तुतात् प्रस्तुतसामान्यव्यञ्जनमाह—स्वगियमिति। इन्दुमतीभर्तुर्नारदीयपारिजातस्रजं हृदि निधायाजस्यायं विलापः।

(वि, ट) अत्रेति। सामान्ये हिताहितकारित्वादिना सामान्ये विशेषः। अहितकारिविशेषोऽमृतम्। अर्थान्तरन्यासालङ्कारस्याऽऽक्षेपयाऽप्रस्तुतप्रशंसया निष्पाद्यत्वादनयोरनुग्राह्यानुग्राहकभावरूपसङ्कर इत्याह—एवं चेति। अर्थान्तरन्यासो षट्विधो वक्ष्यते। तत्रोक्तस्य विशेषस्यौचित्यप्रतिपादनरूपसमर्थनं सामर्थ्यात् सामान्येनेति। यस्तत्रभेदः स चात्र अप्रस्तुतप्रशंसानिष्पाद्यः। तथाहि किं न हन्ति इत्यनेन हन्तृविशेषस्य स्रजो हननसामर्थ्यसत्त्वेऽपि हननाभावे विशेष उक्तः। स चाप्रस्तुतप्रशंसालभ्येनाहितकारिसामान्येन ईश्वरेच्छाधीनाहितकारित्वाभावरूप एव साधर्म्यात्। समानार्थत. [1]स्रजोऽहननघटितम्। ईश्वरेच्छाऽहितकारिणोऽप्यहितकारित्वाभावादिति [2]प्रतीतेः। ननु स्रङ्निष्ठयोरहननामृतभावयोरपकारसामर्थ्येऽप्यनपकारित्वरूपसाधनप्रतिबिम्बनादत्र दृष्टान्तालङ्कारस्यापि प्रसङ्गित्वमनुसन्धिरस्यति—दृष्टान्त इति। प्रख्यातमेव प्रसिद्धमेव बिम्बप्रतिबिम्बत्वेन व्यङ्ग्यसाधर्म्येण। अत्र तस्येति न दृष्टान्तालङ्कारसद्भाव इत्यर्थः। तथा च दृष्टान्तस्तु साधर्म्यस्य इत्यत्र प्रसिद्धसधर्मस्येत्यर्थः।

(लो, ऊ) पादाहतमिति। एवं माघकाव्योक्त्या शिशुपालं प्रति प्रयाणाभिमुखीकरणाय श्रीकृष्णं प्रति बलरामवाक्यम्। अस्मादिति। अस्मत्सदृवाच्या श्रीकृष्णादयो हि वाच्याः।

(लो, ऋ) अहितकारिविशेषो विषं हितकारिविशेषोऽमृतम्। अप्रस्तुतप्रशंसामूलमुत्थानबीजम्। यस्यार्थान्तरन्यासस्य सामान्येन विशेषस्तुतः समर्थकत्वात्। तस्य दृष्टान्तस्य। इह तु विषामृतत्वेनाध्यवसानादनिश्चयोक्तिरेव। तयोश्च सामान्यविशेषाभावरूपेण विरुद्धनिर्विशेषसम्भवात्।

"इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव
प्रम्लानारुणिमेव विद्रुमदलं श्यामेव हेमप्रभा ।
कार्कश्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतं
सीतायाः पुरतश्च हन्त शिखिनां बर्हाः सगर्हा इव ॥"

अत्र सम्भावितेभ्य इन्द्वादिगताञ्जनलिप्तत्वादिभ्यः कार्येभ्यो वदनादिगत-सौन्दर्य्यविशेषरूपं प्रस्तुतं कारणं प्रतीयते । (ङ, ऋ) +

"गच्छामीति मयोदया मृगदृशा निःश्वासमुद्रेकिणं
त्यक्त्वा तिर्य्यगवेक्ष्य बाष्पकलुषेणैकेन मां चक्षुषा ।
अद्य प्रेम मदर्पितं प्रियसखीवृन्दे त्वया वध्यता-
मित्थं स्नेहविवर्द्धितो मृगशिशुः, [1]सोत्रासमाभाषितः ॥"

(वि, ङ) अप्रस्तुतात् कार्य्यात् प्रस्तुतकारणव्यञ्जनमाह—इन्दुर्लिप्त-इवेति । वदनादिसौन्दर्य्यवत्याः सीतायाः पुरतः । इन्द्वादयो निकृष्टा इति समुदायार्थः । तत्र सीतायाः वदनापेक्षया इन्दोः, चञ्चलनयनापेक्षया मृगदृशः, अरुणाधरापेक्षया विद्रुमस्य, अङ्गगौरत्वापेक्षया हेमप्रभायाः, मधुरस्वरोच्चारकमनोहरकण्ठापेक्षया तादृशस्वरोच्चारकमनोहरकोकिलकण्ठस्य, केशापेक्षया शिखिबर्हस्य च निकृष्टता प्रतिपादकविशेषणान्युत्प्रेक्ष्यन्ते । इन्दुर्लिप्त इवेति । जडिता चाञ्चल्यरहिता, प्रम्लानारुणिमेव अरुणयम्लानिवत् । कार्कश्यं मधुरस्वरोच्चारणासमर्थग्रन्थिल्यम् । प्रस्तुतं स्थितं तत्रैव जनितं वा । तत्र कलयापि अल्पभावेनापि कोकिलयापि किमिव मधुरस्वरोच्चारणात् । बर्हाः सगर्हाः सनिन्दाः । हन्तेतीन्द्वादीनामपकर्षात् खेदे सीताया उत्कर्षाद्भये वा । सम्भावितेभ्य उत्प्रेक्षितेभ्यः । कारणं प्रतीयते । इत्युत्प्रेक्षाप्रयोजकत्वेन कारणत्वं बोध्यम् ।

(वि, ढ) अप्रस्तुतकारणात् प्रस्तुतकार्य्यव्यञ्जनमाह—गच्छामीति । त्वं किं प्रस्थाननिवृत्तोऽसीति पृच्छन्तं प्रति प्रस्थानप्रवृत्तस्योक्तिरियम् । उद्रेकिणमुद्भटं नि श्वासम् मुक्त्वा बाष्पकलुषेणैकेन चक्षुषा मां निर्य्यगवेक्ष्य इत्यन्वयः । स्नेहविवर्द्धितस्य मृगशिशो. त्वयि अर्पितस्य प्रेम्ण. प्रियसखीवृन्दे विबन्धोपदेशस्य मरणसूचनाय गाढत्वं प्रोद्गतस्य ससाध्वसक्रियाविशेषणम् ।

(लो, ऋ) इन्दुरित्यादि । वदनादीत्यादिशब्देन ईक्षणाधरकान्तिवचनकेशग्रहः ।

+ अत्र सम्भाव्यमानैरिन्द्वादिगतैरञ्जनलिप्तत्वादिभि. । कार्य्यरूपैरप्रस्तुतैर्लोकोत्तरो वदनादिगतः सौन्दर्य्यातिशय कारणरूप. प्रस्तुतः प्रतीयते । (अलं० सु०)

1 'सोत्रास' (क. च. ग पुस्तके)

अत्र कस्यचिद्गमनरूपे प्रस्तुते कार्ये कारणमभिहितम्। (ढ, लृ)

तुल्येऽप्रस्तुते तुल्याभिधाने च द्विधा श्लेषमूला सादृश्यमात्रमूला च। श्लेषमूलाऽपि समासोक्तिवद् विशेषणमात्रश्लेषे श्लेषवद् विशेषस्यापि श्लेषे भवतीति द्विधा (ण,ए)

क्रमेणोदाहरणम्।

"सहकार मदामोदो वसन्तश्रीसमन्वित।
समुज्ज्वलरुचि श्रीमान् प्रभूतोत्कलिकाकुल॥" (ऐ)

अत्र विशेषणमात्रश्लेषवशादप्रस्तुतात् सहकारात् कस्यचित् प्रस्तुतस्य नायकस्य प्रतीतिः। (त)

"पुस्त्वादपि प्रविचलेद् यदि यद्यधोऽपि
यायाद् यदि प्रणयने न महानपि स्यात्।

अत्र कस्यचिदिति। गमननिवृत्तस्य नायकस्येत्यर्थः। **प्रस्तुत** इति। कस्यचित् प्रश्नात् प्रस्तुत इत्यर्थः। कारणं नायिकाया स्वस्मरणसूचनम्।

(वि, ण) समात्समामिति। पञ्चमप्रकारस्य त्रैविध्ये वक्तुमादौ द्वैविध्यमाह—**श्लेषमूला सादृश्यमूला चेति**। श्लेषमूला च द्विधा भवतीत्याह—**समासोक्तिवदिति**। समासोक्तौ हि विशेष्यस्यापि श्लेष उपमाध्वनित्वापरया न विशेष्ये श्लेषः। प्रकारान्तरमाह—**श्लेषवदिति**। शब्दालङ्कारविशेष्यवदित्यर्थः। "प्रतिकूलतामुपगते हि विधौ" इति विशेष्यपदेऽपि श्लेषः।

(वि, त) अत्र विशेषणमात्रश्लेषे आह—**सहकार** इति। सहकार आम्रवृक्षो वसन्तश्रीसमाश्रितः सन् प्रभूताभिर्बहुभिरुद्गताभिः कलिकाभिः मुकुलैः आकुलो व्याप्तः सन् सदामोदो विद्यमानोत्तमगन्धस्तत एव समुज्ज्वलदीप्तिस्तत एव श्रीमान्। **अत्रेति**। नायकोऽपि वसन्तलक्ष्म्याऽऽश्रितः सन् आमोदेन हर्षेण समुज्ज्वले सम्यक् शृङ्गारे रुचिर्यस्य तादृशः। "शृङ्गारशुचिरुज्ज्वलः" इत्यमरः। श्रीमान् अत एवोत्कलिकया उत्कण्ठयाऽन्वितः। "उत्कण्ठोत्कलिके समे" इति कोषः। **कस्यचिदिति**। उक्तविशेषणवत इत्यर्थः।

(वि, थ) विशेष्यपदश्लेषे त्वाह—**पुस्त्वादिति**। सपत्नापहृतं राज्यं येन केनाऽपि प्रकारान्तरेणोद्धर्तुं कविराजानमुपदिशति कस्यचिदुक्तिरियम्। केनाऽप्यनिर्वचनीयेन पुरुषातिशयेन नायकेन ईदृशीत्येवप्रकारः इति दिक्। अयं प्रकार

(लो, लृ) **अत्रेति**। कस्यचिद् अर्थात् केनचित् कुतो न गतोऽसीति पृष्टस्याऽप्रस्तुतेनाभिधातुमुचितत्वात्। कारणमगमनस्येत्यर्थः।

(लो, ए) **श्लेषमूलेति**। श्लेषोऽर्थश्लेषाभाग प्रस्तुतस्य गम्यत्वात्।

(लो, ऐ) आमोद अतिनिर्हारी गन्ध, हर्षश्च। उत्कलिका उद्गतबोध उत्कण्ठा च।

अभ्युद्धरेत्तदपि विश्वमितीदृशीयं
केनापि दिक् प्रकटिता पुरुषोत्तमेन ॥" (थ, श्रो)

अत्र पुरुषोत्तमपदेन विशेष्येणाऽपि श्लिष्टेन प्रचुरप्रसिद्धया प्रथमं विष्णुरेव बुद्धयते। तेन वर्णनीयः कश्चित्पुरुषः प्रतीयते। (द, श्रौ) +

प्रकटिता दर्शिता। कीदृशी दिगित्यत्र आह—पुंस्त्वादिति। पुंस्त्वात् पुरुषभावाद् यदि प्रविचलेद् यदि स्यात्तदपि विश्वं संसारमुद्धरेत्। पुरा ह्यसुराहृतं राज्यं मोहिनीरूपा कन्या भूत्वा नारायणेनोद्धृतम्। तथा यद्यधोऽपि यायात्तदपीत्यर्थः—पुरा वराहमूर्त्या पातालं गत्वा तेन पृथिव्या उद्धृतत्वात्। तथा यदि प्रणयने याचने याचननिमित्ते न महान् लघुः स्यात् तदपीत्यर्थः। बलिदैत्यापहृतराज्यस्य उद्धरणाय तेन वामनीभावरूपलघुत्वप्राप्तेः। एवं च त्वयापि पुरुषश्रेष्ठेन पुंस्त्वात् पौरुषाचलनेनापि निकृष्टताप्राप्तिरूपताप-पातेनापि याचनार्थं लघुत्वप्राप्त्याऽपि सपत्नापहृतं राज्यमर्ज्यतामिति प्रकृतव्यञ्जना।

(वि, द) **प्रचुरप्रसिद्धया प्रथममिति**। तेन तुल्यकालबोधश्लेषाव्यपदेशः। इदमुपलक्षणम्। अप्रस्तुतेश्वरस्यैव प्रथमं बोधितत्वात् तात्पर्य्याच्चेति बोध्यम्।

(लो, श्रो) **पुंस्त्वादिति**। अप्रस्तुतवासुदेवपक्षे, पुंस्त्वात् प्रविचलनममृतहरणकाले स्त्रीरूपधारित्वाद् अधोगमनं नीचताप्राप्तिः। प्रणयने प्रीतिविषये महान् उत्तमो यदि न स्यात्। पुरुषोत्तमेन पुरुषश्रेष्ठेन।

(लो, श्रौ) **श्लिष्टेन** द्व्यर्थेन। **प्रचुरप्रसिद्धयेति**। सामग्रीवशात्प्रकरणमपास्यैकदेशप्रसिद्धेः समुदायप्रसिद्धिर्गरीयसीति नयेनेति भाव। यत्पुनरुक्तं राघवानन्दैः पुंस्त्वादिशब्दानामत्र भगवन्तं प्रत्यभिसन्धयित्वमिति तन्न, प्रमाणाभावात्। प्रत्युत प्रकरणेन वर्णनीयार्थनियमाच्च।

+ अत्र सत्पुरुषे प्रस्तुते तत्तुल्यस्याऽप्रस्तुतस्य विष्णोरभिधानम्। तत्र विशेषणानां विशेष्यस्य च श्लेषेण प्रस्तुतस्य विष्णुतुल्यस्य सत्पुरुषस्याऽऽक्षेपः। इत्यप्रस्तुतप्रशंसा।

ननु प्रकरणेन राजरूप· प्रस्तुतोऽर्थ एव प्रथमं प्रतीयते ततः कथमत्राप्रस्तुतप्रशंसा इति चेद्—अत्रोच्यते पुरुषोत्तमशब्दस्य विशेष्यस्य सत्पुरुषादिरूपे प्रस्तुतेऽर्थे यौगिकी शक्तिः पुरुषोत्तमपदस्य व्युत्पत्तिलभ्यत्वादिति प्रकरणादिरहितामपि तां बाधित्वा अभिधाशक्तिर्नारायणरूपमप्रस्तुतमर्थं प्रथममेवोपस्थापयति, ततोऽप्रस्तुतात् प्रस्तुतार्थस्य बोध। यत्र तूभयस्मिन् अभिधावृत्ते सम्भवस्तत्र एव प्रकरणादिकं नियामकम्। यत्र पुनरेकस्मिन् अभिधा अपरस्मिन् यौगिकी शक्तिः तत्र अभिधैव बलवती, प्रकरणादिसहितामपि यौगिकी शक्तिं बाधते। "अवयवशक्तेः समुदायशक्तिर्बलीयसी" इति न्यायात्। अत एव नात्र श्लेषः। उभयार्थस्य अनभिधेयत्वात्।

सादृश्यमात्रमूला यथा। (अ)

"एकः कपोतपोतः शतशः श्येनाः क्षुधाऽभिधावन्ति।
अम्बरमावृतिशून्यं हर हर शरणं विधे. करणा॥"

अत्र कपोतादप्रस्तुतात्कश्चित् प्रस्तुत प्रतीयते। (ध)

इयं क्वचिद्वैधर्म्येणापि भवति। यथा—

"धन्याः खलु वने वाता. कह्लारस्पर्शशीतला।
रामामिन्दीवरश्याम ये स्पृशन्त्यनिवारिता॥"

अत्र वाता धन्या अहमधन्य इति वैधर्म्येण प्रस्तुत. प्रतीयते। वाच्यस्य सम्भवासम्भवोभयरूपतया त्रिप्रकारेयम्। तत्र सम्भवे उक्तोदाहरणान्येव।(न,आ) असम्भवे यथा—

"कोकिलोऽहं भवान् काक समान. कालिमाऽऽवयो।
अन्तरं कथयिष्यन्ति काकलीकोविदाः पुन॥"

अत्र काककोकिलयोर्वाकोवाक्यं प्रस्तुताध्यारोपणं विनाऽसम्भवि। (प) *

(वि, ध) **एक** इति। पोत शिशु। क्षुधेति तृतीयान्तम्। **अत्रेति**। क्वचिदत्र बहुदस्युवेष्टित पलायनासमर्थो विधिकरुणाशरण प्राप्तो बोध्य।

(वि, न) **धन्या** इति। वनप्रेषितरामशोकाकुलस्य दशरथस्योक्तिरियम्। **सम्भवेति**। सम्भवमसम्भव सम्भवासम्भव चेति पक्षत्रयम्।

(वि, प) असम्भवे व्यङ्गयस्य वाच्ये आरोप। **कोकिलोऽहमिति**। काकली मधुरास्फुटध्वनि। 'काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे' इति कोष। **वाकोवाक्यमिति**। कोकिलस्यैव वाच्यमिदम्। तत्कथमुक्तिप्रत्युक्तिरूपं वाकोवाक्यमिदमन्तरकथनाय मध्यस्थावलम्बनात्, कलहत्वप्राप्तौ काकस्याऽपि कोकिलसाम्योक्तेरवश्यापेक्षात्। **प्रस्तुताध्यारोपं विनेति**। अप्रस्तुते कोकिले वाच्ये प्रस्तुतस्य व्यङ्गयस्याध्यारोप विनेत्यर्थ। नच वाच्यार्थबोधे तत्कथमप्रस्तुते वाच्ये तदारोप इति वाच्यम्।

कोकिलस्योक्त्यसम्भवात्तद्व्यङ्गयस्याप्युक्तियोग्यस्य पुरुषस्य स्मरणात्तदारोपसम्भवात् पश्चात्तु व्यञ्जनया पुरुषविशेषबोधेऽप्यनुपपत्त्यभावात्।

(लो, अ) सादृश्यमात्रमूला नतु विशेषणादिद्वयर्थताहेतुका।

(लो, आ) उभयरूपता, अशत सम्भवित्वादशतश्चासम्भवित्वादयमलङ्कार।

(* 'उक्तिप्रत्युक्तिमद् वाक्य वाकोवाक्य विदुर्बुधा।
"द्वयोर्वक्त्रोस्तदिच्छन्ति बहूनामपि सङ्गमे॥")
(स० कण्ठाभरणे)

उभयरूपत्वे यथा—

"अन्तश्छिद्राणि भूयांसि कण्टका बहवो बहिः ।
कथं कमलनालस्य मा भूवन् भङ्गुरा गुणाः ॥"

अत्र प्रस्तुतस्य कस्यचिदध्यारोपेण विना कमलनालान्तश्छिद्राणां गुणभङ्गुरीकरणे हेतुत्वमसम्भवि । अन्येषान्तु सम्भवीत्युभयरूपत्वम् । (फ, इ)

(वि, फ) अन्तश्छिद्राणीति । अत्रेति । अत्र अन्तश्छिद्रादिमत्त्वं यत् कमलनालस्य वाच्यं तन्नान्तश्छिद्रस्य तन्तुभङ्गे हेतुत्वं न सम्भवतीति तदाह—छिद्राणामिति । अन्येषान्त्विति । कण्टकानामित्यर्थः । कण्टकैस्तन्तुच्छेदेन सम्भवात् । तथा छिद्राश्च एव निर्गुणस्य कण्टकतुल्यपरिजनवतश्च प्रस्तुतपुरुषस्य तन्नारोपः । नतु कण्टकानामश्च इति भावः ।

((लो, इ) अन्तश्छिद्राणि मध्ये छिद्राणि कुटुम्बसुदुस्थितानि च । कण्टकाः सूक्ष्मा अवयवा मत्सरिणश्च । भङ्गुरा छिदुरा विनश्वराश्च । गुणाः सूत्राणि । शिल्पादिगौरवादिश्च । असम्भवित्वेनोपदेशता तेषां पृथक्त्वात् । सम्भवि उद्भ्रियमाणं सूत्रे तत् सीम्नि छेददर्शनात् । इह च—

(अङ्ग देहि लिहिणं मा अप्पिअवप्पसि परवहूं प्पीन येउँ ।
अमरुडे कोहलिए अज्जुअलिं पि पु वहिंसि ।)

अत्र नाप्रस्तुतप्रशंसा व्यङ्ग्यस्य वाच्यादधिकमास्वादयत्वेन ध्वनित्वात् व्यङ्ग्यस्य वाच्यादप्राधान्य एव एतल्लङ्कारस्याभ्युपगमः । यत्र पुनरप्रस्तुतप्रशंसाऽङ्गीकारे राघवानन्दमहापात्रैरप्रस्तुतार्थव्यङ्ग्यो व्यङ्ग्य इति मुहुर्मुहुरभिदधता ध्वनिकारप्रभृतिचरणदासपरिष्टतानामाचार्याणां अन्यथातमेव च साहित्यदर्पणे 'लक्षणा मूलध्वनिपरीक्षावसरे प्रदर्शितम्, 'क्वचिद् वाच्यतया ख्याति' रित्यादिशास्त्रविदां वचनमनालोच्य लक्षणानीवितमित्यभिधायैतदुदाहरणे मुख्यार्थो लक्ष्य इत्युच्यते तेषां कस्यचिद् दुर्मेधसः प्रलपितेन वञ्चितानां मतमतितुच्छतर पूर्वपक्षतया लिखितमात्मनो दुर्मतित्वप्रकटनाय । इह पादाहत यदुत्थायेत्यादौ 'क्वचिद् वाच्यतया ख्याति, इत्युक्तनयेन 'भ्रम धार्मिक' इत्यादिवत् 'दृष्टिं दे प्रतिवेशिनी त्यादिवच्च लक्षणा मास्तु 'कोकिलोऽहमि'त्यादौ वाच्यस्याऽसम्भविन्यन्तश्छिद्रेत्यादावयवस्याऽसम्भविन्ये कथं न लक्षणेति । अत्रोच्यते, यत्र खलु कोकिलोऽहमित्यादौ वाक्यार्थोऽतथ्योत्प्रेक्ष्यमानान्वयबाधहेतुकं कथं लक्षणा ? यच्च तत्रैव दर्शितम् । श्रुतान्वयादनाश्रद्दधामित्यादि । नित्यानुदाहरणे अन्तश्छिद्राणीत्यादौ वा यदि लक्षणा तदा शुद्धा गौणी वा, नाद्या । तस्या सादृश्येतरसम्बन्धमूलत्वात् । यदि द्वितीया सापि सारोपा साध्यवसाना वा, नाद्या विषयस्य निगीर्णत्वात् । द्वितीया चेद् अतिशयाक्षिप्तस्तु किम-

लङ्कारान्तरकल्पनया । कथ वा पदमानान्वयबोधहेतुकाया वाक्यबोधे प्रवेश । इह खलु प्रभुप्रभृतिषु केनचिद् अभिसन्धानेन वर्त्तव्योऽर्थस्तात्पर्य्यम्, गोपनेनाऽभिमतकार्य्यनिवेदने । अत एवात्र समासोक्तिवद् व्यवहारसमारोप इति प्राच्या । तथाहि 'अय रत्नाकरोऽम्बोधिरित्यसेवि धनाशये' त्यादौ प्रकृतरत्नाविषयोऽम्भोधिव्यपदेश प्रकृतेन तन्निष्ठगुणशब्दप्रतिपादनाल्लक्ष्यगाम्भीर्य्यादिगुणातिशयस्य लक्षणाफलस्य प्रतिपत्तये किन्तु अभिलषित तत्सेवार्थं वाच्यार्थमलब्ध्वा प्रत्युतानिष्टप्राप्ते । गुणशब्दरचनाया एव कोकिलोऽहमित्यादावपि कुत्रचित्कोकिलव्यपदेश । कस्मिंश्चित् प्रस्तुते महापुरुषे हीनस्य गुणैर्न युक्त इति बोधनाय तुल्येऽप्रस्तुते तुल्याभिधाने च लक्षणाया 'ज दे लिहिए मा असोत्यादौ मुख्यसिद्धे तैरभ्युपगते व्यञ्जनाविषयत्वेऽपि लक्षणा स्यात्। अन्तरिक्षद्राणीत्यादौ अप्यन्तरिक्षद्रादीना कमलनालगुणभङ्गीकरणादेरसम्भवात् कथमन्वयोपपत्तिरिति चेत्, अत्राहुश्चरणदीदासपरिडता "अत्र वाक्यस्य प्रस्तुतपरत्वात् प्रारम्भात् प्रकृत्यैव वाच्यार्थवेलया तत्समर्पणेन प्रतीतेर्न दूष्यत इति ।"

अत एवात्र सर्वत्रापि भेदेषु प्रस्तुताभिधानस्य युक्तताप्रकाशनायालङ्कारसर्वस्वकृताऽप्युक्तम् । "इहाप्रस्तुतवर्णनमेवायुक्तमप्रस्तुतत्वात् । प्रस्तुतपरत्वे तु कदाचित् युक्त स्यादिति । यदि 'चान्तरिक्षद्राणी'त्यादौ लक्षणा तदा तत्र मुख्यार्थबाधे वाक्यार्थान्वयोपपादक किं नाम लक्ष्यते कुटुम्बे दुश्चरितानीति रूपोऽप्रस्तुतोऽर्थश्चेत् तस्यापि न कमलनालभङ्गीकरणमपास्तम् ।

यत्रैषा मान्याना मते बहुतरमस्खलितमवधार्य्यापि किञ्चित् किञ्चिदेव दूषणमुद्भाव्यते तत्र ध्वनिकारप्रभृतिचरणदीदासपरिडताचार्यवर्यप्रयत्नप्रणीतविमलतरप्रमेयजातभङ्गभीरुणा तदतिक्षमध्वमविध्वस्तबुद्धयो विबुधा । यच्च तैरेव—

'का त्व कुन्तलमल्लकीर्त्तिरहह क्वापि स्थिता न क्वचित्
सख्यस्तास्तव कुत्र कुत्र वद वाग् लक्ष्मीश्च सम्प्रति ।
वागाद्या चतुराननस्य वदन लक्ष्मीर्मुरारेरुर —
कान्तिर्मण्डनमण्डलं मम पुन नाद्यापि विश्रामभू ।'

इति क्वचित् प्रश्नोत्तरिकया कल्पयित्वा "वर्णनीयस्य लेशोद्दिष्टस्य लक्ष्यते" इत्यप्रस्तुतप्रशसादिविशेषस्य लक्षण लिखित्वा तदुदाहरणत्वेन दर्शितं तदस्माभिरुपेक्षणीयम् । अत्र हि प्रश्नोत्तरिकाभावेन भवने वस्तुषु न व्यवहारसमारोपेण समासोक्तिं प्रयोजयति । वाच्योऽर्था द्विविध, स्वत सम्भवी प्रौढोक्तिसिद्धश्चेति प्रसिद्धम् । तत्र प्रौढोक्तिसिद्धार्थस्यालङ्कारत्वे " सज्जइ मुरइ " (हि) मासो इत्यादयर्थानामप्यलङ्कारत्वप्रसङ्ग । कुन्तलेश्वरस्य वागादीना चतुराननादिगमनेन 'योऽनुभूत कुरङ्गाक्ष्या" इत्यादिवन्निदर्शना इह । ह्यध्यवसायस्य सिद्धत्वेन निर्देशात् शब्दमूलाऽ-

अस्याश्च समासोक्तिवद् व्यवहारसमारोपप्राणत्वाच्छब्दशक्तिमूलाद् वस्तुध्वनेर्भेदः। उपमाध्वनावप्रस्तुतस्य व्यङ्ग्यत्वम्। एवं समासोक्तौ। श्लेषेऽपि द्वयोरपि वाच्यत्वम्। (व, ई) +

(वि, व) ननु "पन्थिअ" इत्यादौ यः शब्दशक्तिमूलो वस्तुध्वनिरुक्तस्तत्र उपभोगक्षमत्वे सति यत्स्थित्यनुमितिरूपं वस्तुव्यङ्ग्यमुक्तं तत्र वक्त्र्या उद्देश्यत्वेन तदेव प्रस्तुतं वाच्यार्थस्त्वप्रस्तुतः। तथा च तत्राप्रस्तुतप्रशंसात्वमेवापतितमिलतस्ततोऽस्या भेदमाह। वस्तुध्वनौ तथा स्थित्यनुमितिर्व्यङ्ग्या। न तत्र वाच्यस्य व्यवहारस्य व्यङ्ग्यपुरुषादौ समारोपस्य प्राणत्वाच्च तत्कारकत्वादित्यर्थः। अत्र च शब्दशक्तिमूलादित्युपलक्षणम्। "दट्ठिं हे पत्तिवेसिनी" त्यादावपि यद्भाविनखक्षतगोपनं व्यङ्ग्यम्, तदपि वक्त्र्या उद्देश्यत्वेन प्रस्तुतम्। वाच्योऽर्थोऽप्रस्तुतस्तत्राप्येवमस्या. प्रसक्तिरेव समाधानं च बोध्यम्। उपमाध्वनौ समासोक्तौ शब्दश्लेषालङ्कारे तस्याः प्रसक्तिरेव नास्तीत्याह—**उपमाध्वनाविति**। अत्र ह्यप्रस्तुतो वाच्यः। उपमाध्वनिसमासोक्तौ चाप्रस्तुतो व्यङ्ग्य एवेति तयोर्नास्या प्रसक्तिः। श्लेषेऽपि नास्या. प्रसक्तिरित्याह। श्लेषेणाऽप्रस्तुतव्यञ्जनत्वे सति ह्यप्रस्तुतप्रशंसा। श्लेषे तु द्वयोरप्यर्थयोर्वाच्यत्वमित्यर्थः।

तिशयोक्त्यलङ्कारपरिकल्पनम्। तथाप्यत्र निदर्शनाविवेकप्रस्तावे उक्तम्—उपमा परिकल्पनं निदर्शनेति लक्षणे उपमापदं सादृश्यमात्रवाचकमिति। अत एवालङ्कारसर्वस्वकृताऽप्युक्तम्। सम्भवतासम्भवता वा वस्तुसम्बन्धेन गम्यमानं प्रतिबिम्बकरणं निदर्शनेति। तथाच पद्भ्यां हंसगतिरित्यादौ सोऽपि तदाननरुचमित्यादौ च प्रतिकल्पना।

("मरकतमयमेदिनीषु भानोस्तरुविटपान्तरपातिनो मयूराः।
अवनतशितिकण्ठकण्ठलक्ष्मीमिह दधति स्फुरिताणुरेणुजालाः॥")

इत्यत्र च तथाभूतभूमिषु अवनतशितिकण्ठकण्ठता सम्भवापत्तेः उत्प्रेक्षाकल्पने प्रकृतोदाहरणं वाऽतिशयोक्तिकल्पने निदर्शनाया न विरोधः। किंत्वेवंरूपस्य रागादेः राजनि चतुराननादौ च भवनात्।

(लो, ई) सम्प्रति सुमतिविवेचमस्या ध्वन्यलङ्कारविवेकं दर्शयति—अस्याश्चेति। अस्याः अप्रस्तुतप्रशंसायाः शब्दशक्तिमूलाद् वस्तुध्वनेर्भेदः।

तथाहि "भुक्तिमुक्तिफलदैकान्त" इत्यादौ गदागम इत्यत्र सच्छास्त्रे न सत आगमनरूपस्यार्थस्य व्यवहार समारोप्यते, किन्तु रहस्यगोपनार्थमेव शब्दप्रयोग, ततोऽस्या भेद इति भावः। वाच्यत्वमनिर्धारितत्वेनेति शेषः।

+ अप्राकरणिकेन प्राकरणिकस्येोऽप्रस्तुतप्रशंसा। प्राकरणिकेनाऽप्राकरणिकस्येव, समासोक्तिः। समासोक्तिस्तु अप्रस्तुतप्रशंसाया विपरीता।

उक्ता व्याजस्तुतिः पुनः।

निन्दास्तुतिभ्यां वाच्याभ्यां गम्यत्वे स्तुतिनिन्दयोः ॥७८॥ (उ)

निन्दया स्तुतेर्गम्यत्वे व्याजेन स्तुतिरिति व्युत्पत्त्या व्याजस्तुति । स्तुत्या निन्दाया गम्यत्वे व्याजरूपा स्तुति । (भ)

क्रमेण यथा—

"स्तनयुगमुक्ताभरणा कण्टककलिताङ्गयष्टयो देव !
त्वयि कुपितेऽपि प्रागिव विश्वस्तास्ता[1] रिपुस्त्रियो जाताः ॥"

(म, ऊ) *

(वि, भ)व्याजस्तुत्यलङ्कारमाह—**उक्ता व्याजेति**। **वाच्याभ्यामिति**। यद्यपि वक्ष्यमाणोदाहरणयोर्निन्दास्तुत्योरेकस्याऽपि वाच्यत्व तथापि निन्दास्तुतिप्रयोजकार्थाभ्या वाच्याभ्यामित्यर्थ । गम्यत्वे व्यङ्ग्यत्वे निन्दाव्याजेन स्तुतौ व्याजनिन्दात्वेन व्याजस्तुतिपरयोगार्थसम्भवात् समासद्वयेनोभयत्र तत्पदार्थं घटयति—**निन्द्येति**।

(वि, म) अत्र निन्दाव्याजेन स्तुतिमाह—**स्तनेति**। हे देव ता प्रसिद्धा तव वैरिस्त्रिय त्वयि कुपिते प्रागिव विश्वस्ता । अकोपदशायामिव कोपदशायामैक्यरूपमाह—**स्तनयुगेति**। मुक्ताखचिताभरणा । अकोपदशाया दृष्टत्वेन कण्टकैर्व्याप्ताङ्गयष्टय कोपदशाया तु भयेन कण्टकवनप्रवेशात्तादृशास्तथाऽकोपदशाया विश्वस्ता अभीता कोपदशाया तु विशिष्टमधिक श्वस्त श्वासो यासां तादृशा, चिन्तया दीर्घनिश्वासात् । सर्वत्रैव शब्दवाच्यत्वेन प्राक्तुल्यत्वम् कोपेऽपि अकोपकालीनावस्थातोऽविशेषान्निन्दा । श्लिष्टपदद्वितीयार्थेन तु स्तुति ।

(लो, उ) व्याजस्तुतिरिति लक्षणनाम । व्यङ्ग्यहेतुकवैचित्र्यसारूप्यादप्रस्तुतप्रशसानन्तरमस्या लक्षणम्, अस्याश्च स्तुतिनिन्दयो सामान्यविशेषकार्यकारणतुल्याभावादप्रस्तुतप्रशसातो भेद ।

(लो, ऊ) मुक्तेत्यत्र मुक्तानि त्यक्तानि, पक्षे—मौक्तिकमयान्याभरणानि यस्याम् कण्टकस्तत्र लतागत प्रसिद्ध, रोमाञ्चश्च । विश्वस्ता विधवा विश्वासयुक्ताश्च ।

---

* हे देव त्वयि कुपितेऽपि प्रागिव अकोपदशायामिव रिपुस्त्रियो जाता । पूर्वकालेदानींकालयो साम्यमाह—स्तनयुगे मुक्ताभरण मुक्तालङ्कारो यासा ता, पक्षे स्तनयुगात् मुक्तानि त्यक्तानि आभरणानि यासा ता । कण्टकै रोमाञ्चै कलिता व्याप्ता अङ्गयष्टयो यासा ता । पक्षे—कण्टकैर्वृक्षतीक्ष्णाग्रै । विश्वस्ता, विश्वासिन्य, पक्षे-विधवाश्च । "विश्वस्ता विधवे सम्ये" इत्यमर ।

1 'द्विस्त्रियो' (क. पु

इदं मम ।

"व्याजस्तुतिस्तव पयोद मयोदितेयं
[1]यज्जीवनाय जगतस्तव जीवनानि ।
स्तोत्रन्तु ते महदिदं घन ! धर्मराज-
साहाय्यमर्जयसि यत्पथिकान्निहत्य ॥" (य, ऋ) *

पर्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते ॥ ७६ ॥ (र, ऋ) †

(वि, य) स्तुत्या निन्दामाह—**व्याजस्तुतिरिति** । हे पयोद ! यज्जगतः जीवनाय तव जीवनानि जलानि इयं तव मया व्याजस्तुतिर्मिथ्यास्तुतिरेवोदिता । इतोऽधिकस्तुतिसत्त्वे इयं न स्तुतिरप्यस्तुतिरेवेत्यर्थः । अधिका स्तुतिमाह—**स्तोत्रन्तु ते** इति । हे घन ! यत् पथिकान् विरहिणो निहत्य धर्मराजस्य यमस्य साहाय्यं महिमानमर्जयसि इदं तु ते महत्स्तोत्रं धर्मराजस्य तुल्यकर्म लोकमारणकारित्वेन माहात्म्याधिक्यात्तद्विरुद्धजगज्जीवनकारित्वे, नतु तादृशमाहात्म्यम् । अत्र पथिकमारकत्वेन निन्दा । अत्र स्तुतेर्वाच्यत्वेऽपि स्तुतिप्रयोजकार्थपरतया यत्स्तुतिपदं व्याख्यातं तदुदाहरणान्तरसंग्रहाय । यथा "दानात् प्रशसा प्राप्तोऽसि कर्णेदानीं तु संगरात् । अपक्रम्य यशो दत्त्वाऽरये प्राप्तस्ततोऽधिका"मिति कर्णं प्रति अश्वत्थाम्न उक्तौ स्तुतेरवाच्यता ।

(वि, र) पर्यायोक्तालङ्कारमाह—**पर्यायोक्तमिति** । गम्यं व्यङ्ग्यं तच्च प्रस्तुतस्य कारणरूप बोध्यम् । भङ्ग्या प्रस्तुतमपि कार्यकथनरूप भङ्ग्याभिधीयते प्रतिपाद्यते । व्यञ्जनयैवेति शेष । नतु शक्त्या बोध्यत इत्यर्थः । प्रस्तुतकार्येण प्रस्तुतं कारणं यदा व्यज्यत इत्यर्थ । कारणव्यञ्जककार्यरूपायामप्रस्तुतप्रशसाया तु अप्रस्तुतेन कार्येण प्रस्तुतं कारणं व्यज्यते इति भेदो वक्ष्यते यथा "इन्दुर्लिप्त इवाञ्जनेन"इत्यादौ ।

(लो, ऋ) जीवनानि जलानि प्राणाश्च । घन निरन्तरम् । धर्मराजो यमश्च ।

(लो, ऋ) सम्प्रति व्यङ्ग्यविच्छित्तिप्रकरणप्रसक्तं पर्यायोक्तं लक्षयति—**पर्यायोक्तमिति** । भङ्ग्या चमत्कारनिपुणविच्छित्त्यन्तराश्रयेण व्यङ्ग्यम् अभिधीयते बोध्यते कार्यादिद्वारेणेत्यर्थः ।

---

* धर्मराजस्य धार्मिकराजस्य यमस्य च ।

† "यदेव गम्यत्वं, तस्यैवाभिधाने पर्यायोक्तम् । गम्यस्य सतः कथमभिधानमिति चेद् गम्यापेक्षया प्रकारान्तरेणाभिधानस्याभावात् । नहि तस्यैव तदैव तयैव विच्छित्त्या गम्यत्वं वाच्यत्व च भवति । अतः कार्यमुखद्वारेणाभिधानम् ।"
(अलं० सर्वस्व०)

1 'संजीवनाय' (क. पु) ।

उदाहरणम्—

"स्पृष्टास्ता नन्दने शच्या केशसम्भोगलालिता ।
सावज्ञ पारिजातस्य मञ्जर्यो यस्य सैनिकै ॥"

अत्र हयग्रीवेण स्वर्गो विजित इति प्रस्तुतमेव गम्य कारण वैचित्र्यविशेष प्रतिपत्तये सैन्यस्य पारिजातमञ्जरीसावज्ञस्पर्शनरूपकार्यद्वारेणाभिहितम् । (ल, लृ)

नचेद कार्यात्कारणप्रतीतिरूपाप्रस्तुतप्रशसा । तत्र कार्यस्याप्रस्तुतत्वात् । इह तु वर्णनीयस्य प्रभावातिशयबोधकत्वेन । कार्यमपि कारणवत्प्रस्तुतम् । *

एवञ्च

अनेन पर्यासयताश्रुबिन्दून्
मुक्ताफलस्थूलतमान् स्तनेषु ।

(वि, ल) **स्पृष्टास्ता** इति । शच्या केशसम्भोगलालितास्ता प्रसिद्धा पारिजातस्य मञ्जर्यो यस्य हयग्रीवस्य नृपस्य सैनिकैर्नन्दने वने सावज्ञ स्पृष्टा इत्यर्थ । **अत्रेति** । गम्य व्यङ्ग्य कारणरूप सावज्ञमञ्जरीस्पर्शस्य अभिहित व्यञ्जनया प्रतिपादितम् । **वर्णनीयस्येति** । हयग्रीवनृपस्येत्यर्थ । तत्प्रभावेनैव सावज्ञमञ्जरीस्पर्शात् ।

(वि, च) श्लोकान्तरेणापि प्रस्तुतकार्येण प्रस्तुतकारणव्यञ्जनादिदानीमलङ्कार दर्शयति—**एव चेति** । पतिवरामिन्दुमता धात्र्या उक्तिरियम् । अनेन राज्ञा शत्रु-

---

(लो, लृ) केशसम्भोगलालिता केशसयमपरिचिता । कार्यद्वारेणोक्त पारिजात मञ्जरीस्पर्शस्य स्वर्गविजयानतिरिक्तत्वात् । वैचित्र्यविशेषश्चात्र स्वर्गो विजित इति प्रतिपादनाल्लभ्योऽनुभवसाक्षिक । एवम्

य प्रेक्ष्य चिररूढाऽपि निवासप्रीतिरुज्झिता ।
मदेनैरावणमुखे मानेन हृदय हरे ॥"

इत्यत्र मदमानयोर्विनाश एव तयोर्निवासप्रीतिपरित्याग इति पर्यायोक्तम् । एव च यदेव गम्यते तस्यैवाभिधाने पर्यायोक्तमिति भाव । तदुक्त काव्यप्रकाशकृता "यदेवोच्यते तदेव व्यङ्ग्य यथा तु व्यङ्ग्य न तथा उच्यते' इति पर्यायोक्तलक्षण-व्याख्याने । अय च क्वचित्कारणेन वाच्येन कार्यस्य गम्यत्वेऽपि सम्भवति ।

---

* " इह यत्र कार्यात्कारण प्रतीयते तत्र कार्य प्रस्तुतमप्रस्तुत चेति द्वयी गति, यत्र प्रस्तुतत्व कार्यस्य कारणवत् तस्यापि वर्णनीयत्वात् तत्र कार्यमुखेन कारण पर्यायेणोक्तमिति पर्यायोक्तालङ्कार । तत्र हि कारणापेक्षया कार्यस्यातिशयेन सौन्दर्य मिति तदेव वर्णितम् । यत्र पुन कारणस्य प्रस्तुतत्वे कार्यमप्रस्तुत वर्ण्यते तत्र स्पष्टै-वाऽप्रस्तुतप्रशसा यथा " इन्दुर्लिप्त इवाञ्जनेन" इत्यादौ ।" (अलङ्कारसर्वस्वे)

प्रत्यर्पिताः शत्रुविलासिनीना—
आक्षेपसूत्रेण विनैव हाराः ॥" (व)

अत्र वर्णनीयस्य राज्ञो गम्यभूतशत्रुमारणरूपकारणवत् कार्यभूतं तथाविधशत्रुस्त्रीक्रन्दनजलमपि प्रभावातिशयबोधकत्वेन वर्णनार्हमिति पर्यायोक्तमेव।

"राजन् राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः
कुब्जे भोजय मां कुमारसचिवैर्नाद्यापि किं भुज्यते ।
इत्थं राजशुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जरा-
च्चित्रस्थानवलोक्य शून्यवदभावैकैकमाभाषते ॥" (श, ए)

अत्र प्रस्थानोद्यतं भवन्तं श्रुत्वा सहसैवारयः पलायिता इति कारणं प्रस्तुतम्। "कार्यमपि वर्णनार्हत्वेन प्रस्तुतम्" इति केचित् । अन्ये तु राजशुकवृत्तान्तेन न कोऽपि प्रस्तुतस्य प्रभावो बोध्यते इत्यप्रस्तुतप्रशंसैवेत्याहुः ।(प)

विलासिनीनां स्तनेषु मुक्तफलवत् स्थूलतमान् अश्रुबिन्दून् पर्यासयता पातयता आक्षेपसूत्रेण ग्रथनसूत्रेण विनैव हाराः प्रत्यर्पिताः अश्रुबिन्दव एव हारा कृता इत्यर्थः।

(वि, श) अप्रस्तुतकार्येण प्रस्तुतकारणव्यञ्जनरूपाया अप्रस्तुतप्रशंसाया उदाहरणं "राजन् राजसुता इत्यादिकं" काव्यप्रकाशकृता दत्तम्; तत्रापि कार्यस्य प्रस्तुतत्वमेवेति केचिदाहुः तदर्शयितुमाह—**राजान्निति** । शत्रुजयोद्यतं राजानं प्रति तदमात्यस्योक्तिरियम्। तवारयः पलायिताः। तत्पुरीमध्येनैव वर्त्म प्रवृत्तम्। अतोऽध्वगैः पञ्जरान्मुक्तं राजशुकस्तदीयशून्यवदभौ चित्रलिखितान् राजादीनवलोक्य एकैकमित्थमाभाषत इत्यर्थः । किमाभाषत इत्यत्राह—**राजान्निति** । देव्य इति सम्बोधनं यूयमपि तूष्णीं स्थिता इत्यर्थः । न तु राज्ञ इयमुक्तिरेवंकमाभाषणानुपपत्तेः । कुब्जा शुकभोजननियुक्ता काचिद् राजकुमारी । सचिवभोजनकाले तद्भोजननियमात् पृच्छति—**कुमारेति** ।

(वि, प) केषाञ्चिन्मते अत्रारिपलायनरूपप्रस्तुतकारणस्य कार्यं शुकभाषणप्रस्तुतमेवेति तदर्शयति—**अत्रेति** । काव्यप्रकाशकृदभिप्रायं दर्शयति—**अन्ये त्विति** । **राजशुकवृत्तान्तेनेति** । शत्रुमारणकार्याश्रुबिन्दुपातनवत् शुकभाषणस्य शत्रुपलायननियतकार्यत्वाभावेन सम्बोध्यराजप्रभावबोधकत्वाभावादित्यर्थः । महामारीवशादपि तत्पुरशून्यत्वसम्भवादिति भावः ।

पलायनकार्यत्वाभिप्रायेणैवमात्येन कथनमुपपद्यते एव । वस्तुतस्तु अमात्यवाक्ये प्रस्तुतत्वमप्रस्तुतत्वं वा नायमेव ।

(लो, प) कुब्जा अन्तःपुरस्थः । कुमारसचिवाः कुमाराणां बालमित्रभूताः शिशवः ।

सामान्यं वा विशेषेण विशेषस्तेन वा यदि ।
कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते ।
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः ॥ ८० ॥ (स) +

उदाहरणम्—

"बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ॥" ×

अत्र द्वितीयार्धगतेन विशेषरूपेणार्थेन प्रथमार्धगतः सामान्योऽर्थःसोपपत्तिकः क्रियते । (ह)

"यावदर्थपदां वाचमेवमादाय माधवः ।

(वि, स) अष्टविधमर्थान्तरन्यासालङ्कारमाह—**सामान्यं वेति** । सामान्यमुक्त्वा विशेषेण, एवं, विशेषः सामान्येन, एवं कार्यं कारणेन कारणं वा कार्येण समर्थ्यते उचितत्वेन प्रतिपाद्यते इत्यर्थः । उक्तं यत् सामान्यं तद्विशेषे तथात्वदर्शनादुचितमिति बोधनं समर्थनरीतिः । इति चतुर्विधं समर्थनं समर्थ्यसमर्थकयोः साधर्म्येण तयोः परस्परवैधर्म्यरूपेणेतरेण वेत्यतोऽष्टधेत्यर्थः ।

(वि, ह) तत्र सामान्यस्य विशेषेण समर्थनं साधर्म्येणाह—**बृहदिति** । कार्यान्तमुद्देश्यकार्यान्तम् । क्षोदीयान् क्षुद्रः । महानद्या सम्भूय मिलित्वेत्यर्थः । नगापगा पार्वतीयाल्पनदीनिर्झरः । **अत्र द्वितीयार्धेति** । क्षुद्रविशेषो नगापगा तद्रूपेणार्थेनेत्यर्थः । सामान्योऽर्थः क्षुद्रसामान्यरूपः । अत्र कार्यान्तगामित्वं द्वयोः साधर्म्यम् । **सोपपत्तिक** इति ।उपपत्तिरौचित्यम् तद्विशिष्टत्वेन प्रतिपाद्यत इत्यर्थः । यद्यपि क्षुद्रसामान्यस्य नेदृशं समर्थनमुचितमित्यप्रतीतेः तथापि कार्यान्तगमनविशिष्टस्य तस्य तत् समर्थनं विशेषणाशयादायेति बोध्यं सविशेषणे विधिनिषेधाविति न्यायात् । एवमुत्तरत्रापि । अत्र च क्षुद्रविशेषस्य नगापगायाः कार्यान्तंगामित्वदर्शनात् क्षुद्रसामान्यस्य कार्यान्तगामित्वमौचित्येन सम्भवतीति प्रतीतिः । एवं सर्वत्र ।

(वि, क) सामान्येन विशेषसमर्थनं साधर्म्येणाह—**यावदर्थेति** । श्रीकृष्णस्यो-

---

+ 'हि, यत्, यतः' इत्यादेः प्रतिपादकस्य सत्त्वे शाब्दोऽयमलङ्कारः । तेषामसत्त्वे तु आर्थः । अन्यः अर्थः—अर्थान्तरन्यासः । समर्थार्थमुपक्षेपः अर्थान्तरन्यासः अत्र सामान्यविशेषादिभावो वर्तते, दृष्टान्ते तु न तथा, तत्र सामान्यस्य सामान्येन, विशेषस्य विशेषेण समर्थनमिति ततो भेदः ।

× क्षोदीयान् क्षुद्रतरोऽपि (क्षुद्रशब्दादीयसुन्) बृहन्तः सहाया यस्य तादृशः सहासम्पन्नः सन् कार्यान्तं गच्छति—कार्यं साधयत्यर्थः । नगापगा—क्षुद्राऽपि गिरिनदी *महानद्या सम्भूय मिलित्वा अम्भोधिं सागरम् अभ्येति गच्छति ।*

विरराम महीयांसः प्रकृत्या मितभाषिणः ॥" (क) ×

"पृथ्वि ! स्थिरा भव भुजङ्गम ! धारयैनां
त्वं कूर्मराज ! तदिदं द्वितयं दधीथाः ।
दिक्कुञ्जराः कुरुत तत्त्रितये दिधीर्षा-
[1]मार्यः करोति हरकार्मुकमाततज्यम् ॥

अत्र कारणभूतं हरकार्मुकाततज्यीकरणं पृथ्वीस्थैर्यादेः कार्यस्य समर्थकम् । (ख)

"सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।" इत्यादौ सम्पद्वरणं

क्तिविरतिवर्णनमिदम् ।

यावान् विवक्षितोऽर्थो यस्य तादृशपदामित्यर्थः । महीयांसो महान्तः । अत्रोक्तिविरति विशिष्टः श्रीकृष्णो विशेषः। मितभाषित्वे विशिष्टा महान्तः सामान्यम्। भाषाविरामः साधर्म्यं मितभाषित्वेऽस्यापि बहुभाषाविरामरूपत्वात् । कृष्णविशेषस्य भाषाविरतेः समर्थनमेव तस्य समर्थनम् ।

(वि, ख) कारणेन कार्यसमर्थनं साधर्म्येणाह—पृथ्वीरिति । कार्यकारणयोरव्याविरुद्धधर्मवत्त्वमेव साधर्म्यम् । विरुद्धधर्मवत्त्वञ्च वैधर्म्यं बोध्यम् । धनुर्भङ्गकाले लक्ष्मणस्योक्तिरियम् । आर्यो रामो हरकार्मुकमाततज्यं यत करोति ततः कारणात् पृथ्व्यादिकं स्थिरादिकं भवेत्यर्थः । एनां पृथ्वीम् । द्वितीयं पृथ्वीभुजङ्गमौ, तत् त्रितये पृथ्वीभुजङ्गमकूर्मराजत्रितये । दिधीर्षां धर्तुमिच्छाम् । अन्यथा तु आततज्यीकरणे यावान् भरः स्यात्तेन सर्वेषामस्थैर्यं स्यादित्यर्थः ।

अत्रेति । नच पृथ्वीस्थैर्यादेः कथमाततज्यीकरणस्य कार्यत्वमस्थैर्यादेरेव तत्कार्यत्वादिति वाच्यम् । अस्थैर्यादिसम्भावनया विशेषस्थैर्यधारणादेस्तत्कार्यत्वात् । नचैवमाततज्यीकरणात्पूर्वभूतस्य विशेषस्थैर्यादेस्तत्रापि कथं कार्यत्वमिति वाच्यम्—तज्ज्ञानकार्यत्वे च तत्कार्यत्वोपचारात् नान्दीमुखस्य विवाहनिमित्तकृत्ववत् । अत्रानयोः कार्यकारणयोर्व्याविरुद्धतत्कार्यकारणतावच्छेदकधर्मवत्त्वं साधर्म्यम् । तादृशात् कारणात् पृथ्व्यादेः स्थिरीभवनादिकमुचितमित्येवं समर्थनं स्थिरीभावानुपदेश एव कार्यम् । तस्यौचित्यमेव समर्थनमित्यपि वदति । कार्यादिसमर्थनचतुष्कं हेत्वलङ्काररूपस्यैवेत्यतः काव्यप्रकाशकृता तदुपेक्ष्य चातुर्विध्यमेवार्थान्तरन्यासोक्तं कारणस्य जनकहेतुत्वात् कार्यस्य च ज्ञापकहेतुत्वात्, ग्रन्थकृता तु ततो भेदोऽस्य वक्ष्यते ।

(वि, ग) कार्येण कारणस्य समर्थनं साधर्म्येणाह—सहसेति । सहसा विम-

---

× यावान् अर्थः यावदर्थः, (अव्ययीभावः) अर्थपरिमितीमित्यर्थः । यावदर्थं पदं यस्यां सा ताम् ।

1 देवः (क. ग. पुस्तके पाठः)

कार्यं सहसा विधानाभावस्य विमृश्यकारित्वरूपस्य कारणस्य समर्थकम् ।
एतानि साधर्म्ये उदाहरणानि (ग)
वैधर्म्ये यथा—

"इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम् ।
शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः ॥"

अत्र सामान्यं विशेषस्य समर्थकम् । (घ)
"सहसा विदधीत" इत्यत्र सहसा विधानाभावस्यापत्प्रदत्वं विरुद्धं कार्यं समर्थकम् । एवमन्यत् । (ङ)

र्षेण विना क्रिया न विदधीत, यतोऽविवेकोऽविमृश्यकारिता परमापदां पदं स्थानम् । विमृश्यकारित्वे तु न केवलं नापदः किन्तु सम्पदश्चेत्याह—वृणते हीति । विमृश्यकारितागुणेनैव लोभः । अत्रेति । सम्पद्वरणकार्यात् विमृश्यकारित्वमुचितमिति समर्थनम् ।

(वि, घ) विशेषेण सामान्यस्य समर्थनं वैधर्म्येणेत्यस्योदाहरणमूह्यमिति वक्ष्यते । अतस्तदनुदाहृत्य सामान्येन विशेषसमर्थनमेव वैधर्म्येणोदाहरति—इत्थमिति । तारकासुरस्य भुवनत्रयक्लेशकत्वबोधके श्लोके भुवनत्रयक्लेशकत्वविशिष्टदुर्जनविशेषस्तारकासुरः ।

आराध्यमानत्वतद्धर्मस्य विरुद्धधर्मः प्रत्यपक्रियमाणत्वं दुर्जनसामान्यस्य । एवं क्लेशकत्ववैधर्म्यं शान्तिः । क्लेशकत्वविशिष्टदुर्जनविशेषसमर्थनं क्लेशकत्वसमर्थनरूपमेव । विशेषणे हीति न्यायात् । भवति हि प्रत्यपकारेणैव दुर्जनस्य शान्तिः । तद्विरुद्धाराध्यमानत्ववतो दुर्जनविशेषस्य तारकस्य भुवनक्लेशनमुचितमिति प्रतीतिः ।

(वि, ङ) कारणेन कार्यसमर्थनं वैधर्म्येणेत्यस्योदाहरणमूह्यमिति वक्ष्यते । अतस्तदनुक्त्वा कार्येण कारणसमर्थनं वैधर्म्येणेत्यस्याप्युदाहरणं सहसा विदधीतेत्यनेनेत्याह—सहसेति । सहसा विधानाभावस्येति । कारणस्येत्यर्थः । आपत्प्रदत्वं समर्थकं कार्यम्, सम्पदा विरुद्धमिति विरुद्धधर्मवादित्यर्थः । अभावत्वभावत्वेऽत्र विरुद्धधर्मे । अत्र हि विमृश्यकारिण एव सम्पदावरणात् कार्यात् सहसा विधानाभाव उचित इति प्रतीतिः । एवमन्यदिति । विशेषणसामान्यसमर्थनं कारणेन कार्यसमर्थनञ्च वैधर्म्येण यदनुदाहृतं तदित्यर्थः । तत्र विशेषेण सामान्यसमर्थनं वैधर्म्येण यथा—

"गुणानामेव दौरात्म्याद्धुरि धूर्यो न युज्यते ।
असंजातकिणस्कन्धः सुखं स्वपिति गौर्गलिः ॥"

इति । अस्यार्थः—धूर्यं आरोप्यमाणभारवहनसमर्थश्च प्राणी धुरि भारवहने नियुज्यते । तच्च गुणानामेव दौरात्म्याद् दौर्जन्याद् धूर्यत्वगुणस्य भारवहनद्वा स-

हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते ॥ ८१ ॥ (च) *

तत्र वाक्यार्थता यथा—

"यत्त्वन्नेत्रसमानकान्तिसलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये ! तव मुखच्छायानुकारी शशी ।
येऽपि त्वद्गमनानुकारिगतयस्ते राजहंसा गता-
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥"

अत्र चतुर्थपादे पादत्रयवाक्यानि हेतवः । (छ,) ×

प्रयोजकत्वात्तस्य दौर्जन्यम् । गुणाभावे तु तादृश दु ख न भवतीत्याह–असंजातेति । क्रिणो युगधर्षणादुच्चूनभागः । असंजाततत्स्कन्धो गलिरलसो गौः सुखं स्वपिति, ननु धुरि नियुज्यते इत्यर्थः । अत्र धुरि नियुज्यमानधूर्यप्राणी सामान्यम्, अनियुज्यमानप्राणिविशेषेण गलिगवादियुज्यमानत्वविरुद्धधर्मेण सुखस्वापेन धूर्यविरुद्धधर्मेण गलित्वेन च समर्थितम् । अलसस्य सुखस्वपनशीलस्य धूर्यस्य धुरि नियुज्यमानत्वमुचितमिति प्रतीतेः नियोगसमर्थनमेव नियुज्यमानधूर्यसमर्थनं; 'सविशेषणे हि' इति न्यायात् । कारणेन कार्यसमर्थनं वैधर्म्येण यथा—

"स विजिग्ये रणे भर्वान् राक्षसेन्द्रो बलोद्धत ।
रामबाणकटुस्वादमनास्वाद्य हि तादृशः ॥

इति । अत्र हि रावणस्य विजयः कार्यं रामबाणकटुस्वादानास्वादेन कारणेन समर्थितम् । तदनास्वादेन तस्य विजय उचितस्वदास्वादे सति तदसम्भवादिति प्रतीते । भावत्वाभावत्वे तयोर्वैधर्म्ये ।

(वि, च) काव्यलिङ्गालङ्कारमाह—क्रियाकारकभावेन समाप्तत्वे वाक्यं, असमाप्तत्वे पदम् । अयमेव हेत्वलङ्कारः काव्यहेतुरुच्यते ।

(वि, छ) यत्त्वन्नेत्रेति । वर्षासु भावनोपनीता रावणोपहृतां सीतां सम्बोध्य रामस्येयमुक्तिः । हे प्रिये ! त्वत्सादृश्येनार्याद् दृश्यमानेन यो विनोदस्तन्मात्रमपि मे दैवेन न क्षम्यते । ननु नीलोत्पलचन्द्रहंसगतिषु त्वन्नेत्रमुखसादृश्यानि विलोक्यन्तामित्यत आह । यत्त्वन्नेत्रेति । वर्षाकालवशात् नीलोत्पल जलमग्न, चन्द्रो मेघान्तरित, राजहंसाश्च मानसं गता इत्यर्थः । पादत्रयवाक्यानीति । वाक्यत्रयस्यैव क्रियाकारकभावेन समाप्तत्वाद् हेतव इत्यत्र हेत्वर्थका इत्यर्थः ।

---

* यत्र वाक्यार्थः पदार्थो वा हेतुर्भवति तदा काव्यलिङ्गमलङ्कारः ।

× तव नेत्राभ्यां समाना कान्तिर्यस्य तत् । मुखस्य छाया कान्तिमनुकरोतीति । तव गमनस्य अनुसारिणी गतिर्येषां ते । अत्र सादृश्येष्वपि विनोदनाभावे प्रथमादिपादत्रयार्था हेतवः ।

भाव सम्पद्वरण सोपपत्तिकमेव करोतीति पृथगेव कार्यकारणभावेऽर्थान्तर-न्यास काव्यलिङ्गात् । (ङ)

"न धत्ते शिरसा गङ्गां भूरिभारभिया हर. ।
त्वद्वाजिराजिनिर्धूतधूलिभिः पङ्किला हि सा ॥"

इत्यत्र हिशब्दोपादानेन पङ्किलत्वादिवद्धेतुत्वस्य स्फुटतया नायमलङ्कार । वैचित्र्यस्यैवालङ्कारत्वात् । (ङ, ऐ) +

इत्यर्थ । तत्र तादृशाकाङ्क्षा नास्तीत्याह—**सहसेत्यादि** । उपदेशमात्रेणापि निराकाङ्क्षतया भणते हि इत्यादावाकाङ्क्षाराहित्येनापि गतार्थं चरितार्थमित्यत सहसा विधानाभाव धर्मभूत सम्पद्वरण कर्तृ सोपपत्तिकमेव कुरुते । ननु आकाङ्क्षाबलाद्धेतुर्भवतीत्यर्थ । तत्रोपदेशतायां दृष्टान्तमाह—**परापकारनिरतैरिति** । तत्र 'न विधेये'ति कृत्यप्रत्ययादिनाऽऽपि 'विदधीते'त्यत्र विधिप्रत्ययादुपदेशप्रतीतिरित्यर्थ । परापकारेत्यादौ समर्थनीयाऽनिर्देशात् नास्त्येव तत्रार्थान्तरन्यास इति विशेषः । इद त्ववधेयम्—सहसेत्यादावुपदेशरूपत्वेन चरितार्थत्वान्ना भवतु तद्धेत्वलङ्कार । पृथ्वि स्थिरा भवेत्यादौ सिद्धे स्थैर्य उपदेशसम्भवात् कर्मुकज्यातनीकरण हेतुमपेक्षते एवेति तत्र हेत्वलङ्कारप्रसक्तिर्दुर्वारैव ।

(वि, ङ) यत्र जनकहेतोर्हेतुत्वेनैव निर्देशस्तत्र वैचित्र्याभावान्न हेत्वलङ्कार इत्याह—**नि धत्ते** इत्यादि । अत्र "हि" शब्दो हेतुताबोधक इत्याह—**हि शब्द** इति ।

(लो, ऐ) अत्र हेतुस्त्रिधा भवति, त्रैविध्येन अलङ्करणं विषयविभागस्थापनात् कथ त्रिधेत्याह । ज्ञापक सिद्धत्वेनैवानिर्दिष्टस्याप्रतीतस्य प्रत्यायक । यत्र साध्यसाधनत्वाभ्यरेण हेतुमतोर्निर्देश , यथा "यत्र पतत्यबलाना"मित्यादौ शरापातेन मदनभावनस्यानिष्पादक. साकाङ्क्षत्वेन सिद्धस्य साधक । यथा—सहसा विदधीत न क्रियामित्यादौ । अन्यथा यत्त्वत्रेत्र इत्यादि पादत्रय विनाऽसमञ्जस स्यात् तदैवास्य विरहिणो नायिकासाहसयविनोदासहत्वस्य स्वतोऽप्रतीते । स्वतोऽपि समर्थकत्वाद् वाक्याभावेऽपीत्यर्थ । गतार्थ—यत्त्वत्रेत्यादिवैलक्षण्येन निराकाङ्क्षतया प्रतीताभिधेयम् । उक्तमेव द्रढयति—**पृथगेवेति** । स्फुटतयाभिधेयविषयतया, वैचित्र्यस्यालौकिकत्वविच्छित्ते । इदञ्च काव्यलिङ्गस्य हेतुर्वैचित्र्यावहनेन न निवर्त्तत इति काव्यलिङ्गाल्यमलङ्करणम् ।

+ "समर्थ्यसमर्थकयो सामान्यविशेषसम्बन्धे अर्थान्तरन्यास , तदितरसम्बन्धे काव्यलिङ्गम् ।"

समर्थ्यसमर्थकवाक्यार्थयो सापेक्षत्वे काव्यलिङ्गम् । निरपेक्षत्वे तु अर्थान्तरन्यास इति भेदः ।

अनुमानं तु विच्छित्त्या ज्ञानं साध्यस्य साधनात् ॥ ८२ ॥

यथा— (ढ, ओ)

"जानीमहेऽस्या हृदि सारसाक्ष्या
विराजतेऽन्त प्रियवक्त्रचन्द्र ।
[1]तत्कान्तिजाले प्रसृतैस्तदङ्गे-
ष्वापाण्डुता कुड्मलतास्रिपद्मे ॥"

अत्र रूपकवशाद् विच्छित्ति । (ण, औ) +

यथा वा—

"यत्र पतत्यबलाना दृष्टिर्निशिता पतन्ति तत्र शरा ।

(वि, ढ) अनुमानालङ्कारमाह—**अनुमान** त्यिति । विच्छित्त्या भङ्ग्या साधनाद् साध्यस्य ज्ञानमित्यर्थ । भङ्गी चाहार्यारोपरूपा, वह्निमान् धूमादित्यस्य वारणाय तत् । अत्र साध्यसाधनयोरेव धर्मिगतत्व काव्यप्रकाशकृदुक्त विशेषण देयमेव । अन्यथा धनुराततज्यीकरणरूपेहेतुपृथ्वीस्थैर्ययोधर्मिभेदेऽपि पृथ्वी स्थिरेत्यादौ अतिप्रसक्त्यापत्ते ।

(वि, ण) पाण्डोर्धूर्णमाननेत्राया विरहिण्या वर्णनमिदम् । जानीमहे अनुमिनुम इत्यर्थ । अस्या अन्तरित्यन्वय । इयमन्त प्रियवक्त्रचन्द्रवती तत्कान्त्यधीनपाण्डुदेहकुड्मलितनेत्रपद्मवत्त्वादित्यनुमानम् । अत्र विच्छित्तिं ग्राहयति—**अत्र रूपकेति** । मुखनेत्रयोश्चन्द्रपद्मरूपकमङ्गपाण्डुत्वाशेऽपहृतिरपि बोध्या ।

(वि, त) विच्छित्त्यन्तरेणाप्युदाहरति—**यत्र पततीति** । शरा इत्यत्र

(लो, ओ) विच्छित्त्या कविप्रतिभोत्थापितेन वैचित्र्येण । वह्निमान् धूमवत्त्वादित्यादौ लौकिकोक्तिमात्रे सधर्मिण्ययोगव्यवच्छेद । व्यापकस्य साध्यत्वम् । पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्तत्वविशिष्टो हेतु साधनम् । एव शब्दवृत्तेनापि यत्र साध्यसाधनत्वाकारेण निर्देशस्तत्रानुमानालङ्कार । काव्यलिङ्गे त्वर्थानुसन्धानादेव हेतुहेतुमद्भावप्रतीति ।

(लो, औ) तस्य चन्द्रस्य कान्तिजाले । तत् तस्मात् रूपकवशादङ्गेषु पद्मत्वप्रयोजित रूपकालङ्कारमन्तर्भाव्योक्तत्वात् ।

(लो, अ) न केवलमलङ्कारान्ताश्रयेणैव विच्छित्तिरेतदलङ्कारप्रयोजिकेत्युदाहरणान्तर दर्शयति—**यथा वेति** । अनयोरुदाहरणयोर्हृदये प्रियसद्भावस्य

+ अस्या सारसाक्ष्या पद्मलोचनाया हृदि प्रियवक्त्रचन्द्र =प्रियवक्त्रमेव चन्द्र विराजते इति जानीमह अनुमिनुम । तत् तस्मात् तस्य प्रियवक्त्रचन्द्रस्य कान्तिजाले अङ्गेषु आपाण्डुता श्वेतत्व तथा अस्त्रिपद्मे कुड्मलता मुकुलितता वर्त्तते ।

1 'उत्कान्ति' (क पु)

तच्चापरोपितशरो धावत्यासां पुरः स्मरो मन्ये ॥"

अत्र कविप्रौढोक्तिवशाद् विच्छित्तिः। उत्प्रेक्षायामनिश्चिततया प्रतीतिरिह तु निश्चिततयेत्युभयोर्भेदः। (त, अ)

अभेदेनाभिधा हेतुर्हेतोर्हेतुमता सह ॥ ८३ ॥

यथा मम—

"तारुण्यस्य विलासः" इत्यत्र वशीकरणहेतुर्नायिका वशीकरणत्वेनोक्ता। विलासहासयोस्तदभ्यवसायमूलोऽयमलङ्कारः। (थ, आ)

स्वीयशरत्वबोधकर्वलक्षणयं बोध्यम्। मन्ये इत्यत्रानुमिनुम इत्यर्थः। अबलाधारोपितशरस्मरपुरःसराः स्वदृष्टिपातविशिष्टदिक्पतत्त्वनिमित्तशरकत्वादित्यनुमानम्। शरेषु पुष्पमयत्वं बोध्यम्। तेषां निशितत्वं तु आरोप्यम्। उत्प्रेक्षाविशेषादस्य भेदमाह—उत्प्रेक्षायामिति। हेतूत्प्रेक्षायामित्यर्थः। एवञ्च दर्शितोदाहरणद्वये "जानीमहे" "मन्ये" इति पदयोरुत्प्रेक्षावाचकत्वे तद्द्वये उत्प्रेक्षा नैवेति बोध्यम्। तत्पदद्वयाभावे तु द्वयोः सन्देहसङ्कर इति च बोध्यम्।

(वि, थ) काव्यलिङ्गातिरिक्तमपरमपि हेतुसंज्ञकमलङ्कारमाह—अभेदेनेति। हेतुमता कार्येण सह हेतोरभेदेनाभिधाऽभिधानं हेतुनामालङ्कार इत्यर्थः। तारुण्यस्येत्यादौ तदर्शयति—वशीकरणेति। विलासहासतारे कार्यकारणाभावादाह—विलासेति। विलासादिस्तारुण्यादिजन्य एव नायिकायाः परम्परायाः कारणत्वाद्योऽभेदाध्यासस्तन्मूलस्तच्छब्दोभितोऽयमित्यर्थः। बहुषु तत्पात एव शोभेत्यभिप्रायः। अत्र च शुद्धारोपा लक्षणैव, नत्वयमलङ्कार इति काव्यप्रकाशकृत्।

स्मरधावनस्य च कारणरूपस्य साध्यस्यापि पद्मकुड्मलता शरपतनस्य साधनं यथा पर्वतोऽयं वह्निमान् धूमवत्त्वादित्यादौ। एवम्

("आरूढः पतित इति स्वसम्भवेऽपि स्वच्छाना परिहरणीयतामुपैति।
कर्णेभ्यश्च्युतमसितोत्पलं वधूनां वीचीभिस्त्वदमनु यान्निरुत्तरापः ॥")

अत्र स्वच्छाना पतितपरिहाररूपसामान्यस्य जलानामसितोत्पले निरसनरूपो विशेषरूपः साधनम्। यथा वृक्षोऽयं शिंशपात्वादित्यादौ। एव चास्य विच्छित्तिविशेषस्य वितर्क्यभिन्नालङ्कारप्रयोजकत्व। निरूपणप्रयासो राघवानन्दानामविचारमूल एव। अनिश्चिततयाऽनिर्द्धारितत्वेन सम्भावनोत्थानाद् इति भावः। निश्चिततया पर्वतोऽयं वह्निमानित्यादौ वह्निमत्त्वादिवत्।

(लो, आ) अभेदेनाभिधानं समानाधिकरणनिर्देशादिति भावः। हेतुर्हेतवस्योऽलङ्कारः। कार्यस्मरणविच्छित्त्याधयेणानुमानानन्तरमस्य प्रस्तावः। अध्यवसायमूलः। वैचित्र्यं विजृम्भणस्य विलासत्वेन प्रचुरतरोल्लासस्य हासत्वेनाध्यवसायात्।

अनुकूलं प्रातिकूल्यमनुकूलानुबन्धि चेत् ॥ ८४ ॥ (द, इ)

यथा—

"कुपितासि यदा तन्वि ! निधाय करजक्षतम् ।
बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा ॥"

अस्य च विच्छित्तिविशेषस्य सर्वालङ्कारविलक्षणत्वेन स्फुरणात् पृथगलङ्कारत्वमेव न्याय्यम् । (ध)

वस्तुनो वक्तुमिष्टस्य विशेषप्रतिपत्तये ।
निषेधाभास आक्षेपो वक्ष्यमाणोक्तगो द्विधा ॥ ८५ ॥ (न, ई) †

(वि, द) अनुकूलसंज्ञकमलङ्कारान्तरमाह—**अनुकूलमिति** । प्रातिकूल्यं यदनुकूलस्य इष्टार्थस्यानुबन्धि जनकमित्यर्थः ।

(वि, ध) **कुपितासीति**—मानिनीं प्रति सख्या उक्तिरियम् । यदीत्यर्थे यदा । हे तन्वि ! यदि कुपितासि तदा करजक्षतं विधाय भुजपाशाभ्यामस्य नायकस्य कण्ठं दृढं बधान इत्यर्थः । अत्र करजक्षतभुजपाशबन्धौ प्रतिकूलौ, नायकप्रीतेः अभीष्टस्यानुबन्धि । अत्रानुकूलपदार्थस्य व्यङ्ग्यत्वम् । क्वचित्तु तस्य वाच्यत्वमपि ।

"अनिशमपि मकरकेतुर्मनसो रुजमावहन्नभिमतो मे ।
यदि मदिरायतनयना तामधिकृत्य प्रहरतीति ॥"

अत्राभिमतशब्दस्येष्टपदत्वं वाच्यम् । अन्यैरनुक्तस्यालङ्कारस्य स्वीकारबीजमाह—**अस्य चेति** ।

(वि, न) चतुर्विधमाक्षेपालङ्कारमाह—**वस्तुन** इति । वक्तुमिष्टस्य वस्तुनो निषेधाभासोऽनिषेधाभिप्रायत्वेन निषेधाभास आक्षेपालङ्कार इत्यर्थः । निषेधाभासस्य फलमाह—**विशेषप्रतिपत्तये** इति । प्रथमं तस्य द्वैविध्यमाह—**वक्ष्यमाणेति**। वक्ष्यमाणस्य उक्तस्य वा वक्तुमिष्टस्य निषेधाभास इत्यर्थः । उक्तस्य वक्तुमिष्टस्य चोक्तिः प्राचीनेच्छाविषयत्वात् ।

(लो, इ) अनुकूलमित्यलङ्कारनाम । अनुकूलानुबन्धि आनुकूल्यावहम् । अस्यापि कारणवैचित्र्यमूलत्वेन हेत्वलङ्कारान्तर लक्षणम् । अस्य सागस इत्यर्थः ।

(लो, ई) सम्प्रत्यर्थस्य गम्यत्ववैशिष्ट्येनावशिष्टमाक्षेपालङ्कारमाह—**वस्तुन** इति । अयमर्थः—विवक्षितस्य वस्तुनः प्राकरणिकत्वादयुक्तो निषेधः कृतः सन् बाधितस्वरूपो यत्राभासतामवगमयति स आक्षेपोऽलङ्कारः । न चात्र निष्फल इत्याह—**विशेष** इति । प्रकृतनिष्ठत्वेन विशेषस्य प्रतिपत्तये इत्यर्थः । सत्तासमानो निषेधः । क्वचिद् वक्ष्यमाणविषयः क्वचिदुक्तविषय इति द्विविध आक्षेपोऽलङ्कारः ।

---

† 'इह प्राकरणिकोऽर्थः प्राकरणिकत्वादेव वक्तुमिष्यते । तथाविधस्य विधानार्हस्य निषेध कर्तुं न युज्यते । स कृतोऽपि विधिस्वरूपत्वात् निषेधायते इति निषे-

अत्र वक्ष्यमाणविषये क्वचित् सर्वस्यापि सामान्यत सूचितस्य निषेध क्वचिदशोक्तावशान्तरे निषेध इति द्वौ भेदौ। उक्तविषये च क्वचिद् वस्तुस्वरूपस्य निषेध, क्वचिद् वस्तुकथनस्येति द्वावित्याक्षेपस्य चत्वारो भेदा। क्रमेण यथा—

"स्मरशरशतविधुराया भणामि सख्या कृते किमपि।
क्षणमिह विश्रम्य सखे! निर्दय हृदयस्य किं वदाम्यथवा॥"

अत्र सख्या विरहस्य सामान्यत सूचितस्य वक्ष्यमाणविशेषे निषेध। (प, उ)

"तव विरहे हरिणाक्षी निरीक्ष्य नवमालिका दयिताम्।
हन्त नितान्तमिदानीमा किं हतजल्पितैरथवा॥"

अत्र मरिष्यतीत्यशो नोक्त। (फ)

"बालअ! णाह दूई चिट्ठ' पिओसि त्ति ण मह वावारो।
सा मरइ तुज्झ अअसो एअ धम्मक्खर भणिमो॥"

(वि, प) स्मरशरेति। नायिकाया विरहावस्था नायके विवक्षोस्तत्सख्या उक्तिरियम्। सखीपतित्वेन सखे! इति सम्बोधनम्। क्षणमिह विश्रम्य भणामीत्यन्वय। कथनीयबाहुल्याद् विश्रमपूर्वकत्वकथनम्। निर्दयहृदयेषु युष्मादृशेष्वित्यर्थ। अत्रेति। विरहस्य विरहावस्थाया वक्ष्यमाणे विशेषे पाण्डुत्वकृशत्वादौ निर्दयहृदयत्वेन तु सामान्यत सूचनम्। निषेधाभासवशाच्च तस्या वक्ष्यमरणरूपविशेषप्रतिपत्ति।

(वि, फ) अशनिषेधाभासमाह—तव विरह इति। नितान्तमिदानीमिति। अन्यदा उद्दीपकविकसितमल्लिकादर्शनादक्षितजीवना ह्यासीत्। इदानीं तु मरिष्यतीत्यस्या अस्यानुक्तस्य निषेधाभास। बालेत्यादिरुक्त। एव निषिद्धोक्तिविषयस्य मरणस्याऽश्रव्यत्वरूपस्य विशेषस्य प्रतिपत्तिस्तत्फलम्।

(वि, ब) उक्तनिषेधविषये वक्तुमित्यस्य वस्तुस्वरूपस्य निषेधमाह—बालअ इति।

"बालक नाह दूती तिष्ठ प्रियोऽसीति न मम व्यापार।
सा म्रियते तवाऽयश एतद् धर्माक्षरं भणाम॥ इति।

(लो, उ) सर्वत्रापि वक्ष्यमाणस्य विरहस्य सामान्यत सूचन स्मरशरविधुरया इति प्रतिपादनात्। वक्ष्यमाणो विरहिण्यास्तत्तदवस्थाविशेषाणामकथनात्।

भास सम्पद्य। तस्यैतस्य करण प्रस्तुतत्वेन विषयप्रतिपत्त्यर्थम्। अन्यथा गजस्नानतुल्य स्यात्।" (अलङ्कारसर्वस्वे)

। तुअ (पुस्तके पाठ)।

अनुकूलं प्रातिकूल्यमनुकूलानुबन्धि चेत् ॥ ८४ ॥ (द, इ)

यथा—

"कुपितासि यदा तन्वि ! निधाय करजक्षतम् ।
बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा ॥"

अस्य च विच्छित्तिविशेषस्य सर्वालङ्कारविलक्षणत्वेन स्फुरणात् पृथगलङ्कारत्वमेव न्याय्यम् । (ध)

वस्तुनो वक्तुमिष्टस्य विशेषप्रतिपत्तये ।
निषेधाभास आक्षेपो वक्ष्यमाणोक्तगो द्विधा ॥ ८५ ॥ (न, ई) †

(वि, द) अनुकूलसंज्ञकमलङ्कारान्तरमाह—**अनुकूलमिति** । प्रातिकूल्यं यदनुकूलस्य इष्टार्थस्यानुबन्धि जनकमित्यर्थः ।

(वि, ध) **कुपितासीति**—मानिनीं प्रति सख्या उक्तिरियम् । यदीत्यर्थे यदा । हे तन्वि ! यदि कुपितासि तदा करजक्षतं विधाय भुजपाशाभ्यामस्य नायकस्य कण्ठं दृढं बधान इत्यर्थः । अत्र करजक्षतभुजपाशबन्धौ प्रतिकूलौ; नायकप्रीते. अभीष्टस्यानुबन्धि । अत्रानुकूलपदार्थस्य व्यङ्ग्यत्वम् । क्वचित्तु तस्य वाच्यत्वमपि ।

"अनिशमपि मकरकेतुर्मनसो रुजमावहन्नभिमतो मे ।
यदि मदिरायतनयना तामधिकृत्य प्रहरतीति ॥"

अत्राभिमतशब्दस्येष्टपदत्व वाच्यम् । अन्यैरनुक्तस्यालङ्कारस्य स्वीकारबीजमाह—**अस्य चेति** ।

(वि, न) चतुर्विधमाक्षेपालङ्कारमाह—**वस्तुन** इति । वक्तुमिष्टस्य वस्तुनो निषेधाभासोऽनिषेधाभिप्रायत्वेन निषेधाभास आक्षेपालङ्कार इत्यर्थः । निषेधाभासस्य फलमाह—**विशेषप्रतिपत्तये** इति । प्रथमं तस्य द्वैविध्यमाह—**वक्ष्यमाणेति**। वक्ष्यमाणस्य उक्तस्य वा वक्तुमिष्टस्य निषेधाभास इत्यर्थः । उक्तस्य वक्तुमिष्टस्य चोक्तिः प्राचीनेच्छाविषयत्वात् ।

(लो, इ) अनुकूलमित्यलङ्कारनाम । अनुकूलानुबन्धि आनुकूल्यावहम् । अस्यापि कारणवैचित्र्यमूलत्वेन हेत्वलङ्कारान्तर लक्षणम् । अस्य सागस इत्यर्थः ।

(लो, ई) सम्प्रत्यर्थस्य गम्यत्ववैशिष्ट्येनावशिष्टमाक्षेपालङ्कारमाह—**वस्तुन** इति । अयमर्थ.—विवक्षितस्य वस्तुनः प्राकरणिकत्वादयुक्तो निषेधः कृतः सन् बाधितस्वरूपो यत्राभासतामवगमयति स आक्षेपोऽलङ्कारः । न चात्र निष्फल इत्याह—**विशेष** इति । प्रकृतनिष्ठत्वेन विशेषस्य प्रतिपत्तये इत्यर्थ. । सत्तासमानो निषेध. । क्वचिद् वक्ष्यमाणविषयः क्वचिदुक्तविषय इति द्विविध आक्षेपोऽलङ्कारः ।

---

† 'इह प्राकरणिकोऽर्थ. प्राकरणिकत्वादेव वक्तुमिष्यते । तथाविधस्य विधानार्हस्य निषेध. कर्तुं न युज्यते । स कृतोऽपि विधिस्वरूपत्वात् निषेधायते इति निषे-

अनिष्टस्य तथार्थस्य विध्याभासः परो मतः ॥ ८६ ॥ (य,ऋ) *

तथेति पूर्ववद्विशेषप्रतिपत्तये । यथा—

"गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः ।

(चि, य) अन्यविधमाक्षेपालङ्कारमाह—**अनिष्टस्येति** । अनिष्टस्यार्थस्य याभासो निषेधबोधको विधिस्तथा पूर्वोक्तवत् विशेषप्रतिपत्तये चेत्तदाऽपर आक्षेपालङ्कार इत्यर्थः ।

(चि, र) 'गच्छ गच्छसि चेत्कान्त' इत्यत्र जन्मकथनान्मरणं व्यङ्ग्यम् ।

("बाणेन हत्वा मृगमस्य यात्रा
निवार्यतां दक्षिणमारुतस्य ।
इत्यर्थनीयः शबराधिराजः
श्रीखण्डपूर्वीधरकन्दरस्थः ॥"
"यद्वा मृषा तिष्ठतु दैन्यमेत-
न्नेच्छन्ति वैरं मरुता किराताः ।
कोलिप्रसङ्गे शबराङ्गनाना
स हि श्रमग्लानिमपाकरोति ॥")

इह हि प्रथमपद्योक्तस्य द्वितीयपदेन निषेधस्तात्त्विक एव। एवञ्च निषिद्धविधिरपि नास्य साङ्गर्यं, स हि यथा—

"क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहाद्डुडुपेनास्मि सागरम् ॥"
"मन्दः कवियशः प्रेप्सुर्गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥"
"अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥")

अत्र पद्यद्वयोक्तनिषेधस्य तृतीयपद्येन विधाने निषेधस्याभासता एव ।

(लो, झ) एवमौपनिषेधाभासाश्रयमेकमाक्षेपमुक्त्वा तद्विपरीतमनिष्टविध्याभासं द्वितीयमाह—**अनिष्टस्येति** । अयमर्थः । यथेष्टस्य निषेधस्तथानिष्टस्य विधिरनुपपद्यमान आभासे पर्यवसायी द्वितीयाक्षेपालङ्कारबीजमिति ।

निषेधः । किन्तु निषेधेन विधेराक्षेपः, निषेधस्याऽसत्परत्वाद् विधिपर्यवसानात् ।
(अल० स०)

* यथेष्टस्येष्टत्वादेव निषेधोऽनुपपन्नः, एवमनिष्टस्य अनिष्टत्वादेव विधानं नोपपद्यते । तत् क्रियमाणं प्रस्खलद्रूपत्वात् विध्याभासे पर्यवस्यति ।
(अलङ्कारसर्वस्वे)

अत्र दूतीत्यस्य वस्तुनो निषेधः । (ब)

"विरहे तव सन्वङ्गी कथं क्षपयतु क्षपाम् ।
दारुणव्यवसायस्य पुरस्ते भणितेन किम् ॥"

अत्र [1]कथनोक्तस्यैव निषेधः । (भ)

प्रथमोदाहरणे सख्या अवश्यम्भावि मरणमिति विशेषः प्रतीयते । द्वितीयेऽशक्यवक्तव्यत्वादि । तृतीये दूत्या[2] यथार्थवादित्वम् । चतुर्थे दुःखस्यातिशयः । न चाऽयं विहितनिषेधः । अत्र निषेधा[3]भासत्वात् । (म, ऊ)

धर्मानभिज्ञत्वेन धर्मवक्त्र्या बालकत्वेन सम्बोधितः । धर्मकथनमात्रस्योद्देश्यत्वसूचनाय आत्मनो दूतीत्वनिषेधः । नायिकायाः प्रवृत्त्यनुमतिरपि मम नास्तीत्येतत्सूचनाय तिष्ठ युक्तम् । तथा प्राणिमात्रधर्मो वक्तव्यस्तत्र स्वप्रियत्वमन्यजनप्रियत्वं वा न प्रयोजकमित्येतत्सूचनाय प्रियोऽसीत्युक्तम् । तस्या मम वा प्रियोऽसीति नेत्यर्थः । अत्र सा म्रियते इत्युक्तविषये वक्तुमिष्टस्यात्मनो दूतीत्वस्य वस्तुन एव निषेधो नतु तदुक्तेः । नच दूतीत्वनिषेधः कथमुक्तमरणविषयक इति वाच्यम् । मरणव्यावर्त्तकदूतीत्वविषयत्वेन परम्परया तद्विषयत्वात् । अत्राधर्मतो निवृत्तये यथार्थवादित्वस्य विशेषस्य प्रतिपत्तिः ।

(वि, भ) उक्तनिषेधमाह—**विरहे** इति । अत्रोक्तस्य क्षपाक्षपणासामर्थ्यस्य उक्तेरेव निषेधः । **अत्रेति** । अत्र कथनस्योक्तस्यैवेत्यत्र उच्चारितस्यैवेत्यर्थः । अत्र तद् व्यङ्ग्यदुःखातिशयस्य विशेषस्य प्रतिपत्तिः ।

(वि, म) उक्तश्लोकचतुष्टये उक्तरूपविशेषप्रतिपत्तिं दर्शयति—**अत्र प्रथममिति** । तृतीये दूत्या इत्येव सम्यक् पाठः । तथा च दूतीरेव सतीत्यर्थः । ननु 'कर्त्तव्यं प्रत्यहं स्नानं नतु रात्रौ कदाचन' इत्यत्र विहितस्य प्रत्यहस्नानस्य रात्रौ निषेधवद् विधिनिषेध एवाऽयम् ।

स च नालङ्कारतां भजत इत्याशङ्क्ते—**न चेति**। समाधत्ते—**अत्रेति**। वास्तवनिषेधस्यैवानलङ्कारत्वम्, निषेधाभासस्य तु अलङ्कारत्वमेवेति भावः *।

(लो, ऊ) अत्र च विहितनिषेधेन विच्छित्तेरभावात् क्षुद्रत्वादलङ्कारमध्ये काव्यप्रकाशकारादिभिर्लक्षितेन साङ्कर्यभ्रमं निरस्यति—**न चायमिति** । अत्र विहितनिषेधे । यथा—

---

* 'एवं च आक्षेपे इष्टोऽर्थः । तस्यैव निषेधः, निषेधस्यानुपपद्यमानत्वादसत्यत्वं, विशेषप्रतिपादनं चेति चतुष्टयमुपयुज्यते । तेन न निषेधविधिः, नापि विहित-

1 'कथनस्योक्तस्यैव' (क. पु.)
2 'दूतीत्वे' (क. पु.)
3 व्यस्तः पाठः (क. पु.)

अनिष्टस्य तथार्थस्य विध्याभासः परो मतः ॥ ८६ ॥ (य,ऋ) *

तथेति पूर्ववद्विशेषप्रतिपत्तये । यथा—

"गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः ।

(वि, य) अन्यविधमाक्षेपालङ्कारमाह—अनिष्टस्येति । अनिष्टस्यार्थस्य विध्याभासो निषेधबोधको विधिस्तथा पूर्वोक्तवत् विशेषप्रतिपत्तये चेत्तदाऽपर आक्षेपालङ्कार इत्यर्थः ।

(वि, र) 'गच्छ गच्छसि चेत्कान्त' इत्यत्र जन्मकथनान्मरणं व्यङ्ग्यम् ।

("बाणेन हत्वा मृगमस्य यात्रा
निवार्यतां दक्षिणमारुतस्य ।
इत्यर्थनीयः शबराधिराजः
श्रीखण्डपृथ्वीधरकन्दरस्थः ॥"
"यद्वा मृषा तिष्ठतु दैन्यमेत-
न्नेच्छन्ति वैरं महता किरातः ।
खेलिप्रसन्ने शबराङ्गनाना
स हि श्रमग्लानिमपाकरोति ॥")

इह हि प्रथमपद्योक्तस्य द्वितीयपदेन निषेधस्तात्त्विक एव । एवञ्च निषिद्धविधिनाऽपि नास्य साङ्कर्यं, स हि यथा—

"क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥"
"मन्दः कवियशः प्रेप्सुर्गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥"
"अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥")

अत्र पद्वयोक्तनिषेधस्य तृतीयपद्येन विधाने निषेधस्याभासता एव ।

(लो, ऋ) एवमीषन्निषेधाभासाश्रयमेकमाक्षेपमुक्त्वा तद्विपरीतमनिष्टविध्याभासं द्वितीयमाह—अनिष्टस्येति । अयमर्थः । यथेष्टस्य निषेधस्तथानिष्टस्य विधिरनुपपद्यमान आभासे पर्यवसायी द्वितीयाक्षेपालङ्कारबीजमिति ।

निषेध. । किन्तु निषेधेन विधेराक्षेप., निषेधस्याऽसत्परत्वाद् विधिपर्यवसानात् ।
(अल० स०)

* यथेष्टस्येष्टत्वादेव निषेधोऽनुपपन्न, एवमनिष्टस्य अनिष्टत्वादेव विधानं नोपपद्यते । तत् क्रियमाणं प्रस्खलद्रूपत्वात् विध्याभासे पर्यवस्यति ।
(अलङ्कारसर्वस्वे)

ममापि जन्म चैत्रैव भूयाद् यत्र गतो भवान् ॥'

अत्राऽनिष्टत्वाद् गमनस्य विधि. प्रस्खलद्रूपो निषेधे पर्यवस्यति । विशेषश्च गमनस्यात्यन्तपरिहार्यत्वरूप प्रतीयते । (र, ऋ)

विभावना विना हेतु कार्योत्पत्तिर्यदुच्यते ।
उक्तानुक्तनिमित्तत्वाद् द्विधा सा परिकीर्तिता ॥८७॥ (ख,ल) +

विना कारणमुपनिबध्यमानोऽपि कार्योदय. किञ्चिदन्यत्कारणमपेक्ष्यैव भवितु युक्त । तच्च कारणान्तर क्वचिदुक्त क्वचिदनुक्तमिति द्विधा ।

प्रस्खलद्रूप इति—अविधीभवद्रूप इत्यर्थ । विशेषप्रतिपत्तिं दर्शयति—विशेषश्चेति ।

(वि, ल) विभावनालङ्कारमाह—विभावनेति । हेतु हेत्वाभासम् । कार्योत्पत्तिस्तदीयकारणविशेषादिवाच्यम् । उक्तानुक्तेतिनिमित्त कार्योत्पत्ते । व्याचष्टे—विना कारणमिति ।

(लो, ऋ) अत्यन्तपरिहार्यरूप ममापीत्यादिना द्वितीयार्थन व्यञ्जित । यदत्र—

(यातु यातु किमनेन तिष्ठता
मुञ्च मुञ्च सखि सादर वच ।
खण्डिताधरकलङ्कितश्रिय
शक्नुमो न नयनैर्निरीक्षितुम् ॥')

इति राघवानन्दैरुदाहृत तदसमञ्जसम् । अत्रोदाहरणवत् सर्वथा न यातीति तथाविधापराधकाले नायिकया निषेधाभासस्य मूढानामपि बुद्धयनारोहात् ।

(लो, ल) अस्य चाक्षेपस्य विरोधाश्रयत्वेन तदनन्तर विरोधमूलालङ्कार-प्रदर्शन प्रक्रियते—विभावनेति । उच्यते चमत्कारप्रतिपत्तये कविना निबध्यते यस्य कस्यचित्कारणस्याभाव दर्शयितुमित्यर्थ । एवमन्येषु एवविधस्थलेषु सूत्रार्था नेया. । तत्त्वत सर्वथाकारणाभावे कार्यात्पत्तेरविद्यमानत्वात् । उक्तेति । सा विभावना उक्तनिमित्ता अनुक्तनिमित्ता चेत्यर्थ ।

+ हेतु प्रसिद्धकारण विना । प्रसिद्धकारण विना कार्योत्पत्तिरप्रसिद्ध कारणमेव कल्पयति । "सिद्धकारणाभावे सूक्ष्मकारणवशात्कार्योत्पत्तिविशिष्टतया कार्यभावना-द्विभावना" । (अल० स०)

कारणस्य विरोधेन बाध्यमान फलोदय ।
विभावनायामाभाति विरोधोऽन्योन्यबाधनम् ॥

इति विभावनाविरोधयोर्भेद ।

यथा—

"अनायासकृशं मध्यमशङ्कतरले दृशौ ।
अभूषणमनोहारि वपुर्वयसि सुभ्रुव ॥" (व) *

अत्र वयोरूप निमित्तमुक्तम् । अत्रैव "वपुर्भाति मृगीदृश" इति पाठेऽनुक्तम् ।

सति हेतौ फलाभावो विशेषोक्तिस्तथा द्विधा ॥ ८८ ॥ (ए)

तथेत्युक्तानुक्तनिमित्तत्वात् । अत्राद्यनिमित्ता यथा—

"धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चला ।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिन ॥" (श)

अत्र महामहिमशालित्व निमित्तमुक्तम् । अत्रैव चतुर्थपादे "कियन्त सन्ति भूतले । इति पाठे त्वनुक्तम् । अचिन्त्यनिमित्तत्व चानुक्तनिमित्तस्यैव भेद इति पृथङ् नोक्तम् ।

यथा—

"स एकस्त्रीणि जयति जगन्ति कुसुमायुध ।
हरताऽपि तनु यस्य शम्भुना न हृत बलम् ॥" (ष)

अत्र तनुहरणेनाऽपि बलाहरणे निमित्तमचिन्त्यम् । इह च कार्याभाव कार्यविरुद्धसद्भावमुखेनाऽपि निबध्यते । विभावनायामपि कारणाभाव

(वि, व) अनायासेति । मध्यो मध्यभाग । अशङ्के शङ्कयैव तारतम्यौचित्यात् ।

(वि, श) विशेषोक्त्यलङ्कारमाह—**सति हेताविति** । उक्त सतीत्यर्थ, फलाभावोऽप्युक्त इत्यर्थ । **धनिनोऽपीति** । ते वर्णनीया राजान ।

एतदेव विशदयति—**विनेति** । इयञ्च कारणाभावेन परतन्त्रतया कार्योत्पत्तेर्विशिष्टतया भावनादन्वर्था विभावना ।

(वि, ष) अचिन्त्यनिमित्तरूपस्य प्रभेदान्तर काव्यप्रकाशकृतोच्यते । तच्चानुक्तनिमित्तरूपमेवेति पृथक् नोच्यते इत्याह—**अचिन्त्येति** । अचिन्त्यनिमित्तोदाहरण तदुक्त दर्शयति—**यथा स एक** इति । त्रीणि जगन्तीत्यन्वय ।

(लो, ए) फलाभाव शब्देनोपनिबद्ध इत्यादि पूर्ववत् ।

---

* तरुण्या मध्यम् आयास परिणाम विना कृश नयने शङ्का विना तरल, वपुर लङ्कार विना मनोहारि ।

अत्र आयासादय कृशत्वादीना प्रसिद्ध कारणम् । तथाभावेऽपि कृशत्वादीना मुत्पत्तेर्विभावना । तत्र यौवनमेव कारणान्तर वर्त्तते ।

कारणविरुद्धसद्भावमुखेनापि। एवञ्च "य कौमारहर स एव हि वर" इत्यादेरुत्कण्ठाकारणविरुद्धस्य निबन्धनाद् विभावना।

"य कौमारहर" इत्यादे कारणस्य च कार्यविरुद्धाया उत्कण्ठाया निबन्धनाद् विशेषोक्ति। एवञ्चात्र विभावनाविशेषोक्त्यो. सङ्कर। शुद्धोदाहरणन्तु मृग्यम्। (स, ऐ)

जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः।
क्रिया क्रियाद्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिथः।

(वि, स) उत्कण्ठाकारणविरुद्धस्येति। उत्कण्ठाकारण हि तादृशपत्यायसन्निधान, तद्विरुद्धस्य तादृशपत्यादिसान्निधानस्येत्यर्थ। **कारणस्य च कार्यविरुद्धाया** इति। तादृशकारणस्य यत्कार्यमनुत्कण्ठा। तद्विरुद्धाया इत्यर्थ। **शुद्धोदाहरण मृग्यमिति**। शुद्धोदाहरणद्वयन्तु विभावनाविशेषोक्त्योरनायासकृशमित्यादिक, "धनिनोऽपि निरुन्मादा" इत्यादिकमेव चास्ति। तयोस्तथात्वमेव मृग्यमित्यर्थ। तथाहि—अनायासकृशमित्यादौ शङ्काविरुद्धाया अशङ्काया, भूषणविरुद्धस्याऽभूषणत्वस्य च प्रतीतावपि न विशेषोक्ति प्रतीयते। न हि तारल्याभावरूपस्य फलाभावस्य मनोहारित्वाभावरूपस्य फलाभावस्य च प्रतीत्या विशेषोक्ति स्यात्। तथा धनिनोऽपत्यादावधनित्वविरुद्धस्य धनित्वस्य प्रतीतावपि न विभावनाप्रतीति, नहि अधनित्वादे. फलान्यनुन्मादादीनि येनाऽधनित्वविरुद्धधनित्वप्रतीतावपि तादृशफलाभावप्रतीत्या विभावना स्यात्।

(वि, ह) दशविध विरोधाभासालङ्कारमाह—**जातिरित्यादि**। जात्यादौ जातिगुणक्रियाद्रव्यैर्मिथो विरुद्धैरिति यथालिङ्गमन्वय। गुणश्च जातिक्रियाभिन्न धर्ममात्र बोध्यम्। **गुणादिभिस्त्रिभिरिति**। तस्य जात्या सह विरोधस्तु जाते-

---

(लो, ऐ) इह च कायाभाव इत्यादिग्रन्थ प्रथमपरिच्छेद एव विशदीकृत। सङ्कर एकस्योपग्रहन्यायदोषाभावादनिश्चय इति प्रकार। शब्दोदाहरण विशेषोक्ते कार्यविरुद्धसद्भावमुखेन, नतु "स एकस्त्रीणि" इत्यादिवत् कार्यविरुद्धमुखेन विभावनायाश्च कारणविरुद्धसद्भावमुखेन शुद्धोदाहरण तु अन्याऽन्यसाङ्कर्याभावयुक्तम्। तद्यथा—

"कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने
नमोऽस्त्वनङ्गायार्यायाय तस्मै मकरकेतवे॥"

अत्र दाहकार्यतया शक्तेरभावोऽशक्तिविरुद्धशक्तिसद्भावमुखेन उपनिबद्ध इति विशेषोक्ति स्फुटा। एव विभावनादयोऽपि।

(लो, ओ) चतुर्भि जातिगुणक्रियाद्रव्यै विरुद्धमिव भासेत, पर्यवसाने तु [illegible] एव अन्यथा दोषावहत्वादित्यर्थ। गुणस्य जात्या सह जातेर्गुणेन सह

विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः ॥ ८६ ॥ (६, ओ)

क्रमेण यथा—

"तव विरहे मलयमरुद्दवानल शशिरुचोऽपि सोष्माण ।
हृदयमलिरुतमपि भिन्ते नलिनीदलमपि निदाघरविरस्या ॥" (क) †
"सन्ततमुसलासङ्गाद् बहुतरगृहकर्मघटनया नृपते ।
द्विजपत्नीनां कठिना सति भवति करा सरोजसुकुमारा ॥" (ख)+

र्गुणेन सह विरोधरूप एवेति पूर्वगणनाप्रविष्टत्वान्नोक्त । एवमुत्तरद्वयेऽपि । द्रव्य त्वेकव्याक्रिक बोध्यम् ।

(वि, क) तत्र जातेथतुर्भिश्च सह विरोधमेकश्लोके एव दर्शयति—**तव विरहे** इति । तव विरहेऽस्या इति मलयपवनादौ सर्वत्रान्वय । अत्र दवदहनत्वमलय-पवनत्वजात्योर्विरोध । न चात्र रूपकम्, दाहकत्वशीतलत्वधर्मव्याप्ययोर्जात्योर्विरोध स्यैव पुर स्फूर्त्तिकत्वात् । शशिरुचोऽपीत्यत्र शशिरुचित्वजातेश्च सोष्मत्वगुणविरोध । हृदयमित्यत्रालिरुतत्वजातेर्भेदेन क्रियया विरोध । नलिनीदलमपीत्यत्र नलिनीदल-त्वजातेर्निदाघरविणा द्रव्येण सह तादात्म्येन विरोध । अत्रापि विरुद्धधर्मव्याप्य-त्वाद् विरोधस्यैव पुर स्फूर्त्तिकत्वादपिकारेण विरोधबोधनाच्च न रूपकम् । खेरुष्मत्व-व्याप्यता तु तादात्म्येन । खाणा द्वादशत्वेऽपि नात्र जातिविरोध, निदाघीयविशेष-णादनुपदकप्रवर्त्तकत्वेरेवात्र रविपदार्थत्वात् तस्यैकत्वादेव ।

(वि, ख) गुणस्य गुणविरोधमाह—**सन्ततेति** । हे नृप ! ते पूर्वं सन्ततेत्या दिना कठिना द्विजपत्नीना करा भवन्ति सरोजसुकुमारा । त्वया सम्पादनेन दासीभि-रेव कर्मकरणात् करसौकुमार्यम् । अत्र कठिनत्वसौकुमार्यगुणयोर्विरोध ।

विरोध एवेति गुणविरुद्धस्य त्रैविध्यमेव । एवमेव क्रियाविरुद्धस्य चैक्यविध्यमेवेति द-शाकृतिर्दशप्रकारो विरोध ।

---

† तव विरहे मलयमरुदपि मलयपवनोऽपि दवानल दवाग्नि, दाहजनक-त्वात् । तथा शशिरुचोऽपि चन्द्रकिरणा अपि साष्माण उष्णा, तापकरत्वात् । अलिरुतमपि हृदय भिन्ते विदारयति उद्दीपकत्वात् । नलिनीदलमपि निदाघरवि ग्रीष्मकालीन सूर्य दाहकत्वात् । अत्र विरहातिशयाद् विरोधस्याभासतैव ।

+ हे नृपते ! भवति सति त्वयि विद्यमाने सन्तत मुसलासङ्गात् तण्डुलावर्थं मुसलधारणात् तथा बहुतर यत् कर्म तस्य घटनाया सम्पादनेन (काठिन्यहेतुद्वय) कठिना द्विजपत्नीना करा सरोजवत् सुकुमारा जाता इत्यर्थ । कालभेदेन कार्यनिवृत्त्या विरोध परिहृत ।

"अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥" (ग)
"वल्लभोत्सङ्गसङ्गेन विना हरिणचक्षुषः।
राकाविभावरीजानिर्विषज्वालाकुलोऽभवत् ॥" (घ)
"नयनयुगासेचनकं मानसवृत्त्याऽपि दुष्प्रापम्।
रूपमिदं मदिराक्ष्या मदयति हृदयं दुनोति च मे ॥" (ङ, औ)

"त्वद्वाजिराज" इत्यादि। "वल्लभोत्सङ्ग" इत्यादिश्लोके चतुर्थपादे मध्यन्दिन-दिनाधिप इतिपाठे द्रव्ययोर्विरोधः। (च)

अत्र "तव विरह" इत्यादौ पवनादीनां बहुव्यक्तिवाचकत्वाज्जातिशब्दानां दावानलोष्महृदयभेदनसूर्यैर्जातिगुणक्रियाद्रव्यरूपैरन्योऽन्यं विरोधो मुखत आभासते। विरहहेतुकत्वात्समाधानम्। (छ)

(वि, ग) गुणस्य क्रियाविरोधमाह—**अजस्येति**। ईश्वरं प्रति देवानां स्तुतिरियम्। अजस्येत्यत्र जन्माभावगुणजन्मग्रहणक्रिययोर्विरोधः। एवं निरीहत्वनिद्रारूपस्वापगुणयोरपि शत्रुहननजागरणक्रियाभ्याम्।

(वि, घ) गुणस्य द्रव्यविरोधमाह—**वल्लभोत्सङ्गसङ्गेनेति**। तद् विना विरहिण्या इत्यर्थः। राकाविभावरीजानिः पूर्णचन्द्रः। अत्र चन्द्रो द्रव्यमेकव्यक्तिरत्वात्। तस्य तादात्म्येन विषज्वालाकुलत्वगुणविरोधः।

(वि, ङ) क्रियाया. क्रियाविरोधमाह—**नयनयुगेति**। आसेचनकं सेकेन तापनाशकम् अमृतेन सेचनकं वा। दुष्प्रापमन्यस्त्रीभि.। अत्र मदनादिक्रिययोर्विरोधः।

(वि, च) क्रियाया द्रव्यविरोधमाह—**त्वद्वाजिराजेति**। अत्र हरौ द्रव्यं, तादात्म्येन तस्य नत्वर्थविशिष्टधारणक्रियाविरोधः। वस्तुतस्तु नेदमुदाहरणमुचितं गङ्गा दधतोऽस्य धारणक्रियाभाररूपगुणस्यैव विरुद्धत्वात्। किन्तु 'मोच्यते शिरसो गङ्गा भुरिभारकरी हर' इत्येवं पाठविशिष्टमेवेदमुदाहरणं बोध्यम्। **मध्यन्दिनादिनाधिप इति पाठे** इति। चन्द्रसूर्ययोर्विरुद्धशीतोष्णगुणवत्त्वेन विरोधस्य पुर.स्फुर्तिकत्वाद् अत्रापि न रूपकम्। दिनाधिपश्चैक एव सूर्यो नापरे एकादेश इति न जातिविरोधः।

(वि, छ) अत्र प्रथमश्लोके जातेश्चतुर्भिः सह विरोधं ग्राहयति—**अत्र तव विरह इत्यादाविति**। पवनादीनामित्यादिपदात् शशिरुच्यलिरुतनलिनीदलपदपरिग्रहः। एषा सर्वेषा बहुव्यक्तिवाचकत्वादित्यर्थः। मुखतः—आपाततः। तेषां यथोक्तजात्याविरोधं दर्शयति—**विरहहेतुकत्वादिति**। समाधानमविरोधः।

(लो, औ) 'तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात्' अमरः। मदिरो मत्तचकोरः।

अत्र "अजस्य" इत्यादावजत्वादिगुणस्य जन्मग्रहणादिक्रियया विरोधः। भगवतः प्रभावस्यातिशयित्वात्तु समाधानम्। "त्वद्वाजि"इत्यादौ हरोऽपि शिरसा गङ्गां न धत्ते इति विरोधः। "त्वद्वाजी"त्यादिकविप्रौढोक्त्या तु समाधानम्। स्पष्टमन्यत्। विभावनायां कारणाभावेनोपनिबध्यमानत्वाद् कार्यमेव बाध्यत्वेन प्रतीयते।

विशेषोक्तौ च कार्याभावेन कारणमेव। इह त्वन्योऽन्यं द्वयोरपि बाध्यत्वामिति भेदः। (ज, अ)

कार्यकारणयोर्भिन्नदेशतायामसङ्गतिः ॥६०॥ (झ)

यथा—

"सा बाला वयमप्रगल्भवचसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम्।
सा क्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रितैरपटवो जाताः स्म इत्यद्भुतम्॥" ‡

अस्याश्चापवादत्वादेकदेशस्थयोर्विरोधे विरोधालङ्कारः। (ञ, आ)

विरोधहेतुकत्वं विरोध व्यक्त्योरेव। तेद्धतुत्वं तद्व्यक्त्यारोपमात्रम्। नतु विरुद्धयोर्वास्तवमेकाधिकरण्यमित्यर्थः। एव मित्यादिकं स्पष्टम्।

(वि, ज) विभावनाविशेषोक्त्योरपि कारणाभावे कार्यसत्त्वयोः कार्याभावकारणसत्त्वयोश्च विरुद्धत्वेन भासमानत्वाद् विरोधाभासत्वप्रसङ्गे तत एनं विशेषयितुमाह—**विभावनायामिति**। कारणाभावेन सहोपनिबध्यमानत्वादित्यर्थः। विशेषोक्तविति कारणमात्रसामग्री, तस्या एव फलभावकाले बाध्यत्वप्रतीतेः। विशेषोक्त्युदाहरणेषु यद्यत्कारण निर्दिष्टं तस्यैव सामग्रीत्वेनाध्यासे एवं वैचित्र्यात्। अन्यथा कारणान्तराभावप्रयुक्ते फलाभावे किं वैचित्र्यम्॥

(वि, झ) असङ्गतालङ्कारमाह—**कार्यकारणयोरिति**। उत्पत्तिकाले समानदेशतया प्रतीतिनियतयोरित्यर्थः। तेनाऽन्यदा भिन्नदेशयोर्दण्डघटयोः सर्वदैव भिन्नदेशयो. कार्ययोश्च भिन्नदेशत्वेऽपि नायमलङ्कारः।

(वि, ञ) **सा बालेति**। दूरस्थां प्रियां स्मृत्वा विरहे दुर्बलस्योक्तिरियम्। बाला बाल्यधर्ममृदुत्ववती तत्वार्थं तस्या एव वचोऽप्रागल्भ्यं तच्चास्माकं विरहदौर्बल्यात्। वस्तुतो बालात्वेऽपि पीनस्तनकथनानुपपत्तेः।

(लो, अ) कारणाभावे इत्यनन्तरं बलवदित्यर्थः। एवमन्यत्र।

(लो, आ) भिन्नदेशस्थत्वमात्रतायां यद्देशमेव कारणं तद्देशमेव कार्यमित्येवमेव नियमः। एकदेशस्थयोरेव नतु भिन्नदेशस्थयो अपवादविधेर्बलीयस्त्वादितिभावः।

---

‡ सा बाला वयन्तु अप्रगल्भवचस.। अथ च यत्रैव बाल्यं तत्रैव अप्रगल्भ-

गुणौ क्रिये वा यत्स्यातां विरुद्धे हेतुकार्ययोः।
यदारब्धस्य वैफल्य[1]मनर्थस्य च सम्भवः।
विरूपयो. सङ्घटना या च तद्विषमं मतम् ॥ ९१ ॥ (ट, ड)

क्रमेण यथा—

"सद्य करस्पर्शमवाप्य चित्र
रणे रणे यस्य कृपाणलेखा।
तमालनीला शरदिन्दुपाण्डु-
यशश्चिलोकाभरण प्रसूते ॥"

अत्र कारणरूपासिलतायां "कारणगुणा हि कार्यगुणमारभन्ते" इति स्थिते विरुद्धाशुक्लयशस उत्पत्ति । (ठ)

सा स्त्रीति कातर्यस्य स्त्रीधर्मत्वात्। गमनाशक्तिरपि दौर्बल्यात्। विरोधालङ्कारबोधकतामस्या आह—**अस्या** इति। विरोधालङ्कारो भिन्नैकदेशता नियमेनाऽनुक्तत्वादुत्सर्ग । अस्याश्च भिन्नदेशतानियमेनोक्तत्वेनाऽपवादत्वादेतद्विषयपरिहारेणैकदेशस्थयोरेव विरोध इत्यर्थ ।

(वि, ट) चतुर्विध विषमालङ्कारमाह—**गुणौ क्रिये** वेति। हेतुकार्ययोर्गुणौ क्रिये वा यद् यदि विरुद्धे परस्परविपरीते स्यातां तदा एतौ द्वे च विषमे। तृतीयमाह—**यदारब्धस्येति**। वैफल्यमुद्देश्यफलाभाव, प्रत्युताऽनर्थस्योत्पत्तिरित्यर्थ । चतुर्थं विषममाह—**विरूपयोरिति**। विरूपत्वेन परस्परसम्बन्धायोग्यत्वेनोक्तयोर्य. सम्बन्ध प्रतीयत इत्यर्थ । एतच्च कद्वयप्रयोगे बोध्यम्।

(वि, ठ) तत्र कार्यकारणयोर्गुणविरोधमाह—**सद्य** इति । तमालवन्नीला कृपाणलेखा लेखाकार कृपाणो खड्गो रणे रणे यस्य राज्ञ करस्पर्शमवाप्य शरदिन्दुवत्पाण्डु यश सद्य प्रसूते इद चित्रम्। त्रिलोकेति यशोविशेषणम्। अत्र कारणासिलताकार्ययशसो नीलत्वपाण्डुत्वे विपरीते इत्याह—**अत्रेति** । गुणस्य विरुद्धा इत्यन्वय । **शुक्लयशस उत्पत्तिरिति**। उत्पद्यमानयश शुक्लमिति पर्यवसि-

---

(लो, ड) विरूपयोरन्यरूपयो स घटनायोग ।

वचनत्व युज्यते। सा स्त्री वय कातरा, तदप्राप्ते । अथ च स्त्रीषु एव कातरत्वमुचितम्। सा पीन चोन्नतिमत् च स्तनयुगल बिभर्ति वय तु सखेदा, तदप्राप्ते । अथ च यस्यैव भारो गुरुर्भवति स एव सखेदो दृश्यते। सा गुरुणा महता जघनस्थलेन नितम्बभरेण आक्रान्ता वय गन्तु न शक्ता । अथ च य एव गुरुणा भारेणाक्रान्तो भवति स एव गन्तु न शक्नोति। अन्यजनाश्रितै अन्यजनावलम्बिभिर्दोर्यैर्वयमपटव असमर्था जाता स्म इत्यद्भुतम्।

1 'वैकल्यम्' (क पु.)

"आनन्दममन्दामिमं कुवलयदललोचने ददासि त्वम्।
विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥"

अत्रानन्दजनकस्त्रीरूपकारणात्तापजनकविरहोत्पत्तिः। (ङ)

"अयं रत्नाकरोऽम्भोधिरित्यसेवि धनाशया।
धनं दूरेऽस्तु वदनमपूरि क्षारवारिभिः ॥" (ढ)

अत्र केवलं काङ्क्षितधनलाभो नाभूत् प्रत्युत क्षारवारिभिर्वदनपूरणम्।

"क्व वनं तरुवल्कभूषणं
नृपलक्ष्मीः क्व महेन्द्रवन्दिता।
नियतं प्रतिकूलवर्तिनो
बत धातुश्चरितं सुदुःसहम् ॥"

अत्र वनराजिश्रियोर्विरूपयोः सङ्घटना। इदं मम। (ण) *

तार्थः। ननु विरुद्धत्वे किं वैचित्र्यमित्यत आह—कारणगुणा इति। स्थितेरिति नियमादित्यर्थः। तथा च विरुद्धयोर्विरोधप्रदर्शनं वैचित्र्यमित्यर्थः। यद्यप्ययं नियमः समवायिकारणकार्ययोरेव तथापि तद्दर्शनात्क्वचिन्ना अन्यत्रापि तन्नियममभ्युपेत्येदं वर्णितम्।

(चि, ङ) कारणकार्ययोर्विरोधमाह—आनन्दममन्दामिति। कुवलयेत्यादिकं सम्बोधनम्। अत्रेति। तापजनकविरहोत्पत्तिः स्वोत्पादविरहजन्यतापक्रियोत्पत्तिरिति पर्यवसितार्थः। तथा च स्त्रीतज्जन्यविरहयोः कारणकार्ययोरानन्ददानतापक्रिये च विरुद्धे इत्यर्थः। एतज्जन्यस्य तत्क्रियासमानक्रियाया एव वैचित्र्यं सम्भाव्य वर्णितम्।

(चि, ढ) आरब्धकार्यवैफल्यानर्थोत्पत्तिद्वयमुदाहरति—अयमिति। अयमम्भोधिः रत्नाकर इति कृत्वा मया धनाशया असेवि सेवित। धनं दूरेऽस्तु प्राप्यविषयोऽस्तु। क्षारवारिभिस्तु वदनमपूरि इत्यर्थः।

(चि, ण) विरूपयोर्घटनामाह—क्व वनमिति। रामं शोचन्त्याः कौशल्याया उक्तिरियम्। तरुवल्कलमेव भूषणं यत्र तादृशं वनं क्व नृपेत्यादिकं क्व। परस्परासम्बन्धायोग्यतया कक्षयेनोक्तयोरनयोरेकत्र रामे घटना। एवं 'क्व सूर्यप्रभव' इत्यादावपि बोध्यम्।

(लो, ई) तदिति। विषमालङ्काराणामेषां सूत्रोक्तप्रकारणामुपलक्षणतया सम्ब-

---

* तरो. वल्क वल्कल भूषणं यस्मिन् तादृशं वनं क्व ? महेन्द्रेण नन्दिता इन्द्रेणापि पूजिता नृपलक्ष्मी. क्व ? अनयोरत्यन्तवैषम्यादेकत्र सम्बन्धो न युक्त. । बत खेद। प्रतिकूलवर्तिनो धातुर्विधेर्यदेतितं सुदु.सहम्। विधातरि प्रतिकूले तत् सम्भवति।

यथा वा—

"विपुलेन सागरशयस्य कुक्षिणा
भुवनानि यस्य पपिरे युगक्षये।
मदविभ्रमासकलया पपे पुन-
स पुरस्त्रियैकतमयैकया दृशा ॥" (त, ई)

समं स्यादानुरूप्येण श्लाघा या योग्यवस्तुनोः ॥ ६२ ॥ (थ)

(वि, त) कद्वयाभावेऽप्याह—**विपुलेनेति**। सागरशयस्य विष्णोर्विपुलेन कुक्षिणा उदरेण युगक्षयकाले भुवनानि पापरे। स पुनर्विष्णु श्रीकृष्ण एकतमया पुरस्त्रिया कर्त्र्या मदविभ्रमेणाऽसकलया एकदेशरूपया एकया दृशा पपे इत्यर्थ.। अत्र भुवनपानसमर्थकुक्षिमत एकस्त्राकटाक्षेण पेयत्वयोगो विरुद्ध इत्यर्थ.। काव्यप्रकाशकृन्मते तु कद्वयेन विनैवात्र विरुद्धतयाऽप्रतीते केनाप्यनुक्रतया नेद चतुर्थविषमालङ्कारोदाहरणम्। अत कारणकार्ययो क्रियाविरोधरूपद्वितीयविषमोदाहरणतयैवाय श्लोकस्तेन दर्शित। कुक्षिस्तु अवयव कारणम्। कुक्षिमानवयवी श्रीकृष्णस्तु कार्यम्। तयोर्भुवनपानस्त्रीकटाक्षपेयत्वक्रियो विरुद्धे। *

(वि, थ) समसज्ञकमलङ्कारमाह—**समामिति**। योग्ययो. परस्परोचितयो वस्तुनोरानुरूप्येणोचित्येन या श्लाघा सा समनामालङ्कार इत्यर्थ।

न्धिनोरननुरूपतया लक्ष्यानुसारेणान्येऽपि प्रकारा उदाहर्तव्या इत्यर्थ। तत्र दिङ्मानमुदाहृत्य दर्शयति—**विपुलेनेति**। असकलया असमग्रपातिन्या।

(लो, उ) अत्रावयवावयविनोर्वैषम्यम्। *क्वचित् सजातीययो* —

("असितभेकसुराशितमप्यभू-
न्न पुनरेष पुनर्विषद विषम्।
अपि निपीय सुरैर्जनितक्षय
स्वयमुदेति पुनर्नवमार्णवम्॥")

अत्र व्यतिरेकयोगेऽपि द्वयो सङ्करो, नतु विषमालङ्कारभाव।

---

* 'जगत्पानकर्तुरवयवस्य कुक्षिण असकलस्त्रीदृष्टिपीतेनाऽवयविना श्रीकृष्णेन अवयवावयविभाव सम्बन्धोऽनुपपद्यमान इति प्रथमप्रकारोऽत्र विषम' इति (प्रदीप) काव्यप्रकाशे प्रथमप्रकारविषमस्तु विरुद्धयो सघटनम्। यस्य कुक्षिरेव सकलभुवनपानसमर्था तस्य सम्पूर्णस्यावयविन स्त्रिया एकदृशा पान चापर विषमम् (उद्योत) स्वमतानुसारेणैव विज्ञप्रियाया काव्यप्रकाशस्योद्धार कृत। पर काव्यप्रकाशे तादृगर्थो न विद्यते।

यथा—

"शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्यावतीर्णा ।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥" (द, ऊ)

विचित्रं तद्विरुद्धस्य कृतिरिष्टफलाय चेत् ॥ ६३ ॥ *

यथा—

"प्रणमत्युन्नतिहेतोर्जीवनहेतोर्विमुञ्चति प्राणान् ।
दुःखीयति सुखहेतोः को मूढः सेवकादन्यः ॥" (ध, ऋ)

आश्रयाश्रयिणोरेकस्याधिक्येऽधिकमुच्यते ॥ ६४ ॥ (ऋ)

(वि, द) शशिनमित्यादि । अजे इन्दुमत्या स्वयंवृते पौरेण श्लाघोक्तिरियम् । समगुणयोर्योगेन प्रीतिर्येषां तादृशाः पौरा इत्येकवाक्यमेकस्य जनस्य प्रायमिकं वाक्यं विवव्रुः । तदर्थकशब्दान्तरैर्विवृतवन्त इत्यर्थः । शशिनमित्यादेकस्य वाक्यम् । शशिजलनिधित्वेन अजः । कौमुदीजह्नुकन्यात्वेनेन्दुमती । पृथक्सिद्धस्यैव प्राप्तिः । कौमुदी तु शशिनो न पृथक् सिद्धा, अत पृथक्सिद्धसम्पादनाय मेघमुक्तत्वविशेषणम् । मेघेन पृथक्कृतायास्तदपगमे प्राप्तेरित्यर्थः ।

(वि, ध) प्रणमतीति । प्रणामो हि नम्रीभावः स उन्नतिविपरीतः । प्राणान् विमुञ्चति, युद्धे इति शेषः । यद्यपि प्राणविमोक्षो न जीवितस्य हेतुस्तथापि प्राणविमोक्षक्रियापरमत्र विमुञ्चतिपदम् । दुःखीयति दुःखमिच्छति, दुःखजनकक्रियाप्रवृत्तत्वात् ।

(लो, ऊ) विषमाद् वैपरीत्येन समस्य लक्षणम् । वस्तुनोर्दर्शनयोः । जह्नुकन्या गङ्गा ।

(लो, ऋ) इष्टफलस्य प्रकृतोदाहरणादौ उन्नत्यादेः प्राप्त्यर्थं तद्विरुद्धस्य प्रणामादेः करणं विचित्रालङ्कारबीजफलम् ।

(लो, ॠ) आधिक्य क्वचिदाश्रयाश्रयिणोर्महत्त्वमिति द्विविधोऽधिकाख्यालङ्कारः इत्यर्थः । यत् पुनः कैश्चिदुक्तं वस्तुतः तुल्येऽपि यदेकस्याधिक्यं तदधिकमुच्यते इति तन्न ।

---

* "यस्य हेतोर्यत् फलं (कार्यं) तस्य (हेतोः) यदा तत् (कार्यं) विपरीतं भवति तदा तत् विपरीतफलनिष्पत्त्यर्थं कस्यचित् प्रयत्नो विचित्रालङ्कारः ।"
(अल स०)

विषमे विरूपस्य कार्यस्य स्वयमेवोत्पत्तेः । इह च तन्निष्पत्तये प्रयत्न इत्यनयोर्भेदः । "विषमे पुरुषकृतेरनपेक्षणात् । कार्यकारणगुणवैलक्षण्येन तद् भेदनिरूपणाच्च" । (रस० ।)

आश्रयाधिक्ये यथा—

"किमधिकमस्य ब्रमो महिमानं वारिधेर्हरिर्यत्र ।
अज्ञात एव शेते कुक्षौ निक्षिप्य भुवनानि ॥" (न)

आश्रिताधिक्ये यथा—

"युगान्तकालप्रतिसंहृतात्मनो
जगन्ति यस्या सविकाशमासत ।
तनौ मुमुस्तत्र न कैटभद्विष-
स्तपोधनाभ्यागमसम्भवा मुदः ॥ (प)

अन्योन्यमुभयोरेकक्रियायाः करणं मिथः ॥ ६५ ॥

यथा—

"त्वया सा शोभते तन्वी तया त्वमपि शोभसे ।
रजन्या शोभते चन्द्रश्चन्द्रेणापि निशीथिनी ॥" (फ)

यदाधेयमनाधारमेकज्ञानैकगोचरम् ।

(वि, न) अधिकसंज्ञकमलङ्कारमाह—**आश्रयेति** । आधिक्यम् अधिकतया वर्णनमित्यर्थः । **किमधिकमिति** । भुवनानि कुक्षौ निक्षिप्य हरिर्यत्राज्ञात एव शेते । जलनिधेः किञ्चिदवच्छेदेनैव शयनाज्जलनिधिद्रष्टृभिरज्ञात एव शेत इत्यर्थः । अस्य जलनिधेर्महिमानं किमधिकं वदाम इत्यर्थः । अत्र कुक्षिनिक्षिप्तभुवनस्यापि हरेस्तु किञ्चिदवच्छेदेनैव शयनादाश्रयस्य जलनिधेराधिक्यं वर्णितम् ।

(वि, प) आश्रिताधिक्यवर्णनमाह—**युगान्तेति** । नारदागमने श्रीकृष्णस्य हर्षाधिक्यवर्णनमिदम् । युगान्तकाले प्रतिसंहृता स्वकुक्षौ प्रवेशिता आत्मानः प्राणिनो येन तादृशस्य कैटभद्विषो विष्णोर्यस्या तनौ जगन्ति सविकाशमयन्त्रणमासत तत्र तस्या तनौ तपोधनस्य नारदस्याभ्यागमसम्भवा मुदो न ममुः न स्थातुमवकाशं लेभिरे इत्यर्थः । तनुभेदेऽपि विष्णुतनुत्वेनैकत्वाध्यासादेकत्वं बोध्यम् । अत्राश्रितानां मुदामधिकत्वम् ।

(वि, फ) अन्योन्यसंज्ञकमलङ्कारमाह—**अन्योन्यमिति** । एका क्रिया एकजातीया क्रिया । उभयोर्मिथः करणमित्यर्थः । **त्वया सेति** । परार्द्धं दृष्टान्तालङ्कारोऽपि ।

("यौरत्र क्वचिदाश्रिता प्रवितता पातालमत्र क्वचित्
क्वाप्यत्रैव धराधराधरजला धारावलिर्वर्तते ।
स्फीतस्फीतमहो नभः कियदिदं यस्येत्थमेवविधै-
र्दूरे पूरणमस्तु शून्यमिति यन्नामाऽपि नास्तं गतम् ॥")

इत्यादावव्याप्तेः । अत्र हि नभसो न तनुत्वम् । अस्य चालङ्कारस्याश्रयाश्रयिरूपविलक्षणाश्रयतयाऽपवादत्वेन विषमालङ्कारबाधकता ।

किञ्चित्प्रकुर्वतः कार्यमशक्यस्येतरस्य वा ।
कार्यस्य करणं दैवाद्विशेषस्त्रिविधस्ततः ॥ ९६ ॥ (व)

क्रमेण यथा—

"दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम् ।
रमयन्ति जगन्ति गिरः कथमिह कवयो न ते वन्द्याः ॥" (भ) *
"कानने सरिदुद्देशे गिरीणामपि कन्दरे ।
पश्यन्त्यन्तकसङ्काशं त्वामेकं रिपवः पुरा ॥" (म) +
"गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥" (य) ×
व्याघातः स तु केनाऽपि यद्वस्तु येन यथाकृतम् ।

(वि, व) त्रिविधं विशेषालङ्कारमाह—यदाधेयमिति । यदिति त्रिष्वन्वितम् । अनाधारमाधारं विना स्थितं वर्णितमित्यर्थः । अनेकगोचरमित्यत्र एकदेति शेषः, क्रमिकस्थितौ तु पर्यायालङ्कारस्य वक्ष्यमाणत्वात् । किञ्चित्प्रकुर्वतः कर्तुर्दैवादितरस्याऽशक्यस्य कार्यस्य करणं वा यदित्यर्थः ।

(वि, भ) दिवमिति । दिवमुपयातानामपि येषां कवीनामनल्पगुणगणा गिरः जगन्ति रमयन्ति ते कवयः कथमिह न वन्द्या इत्यर्थः । अत्र कर्तृतासम्बन्धेनाधारणा कवीनामसत्त्वेऽपि तदाधेयानां गिरां स्थितिः ।

(वि, म) कानन इति । काननादौ पलायिता रिपवस्त्वामेकं तत्तत्रैवान्तकसंकाशं पश्यन्तीत्यर्थः ।

अत्र दर्शनस्य न क्रमविवक्षा ।

(वि, य) गृहिणीति । मृतामिन्दुमतीं शोचतोऽजस्योक्तिरियम् । त्वां हरता करुणाविमुखेन मृत्युना मम किं न हृतं वद । किं किं हृतमित्यत्राह—गृहिणीत्यादि । ललिते कामकलाविधौ मिथो रहसि प्रियशिष्येत्यन्वयः । अनेन्दुमतीहर्तृमृत्योर्गृहिण्यादिहरणरूपस्य कार्यस्य दैवात्करण वर्णितम् ।

(वि, र) व्याघातालङ्कारमाह—व्याघात इति । केनापि कर्त्रा यद् वस्तु येनो-

---

* दिवं स्वर्गम् उपयाताना गतानामपि येषा कवीनामनल्पा बहुला गुणगणा यासु तादृशा गिरः काव्यरूपा वाण्यः आकल्पं कल्पपर्यन्तं जगन्ति भुवनं रमयन्ति ते कवय इह संसारे कथं न वन्द्या । कवयस्तावदाधाराः, गिर आधेयाः ।

+ अनेकस्य युगपदनेकत्र काननादौ स्थितेर्वर्णनादयं विशेषालङ्कारः ।

× अत्र इन्दुमतीहरणरूपमेकं कार्यं कुर्वता मृत्युना तेनैव यत्नेन अशक्यस्य सचिवादिहरणरूपस्य कार्यान्तरस्य करणात् तृतीयो विशेषालङ्कारः ।

तेनैव चेदुपायेन कुरुतेऽन्यस्तदन्यथा ॥ ६७ ॥

यथा—दृशा दग्धं मनसिजमित्यादि । (२)

सौकर्येण च कार्यस्य विरुद्धं क्रियते यदि ॥ ६८ ॥

व्याघात इत्येव । (ल)

"इहैव त्वं तिष्ठ द्रुतमहमहोभिः कतिपयैः
समागन्ता कान्ते मृदुरसि न चायाससहना ।
मृदुत्वं मे हेतुः सुभग ! भवता गन्तुमधिकं
न मृद्वी सोढा यद्विरहकृतमायासमसमम् ॥"

अत्र नायकेन नायिकाया मृदुत्वं सहागमनहेतुत्वेनोक्तम् । नायिकया च प्रत्युत सहगमने ततोऽपि सौकर्येण हेतुतयोपन्यस्तम् । (व, लृ)

पायेन यथाकृतं तेनैवोपायेनाऽन्यश्चेत्तदन्यथा कुरुते तदा तदन्यथाकरणं स व्याघात इत्यर्थः ।

"दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः ॥"

इत्युदाहरणम् । दृशा हरस्य याः कटाक्षरूपया दृशा जीवयन्तीत्यर्थः । नारीकटाक्षेण कामोद्दीपनात् । न केवलं क्रियया जय', किन्तु रूपेणापीत्याह—**विरूपाक्षस्येति** । जेतव्यस्याऽक्षिवैरूप्यम् । जेत्रीणामक्षिषु मनोज्ञत्वरूपं वामत्वमित्येव तत्रापि जय इति भावः । अत्र येन दृगुपायेन दाहस्तेनैव दृगुपायेन जीवनरूपं दाहान्यथाकरणं स्त्रीभिः ।

(वि, ल) अन्यविध व्याघातालङ्कारमाह—**सौकर्येण चेति** । चकारो व्याघातान्तरसमुच्चये । अन्योक्तकार्यस्य विरुद्ध कार्यमन्येन यदि तदुक्तकारणस्य सौकर्येण विशिष्टं क्रियते प्रतिपाद्यते इत्यर्थः। चकारेण व्याघातमनुवर्त्तयति—**व्याघात इत्येवेति** ।

(वि, व) इहैवेति । विदेशं जिगमिषुणा पत्या सह जिगमिषुं पत्नीं प्रति नायकस्योक्तिः पूर्वार्द्धम् । त्वमिहैव तिष्ठ न मया सह गच्छ । अहं कतिपयैरहोभिर्द्रुतं समागन्ता समागमिष्यामि, भविष्यदर्थे तृन् । यतो मृदुरसि । नच गमनायासहनाऽसीत्यर्थः । पत्न्या उक्तिः परार्द्धे—हे सुभग ! भवता सह गन्तुं सहगमने एव मम मृदुत्वं हेतुः । यद् यस्मान् मृद्वी असमं विरहायास न सोढा न सहिष्यते । अत्रापि तृन् । अत्र नायकोक्तकार्यस्य नायिकया विरुद्धप्रतिपादनं ग्राहयति—**अत्रेति** । **सहा-**

(लो, लृ) इह तु विधिनिष्पादयितुं सम्भाव्यमानस्य कारणस्य तद्विरुद्धनिष्पादकत्वेन समर्थनम् ।

इहैव त्वमित्युदाहरणे नहि मृदुत्वस्य नायकसहगमनस्य कार्यत्वं प्रतीयते किन्तु सहगमनस्य निर्वाहः । विषमालङ्कारे तु 'अय रत्नाकर' इत्यादौ धनलाभरूपस्यार्थानु-

परंपरं प्रति यदा पूर्वपूर्वस्य हेतुता
तदा कारणमाला स्यात्॥ ९९ ॥ (ए)

यथा—

"श्रुत कृतधिया सङ्गाज्जायते विनय श्रुतात्।
लोकानुरागो विनयान्न किं लोकानुरागत ॥" *

तन्मालादीपकं पुन.।

धर्मिणामेकधर्मेण सम्बन्धो यद्यथोत्तरम्॥ १०० ॥ (ऐ) +

यथा—

"त्वयि सगरसप्राप्ते धनुषाऽऽसादिता. शरा।
शरैररिशिरस्तेन भूस्तया त्व त्वया यश ॥" ×

अत्रासादनक्रियाधर्म। (श)

पूर्वं पूर्वं प्रति विशेषणत्वेन परं परम्।

गमनहेतुत्वेनेति। स्थितिहेतु सहागमनहेतुत्वेनेत्यर्थ। सोकर्येणेति। सहगमनमेव स्थितिहेतुत्वेनोक्तस्य मृदुत्वस्य सुकर, स्थितिस्तु मृदुत्वस्य दुष्करेत्यर्थ। स्थितौ मृदुत्वेन विरहासहत्वजननात्।

(वि, श) कारणमालालङ्कारमाह—परंपरमिति। सोदाहरण स्पष्टम्। मालादीपकालङ्कारमाह—तन्मालेति। इदमपि सोदाहरण स्पष्टम्।

एकावल्यलङ्कारमाह—पूर्वं पूर्वमिति। पूर्वत्र पूर्वत्र यद्विशेषण तस्य तस्य

त्पत्ति, अनर्थस्य चोत्पत्तिरिति भाव। एव विरोधमूलालङ्कारान् निर्णीय शृङ्खलाबन्धेन विचित्रता अलङ्कारा लक्ष्यन्ते।

(लो, ए) परमिति। कारणमालाख्यमलङ्करणम्।

(लो, ऐ) यथोत्तरमुत्तरोत्तर गुणावहत्वेनेत्यर्थ।

---

* यदा पर पर प्रति पूर्वपूर्वस्य कारणता तदा कारणमाला। कृतधिया, पण्डिताना, श्रुत शास्त्रम्। अत्र पण्डितसङ्गस्य शास्त्रज्ञान प्रति कारणम्। विनय प्रति शास्त्रज्ञान कारणमित्यादि। 'इह यद्यादौ कारणोक्तिरेव प्रस्तूयते तदा पुनस्तस्य कारण तस्यापि कारणमिति तत्कस्यचित् कारण तदपि कस्यचिदिति वा कारणमाला मुक्ता।' (रसगङ्गाधरे)

+ गुणावहत्वेन उत्कर्षाय यदि धर्मिणामेकधर्माभिसम्बन्धस्तदा मालादीपकम्। पूर्ववस्तुना यदि उत्तरमुत्तर वस्तु प्रकृतोत्कर्षायोन्मुखीक्रियते तदा मालादीपकम्।

× अत्र धनुषा अरिशिर प्रापयता शरा उपकियन्ते। शरैरपि भुव प्रापयद्भिररिशिर उपकियते। शिरसापि त्वा प्रापयता भू उपकियते इत्यादि। अत्र पूर्वपूर्वेभ्य परपरस्योपकार। एकस्या आसादनक्रियाया सर्वत्र सम्बन्धाद् दीपकता।

स्थाप्यतेऽपोह्यते वा चेत्स्यात्तदैकावली द्विधा ॥ १०१ ॥ (घ) *

क्रमेणोदाहरणम् ।

"सरो विकसिताम्भोजमम्भोज भृङ्गसङ्गतम् ।
भृङ्गा यत्र ससगीता सङ्गीत सस्मरोदयम् ॥" +

"न तज्जल यत्र सुचारुपङ्कज
न पङ्कज तद् यदलीनषट्पदम् ।
न षट्पदोसौ न जुगुञ्ज य कल
न गुञ्जित तन्न जहार यन्मन ॥" (स, ओ) †

क्वचिद् विशेष्यमपि यथोत्तर विशेषणतया स्थापितमपोहितञ्च ।

"वाप्यो भवन्ति विमला स्फुटन्ति कमलानि वापीषु ।
कमलेषु पतन्त्यलय करोति सगीतमलिषु पदम् ।"

एवमपोहनेपि । (ङ)

विशेषणतया यदि पर पर स्थाप्यते, अपोह्यते वा तद्विशेषणाभावप्रतियोगितया निर्दिश्यते वेत्यर्थ । तेन पूर्वं पूर्वं विशेषण यदुत्तरोत्तरस्य उत्तरोत्तराभावस्य वा विशेष्य भवतीत्यर्थ ।

(वि, स) **सरो विकसिते**ति । अत्र सरोनराने यानि विकसिताम्भोजादीनि तदेकदेशानामम्भोजादीना विशेषणानि परपराणि । अपोह तु आह—**न तज्जलमि**ति । सुचारुपङ्कज यत्रेति बहुव्रीहि । एवमलीनेत्यादावपि । अत्र जलविशेषणीभूतानामभावाना प्रतियोगितया सुचारुपङ्कजत्वादीनि निर्दिश्यन्ते ।

(वि, ङ) अनयो पूर्वपूर्वोक्तविशेषणाना परत्र परत्र विशेषणे विशेष्यतापोहश्च दर्शित इत्याह—**क्वचिद् विशेष्यमपी**ति । **वाप्यो भवन्ती**ति । अत्रापि शरदीति बोध्यम् । **करोती**ति । सङ्गीत कर्तृ, अलिषु पद सुसम्बन्धरूपतया व्यवसाय करोतीत्यर्थ । अत्र विमलत्वादौ विशेष्यभूता वाप्यादय स्फुटत्कमलादौ भेदेन

(लो, ओ) अम्भाज सरसो, भृङ्गा अम्भोजस्य, सगीतानि भृङ्गाणां विशेषणत्वेन । न तज्जलमित्यादौ जलस्य सुचारुपङ्कज निषेधत्वेन निबद्धम् । एवमन्यत्र ।

---

* स्थाप्यते विधीयते, अपोह्यते निषिध्यते ।

+ विकसितानि अम्भोजानि पद्मानि यस्मिन् तत् । भृङ्गैर्भ्रमरै सङ्गत युक्तम् । स्मरस्य उदय , तेन सहित सस्मरोदयम् ।

† यत् सुचारुपङ्कज न तद् जलम् । प्रशस्तजल न । तत्पङ्कज न यद् अलीना आश्रिता षट्पदा भ्रमरा यत्र तादृश न, य कल मधुर न जुगुप्स तद् गुञ्जित न, यन्मन न जहार । अत्र जले पङ्कजस्य, तत्र षट्पदाना, तत्र गुञ्जितस्य । तत्र मनोहारिताया विशेषणतया निषेध ।

उत्तरोत्तरमुत्कर्षो वस्तुन. सार उच्यते ॥ १०२ ॥ (औ)

यथा—

"राज्ये सार वसुधा वसुधायामपि पुर पुरे सौधम् ।
सौधे तल्प तल्पे वराङ्गनानङ्गसर्वस्वम् ॥" (क) †

यथासंख्यमनूद्देश उद्दिष्टानां क्रमेण यत् ॥ १०३ ॥ (ख, ग)

यथा—

"उन्मीलन्ति नखैर्लुनीहि वहति चेलाञ्चलेनावृणु
क्रीडाकाननमाविशन्ति वलयक्वाणं समुत्रासय ।

विशेषणानि । एवमपोद्धनेर्पीति । यथा—"न ता वाप्य स्फुटन्ति यासु पद्मानि सम्प्रति । नच पद्मान्यन्यत्र न यत्र चालयोऽपतन् ॥"(१) इत्यादिके तद्बोध्यम् ।

(वि, क) सारालङ्कारमाह—**उत्तरोत्तरमिति** । **राज्ये सारमिति** । नपुसकलिङ्गस्य सारपदस्य जहदजहल्लिङ्गद्वयमपीत्यतोऽत्राजहल्लिङ्गता । तत् किं त्रिभुवनसारा बालाऽऽराधिता भवतेत्यत्र तु जहल्लिङ्गता । **वराङ्गनानङ्गेति**— अनङ्गसर्वस्वभूता वराङ्गनेत्यर्थ । नन्वत्र राज्ये इत्यादौ यद्यधिकरणसप्तमी तदा राजाद्यपेक्षया सारत्वाऽप्रतीत्या निष्प्रयोजकसारत्वानुपपत्ति । राज्यवसुधयो सौधतल्पयोस्तल्पवराङ्गनयोश्च सामान्यविशेषभावाभावेन निर्धारणाऽनुपपत्ति, पुरुषेषु क्षत्रिय शूर इत्यादिषु सामान्यविशेषभावसत्त्वे एव निर्धारणात् । उच्यते— राज्य राजत्वविषये यद् यद् वस्तु तेषु वसुधा सारम् । वसुधाया यद् यद् वस्तु तेषु पुर सारमित्यादिरीत्या यद् यद् वस्तु तेष्वित्यध्याहारेण निर्धारणात् तेषु इत्यत्र निर्धारणसप्तमी । राज्ये इत्यत्र विषयसप्तमी, वसुधायामित्यादिष्वधिकरणसप्तमी ।

(वि, ख) यथासख्यालङ्कारमाह—**यथासख्यमिति** । प्रथमोद्दिष्टाना य थमद्वितीयादिक्रमस्तेन क्रमेण तदन्वितानामनु पश्चाद् उद्देश इत्यर्थ ।

(वि, ग) **उन्मीलन्तीति** । नायके नायिकाविरहकालीनान् तत्सखीनां सा ङ्केतिकव्यवहारान् कथयन्त्या कस्याश्चिदुक्तिरियम् । हे सुभग ! त्वदीयविरहे तस्या सखीनां तत्तत्क्रियया वञ्जुलादिनये सङ्केतिता मिथ इत्थ व्यवहारा इत्यर्थ । कीदृशा

(लो औ) सारो नामालङ्कार ।

(लो, अ) सम्प्रति वाक्यन्यायाश्रिता अलङ्कारा उच्यन्ते । यथासख्यनामा ऽलङ्करणम् । अनूद्देश अनु पश्चात् निर्देश । उद्दिष्टनामुन्मीलनादिक्रियाणां वञ्जु- लादिभि क्रमेण सम्बन्ध ।

† वेदेष्वयमलङ्कारो दृश्यते यथा—
'महत परमव्यक्तमव्यक्तात्पुरुष पर
पुरुषान्न पर किञ्चित् सा काष्ठा सा परा गति ॥"

इत्थं वञ्जुलदक्षिणानिलजुहूकण्ठेषु सांकेतिक-
व्याहाराः सुभग ! त्वदीयविरहे तस्याः ससीनां मियः॥"(ग)

क्वचिदेकमनेकस्मिन्नेकं चैकगं क्रमात् ।
भवति क्रियते वा चेत्तदा पर्याय इष्यते ॥ १०४ ॥ (घ)

क्रमेण यथा—

"स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
चिरेण नाभिं प्रथमोदबिन्दवः ॥" (ङ, आ)

"विचरन्ति विलासिन्यो यत्र श्रोणिभरालसाः ।
वृककाकशिवास्तत्र धावन्त्परिपुरे तव ॥" (च, इ)

व्यवहारा इत्यनाह । उन्मीलन्तीति । विभ्रान्तीत्यर्थः । इयमेकस्याः सख्याः प्रथमोक्तवञ्जुलपुष्पकर्तृके उन्मीलने सङ्केतिता प्राथमिकी उक्तिः । अपरसख्याश्च नखैरित्यादिका प्राथमिकी प्रत्युक्तिः । वहतीति द्वितीयोक्तदक्षिणानिलकर्तृके वहने सङ्केतिता इयं सख्या द्वितीयोक्तिः । अपरसख्याश्च चेलाञ्चलेनेत्यादि द्वितीया प्रत्युक्तिः । क्रीडेत्यादिना तृतीयोक्तजुहूकण्ठकर्तृके क्रीडाकाननप्रवेशे सङ्केतिता सख्यास्तृतीयोक्तिः, वलयेत्यादिका अपरसख्या तृतीयप्रत्युक्तिः । इयं प्रथमादिक्रमेणोक्तेन पश्चात् तत्क्रमेणैव तदन्वितानामुक्तिः ।

(वि, घ) पर्यायालङ्कारमाह—क्वचिदेकमिति । क्वचित् श्लोके एकमनेकस्मिन् क्रमात् भवेत् कारणक्रमात् क्रियते वा चेत् तथा अनेकमेकगमेकगामि वा क्रमात् भवति क्रियते वा चेत् तदा पर्याय इष्यते इत्यर्थः ।

(वि, ङ) तत्रैकस्या अनेकत्र भवनमाह—स्थिता इति । तपस्यन्त्याः पार्वत्याः अङ्गेषु नवमेघजलपतनक्रमवर्णनमिदम् । प्रथमोदबिन्दवः क्रमेण तस्या नाभिं प्रपेदिरे । तत्क्रममाह—स्थिता इति । पक्ष्मणा निबिडत्वेन तत्र क्षणं स्थिताः ततस्ते ताडिताधराः । अधरस्य कोमलत्वेन जलबिन्दुभिरपि ताडनम् । पयोधरोत्सेधः । कृद्विहितभावत्वेनोच्चौ पयोधरौ । तयोः कठिनत्वेन तत्र निपातेन ततः चूर्णिताः । तत्र वलीषु स्खलिताः तासामुच्चनीचत्वान्नाभेर्गभीरत्वेन तटो नान्यत्र गमनम् । अत्र स्वयंभवनम् ।

(वि, च) अनेकेषामेकत्र भवनं त्वाह—विचरन्तीति । यत्र तवारिपुरे इत्यन्वयः । अत्र विलासिनी वृकादीनामेकारिपुरे भवनम् ।

(लो, आ) स्थिताः क्षणमित्यादावेके प्रथमोदबिन्दवोऽनेकेषु पक्ष्मादिषु क्रमेणाभवन् ।

"विसृष्टरागादधरान्निवर्तितः
स्तनाङ्गरागादरुणाच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः
कृतोच्चसूत्रप्रणयी तया करः ॥" (घ, इ) *

"ययोरारोपितस्तारो हारस्तेरिवधूजनैः ।
निधीयन्ते तयोः स्थूलाः स्तनयोरश्रुबिन्दवः ॥" (ज, ई) +

एषु क्वचिदाधारः संहतरूपोऽसंहतरूपः । क्वचिदाधेयमपि । (उ)

यथा—

"स्थिताः क्षण"मित्यत्र उदबिन्दवः पद्मादावसंहतरूपे आधारे क्रमेण-

---

(वि, छ) एकस्यानेकत्र परेण क्रियमाणत्वमाह—**विसृष्टे**ति । पार्वत्यास्तपस्यारम्भवर्णनमिदम् । तया करोऽच्चसूत्रे प्रणयीकृतः, व्याप्तः । कुशाङ्कुरेत्यादि विशिष्टश्च कृत इत्यर्थः । तथा चात्र विधेयद्वयम् । चार्थस्तु गम्यः । कीदृशः—अधरान्निवर्तितः । यतो विसृष्टरागाद् अधरे रागदानार्थमेव प्राग्धरे करदानाद् कन्दुकक्रीडाभावाच्च ततो निवर्तनम् । स्तनाङ्गेत्यादिविशेषणं च स्वरूपकथनमात्रम् । स्तनेऽङ्गरागोपीदानीं च न दीयते इत्येतत्सूचनार्थं वा । अत्र तयोः क्रियमाणत्वम् ।

(वि, ज) अनेकस्यैकत्र क्रियमाणत्वमाह—**ययो**रिति । अत्र हाराश्रुबिन्दूनामनेकेषामेकत्र स्तने अरिवधूभिः ।

(वि, झ) एष्वाधाराऽऽधेयानां संहतत्वासंहतत्वे सम्भवतस्तद् भेदाभेदौ न विवक्षितः इत्यभिप्रायेण तद्दर्शयति—**एषु** इति । संहतरूपो मिलितानेकरूपोऽसंहतरूपोऽमिलितप्रत्येकरूपः । क्वचित् क्वचिदाधेयस्यापि एवं द्वैरूप्यमित्याह—**क्वचिदाधेयमपी**ति । अत्राधारस्यासंहतत्वं दर्शयति—**यथा स्थिताः क्षण**मित्यत्रेति । अत्राधेयानामुदबिन्दूनां तु संहतत्वरूपत्व नात्र विशेषकम् । येषामनेकत्वघटितोयमलङ्कारस्तेषामेव संहतत्वासंहतत्वयोर्विशेषकत्वाद् बिन्दूना त्वनेकाश्रयेषु एकस्यैव

एवं विलासिन्यो वृक्षादयश्चानेकविधा अरिपुरे ।

(लो, इ) विसृष्टेत्यादावेक करोऽधरादौ ।

(लो, ई) ययोरित्यादौ हारोऽश्रुबिन्दवश्च पयोधरे कृता ।

(लो, उ) संहतरूपो मिलितस्वरूप. । तद्विपरीत एकाकीभूतः ।

---

* विसृष्ट· राग. लाक्षादिरूपः यस्य तस्मात् । स्तनयोर्निहितः अङ्गरागोऽनुलेपनादिः तस्मात् । कुशाङ्कुराणामादानेन परिक्षता अङ्गुलयो यस्य तादृशः ।

+ तव अरिवधूजनैः शत्रुस्त्रीभि. ययोः स्तनयोः तार. शुद्धमुक्तासघटितः 'मुक्ताशुद्धौ तु तारः स्या'दित्यमर. । हारः आरोपित. तयोः स्तनयो· स्थूला अश्रुबिन्दवः निधीयन्ते स्थाप्यन्ते ।

ऽभवन्। "विचरन्ति" इत्यत्राधेयभूता वृकादयः संहतरूपारिपुरे क्रमेणाभवन्। एवमन्यत्र।(झ)

अत्र चैकस्यानेकत्र क्रमेणैव वृत्तेर्विशेषालङ्काराद्भेदः। विनिमयाभावात् परिवृत्ते।(ञ)

परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत्॥ १०५॥" (ट)*

क्रमेणोदाहरणम्—

"दत्त्वा कटाक्षमेणाक्षी जग्राह हृदयं मम।
मया तु हृदय दत्त्वा गृहीतो मदनज्वरः॥" (ठ)+

अत्र प्रथमेऽर्धे समेन, द्वितीये न्यूनेन।

"तस्य च प्रवयसो जटायुषः स्वर्गिणः किमिव शोच्यतेऽधुना।
येन जर्जरकलेवरव्ययात् क्रीतमिन्दुकिरणोज्ज्वलं यशः॥(ड)×

घटितत्वात्। आधाराणां संहतत्वं यथा "स्वयंवरे सा मिलितेषु राजसु क्रमेण चक्षुर्निदधे पतिंवरा" इति। आधेयानामसंहतत्वं तु।

"पूर्वं पूर्वं यदा त्याक्षीन्नृपकन्या पतिंवरा।
परः परस्तदा तस्या विशेषादाकुलो नृपः॥"

इत्यत्र बोध्यम्। एकत्राधारेऽनेकेषामाधेयानां संहतत्वं दर्शयति—**विचरन्तीति**। वृकादयः संहतरूपा इति बहुवचनेन मिलनबोधनात् क्रमस्तु विलासिनीचरणापेक्षया। **एवमन्यत्रेति**। ययोरारोपित इत्यत्रापि अथवा बिन्दवोऽनेकसंहतरूपा।

(वि, झ) ननु क्वचिदेकमनेकस्मिन्नित्युक्तरूपस्य पर्यायस्यैकं चानेकगोचरमित्युक्तरूपाद् विशेषालङ्कारात् को विशेष इत्यत आह—**अत्र चेति**। क्रमयुगपदवृत्तिभ्यां द्वयोर्भेद इत्यर्थः। वक्ष्यमाणपरिवृत्त्यलङ्कारतो विशेषमाह—**विनिमयाभावाच्चेति**। परस्परधर्मस्य परस्परेण ग्रहणरूपो विनिमयः परिवृत्तावेव। अत्र त्वनेकाश्रयगतमेवैकं, ननु तादृशाश्रयधर्मसामान्येन ग्रहणमित्यर्थः।

(वि, ट) परिवृत्त्यलङ्कारमाह—**परिवृत्तिरिति**। समाभ्यां न्यूनाधिकाभ्यां च विनिमय इत्यर्थः। न्यूनाधिकविनिमयश्च न्यून दत्त्वाऽधिकग्रहणमधिकं दत्त्वा न्यूनग्रहणमिति द्विधा।

(वि, ठ) तत्र समाभ्यामधिक दत्त्वा न्यूनग्रहणाच्च विनिमये एकमुदाहरणमाह—**दत्त्वा कटाक्षमिति**। स्पष्टम्।

(वि, ड) न्यूनं दत्त्वा अधिकग्रहणमाह—**तस्य चेति**। रामस्योक्तिरियम्। प्रवयसोऽतिवृद्धस्य।

---

* किंचिद् दत्त्वा कस्यचिदादान विनिमय।

+ अत्र मदनज्वरस्य पीडाकरत्वान्न्यूनत्वम्।

× प्रवयसः वृद्धस्य, स्वर्गिणः स्वर्गं गतस्य तस्य जटायुषः अधुना किमिव

अत्राधिक्येन—

प्रश्नादप्रश्नतो वापि कथिताद् वस्तुनो भवेत् ।
तादृगन्यव्यपोहश्चेच्छाब्द आर्थोऽथवा तदा ॥
परिसंख्या ॥ १०६ ॥ (ढ) *

"मेणोदाहरणम्—

"किं भूषणं सुहृदमत्र यशो न रत्नं
किं कार्यमार्यचरितं सुकृतं न दोषः ।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं
जानाति कस्त्वदपरः[1] सदसद्विवेकम् ॥"

शोच्यते । नैव किमपि शोचनीयम् । येन जर्जरस्य जराजीर्णस्य कलेवरस्य शरीरस्य व्ययाद् इन्दुकिरणोज्ज्वलं चन्द्रकिरणवत् शुभ्रं यशः कीर्तम् । अत्र जर्जरस्य शरीरस्य दानेन उज्ज्वलस्य यशसः क्रयः । अतोऽत्र आधिक्यम् ।

(ढि, ढ) चतुर्विधं परिसंख्यालङ्कारमाह—**प्रश्नादप्रश्नतो वापीति** । प्रश्नवशात् तदभावाद्वा कथितं यद् यद् प्रष्टव्यस्य विशेषणस्य विशेष्यभूतं वस्तु परेण कथितात् तस्माद् हेतो कथितसदृशस्यान्यस्य प्रष्टव्यविशेषणान्वयव्यवच्छेदः शाब्द आर्थो वा प्रतीयते चेत्तदा स व्यवच्छेद. परिसंख्यालङ्कार इत्यर्थ. ।

(ढि, ण) अत्र प्रश्नपूर्वकथिताच्छाब्दं व्यवच्छेदमाहुः—**किं भूषणमिति** । अत्र लोके किं सुहृदं भूषणमिति प्रश्न , यश इत्युत्तरम् । **न रत्नमिति** । उपादेयत्वेन यश सदृशस्यान्यस्य रत्नस्य प्रष्टव्यविशेषणभूतभूषणत्वान्वयव्यवच्छेद. । एव सर्वत्र बोध्यम् । आर्यैर्वशिष्ठादिभिश्चरितमाचरित किं वस्तु कार्यमिति प्रश्न । सुकृतमित्यु-

---

* यदि कथिताद् वस्तुनः तादृगन्यस्य स्वतुल्यस्य वस्तुनो व्यपोह व्यवच्छेदः निराकरण भवति तदा परिसंख्यालङ्कारः । तत्कथनं तु द्विविधम् । प्रश्नपूर्वकमप्रश्नपूर्वकं च । व्यपोहोऽपि द्विविध.—शाब्द आर्थश्च । शाब्दो नञादिशब्देन प्रतिपाद्यः । आर्थ· अर्थपर्यालोचनया गम्य. । 'अत्र च नियमपरिसंख्ययोर्वाक्यवित् प्रसिद्धं लक्षणं नादरणीयमिति ख्यापनाय नियमनं परिसंख्येति सामानाधिकरण्येनोक्ति । अत एव पाक्षिक्यपि प्राप्तिरत्र स्वीक्रियते इति युगपत् सम्भावन भाषिकम् । 'कस्यचित् परिवर्जनेन कुत्रचित् सत्त्वान वर्णनीयत्वेन गणनं परिसंख्या' (अल० स०) । वाक्यविदप्रसिद्ध लक्षणं तु—

'विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति कीर्त्यते ॥'

1 ०स्तदपर. (घपुस्तके) ।

अत्र व्यवच्छेद्यं रत्नादि शाब्दम्। (ग)

"किमाराध्यं सदा पुण्यं कश्च सेव्यः सदागमः।
को ध्येयो भगवान् विष्णुः किं काम्यं परमं पदम्॥"

अत्र व्यवच्छेद्यं पापाद्यर्थम्। अनयोः प्रश्नपूर्वकत्वम्। (ङ)

अप्रश्नपूर्वकत्वे यथा—

"भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे।
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम्॥" (च)

"बलमार्तभयोपशान्तये
विदुषां सम्मतये बहु श्रुतम्।
वसु तस्य न केवलं प्रभो-
र्गुणवत्तापि परप्रयोजनम्॥"

श्लेषमूलत्वे चास्य वैचित्र्यविशेषो यथा—

"यस्मिंश्च राजनि जितजगति पालयति महीं चित्रकर्मसु वर्णसङ्कराश्लेषेषु गुणच्छेदाः" इत्यादि। (छ)

त्तरम्। तदीयचाण्डालीगमनरूपदोषस्य तदा चरणीयत्वेन सुकृतसदृशस्य व्यवच्छेदो न दोष इति शाब्दः। एवमुत्तरत्र। अप्रतिहतं चक्षुः किं, धिषणा बुद्धिः, न नेत्रम्। जानातीति त्वदपर इति पाठे प्रत्युत्तरपरितुष्टस्य प्रष्टुरुत्तरकर्तृजनप्रशंसावाक्यमिदम्। तदपर इति पाठे धिषणापर इत्यर्थः। **अत्र व्यवच्छेद्यमिति**। व्यवच्छेद इत्यर्थः। सूत्रे व्यवच्छेदस्यैव शाब्दतया उक्तत्वान्नतु व्यवच्छेद्यस्य। एवमुत्तरत्रापि।

(वि, त) अन्यव्यपोहस्यार्थत्वं दर्शयति—**किमाराध्यमिति**। यद्यपि आराध्यत्वमाराधनाविषयत्वमाराधना च देवताप्रीतिहेतुः क्रिया तथापि आराध्यत्वमत्र पुण्यप्रवृत्तिविषयत्वमित्यर्थः। तेन आराध्यमुपार्जनीयं पुण्यमिति उत्तरस्य नान्यदिति व्यवच्छेदः। सदागमः सतामागमः सत्सङ्गः, परमपदं मुक्तिः।

(वि, च) अप्रश्नपूर्वकत्वे व्यवच्छेदस्य शाब्दत्वे आह—**भक्तिर्भव** इति। युवतिरूपे कामास्त्रे। भक्तिरित्यादौ सर्वत्र प्रायो महतां परिदृश्यत इत्यस्यान्वयः।

(वि, छ) अप्रश्नपूर्वकत्वे व्यवच्छेदस्यार्थत्वं दर्शयति—**बलमिति**। बलं विक्रमः आर्तानां पीडितानां भयनाशाय, सम्मतये प्रीतये इत्यर्थः, श्रुतं विद्या। अतो न केवलं तस्य राज्ञो वसु धनमेव परप्रयोजनम्, परप्रयोजनस्यार्थिदारिद्र्यनाशरूपस्य जनकमपितु बलादिगुणवत्तापि तथेत्यर्थः। प्रयोजनजनके प्रयोजनपदमायुर्घृतमितिवत् सारोपलक्षणम्। अत्र न स्वार्थमिति व्यपोहप्रतीतिः। चित्रकर्मसु इत्यादि। अनयोर्वर्णगुणपदश्लेषे. न ब्राह्मणादिषु न प्रजासु इति व्यपोहप्रतीतिः।

दशमः परिच्छेदः

उत्तरं प्रश्नस्योत्तरादुन्नयो यदि ।
यच्चासकृदसम्भाव्यं सत्यपि प्रश्न उत्तरम् ॥ १०७ ॥ (ध, ऊ)

यथा मम—

"वीक्षितु न क्षमा श्वश्रूः स्वामी दूरतर गत ।
अहमेकाकिनी बाला तवेह वसति कुत ॥" (न)

अत्र पथिकस्य वसतियाचन प्रतीयते ।

"का विसमा देव्वगई किं लद्धव्व जणो गुणग्गाही ।
किं सोक्ख सुकलत्त किं दुग्गेज्झ खलो लोओ ॥" (प, ऋ)

अत्रान्यव्यपोहे तात्पर्याभावात् परिसख्यातो भेद । नचेदमनुमानम् । ज्ञाप्यसाधनयोर्द्वयोर्निर्देश एव तस्याङ्गीकारात् । नच काव्यलिङ्गम्, उत्तरस्य प्रश्न प्रत्यजनकत्वात् । (फ, ऋ) *

(वि, ध) द्विविधोत्तरालङ्कारमाह—**उत्तरमिति** । उन्नय उन्नयन व्यञ्जना । यच्चेति । असकृदित्यस्योभयत्रान्वय । सत्यप्यसकृत् प्रश्नेऽसम्भाव्य विलक्षणत्वेन सहसा अप्रतीयमानमसकृदुत्तरमित्यर्थ ।

(वि, न) **वीक्षितुमिति** । स्वय दूत्या उक्तिरियम् । वाच्यार्थ श्वश्रवा वीक्षणासामर्थ्यप्रदर्शन तव रन्धनभोजनस्थलेऽपि गमनासम्भावनाप्रदर्शनार्थम् । अत्र निषेधाभावादाक्षेपालङ्कारोऽपि बोध्य ।

(वि, प) द्वितीयमुत्तरमाह—**विषमेति** ।

'का विषमा दैवगति किं लब्धव्य जनो गुणग्राही ।
किं सौख्य, सुकलत्र, किं दुर्ग्राह्य खलो लोक ॥'

इति स० । दैवगत्यादिवैषम्यादीनां वैलक्षण्येन सहसार्थतोऽप्रतीयमानत्वात्तत्रैव प्रतीतिविश्रान्तेरिति भाव ।

(वि, फ) **प्रश्न प्रत्यजनकत्वादिति** । इद च ज्ञापकहेतो काव्यलिङ्गत्वाभावत्वकथन प्रागेवार्थान्तरन्यासविचारे स्मर्तव्यम् । पर प्रश्नज्ञापकत्वे उत्तरालङ्कारेण बाधनाच तत्र काव्यलिङ्गत्वावकाश ।

(लो, ऊ) उत्तरम् उत्तराख्यमलङ्करणम् । असकृदित्यनेन प्रश्नपूर्वस्यासम्भवोत्तरस्य सकृद् निर्देशे न चारुत्वम् ।

(लो, ऋ) केति ।

"का विषमा दैवगति किं लब्धव्य जनो गुणग्राही ।
किं सौख्य सुकलत्र किं दुर्ग्राह्य खलो लोक ॥"

(लो, ऋ) अन्यव्यपोहे तात्पर्याभावात्, किन्तु पूर्वजनाभिसम्बन्धस्य दैव

---

* दैवगत्यादेर्विषमत्वविधाने एव तात्पर्य नत्वितरनिषेध इति भाव ।

"दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते ॥" १०८ ॥ (ब)

'मूषिकेण दण्डो भक्षित' इत्यनेन तत्सहचरितमपूपभक्षणमर्थादायातं भवतीति नियतसमानन्यायादर्थान्तरमापतदीक्षेष न्यायो दण्डापूपिका। (भ, लृ)

अत्र च क्वचित्प्राकरणिकादर्थादप्राकरणिकस्यार्थस्यापतनं क्वचिदप्राकरणिकार्थात् प्राकरणिकार्थस्येति द्वौ भेदौ। क्रमेणोदाहरणम्।

"हारोयं हरिणाक्षीणां लुठति स्तनमण्डले।
मुक्तानामप्यवस्थेयं के वयं स्मरकिङ्कराः ॥" (म, ए)

(वि, ब) अर्थापत्त्यलङ्कारमाह—**दण्डापूपिकयेति**। दण्डापूपिका न्यायविशेषः। तच्च स्वयमेव दर्शयिष्यति। तन्न्यायेनान्यार्थस्यानुक्तपरार्थस्यागमो व्यञ्जनेत्यर्थः। तन्न्यायश्च शब्दश्लेषाल्लभ्यो बोध्यः। अन्यथा समासोक्त्यप्रस्तुतप्रशंसादावपि तत्प्रसङ्गेः।

(वि, भ) तन्न्यायं दर्शयति—**मूषिकेणेति**। दण्डोऽत्र तत्तत्स्थलीतोऽपूपस्याकर्षणदण्डः। अपूपः पिष्टकम्। तद्दण्डभक्षणं तत् पिष्टकगन्धात्। तथा तत्सहचरितपिष्टकभक्षणमावश्यकमतो मूषिकेण दण्डो भक्षित इत्यनेनार्थात् केनाप्युक्तेनेति शेषः। **इति नियतसमानेति**। इति यत् नियतं तस्य समानन्यायादर्थान्तरमुक्तभिन्नोर्थ आपतति प्रतीयत इत्यर्थः। तन्न्यायलभ्यत्वे द्वैविध्यं दर्शयति—**क्वचिदिति**।

(वि, म) तत्र प्राकरणिकादप्राकरणिकार्थस्य तन्न्यायगम्यत्वं दर्शयति—**हारोयमिति**। **लुठतीति**। स्तनमण्डलावच्छाधीनाग्रपरावृत्तिरूपगतिविशेषेण तिष्ठतीत्यर्थः। इयमवस्थाऽवच्छास्थितिरूपा। **के वयमिति**। स्मरकिङ्कराणामियमवस्था। स्मरकिङ्कराणामस्माकमित्येवं ज्ञेयत्वात् सुतरां लुठनमित्यर्थः। अत्रालङ्काराधीनसौन्दर्यवर्णनस्य प्रकान्तत्वान्मुक्ताः प्राकरणिक्यः। अत्र के वयमित्यनेन तन्न्यायलाभः।

गत्यादेर्विषमत्वस्य ख्यापनमात्रस्य परिगतत्वादित्यर्थः। एवमुत्तरालङ्कारस्य विषयप्रकारस्यालङ्कारान्तरविवेकलाघवात् पश्चाद् भिनत्ति—**नचेति**।

(लो, लृ) कन् प्रत्ययेन दण्डापूपवत् दण्डापूपिका, तथाविधन्यायोपि दण्डापूपिका। येन केन विधिना च वस्त्वन्तरस्यागमोऽर्थादापतनं सिद्धिरिति यावत्। एतदेव दर्शयति—**मूषिकेणेति**। अर्थादापतति। तथाहि येन खलु मूषिकेणापूपसहचरितो दण्डो भक्षितस्तेन कथमपूपः परित्यक्त इति तथेहापि बोद्धव्यम्। तस्मात् यत्र प्रतिसदृशन्यायाद् अर्थान्तरानुगमस्तन्नायमलङ्कार इत्यर्थः।

(लो, ए) मुक्ता मौक्तिकानि प्राप्तनि.श्रेयसश्च। एवं मुक्तानां नारीणां स्तनमण्डललुठनेन च पूर्वन्यायात् स्मरकिङ्कराणामपीत्यर्थः।

"विललाप स बाष्पगद्गद
सहजामप्यपहाय धीरताम् ।
अभि[1]तप्तमयोपि मार्दव
भजते कैव कथा शरीरिणाम् ॥" (य)

अत्र च समानन्यायस्य श्लेषमूलत्वे वैचित्र्यविशेषो यथोदाहृते हारोयमित्यादौ । नचेदमनुमानम् । समानन्यायस्य सम्बन्धरूपत्वाभावात् । (र, ऐ)

विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयुत ॥ १०६ ॥ (ल)

यथा—"नमयन्तु[2] शिरांसि धनूंषि वाकर्णपूरीक्रियन्तामाज्ञा मौर्व्यो वा । अत्र शिरसां धनुषा च नमनयो सन्धिविग्रहोपलक्षणत्वात् सन्धिविग्रहयोश्चैकदा

(वि, य) अप्राकरणिकात् प्राकरणिकार्थलाभमाह—विललापेति । स राजा अत्र सहजा स्वाभाविकाम्, अत्रायोऽप्राकरणिकम् । तत प्राकरणिकाजस्र मार्दवलाभ । कैव कथेत्यादिशब्दाच्च तन्न्यायलाभ ।

(वि, र) श्लेषमूलत्वे इति । हारोयमित्यादौ मुक्तपद स्मरस्याकिङ्करमुक्तत्वेऽथ मौक्तिके च श्लिष्टम् । लुठतीति पद च सावज्ञस्थितिरूपे आलिङ्गने चार्थे श्लिष्टम् । विललापेत्यादौ च तप्तपदमभिसयोगे विरहदुःखे च श्लिष्टम् । मार्दवपद च कोमलत्वे कृतरत्वे च श्लिष्टम् । यथा हारोयमित्यादिपदाद् विललापेत्यादि श्लोकस्यापि परामर्श । नचेदमिति । हारोयमित्यत्र स्तनसन्निहारलुठनेन स्तनसन्निकामुकलुठनस्य विललापेत्यादौ चाभितापेन मार्दवस्यानुमेयत्वप्रसङ्ग । समान न्यायस्येति । दण्डापूपिकान्यायस्येत्यर्थ । सम्बन्धरूपत्वाभावात् व्याप्तिरूपसम्बन्धरूपत्वाभावात् । यद्यपि स्तनसन्निकर्षवतल्लुठनयोरभितप्तत्वमार्दवयोश्च व्याप्तिरस्ति, तथा न्यायस्य पुर स्फूर्तिकत्वात् साध्यहेतुभावेन निर्देशाभावाच्च नानुमानमित्यभिप्राय ।

(वि, ल) विकल्पालङ्कारमाह—विकल्प इति । कोटिद्वये समानत्व तुल्यबलता । चातुरी चालङ्कारान्तरघटितरूपा । अत एव अस्या सर्गविधौ इत्यत्र चन्द्रमदनयो प्रजापतित्वविकल्पेऽप्यलङ्कारान्तरघटितत्वाच्च विकल्पालङ्कार ।

(वि, व) नमयन्त्वित्यादिक न श्लोक, किन्तु जेतृनृपतेजतव्यनृपातप्रति राजावाक्यमात्रमिदम् । प्राणपार्थं ते राजान शिरांसि वा नमयन्तु युद्धार्थं

(लो, ऐ) सम्बन्धोऽविनाभाव । नचेय शाब्दीयार्थापत्ति । तस्य हि पीनो देवदत्तो दिवा न भुङ्क्ते पीनत्वभोजनादिकयोरविनाभाव इति भाव ।

(लो, ओ) तुल्यबलयोरेकस्मिन् कार्य नियोजनुमर्हयो, विरोध एकदा निर्वाहयितुमशक्यत्वात् । स एककालाध्ययनपर्यवसानादिविरुद्ध एव ।

1 'अति' (क ५)
2 'नम्यन्ताम्' (ग ५)

कर्तुमशक्यत्वाद्[1] विरोधः । स चैकपक्षाश्रयणपर्यवसानः । तुल्यबलत्वं चात्र धनु-शिरोनमनयोर्द्वयोरपि स्पर्द्धया सम्भाव्यमानत्वात् । चातुर्यं चात्रौपम्यगर्भ-त्वेन । एवं कर्णपूरीक्रियन्तामित्यत्रापि ॥ (व, औ)

एवम्—

"युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः ।" +

अत्र श्लेषावष्टम्भेन चारुत्वम् । (औ)

'दीयतामार्जितं वित्तं देवाय ब्राह्मणाय वा ।' (श)

धनुर्वा नमयन्तु इत्यर्थः । तथा च ममाज्ञा चाकर्णपूरीक्रियता कर्णं पूरयित्वा श्रूयतां युद्धार्थं मौर्वी वा कर्णपर्यन्तं नीयतामित्यर्थः । अत्र विरोधं ग्राहयितुमाह—**अत्र धनुपामिति** । सन्धिविग्रहोपलक्षणत्वात्तद्बोधकत्वादित्यं विरोधं दर्शयित्वा अत्रेच्छाविकल्पत्वं दर्शयति—**स चेति** । इच्छाया एकपक्षग्रहणे पर्यवसानः । तुल्यबलत्वे एव इच्छाविकल्पसम्भवात्। **तुल्यबलत्वं चात्रेति** । **द्वयोरिति** । द्वयोः सकाशादित्यर्थः । तद्द्वयहेतुकयोः सन्धिविग्रहयोरपि स्पर्द्धया इच्छया वा सम्भाव्यमानत्वादित्यर्थः एव चात्माहितकारित्वेन द्वयोस्तुल्यबलत्वम् । चातुरीयुतत्वं दर्शयति—**चातुर्यं चेति** । औपम्यमुपमा । शिरो धनुषोर्नमनसादृश्यादाज्ञा-मौर्व्योश्च कर्णपूरीकरणसादृश्यादुपमा । इदमुपलक्षणं द्वयोरेकक्रियान्वयेन तुल्ययोगयता बोध्या ।

(वि, ध) चातुरीयुतस्य व्यावृत्तिं दर्शयति—**दीयतामिति** । अत्र विरोधप्रसाक्किरनवधानमूलिकैवेति मन्यामहे—एकदैव देवब्राह्मणेभ्यो वित्तदानसम्भवेन

(लो, औ) श्लेषश्च कुरुतामित्यत्र द्विवचनैकवचनयोरेकरूपत्वात् । अत्र नेत्रवर्ष्मणोर्द्वयोरपि चार्तिशमने समर्थत्वात् ।

+ संपूर्णश्लोके यथा—

"भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी ।
ध्यानालम्बनता समाधिनिरतैर्नीते हितप्राप्तये ।
लावण्यस्य महानिधिरसिक्ता लक्ष्मीदृशोस्तन्वती
युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः ॥"

नचात्र समुच्चये वाशब्दः । तनुमध्ये नेत्रयोः प्रविष्टत्वात् तयोः पृथगभिधानमेव न कार्य्यम् । कृतं च सत् स्पर्धाभावं गमयति स्पर्धाभावाच्च विरुद्धत्वम् । नेत्रे अथवा समस्तमेव शरीरमित्यर्थे विकल्पस्तु सुप्रत्ययः ।

अनयैव युक्त्या परलोके विद्याप्रियाया दर्शिता कवेरनवधानता स्वाश्रयैव प्रतीयते ।

1 'कर्तव्यतासम्भवात्' (ग. घ. पु)

इत्यत्र चातुर्याभावान्नायमलङ्कारः ।

समुच्चयोयमेकस्मिन् सति कार्यस्य साधके ।
खले कपोतिकान्यायात्तत्करः स्यात् परोऽपि चेत् ।
गुणौ क्रिये वा युगपत् स्यातां यद्वा गुणक्रिये ॥ ११० ॥ (प, अ)

यथा मम—

"हंहो धीर ! समीर ! हन्त जननं ते चन्दनद्यभृतो
दाक्षिण्यं जगदुत्तरं परिचयो गोदावरीवारिभिः ।
प्रत्यङ्गं दहसीह मे त्वमपि चेदुद्दामदावाग्निव-
न्मत्तोयं मलिनात्मको वनचरः किं वर्ण्यते कोकिलः ॥" (स, आ)

अत्रादाहकत्वे[1] एकस्मिंश्चन्दनद्यभृज्जन्मरूपे कारणे सत्यपि दाक्षिण्यादीनां हेत्वन्तराणामुपादानम् । अत्र सर्वेषामपि हेतूनां शोभनत्वात् सद्योगः । अत्रैव चतुर्थपादे मत्तादीनामशोभनानां योगादसद्योगः । (इ)

विरोधाभावात् । दवार्यवेत्यादिनियमगर्भत्वेन एकव्यक्तिकवित्ताभिप्रायेण वा विरोधो दर्शित इति वा ।

(वि, प) चतुर्विधं समुच्चयालङ्कारमाह—**समुच्चयोयमिति** । धान्यमर्दनखले कपोतानामेकदापतनं तन्न्यायस्तन्न्यायादित्यर्थः । अन्यद् भेदत्रयमाह—**गुणाविति** । गुणद्वयं वा क्रियाद्वय वा गुणक्रियाद्वयं वा यदि युगपद् वर्णितं स्यादित्यर्थः ।

(वि, स) **हंहो धीरेति** । मन्दस्यैव धैर्यवत्त्वेनाऽकार्यनिवृत्तिरूपेण सम्बोधनम् । **चन्दनेति** । चन्दनसम्बन्धात् सुगन्धेरेव महाजनजन्यत्वेन सम्बोधनम् । **दाक्षिण्यमिति** । दक्षिणदिग्भवस्यैव जगद्विलक्षणविचक्षणत्वमुक्तम् । **परिचय इति** । जलसम्बन्धेन शीतलस्यैव पुण्यनदीसम्बन्धेन महत्त्वमुक्तम् । ईदृशस्त्वमिह विरहे मे मम प्रत्यङ्गं दावाग्निवद् दहसि चेत् तदा मत्त उन्मत्तो मलिनात्मकः कृष्णवर्ण एव कुटिलस्वभावः । वनचरत्वेन च लोकव्यवहारानभिज्ञः कोकिलः किं वर्ण्यते ? स सुतरां धक्ष्यतीत्यर्थः ।

(वि, इ) **अत्रेति** । अदाहकत्वे इत्येव पाठः । दाहकत्वे इति प्रामादिक एव पाठः । चन्दनद्यभेत्यादीनामदाहकहेतुत्वं श्लोकव्याख्यायामेव व्याख्यातम् ।

(लो, अ) **समुच्चय इति** । तृतीयपादेन समाधेर्व्यवच्छेदः । तच्च वृत्तावेव सुव्यक्तम् । तत्करः तस्य कार्यस्य साधकः ।

(लो, आ) धीरः वंशेन विधिना पण्डितत्वाच्च, द्यभृत्पर्वतः भूधरणत्वमः कश्चित् महापुरुषः । दाक्षिण्यं दक्षिणा दिक् जन्मसरलता च । मलिनात्मकः श्यामः कुटिलाशयश्च । हेतूनां धीरत्वादीनां सन्तः शोभनाः ।

1 'अत्र दाहे' (ग. क. पु.) 'अत्र दाहकत्वे' (घ. च. पु.)

सदसद्योगो यथा—

"शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥" (क)

इह केचिदाहुः—

शशिप्रभृतीनां शोभनत्वं खलस्याशोभनत्वं चेति सदसद्योग इति । अन्ये तु शशिप्रभृतीनां स्वतः शोभनत्वं धूसरत्वादीनां त्वशोभनत्वमिति सदसद्योगः । अत्र हि शशिप्रभृतिषु धूसरत्वादेरत्यन्तमनुचितत्वमिति विच्छित्तिविशेषस्यैव चमत्कार[1]विधायित्वम् ; मनसि [2]सप्तशल्यानीति सप्तानामपि शल्यत्वेनोपसंहारश्च । 'नृपाङ्गणगतः खल' इति प्रत्युत क्रमभेदाद् दुष्टत्वमावहति सर्वत्र

चतुर्थपाद इति । दाहं प्रति हेतूना मत्तत्वादीनामित्यर्थः । सत्त्वासत्त्वे उपादेयत्वानुपादेयत्वे ।

(वि, क) शशीति । एते सप्त धूसरत्वविशिष्टशश्यादयः सप्त मनसि शल्यानीत्यर्थः । अनौचित्यदर्शनेन शल्यवद् दुःखदायित्वात् । तेष्वनौचित्यं दर्शयति—शशीति । उज्ज्वलमूर्तेस्तस्य दिवसधूसरत्वमनुचितम् । एव गलितयौवनायाः कामवत्त्वं कामिन्या गलितयौवनत्वं वा अनुचितम् । एवं सरसो वारिजशून्यत्वम् । शोभनाकृतेर्मूर्खस्याऽक्षरेण विद्यया शून्यत्वम् । प्रभोर्धनपरायणत्वं, धनपरायणजनस्य प्रभुत्वं वा । सज्जनस्य सततदुर्गतत्वं सततदुर्गतस्य सज्जनत्वं वा, नृपाङ्गणगतस्य खलत्व, खलस्य नृपाङ्गणगतत्व वा अनुचितमित्यर्थः । अत्र शोच्याना विधेयाना सदसत्त्ववशात् सदसद्योगः । तत्र दैवाधानदोषेण शोच्यस्य सत्त्वं स्वाधीनदोषेण शोच्यस्यासत्त्वम् । तत्र शशिनो धूसरत्वं, कामिन्या गलितयौवनत्वस्य विधेयत्वपक्षे गलितयौवनात्वं, सरसो वारिजशून्यत्वं, स्वाकृतेरनक्षरमूर्खत्वं, सज्जनस्य दुर्गतत्वं तदैव दोषात् शोच्यत्वेन शोभनम् । गलितयौवनाया कामवत्त्वस्य विधेयत्वपक्षे विधेयस्य तस्य प्रभोर्धनपरायणस्य धनपरायणे प्रभुत्वस्य वा, विधेयस्य खले नृपाङ्गणगतत्वस्य नृपाङ्गणगते खलत्वस्य वा विधेयस्य स्वाधीनदोषेण शोच्यत्वादशोभनत्वमिति विधेयानामेव सदसत्त्वम् ।

(वि, ख) पूर्वोक्तश्लोकेऽपि विधेयानामेव तथात्वाद् भिन्नाभिप्रायं मन्यकृन्मनसि कृत्वापरोक्तं सदसद्योग दर्शयति—इह केचिदिति । एतन्मते उद्देश्याना विशेष्याणामेव सदसत्त्वम् । मतान्तरमाह—अन्ये त्विति । एतन्मते उद्देश्यविधेययो-

---

1 एतच्चिह्नितपाठस्थले, 'शोभनत्वे प्रकर्षादिति' इति (क. पु.)
2 एतच्चिह्नितः पाठः क. पु. नास्ति ।

विशेष्यस्यैव शोभनत्वेन प्रक्रमादिति । *

इह च खले कपोतवत्सर्वेषां कारणानां साहित्येनावतारः । समाध्यलङ्कारे तु एकस्यैव[1] कार्यं प्रति साधके समग्रेष्वन्यस्य काकतालीयन्यायेनापतनमिति भेदः (ख, इ) †

"अरुणे च तरुणि ! नयने तव मलिनं च प्रियस्य मुखम् ।
मुखमानतं च सखि ते ज्वलितश्चास्यान्तरे स्मरज्वलनः ॥"

अत्र आद्येऽर्धे गुणयोर्यौगपद्यम् । द्वितीये क्रिययोः । (ग)

विशेष्यविशेषणयो. सदसतोर्योग. । तेषा मते तथात्वमेव विच्छित्तिविशेषाच्चमत्कारस्तदर्शयति—**अत्रहीति**। उद्देश्ये सत्त्वासत्त्वाभ्या तु तेषा मतेन चमत्कार इत्यर्थ. । तेषा सदसत्त्वे एव तावदलङ्कारः । प्रत्युत प्रथमपक्षे तादृशनिर्देशः क्रमभङ्गमावहतीत्यर्थ. ।

(वि, ख) तदेव ग्राहयति—**सर्वत्रेति** । शशी धूसर इत्यादुद्देश्यविधेयार्थकसर्ववाक्ये इत्यर्थः, अयं च दोष., खले नृपाङ्गणगतत्वस्य विधेयता गतत्वस्य विधेयतापक्ष एव नृपाङ्गणगते खलत्वस्य विधेयता पक्षेतूद्देश्यः शोभन एवेति नैष दोष इति बोध्यम् । एककारणादेव सुकरे कार्ये दैवात् कारणान्तरोऽऽगमनरूपात् समाध्यलङ्कारादस्य भेदमाह—**इह च खलेति** । **एकस्यैवेति** । कार्यं प्रति एकस्यैव समग्रे साधकत्वेऽसमग्रकारणवृत्तिर्न साधकत्वे इत्यर्थ. ।

(वि, ग) गुणयोः क्रिययोश्च यौगपद्यरूपं समुच्चयमाह—**अरुणे चेति** । अत्र चकारौ यौगपद्यबोधकौ । तौ च ययोरुत्तरभूतौ तयोर्यौगपद्यबोधकौ इत्यत आह—**अत्राद्ये** इति ।

(लो, इ) द्वितीयपक्षे सुगतिं दर्शयति । विशेष्यस्य शशिकामिनीप्रभृते. सूत्रस्य तृतीयपादं विशदयति—**इह चेति** । काकतालीयन्यायेनेति ।

---

* अत्र शशिन. स्वत शोभनस्यापि दिवसधूसरत्वादशोभनत्वेन शोभनाशोभनरूपस्य समुच्चय । 'नृपाङ्गणगत खल' इत्यत्र तु नृपाङ्गणगतत्वेन शोभनत्वं खलत्वेन तु अशोभनत्वमिति रीत्या सदसद्रूपतासमर्थनेऽपि तस्मिन्नशो नायमलङ्कारः। परतत्र स्वतोऽशोभनस्य खलस्य पाठात् क्रमभङ्गदोष एव ।

† समाधौ हि एकेन कार्य निष्पाद्यमानेऽन्येनाकस्मादापतता सौकर्य्यादिरूपातिशयसम्पादनम् । अत्र तु एकस्यैवसम्पत्तौ सर्वेषा खले कपोतन्यायेन पात. कार्यस्य न कोप्यतिशय इति भाव' । काव्यलिङ्गे हेतुत्वमात्रं विवक्षितं नतु हेतूनां गुणप्रधानभावस्य एकत्वानेकत्वस्य वा चिन्ता । अत्र तु एकस्यैव तत्कार्यकारित्वे अन्येषा साहाय्यमात्रमिति ततो विशेषः । (उद्योत)

1 'एककार्यं प्रति' (क. ङ.)

धिक् कन्दर्पधनुर्भ्रुवौ यदि च ते किं वा बहु ब्रूमहे
यत्सत्यं पुनरुक्तवस्तुविमुखः सर्गक्रमो वेधसः ॥"

अत्र वक्त्रादिभिरेव चन्द्रादीनां शोभातिवहनात्तेषां निष्फलत्वम्। (ट)

उक्त्वा चात्यन्तमुत्कर्षमत्युत्कृष्टस्य वस्तुनः ।
कल्पितेऽप्युपमानत्वे प्रतीपं केचिदूचिरे ॥ ११४ ॥ (ठ) †

"अहमेव गुरुः सुदारुणानामिति हालाहल तात मा स्म दृप्यः ।
ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन् वचनानि दुर्जनानाम् ॥" (ड)

अत्र प्रथमपादेनोत्कर्षातिशय उक्तः । तदनुक्तौ तु नायमलङ्कारः । यथा 'ब्रह्मेव ब्राह्मणो वदति' इत्यादि (ढ)

निकृष्टा। इत्थमुक्त्वा उपसंहरति—**किं वा बहि**ति। वेधसः सर्गक्रमः सृष्टिक्रमः पुनरुक्तवस्तुविमुखः, पुनरुक्तः यत्सदृशवस्त्वन्तरकल्पनं तद्विमुखः। तत्र वैफल्यरूपदोषदर्शनविमुख इत्यर्थः। विमुखपदस्यैवंदृशार्थपरत्वं बोध्यम्।

(वि, ट) कांचिदुपमानस्योपमानत्वकल्पनेऽपि काव्यप्रकाशकृदुक्तमिममलङ्कारं लक्षयति—**उक्त्वा चात्यन्तमि**ति। अत्युत्कृष्टस्य वस्तुनोऽत्यन्तमुत्कर्षमुक्त्वापि उपमानत्वेऽपि कल्पिते निर्दिष्ट इत्यर्थः। सच निर्देशः समभिव्याहारविशेषवशात्तन्निन्दापर्यवसायको बोध्यः। अन्यथोपमानस्योपमानत्वेन निर्देशेनानुगुणस्यैव प्रतीत्या प्रतीपत्वस्यैवाऽसम्भवात्। अतिसुन्दरश्चन्द्र इव मुखमित्युपमायामतिव्याप्तेश्च।

(वि, ड) **अहमेवे**ति। हे हालाहल, हे तात, अहमेव सुदारुणानां गुरुः प्रधानम्। इत्येवं दृप्यः मा स्म, एवं दर्पं मा कुरु इत्यर्थः। कुत इत्यत्राह—**नन्वि**ति। ननु भो अस्मिन् भुवने दुर्जनानां भूयो बहूनि वचनानि अपि भवादृशानि भवतुल्यानि सन्तीत्यर्थः। भूय इति सान्तक्रियाविशेषणम्। तद्भूयस्त्वेन वचनानामेव भूयस्त्वं बोध्यम्।

(वि, ढ) अत्र भवदिव दृश्यन्ते यानीत्यनेन हालाहलस्योपमानत्वेनैव निर्देशः। दर्पनिषेधसमभिव्याहाराच्च तन्निन्दापर्यवसायकः। अत्रोक्तमत्यन्तमुत्कर्षं दर्शयति—**प्रथमपादेने**ति। सुदारुणान्तरापेक्षया तेन गुरुत्वकथनात् तद्विशेषणफलमाह—**तदनुक्तौ** इति। नायमलङ्कारः, किन्तु उपमैवेत्यर्थः। तद् दर्शयति—**यथा ब्रह्मे**ति। ब्रह्मा यथा वेद वदति तथा ब्राह्मण इत्यर्थः। यद्यपि वेदस्यातिवक्तृ ब्रह्मेवेति ब्राह्मणस्यात्यन्तोत्कर्षस्थलेष्वुपमैव नायमलङ्कारस्तथापि प्रतीपघटनार्थं समभिव्याहारवशेषादुपमानस्य निन्दापर्य्यवसायकत्व निर्देशस्य विशेषणं दत्तमित्यतस्तद्वारणमिति प्रागेवोक्तं बोध्यम्।

---

† उपमानप्रतिकूलत्वादुपमेयस्य प्रतीपमिति व्यपदेशः। (अल०, स०)

मीलितं वस्तुनो गुप्तिः केनचित्तुल्यलक्ष्मणा ॥ ११५ ॥

अत्र समानलक्षण वस्तु कचित्सहजं कचिदागन्तुकम्। (थ)

क्रमेण यथा—

"लक्ष्मीवक्षोजकस्तूरीलक्ष्म वक्ष स्थले हरेः ।
प्रस्तं नालक्षि भारत्या भासा नीलोत्पलाभया ॥" (त)

अत्र भगवतः श्यामा कान्ति. सहजा।

"सदैव शोणोपलकुण्डलस्य
यस्यां मयूखैररुणीकृतानि ।
कोपोपरक्तान्यपि कामिनीनां
मुखानि शङ्का विदधुर्न यूनाम् ॥" (थ)

अत्र माणिक्यकुण्डलस्यारुणिमा मुखे आगन्तुक. ।

सामान्यं प्रकृतस्यान्यतादात्म्यं सदृशैर्गुणैः ॥ ११६ ॥ (द) *

यथा—

"मल्लिकाचितधम्मिल्लाश्चारुचन्दनचर्चिता ।
अविभाव्या. सुख यान्ति चन्द्रिकास्वभिसारिका ॥" (ध) ×

मीलिते उत्कृष्टगुणेन निकृष्टगुणस्य तिरोधानम्। इह तूभयोस्तुल्यगुणतया भेदाग्रहः ।

(वि, ण) मीलितालङ्कारमाह। **मीलितमिति**। गुप्तिराच्छादनम्। तुल्यलक्ष्मणा तुल्यचिह्नेन। आगन्तुकमतदीय, सहज तद्वृत्ति।

(वि, त) **लक्ष्मीवक्षोजेति**। हरेर्वक्ष स्थले लक्ष्मीस्तनकस्तूरीचिह्न भारत्या नालक्षि, यतो नीलोत्पलभिया हरेरेव भासा प्रस्तमाच्छादितमित्यर्थ. ।

(वि, थ) आगन्तुकलक्ष्मणा त्वाह—**सदैवेति**। शोण उपलो मणि. खचितो यत्र तादृशकुण्डलस्य मयूखै सदैवाऽरुणीकृतानि यस्या पुरि कामिनीना कोपोपरक्तान्यपि मुखानि यूना कोपशङ्का न विदधुरित्यर्थः ।

(वि, द) **सामान्यमिति**। अन्यतादात्म्यमन्यभेदाग्रहो यदि वर्ण्यत इत्यर्थ. । रूपकभ्रान्तिमतोस्तु अभेदाग्रहादेवाहार्यो वेति ततो भेद । अत एवोदाहरणे व्याख्यास्यति—**भेदाग्रह** इति ।

(वि, ध) **मल्लिकेति**। अविभाव्या ज्योत्स्नातोऽगृहीतभेदा ।

---

* सदृशैर्गुणै साधारणगुणयोगात् प्रकृतस्य उपमेयस्यान्यतादात्म्यमुपमानेनैक्यमता यदि वर्ण्यते तदा सामान्यनामालङ्कार ।

× मल्लिकाभि पुष्पैराचिता व्याप्ता धम्मिल्ला केशा यासा तादृशास्तथा चारुभिश्चन्दनैश्चर्चिता अभिसारिकाश्चन्द्रिकासु अविभाव्या अलक्ष्या सुख यान्ति ।

उभयोर्यौगपद्ये यथा—

"कलुषं च तवाहितेष्वकस्मा-
त्सितपङ्केरुहसोदरश्रि चक्षुः ।
पतितं च महीपतीन्द्र तेषां
वपुषि प्रस्फुटमापदां कटाक्षैः ॥ + (घ)

"धुनोति चासि तनुते च कीर्तिम् । इत्यादावेकाधिकरणेष्येष दृश्यते ॥"

नचात्र दीपकम् । एते हि गुणक्रियायौगपद्ये समुच्चयप्रकारानियमेन कार्यकारणकालानियमविपर्ययरूपातिशयोक्तिमूलाः । दीपकस्य चातिशयोक्तिमूलत्वाभावः । (ङ)

समाधिः सुकरे कार्ये दैवाद् वस्त्वन्तरागमात् ॥१११॥

यथा—

"मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्टेदमुदीर्णं घनगर्जितम् ॥" (च)

(वि, घ) कलुषं चेति । अहितेषु विपक्षेषु, महीपतीन्द्रेति सम्बोधनम् । अत्र पूर्वार्धे गुणोत्तरं चक्षुरः, परार्धे तु क्रियोत्तरमित्यनयोर्यौगपद्यम् । धुनोति चेति । एकाधिकरणे रणस्थलरूपे । व्यधिकरणेष्येष दृश्यते इति काव्यप्रकाशवृत्, यथा—

"कृपाणपाणिश्च भवान् रणक्षितौ ।
सशत्रुवादाश्च मुहुः सुरालये ॥"

इत्यत्र रणक्षिति सुरालयरूपाधिकरणभेदः ।

(वि, ङ) 'धुनोति चासि' मित्युदाहरणे एकस्मिन् कर्तृकारकेऽनेकक्रियासम्बन्धादनेकक्रियास्वेककारकरूपदीपकप्रसक्तिमाशङ्क्य निषिध्यति—न चात्रेति । एते गुणक्रियायौगपद्ये ये समुच्चयप्रकारास्ते कार्यकारणयोर्यः पौर्वापर्यरूपः कालनियमः तद्विपर्ययरूपातिशयोक्तिमूला इत्यर्थः । दर्शितोदाहरणेषु सर्वत्रैव गुणयोः क्रिययोर्वा कार्यकारणभावसत्त्वेऽपि यौगपद्योक्तेः । दीपके तु तथात्वं नास्तीत्याह—दीपकस्येति । इदमुपलक्षणम्—अत्र यौगपद्यस्याप्यविवक्षणं भेदश्चमिति बोध्यम् । तथा चैतद्भावाभावे सतीति विशेषणं देयमित्यभिप्रायः ।

(वि, च) समाध्यलङ्कारमाह—समाधिरिति । एकचरणेनैव सुकरे कार्ये दैवात् चरणरूपवस्त्वन्तरोपस्थितेरित्यर्थः । मानमस्या इति । घनगर्जितस्योद्दीपकत्वेन

+ हे महीपतीन्द्र स्वभावतः सितपङ्केरुहसोदरा श्वेतकमलतुल्या श्रीः शोभा यस्य तादृशं तव चक्षुः अहितेषु शत्रुषु अकस्मात् कलुषं कलायं, क्रोधादीप्तमित्यर्थः । तेषां शत्रूणां वपुषि आपदां विपत्तीनां कटाक्षैः कटाक्षैः प्रस्फुटं पतितं च । अत्र क्रमेण गुणः पतनं च क्रिया । चक्षुरेण तयोर्यौगपद्यमुक्तयः ।

प्रत्यनीकमशक्तेन प्रतीकारे रिपोर्यदि ।
तदीयस्य तिरस्कारस्तस्यैवोत्कर्षसाधकः ॥ ११२ ॥ (छ, ई)

तस्यैवेति रिपोरेव । यथा मम

"मध्येन तनुमध्या मे मध्यं जितवतीत्ययम् ।
इभकुम्भौ भिनत्त्यस्याः कुचकुम्भनिभो हरिः ॥" (ज, उ)

प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनं
निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते ॥ ११३ ॥ (ऋ)

क्रमेण यथा—

यत्त्वन्नेत्रसमानकान्तिसलिले मग्नं तदिन्दीवरमित्यादि । (ञ)

"तद्वक्त्रं यदि मुद्रिता शशिकथा, हा हेम सा चेद् द्युति-
स्तच्चक्षुर्यदि हारितं कुवलयैस्तच्चेत् स्मितं का सुधा ।

ानभङ्गे तदपि कारणान्तरं दैवादुपस्थितमित्यर्थः ।

(वि, छ) प्रत्यनीकालङ्कारमाह—**प्रत्यनीकमिति** । रिपोः प्रतीकारे प्रत्यपकारे शक्तेन केनापि यदि तत्सम्बन्धिनोऽन्यस्य तिरस्कारः तस्यैव रिपोरेवोत्कर्षतासाधकः, उत्कर्षपर्य्यवसायक इत्यर्थः ।

(वि, ज) **मध्येनेति** । रिपुकुम्भभेदनार्थं सिंहस्य भावना पूर्वार्धम् । अत्र मध्येन स्वमध्यजयात् नायिका सिंहस्य रिपुः, तत्कुचसादृश्यात् करिकुम्भौ तदीयौ ।

(वि, झ) द्विविधं प्रतीपालङ्कारमाह—**प्रसिद्धस्येति** । प्रसिद्धस्योपमानस्य उपमेयत्वकल्पनं वा निष्फलत्वकथनं वेति द्विविधं प्रतीपमित्यर्थः ।

(वि, ञ) **यत्त्वन्नेत्र** इत्यादि । सादृश्यस्य प्रतियोगि उपमानम् । अत्र च त्वन्नेत्रस्य समानकान्तिरित्युक्त्या नेत्रकान्तेरिन्दीवरकान्तिसादृश्यप्रतियोगित्वेन निर्देशात् त्वन्नेत्रकान्तिरुपमानम् । इन्दीवरकान्तेश्चोपमानत्वेन प्रसिद्धाया उपमेयत्वकल्पनम् ।

(वि, ट) उपमानस्य वैफल्यमुदाहरति—**तद् वक्त्रं यदीति** । तद् वक्त्रादि सत्त्वे शशिकथादीना मुद्रितत्वादिकं वैफल्यं पर्यवसितं बोध्यम् । हा इति शोचामी त्यर्थः । हारितं पराजयः प्राप्त इत्यर्थः । **तच्चेदिति** । तस्याः तत्स्मितं चेदित्यर्थः । व

(लो, ई) एवं वाक्यन्यायाश्रयिणोऽलङ्कारान् दर्शयित्वा, लोकन्यायाश्रयिणं दर्शयति—**प्रत्यनीकमिति** । अनेकं सैन्यं, तच्चात्र स्वसामान्यस्य सम्बन्धिमात्रस्योप लक्षकम् । तेनाभियोज्यतया प्रतिनिधिभूतोर्थो रिपो· सम्बन्धी वर्ण्यते इति प्रत्यनी नामालङ्करणम् । तदीयस्य रिपुसम्बन्धिनः ।

(लो, उ) इभकुम्भयोरत्र नायिकासम्बन्धिता । स्वसम्बन्धः कुचकुम्भसम्बन्ध सादृश्यसम्बन्धादिदं च क्वचिदनुकूलस्य वाञ्छिताचरणेपि सम्भवति । यथा विरह विधुरापि सततं भवतः श्वासानुहारिणी पतति इत्यादौ ।

धिक् कन्दर्पधनुर्भ्रुवौ यदि च ते किं वा बहु ब्रूमहे
यत्सत्यं पुनरुक्तवस्तुविमुखः सर्गक्रमो वेधसः ॥"

अत्र वक्त्रादिभिरेव चन्द्रादीनां शोभातिवहनात्तेषां निष्फलत्वम् । (ट)

उक्त्वा चात्यन्तमुत्कर्षमत्युत्कृष्टस्य वस्तुनः ।
कल्पितेप्युपमानत्वे प्रतीपं केचिदूचिरे ॥ ११४ ॥ (ठ) †

"अहमेव गुरुः सुदारुणानामिति हालाहल तात मा स्म दृप्यः ।
ननु सन्ति भवादृशानि भूयो भुवनेस्मिन् वचनानि दुर्जनानाम् ॥"(ड)

अत्र प्रथमपादेनोत्कर्षातिशय उक्तः । तदनुक्तौ तु नायमलङ्कारः । यथा 'ब्रह्मेव ब्राह्मणो वदति'इत्यादि (ढ)

निकृष्टा । इत्युक्त्वा उपसंहरति—**किं वा बहुमिति** । वेधसः सर्गक्रमः सृष्टिक्रमः पुनरुक्तवस्तुविमुखः, पुनरुक्तं यत्सदृशवस्त्वन्तरकल्पनं तद्विमुखः । तत्र वैफल्यरूपदोषदर्शनविमुख इत्यर्थः । विमुखपदस्यैवेदृशार्थपरत्वं बोध्यम् ।

(वि, ठ) क्वचिदुपमानस्योपमानत्वकल्पनेपि काव्यप्रकाशकृदुक्तमिममलङ्कारं लक्षयति—**उक्त्वा चात्यन्तमिति** । अत्युत्कृष्टस्य वस्तुनोऽत्यन्तमुत्कर्षमुक्त्वापि उपमानत्वेऽपि कल्पिते निर्दिष्ट इत्यर्थः । सच निर्देशः समभिव्याहारविशेषवशात्तन्निन्दापर्यवसायको बोध्यः । अन्यथोपमानस्योपमानत्वेन निर्देशेनानुगुणस्यैव प्रतीत्या प्रतीपत्वस्यैवाऽसम्भवात् । अतिसुन्दरश्चन्द्र इव मुखमित्युपमायामतिव्याप्तेश्च ।

(वि, ड) **अहमेवेति** । हे हालाहल, हे तात, अहमेव सुदारुणानां गुरुः प्रधानम् । इत्येवं दृप्यो मा स्म, एवं दर्पं मा कुरु इत्यर्थः । कुत इत्यत्राह—**ननु इति** । ननु भो अस्मिन् भुवने दुर्जनानां भूयो बहूनि वचनानि अपि भवादृशानि भवदुक्त्यानि सन्तीत्यर्थः । भूय इति सान्तक्रियाविशेषणम् । तद्भूयस्त्वेन वचनानामेव भूयस्त्वं बोध्यम् ।

(वि, ढ) अत्र भवदिव दृश्यन्ते यानीत्यनेन हलाहलस्योपमानत्वेनैव निर्देशः । दर्पनिषेधसमभिव्याहारश्च तन्निन्दापर्यवसायकः । अत्रोक्तमत्यन्तमुत्कर्षं घटयति—**प्रथमपादेनेति** । सुदारुणान्तरापेक्षया तेन गुरुत्वकथनात् तद्विशेषणफलमाह—**तदनुक्ताविति** । नायमलङ्कारः, किन्तु उपमा एवेत्यर्थः । तद् दर्शयति-**यथा ब्रह्मेति** । ब्रह्मा यथा वेदं वदति तथा ब्राह्मण इत्यर्थः । यद्यपि वेदस्यातिवद्य ब्रह्मेति ब्राह्मणस्यात्यन्तोत्कर्षकथनेप्युपमैव नायमलङ्कारस्तथापि प्रतीपघटनार्थं समभिव्याहारविशेषादुपमानस्य निन्दापर्य्यवसायकत्वं निर्देशस्य विशेषणं दत्तमित्यवस्तद्धारणमिति प्रागेवोक्तं बोध्यम् ।

---

† उपमानप्रतियोगित्वादुपमेयस्य प्रतीपमिति व्यपदेशः । (अलं०, स०)

मीलितं वस्तुनो गुप्तिः केनचित्तुल्यलक्ष्मणा ॥ ११५ ॥

अत्र समानलक्षण वस्तु क्वचित्सहजं क्वचिदागन्तुकम्। (ण)

क्रमेण यथा—

"लक्ष्मीवक्षोजकस्तूरीलक्ष्म वक्ष स्थले हरेः।
ग्रस्तं नालक्षि भास्या भासा नीलोत्पलाभया ॥" (त)

अत्र भगवतः श्यामा कान्तिः सहजा।

"सदैव शोणोपलकुण्डलस्य
यस्यां मयूखैररुणीकृतानि।
कोपोपरक्तान्यपि कामिनीनां
मुखानि शङ्कां विदधुर्न यूनाम् ॥" (थ)

अत्र माणिक्यकुण्डलस्यारुणिमा मुखे आगन्तुकः।

सामान्यं प्रकृतस्यान्यतादात्म्यं सदृशैर्गुणैः ॥ ११६ ॥ (द) *

यथा—

"मल्लिकाचितधम्मिल्लाश्चारुचन्दनचर्चिता।
अविभाव्या सुख यान्ति चन्द्रिकास्वभिसारिका ॥" (ध) ×

मीलिते उत्कृष्टगुणेन निकृष्टगुणस्य तिरोधानम्। इह तूभयोस्तुल्यगुणतया भेदाग्रह.।

(वि, ण) मीलितालङ्कारमाह। **मीलितमिति**। गुप्तिराच्छादनम्। तुल्यलक्ष्मणा तुल्यचिह्नेन। आगन्तुकमतदीय, सहज तद्वृत्ति।

(वि, त) **लक्ष्मीवक्षोजेति**। हरेर्वक्ष स्थले लक्ष्मीस्तनकस्तूरीचिह्न भास्या नालक्षि, यतो नीलोत्पलभिया हरेरेव भासा ग्रस्तमाच्छादितमित्यर्थ.।

(वि, थ) आगन्तुकलक्ष्मणा त्वाह—**सदैवेति**। शोण उपलो मणि. खचितो यत्र तादृशकुण्डलस्य मयूखै सदैवाऽरुणीकृतानि यस्या पुरि कामिनीना कोपोपरक्तान्यपि मुखानि यूना कोपशङ्का न विदधुरित्यर्थ.।

(वि, द) **सामान्यमिति**। अन्यतादात्म्यमन्यभेदाग्रहो यदि वर्ण्यत इत्यर्थ.। रूपकभ्रान्तिमतोस्तु अभेदाग्रहादेवाहार्या वेति ततो भेद । अत एवोदाहरणे व्याख्यास्यति—**भेदाग्रह** इति।

(वि, ध) **मल्लिकेति**। अविभाव्या ज्योत्स्नातोऽगृहीतभेदा ।

---

* सदृशैर्गुणै साधारणगुणयोगात् प्रकृतस्य उपमेयस्यान्यतादात्म्यमुपमाने-नैक्यमता यदि वर्ण्यते तदा सामान्यनामालङ्कार ।

× मल्लिकाभि पुष्पैराचिता व्याप्ता धम्मिल्ला केशा यासा तादृशास्तथा चारु-मिश्चन्दनैश्चर्चिता अभिसारिकाश्चन्द्रिकासु अविभाव्या अलक्ष्या सुख यान्ति ।

तद्गुणः स्वगुणत्यागादत्युत्कृष्टगुणग्रहः ॥ ११७ ॥ *

यथा—

"जगाद वदनच्छद्मपद्मपर्यन्तपातिनः ।
नयन् मधुलिहः शैत्यमुदंशु[1]दशनांशुभिः ॥" (न)

मीलिते प्रकृतस्य वस्तुनो वस्त्वन्तरेणाच्छादनम्। इह तु वस्त्वन्तरगुणेनाक्रान्तता प्रतीयते इति भेदः । (प) †

तद्रूपाननुहारस्तु हेतौ सत्यप्यतद्गुणः ॥ ११८ ॥ (फ)

यथा—

"हन्त सान्द्रेण रागेण भृतेऽपि हृदये मम ।
गुणगौरनिषण्णोऽपि कथं नाम न रज्यसि ॥" (ब)

यथा वा—

"गाङ्गमम्बु सितमम्बु यामुनं
कज्जलाभमुभयत्र मज्जतः ।

(वि, न) तद्गुणालङ्कारमाह—**तद्गुण** इति । अत्युत्कृष्टस्य गुणस्य ग्रहो गुणग्रहणम् । **जगादेति** । बलभद्रवदनच्छद्मनो वदनव्याजस्य पद्मस्य पर्यन्तपातिनो मधुलिहो भ्रमरान् उदंशूनाम् उद्गताशूना दशनाना दन्तानामंशुभिः स्वैत्यं नयन् जगादेत्यर्थः । अत्र भ्रमराणा स्वगुणत्यागः स्वैत्यप्रापणादित्यर्थः ।

(वि, प) मीलितालङ्कारादस्य विशेषमाह—**मीलिते** इति । **प्रकृतस्य वस्तुन** इति । प्रकृतस्य यद्वस्तुनो गुणस्वरूपं तस्याच्छादनमग्रह इत्यर्थः । आक्रान्तता स्वाधयीकरणम् ।

(वि, फ) अतद्गुणालङ्कारमाह—**तद्रूपेति** । अननुहारोऽग्रहणम् । हेतौ ग्रहणहेतौ ।

(वि, ब) **हन्त सान्द्रेति** । अननुरक्तं नायकं प्रति अनुरक्तया नायिकया उक्तिरियम् । **गुणगौरेति** । गुणेन गौर इति, गुणो गौरो यस्येति समासेन च सम्बोधनम् । हृदये निषण्णोऽपीत्यन्वयः । रागपदरज्यसिपदे रक्तिमानुरागयोः श्लिष्टे । अत्र रागभृतिहृदये निषण्णत्वं रक्तहेतु ।

---

* तत्यमानगुणनिबन्धनात्सामान्यम् । (च० प्र०) तस्याप्रकृतस्य गुणोऽस्तीति (च० प्र०) तस्योत्कृष्टस्य गुणा अस्मिन्निति (अलं० सु०)

† "मीलिते धर्मिण एवाग्रहः । सामान्ये अपरित्यक्तगुणस्यैवाऽपृथक्भावः । इह तु गुणमात्रस्यैवाऽनिभव , धर्मिण. पृथक्भावश्चेति भेद इत्यर्थ. (उद्योतः)

1 'मुदम' (क. ग. पुस्तके)

राजहंस ! तव सैव शुभ्रता
चीयते नच नचापचीयते ॥" +

पूर्वत्रातिरिक्तहृदयसम्पर्कात् प्राप्तवदपि गुणगौरशब्दवाच्यस्य नायकस्य रक्तत्वं न निष्पन्नम् । उत्तरत्राप्रस्तुतप्रशंसायां विद्यमानायामपि गङ्गायमुनापेक्षया प्रकृतस्य हंसस्य गङ्गायमुनयोः सम्पर्केऽपि न तद्रूपता । अत्र च गुणाग्रहणरूपविच्छित्तिविशेषाश्रयाद् विशेषोक्तेर्भेदः वर्णान्तरोत्पत्त्यभावाच्च विषमात् । (भ)

संलक्षितस्तु सूक्ष्मोऽर्थ आकारेणेङ्गितेन वा ।
कयापि सूच्यते भङ्गया यत्र सूक्ष्मं तदुच्यते ॥ ११६ ॥ (म)

सूक्ष्मः स्थूलमतिभिरसंलक्ष्यः । अत्राकारेण यथा—

"वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे ।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख ॥"

(वि, भ) उदाहृतश्लोकद्वयेपि एतद्गुणाग्रहणमुदाहरणद्वयवैलक्षण्यं चाह—पूर्वत्रेति । अतिरिक्तहृदयं रागभृत्तत्वेनातिरिक्तगुण हृदयं प्राप्तवत् प्राप्तप्रायं रक्तत्वं न निष्पन्नम्, नायकस्येत्यर्थः । इत्थमत्र प्रकृतेन नायकस्य प्रकृतस्य हृदयस्य गुणाग्रहण दर्शयित्वा प्रकृततोऽप्रकृतगुणग्रहणरूपफलाभावमुत्तरश्लोके दर्शयति—**उत्तरत्रेति** । यद्यपि राजहंसोप्यप्रकृतस्तथापि सम्बोध्यत्वेनाऽऽपेक्षिकं तस्य प्रकृतत्वं दर्शयन्नाह—**अप्रस्तुतप्रशंसायामिति** । सति हेतौ फलाभावरूपाया विशेषोक्तेरस्य भेदमाह—**अत्र चेति** । विशेषोक्तौ सामान्यत एव फलाभावः इह तु गुणाग्रहणरूपफलाभावरूपो भङ्गिविशेष इति भेद इत्यर्थ ।

ननु कार्यस्य कारणविरोधिगुणवशात् कार्यस्य कारणगुणाग्रहणं विषमालङ्कारेप्यस्ति चेद् यद्यपि दर्शितोदाहरणद्वये कार्यकारणभावसत्त्वात् तादृशस्याऽतद्गुणस्य विषमालङ्कारत्वाविशेष इत्याह—**वर्णान्तरेति** । विषमालङ्कारे कारणविरोधिगुणान्तरोत्पत्तिरिति भेद इत्यर्थः ।

(वि, म) सूक्ष्मालङ्कारमाह—**संलक्षित** इति । भङ्गया प्रकारविशेषेण सूच्यत इत्यर्थः । आकारः संस्थानम्, इङ्गितं क्रिया इत्यर्थः ।

(वि, य) वक्त्रस्यन्दि इति। काचिद् वयस्या सखी कस्याश्चिन्नायिकायाः कण्ठे वक्त्रस्यन्दिभिः स्वेदबिन्दुप्रवाहै. भिन्नं द्विधाकृतं कुङ्कुमं दृष्ट्वा तस्याः नायिकायाः पुंस्त्वं रतौ पुरुषायितत्वं व्यञ्जयन्ती स्मित्वा हसित्वा तस्याः पाणौ खड्गलेखां लिलेखे-

---

+ गाङ्गं गङ्गासम्बन्धि, अम्बु जलं, सितं शुभ्रम् । यामुनं यमुनासम्बन्धि जलं कज्जलाभं कज्जलतुल्यं कृष्णम् । हे राजहंस उभयत्र मज्जतः स्नानं कुर्वतस्तव शुभ्रता सैव एकैव न चीयते न वर्धते नच अपचीयते ह्रासमेति ।

अत्र कयाचित् कुङ्कुमभेदेन सलक्षित कस्याश्चित्पुरुषायित पाणौ पुरुषचिह्नखड्गलेखालिखनेन सूचितम्। (य)

इङ्गितेन यथा—

"सकेतकालमनस विट ज्ञात्वा विदग्धया।
हसन्नेत्रार्पिताकूत लीलापद्म निमीलितम्॥"

अत्र विटस्य भ्रूविक्षेपादिना लक्षित सङ्केतकालाभिप्रायो रजनीकालभाविना पद्मनिमीलनेन प्रकाशित। (र)

व्याजोक्तिर्गोपन व्याजादुद्भिन्नस्यापि वस्तुनः॥ १२०॥ (ल)

यथा—

"शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लस
दोमाञ्चादिर्विसष्टुलाखिलविधिव्यासङ्गभङ्गाकुल।
आ शैत्य तुहिनाचलस्य करयोरित्यूचिवान् सस्मित
शैलान्त पुरमातृमण्डलगणैर्दृष्टोवताद् व शिव॥" (व)

नेय प्रथमापह्नुति, अपह्नवकारिणो विषयस्यानभिधानात्। द्वितीयापह्नुते भेदश्च तत्प्रस्तावे दर्शित। (श)

स्येत्यर्थ। अत्रेति। सलक्षितमिति। प्रकृतरतौ स्वेदस्य पृष्टगामित्वेन सलक्षणम्।

(वि, र) सकेतकालेति। विट धूर्तम् उपनायक तद्जिज्ञासार्थं सकेतकालमनस ज्ञात्वा विदग्धया नायिकया हसता नेत्रार्पिताकूत यथा स्यात्तथा लीलापद्म निमीलितमित्यर्थ। कालाभिप्राय कालजिज्ञासा भ्रूविक्षेपश्चाऽऽद्यशब्दोपि योग्यतावल लभ्यमिङ्गितम्।

(वि, ल) व्याजोक्त्यलङ्कारमाह—व्याजेति। उद्भिन्नस्य व्यक्तभूतस्य व्याजात् कपटेन।

(वि, व) शैलेन्द्रेति। शिवो वोऽवतात्। वंदश। शैलेन्द्रेण प्रतिपाद्यमानाया उत्प्रेक्ष्यमानाया गिरिजाया हस्तस्य उपगूढेन उपगूहनेन स्पर्शेन उल्लसद्भि रोमाञ्चादिभि रोमाञ्चेपपुलवेदै विसष्टुलस्य व्यस्तस्य अखिलवैवाहिकविधे व्यासङ्गस्य व्यापारस्य भङ्गनाकुल सन् या आश्चर्यं तुहिनसम्बन्धिनोऽचलस्य करयो शैत्यम् इत्यूचिवान् सन् शैलान्त पुरेण तद्गतर्जाभि गौर्य्यादिमातृमण्डलेन स्वीयगणैश्च सस्मित दृष्ट।

(वि, श) प्रथमोक्तापह्नुतितोऽस्य भेदमाह—नेयमिति। अपह्नवकारिण इति। प्रकृतापह्नवकरी यो विषयो वस्तु स्थाप्यमानमप्रकृत वस्तु, तस्याऽनभिधानादित्यर्थ। इदमुपलक्षणम्, अपह्नवार्थपदस्य तमादरेणानभिधानादिति बोद्धव्यम्। अपह्नवस्य चेतस्यनभिधानाद् रोमाञ्चादेश्चानपह्नुतत्वादेव। द्वितीयापह्नुतेरिति।

स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम् ॥ १२१ ॥ *

दुरूहयोः कविमात्रवेद्ययोरर्थस्य डिम्भादेः स्वयोस्तदेकाश्रययोश्चेष्टारूपयोः।

(प) यथा मम—

"लाङ्गूलेनाभिहत्य क्षितितलमसकृद् दारयन्नग्रपद्भ्या-
मात्मन्येवावलीय द्रुतमथ गगनं प्रोत्पतन् विक्रमेण।
स्फूर्जद्[1]फुल्कारघोरः प्रतिदिशमखिलान् द्रावयन्नेष जन्तून्
कोपाविष्टः प्रविष्टः प्रतिबल[2]मरुणोच्छून्नचक्षुस्तरक्षुः॥" (स)

अद्भुतस्य पदार्थस्य भूतस्याथ भविष्यतः।

"गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन। यदि श्लेषेणान्यथा वाऽन्यथयेत् साप्यपह्नुतिः" इत्युक्तलक्षणात् "काले वारिधराणाम्" इत्युदाहरणाद् द्वितीयापह्नवादित्यर्थः। तत्प्रस्तावे दर्शित इति। गोपनीयार्थस्य गोपनकृता प्रथममभिहितत्वाच्च व्याजोक्तेरिति लिपनेन दर्शित इत्यर्थः। इह तु गोपनीयार्थस्य रोमाञ्चादेः शिवेन प्रथममनभिधानात्।

(वि, प) स्वभावोक्त्यलङ्कारमाह—**स्वभावोक्तिरिति**। दुरूहार्थेत्यस्याऽत्यन्तदुरूहस्यार्थस्येति नार्थः। किन्त्वर्थस्य दुरूहा क्रिया इत्येवमन्वयः। अर्थश्च डिम्भादिरित्येवमेव व्याचष्टे—**दुरूहयोरिति**। दुरूहयोः स्वयोरित्यन्वयः। दुरूहपदार्थमाह—**कविमात्रेति**। कविभिन्नाऽवेद्ययोरित्यर्थः। अर्थपदं डिम्भादिपरतया व्याचष्टे—**अर्थस्येति**। डिम्भः शिशुः। आदिपदादप्रकृष्टज्ञानमात्रपरिग्रहः। तदेकाश्रययोस्तन्मात्रनिष्ठयोः।

(वि, स) **लाङ्गूलेनेति**। अरुणे उच्छूने स्फारिते चक्षुषी यस्य तादृशः एष तरक्षुः व्याघ्रः प्रतिबलं प्रतिपक्षसमूहं प्रविष्टः। कीदृशः क्षितितलमसकृद् लाङ्गूलेनाऽभिहत्य अग्रपद्भ्या दारयन् विलिखन्। अथानन्तरं आत्मन्येवावलीय बुद्धिताङ्गो भूत्वा द्रुतं गगनं विक्रमेण च प्रोत्पतन् तथा स्फूर्जता विस्फुरता फूत्कारेण घोरः तथाऽखिलान् जन्तून् प्रतिदिशं द्रावयन् तथा कोपाविष्टोऽरुणोत्फुल्लचक्षुश्च। अत्रारुणेत्यादे रूपस्य क्रियाणां च वर्णनम्।

(वि, ह) भाविकालङ्कारमाह—**अद्भुतस्येति**। अथेतिवेत्यर्थः। भूतस्य

---

* स्वभावस्य वर्णनीयतत्तद्वस्तुमात्रगतस्य धर्मस्य उक्तिः स्वभावोक्तिः। जातिरिति प्राचीनानां व्यपदेशः।

1 'स्फूर्जद्भुङ्कारघोषः' (क. ग. पु)

2 प्रतिबल (क. घ. च. पु)।

यत्प्रत्यक्षायमाणत्व तद्भाविकमुदाहृतम् ॥ १२२ ॥ * (ङ)

यथा—

"मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भव ।
येनैक'चलुके दृष्टो दिव्यौ तौ मत्स्यकच्छपौ ॥" (क)

यथा वा—

"आसादञ्जनमत्रेति पश्यामि तव लोचने ।
भाविभूषणसम्भारां साक्षात्कुर्वे तवाकृतिम् ॥" (ख)

नचाय प्रसादाख्यो गुण । भूतभाविनो प्रत्यक्षायमाणत्वे तस्याहेतुकत्वात् । (ग) "नचाद्भुतो रस । विस्मय प्रत्यस्य हेतुत्वात् । (घ)

भविष्यतो वा अद्भुतस्य पदार्थस्य यत् प्रत्यक्षायमाणत्व प्रत्यक्षेण दृश्यमानत्व वर्णित तदित्यर्थ ।

(वि, क) मुनिरिति । एकचलुके पीयमानसमुद्ररूपे गण्डूषे मत्स्यकच्छपावीश्वरावतारौ भूतभाविनौ योगबलेन दृष्टौ । एतदर्थमेव योगीन्द्रपदोपादानम् ।

(वि, ख) आसीदिति । यौवनेऽञ्जनाभावेऽपि अञ्जनशोभासत्त्वादासादिति । भूषणेन भविष्यन्त्या शोभाया तद्विनापि दर्शनाद् भाविभूषणेति ।

(वि, ग) ननु भूतभाविनो प्रत्यक्षायोग्ययोरपि प्रत्यक्षायमाणत्व शीघ्रप्रतीतिविषयत्वात् । नथाचेदर्थस्य विषयत्वेन शब्दवाच्योपि सोर्था विशद एव । तथा चार्थवैमल्य प्रसादो य परोक्ष प्रसादगुण स एवाय तद्भिन्नवैचित्र्यविशेषाभावाद् भाविकनामालङ्कारे नास्तीत्याशङ्कते—न चायमिति । समाधत्ते—भूतभाविनोरिति । तयो प्रत्यक्षायमाणत्वे प्राप्ते तस्य प्रत्यक्षायमाणत्वस्याहेतुकत्वादहेतुकत्वस्फुरणादित्यर्थ । तथा चाहेतुकत्वस्फुरणवैशिष्ट्यरूपवैचित्र्यमेव भाविकालङ्कार इत्युक्तम् ।

(वि, घ) नन्वहेतुकत्वेन हेत्वनुसन्धान विस्मय एव, तथा चाद्भुतरस एवाय मित्याशङ्कते—नचाद्भुत इति । समाधत्ते—विस्मय प्रतीति । अहेतुकत्वज्ञानविशिष्ट भाविभूतवस्तुप्रत्यक्षायमाणत्वमेवायमलङ्कार । तस्य विस्मय प्रति हेतुत्वादेव, ननु विस्मयरूपत्वादित्यर्थ । तथा नचाय रसोऽद्भुतोलङ्कारस्तु भाविकमिति भाव ।

---

* कारगतो भाव आराय धीरि प्रतिबिम्बत्वेनास्तीति' 'भावो वा भावना पुन पुनश्चेतसि निवेशन सम्यक्स्फुरणमिति भाविकम् ।'

' पुनर्हे' (क ग ङ)

नचातिशयोक्तिरलङ्कार, अध्यवसायाभावात्। नच भ्रान्तिमान्, भूत-भाविनोर्भूतभाविनैव प्रकाशनात्। (ङ) अन्य स्वभावोक्ति, लक्षणलौकिक-वस्तुगतसूक्ष्मधर्मस्वभावस्येव यथावद् वर्णन स्वरूपम्। अस्य तु वस्तुन प्रत्यक्षायमाणत्वरूपो विच्छित्तिविशेषोऽस्तीति। यदि पुनर्वस्तुन क्वचित् स्वभावोक्तावप्यस्या विच्छित्ते सम्भवस्तदोभयो सङ्कर। (च)

"अनातपत्रोऽप्ययमत्र लक्ष्यते
सितातपत्रैरिव सर्वतो वृत।
अचामरोप्येष सदैव वीज्यते
विलासवालव्यजनेन कोप्ययम्॥" (छ)

अत्र प्रत्यक्षायमाणस्यैव वर्णनान्नायमलङ्कार। वर्णनावशेन

(वि, ङ) नायिकाया रूपातिशयप्रतीत्या उक्तचतुर्विधातिशयोक्तितोऽतिरिक्त प्रकारातिशयोक्तिरेवेय स्यादित्याशङ्कते—**नचातिशयेति**। समाधत्ते—**अध्यव सायेति**। सर्वविधातिशयोक्त्य एवाध्यवसायघटिता। अत्र तदभावात्तदूपातिशय बोधमात्रेण तदीयप्रकारान्तरकल्पनाऽनौचित्यादिति भाव। भूते भाविनि रूपे भूत-भावित्वेन ज्ञापनात् भ्रान्तिमत्त्वमाशङ्कते—**न च भ्रान्तीति**। समाधत्ते—**भूतेति**। प्रकृत स्यान्यतादात्म्यभ्रम एव भ्रान्तिमान्न चात्राभूतभाविपदार्थो प्रकृतास्तत्र भूतभाविता-विभ्रम। किन्तु भूतभाविपदार्थं प्रकृत्य तत्रैव तथात्वप्रकाशनादित्यर्थ। रूपविशे-षवन्नायिकामात्रधर्मयोरत्र नयनाकृत्योर्वर्णितत्वात्।

(वि, च) स्वभावोक्तिमाशङ्कते—**नचेति**। समाधत्ते—**तस्या इति**। लौकिक वस्तु डिम्भव्याघ्रादि तद्गतस्य सूक्ष्मधर्मात्मकस्वभावस्य कविभिन्नजनावेद्यतन्मात्र-वृत्तिधर्मरूपस्य तत्र यथा वर्णित तस्य स्वरूपमित्यर्थ। अत्र नूतनतेत्याह—**अस्य-त्विति**। तदपेक्षया अत्र विलक्षणभङ्गिरस्तीत्यर्थ। ननु

'अस्फुटाक्षरवागासीदेष बालो विलोक्यते।
दरदन्ताङ्कुरश्रीकहासो भावी च दृश्यते॥'

इत्यत्र डिम्भमात्रक्रियादेर्भाविभूतस्य कोऽलङ्कार स्यादिति मनसिकृत्य समाधत्ते—**यदि पुनरिति**। सकर स्वातन्त्र्येणैकत्र स्थितिरूप।

(वि, छ) यत्र भूतभाविवस्तुनोर्न प्रत्यक्षायमाणत्व किन्तु तद्वस्तुन एव प्रत्य क्षायमाणत्व वर्णित तत्र नायमलङ्कार इत्युदाहृत्य दर्शयति—**अनातपत्रोऽपीति**। आतपत्ररहितोप्यय राजा सर्वदिक्षु सितातपत्रै सर्वतो वेष्टित इव लक्ष्यते, वीज्यत इत्यर्थ। दीप्यमानश्रीकत्वात्। एवमचामररचामररहितोप्येष सदैव विलासहेतुक व्यजनेन वीज्यमान इव लक्ष्यते इति पूर्वतोऽनुपङ्ग, शीतलाङ्गत्वात्।

(वि, ज) **अनेति**। प्रत्यक्षायमाणस्यैवेत्यत्राऽतपत्रवृतत्वस्य वाज्यमानत्वस्य

प्रत्यक्षायमाणत्वस्यास्य स्वरूपत्वात् । यत्र पुनरप्रत्यक्षायमाणस्यापि वर्णने प्रत्यक्षायमाणत्वं तत्रायमलङ्कारो भवितुं युक्तः । यथोदाहृते आसीदक्षन्नमित्यादौ । (ज)

लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते ।
यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत् ॥ १२३ ॥ (झ) ×

क्रमेणोदाहरणम्—

"अधःकृताम्भोधरमण्डलानां यस्यां शशाङ्कोपलकुट्टिमानाम् ।
ज्योत्स्नानिपातात्त्वरतां पयोभिः केलीवनं वृद्धिमुरीकरोति ॥" (ञ)

"नाभिप्ररूढाम्बुरुहासनेन, संस्तूयमानः प्रथमेन धात्रा ।
असुं युगान्तोचितयोगनिद्रः संहृत्य लोकान् पुरुषोऽधिशेते ॥" (ट)

चेत्यर्थः । एवकारात् भूतभाविव्यवच्छेदान्नतु भूतभाविपदार्थस्य प्रत्यक्षायमाणत्वमित्यर्थः । अत्र श्लोके तथात्वाभावं विशदयित्वा दर्शयति—वर्णनावशेनेति । अत्र स्वरूपत्वात्, एतत् श्लोकार्थस्वरूपत्वात्, ननु भूतभाविपदार्थस्य प्रत्यक्षायमाणत्वमित्यर्थः । भविष्यलङ्कारे तु भूतभावित्वघटनावशाद् विशेषान्तरमप्यस्तीत्याह—यत्र पुनरिति । प्रत्यक्षायमाणत्वं पर्यवस्यतीत्यर्थः । अनातपत्रोपीत्यत्र तु तेजोविशेषाच्छत्रत्वाद्यारोपोऽनुमानमेवेति भेद इत्यर्थः । तथा चात्र विरोधालङ्कार एव इति बोध्यम् ।

(वि, झ) उदात्तालङ्कारं द्विविधमाह—लोकेति । यद्वेति । महतां चरितं वा प्रस्तुतस्याङ्गं प्रकर्षकं यदा भवेदित्यर्थः ।

(वि, ञ) अधः कृतेति । यस्या पुरि अधःकृतमम्भोधराणां मेघानां मण्डलं यैस्तादृशानां चन्द्रज्योत्स्नानिपातात् त्वरतां शशाङ्कोपलकुट्टिमानां चन्द्रकान्तमणिमयगृहाणां पयोभिः केलीवनं वृद्धिमुरीकरोति प्राप्नोतीत्यर्थः । जलसेकेन वर्धितमित्यर्थः । अधःकृतेत्यादिकं कुट्टिमविशेषणम् । मण्डलायामिति क्वचित् पाठः । कुट्टिमैरधःकरणमेव पुर्या अधःकरणं बोध्यम् । अत्रैतादृशकुट्टिमवतो नृपस्य लोकातिशयसम्पत्तिवर्णना ।

(वि, ट) नाभिप्ररूढेति । युगान्तोचितयोगनिद्रः, युगान्ते उचिता योगनिद्रा यस्य सः पुरुषो विष्णुर्लोकान् संहृत्य असुं समुद्रम् अधिशेते । कीदृशः, प्रथमेन धात्रा आदिब्रह्मणा संस्तूयमानः । धात्रा कीदृशेन नाभिप्ररूढाम्बुरुहासनेन—नाभिस्थेन अतिस्फुटपद्मस्थितेन, अत्र नयनरविणा आसनासङ्कोचनम् । लोकसंहारात् सूर्याभावेऽपि नयनरविणा पद्मविकास इति भावः । अत्र वर्णनीयोऽम्भोधिः प्रस्तुतस्तस्य प्रकर्षकमीदृशं अत्र स्तूयमानेत्यादिविष्णुशयनरूपं तच्चरितम् ।

× उदात्तालङ्कारे द्विविधः । लोकमतिशेते अतिक्रामति या सम्पत्तिस्तस्या वर्णना समम्भाव्यमानायाः सम्पत्तेर्वर्णनमुदात्तमेकम् । महतां गुणादीनां च चरितं यदि प्रस्तुतस्य वर्णनीयस्य अङ्गमुपकारकं भवेतदप्यपरमुदात्तम् ।

रसभावौ तदाभासौ भावस्य प्रशमस्तथा ।
गुणीभूतत्वमायान्ति यदालङ्कृतयस्तदा ।
रसवत् प्रेय ऊर्जस्वि समाहितमिति क्रमात् ॥ १२४ ॥ (ठ)

तदाभासौ रसाभासो भावाभासश्च । तत्र रसयोगाद्रसवदलङ्कारो यथा—अयं स रसनोत्कर्षीत्यादि । अत्र शृङ्गारः करुणस्याङ्गम् । एवमन्यत्रापि । प्रकृष्टप्रियत्वात् प्रेयः । यथा मम

"आमीलितालसविवर्तिततारकाक्षीं
मत्कण्ठबन्धनदरश्लथबाहुवल्लीम् ।
प्रस्वेदवारिकणिकाचितगण्डबिम्बां
सस्मृत्य तामनिशमेति न शान्तिमन्तः ॥" (ड)

अत्र सम्भोगशृङ्गारः स्मरणाख्यभावस्याङ्गम् । सच विप्रलम्भस्य । (ढ) ऊर्जो बलम् । अनौचित्यप्रवृत्तौ तदस्तीत्यूर्जस्वी । यथा (ण)

(वि, ठ) इदानीं रसाद्यलङ्कारमाह—**रसभावाविति** । रसस्याङ्गत्वे रसवान् । भावस्याङ्गत्वे प्रेयान् । आभासयोरङ्गत्वे ओजस्वी । भावप्रशमस्याङ्गत्वे समाहितमिति क्रम. ।

(वि, ड) प्रियशब्दात्प्रकर्षार्थे इयसुन्प्रत्ययेन साधितस्य प्रेयःशब्दार्थमाह । **प्रकृष्टप्रियत्वादिति** । तत्र भावस्य रसाङ्गत्वे प्रेयोऽलङ्कारमुदाहरति—**आमीलितेति** । नायिकाया रत्युत्तरावस्था स्मृत्वा चिन्तयतो विरहिण उक्तिरियम् । तां रत्युत्तरावस्था प्रिया सस्मृत्य तिष्ठतो ममान्तर्मानसमनिशमेव न शान्तिमेति । कौद्दशावस्था रतिप्रशमादामीलिता अलसाद् विवर्तिता च तारका यत्र तत् तादृशमक्षि यस्या. तादृशीम् । मत्कण्ठबन्धने दरश्लथा चाल्पशिथिला बाहुवल्ली यस्याः तादृशीं, प्रस्वेदवारिकणिकया आचितगण्डबिम्बा च ।

(वि, ढ) **अत्रेति** । अत्र स्मरणस्य वाच्यत्वेन गुणीभूतव्यङ्ग्यभावेऽपि गुणीभूतवाच्यस्याप्यलङ्कारत्वमभिप्रेत्येदमुक्तम् । वस्तुतस्तु स्मरणपदमत्र स्मरणव्यञ्जकचिन्तापरम् । स्मरणस्य वाच्यत्वेन तस्य विप्रलम्भाङ्गतोपपत्ते. । व्यङ्ग्यत्वे सत्येवापराङ्गत्वादपराङ्गस्यैव चालङ्कारत्वस्य काव्यप्रकाशकृदादिसर्नालङ्कारिकसम्मतत्वात् । तथाच सम्भोगश्च शृङ्गारचिन्तायाः अङ्गमित्यर्थ. । सम्भोगकालावस्थाया· चिन्तितत्वात् । अनाशे रसवदलङ्कार एव । **सचेति** । सच चिन्ताख्यो व्यभिचारिभावो विप्रलम्भस्याङ्गमित्यर्थ. । चिन्तया विप्रलम्भाधिक्यात् । अत्र प्रेयोलङ्कारः ।

(वि, ण) ऊर्जस्विपदार्थं व्याकुर्वाणस्तमुदाहर्तुमाह—**ऊर्जो बलमिति** । क्वचिदनौचित्यप्रवृत्तौ तदस्तीत्याह—**अनौचित्येति** । तेन बलात्कारं विना परो-

"वनेऽखिलकलासज्ञाः परिहृत्य निजस्त्रियः।
त्वद्वैरिवनितावृन्दे पुलिन्दाः कुर्वते रतिम् ॥"

अत्र शृङ्गाराभासो राजविषयरतिभावस्याङ्गम्।

एवं भावाभासोपि। (त)

समाहितं परिहारः। यथा—

"अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः।
दृष्टे तव वैरिणां मदः स गतः क्वापि तवेक्षणे क्षणात् ॥" (थ)

अत्र मदाख्यभावस्य प्रशमो राजविषयरतिभावस्याङ्गम्। (द) *

ङाप्रवृत्तौ तदभावेपि संज्ञाशब्दस्यास्य प्रायिकी व्युत्पत्तिर्दर्शिता। अत्र बलात्कार एव उदाहरति—**वनेऽखिलेति**।

(वि, त) वने त्वद्वैरिवनितावृन्दे पुलिन्दा निजस्त्रियः परिहृत्य रतिं कुर्वते। निजस्त्रीपरिहारे बीजमाह—**अखिलेति**। आसामखिलकामकलावेत्तृत्वात् तदासक्ता इत्यर्थः। **अत्रेति**। वैरिस्त्रीविडम्बनेन राज्ञः प्रकर्षात् तत एव तद्विषयभावप्रकर्षाच्चेत्यर्थः। एवं भावाभासेपीति यथा—

"किं ब्रूमस्ते महाराज माहात्म्यमन्यदुर्लभम्।
स्तुवन्ति शत्रवस्त्वां हि कुड्मलीकृतपाणयः ॥" इति

अत्र शत्रुस्तुत्या तदीयरतिभावाभासो राजविषयरतिभावस्याङ्गम्।

(वि, थ) परिहार इति—प्रथमोत्पन्नभावस्य परिहारस्त्यागो नाशपर्यवसानः। **अविरलेति**। मदो गर्वः तद्दर्शने तेषामविरलेत्यादिकं हेतुः। तवेक्षणे तवदर्शने सति क्षणात् स मदः क्वापि गतो न दृष्ट इत्यर्थः।

(वि, द) अत्र मदाख्यस्येति। यद्यपि तत्प्रशमोपगतपदस्य लक्ष्यार्थेन मदस्य चात्यन्ताभावेन तत्प्रशमस्य लक्षणीयता तथापि गुणीभूतव्यङ्ग्यस्यैव गुणीभूतस्य लक्ष्यार्थस्याप्यलङ्कारत्वमभिप्रेत्येदमुक्तम्। वस्तुतस्तु अपराङ्गभूतव्यङ्ग्यस्यैव रसवदलङ्कारत्वं काव्यप्रकाशकृदादिसकलालङ्कारिकसम्मतं न गुणी-

---

* हे राजन् अविरलं निरन्तरं करवालस्य खड्गस्य कम्पनैः भ्रुकुटीभिः तर्जनैः गर्जनैश्च (अभेदे तृतीया) तद्रूपैः तव वैरिणां यो मदः मदकार्यम् अस्माभिः मुहुर्वारं वारं दृष्टः स मदः तवेक्षणे तव दर्शने सति क्षणात् क्वापि गत इत्यर्थः। नच मदो गत इत्यनेन स वाच्य एवेति वाच्यम्, अभेदार्थकतृतीयान्यां कल्पनायामग्रे मद इत्यर्थे गर्वाख्यभावपरत्वात् गर्वप्रशमो व्यङ्ग्य एव। गर्वकार्यकम्पनादेः प्रशमे सति गर्वस्य प्रशमो व्यङ्ग्य एव। श्लोकेयं भावप्रशमोदाहरणे काव्यप्रकाशे प्रदत्तः। अनो टीकाकृतो युक्तिर्न सङ्गता। एवमन्यत्रापि बोध्यम्।

भावस्य चोदये सन्धौ मिश्रत्वे च तदाख्यकाः ॥ १२५ ॥ (ध)

तदाख्यका भावोदयभावसन्धिभावशबलनामानोऽलङ्काराः । क्रमेणोदाहरणम् ।

"मधुपानप्रवृत्तास्ते सुहृद्भिः सह वैरिणः ।
श्रुत्वा कुतोऽपि त्वद्बाम क्षोभिरे विषमां दशाम् ॥"

अत्र त्रासोदयो राजविषयरतिभावस्याङ्गम् । (न)

"जन्मान्तरीणरमणस्याङ्गसङ्गसमुत्सका ।
सलज्जा चान्तिके सख्याः पातु नः पार्वती सदा ॥"

अत्रौत्सुक्यलज्जयोश्च सन्धिर्देवताविषयरतिभावस्याङ्गम् । (प)

"पश्येत् कश्चिच्चल चपल रे ! का त्वराहं कुमारी
हस्तालम्बं वितर हहहा व्युत्क्रमः क्वासि यासि ।
इत्थं पृथ्वीपरिवृढ ! भवद्विद्विषोऽरण्यवृत्तेः
कन्या काचित्फलकिसलयान्याददानाभिधत्ते ॥"

अत्र शङ्कासूयाधृतिस्मृतिश्रमदैन्यविबोधौत्सुक्यानां शबलता राजविषयरतिभावस्याङ्गम् । (फ)

भूतलक्ष्यार्थस्य । तदा अत्रैव श्लोके कवेरतिरूपो भावस्तस्यैव तन्मदनाशाप्राप्तो व्यङ्ग्यः । स एवात्र समाहितालङ्कारो बोध्यः ।

(वि, ध) भावोदयादयस्तु गुणीभूताः स्वस्वनामान एवाऽलङ्कारा इत्याह—**भावस्य चोदये** इति । मिश्रत्वे भावशबलत्वे । बलवद्भिरुत्तरोत्तरभावैः सह पूर्वपूर्वभावस्यैकपदस्थितिरूपमिश्रणात् ।

(वि, न) तत्रापराङ्गभावोदयमुदाहरति—**मधुपानेति** । **अत्रेति** । प्रथमज्ञातस्य त्रासस्य श्लोकमध्ये उदयप्रतीक्षा उदयः सराजविषयभावप्रकर्षैकमङ्गम् ।

(वि, प) अपराङ्गभावसन्धिमुदाहरति—**जन्मान्तरीणेति** । **अत्रेति** । औत्सुक्यलज्जयोरलङ्कारत्वमत्रोदाहृतम् ।

"असोढा तत्कालोल्लसदसहभावस्य तपसः
कथानां विश्रम्भेष्वथ च रसिकः शैलदुहितुः ।
प्रमोदं वा दित्सात्कपटचटुवेशापनयने
त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः ॥"

इति काव्यप्रकाशकृदुदाहरणे आवेगहर्षयोर्व्यङ्ग्ययोरपि सन्धिरलङ्कारः ।

(वि, फ) अपराङ्गभावशबलत्वमुदाहरति—**पश्येत्कश्चिदिति** । हे पृथ्वीपरिवृढ ! अरण्यपरिवृत्तेर्भवद्विद्विषः भक्षणार्थं फलकिसलयानि आददाना कश्चिदर्थादाकृष्टकामा इत्थमभिधत्ते । कीदृशमभिधत्ते इत्यत्राह—**पश्येदित्यादि** । अत्र पश्येदित्यत्र शङ्का व्यङ्ग्या । चल चपल रे इत्यत्र धृतिः । कुमारीत्यत्र कुमारीत्वस्म-

इह केचिदाहुः—वाच्यवाचकरूपालङ्करणमुखेन रसाद्युपकारका एवालङ्काराः। रसादयस्तु वाच्यवाचकाभ्यामुपकार्या एवेति न तेषामलङ्कारता भवितुं युक्तेति। अन्ये तु रसाद्युपकारमात्रेणेहालङ्कृतिव्यपदेशो भाक्तश्चिरन्तनप्रसिद्ध्याऽङ्गीकार्य एवेति। (व)

अपरे च रसाद्युपकारकतामात्रेणालङ्कारत्वं मुख्यतो, रूपकादौ तु वाच्याद्युपधानमजागलस्तनन्यायेनेति। (भ)

अभियुक्तास्तु स्वव्यञ्जकवाच्यवाचकाद्युपकृतैरङ्गभूतै रसादिभिरङ्गिनो रसादेर्वाच्यवाचकोपस्कारद्वारेणोपकुर्वद्भिरङ्गकृतिव्यपदेशो लभ्यते। (म)

रणात् कार्यत्वस्मृतिः, का त्वरेत्याश्वासना। हस्तालम्बामेत्यत्र ममेदमकार्यमेवेत्यवधारणरूपा मतिरेव विबोधः। कासीत्यत्र क्व त्वं यासीत्यर्थः। अत्र तद्गमननिवर्तने औत्सुक्यं व्यङ्ग्यम्। अत्र दैन्यविरोधमात्रयोर्न वाध्यबाधकता। अन्येषु तु पूर्वं पूर्वं प्रत्युत्तरोत्तरस्य बाधकत्वेन बलवत्तया शबलता। राजविषयरतिभावस्याङ्गमिति राजप्रकान्तत्वात्तदरिकन्याया एवं भावात्।

(वि, व) **वाच्यवाचकरूपेति**। वाच्यवाचकयोरूपमर्थशब्दस्वरूपं, तयोरलङ्करणं शोभनम्, उपमानुप्रासादयः। तन्मुखेन तद्द्वारेणेत्यर्थः। **रसादयस्त्विति**। अपराङ्गभूता रसादय इत्यर्थः। अपराङ्गानां रसादीनामलङ्कारत्वं स्वीकुर्वतामन्येषां तु मतमाह—**अन्ये त्विति**। वाच्यवाचकशोभनद्वारा मुख्यरसस्योपकारकत्वप्रयोजकमिति न नियमः। किन्तु मुख्यरसोपकारकत्वमेव तथात्वप्रयोजकम्। किन्त्वर्थशब्दालङ्कारकत्वेन व्यवहारवशात्तयोरलङ्कारेष्वेवालङ्कारपदं शक्यम्। अपराङ्गरसादौ त्वलङ्कारपदं भाक्तमित्यर्थः, भाक्तं लाक्षणिकम्।

(वि, भ) अपराङ्गरसादावपि अलङ्कारपदं शक्यमेव न भाक्तमिति वदतां मतमाह—**अपरे चेति**। रसाद्युपकारकतामात्रेणेत्यनेनोपमादीनामिवापराङ्गरसादीनामपि मुख्यतो मुख्यभावेनैवालङ्कारकत्वं न भाक्तालङ्कारपदार्थत्वेनेत्युक्तम्। तथा चोभयत्रैवालङ्कारपदं शक्तमित्यर्थः। ननु सर्वेषामेवालङ्कारपदवाच्यत्वे रूपकादावेवालङ्कारव्यवहारः कथमित्यत्राह—**रूपकादाविति**। वाच्याद्युपधानं वाच्यतादर्शनमजागलस्तनपानमिव निष्प्रयोजनमित्यर्थः।

(वि, म) **अभियुक्तास्त्विति**। एतन्मतेऽपि द्वयोरप्यलङ्कारपदवाच्यत्वमेव। किन्तु पूर्वमते रसाद्युपकारकद्वारता तत्रापेक्षणीया। एतन्मते तु उपमादेरिवाङ्गभूतरसादेरपि शब्दार्थोभयोपकारकद्वारैव रसोपकारकतयाऽलङ्कारपदवाच्यतेति विशेषः। तदाह—**स्वव्यञ्जकेति**। स्वस्याङ्गभूतरसादेर्व्यञ्जकौ वाच्यवाचकौ ताभ्यामुपकृतैरङ्गभूतरसादिभिर्वाच्यवाचकोपस्कारद्वारेणोपकुर्वद्भिरर्थादङ्गिनं रसमुपकुर्वद्भिरलङ्कृतिव्यपदेशो लभ्यत इत्यर्थः। अङ्गभूतरसादीना शब्दार्थाभ्यामुपकारो [illegible]

समासोक्तौ तु नायकादिव्यवहारमात्रस्यैवालङ्कृतिता न त्वास्वादस्य, तस्योक्तरीतिविरहादिति मन्यन्ते। अत एव ध्वनिकारेणोक्तम्-(य)

'प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥' (र) †

यदि च रसाद्युपकारमात्रेणालङ्कृतित्वं तदा वाचकादिष्वपि तथा प्रसज्येत। एवं च यच्च कैश्चिदुक्तं "रसादीनामङ्गित्वे रसवदाद्यलङ्कारः, अङ्गत्वे तु द्वितीयोदात्तालङ्कारः, तदपि परास्तम्। (ल)

यद्येत एवालङ्काराः परस्परविमिश्रिताः।
तदा पृथगलङ्कारौ संसृष्टिः सङ्करस्तथा॥ १२६॥ (व)

तैः शब्दार्थयोरुपकारस्तद्व्यङ्ग्यत्ववैशिष्ट्येनेति परस्परमुपकारो दर्शित।

(वि, य) समासोक्तौ तु यो नायकनायिकाव्यवहारो व्यङ्ग्यस्तस्य रसाद्युपकारनिरपेक्षमेवालङ्कारत्वमित्याह—**समासोक्ताविति**। इदमुपलक्षणमप्रस्तुतप्रशंसायामपीदृशत्वं बोध्यम्। **अत एवेति**। अङ्गभूतरसादेरप्यलङ्कारपदवाच्यत्वादेवेत्यर्थः।

(वि, र) **प्रधाने** इति। यत्र काव्ये प्रधाने अङ्गिनि अन्यत्र रसादिरूपे रसादयोऽङ्गमित्यर्थः। अङ्गत्वैक्याश्रितमेकवचनम्। तस्मिन् काव्ये रसादिरलङ्कारोऽलङ्कारपदवाच्य इति मे मतिरित्यर्थः।

(वि, ल) ननु कटककुण्डलादेरलङ्कारत्वमङ्गप्रकर्षकत्वेनैव, अत उक्तन्यायादङ्गरसादेरुपमादेर्वालङ्कारत्वमस्तु। समासोक्तेस्त्वङ्गिरसादिप्रकर्षकत्वाभावाच्चालङ्कारत्वमित्यत आह—**यदीति**। क्वचिदङ्गिप्रकर्षकत्वेन समासोक्तौ तु स्वतो वैचित्र्येणैवालङ्कारत्वं, ननु अङ्गिप्रकर्षकत्वं तल्लक्षणम्। तथात्वे अतिव्याप्तिः स्यादित्यर्थः। केचित्तु अङ्गिरसस्यैव रसवदलङ्कारादित्वमङ्गभूतरसादेस्तु 'यद् व्यङ्ग्यं प्रस्तुतस्याङ्गं महतां चरितं भवे'दित्यनेनोक्तं द्वितीयोदात्तालङ्कारत्वमेवाहुः। एवं ध्वनिकारोक्तसम्वादेन अस्मद्दर्शितोदाहरणेऽव्याप्तेश्च तत्परास्तामित्याहुः। "आमीलितालसविवर्तिततारकाक्षी" इत्यत्र यः स्मरणाख्यभावो विप्रलम्भाङ्गत्वेनोक्तस्तस्य कस्यापि महतश्चरितत्वाभावेनोदात्तालङ्कारत्वस्य तदाव्याप्तेः।

(वि, व) इदानीमनेकालङ्काराणामेकपदस्थितिरूपमिश्रणे क्वचित् संसृष्टिनामा क्वचिच्च सङ्करनामा पृथगलङ्कारो भवतीत्याह—**यद्येत एवेति**। पृथगलङ्कारावपीत्यर्थः। तेन मूलभूतालङ्कारव्यवच्छेदस्तथा च समासोक्तौ यदौपम्यगर्भत्वाद्यनेकालङ्कारगर्भ-

---

† यस्मिन् काव्ये ते पूर्वोक्ता रसादयोऽङ्गभूता वाक्यार्थीभूतश्चान्ये, तस्य काव्यस्य सम्बन्धिनो ये रसादयोऽङ्गभूतास्ते रसवदाद्यालङ्कारशब्दस्य विषयाः। स एवालङ्कारशब्दवाच्यो भवति। नत्वन्य इति यावत्। (लोचने)

यथा लौकिकालङ्काराणामपि परस्परमिश्रणे पृथक् चारुत्वेन पृथगलङ्कारत्व तथोक्तरूपाणां काव्यालङ्काराणामपि परस्परमिश्रत्वे ससृष्टिसङ्कराख्यौ पृथगलङ्कारौ। तत्र—

मिथोऽनपेक्षयैतेषा स्थिति' ससृष्टिरुच्यते ॥ १२७ ॥

एतेषा शब्दार्थालङ्काराणाम्। यथा—

"देव पायादपायान्न स्मेरेन्दीवरलोचन ।
ससारध्वान्तविध्वसहस कसनिषूदन ॥"

अत्र पायादपायादिति यमकम् । ससार इत्यादौ चानुप्रास इति शब्दालङ्कारयो ससृष्टि । द्वितीये पादे उपमा द्वितीयार्धे च रूपकमित्यर्थालङ्कारयो ससृष्टिश्च। एवमुभयो स्थितत्वाच्छब्दार्थालङ्कारससृष्टि । (श)

अङ्गाङ्गित्वेऽलङ्कृतीना तद्वदेकाश्रयस्थितौ।
सन्दिग्धत्वे च भवति सङ्करस्त्रिविध पुन ॥ १२८ ॥ (प)

अङ्गाङ्गिभावो यथा— (स)

"[1]आकृष्टवेगविगलद्भुजगेन्द्रभोग
निर्मोकपट्टपरिवेष्टनयाम्बुराशे ।

त्वमुक्त, यचान्यत्राप्यलङ्कारान्तरोत्थापितत्वे तदलङ्कारस्य शोभाधिक्यमुक्त, तत्र सङ्कर सम्भवेऽपि न समासाक्त्याद्यलङ्कारत्वव्याहतिरिति बोध्यम्।

(वि, श) तत्र ससृष्टिलक्षणमाह-**मिथोऽनपेक्षयैतेषामिति** । देव पायादित्यादि सष्टोदाहर्त्य । हस सूर्य । अत्र शब्दालङ्कारयो ससृष्टिमादौ दर्शयति-**अत्र पायादिति । ससारेत्यादावनुप्रास** इति । ध्वान्तविध्वसहसेत्यत्रेत्यर्थ । अत्रैवार्थालङ्कारयोरपि ससृष्टिमाह--**द्वितीयपाद** इति । लोचने स्मेरेन्दावरोपमा । **द्वितीयार्धे** इति । कसनिषूदने सूर्यरूपकम्। तत्साधक च ससारो ध्वान्तरूपकमिति परम्परितरूपकमित्यर्थ । एव च ससृष्टिद्वयमित्याह-**उभयोरपीति । ससृष्टिश्चेति**। चकारस्य स्थितत्वाच्चेत्येवमन्वय । तत् ससृष्टिद्वयस्यापि परस्परससृष्टिमित्याह— **एव चेति ।**

(वि, प) सङ्करस्य त्रिविधो भवतीत्याह—**अङ्गाङ्गित्वे** इति । अलङ्कृतीना मङ्गाङ्गित्व एकविध । अपरविधमाह—**तद्वदिति**—एकाश्रये एकवाक्ये वा अलङ्कृतीना स्थितावित्यर्थ । अपरविधमाह—**सदिग्धत्वे चेति** । अलङ्कारद्वयस्य सन्देहे कोटिद्वयत्व इत्यर्थ ।

(वि, स) अङ्गाङ्गिभावो यथेति । यद्यप्यङ्गाङ्गिभावो जन्यजनकभाव प्रक्रम्यप्रकर्षकभावो ज्ञाप्यज्ञापकभावश्चेति त्रिविधस्तथापि ज्ञाप्यज्ञापकभावरूपमेवोदाहरति ।

---

1 'आकृष्टि' (क पु)

मन्थव्यथाव्युपशमार्थमिवाशु यस्य
मन्दाकिनी चिरमचेष्टत[1] पादमूले ॥" (ङ)

अत्र निर्मोकपट्टापह्नवेन मन्दाकिन्या आरोप इत्यपह्नुतिः । सा च मन्दाकिन्या वस्तुवृत्तेन यत्पादमूलवेष्टनं तच्चरणमूलवेष्टनमिति श्लेषमुत्थापयतीति तस्याङ्गम् । श्लेषश्च पादमूलवेष्टनमेव चरणमूलवेष्टनमित्यतिशयोक्तेरङ्गम् । अतिशयोक्तिश्च "मन्थव्यथाव्युपशमार्थमिव" इत्युत्प्रेक्षाया अङ्गम् । उत्प्रेक्षा चाम्बुराशिमन्दाकिन्योर्नायकनायिकाव्यवहारं गमयतीति समासोक्तेरङ्गम् । (क)

(वि, ङ) आकृष्टवेगेति—मन्दरपर्वतवर्णनमिदम् । यस्य मन्दरपर्वतस्य पादमूलेऽधोभागरूपमूले एव श्लेषेण चरणस्य मूले प्रान्ते मन्दाकिनी अचेष्टत सेवारूपा चेष्टामकरोदित्यर्थः । किमर्थमित्यत्रोत्प्रेक्षते—**अम्बुराशेर्मन्थव्यथाव्युपशमार्थमिवेति** । मम पत्युरम्बुराशेर्मन्थजन्याया व्यथाया आशु शीघ्रं व्युपशमाय इत्येव तदर्थमिवेत्यर्थः । मन्थतो निवृत्तस्य तेनैव पूर्वं जनिता मन्थव्यथा आशु नंक्ष्यतीत्येवंरूपा प्रार्थना । ननु मन्दाकिनी मन्थनात्पूर्वमपि मन्दरस्य पादमूले वर्तते । इदानीं किंविधया चेष्टया सेवते इत्यत्राह—**आकृष्टवेगेति** । भावक्तान्तत्वाद् आकर्षणवेगेन विगलन् यो रज्जुभूतस्य भुजगेन्द्रस्य वासुकेर्भोगात् कायान्निर्मोकश्चर्मकञ्चुकं तद्रूपस्य पट्टस्य वस्त्रविशेषस्य परिवेष्टनया उद्वेष्टनप्रकारेणेत्यर्थः । नेदं चर्मकञ्चुकपदवेष्टनं, किन्तु मन्दाकिन्येव परितः पादमूलं सेवार्थं वेष्टितवतीत्यर्थः ।

(वि, क) तत्र प्रथमापह्नुतिं दर्शयति—**निर्मोकेति** । **सा चेति** । सा अपह्नुतिः वस्तुवृत्तेन गङ्गावस्तुस्वभावेन । वस्तुतस्तु वेष्टनस्वभावत्वात् तस्या इत्यर्थः । **श्लेषमुत्थापयतीति** । श्लेषे ज्ञापयतीत्यर्थः । निर्मोके गङ्गारोपाभावे चरणार्थकश्लेषाप्रतीतेरित्यर्थः । सच श्लेषोऽतिशयोक्तेरङ्गमित्याह—**श्लेषश्चेति** । अतिशयोक्तिं दर्शयति—पादमूलवेष्टनमेव सेवनमितीति भेदेऽभेदारोपरूपातिशयोक्तिरियम् । ननु रूपकं रूपकाधिकरणस्य सेवनस्यानिर्दिष्टत्वाच्चरणार्थकपदश्लेषादेव सेवाबोधात् । श्लेषस्तज्ज्ञापक इत्यर्थः । अतिशयोक्तिरपि वाच्योत्प्रेक्षाया अङ्गमित्याह—**अतिशयोक्तिरपीति** । इयं तु प्रकर्षकमङ्गं सेवाज्ञानं विना मन्थव्यथोपशमनार्थतायाः वेष्टनमात्रस्यासम्भवेनात्प्रेक्षायास्तथा प्रकर्षणात् । ननु ज्ञापकमङ्गम् । इवशब्दादेव तस्याः प्रतीतेः, नापि जनकमङ्गमुत्कटकोटिसंशयात्मिकाया उत्प्रेक्षायाः सेवाज्ञानेन अजननात् । उत्प्रेक्षापि समासोक्तेर्ज्ञापकमङ्गमित्याह—**उत्प्रेक्षा चेति** । समुद्रगङ्गयोर्नायकनायिकाव्यवहारज्ञानस्य मन्थव्यथोपशमार्थतोत्प्रेक्षा विनाऽचेतनयोरसम्भवात् ।

---

1 'अवेष्टत' (क. पु)

यथा वा—

"अनुरागवती सन्ध्या दिवसस्तत्पुरस्सरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः ॥"

अत्र समासोक्तिर्विशेषोक्तेरङ्गम् । (ख)

सन्देहसङ्करो यथा—

"इदमाभाति गगने भिन्दानं सन्ततं तमः ।
अमन्दनयनानन्दकरं मण्डलमैन्दवम् ॥" (ग)

अत्र किं मुखस्य चन्द्रतयाध्यवसानादतिशयोक्तिः, उत इदमिति मुखं निर्दिश्य चन्द्रत्वारोपाद्रूपकम्, अथवा इदमिति मुखस्य चन्द्रमण्डलस्य च द्वयोरपि प्रकृतयोरेकधर्माभिसम्बन्धात्तुल्ययोगिता । आहोस्विच्चन्द्रस्याप्रकृतत्वाद्

(वि, ख) अनेकालङ्काराणामङ्गाङ्गिभावमुक्त्वाऽलङ्कारयोस्तथात्वमाह—यथा वेति । सायंसन्ध्यावर्णनमिदम् । अनु दिवसस्य पश्चाद्रागवती रक्तिमवती सन्ध्या, दिवसश्च तस्याः पुरःसरः पूर्ववर्ती । अहो आश्चर्यम् । चित्रा विलक्षणा दैवगतिर्यत्तथापि न समागमः । पुरः पश्चाद्भावेन स्थितयोरेकदा मिलनरूपस्य समागमस्यैव दृष्टत्वात् । दिवससन्ध्ययोस्तु नैकदा मिलनम्, सन्ध्याकाले दिवसाभावात् । अत्र समासोक्तिरिति । अत्र रागवन्नायिकापुरःसरनायकयोर्दैवात्समागमरहितयोर्वृत्तान्तप्रतीतिरूपा समासोक्तिः । पूर्वपश्चाद्भावस्थितिरूपस्य समागमहेतोः सत्त्वेऽपि समागमरूपफलस्याभावरूपाया विशेषोक्तेर्रूपकहेतुरित्यर्थः । नायकनायिकासमागमाभावप्रतीतेर्नायके वृत्तान्तप्रतीतिं विनाऽसम्भवात् । जनकरूपाङ्गोदाहरणं तु न दर्शितम् । तत्तु यथा—

"पुलिन्दास्ते रिपुस्त्रीणां वने हारं हरन्ति नो ।
बिम्बोष्ठमन्त्या शोणं तं गुञ्जमाला हि मन्यते ॥"

अत्र हारेण बिम्बोष्ठकान्तेर्ग्रहणात् तद्गुणोऽलङ्कारः । तेन च गुञ्जाहारभ्रान्तिजननाद् भ्रान्तिमांस्तद्गुणस्य प्रकर्षकमङ्गम् ।

(वि, ग) बहूनामलङ्काराणां सन्देहसङ्करमाह—इदमाभातीति । इदमैन्दवमण्डलं गगने आभाति । कीदृशं सन्ततं विस्तृतं तमः अन्धकारम् अज्ञानं च भिन्दानममन्दनयनानन्दकरं च ।

(वि, घ) अत्रालङ्काराणां संशयकोटिता दर्शयति—अत्रेति । इदं गगने ऐन्दवं मण्डलमर्थान्नायिकाया आभातीत्यर्थः । एवं चोपमेयकरणस्य मुखस्यानिर्देशादतिशयोक्तिरित्यर्थः । मुखस्येदं पदेन निर्देशे तु रूपकमित्याह उतेति । तुल्ययोगितां दर्शयत्यथवेति । तथा च इदं निर्दिश्यमानं मुखं गगने ऐन्दवं मण्डलं भातीत्यर्थः । द्वयोरपि प्रकृतयोरिति । उभयस्यैव दीप्यमानत्ववर्णनेऽपि क्रम-

दीपकम्, किं वा विशेषणसाम्यादप्रस्तुतस्य मुखस्य गम्यत्वात्समासोक्तिः। यद्वा अप्रस्तुतचन्द्रवर्णनया प्रस्तुतस्य मुखस्यावगतिरित्यप्रस्तुतप्रशंसा। यद्वा मन्मथोद्दीपनः कालः स्वकार्यभूतचन्द्रवर्णनामुखेन वर्णित इति पर्यायोक्तमिति बहूनामलङ्काराणां सन्देहात्सन्देहसङ्करः। (घ)

यथा वा-"मुखचन्द्रं परयामी"त्यत्र किं मुखं चन्द्र इवेत्युपमा, उत चन्द्र एवेति रूपकमिति सन्देहः। साधकबाधकयोर्द्वयोरेकतरस्य सद्भावे न पुनः सन्देहः। यथा 'मुखचन्द्रं चुम्बती'त्यत्र चुम्बनं मुखस्यानुकूलमित्युपमायाः साधकम्। चन्द्रस्य तु प्रतिकूलमिति रूपकस्य बाधकम्। "मुखचन्द्रः प्रकाशते" इत्यत्र प्रकाशाख्यो धर्मो रूपकस्य साधको मुखे उपचरितत्वेन सम्भवतीति नोपमाबाधकः। (ङ) +

"राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम्।"

अत्र योषित आलिङ्गनं नायकस्य सदृशे नोचितमिति लक्ष्म्यालिङ्गनस्य *राजन्यसम्भवादुपमाबाधकं, नारायणे सम्भवाद्रूपकम्।* (च)

सत्त्वे इत्यर्थः। मुखस्यैव प्रक्रान्तत्वे तदुपमानतयैव चन्द्रनिर्देशे तु तस्याऽप्रकृतत्वात् प्रकृताप्रकृतयोरेकधर्मान्वयरूपं दीपकमित्यर्थः। समासोक्तिं दर्शयति—**किंवेति**। चन्द्रवर्णनस्यैव प्रक्रान्तत्वेऽप्रस्तुतप्रशंसेत्याह **यद्वेति**। **कार्यभूतेति**। चन्द्रोदयस्य सन्ध्याकालकार्यत्वात्।

(वि, ङ) अलङ्कारद्वयसन्देहं दर्शयति—**यथा वेति**। मुखचन्द्रं चुम्बतीति मुखस्यानुकूलं चन्द्रतुल्यमुख एव साक्षादन्वितमित्यर्थः। ननु मुखात्मके चन्द्रे सम्भोगचुम्बनासम्भवात्। **चन्द्रस्य तु प्रतिकूलमिति**। मुखनिष्ठस्य चुम्बनस्य मुखाभिन्नत्वेन गृहीतचन्द्रेऽपि परस्परस्याऽसम्भवात्। **प्रकाशाख्य** इति। तिमिरनाशाख्य इत्यर्थः। स च धर्मश्चन्द्रे एव साक्षादस्वीयतो विशेष्यत्वेन प्रतीयमाने चन्द्रे साक्षादन्वितत्वाद्रूपकस्य साधक इत्यर्थः। उपमायास्तु न बाधक इत्यत आह—**मुखे उपचरितत्वेनेति**। चन्द्रतुल्यमुखेऽपि चन्द्रधर्मप्रकाशनारोपसम्भवादित्यर्थः।

(वि, च) रूपकसाधकत्वाह—**राजनारायणमिति**। लक्ष्मीरत्र नारायणस्य

+ उपमाया सादृश्याशे उपमानं विशेषणीकृत्य उपमेयमेव प्राधान्येन विशेष्यत्वेन निर्दिश्यते। अतो मुख्यतयोपमेये सम्भवदेव विशेषण गृह्यते। रूपके तु अभेदेनोपमेयं तिरोधाय उपमानमेव प्राधान्येन निर्दिश्यते। अतो मुख्यतयोपमाने एवान्वययोग्यं विशेषणं गृह्यते। तच्च उपमेये कथञ्चिदुपचर्यते। अतो विशेषणाशस्य यदि उपमेये सम्भवस्तदोपमा, यद्युपमाने सम्भवस्तदा रूपकमेव।

एवम्—

"वदनाम्बुजमेणाक्ष्या भाति चञ्चललोचनम्।"

अत्र वदने लोचनस्य सम्भवादुपमायाः साधकता। अम्बुजे चासम्भवाद्रूपकस्य बाधकता। (छ)

एवं "सुन्दरं वदनाम्बुजम्" इत्यादौ साधारणधर्मप्रयोगे "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति वचनादुपमासमासो न सम्भवतीत्युपमाया बाधकः। एवं चात्र मयूरव्यंसकादित्वाद्रूपकसमास एव। (ज) *

एकाश्रयानुप्रवेशो यथा मम।

"कटाक्षेणापीषत्क्षणमपि निरीक्षेत यदि सा
तदानन्दः सान्द्रः स्फुरति पिहिताशेषविषयः।

पत्नी ननु सम्पत्। अत आह-योषित इति। नारायणे च सम्भवाद्रूपकमिति। रूपके नारायणस्यैव विशेष्यत्वात् तत्रैवालिङ्गनान्वयात्।

(वि, छ) उपमायाः साधकमाह—वदनाम्बुजमिति। चञ्चलं लोचनं यत्रेति विग्रहेण चञ्चललोचनवत्त्वस्याम्बुजतुल्ये वदने एव सम्भवादुपमायाः साधकतेत्याह-अत्रेति।

(वि, ज) एवमनुशासनेनाऽपि यत्रोपमासमासो निषिद्धस्तत्रापि नोपमेत्याह-एवमिति। सुन्दरं वदनाम्बुजमित्यादौ साधारणधर्मप्रयोगे उपमासमासो न सम्भवतीत्यत्र उपमाया बाधक इत्यन्वयः। स च धर्मोत्र सुन्दरत्वम्, तस्य उपमाबाधकताग्राहकपाणिन्यनुशासनं दर्शयति—उपमितामिति। अनेन पाणिनिसूत्रेण साधारणधर्माप्रयोग एव पुरुषव्याघ्रादावुपमासमासः। एव 'बोधनात्साधारणधर्मप्रयोग एव तत्समासो निषिद्धः। अत्रहीति वचनात् सुन्दरं वदनाम्बुजमिति प्रयोगे उपमासमासे सति न सम्भवतीत्यतः सुन्दरत्वरूपसाधारणधर्माप्रयोगे उपमाया बोध इत्यर्थः। ननु "मयूर इव पुरुषो व्यंसको विगतभुजमूल' इत्यादौ व्यंसकत्वादिभावाद् यत्रोपमानस्य पूर्वनिर्देशस्तत्रैव मयूरव्यंसकादित्वमुपमानस्य परनिर्देशे तु नेत्यर्थः।

(वि, झ) एकाश्रयस्थितिरूपाणामलङ्काराणां सङ्करमाह—कटाक्षेणेति। एकाश्रयश्च क्वचिदेकं वाक्यं क्वचिदेक पदम्। नचैकवाक्यस्थत्वे संसृष्टिरेवेति वाच्यम्, अङ्गाङ्गिभावे सतीत्यात्। नच तदा अङ्गाङ्गिभावसङ्कर इति वाच्यम्। तदाप्येकाश्रयानुप्रवेशानपायात्।

कटाक्षेणेति। सा नायिका क्षणमर्धान्मामीषदल्पं यदि निरीक्षेत

---

* रूपकनामस्य मयूरव्यंसकादिष्वन्तर्भावः, आकृतिगणत्वात्। मयूरो व्यंसको पूर्तः मयूरव्यंसक. (सि० कौ०) केचिद् विगतौ भुजौ यस्य स व्यंसकः, मयूर इव व्यंसक इति व्याख्यानार्थं कुर्वन्ति (प्र. कौ.)

सरोमाञ्चोद्भवत्कुचकलशनिर्भिन्नवसनः
परीरम्भारम्भः क इव भविताम्भोरुहदृशः ॥" (ङ)

अत्र "कटाक्षेणापीषत्क्षणमपि" इत्यत्र छेकानुप्रासस्य 'निरीक्षेत' इत्यत्र क्षकारमादाय वृत्त्यनुप्रासस्य चैकाश्रयेऽनुप्रवेशः । एवं चात्रैवानुप्रासार्थापत्त्यलङ्कारयोः । (च)

यथा वा—"संसारध्वान्तविध्वंस इत्यत्र रूपकानुप्रासयोः ।

यथा वा—

"कुरबका रवकारणतां ययुः" इत्यत्र रवका रवका इत्येकं बकारवकार इत्येकमिति यमकयोः । (छ)

यथा वा—

"अहिणअपओअरसीएसु पहिअसामाइएसु दिअसेसु ।

तदा पिहिताशेषविषयः सान्द्र आनन्द. स्फुरति । तदा तस्या अम्बुजाक्ष्याः परीरम्भारम्भः क इव भविता, कटाक्षेणैव कृतार्थोऽहं तत्परिरम्भं नापेक्ष इत्यर्थः । यद्वा कटाक्षपातनतोऽधिकतरः परिरम्भारम्भः क इव भविता, अनिर्वचनीय एव भविता इत्यर्थः । कीदृशः परिरम्भारम्भः । सरोमाञ्चाभ्यामत एवोद्भवद्भ्यां कुचकलशाभ्यां निर्भिन्नं परिभ्रष्टं वसनं यत्र तादृशः ।

(वि, ञ) अत्र वाक्यरूपैकाश्रयसत्त्वं द्विविधानुप्रासयोर्दर्शयति—अत्रेति । छेकानुप्रासोऽनेकस्य व्यञ्जनस्य स्वरूपतः साम्ये सति तच्छेकानुप्रासोक्तत्वात् । संयुक्तस्यानेकवर्णस्य तु आनुपूर्व्यसम्भवात्तादृशोऽनेकस्य क्षकारमात्रस्य सकृच्छेकानुप्रास इत्यर्थः । तादृशस्यैव क्षकारान्तरसाहित्यादनेकधात्वे वृत्त्यनुप्रास इत्याह—निरीक्षेतेत्यत्रेति । अनेकस्याऽसकृत्त्वे वृत्त्यनुप्रासस्योक्तत्वात् । एकाश्रयानुप्रवेश एकवाक्यप्रवेशः । एवं च क्षकारद्वयघटितच्छेकानुप्रासेन क्षकारान्तरसाहित्यवशाद् वृत्त्यनुप्रासजननादङ्गाङ्गिभावसङ्करोऽप्यस्तीत्यतः समासैकपदारूढाश्रयेऽसङ्कीर्णमुदाहरति—आपाततस्तत्रैवानुप्रासार्थापत्त्यलङ्कारयोरेकाश्रयानुप्रवेश दर्शयति—एवं चात्रैवेति । कटाक्षपातेनापि सान्दानन्दस्फुरणाद् दण्डापूपिन्या सिद्धे स्तनपरिरम्भेऽनिर्वचनीयानन्द इत्येवमर्थापत्त्यलङ्कार इत्यर्थः ।

(वि, ट) समास एकपदेऽङ्गाङ्गिभावसङ्करहितमेकाश्रयानुप्रवेशसङ्करमाह—यथा वेति । रूपकानुप्रासयोरिति । कंसनिषूदने सूर्यतारोपणात् । कुरुबक इत्यादि । अत्र एकवाक्यगतं यमकद्वयम् । नचात्र पूर्वयमकेनोत्तरयमकनिर्वाहादनुग्राह्यानुग्राहकतासङ्करोऽपीति वाच्यम् । कारणतामित्येतदीयरेफपर्यन्तस्योत्तरयमकस्य पूर्वयमकेनाऽपि निर्वाह्यत्वात् । एवं 'कलकलोलकलोलरसो'त्यत्रापि लक्लो लक्लो क्लोल क्लोल इति यमकद्वयम् ।

(वि, ठ) उपमारूपकयोरप्येकाश्रयानुप्रवेशं दर्शयति—अहिणअ इति ।

महइ पसारिअगीआणचिअं मोरविन्दाणम् ॥" (ठ) *
अत्र "पहिअसामाइएसु" इत्येकाश्रये पथिकश्यामायितेष्वित्युपमा ।

"अभिनवपयोदरसिकेषु पथिकसामाजिकेषु दिवसेषु ।
महति प्रसारितगीतानर्तितकं मयूरवृन्दानाम् ॥"

इति संस्कृतम् । प्रसारितं गीतं यत्रेति तादृशं मयूरवृन्दानामानर्तितकं नृत्ययुक्तविशेषणकेषु दिवसेषु महति पूज्यं भवति शोभते इत्यर्थः । मह पूजायामिति धातुः । नृत्योचित दिवसविशेषणमाह—अभिनवेति । अभिनवपयोद एव रसिक रसवन्त एव नृत्यदर्शनार्थं रसवन्तो यत्र तादृशेषु । तथा पथिकाः सामाजिका इव नृत्यादिदिदृक्षुसमाजप्रधानानीव यत्र तादृशेषु । अत्र रसिकसामाजिकाना समाजप्रधानतुल्याना च नृत्यदर्शिनामाश्रयत्वेन दिवसाना नृत्यसत्तारूपकं व्यङ्ग्यमवधेयम् ।

(वि, ड) अनोपमारूपकयोरेकाश्रयानुप्रवेशं दर्शयति—अत्रेति । पथिकाः

* श्लोकस्य संस्कृतानुवादो द्विविधो भवितुमर्हति यथा एकविधोऽनुवादो विरहप्रियाया प्रदत्तः; अपरस्तु यथा—

"अभिनवपयोदरसितेषु पथिकश्यामायितेषु दिवसेषु ।
महति प्रसारितग्रीवाणा नृत्तं मयूरवृन्दानाम् ॥"

अभिनवं हृद्यं पयोदाना मेघाना रसितं येषु दिवसेषु तथाविधपथिकान् प्रति श्यामायितेषु मोहरूपत्वाद् रात्रिरूपतामाचरितवत्सु । यदि वा पथिकाना श्यामायित दुःखवशेन श्यामिका येभ्यः । शोभते प्रसारितग्रीवाणां मयूरवृन्दाना नृत्तम् । अभिनवपयोधररसिकेषु पथिकसामाजिकेषु सत्सु मयूरवृन्दाना प्रसारितगीताना प्रकृष्टसारानुसारिगीतानां तथा ग्रीवारेचकाय प्रसारितग्रीवाणा नृत्तं शोभते । पथिकान् प्रति श्यामा इवाचरन्तीति प्रत्ययेन लुप्तोपमा निर्दिष्टा । पथिकसामाजिकेष्विति कर्मधारयस्य स्पष्टत्वाद्रूपकम् । ताभ्यां ध्वनेः सङ्कर इति ग्रन्थकाराशयः । (ध्वन्यालोकलोचने)

केचिदत्र सन्देहसङ्करमिच्छन्ति—परं नात्र सन्देहसङ्करो भवितुमर्हति, एकार्थके एकपदे एव तस्य स्वीकरात् । अत्र 'सामाइएसु' इति प्राकृतपदस्य श्लेषेणैव "श्यामायितेषु" 'सामाजिकेषु' इत्यर्थद्वयाद् उभयार्थकता । अतस्त्वेकस्मिन् प्राकृतपदे उपमारूपकयोः सत्त्वादेकवाचकानुप्रवेश एव । यथा—

"मुखनिर्गता नूनं नरकप्रतिबन्धिनी ।
तवापि मूर्ध्नि गङ्गेव चकास्ति पतिष्यति ॥"

अत्र मुखनिर्गतेति साधारणविशेषणहेतुक उपमा नरकप्रतिबन्धिनीति श्लिष्टविशेषणसमुत्थोपमाप्रतिभोत्पत्तिहेतुः श्लेषस्त्वेकस्मिन् सन्देहानुप्रविष्टो तस्योभयोपकारित्वात् ।" (अलङ्कारसर्वस्वे) ।

पथिकसामाजिकेष्विति रूपक प्रविष्टम् । (ङ)

"श्रीचन्द्रशेखरमहाकविचन्द्रसूनु-
श्रीविश्वनाथकविराजकृत प्रबन्धम् ।
साहित्यदर्पणममु सुधियो[1] विलोक्य
साहित्यतत्त्वमखिल सुखमेव वित्त ॥" (ढ, ञ)

"यावत्प्रसन्नेन्दुनिभानना श्री-
र्नारायणस्याङ्गमलङ्करोति ।
तावन्मन सम्मदयत् कवीना-
मेष प्रबन्ध प्रथितोऽस्तु लोके ॥" (ण, ट)

श्यामायिता यत्रेत्युपमेत्यर्थ । पथिकसामाजिकेषु इत्यनेन दिवसेषु व्यङ्गयरूपक दर्शयति । पथिका सामाजिका येषु इति । सामाजिका एव येष्वित्यर्थ । **प्रविष्टमिति**—व्यङ्गयसत्तारूपकमित्यर्थ ।

(वि, ढ) श्रीचन्द्रेति । अत्र सुधिय इति सम्बोधनम् । क्वचित् कवय इति पाठ । हे सुधिय, श्रीचन्द्रेत्यादिकृतममु साहित्यदर्पण पुस्तक विलोक्य अखिल साहित्यतत्त्व सुखमेव सुखविशिष्टमेव यथा स्यातथा वित्त जानीतेत्यर्थ ।

(वि, ण) यावदिति । प्रसन्नेन्दुनिभानना श्रीर्यावन्नारायणस्याङ्गमलङ्करोति, तावत्कवीना मन सम्मदयन्नय प्रबन्धो लोके प्रथितोस्तु इत्यर्थ ।

(लो, ऊ) श्रीचन्द्रशेखरेति । महाकविचन्द्रेत्यत्र चन्द्रशब्द श्रेष्ठार्थ । विश्वनाथनामा कविराज यस्येमा प्रशस्तिमाचष्टे विचक्षणा ।

("आ किं कम्पमुरीकरोषि वसुधे धूर्दैते वा भव
द्रोविन्देन तु नन्दमन्दिरकृतक्रीडावतारेण ते ।
विख्यात कविराजराज इति य श्रीविश्वनाथ कृती
तस्याकर्ण्य गिर शिरासि भुजगाधीशो धुनातेऽधुना ॥")

तेन कृत साहित्यदर्पणाख्य ग्रन्थमवलोक्येति सम्बन्ध ।

(लो, ऋ) सम्प्रति ग्रन्थस्य समाप्तौ स्वाभीष्टपूर्वक शुभाशसन करोति—**यावदिति** । सम्मदयन् सम्यक् प्रीणयन्—

(आस्तामनन्तकृतिना कृत एव धीरे
णासाद्य तातचरणाम्बुरुहप्रसादम् ।
आचन्द्रमातरणिकोविदवृन्दवन्द्य
साहित्यदर्पणविवेकवच प्रपञ्च ॥)

---

1 'कवय' इति पाठान्तरम् ।

इति श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्यार्णवकर्णधार-
ध्वनिप्रस्थापनपरमाचार्यकविसूक्तिरत्नाकराष्टादशभाषा-
कविलासिनीभुजङ्गसान्धिविग्रहिकमहापात्र-
श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे
दशमः परिच्छेदः । (त)

(वि, त) इतीत्यादि । अखिलभाषैव विलासिनी नायिका तस्याः भुजङ्गः कामुकस्तदनुशीलकत्वात् ।

इति महेश्वरतर्कालङ्कारविरचितायां साहित्यदर्पणटीकायां दशमपरिच्छेदविवरणम् ।

सुश्लिष्टसंस्कृतवशेन सुखाधिरोहा
वैषम्यदुस्तरतरङ्गविभेददक्षा ।
साहित्यदर्पणमहार्णवमुत्तरीतुं
टीकेयमस्ति तरणिर्न बिभीत धीराः ॥ १ ॥
दर्पणे प्रतिबिम्बन्ते पदार्था इति नाद्भुतम् ।
चित्रं ममैतद् व्याख्याने दर्पणः प्रतिबिम्बिते ॥ २ ॥
अवधानकृतामोदा टीकेयं नावधीर्यताम् ।
धीराः कषायताम्बूले स्वादयन्ते हि क्रमादसाः ॥ ३ ॥

समाप्तश्चायं ग्रन्थः ।

इति श्रीमदालङ्कारिकचक्रवर्तिगजपतिसाम्राज्यसान्धिविग्रहिकश्रीविश्वनाथ-विरचितात्मजश्रीमदनन्तदासकृतौ साहित्यदर्पणलोचने दशमः परिच्छेदः समाप्तः ।

साहित्यदर्पणस्योदाहरणश्लोकानामकाराद्यनुक्रमणिका

पृ०

अ

अकलङ्कं मुखं तस्याः ६०६
अकस्मादेव तन्वङ्गी १३२
अङ्गानि खेदयसि (चन्द्रकलायाम्) ३३८
अर्घ्यमर्घ्यमिति (रघुवंशे) १४१
अचला अबला वा स्युः (कुमारसम्भवे) ४१४
अजस्य गृह्णतो जन्म (कुमारसम्भवे) ६५८
अजायत रतिस्तस्याः ४२२
अतिगाढगुणायाश्च ६०७
अत्ता एत्थ णिमज्जइ (गाथासप्तशत्याम्) १७
अत्युन्नतस्तनमुरो नयने (धनिकस्य) १०६
अत्युन्नतस्तनयुगा २२१
अत्रान्तरे किमपि वाक् (मालतीमाधवे) १२८
अत्रासीत्फणिपाशबन्ध (बालरामायणे) ३४५
अनातार्प्समुपाध्याय ४४१
अथ तत्र पाण्डुतनयेन (शिशुपालवधे) १५१
अथ प्रचण्डभुजदण्ड (प्रभावत्याम्) ३५६
अथापि देहि वैदेहि ३४५
अथापि स्तनशैल (हनुमन्नाटके) ४०८
अधःकृताम्भोधरमण्डलाना ६६२
अधरः किसलयरागः (अभिज्ञानशाकुन्तले) ३३२
अधरे करजक्षतं ४१५
अध्यासितुं तव चिरात् (वेणीसंहारे) ३५६
अनङ्गमङ्गलभुवः ४६२
अनलङ्कृतोऽपि सुन्दर (विश्वनाथस्य) ११३
अनन्यसाधारणधीर्धृता २११
अनणुरणन्मणिमेखल (रुद्रटालङ्कारे) ४३३
अनायासकृशं मध्यं ६५५
अनुयान्त्या जनातीतं ३३०
,, ६११
अनुरागवती सन्ध्या (ध्वन्यालोके) ७००
अनुरागवन्तमपि (शिशुपालवधे) ४३३
अनुलेपनानि कुसुमान्य (शिशुपालवधे) ५६५
अनातपत्रोऽप्ययमत्र ६६१
अनेन छिन्दता मातुः ४००
अनेन पर्यासयता (रघुवंशे) ६३६-४०
अनेन लोकगुरुणा २३१
अन्तःपुरीयसि रणेषु ५२५
अन्तश्छिद्राणि भूयासि ६३४
अन्तिकगतमपि मामिय (विश्वनाथस्य) १३५
अन्यदेवाङ्गलावण्य ५६०
अन्यासु तावदुपमर्दसहासु (विकटनितम्बाया.) १५२
अन्यास्ता गुणरत्नरोहण ३६६
अप्रियाणि करोत्येष वाचा (वेणीसंहारे) ३११
अभ्युन्नता पुरस्तादवगाढा (अभिज्ञानशाकुन्तले) २६८

	पृ०
अमितः समितः प्राप्तैः	१६६
अमुक्त भवता नाथ	३७८
अयि मयि मानिनि मा कुरु	३६८
अयमुदयति मुद्राभञ्जनः	४७४
अयं मार्तण्डः किम्	५५८
अय रत्नाकरोऽम्भोधि	६६१
अयं स रशनोत्कर्षी (महाद्रोणपर्वणि)	२२४
अयं सर्वाणि शास्त्राणि	४६६
अरविन्दमिदं वीक्ष्य	५४०
अरातिविक्रमालोक	५३१
अरुणे च तरुणि नयने	६८१
अर्घ्यमर्घ्य०	१४१
अलमलमतिमानं साहसेन (रत्नावल्याम्)	२७६
अस्त स्थित्वा श्मशानेऽस्मिन् (महाद्रोणपर्वणि)	२१५
अलिकुलमञ्जुलकेशी	३५७–८
अलिअपमुत्तअ (गाथासप्तशत्याम्)	१६१
अविदितगुणापि(वासवदत्तायाम्)	५६६
अविरलकरवालकम्पनैः	६६४
अव्यूढाग्रनखपाणि	८६७
अशक्नुवन्सोढुमपीरलोचनः (शिशुपालवधे)	१८७
अश्रुच्छलेन मुदयो (वेणीसंहारे)	५८३
अश्वत्थामा हत इति (वेणीसंहारे)	१०१
असनाम्नि गिरीस्य (रु० राजतरङ्गिण्याम्)	६१३
असावन्तर्बहिर्व्याप्य (वि० चन्द्रकलायाम्)	३३४
असम्भृतं मण्डनमङ्गयष्टे (कुमारसम्भवे)	११५

	पृ०
असंशयं क्षत्रपरिग्रहक्षमा (अभिज्ञानशाकुन्तले)	१४६
अस्माकं सखि ! वाससी (रु० शृङ्गारतिलके)	६७
अस्य राज्ञो गृहे भान्ति	५३७
अस्य वक्षः क्षणेनैव (प्रभावत्याम्)	३४२
,,	३५६
अस्याः सर्गविधौ प्रजापति (विक्रमोर्वश्याम्)	५६०
अहमेव मतो महीपतेः (रघुवंशे)	१०२–३०
अहमेव गुरुः सुदारुणानाम्	६८४
अहिणअपओअरसिएसु (गाथासप्तशत्याम्)	७०३–४

आ

आकृष्टवेगविगलद्	६६८
आक्षिपन्त्यरविन्दानि	३२६
आचरति दुर्जनो यत्	४४६
आत्मा जानाति यत्पापम्	३८५
आदाय बकुलगन्धान्	४८२
आदित्योऽय स्थितो मूढाः (महाद्रोणपर्वणि)	२१५–१६
आनन्दनमन्दनिमम् (रङ्गद्वारे)	६६१
आनन्दयति ते नेत्रे	३८३
आनन्दयति ते नेत्रे योऽधुना	३८४
आनन्दितुस्त्वपत्रोऽसौ	८२०
आनन्दाय च विस्मयाय च (महावीरचरिते)	३२१
आपन्तमनुं पुरा (शिशुपालवधे)	२०१
आपातसरसे भोगे	४१८
आमीलितालसधियां (विक्रमोर्वश्याम्)	६६२
आरभ्य एव नलिनीं	८१७

	पृ०
आशी परम्परा वन्या	३७३
आश्लिष्टभूमिं रसितारसुंच (शिशुपालवधे)	१४५
आसमुद्रक्षितीशानाम् (रघुवंशे)	३७८
आसादितप्रकटनिर्मल	२७२
आसीदजनमत्रेति	६६०
आहवे जगदुद्दण्ड (विश्वनाथस्य)	५४६
आहारे विरति समस्त	२१६
आहूतस्याभिषेकाय	१०४
आहूतेषु विहङ्गमेषु (भल्लटशतके)	४३४
आज्ञा शक्रशिरोमणि (बाल-रामायणे)	४१६

इ

इति गदितवती रुषा (शिशुपालवधे)	१२३
इत्थमाराध्यमानोऽपि(कुमारसम्भवे)	६४३
इद किलाव्याजमनोहर वपु (अ० शाकुन्तले)	३३२, ६०२
इदमाभाति गगने	७००
इद वक्त्र साक्षात् (विश्वनाथस्य)	५५३
इन्दुर्विभाति कर्पूरगौरै	३६७
इन्दुर्विभाति यस्तेन	३८६
इन्दुर्लिप्त इवाञ्जनेन	६३०
इन्द्रजिच्चण्डवीर्योऽसि	३४३
इय स्वर्गाधिनाथस्य (ययातिविजय)	३३१
इह पुरोऽनिलकम्पित	५६८
इहैव त्व तिष्ठ द्रुतम्	६६६

ई

ईक्षसे यत्कटाक्षेण	३६६

उ

उच्च शिचल निष्पन्दा (सा० गाथासप्तशत्याम्)	६३
उत्कृत्योत्कृत्य वृत्तिम् (मालतीमाधवे)	१७५
उत्क्षिप्त करकङ्कणद्वयमिदम्	११७
उत्तिष्ठ द्रुति ! यामो	११६
उत्फुल्लकमलकेसर (नागानन्दे)	३४७–४८
उत्साहातिशय वत्स (बालचरिते)	२६५
उदन्वच्छिन्ना भू (बालरामायणे)	४०५
उदेति पूर्व कुसुम तत फलम् (अ० शाकुन्तले)	३३६
उदेति सविता ताम्र	४०५
उद्दामोत्कलिकाविपाण्डुर (रत्नावल्याम्)	२८१
उद्यत्कमललौहित्यै	३८२
उन्नमितैकभ्रूलत (अभिज्ञान-शाकुन्तले)	३०३
उन्मज्जज्जलकुञ्जरेन्द्र	४६५
उन्मालन्मधुगन्धलुब्ध	४८३
उन्मीलन्ति नखैर्लुनीहि	६६६
उपकृत बहु तत्र किमुच्यते	४१
उपदिशति कामिनीना	५१
उर्व्यसावत्र तर्वाली	३६७
उवाच मधुरा वाचम्	३६४
उवाच मधुर धीमान्	३६५

ऊ

ऊरु कुरङ्गकदृशश्चञ्चल	५७३

ए

एक ध्याननिमीलनेन	४५१
एक कपोतपोत शतश	६३३
एकस्यैव विपाकोऽयम् (वेणीसंहारे)	१०४
एकासनसंस्थिति (अमरुशतके, सुभाषितावलौ तु पुलिनस्य)	११२

	पृ०
एतद्विभाति चरमाचल (विश्वनाथस्य)	५६७
एवमुक्तो मन्त्रिमुख्यै	४०४
एववादिनि देवर्षौ (कुमारसम्भवे)	१४७
एष दुरच्यवन नौम	४५८
एष मूर्तो यथा धर्म	४३०
एसा कुडिलघणेण (विश्वनाथस्य)	१५१
एसो ससहरबिम्बो (कुवलयाश्व-चरिते)	४४१
ऐ	
ऐन्द्र धनु पाण्डुपयोधरेण	६१६
ऐशस्य धनुषो भङ्गम्	४१५
ओ	
ओवट्टइ उल्लट्टइ	३६२
औ	
औत्सुक्येन कृतत्वरा (रत्नावल्याम्)	४४८
क	
कञ्चुकेनापीपत् (विश्वनाथस्य)	७०२
कटिस्ते हरते मन	३७३
कथमुपरि कलापिन (विश्वनाथस्य)	५६०
कथमीदृशे कुलाङ्गी	१५८
कदली कदली,करभ करभ (ज० प्रसन्नराघवे)	१६३
कदा वाराणस्यामिह	१७६
कपोलपत्रलक्ष्यस्या	५७५
कपोले जानक्या करिकलभ	४५५
कमलालिङ्गितस्यारेर्हार	४३०
कमले चरणाघात	३५४
कमलेव मतिर्नीतिरिव	५३६–४०
कमलेन विभासिएण (विश्वनाथस्य)	१५३
कर्ता सूतच्छलाना जतुमय(वर्णागदारे)	१५५
कर्पूरगौर इव राजति	४२६
करमुदयमहीधरस्तनाग्रे (विश्वनाथस्य)	१३७
करिहस्तेन सबाधे	४३६–३७
कलयति कुवलयमाला	६०२
कलुष च तवाहितेष्वकस्मात्	६८२
कस्स वण होइ रोसो (ध्वन्यालोके)	२४७
कान्तास्त एव भुवनत्रितयेऽपि	१८५–८६
कान्ते तथा कथमपि (शृङ्गारतिलके)	१०८
कानने सरिदुद्देशे	६६५
काप्यभिख्या तयोरासात् (रघुवंशे)	४२१
काम प्रिया न सुलभा (अ० शाकुन्तले)	२६७
कार्तार्थ्यं यातु तन्वङ्गी	३७१
कालरात्रिकरालेय (बालरामायणे)	३४४
कालान्तककरालास्य	३०५
काले कोकिलवाचाले	४६१
कालो मधु कुपित एष च (विश्वनाथस्य)	६१
काले वारिधराणाम्	५६७
का विसमा देव्वगई	६७५
किं करोपि करोपान्ते (विश्वनाथस्य)	३६५
किं तावत्सरसि सरोजमेतत् (शिशुपाल-वधे)	५५६
किं तारुण्यतरोरिय (बन्धो)	५५७
किं देव्या न विचुम्बि	३४१
किं भूषण मुदृढ (वक्रस्य)	६७३
किमपिक्रमस्य क्रमो	६६४
किमाराध्य सदा पुण्य	६७४
किरणा हरिणाङ्कस्य	४६५
किं रुद्धा प्रियया कया (शृङ्गारतिलके)	१२१
किं शीकरै शलभविनर्दिभि (अ० शाकुन्तले)	३३६–३७

पृ०

किसलयमिव मुग्धम्(उत्तररामचरिते)१५२
कुञ्ज हन्ति कृशोदरी ३८६
कुपितास्य यदा तन्वि २५०
कुर्यां हरस्यापि (कुमारसम्भवे) ३६३
कुर्वन्त्वाशा हताना (वेणीसंहारे) ३०७
कुमारस्ते नराधीश ४१४
कूजन्ति कोकिला ५१७
कृतप्रवृत्ति ३८२
कृतमनुमतम् (वेणीसंहारे १७३
कृत्वा दीननिपीडना (विश्वनाथस्य) १५१
कृष्टा केशेषु भार्या (वेणीसंहारे) ३०६
के द्रुमास्ते क वा ग्रामे १३२
के यूय स्थल एव सम्प्रति ४६०
केश काश स्तबकविकास ४८५
कोऽत्र भूमिवलये ६०१
कोकिलोऽह भवान्काक ६३३
क्रग्रह सकेतुश्चन्द्र (वि० मुद्राराक्षसे) २७५

क्वचित्ताम्बूलाक्त (अमरुशतके) १०६–११०
क्व सूर्यप्रभवो वश (रघुवंशे) ६०४
क्व वन तरुवल्कभूषण (विश्वनाथस्य) ६६१
काकार्य शशलक्ष्मण (विक्रमोर्वश्याम्) १८६
क्षात्रधर्मोचितैर्धर्मै ३३२
क्षिपसि शुक नृपदशक (विश्वनाथस्य)६०५
क्षिप्तो हस्तावलग्न (अमरुशतके)४५१–५२
क्षीण क्षीणोऽपि शशी (काव्यालङ्कारे)६०७
क्षीरोदजावसतिनन्म ३७५
क्षेम ते ननु पद्ममालिनि(चन्द्रशेखरस्य)१६६

ख

खड्ग क्ष्मासौविदल्ल ५४८

ग

गङ्गाम्भसि सुरत्राण ५७४
गच्छ गच्छसि चेत्कान्त(द० का०यादश) ६५६
गच्छामीति मयोक्तया २३०
गता निशा इमा बाले ३६३
गर्दभति श्रुतिपरुष ५२६
गमनमलस शून्या दृष्टि (मालतीमाधवे) ३२०
गाङ्गमम्बु सितमम्बु ६८२–८७
गाढकान्तदशनक्षतव्यथा (अमरुशतके) २०२
गाढालिङ्गनवामनीकृत (अमरुशतके)४४४
गाण्डीवा कनकशिला(किरातार्जुनीये) ३८६
गाम्भीर्येण समुद्रोऽसि ५६५
गातेषु कर्णमादत्ते ३७४
गुरुतरकलनूपुरानुनाद (शिशुपालवधे) १३०
गुरुपरतन्त्रतया बत ६४
गुरोर्गिर पञ्चदिनान्यधात्य (शा० लटक-मेलके १७०–१७१
ग्रसामि काव्यशशिनम् (वामनसूत्रे)४२८
गृहात येनासी (वेणीसंहारे) ४१३
गृहिणी सचिव सखी (रघुवंशे) ६६५
गृह्यतामर्जितमिद (शे० चण्डकौशिके) ३०२

घ

घटितामिवाञ्जनपुञ्जैः ५८२
घोरो वारिमुचा रव ४०६

च

चकोर्य एव चतुरास्यन्दिम ५६८–६६
चक्राधिष्ठितता चक्री ४३५

पृ०

चक्रद्वजभ्रमितचण्ड [वेणीसंहारे] २६३–६४
चण्डाल इव राजानौ ४२८
चण्डीशचूडाभरण ४२०
चन्दं मुख कुरङ्गाक्षि ४०६
चन्द्रायते शुक्रकरापि ५३६
चरणानतकान्तायाः ४०३
चरणपतनप्रत्याख्यानात् [अमरुशतके] १८८
चलदण्डामरचेष्टितः ३६७
चलापाङ्गा दृष्टिं स्पृशसि [अ० शाकुन्तले] २१७
चारुणा स्फुरितेनायं [अ० शाकुन्तले] ३४१
चिरं चिन्तमनाकारो ४४०
चिन्ताभिः स्तिमितं मनः (चन्द्रशेखरस्य) १६५
चिरं जीवतु ते सूनुः ४३१
चिररतिपरिखेदप्राप्त [शिशुपालवधे] १४४

ज

जघनुर्विगं भूतविद्यासि ३६५
जगाद वदनन्द्यम (शिशुपालवधे) ६८६
जघनस्थलनद्धपत्रवस्त्रौ (उदारराघवे) १८६
जनस्थाने भ्रान्तं (वाचस्पतिभट्टस्य) २२५–२२६
जन्मान्तरीणरमणस्याग्र ६६५
जन्मेन्दोर्विमले कुले(वेणीसंहारे) ३०७
जन्मेदं बन्ध्यतां नीतं ६०३
जरतंबिलारलकरतत २५५
जलदतु गगने गर्जी (मालतीमाधवे) १२७

पृ०

जस्स रणन्तेउरए ३१४
जाता लज्जावती मुग्धा ४२३
जानीमहेऽस्या हृदि ६४८
जीयन्ते जयिनोऽपि (उदात्तराघवे) ३२३
जुगोपात्मानमत्रस्तो (रघुवंशे) ३७६–८०
ज्ञातिप्रीतिर्मनसि (वेणीसंहारे) ३०७
ज्ञाने मौनं क्षमा शक्तौ (रघुवंशे) ५७४
ज्योत्स्ना इव सिता ४३१
ज्योत्स्नाचय. पय.पूरः ३६६

ण

णवरि तं जुअजुअल (वि० कुवलयाश्व-चरिते) १४३

त

ततश्चचार समरे ४१०
तत्परयेयमनङ्गमङ्गल ३४२
तद्गच्छ सिद्धयै कुरु (कुमारसम्भवे) ३८७
तदवितथमवादीर्यन्मम (शिशुपालवधे) १११
तदप्राप्तिमहादुःख (विष्णुपुराणे) २१२
तद्वक्त्र यदि मुद्रिता ३८३–८४
तद्विच्छेदकृशस्य (विधनायस्य) ४३५
तद्वेशोऽसदृशोऽन्याभिः ४३२
तनुस्पर्शादस्या दरमुकुलिते (विधनायस्य) १३६
तन्वङ्गया स्तनयुग्मेन ५७५
तव स्तिमित किमाहितं (शिशुपालवधे)१२२
तव विरहे मलयमरुत् ६५७
तव विरहे हरिणाक्षी ६५१
तवास्मि गीतरागेण (अभिज्ञान शाकुन्तले) २७३
तस्य च प्रवयसो जगद्गुरुः ६७२
तस्याश्चारुपयोधरौ ३५८–५६

	पृ०
तस्या मुखेन सदृशं	५२८
तह से भत्ति पउत्ता	१२५
तह संहरिज्जइ	३३४
तामिन्दुसुन्दरमुखीं	३८५
तामुद्वीक्ष्य कुरङ्गाक्षीं	४२२
ता जानीथाः परिमितकथा(मेघदूते)	१०६
तारुण्यस्य विलासः (वि० चन्द्रक-लायाम्	१२६
तिष्ठेत्कोपवशात्प्रभा (विक्रमोर्वश्याम्)	४४५
तीर्णे भीष्ममहोदधौ (वेणीसंहारे)	३०६
तीर्थे तदीये गजसेतुबन्धात्	४०७
तीव्राभिपङ्गप्रभवेण वृत्तिं (कुमारसम्भवे)	१४४
तृष्णापहारी विमलो	३३५
ते हिमालयमामन्त्र्य(कुमारसम्भवे)	४०५
त्वदङ्गमार्दवं	५६५
त्वद्वाजिराजिनिर्धूत (विश्वनाथस्य)	१८३, ६४५
त्वया तपस्विचाण्डाल	३४१
त्वया सा शोभते तन्वी	६६४
त्वयि दृष्टे कुरङ्गाक्ष्याः	६००
त्वयि सङ्गरसंप्राप्ते	६६७
त्वामस्मि वच्मि विदुषा	२०६
त्वामात्मानन्ति प्रकृतिम्(कुमारसम्भवे)	४३८
त्रस्यन्ती चलशफरी (शिशुपालवधे)	१३३
त्रिभागशेषासु निशासु (कुमारसम्भवे)	१५६
द	
दत्ते सालसमन्थर भुवि (वि० प्रभावती-परिणये)	१०६
दत्त्वा कटाक्षमेणाक्ष्या	६७२
दत्त्वाभयं सोऽतिरथो (वेणीसंहारे)	३३७
दधद्विद्युल्लेखामिव (प्रभावत्याम्)	३१३
दन्तप्रभापुष्पचिता	६१७
दलति हृदयं गाढोद्वेगो (मालतीमाधवे)	३०८–६
दलिते उत्पले	३६७
दशाननकिरीटेभ्यः (रघुवंशे)	२०३
दानं वित्तादृतं	५६६
दासे कृतागसि भवेत्	५४८
दिङ्मातङ्गघटाविभङ्ग (भट्टप्रकाशस्य)	४४७
दिनं मे त्वयि सम्प्राप्ते	३७५
दिवाकरादक्षति यो गुहासु (कुमारसम्भवे)	४२६
दिवमप्युपयातानां (काव्यालङ्कारे)	६६५
दिवि वा भुवि वा ममास्तु (कुशेखर-नृपतेः मुकुन्दमालायाम्)	१८२
दिशि मन्दायते (रघुवंशे)	२०१
दीधीवेवीड्समः	४४१
दीपयन् रोदसीरन्ध्र	२२८
दीयतामार्जितं वित्तम्	६७८
दीर्घाक्षं शरदिन्दुकान्ति (मालविकाग्निमित्रे)	८२–८३
दुर्गोल्लङ्घितविग्रहो मनसिजं (चन्द्रशेखरस्य)	५६
दुल्लहजणाणुराओ (रत्नावल्याम्)	२६८
दूरं समागतवति त्वयि (विश्वनाथस्य)	५६७
दूरागतेन कुशलं	१३१
दृप्तारिविजये राजन्	३७२
दृशा दग्धं मनसिजं (विद्धशालभञ्जिकायाम्)	४८४

	पृ०
प्रसाधिकालम्बितमग्रपादं (रघु० कुमार)	१३२
प्रस्थान वलयै. कृतं (अमरुशतके)	१६६
प्रागेव हरिणाक्षीणा	५६२
प्राणप्रयाणदु खार्त	३४५
प्राणेशेन प्रहितनखरेष्वङ्ग (विश्वनाथ)	१४८
प्रातिभं त्रिसरकेण गताना (शिशु)	१४३
प्रातावेकरथारूढौ पृच्छन्तौ (वेणी)	३०५
प्रायश्चित्त चरिष्यामि	१४६
प्रायेणैव हि दृश्यन्ते काम (वेणीसंहारे)	३३१
प्रिय इति गोपवधूभिः	५६१
प्रियजीवितताकौर्य	३५८–५६
प्रेमार्द्रो. प्रणयस्पृश (मालतीमाधवे)	१५८
प्रोज्ज्वलज्ज्वलनज्वाला	३६६–६७

व

बलमार्तभयोपशान्तये	६७४
बलावलेपादधुनापि (शिशुपालवधे)	५६६
बालश्च णाहं दूती	६५१
बाले नाथ विमुञ्च (अमरुशतके)	१११
बृहत्सहायः कार्यान्त (शिशुपालवधे)	६४१
ब्राह्मणातिक्रमत्यागो (महावीरचरिते)	२३०

भ

भक्तिर्भवे न विभवे	६७४
भग्न भीमेन भवतो (वेणीसंहारे)	२८०
भग्न धम्मिल्ल वीक्ष्यैव (गाथासप्तशत्याम्)	१६४
भङ्गापवर्जितैस्तेषां (रघुवंशे)	५३४
भाति पद्म. सरोवरे	३७३
भानुः सकृद्युक्ततुरङ्ग (अभिज्ञानशा०)	४१३
भिसिणीअलसअणीए (विश्वनाथस्य)	१५६
भिक्षो मासनिषेवणं प्रकुरुषे	३५५–५६
भुक्तिमुक्तिकृदेकान्त	२१०–२११
भुजङ्गकुण्डली (राजानकरुय्यकस्य श्रीकण्ठस्तवे)	४७६–८०
भूतयेऽस्तु भवानीशः	३७५
भूमौ क्षिप्त शरीरं (वेणीसंहारे)	३१२
भूयः परिभवभ्रान्तिलज्जा	२६६
भो लङ्केश्वर दीयता जनकजा (बालरामायणे)	१७४
भ्रातर्द्विरेफ भवता भ्रमता (विश्वनाथस्य)	१४८
भ्रूभङ्गे रचितेऽपि दृष्टिरधिक (अमरुशतके)	१६२–६३

म

मखशतपरिपूतं (मृच्छकटिके)	३०८
मञ्जुलमणिमञ्जीरे (विश्वनाथस्य)	४६१
मत्वा लोकमदातारं सन्तोषे	३३६
मथ्नामि कौरवशतं समरे(वेणीसंहारे)	२२७
मधु द्विरेफ. कुसुमैकपात्रे (कुमारसम्भवे)	२२
मधुपानप्रवृत्तास्ते	६६५
मधुरया मधुरोधितमाधवी (शिशुपालवधे)	४७३
मधुरः सुधावदधरः	५२३
मधुरवचनै सभ्रमैः (शृङ्गारतिलके)	११०

	पृ०
मध्यस्य प्रथिमानमति (चन्द्रशेखरस्य)	१०६
मध्य तव सरोजाक्षि	५५६
मध्येन तनुमध्या मे	६८३
मनोजराजस्य सितातपत्र	५४५
मन प्रकृत्यैव चल (रत्नावल्याम्)	३०२
मन्थायस्तार्णवाम्भ (वणीसहारे)	४७५
मन्द हसन्त पुलक	४८५
मयि सकपट किंचित्कापि (विश्वनाथस्य)	१४६
मल्लिकामुकुले चरिड	२०५
मल्लिकाचितधम्मिल्ला	६८५
मल्लीमतल्लीषु वनान्तरेषु (उदारराघवे)	१८६
महदे सुरसध मे (आनन्दवर्धनस्य देवीशतके)	४६८
महिलासहस्सभरिए (गाथासप्तशत्याम्)	२०५, ५७६
मा गवमुद्वह कपोलतले	१३०
मात किमप्यसदृश	३४४
मानमस्या निराकर्तुं (काव्यादर्शे)	६८२
मान मा कुरु तन्वङ्गि	४२३
मानोन्नता प्रणयिनी	२२५
मामाकाशप्रणिहितभुज (मेघदूते)	१४५
मारमासुषमा चारुरुचा (विश्वनाथस्य)	५१५
मुग्धा दुग्धधिया	५६०
मुखमिन्दुर्यथा पाणे	५२४
मुख तव सुरभ्राक्षि	५५२
मुख चन्द्र इवाभाति	४३२
मुखमेणीदृशो भाति	५७४
मुख मान हि मानिनि	३८६
मुक्तोत्कर सङ्कल्पशुक्ति	५८३
मुनिजयति योगीन्द्रो (ध्वनिकारस्य)	६६०
मुहुरङ्गुलिसङ्गृताधरोष्ठ (अ० शाकुन्तल)	२१७
मुहुरुपहसितामिवा	१२३
मूर्द्धव्याधूयमान (विश्वनाथस्य)	४३६
मृगरूप परित्यज्य	३४०
मृणालव्यालवलया	१२७
मृत्कुम्भवालुकारम्भ	१४१
म्रियते म्रियमाणे या	३४२

य

यः कौमारहर स एव (शीलाभट्टारिकाया) १४	१४७
य स ते नयनानन्दकर	३८४
य सर्वशैला परिकल्प्य(कुमारसम्भवे)	३८५
यत्र ते पतति सुभ्रु	३७८
यत्र पतत्यबलानां	६४८-४६
यत्रोन्मदाना प्रमदाजनाना	२३५
यत्त्वन्नेत्रसमानकान्ति (का० यशोवर्मण)	६४४
यत्सन्यतभङ्ग (वेणीसहारे)	२६५
यदाह धात्र्या प्रथमादित (रघुवशे)	१८०
यदि मय्यर्पिता दृष्टि	३६४
यदि समरमपास्य नास्ति (वणीसहारे)	३४६
यदि स्यान्मण्डले	४६१
यदेतच्चन्द्रान्तर्जल	५८७
यद्यद्विरहदु ख	३८६
यद्वार्यं कूर्मराजस्य	३३५
यद्वैधुतमिव (वणीसहारे)	३३३
यमुनाशम्बरमम्बर	३७४
ययातेरिव शर्मिष्ठा(अ०शाकुन्तल)	३४०

	पृ०
दृश्येते तन्वि ! यावेतौ	३३६
दृष्ट्वा दृष्टिमधो ददाति (श्रीहर्षदेवस्य)	१०६
दृष्टि हे प्रतिबेशिनि (विज्जिकायाः)	२०१
दृष्टिस्तृणीकृतजगत्त्रय (उत्तररामचरिते)	१०३
दृष्ट्वैकासनसंस्थिते प्रियतमे (अमरुशतके)	११३
दृष्ट्वा केशव गोपराग	२३३
देवः पायादपायान्नः	६६८
देशः सोऽयमरातिशोणित (वेणीसंहारे)	३४६
देहि मे वाजिनं राजन्	४१०
दोर्दण्डाश्रितचन्द्रशेखरधनुः (महावीरचरिते)	१७६–७७
द्वयं गतं सम्प्रति शोचनीयताम् (कुमारसम्भवे)	४०१
द्वीपादन्यस्मादपि (रत्नावल्याम्)	२७२

ध

धनिनोऽपि निरुन्मादा	६५५
धन्यः स एव तरुणो नयने	२०६
धन्यासि वैदर्भि गुणैः (नैषधचरिते)	५६८
धन्यासि या कथयसि (विज्जिकया.)	१०६
धन्याः खलु वने वाताः (प्रतिमानाटके)	६२२
धम्मिल्लस्य न कस्य हेतव (वामनसूत्रे)	३८२
धम्मिल्ले नवमल्लिका	२०४
धम्मिल्लमर्पमुक्ते कलयति	११२
धवलयति शिशिररोचिषि	४२४
धातुमत्ता गिरिर्धत्ते	३८७
धिन्वन्त्यमूनि मदमूर्च्छद	२२२
धीरो वरो नरो याति	३६३
धुनोति चार्सि तनुते	६८२
धृतायुधो यावदहं (वेणीसंहारे)	१४५

न

न खलु वयममुष्य दानयोग्याः (शिशुपालवधे)	१२२
नच मेऽवगच्छति यथा (शिशुपालवधे)	११७
न तज्जलं यन्न सुचारु (भट्टिकाव्ये)	६६८
न तथा भूषयत्यङ्गं	१४६
न धत्ते शिरसा गङ्गा	६४७
न मे शमयिता कोऽपि	३८६
न व्रते परुषा गिरं	१२६
न्यक्कारो ह्ययमेव मे (हनुमन्नाटके)	७
नयनज्योतिषा भाति	४३०
नयनयुगासेचनकम्	१८६, ६५८
नयने तस्यैव नयने च	४४०
नवजलधरः सन्नद्धोऽयम् (विक्रमोर्वश्याम्)	३७६
नवनखपदमङ्गम् (शिशुपालवधे)	१६३
नवपलाशपलाशवनं (शिशुपालवधे)	४८८–८६
नष्टं वर्षवरैर्मनुष्यगणना (रत्नावल्याम्)	१००
नाभिप्रस्थाम्बुरुहासनेन (रघुवंशे)	६६२
नारायन्तो धनध्वान्तं	३६८
नाहं रक्षो न भूतो (वेणीसंहारे)	३१०
निजनयनप्रतिबिम्बैः	४७०
निर्माणकौशलं धातुः	५४७–८

श्लोकानामकाराद्यनुक्रमणिका

	पृ०
निरर्थक जन्म गत नलिन्या. (विल्हणस्यकन्ययो)	६११
निर्वाणदीपेष्वनिलाहतेषु (वेणीसंहारे)	२७६
निर्वीर्य गुरुशापभावित (वेणीसंहारे)	३३७
नि शेषच्युतचन्दन स्तनतटम् (अमरुशतके)	६२
निश्वासान्ध इवादर्शे (वाल्मीकेः)	१६३
निष्पर्यायारंभोद्भ्रान्त	६१६
निहताशयसंरंभ्य (वेणीसंहारे)	३०६
नीतानामनुलाभाय	४६७
नेदं नभोनगडलनम्बुराशि	५६६
नेत्र खञ्जनगञ्जने मरुणिज (विक्रमांकस्य)	१०८
नेत्रोत्पलैः	५३५
नो चाटु श्रवणे कृतं न च (राजशेखरस्य)	११६

प

पक्षमसुषमाण दीर्घाण (गाथासप्तशत्याम्)	१६२
पक्षादर्धदिनार्धारा	५४४
पक्षाभ्यां च एष सर्वत्रापि (गाथासप्तशत्याम्)	१६८
पक्षाभ्यां सिन्धुगर्भा सिन्ध (विक्रमांकस्य)	११६
पक्षाभ्यामनलेदुभ्यां गरु	६४६
पक्षादर्द्ध [रूपकं] [महाराजवीरस्य]	१०१
पक्षापुरन्धन वर्द्धतारं (विक्रमांकस्य)	१४०
पक्षिणो यदि नभसि सुप्ताः	४२४
पंक्तेन हरवक्त्र वेदं (विक्रमांकस्य)	४१०
पञ्चदन्तस्तुङ्ग	१६१

	पृ०
पञ्चवोपमितिसाम्यसपद्म [शिशुपालवधे]	१२६-३०
पश्यन्त्यसख्यपथगा [विक्रमांकस्य]	६४६
पश्यामि शोक	३४१
पश्येत्कश्चिच्चल चपल रे	६६५
पाणि पल्लवेपेलव	३८८
पाणिरोधमविरोधितबाष्प (शिशुपालवधे)	१२६
पाण्डवाना सभामध्ये	५१७
पाण्डु श्याम	१५६
पादाहत यदुच्छया	६२८
पादाघातादशोकस्ते	४१५
पान्तु वो जलदश्यामा	५८५
पारेजल नीरनिधेरपरय	८८४
पुरन्दरादपि प्रविचलेद्यदि (भल्लटशतके)	६३१-३२
पूरिते रोदसी	४४३
पूर्यन्तां सलिलेन रत्नकलशा (वेणीसंहारे)	३१०
पृथुप्रतंस्वरपात्र	४१६
पृथ्वि स्थिरा भव (वाल्मीकायणे)	६४२
प्रकृतिजलधारावा	४२८
प्रणयपुरुषहितो	६६१
प्रणयमणिगर्भालीलपरिहास (मालविकाग्नि)	१४१
प्रणय तव यदि	६०२
प्रतिकूलतामुपगते हि विधौ (विक्रमांकस्य)	४६५
प्रतापाक्रान्तस्य	६३७
प्रति मदेरं मम गन्तु (वाल्मीकेः)	२६३
प्रत्यग्र घनैर्नु	३७२
प्रत्यग्रयुग्म तरुण	३३६

	पृ०
यमेतयोरेकतरापदे	
यशोऽधिगन्तुं सुखलिप्सया (किरातार्जुनीये)	६७१
यस्यां प्रसरति	४०६
यस्य न कवितां दयिता	५३२
यस्यात्मजत्व गुरुकीर्ति (रघुवंशे दशरथस्य)	४८७
या जगत्यामनोज्ञस्य	२१
यान्ति नीतानिचोलित्वो	३६८
या विनानो वृथा प्राणाः	४१८
यानः पुन्नारे वादि (विद्धनाथस्य)	३६६
यावदर्थपदा वाचं (शिशुपालवधे)	१६६
याश्चा सन्यपि सद्गुणानुनरते	६४१–४२
युक्तः कन्याभिस्तनया	१२८
युगान्तकालप्रतिसंहृतात्मनो (शिशुपालवधे)	४३६
युष्मान् हेरयति कौथाल्लोके(वेणीसंहारे)	६६४
येन ध्वस्तमनोभवेन (चन्द्रकस्य)	२६४
योऽकस्मान्निनास्वि	४६६
योऽनुभूतः स्वयाद्वा.	६२४
योगेन दलिताशयः	६०४
योधः शस्त्रं बिभर्ति(वेणीसंहारे)	३७३
र	
रक्तेक्षणोन्मीलितपाटलोत्पलनयनः	१०६
रक्तप्रसाधनभुवः (वेणीसंहारे)	२८०
रणास्यति उरः	३७८
रजनीषु विमलभानोः	२०३
रजिता तु विविधरत्नशोभा (किरातार्जुनीये)	८८६
रतिनाथमथं भिन्ते	४८६
रतिश्रमजलः शिशिर	

	पृ०
ध्वान्तश्चरतस्तथा	
नणे चरणप्रान्ते	
राजते मृगलोचना	
राजनारायणं	
राजन्राजसुता न पाठयति	
राजानः सुतनिर्विशेषमधुना (प्रभावत्याम्)	
राजीवमिव राजीवं	
राज्यं च वसु देहश्च	
राज्ये सारं वसुधा (रुद्रटस्य काव्यालङ्कारे)	
रामनन्मथशरेण (रघुवंशे)	१४
रामो मूर्ध्नि निधाय (उदात्तराघवे)	
रावणस्यापि रामास्तो (रघुवंशे)	
रावणावग्रहक्लान्त (रघुवंशे)	
रोलम्बाः परिपूरयन्तु (विद्धनाथस्य)	
ल	
युष्माकं कुरुता	
लक्ष्मणेन समं रामः	
लक्ष्मीवक्षोजकस्तूरी	
लग्नं रागाहृताङ्गया (पद्मवैरेण्याम्)	
लङ्केश्वरस्य भवने(कुन्दमालायाम्)	
लज्जापज्जत्तपसाहणाइं,	
लताकुञ्जं गुञ्जन्मद	
लतेव राजसे तन्वि	
लाक्षागृहानलविषान्न (वेणीसंहारे)	
लाङ्गलेनाभिहत्य (विद्धनाथस्य)	
लावण्यमधुभिः पूर्ण	३
लावण्यं यदसौ कान्तिः	३
लिम्पतीव तमोऽङ्गानि(मृच्छकटिके)	५
लोलगतैरपि तत्प्रयतो(जानकीहरणे)	

	पृ०
व	
वक्त्रस्यन्दिस्वेद	६८
वदनमिदं न सरोजं	५६
वदनाम्बुजमेणाक्ष्या	७८
वदन मृगशावाक्ष्या	५८
वत्सस्य मे प्रकृति (वेणीसंहारे)	३४
वनेचराणा वनितासखाना (कुमारसम्भ)	५७
वनेऽखिलश्लाघ्यगुणाः	६४
वर्ण्यते किं महासेनो	३७
वर्षत्येतदहर्पतिर्नतु घनो	४१
वल्लभोत्सङ्गसङ्गेन	६८
वसन्तलेखेकनिबद्धभावं (विश्वनाथः)	१०
वाचमुवाच कौत्सः	६३
वाणीरकुडङ्गलीणसउणि (ध्वन्यालोके)	३२
वाप्यो भवन्ति विमलाः	६८
वारिजेनेव सरसि	३६
वासवाशामुखे भाति	६६
विकसन्नेननीलाब्जे	६७
विकसितमुखीं रागासङ्गात् (विश्वनाथय)	१२
विकसितसहकार	१६५
विचरन्ति विलासिन्यो	६७०
विदूरे केयूर पुरु (र० नाटके)	१२०
विदूषे	८५२
विधवति मुखाम्बुजमस्या	५३०
विनयाते मुदशो दृशोः परग (शिशुपालवधे)	१६३
विना जलदकालेन	६११
विपिने क्व जटानिबन्धन (वि० राघवविलासे)	१७२
विपुलेन सागरशयस्य (शिशुपालवधे)	६६२
विभाति मृगशावाक्षी	३८६
विमल एव रविर्विशदः	५६८
विरहे तव तन्वङ्गी	६५२
विललाप सवाष्प (रघुवशे)	६७७
विलोकनेनैव तवामुना (शिशुपालवधे)	१८२—८३
विलोक्य विततं व्योम्नि	४०६
विवृण्वती शैलसुतापि(कुमारसम्भवे)	१२४
विसृष्टरागादधरान्निवर्तितः (कुमारसम्भवे)	६७१
विसृज मुन्दरि (मालविकायाम्)	३२०
वीक्षितु न क्षमा स्वधूः	६७५
वेदान्तेषु यमाहुरेकपुरुषं (विक्रमोर्वश्याम्)	२७०
वृद्धोऽन्य. पतिरेष मच्चगतः	१४२
व्यतिक्रमलवं	४०२
व्यपोहितु लोचनतो (किरातार्जुनीये)	११३
व्याजस्तुतिस्तव	६३८
व्याधूय यद्वसन	६१२
श	
शठान्यस्याः (अमरुशतके)	६७
शशिनमुपगतेय (रघुवशे)	६६३
शची दिवसधूसखो (भर्तृहरेः)	६८०
शिखरिणि क्व नु नाम	२०८
शिरसि धृतमुरापगे (च० पुष्पमालायाम्)	२६१
शिरसुरेः स्यन्दत एव (ह० नागानन्दे	१७
,,	५८
शिरोपमद्री गिरिषु	
शीताशुसंभवमुपले (रत्नावल्याम्)	३०३—